*Sri Garibdas Oriental Series No —14*

# The Dharmasindhu

*by*

KASINATH UPADHYAYA

*With a Critical Introduction By*

PROFESSOR LUDO ROCHER

W Norman Brown Professor of South Asian Studies,
University of Pennsylvania—U S A

INDIAN BOOKS CENTRE
Exporters & International Booksellers
40/5 Shakti Nagar
Delhi 110007 (India)
Phones 7227336 7126497

SRI SATGURU PUBLICATIONS
DELHI INDIA

*Distributed by*
INDIAN BOOKS CENTRE
Exportors of Indian Books
40/5, Shakti Nagar,
Delhi 110007
INDIA

I S B N —81-7030 002 9

*Published by*
SRI SATGURU PUBLICATIONS,
Oriental & Indological Publishers,
Ist Floor,
40/5, Shakti Nagar,
Delhi 110007
INDIA

*First Published* Bombay—1907
*Reprint Edition* Delhi —1986

*Printed in India*

# INTRODUCTION

This short essay is meant to introduce to the reader a reprinted edition of Kāsinātha Upadhyāya's *Dharmasindhu* It will, first, say a few words about the author and his family, it will, then, concen trate on Kāsinātha's works, and especially, on the *Dharmasindhu* and its importance, up to the present day

Kāśinātha's grandfather, Kāsi Upādhyāya, belonged to the Upadhyaya—or Pādhye—family of Golavali village in the Ratnāgiri mandala of the Konkan The learned Kāsi Upādhyāya had two equally learned sons, Yajñesvara Upādhyaya and Ananta Upādhyāya Says the *Dharmasindhu* (p 400)

*srikāsyupadhayayavaro mahātmā*
*babhūva vidvaddvijarājarājah|*
*tasmād upādhyāyakulāvatamsau*
*yajñesvaro 'nanta imāv abhūtam||12||*
*yajñeśvaro yajñavidhanadakso*
*daivajñavedangasusāstrasiksah|*
*bhaktottamo 'nantagunaikadhamā*
*nantāhvayo 'nantakalāvatārah||13||*

The oldest brother, Yajñesvara, continued to live in Golavali village The younger brother, Ananta, left the Konkan, and established himself in Pandharikṣetra

*eso 'tyajaj janmabhuvam svakīyām*
*tām konkanākhyām suvisaktisālī|*
*sripandarange vasatim vidhaya*
*bhīmatate muktim agāt svabhaktyā||14||*

Kāsinātha Upādhyāya, or Bābā Pādhye, was the son of Ananta and Annapūrna who is reputed to have become a sati (1)

We know that Kāsinātha was a devotee of Vitthala—or Vithobā—, the god who is primarily worshiped at Pandharpur

district Not only did he write a work called *Viṭṭalaṛnmantrabhasya* (see below), also, both that text and the *Dharmasındhu* start with the word *Śrıvıṭṭhala* In addition, at the end of the *Dharmasındhu* (p 400) Kāsınātha expresses the hope that

*amunā pı ıyatām srīmadvıṭṭhalo bhaktavatsalah*

We also know that Kasınātha was close to the famous Marathi poet Moropant the poet s second son, Rāmakrṣṇa, was married to Kāśınātha's daughter Āvadı Kāśınātha also respectfully refers to Śrīmayūreśvarapandıtakavısvara's *Mantramayabhāgavata* and *Man tramayarāmayana* in his own *Viṭṭhalaṛnmantrabasya* [2]

Kāsınātha, who became a sannyāsin, died in saka 1727, or A D 1805 [3]

Among Kāśīnātha's works[4] mention should be made of a *Prayascittendusekhara*, also called *Prāyascittādiprayogasarasamgraha*, which was first published at the Granthaprakīsaka Press in Bombay, in 1863 Other editions include Cintāmani Press, Bangalore (1876), Bāpu Sadaśiva Śeta Śetye Hegiste Śrivardhanakara's Press, Bombay (1882) Venkatesvaia Piess, Bombay (1922), Ānandaśrama Press, Pune (1931=ĀnSS No 100, together with Nagojibhaṭta's work of the same name, and Śankarabhatta's *Kundāika*)

A *Vedastutıṭīkā* (on Bhāgavatapurāṇa 10 87) is mentioned in the *Catalogue of Sanskrit Manuscripts existing in Oudh Province for the year 1884* (vol 17, 1885, 10), and elsewhere It is described as a subcommentary om Śridhara's renowned commentary on the Bhāgavata There aie also references to a *Tosanisārasamgiaha*, on the *Rāsapañcādhyāyī* (Bhāgavata 10 29 33), and a subcommentary on Śridhara foi a section of Book One of the Bhāgavatapurāna

A woik which promises to be most interesting, and 'richly deserves to be printed and published,"[5] is called *Viṭṭhalaṛnmantra bhasya* The thesis of the text is stated at the outset, as follows

> *sarvasya devasya bhagavatpiatipādukalayā sakalasūktanām tatparatvam spastam eva/tathāpi viseṣatah śrīviṭṭhala paiatvasya sraddhāvadvidvajjanānam bodhartham yathāmati katicid eva mantrāh pradarsyante/*

The author then proceeds to show, for twelve stanzas of the Rgveda (1 95 1-11 and 1 164 31), that they are applicable to the worship of

Vithobā A Calcutta manuscript of this text (Haraprasad Shāstri *A Descriptive Catalogue of the Sanskrit Manuscripts in the Royal Asiatic Society*, Calcutta 1923, vol 2, No 176) is dated Śaka 1720, a Pune manuscript (Deccan College ms No 100 of 1869 70, described by Kane *History of Dharmaśāstra* 21 2, p 977) is dated Śaka 1731

Except for the *Prāyaścittenduśekhara* (see above), the *Dharmasindhu* is the only work by Kāśināth a which has been published so far It was first printed at the Guruprasāda Press in Bombay, in 1850, and has been printed again ever since Among the editions that came to this writer's notice—and there are others which he has not seen—the following may be mentioned

—in Pune Vitthala Sakharāma Agnihotrin's Press, 1861, 1870, Buddhiprakāśa Press, 1870, Jagaddhitecchu Press, 1882, Bharatabhūsana Press, 1911 (with Marathi translation), Vijaya Press, 1925,

—in Bombay Nitiprakāśa Press, 1869, Ganapatakrsnaji's Press, 1874, Nirnayasāgara Press, 1874, 1886, 1926 (all with Marathi transl ), 1936 Jñānadarpana Press, 1879,

—in Ratnagiri Jaganmitra Press, 1879,

—in Banaras Kashi Sanskrit Series No 183, 1968

The edition which is reprinted in this volume was published at the Venkateśvara Steam Press, samvat 1964 sake 1829, or A D 1907

The book is normally referred to as the *Dharmasindhu* in the text itself, however, it is called both *Dharmabdhisāra* (p 1) and *Dharmasindhusara* (p 400 and elsewhere) The text also provides us with the date of its composition *idanīm dvādaśādhikasapta daśasatasamkhyāyike śalivahanaśake* , i e , Śaka 1712, or A D 1790 91

The *Dharmasindhu* is divided into three *paricchedas* the third of which is again subdivided into a *pūrvārdha* and an *uttarārdha* The four parts are of rather uneven length, 30, 87, 170, and 112 pages, respectively The first two parts deal with an infinite number of rituals, for most of them with special emphasis on the time on which they should or should not be performed The first half of the third part concentrates more in particular on the various *samskāras*, starting

मुंडनं पिंडदानं च प्रेतकर्म च सर्वशः ॥ न जीवत्पितृकः कुर्याद्विवाहं पितरेव च" इत्यादिवचनात् ॥ पिंडददानादिविस्तरं कर्तुमशक्तेनापि सांकल्पविधिः कार्यः ॥

## अथ गर्भिणीपतिजीवत्पितृकयोरशक्तस्य सांकल्पिकविधिः ।

सांकल्पिकविधावर्घ्यदानं १ समंत्रकावाहनं २ अग्नौकरणं ३ पिंडदानं ४ तीर्थकेरदानं ५ स्वधां वाचयिष्ये ६ ॥ ॐ स्वधोच्यतामित्यादिस्वधावाचनप्रयोगं वर्जयेत ॥

## अनेकब्राह्मणालाभे ।

अनेकब्राह्मणालाभे देवस्थाने शालग्रामादिदेवमूर्तिं संस्थाप्य श्राद्धं कार्यम् ॥ तथा विप्रालाभे दर्भबटुविधिना श्राद्धम् ॥

## अथ प्रथमाब्दे महालयः ।

पित्रोर्मरणे प्रथमाब्दे महालयः कृताकृतः ॥ महालयो मलमासे न कार्यः ॥

## अथापरपक्षे वार्षिकप्राप्तौ ।

अपरपक्षे प्रतिवार्षिकप्राप्तौ मृततिथौ वार्षिकं कृत्वा तिथ्यंतरे सकृन्महालयः कार्यः ॥ प्रतिपदादिदर्शांतादिपक्षेषु मृततिथौ वार्षिकं कृत्वा पाकांतरेण महालयः ॥

## अथ दर्शे महालयवार्षिकयोः प्राप्तौ ।

अमायां प्रतिवार्षिकसकृन्महालयप्राप्तौ पूर्वं वार्षिकं ततो महालयस्ततो दर्शश्राद्धमिति त्रयं पाकभेदेन ॥ महालयमात्रप्राप्तावपि पूर्वं महालयस्ततो दर्शः ॥

## अथ सकृन्महालये मृततिथिनिर्णयः ।

मृततिथौ सकृन्महालयपक्षे तत्तिथेर्ग्राह्यत्वनिर्णयोपराह्णव्याप्त्या दर्शवदिति भाति ॥

## अथ भरणीश्राद्धनिर्णयः ।

अत्रापरपक्षे भरणीश्राद्धाद्गयाश्राद्धफलप्राप्तिः ॥ भरणीश्राद्धमप्पिंडकं षड्दैवतं सांकल्पविधिना कार्यम् ॥ देवा धूरिलोचनौ पुरूरवार्द्रवौ वा भरणीश्राद्धं काम्यं गयाश्राद्धफलकामेन प्रतिवर्षं कार्यम् ॥ केचित्पित्रादिमरणोत्तरं प्रथमवर्षे एव कुर्वंति ॥ द्वितीयादिवर्षे न कुर्वंति तत्र मूलं चिंत्यम् ॥ मम तु "न दैवं नापि वा पित्र्यं यावत्पूर्णो न वत्सरः" इत्यादिवचनेन सर्वस्यापि दर्शादिश्राद्धस्य प्रथमाब्दे निषेधाद्वर्षांते एव पितृत्वप्राप्तेश्च द्वितीयादिवर्षे एव कर्तुं युक्तमिति भाति ॥ यत्तु पितृभिन्नोपि योयो म्रियते तस्यतस्य प्रथमाब्दे भरणीश्राद्धं क्रियते तत्रापि

by the director of the Musée Guimet, L de Milloué "Le Dharmasindhu ou océan des rites religieux Par le Prêtre Kāsinatha Traduit du Sanscrit en anglais et commenté par M A Bourquin Première partie Traduit de l'anglais, par L de Milloué' The translator again told his French readers that "the Dharmasindhu is the most important text on the religious rites of the Hindus" (p 151)

The importance of the *Dharmasindhu* in modern times is also evident from the fact that, on several occasions, it has been referred to in the courts of law Speaking about the Sanskrit texts most often invoked by the pandits attached to the Anglo Indian law courts, V N Mandlik says "Works like the Mitakshará, the Mayukha, the Viramitrodaya, the Bhagavata, Manu Smriti, and the Dharmasindhu and the Nirnayasindhu, and such like were more often brought into requisition than others' [6] Even in more recent times, long after the pandits had disappeared from the courts, references to the *Dharmasindhu* continue to appear in the law reports The following are three examples, chose at random, without an exhaustive search in the reports

In *Vadrevu Viswasundara Row* v *Ryali Somasundara Row* (1920) 43 Mad 876, the Court held that "The performance of the upanayanam in a family, into which a boy is wrongly believed to have entered by an invalid adoption, is a nullity and is no bar to a subsequent adoption" The *Dharmasindhu* is referred to as one of the "Sanskrit texts of good repute," and "in the Dharmasindhu Nirnaya Sagara Press Edition (a work referred to as authoritative in Mandlik s Hindu Law, Introduction, lxx) at p, 161, reference is made to one kind of upanayanam as that which is redone on account of the first ceremony being inefficacious by reason of a defect in any of its parts, such as the time" (p 892)

The decision in *Pedda Rami Rami* v *Gangi Reddi* (1925) 49 Mad 722, was that "Under the Hindu Law, a maternal uncle's son is a preferable heir to a maternal aunt's son" The Court noted

> "In the above discussion I have attempted to establish the superior spiritual efficacy of the mother's brother's son to mother's sister's son from general principles As a particular case, the fact has been recognized in Dharma-

> Sindhu,[9] a book which, though mentioned by West and Buhler as an authority in Western India, is of high authority along with Nirnaya Sindhu, in the Telugu country (the parties in this case are Telugus) being constantly referred to by pandits and purohits (see translation in Sarvadhikari pp 86 89) "

In fact, Rajumar Sarvadhikari's Tagore Law Lectures 1880 *The Principles of the Hindu Law of Inheritance* (2nd ed , Madras The Law Book Depot, 1922), praises the *Dharmasindhu* as "a work of wide celebrity in the Benares School, and his authority in ceremonial matters is held in very high respect In fact, wherever there is any difference of opinion on this subject between the teachers of different Schools, the authority of Dharma Sindhu is universally deferred to in all the districts included in the Benares School' (p 82) Sarvadhikari also translates a far longer passage of the *Dharmasindhu* than that indicated in *Reddi* v *Reddi*, the translation includes the entire passage from *Atha śraddhādyadhikārnirnayah* (p 293 of this edition) up to, and, including, the chapter on *putrabhinnānām kṛtyavicārah* (p 296)

Finally, in *Sakharam Narayan Patwardhan* v *Balkrishna Sadashiv Modak* (1925) 49 Bom 739, it was decided that "According to the Hindu Law as prevailing in the Bombay Presidency the father's sister's son is entitled to succeed to the property of a deceased Hindu in preference to the maternal uncle" (p 756) In the course of his discussion, the Judge stated

> "I have dealt with the question so far without reference to the test of spiritual benefit to the propositus That test is difficult of application generally speaking at regards Bandhus when one is connected through the paternal line and the other through the maternal line It brings into operation the difference between the oblations which it is the duty of a person to offer at different kinds of Shraddhas I shall refer briefly to Dharmasindhu and Nirnayasindhu as to the obligations to offer oblations to the maternal ancestors Parvana Shraddhas are of three types which are described as Ekaparvanaka, Dwiparvanaka and Triparvanaka in the Dharmasindhu "

He subsequently quoted the entire passage, from *Atma sraddhabhedāh* up to *kesñmcit sutre daiso 'pi tripaiyanakas catuspaiyanako va* (13 lines on p 398 of this edition)

The three court decisions, which I just referred to, two from Madras and one from Bombay clearly show that the often repeated statement that the *Dhaimasindhu* is 'a work of repute in the Benares School,"[10] actually underestimates the importance of the text The fact that the *Dhaimasindhu s* "authority on ceremonial matters is in high respect, ' is true for all parts of India Its republication in the "Sri Garib Dass Oriental Series," therefore, deserves every encour agement

Ludo Rocher
W Norman Brown Professor
of South Asian Studies
University of Pennsylvania

---

[1]*New Catalogue Catalogorum* vol 4 (1968) p 129

[2]See P V KANE *History of Dhaimasastra* vol 1 2 (2nd ed 1975), p 978, KANE (p 977) also refers to information on Kaśinatha s family in Moropant s biography by L R PANGARKAR (1908 ed ch 16 pp 107 119)

[3]KANE *ibidem New Catalogus Catalogorum* vol 4 (1968), p 129

[4]For a complete list see *New Catalogus Catalogorum ibidem*

[5]KANE *op cit* p 977 note 1529

[6]See J DARMESTER S report on the progress of Indic studies, in *Journal asiatique* 8th series vol 4 (1884), pp 11 142 at p 41

[7]*Journal of the Bombay Branch of the Royal Asiatic Society* 15, 1881 82 p 2 note 16

[8]V N MANDLIK *The Vyavahāra Mayukha* Bombay Education Society Press 1880, Introduction p lxx

[9]The report quotes both in Devanagari and in transliteration the passage *tadabhave gotrajah tadabhave matāmahamātulatatputriadayah matrsapindah anukramena matrsapindabhave sapitrsvasri mātrsvasriputriah anuksamena matrsa pindah* (p 295 of this edition)

[10]Also at *Mayne s Treatise on Hindu Law and Usage*, 11th ed , Madras Higginbothams, 1950, p 53

॥ श्रीः ॥

# अथ धर्मसिन्धु--विषयानुक्रमणिका ।


| विषया | पृष्ठाङ्का |
|---|---|
| **अथ प्रथमपरिच्छेदः ।** | |
| सक्रान्तिनिर्णय | २ |
| दानम् | ,, |
| मलमास | ३ |
| अधिमासोदाहरणम् | ,, |
| क्षयमासोदाहरणम् | ४ |
| मलमासे वर्ज्यानि | ५ |
| शुक्रास्तादिषु वर्ज्यानि | ,, |
| सिंहस्थे वर्ज्यानि | ,, |
| सिंहस्थापवादे यात्रादिनिर्णय | ६ |
| तिथिनिर्णये सामान्यपरिभाषा | ,, |
| कर्मविशेषे निर्णय | ७ |
| एकभक्ते तिथिनिर्णय | ,, |
| नक्तव्रतेऽर्कवारादिदोषाभाव | ८ |
| याचिते निर्णय | ,, |
| व्रतपरिभाषा | ,, |
| सामान्यतो व्रतधर्मा | ,, |
| व्रतनियमादिभङ्गे प्रायश्चित्तम् | ९ |
| उपवासनाशकानि | ,, |
| अनुक्तौ व्रतविधि | ,, |
| व्रतादिसन्निपाते | १० |
| एकादश्या पारणाप्राप्तौ | ,, |
| प्रतिपदादिनिर्णय | ,, |
| द्वितीयानिर्णय | ११ |
| तृतीयानिर्णय | ,, |
| चतुर्थीनिर्णय | ,, |
| पञ्चमीनिर्णय | १२ |
| षष्ठीनिर्णय | ,, |
| सप्तमीनिर्णय | ,, |
| अष्टमीनिर्णय | ,, |

| विषया | पृष्ठाका |
|---|---|
| नवमीनिर्णय | १२ |
| दशमीनिर्णय | ,, |
| एकादशीनिर्णय | १३ |
| एकादशीव्रताधिकार | ,, |
| एकादशीव्रतनिर्णय | ,, |
| स्मार्तनिर्णय | १४ |
| व्रतप्रयोग | १५ |
| काम्योपवासादौ सूतिकादिप्राप्तौ | १६ |
| व्रतनियमभङ्गे प्रायश्चित्तम् | ,, |
| पारणाकाल | १७ |
| श्रवणद्वादशी | ,, |
| द्वादश्य नियमा | ,, |
| द्वादशीनिर्णय | ,, |
| त्रयोदशीनिर्णय | १८ |
| चतुर्दशीनिर्णय | ,, |
| पूर्णिमामावास्ययोर्निर्ण | ,, |
| इष्टिकाल | १९ |
| उदाहरणम् | ,, |
| अत्र बालबोधार्थं प्रकारान्तरम् | ,, |
| पौर्णमास्या विशेष | २० |
| अमावास्यायां कातीयाना वि. | २१ |
| अपराह्णसधौ चत्वार पक्षा | ,, |
| सामगानामिष्टिनिर्णय | २२ |
| पिंडपितृयज्ञकाल | ,, |
| श्राद्धेमावास्या निर्णीयते | २३ |
| इष्टिस्थालीपाके प्रथमारम्भविचार | ,, |
| विकृतिकाल | २४ |
| पशुयागकाल | ,, |
| चातुर्मास्यकाल | ,, |
| काम्यनैमित्तिकादीष्टिकाल | २५ |

| विषया | पृष्ठाका |
|---|---|
| आधानकालो नक्षत्राणि च | २५ |
| ग्रहणनिर्णय | ,, |
| ग्रहणे मन्त्रदीक्षा | २६ |
| ग्रहण पुरश्चरणविधि | ,, |
| ग्रहण शयनभोजनादिकृते | २७ |
| पक्वान्नग्रहणे विचार | ,, |
| वेधविचार | ,, |
| जन्मराशे शुभाशुभविचार | २८ |
| राशौ ग्रहणे दानविधि | ,, |
| समुद्रस्नानम् | २९ |
| तिथिविशेषे नक्षत्रविशेषे वारादौ च विधि-निषेध | ,, |

## अथ द्वितीयपरिच्छेदः ।

| | |
|---|---|
| मेषसक्रमणपुण्यकाल | ,, |
| वत्सरारम्भस्तिथिनिर्णयश्च | ,, |
| नवरात्रारम्भ | ,, |
| कल्पादय | ३२ |
| मत्स्यजयन्तीपक्ष | ,, |
| गौरीव्रतम् | ,, |
| चन्द्रव्रतम् | ,, |
| मासमादोलनगौरीव्रतम् | ,, |
| रामान्दोलनव्रतम् | ,, |
| श्राद्धफलम् | ३३ |
| मन्वादिश्राद्धलोपे प्रायश्चित्तम् | |
| पण्णवतिश्राद्धसख्या | ,, |
| दशावतारजयन्त्य | ,, |
| गणेशदमनकचतुर्थी | ,, |
| गुरुपञ्चम्या व्रतानि | ३३ |
| अशोककलिका | ३४ |
| राजनेयफलस्नानयोग | ,, |
| रामनवमीनिर्णय | ,, |
| व्रतप्रयोग | ,, |
| श्रीकृष्णान्दोलोत्सव | ३ |

| विषया | पृष्ठाका |
|---|---|
| दमनारोपणप्रयोग | ३५ |
| चतुर्दश्या नृसिंहस्य दोलनोत्सव | ३६ |
| वैशाखस्नानविधि | ३७ |
| वारुणीयोगनिर्णय | ,, |
| वैशाखे वृषभसक्रम | ,, |
| वसन्तपूजनम् | ,, |
| देवस्य जलाधिवासविधि | ,, |
| तुलसीभि पूजने मुक्ति | ,, |
| अश्वत्थसेचनविधि | ३८ |
| गोकडयनम् | ,, |
| प्रपादान गलतिबन्धनादि | ,, |
| वैशाखे मलमासे मासद्वय स्नानादिव्रतम् | ,, |
| तृतीयाया चन्दनपूजा | ,, |
| उदकुम्भदानप्रयोग | ३९ |
| युगादिश्राद्धलोपे प्रायश्चित्तम् | ,, |
| परशुरामजय ती | ,, |
| गगापूजनम् | ,, |
| अग्निष्टोमफलकपूजनम् | ,, |
| नृसिंहजय ती | ४० |
| व्रतप्रयोग | ,, |
| प्रार्थना | ,, |
| पौर्णमासीदानानि | ,, |
| वैशाखस्नानोद्यापनादि दानानि च | ,, |
| ज्येष्ठकृत्ये मिथुनसक्राति | ४१ |
| ब्रह्मदेवपूजनव्रतम् | ,, |
| वटसावित्रीव्रतम् | ,, |
| पूर्वविद्धापरविद्धयो सवा निष्कर्ष | ,, |
| उमावतार | ,, |
| गङ्गावतार | ,, |
| दशहरा विधि | ४२ |
| दशहरागहास्नप्रयाग | ,, |
| गगास्तोत्र स्कादे | ४३ |
| निजला एकादशी तदङ्गकुभदानम् .... | ४४ |
| गवामयनक्रतुफलपूजा | ,, |

| विषया | पृष्ठाका | विषया | पृष्ठाका |
|---|---|---|---|
| ज्यैष्ठ्या दानानि | ४४ | बह्वृचानामुपाकर्मकाल | ,, |
| बिल्वत्रिरात्रव्रतम् | ,, | यजुर्वेदोपाकर्मनिर्णय | ५३ |
| महाज्यैष्ठीयोग | ४५ | हिरण्यकेशीयानाम् | ,, |
| आषाढे दक्षिणायनसज्ञा कर्कसक्राति | ,, | आपस्तबानाम् | ,, |
| मासव्रतदानादिकम् | ,, | बौधायनानाम् | ,, |
| श्रीरामरथोत्सव | ,, | काण्वमाध्यदिनानाम् | ,, |
| मन्वादिद्वयम् | ,, | सामवेदिनाम् | ५४ |
| आषाढद्वादशीपारणानिर्णय | ४६ | अथर्ववेदिनाम् | ,, |
| चातुर्मास्यव्रतसकल्प | ,, | सर्वशाखिना साधारणविधि | ,, |
| शाकव्रतान्तरेषु च | ,, | ग्रहणसक्रान्तावुपाकर्म | ,, |
| आमिषगण | ,, | नूतनोपाकर्म | ५५ |
| काम्यव्रतानि | ,, | पचावत्तिवादिविचार | ,, |
| शाकव्रतनिर्णय | ,, | अकरणे प्रायश्चित्तम् | ,, |
| तन्मुद्राधारणनिर्णय | ४८ | सकल्पे विशेष | ,, |
| नरमेधफलकपूजा | ,, | रक्षाबन्धनम् | ५६ |
| अस्यामेव कोकिलाव्रतम् | ,, | कुलधर्म्मादौ पौर्णमासी | ,, |
| सन्यासिना व्यासपूजाक्षौरादि | ,, | श्रवणाकर्मादिसस्था | ,, |
| सक्षेपेण तद्विधि | ,, | अकरणे प्रायश्चित्तम् | ,, |
| आषाढकृष्णद्वितीयायामशून्यशयनव्रतम् | ४९ | पत्न्यारजस्यपि कार्या | ,, |
| श्रावणमासे सिंहसक्रान्ति | ,, | सकटचतुर्थीनिर्णय | ,, |
| मासव्रतानि | ,, | ज माष्टमीव्रतम् | ,, |
| सिंहे गोप्रसूतौ | ,, | अत्र पारणानिर्णय | ५९ |
| निशीथे गो क्रदने | ,, | सक्षेपेण व्रतविधि | ,, |
| वडवामहिषीप्रसूतौ | ,, | चन्द्रार्घ्यदानमत्र | ६१ |
| सोमवारभौमवारव्रतम् | ५० | कीर्तनविधि | ६२ |
| नागपचमीव्रतम् | ,, | प्रतिमासे ज माष्टमी | ,, |
| शाकदानमत्र | ,, | श्रावणदर्शे दर्भग्रहणम् | ,, |
| विष्णो पवित्रारोपणकाल | ,, | दर्भभेदा दश | ,, |
| पवित्राकरणे प्रायश्चित्तम् | ,, | कन्यासक्रान्ति | ६३ |
| सक्षेपत पवित्रकरणप्रयोग | ५१ | मासकृत्यम् | ,, |
| शिवपवित्राणि | ,, | हरितालिकाव्रतम् | ,, |
| अधिवासनादिप्रयोग | ,, | विनायकचतुर्थीव्रतम् | ,, |
| पवित्रारोपणमत्रादि | ५२ | अत्र चन्द्रदर्शननिषेध | ,, |
| अत्र पूर्णिमा पूर्वविद्धा ग्राह्या | ,, | चन्द्रदर्शने मत्रजप | ६४ |

| विषया | पृष्ठाका |
|---|---|
| गणेशपूजा | ६४ |
| ऋषिपचमीनिर्णय | ,, |
| दूर्वाष्टमीव्रतम् | ,, |
| ज्येष्ठादेवीपूजानिर्णय | ,, |
| विष्णुपरिवर्तनोत्सव | ६५ |
| श्रवणद्वादशीनिर्णय | ,, |
| अत्रोपवासनिर्णय | ,, |
| उपवासद्वयासामर्थ्ये | ,, |
| पारणानिर्णय | ६६ |
| मासान्तरे श्रवणद्वादशी | ,, |
| व्रते कृत्यम् | ६७ |
| वामनजयन्ती | ,, |
| दधिव्रत समाप्य पयोव्रतारभ | ,, |
| भाद्रशुक्लचतुर्दश्यामनन्तव्रतम् | ,, |
| दोरकनाशे प्रायश्चित्तम् | ६८ |
| अगस्त्योदय | ,, |
| प्रौष्ठपदीश्राद्धकृत्यम् | ,, |
| महालये पक्षा | ,, |
| सकृन्महालये वज्यम् | ,, |
| मृततिथौ सकृन्महालय | ६९ |
| सन्यासिना महालय | ,, |
| चतुर्दशीपौर्णमासीमृतस्य महालयनिर्णय | ,, |
| महालयगौणकाल | ,, |
| इदमन्नेनैव | ,, |
| पिंडदान कार्यम् | ,, |
| महालये देवतापरिगणनम् | ,, |
| अत्र ब्राह्मणविभाग | ७० |
| महालये महाविष्णु | ,, |
| सापत्नमातृ | ,, |
| अग्नौकरणबहिर्निर्णय | ७१ |
| परेहनि तर्पणादि | ,, |
| महालये पत्न्या रजसि | ,, |
| पक्षव्यापिश्राद्धे सूतकप्राप्तौ कृत्यनिर्णयो वक्ष्यते | ,, |
| पितरि सन्यस्ते जीवति विचार | ,, |

| विषया | पृष्ठाका |
|---|---|
| गर्भिणीपतिजीवत्पितृकयोरशक्तस्य साकल्पिकविधि | ७२ |
| अनेकब्राह्मणालाभे | ,, |
| प्रथमाब्दे महालय | ,, |
| अपरपक्षे वार्षिकप्राप्तौ | ,, |
| दर्शे महालयवार्षिकयो प्राप्तौ | ,, |
| सकृन्महालये मृततिथिनिर्णय | ,, |
| भरणीश्राद्धनिर्णय | ,, |
| माघ्यावर्षश्राद्धनिर्णय. | ७३ |
| अन्वष्टक्यश्राद्धम् | ,, |
| अविधवानवमीश्राद्धम् | ,, |
| अस्य दौहित्रप्रतिपच्छ्राद्धस्य च गौणकाल | ७४ |
| अत्र सुवासिनी | ,, |
| अत्र पिंडदानम् | ,, |
| अन्वष्टक्यलोपे प्रायश्चित्तम् | ,, |
| अत्र द्वादश्या सन्यासिना महालय | ,, |
| मघात्रयोदशीश्राद्धम् | ,, |
| श्राद्धविधौ बहुग्रथेषु बहव पक्षा | ,, |
| गजच्छाया | ७५ |
| युगादिसपाते तत्रादिनिर्णय | ,, |
| शस्त्रादिहते चतुर्दशी | ,, |
| अत्र एकोद्दिष्टनिर्णय | ,, |
| चतुर्दश्या वार्षिके | ,, |
| चतुर्दशीश्राद्धविधि | ७६ |
| अमाया गजच्छाया | ,, |
| दौहित्रप्रतिपच्छ्राद्धम् | ,, |
| कपिलाषष्ठी | ,, |
| अत्र सक्षेपतो व्रतविधि | ,, |
| आश्विने तुलासक्राति | ७७ |
| नवरात्रारभनिर्णय | ,, |
| नवरात्रेनुकल्पा | ,, |
| सक्षेपतो नवरात्रारभप्रयोग | ७९ |
| चडीपाठप्रकार | ८० |

| विषया | पृष्ठांका | विषया | पृष्ठांका |
|---|---|---|---|
| काम्यपाठ | ८० | अत्र यमतर्पणम् | ९२ |
| कामनाथ पाठसख्या | ८१ | उल्कादान दीपप्रज्वालनम् | ९३ |
| कुमारीपूजा | ,, | अमावास्याभ्यगनिर्णय | ,, |
| अथाशौचे नवरात्रप्रकार | ,, | कार्तिकमास | ,, |
| पचम्यामुपागललिताव्रतम् | ८२ | बलिपूजानिर्णय | ९४ |
| पुस्तके सरस्वतीपूजा | ,, | अत्र प्रतिपत्पूर्वासभवे परत्र सर्वा ग्राह्या | ,, |
| सप्तम्यादौ पत्रिकापूजा | ,, | अस्या द्यूतविधि | ,, |
| महाष्टमीनिर्णय | ,, | गोवधनपूजा | ९५ |
| महानवमीनिर्णय | ८३ | यमद्वितीया | ,, |
| नवमीहोमकाल | ,, | वह्निषष्ठी | ,, |
| होममत्रपक्षा | ,, | भीष्मपचकव्रतम् | ९६ |
| बलिदाननिर्णय | ८४ | एकादश्या शिवविष्णुदीक्षा | ,, |
| आशौचे समाप्तिनिर्णय | ,, | धात्रीमूले देवपूजाविधि | ९७ |
| लोहाभिसारिक कर्म | ,, | पारणादिनिर्णय | ९८ |
| अश्वपूजादि | ,, | प्रबोधोत्सवतुलसीविवाहौ | ,, |
| पारणाविसर्जनयो काल | ,, | तुलसीविवाहकाल | ,, |
| विजयादशमी | ८५ | व्रतोद्यापन चातुर्मास्ये | ९९ |
| शमीपूजनमत्रादि | ८६ | वैकुठचतुर्दशी | ,, |
| देशातर गच्छतो यात्राकाल. | ,, | चातुर्मास्यव्रताना समाप्तौ दानानि | १०० |
| कार्तिकस्नानाविधि | ८७ | लक्षप्रदक्षिणानमस्कारोद्यापनम् | ,, |
| मासव्रतानि | ,, | पद्माकयोग | १०१ |
| हरिजागरविधि | ,, | काम्यवृषोत्सगकाल | ,, |
| व्रतातराणि | ८८ | मागशीर्षेधनु सक्राति | ,, |
| कार्तिके वर्ज्यानि | ,, | नागपूजापचमी | ,, |
| मासव्रते दानानि | ,, | चपाषष्ठी | ,, |
| आकाशदीप उक्त | ८९ | दत्तजयती | १०२ |
| कोजागरव्रतम् | ,, | अन्वष्टकादि | ,, |
| आग्रयणकाल | ,, | अष्टकान्वष्टकालोपे प्रायश्चित्तम् | ,, |
| प्रथमाग्रयणम् | ९१ | द्वादशमासेषु रविवारा | १०३ |
| आग्रयणानुकल्पा | ,, | पौषे मकरसक्राति | ,, |
| करकचतुर्थी | ,, | अत्रैव शिवपूजाव्रतम् | १०४ |
| राधाजयती | ,, | माघस्नानम् | ,, |
| गोत्रिरात्रव्रतम्. | ९२ | स्नानविधिः | १०५ |
| आश्विनकृष्णनरकचतुर्दशी | ,, | माघनियमा | ,, |

| विषया | पृष्ठाका |
|---|---|
| माघे मलमासे | १०५ |
| अर्धोदययोगनिर्णय | ,, |
| माघे कुभसक्राति | १०६ |
| सहिरण्यतुलसीपत्रदानमत्र | १०७ |
| शालग्रामदानमत्र | ,, |
| प्रयागेवेणीदानम् | ,, |
| त्रिवेण्या देहत्यागविधि | ,, |
| माघचतुर्थी | १०८ |
| वसतपचमी | ,, |
| रथसप्तमी | ,, |
| माघस्नानोद्यापनम् | १०९ |
| शिवरात्रि | ,, |
| पारणानिर्णय | ,, |
| ताम्बूलमुखवासलक्षणम् | ११२ |
| मृन्मयलिगे शिवपूजाचिकीर्षाया तद्विधि | ,, |
| फाल्गुनमास | ११३ |
| होलिकानिर्णय | ,, |
| करिदिननिर्णय | ११५ |
| प्रभवादिचाद्रसावत्सरभेदा | ,, |
| चद्रादीना सक्रातौ पुण्यकाल | ११६ |
| ग्रहप्रीत्यर्थ दानानि | ,, |
| शनिमतम् | ११७ |
| शनिस्तोत्रम् | ,, |

## तृतीयपरिच्छेदपूर्वार्द्धम् ।

| | |
|---|---|
| तत्रादौ गर्भाधानसस्कार उच्यते | ११९ |
| प्रथमतौ विशेष | ,, |
| द्वितीयतौ नियमा | १२० |
| रजस्वलानैमित्तिकस्नाने | ,, |
| रजस्वलयो स्पर्शादौ | ,, |
| रजस्वलासूतिकयोश्चाडालादिस्पर्शे | ,, |
| रजसि जननमरणयो प्रथमदिननिर्णय | १२१ |
| अष्टादशादिनादर्वाक पुना रजोदर्शने | ,, |
| रोगजे रजसि | ,, |
| रोगजमध्ये मासजे | ,, |
| सूतिकाया रजसि | ,, |
| उच्छिष्टाया रजसि | ,, |
| रजोदशनाज्ञाने | १२ |
| चतुर्थदिने कार्याकार्ये | ,, |
| महासकटे चतुर्थदिने ग्राह्याग्राह्ये | ,, |
| आतुराया स्नानविधि | ,, |
| ग्रहणकाले रजसि | ,, |
| गर्भाधाने अस्तादिविचार | ,, |
| भुवनेश्वरीशान्ति | १२३ |
| शाल्यादिस्मार्तकर्मानुष्ठानक्रम | ,, |
| ऋतुकालनिर्णय ऋतौ गमनागमनविचार-स्तदपवादश्च | १२४ |
| अनृतौ गमनविचार | ,, |
| स्त्रीगमने निषिद्धकाल | ,, |
| गर्भाधानकाल | ,, |
| चन्द्रबलविचार | ,, |
| गर्भाधाने औपासनम् | १२५ |
| गृह्याग्निविच्छेदप्रायश्चित्तम् | ,, |
| सर्वाधान्यधाधानिनोर्गृह्याग्निसिद्धिविचार | १२५ |
| आग्निद्वयससर्ग | ,, |
| गर्भाधानसकल्प | १२६ |
| नादीश्राद्धविचार | ,, |
| नादीश्राद्धावश्यकत्वानावश्यकत्वविचार | ,, |
| नादीमुखपदविचार | १२७ |
| वृद्धिश्राद्धकर्तुर्जीवत्पितृकत्वे निर्णय | ,, |
| पितरि पितामहे जीवति विचार | ,, |
| समावर्तने नादीश्राद्धकर्तुर्देवतायाश्च विचार | १२८ |
| नादीश्राद्धप्रयोगे पिडादिविचार | ,, |
| सकटे गर्भाधानप्रयोग | १२९ |
| मैथुनाते विचार | ,, |
| नारायणबलिविचार | ,, |
| नागबलि | १३० |

| विषया | पृष्ठाका | विषया | पृष्ठाका |
|---|---|---|---|
| हरिवंशश्रवणागप्रायश्चित्तविचार | १३२ | व्रतादिष्वाशौचापवाद | १४७ |
| कृच्छ्रलक्षणम् | ,, | सूतिकाशुद्धि | ,, |
| यतिसांतपनम् | १३३ | जन्मनि दुष्टकालास्तच्छांतयश्च निर्णीयते | ,, |
| यवमध्यचांद्रायणादि | ,, | कृष्णचतुर्दशीजननशांति | १४८ |
| प्रत्याम्नाया | ,, | सिनीवालीकुहूदर्शजननशांतय | ,, |
| प्रायश्चित्तप्रयोग | ,, | सिनीवालीकुहूशांति | १४९ |
| गोमयस्नानम् | १३४ | दर्शदानाना नामानि | ,, |
| मृत्तिकास्नानम् | ,, | एतेषा मानम् | ,, |
| वारिस्नानम् | १३५ | दर्शशांति | ,, |
| हरिवंशश्रवणसकल्प | ,, | नक्षत्राणा शांति मूलादिजननफल च | १५० |
| विधानांतराणि | १३६ | शांतिकालनिर्णय | ,, |
| दत्तके ग्राह्याग्राह्यविचार | ,, | अग्न्याहुतिचक्रम् | ,, |
| सपत्न्या सपुत्रत्वे सपत्न्या न ग्राह्य | १३७ | मूलशांतिप्रयोग | १५१ |
| ऋग्वेदिना पुत्रप्रतिग्रहप्रयोग | ,, | आश्लेषाशांति | १५२ |
| यजुर्वेदिना बौधायनोक्तरीत्या प्रयोग | १३८ | ज्येष्ठानक्षत्रफल शांतिश्च | १५३ |
| विवाहादौ गोत्रविचार | १३९ | चित्रादिनक्षत्रशांतय | ,, |
| दत्तकसापिंड्यविचार | ,, | व्यतीपातवैधृतिसक्रांतिशांन्ति | १५४ |
| दत्तकसूतकविचार | ,, | वैधृतिशांतौ विशेष | ,, |
| दत्तकधनभागोक्ति | ,, | एकनक्षत्रजननशांन्ति | ,, |
| दत्तौरससमवाये औरसस्यैव पिंडदत्वम् | ,, | ग्रहणशांन्ति | १५५ |
| दत्तकन्याविचार | १४० | नक्षत्रगण्डान्तशांतिः | ,, |
| कन्यानामेवोत्पत्तौ पुत्रार्थं पुत्रकामेष्टि | ,, | तिथिगण्डान्तलग्नगण्डान्तशांति | १५६ |
| पुंसवनम् | १४१ | दिनक्षयभद्रादिशांति | ,, |
| सीमंतकाल | ,, | विषघटीशांन्ति | ,, |
| पुंसवनसकल्प | १४२ | यमलजननादिशांति | १५७ |
| सीमंतभुक्तौ प्रायश्चित्तम् | ,, | त्रिकप्रसवशांन्ति | ,, |
| गर्भिणीधर्मा | ,, | दंतजननशांन्ति | १५८ |
| गर्भिणीपतिधर्मा | ,, | प्रसववैकृतशांन्ति | ,, |
| सूतिकागृहप्रवेश | १४३ | नामकरणकाल | १५९ |
| जातकर्म | १४४ | देवतादिनामानि | ,, |
| जातकर्मसकल्प | ,, | प्रासादगजाश्वादीना नामविचार | ,, |
| पंचमषष्ठदिने षष्ठीपूजनप्रयोग | १४५ | नामकरणप्रयोगे विशेष | ,, |
| आशौचे कर्तव्यनिर्णय | १४६ | स्त्रीणा नामकर्म | १६१ |
| भोजनकाले सूतकप्राप्तौ | ,, | आदोलारोहणम् | ,, |

| विषया | पृष्ठाका | विषया | पृष्ठाका |
|---|---|---|---|
| दुग्धपानम् | १६१ | पुनरुपनयनम् | १७७ |
| जलपूजनम् | ,, | द्वितीय पुनरुपनयनम् | १७८ |
| सूर्यावलोकननिष्क्रमणे | ,, | तृतीयपुनरुपनयननिमित्तप्रकार | १७९ |
| भूम्युपवेशनकाल | १६२ | यजुर्वेदिना पु० | १८० |
| अन्नप्राशनकाल | ,, | ब्रह्मचारिधमा | ,, |
| जीविकापरीक्षा | ,, | ब्रह्मचारिव्रतलोपे प्रायश्चित्तम् | १८१ |
| कर्णवेध | ,, | अनध्याया | , |
| बालस्य दृष्टिदोषादौ रक्षाविधि | १६३ | अध्ययनधमा | ,, |
| वर्धापनविधि | १६३ | व्रतानि | १८२ |
| चौलम् | १६४ | समावर्तनम् | ,, |
| विद्यारभ | १६५ | समावतनकाल | १८३ |
| अनुपनीतधर्मा | ,, | समावर्तनसकल्पादि | १८४ |
| उपनयनम् | १६६ | आतुरसमावर्तनम् | १८७ |
| उपनयनकाल | ,, | विवाहे घटितविचार | ,, |
| तिथिविचार | १६७ | ग्रहमैत्री | ,, |
| नैमित्तिका | १६८ | गुणविचार | , |
| नक्षत्राणि | १६९ | गणा | १८६ |
| लग्न ग्रहबलम् | ,, | राशिकूटम् | ,, |
| जीर्णयज्ञोपवीतत्यागमत्र | १७० | गुणा | ,, |
| यज्ञोपवीतनाशे प्रायश्चित्तम् | ,, | नाडीविचार | ,, |
| मेखला | १७१ | कन्यासापिड्यविचार | १८७ |
| उपसग्रहणप्रकार | ,, | सापिड्यलक्षणम् | ,, |
| अभिवादननिषेध | १७२ | सक्षेपतो गोत्रप्रवरनिर्णय | १९१ |
| विनायकशातिविचार | ,, | गोत्रगणना | १९२ |
| ग्रहमखविचार | ,, | भरद्वाजा | १९३ |
| होमसख्यया कुडादिमानम् | ,, | केवलागिरस | १९४ |
| बृहस्पतिशातिप्रयोग | १७३ | अत्रय | ,, |
| उपनयनादौ सकल्पा | १७४ | विश्वामित्रा | ,, |
| सस्कारलोपे प्रायश्चित्तम् | ,, | कश्यपा | १९५ |
| मेधाजननात्पूर्वमग्निनाशे विचार | १७६ | वसिष्ठा | १९६ |
| बटुव्रतम् | ,, | अगस्त्या | ,, |
| मडपदेवतोत्थापनम् | ,, | द्विगोत्रा | ,, |
| मडपोद्वासनपर्यन्त निषेधा | ,, | मातृगोत्रवर्जननिर्णय | १९७ |
| विकलागोपनयनविचार | १७७ | सगोत्रादिविवाहादौ प्रायश्चित्तम् | १९८ |

| विषया | पृष्ठाका |
|---|---|
| अन्येपि विवाहे निषेधा | १९८ |
| मडना मुडनी षेध | १९९ |
| मुडनोदाहरणम् | ,, |
| प्रतिकूलविचार | ,, |
| प्रतिकूलापवाद | २०० |
| श्रीपूजनादिशाति | २०१ |
| अन्त्यकर्माभावनिमित्तकमगलप्रतिबध निर्णय | ,, |
| चतुर्थीकर्ममध्ये दर्शादिनिर्णय | ,, |
| त्रिवाहादौ रजोदोषसूतकनिर्णय | २०२ |
| सूतक्यन्नभोजने दोषाभावविचार | ,, |
| विवाहात्पूर्व कन्यारजोदोषे प्रायश्चित्तम् | २०३ |
| क्षयपक्षादिविचार. | ,, |
| वधुवरयोर्गुर्वादिबलविचार | ,, |
| कन्याविवाहकाल | २०४ |
| ब्राह्मादिविवाहभेदा | ,, |
| सप्तपदीविधे पूर्व कन्यान्यत्र देया | ,, |
| वाग्दानोत्तर कन्यामदातुविवाद | २०५ |
| परिवेत्रादिनिर्णयविचार | ,, |
| कन्यादातृक्रम | ,, |
| सर्वाभावे क या वरश्च नादीमुख्याधिकारी | ,, |
| परकीयकन्यादाने विशेष | ,, |
| वधूवरमूलजातत्वादिगुणदोषनिर्णय | ,, |
| विवाहे मासादिनिर्णय | ,, |
| ज्येष्ठस्य ज्येष्ठमासि विचार | ,, |
| आर्द्राप्रवेशविचार | ,, |
| तिथिनक्षत्रादिविचार | २०७ |
| मुहूर्तविचार तत्र लग्ने ग्रहबलम् | ,, |
| लग्ने वर्ज्यग्रहा | ,, |
| एकविंशतिमहादोषा | ,, |

| विषया | पृष्ठाका |
|---|---|
| सकटे गोधूलम् | २०८ |
| यथोक्तचन्द्रतारादयभावे दानानि | ,, |
| मडपादिमुहूर्ता | ,, |
| वैधव्यहर कुभविवाह | २०९ |
| वरस्य मृतभार्यात्वपरिहारोपाय | ,, |
| कन्यादानप्रशसा | ,, |
| कन्यागृहे भोजननिषेध स्त्रिया सह च .. | ,, |
| वाग्दानादिविचार | २१० |
| पुत्रविवाहे सकल्पादि | ,, |
| नादीश्राद्धे देवतामेदेन सकल्पा | ,, |
| जीवत्पित्रादीना नादीश्राद्धे | २११ |
| पित्रन्यकर्तृकनादीश्राद्धप्रयोग | २१२ |
| दत्तककर्तृत्वे व्यवस्था | ,, |
| सीमन्तपूजा | २१३ |
| गौरीहरपूजा | ,, |
| मधुपर्के विचार | २१४ |
| लग्नघटीस्थापनम् | ,, |
| अन्त पटधारणविधि | ,, |
| कन्यादानविधि | २१५ |
| पितामहादिकर्तृत्वे कन्यादाने ऊहे विशेष | २१६ |
| कन्यादानागत्वेन गवादिदाने मत्रा | ,, |
| ऋग्वेदिनामनुष्ठानक्रम | ,, |
| विवाहहोम | २१७ |
| गृहप्रवेशनीयहोम | ,, |
| चतुर्थदिवसे ऐरिणीदानम् | २१८ |
| विवाहोत्तरमाशौचे प्राप्ते | ,, |
| मण्डपोद्वासनादि | ,, |
| विवाहोत्तर निषेधा | ,, |
| वधूप्रवेश | २१९ |
| द्विरागमनम् | ,, |

| विषया | पृष्ठाका | विषया | पृष्ठाका |
|---|---|---|---|
| द्विरागमने वर्ज्यानि | २१९ | समारोप | २३२ |
| वध्वा प्रथमाब्दे निवास | ,, | यजमानस्य प्रवासोपस्थितौ | ,, |
| पुनर्विवाह | २२० | पर्वणि व्रतलोपेऽश्रुपाते च | २३४ |
| पुनर्विवाहनिमित्तानि | ,, | अग्न्युपघातनिमित्तानि | २३५ |
| अग्निशुश्रूषाधर्मादिचरणे ज्येष्ठकनिष्ठस्त्री व्यवस्था | ,, | श्रवणाकर्मलोपे | ,, |
| द्वितीयविवाहेऽग्निविचार | ,, | अग्निनाशकानि | २३६ |
| अग्निद्वयससर्गप्रयोग | ,, | पूर्वं भार्यामृतौ अग्निदाहविचार | २३७ |
| अर्कविवाह | २२१ | पराग्निपक्वनिषेध | |
| आह्निकप्रारभ | २२२ | गृह्याग्नौ पाकविचार | ,, |
| मृन्मयपुरीषोत्सर्गादिविधि | ,, | अरणिनाशे | २३८ |
| आचमनविधि | २२३ | नित्यदानम् | ,, |
| दन्तधावनम् | २२४ | पूज्यप्रतिमादिविचार | ,, |
| सङ्क्षेपत स्नानविधि | ,, | पूजालोपे दोष | २४० |
| वस्त्रधारणविधि | ,, | तृतीयेऽह्नो भागे जीविकाविचार | ,, |
| नैमित्तिकस्नानानि | २२५ | आपद्वृत्ति पक्वान्नभिक्षा च | २४१ |
| काम्यस्नानानि | ,, | ऋग्वेदिना मध्याह्नसन्ध्या | ,, |
| गौणस्नानानि | ,, | तैत्तिरीयाणाम | ,, |
| तिलकविधि | ,, | कातीयानाम् | ,, |
| भस्मनिपुड् | ,, | ब्रह्मयज्ञ | २४२ |
| सन्ध्याकाल | २२६ | बह्वृचा ब्रह्मयज्ञप्रयोग | ,, |
| सङ्क्षेपत सन्ध्याप्रयोगो बह्वृचानाम् | ,, | तर्पणम् | ,, |
| तैत्तिरीयाणा सन्ध्या | २२८ | हिरण्यकेशीयानाम् | २४४ |
| कात्यायनाना सन्ध्याप्रयोग | ,, | आपस्तबादीनाम् | ,, |
| आपासनहोम अधिकारिण | २२९ | कात्यायनानाम् | २४५ |
| आश्वलायनस्मार्तहोम | २३० | पञ्चमभागकृत्यम् | २४६ |
| हिरण्यकेशीयानाम् | ,, | प्रात सायवैश्वदेवस्य सहकरणपक्षे] तत्र प्रयोग | ,, |
| कात्यायनानाम् | २३१ | वैष्णवस्वरूपम् | ,, |
| होमलोपे प्रायश्चित्तम् | ,, | ऋग्वेदिवैश्वदेवप्रयोग | २४७ |
| पक्षहोम | २३२ | बलिहरणाख्यो भूतयज्ञ | ,, |

| विषया | पृष्ठाका |
|---|---|
| मनुष्ययज्ञ | २४८ |
| देवयज्ञादिचतुष्टयम् | ,, |
| कातीयानाम् | २४९ |
| फलादिभक्षणेपि पचमहायज्ञादिकरणे दोषो न | २५० |
| सवसाधारणो भोजनादिविधि | ,, |
| भोजने विधिनिषेधा | २५१ |
| वर्ज्यक्षीराणि | २५२ |
| अथसायसन्ध्या | ,, |
| सवत्र विष्णूच्चारण प्रायश्चित्तम् | २५३ |
| काम्यनैमित्तिकविचार | ,, |
| अथाधानविचार | ,, |
| शूद्रादिसस्कारविचार | २५४ |
| शूद्रधर्मविचार | ,, |
| वापीकूपाद्युत्सर्गादिकाल | २५५ |
| वृक्षादिरोपणकाल | ,, |
| मूर्तिप्रतिष्ठाकाल | ,, |
| प्रतिष्ठाधिकारिण | २५६ |
| प्रतिमाविचार | ,, |
| पचसूत्रीनिणय | २५६ |
| शालग्रामादिपूज्यसख्या | ,, |
| शूद्रस्य विप्रद्वाराशालग्रामपूजा | २५७ |
| रुद्राक्षतुलस्यादिसर्वजपमालाना सस्कार | २५८ |
| रुद्राक्षधारणसख्या | ,, |
| शिवे अभ्यगस्नानादिमानम् | ,, |
| श्रीविष्ण्वादिपचायतनानि | ,, |
| केशवादिचतुर्विंशतिमूर्तय | ,, |
| सिद्ध्यनुसारेणदेवमूर्तिप्रतिष्ठाप्रयोग | २५९ |
| स्थिराचार्या क्रमो विशेषश्च | २६३ |
| प्राय स्थिरचलार्चयो साधारणप्रयोग | २६४ |
| अथातोपि सक्षिप्त एकाध्वरविधानेन चल प्रतिष्ठा प्रयोग | २६७ |
| पुनरर्चानिमित्तानि पुन प्रतिष्ठा | ,, |
| देवालयादिभगे विचार | २६८ |
| जीर्णोद्धारविधि | ,, |
| प्रतिमाभगादिशान्ति | २६९ |
| पुष्पे ग्राह्याग्राह्यविधि | ,, |
| शिवनिर्माल्यग्रहणविचार | २७१ |
| नक्षत्रसज्ञा | ,, |
| कृषिमुहूर्तादि | ,, |
| धान्यमत्र | २७२ |
| वस्त्रादिविचार | ,, |
| शस्त्रघटनधारणे | ,, |
| सेवाकरणम् | ,, |
| अथवाहनारोह | ,, |
| राजदर्शन नृत्य च | ,, |
| हट्टरचनाक्रयविक्रयश्च | ,, |
| सेतुबध पशुक्रिया च | २७३ |
| धनस्य ग्रहणादिविचार | ,, |
| नष्टलाभे | ,, |
| राजाभिषेक | ,, |
| कूपादिखनने | ,, |
| क्षौरविचार | ,, |
| रोगोत्पत्तौ नक्षत्रफल रोगशातिर्दिनाधिश्च | २७४ |
| सर्वनक्षत्रसाधारण शातिप्रयोग | २७८ |
| सर्वरोगनाशकानि | ,, |
| औषधभक्षणे नक्षत्राणि | ,, |
| रोगमुक्तस्नानविचार | ,, |
| अभ्यग | ,, |
| वास्तुप्रकरणम् | २७६ |

| विषयाः | पृष्ठाङ्क |
|---|---|
| गृहप्रवेशविचार | ,, |
| धनाद्यर्थगमनम् | ,, |
| प्रस्थानविचार | २७७ |
| गोचरप्रकरणम् | ,, |
| पल्लीसरटयो फलम | २७८ |
| पल्लीसरटशान्ति | ,, |
| कपोतप्रवेशामधुवल्मीकोत्पत्तिपिंगलास्वरका | |
| कवैकृतग्राम्यारण्यादिमृगपक्षिविकारे शान्ति | ,, |
| काकस्वशमैथुनदर्शनादिशान्ति | ,, |
| घरट्टादिभेदनादिके | ,, |
| नानाविधदिव्यभौमान्तरिक्षोत्पातेषु शान्ति | २७९ |
| गायत्रीपुरश्चरणप्रयोग | ,, |
| पूर्तकमलाकरेऽश्वत्थोपनयनम् | २८१ |
| प्रयोग | ,, |
| सकलकर्मसाधारणपरिभाषा | २८२ |
| कलौ निषिद्धानि | २८४ |
| स्वप्नविचार | २८६ |
| अनिष्टफल' | ,, |
| जाग्रतावनिष्टानि | २८७ |
| विशेषत इष्टफला स्वप्ना | ,, |
| दुःस्वप्नदर्शने कृत्यम | ,, |

## तृतीयपरिच्छेदोत्तरार्धम् ।

| | |
|---|---|
| जीवत्पितृकेण वर्ज्यम् | २८९ |
| आधान विवाह सोमश्च | ,, |
| सन्यासविचार | ,, |
| प्रसगतो गयादिश्राद्धम् | २९० |
| दौहित्रप्रतिपच्छ्राद्धम् | ,, |
| पितृव्यमातामहादिवार्षिक कार्यम् | ,, |
| भीष्मतर्पण कार्यम् | ,, |
| पितरि जीवति महालयादावुच्चारे विशेष | २९१ |

| विषया | पृष्ठाका |
|---|---|
| मातुर्वार्षिकादावुच्चार | ,, |
| ज्येष्ठाधिकारविचार | ,, |
| पितृपितामहयोर्जीविने | ,, |
| व्युङ्क्तममृतौ | ,, |
| गृह्याग्निमतो विशेष | ,, |
| जीवत्पितृकवैश्वदेवे विशेष | १९२ |
| मुण्डननिषेधविचार | ,, |
| गर्भिणीपतिनापि वापिके पिण्डदानम् | ,, |
| प्रेतकर्मप्रतिप्रसव | २९३ |
| अनुपनीतस्य पित्रोरत्यकर्माणि | ,, |
| भ्रात्रादिकतृषपाते | ,, |
| पुत्रासन्निधौ पौत्रस्याधिकार | ,, |
| तिलाजलिदानम् | ,, |
| श्राद्धाद्यधिकारिनिर्णय | ,, |
| औरसाभावे विचार | २९४ |
| स्त्रीणा दाहाद्यधिकारिण | २९५ |
| पुत्रभिन्नाना कृत्यविचार. | ,, |
| धनहारेण प्रेतकार्याकरणे | २९६ |
| दत्तके जनकपितु सन्तत्यभावे विचार | ,, |
| दत्तकसन्तते पितृजनकश्राद्धविचार | ,, |
| उभयो सन्ततिसत्त्वे विचार | ,, |
| ब्रह्मचारिण श्राद्धादिविचार. | २९७ |
| शूद्रस्य श्राद्धमंत्रादिविचार | ,, |
| सच्छूद्रविषये विचार | ,, |
| हीनजातीयानाम् | ,, |
| सकटे विप्रद्वारा श्राद्धम् | ,, |
| श्राद्धशब्दार्थ | २९८ |
| श्राद्धभेदा | ,, |
| पार्वणलक्षण तद्भेदाश्च | ,, |
| एकोद्दिष्टलक्षण भेदाश्च | ,, |

| विषया | पृष्ठाका | विषया | पृष्ठाका |
|---|---|---|---|
| नादीश्राद्धम् | २९९ | श्राद्धदिनकृत्यम् | ३०९ |
| नैमित्तिकभेदा | ,, | गृह्याग्नौ पाकप्रकार | ,, |
| श्राद्धदेशा | ,, | भोजनपात्राणि | ,, |
| सप्तगोत्राणि कुलमेकोत्तर शत च | ,, | निमन्त्रणादिश्राद्धाहे भुक्तान्नपरिणामपर्यंत कर्तुर्विप्राणा च नियमा | ,, |
| श्राद्धकाला | ३०० | श्राद्धे ब्राह्मणसख्या | ३१० |
| पञ्चकयोगलक्षणम् | ,, | सामान्यत श्राद्धपरिभाषा | ३११ |
| दर्शश्राद्धानुकल्प्या | ,, | दर्भा | ३१२ |
| पितृव्यज्येष्ठभ्रात्रादिमहाल्यप्रकार | ,, | ऊहविचार | ,, |
| काम्यश्राद्धकाला | ,, | सक्षेपत आश्वलायनादीना प्रयोगक्रम | ३१३ |
| अपराह्णादिविशेषनिर्णय | ,, | पात्रम् | ३१४ |
| प्रतिसावत्सरिकमामासिकादितीथिनिर्णय उच्यते | ३०१ | आसनादि | ,, |
| पार्वणीतिथि | ,, | अर्घ्यकल्पना | ३१५ |
| ग्रहणादिने वार्षिकादिप्राप्तौ | ,, | वर्ज्यपुष्पाणि | ३१६ |
| मलमासे प्रथमवार्षिकम् | ,, | धूप | ३१७ |
| आत्रिवर्ष श्राद्धभोजन न | ३०२ | दीप ... | ,, |
| आमहेमश्राद्धकाल | ,, | अर्घ्यासादनम् | ३१८ |
| वृद्धिश्राद्धकाल | ,, | प्राचीनावीती | ३१९ |
| पितृणामन्नप्राप्तिप्रकार | ,, | अग्नौकरणम् | ३२० |
| विश्वेदेवा | ३०२ | होमप्रकार | ,, |
| श्राद्धे ब्राह्मणा | ,, | पाणिहोमप्रकार | ३२१ |
| तत्रोत्तमा | ३०४ | हुतशेषविचार | ,, |
| मध्यमा विप्रा | ,, | परिवेषणप्रकार | ,, |
| वज्या विप्रा | ३०५ | अन्ननिवेदनम् | ३२२ |
| श्राद्धार्हद्रव्याणि | ३०६ | भोजनकालधर्मा | ३२३ |
| हवि | ,, | अभिश्रवणसूक्तानि | ,, |
| वर्ज्यानि | ३०७ | अथविप्रवमने | ३२४ |
| मक्षिकादिदूषिते व्यवस्था | ३०८ | भोजनाते कृत्यम् | ,, |
| कदर्याादिद्रव्यनिषेध | ,, | बह्वृचाना पिडदानाते विकिर | ३२५ |
| जलेषु वर्ज्यावर्ज्यम् | ,, | अथपिंडदानम् | ,, |

| विषया | पृष्ठाका | विषया | पृष्ठाका |
|---|---|---|---|
| अभ्यजनादि | ३२६ | श्राद्धागतपणानिषेध | ३३६ |
| पत्न्यै पिंडदानम् | ,, | ब्रह्मयज्ञागे नित्यतपणे तिलयुक्ततर्पणानिषेध- | |
| गर्भिण्यादे प्राशननिषेध | ३२७ | काल | ,, |
| पिंडोपघाते | ,, | तिथ्यादिनिषेधापवाद | ३३७ |
| पिंडनिषेधनिमित्तानि | ,, | नादीश्राद्धसकल्पादि | ३३८ |
| विकिरदानप्रकार | ,, | विभक्ताविभक्तनिर्णय | ,, |
| पात्रचालनम् | ३२८ | तीर्थश्राद्धम् | ,, |
| स्वस्तिवाचनविसजनादि | ,, | तीर्थयात्राविधि | ३३९ |
| श्राद्धभोजनशेषादिविचार | ३२९ | तीर्थसामीप्यप्राप्तौ विधि | ,, |
| श्राद्धशेषभोजने कृच्छ्रम् | ,, | प्रयागे वेणीदानम् | ३४० |
| श्राद्धदिने वैश्वदेवनिणय | ,, | परार्थस्नानम् | ,, |
| नित्यश्राद्धम् | ,, | आशौचप्रकरणम् | ,, |
| श्राद्धानुकल्पा | ३३० | तत्रादौ गभनाशजननाद्याशौचम् | ३४१ |
| आमश्राद्धम् | ,, | मृताशौचम् | ३४२ |
| हिरण्यश्राद्धप्रकार | ३३१ | विवाहितकन्यावरणे | ३४३ |
| पक्वान्नद्रव्यकसाकल्पिकश्राद्धविधि | ,, | पित्रोमृतौ कन्याया | ,, |
| अन्येष्यनुकल्पा | ,, | मातुलादे | ३४४ |
| श्राद्धभोजने प्रायश्चित्तानि | ३३२ | बधुत्रयाशौचविचार | ,, |
| क्षयाहश्राद्धे विशेष | ,, | दत्तकादे | ३४५ |
| मातापित्रोमृताहैक्ये सहगमने च | ३३३ | आचार्यादिमरणे | ,, |
| सापत्नमात्रादिश्राद्धे | ,, | ग्रामे शवस्थितौ विचार, | ३४६ |
| क्षयाहाज्ञाने निर्णय | ,, | अतिक्राताशौचम् | ,, |
| श्राद्धविघ्ने निणय | ,, | देशातरलक्षणानि | ३४७ |
| आशौचे मासिकाब्दिकपाते | ३३४ | आहिताग्नेर्विचार | ,, |
| व्याधादिविप्ने | ,, | देशातरगतवाताप्रतीक्षाकालव्यवस्था | ३४८ |
| भार्यारजोदोषे | ,, | आशौचसपाते निर्णय | ,, |
| पतिमुद्दिश्याग्निप्रवेशे | ३३५ | शवस्पर्शानुगमनादिससर्गाशौचे | ३५० |
| श्राद्धसपाते निणय | ,, | अनुगमने | ,, |
| अपिण्डकश्राद्धपरिगणनम् | ३३६ | निहरणे | ,, |
| तिलतर्पणम् | ,, | ब्रह्मचारिण, भिन्नस्य | ३५१ |

| विषया | पृष्ठाका | विषया | पृष्ठाका |
|---|---|---|---|
| रोदने आशौचादि | ३५१ | दशाहमध्ये दर्शपाते निर्णय | ,, |
| अन्त्यकर्मकर्तु स्त्रीसगे | ,, | नवश्राद्धम् | ३७० |
| आशौचान्नभक्षणे | ३५२ | प्रेतश्राद्धधर्मा | ,, |
| स्वल्पसबधेपि | ,, | अस्थिक्षेपविधि | ३७१ |
| आशौचापवाद | ३५३ | तीर्थे अस्थिक्षेप कर्तु तत्पूर्वांगविधि | ,, |
| कर्मत | ,, | एकादशाहकृत्यम् | ३७२ |
| द्रव्यत | ३५४ | एकादशाहे महैकोद्दिष्टम् | ३७३ |
| मृतदोषत | ,, | एकादशाहे रुद्रगणश्राद्धम् | ३७५ |
| सर्पहते विशेष | ३५६ | शय्यादानम् | ,, |
| दुर्मरणेषु दानविधि | ,, | उदकुभ | ३७६ |
| विधिविहितजलादिमरणे | ३५७ | षोडशमासिकानि | ३७७ |
| पतितोदकदानाविधि | ३५८ | एषा काला | ,, |
| विधानत आशौचाभाव | ,, | अधिकमासे आवृत्तिविचार | ३७८ |
| जीवतोप्याशौचम् | ,, | सपिडीकरणविचार | ,, |
| और्ध्वदहिकारभोपयोगिनारायणबल्यादिप्र | | व्युत्क्रममृतौ | ३८० |
| कार उच्यते | ,, | स्त्रीपृच्यते | ,, |
| सर्पहते व्रतम् | ३५९ | प्रथमाब्दे निषिद्धानि | ३८१ |
| पालाशप्रतिकृतिदाहादिविधि | ३६० | विधानानि | ३८२ |
| अतीतप्रेतसस्कारकाल | ,, | ब्रह्मचारिमृतौ | ३८३ |
| घटस्फोटविधि | ३६१ | कुष्ठिमृतौ | ३८४ |
| अन्त्यक्रियारभ | ३६२ | रजस्वलादिमरणे | ,, |
| दशदानमत्रा | ,, | गर्भिणीमरणे | ,, |
| अन्तकाले नामोच्चारमहिमा | ,, | सहगमनम् | ३८४ |
| वैतरणीविधि | ३६४ | प्रयोग | ३८५ |
| उत्क्रान्तिधेनु | ,, | विधवाधर्मा | ३८६ |
| क्षौरविचार | ,, | स यास | ३८७ |
| अन्तकाले सूक्तश्रवणसकल्प | ३६५ | सन्यासग्रहणाविधि | ,, |
| साग्नेर्विशेष | ,, | सावित्रीप्रवेश | ३९० |
| गृहाच्छ्मशाने शवनयनप्रकार | ३६७ | अस्तात्पूर्व ब्रह्मान्वाधानम् | ,, |
| आरब्धे पिंडादिके विचार | ३६९ | विरजाहोम .... .... | ३९१ |

| विषया | पृष्ठाका | विषया | पृष्ठाका |
|---|---|---|---|
| वाक्योपदेश | ३९२ | मृतयतिसंस्कार | ३९५ |
| पर्यंकशौचप्रयोग | ३९३ | द्वादशाहे नारायणबलि | ३९६ |
| योगपट्ट | ,, | द्वादशाहे त्रयोदशाहे वा यथाचारमाराधनम् | ३९७ |
| अग्निहोत्रिणो विशेष | ,, | प्रसगाद्यतिधर्मा | ३९८ |
| ब्रह्मान्वाधानम् | ,, | परिच्छेदत्रयविषया | ३९९ |
| आतुरसन्यास | ३९४ | | |


इति धर्मसिन्धुविषयानुक्रमणिका
समाप्ता ।

| विषया | पृष्ठाका |
|---|---|
| मनुष्ययज्ञ | २४८ |
| देवयज्ञादिचतुष्टयम् | ,, |
| कातीयानाम् | २४९ |
| फलादिभक्षणेपि पचमहायज्ञादिकरणे दोषो न | २५० |
| सवसाधारणो भोजनादिविधि | ,, |
| भोजने विधिनिषेधा | २५१ |
| वर्ज्यक्षीराणि | २५२ |
| अथसायसन्ध्या | ,, |
| सवत्र विष्णूच्चारण प्रायश्चित्तम् | २५३ |
| काम्यनैमित्तिकविचार | ,, |
| अथाधानविचार | ,, |
| शूद्रादिसस्कारविचार | २५४ |
| शूद्रधर्मविचार | ,, |
| वापीकूपाद्युत्सर्गादिकाल | २५५ |
| वृक्षादिरोपणकाल | ,, |
| मूर्तिप्रतिष्ठाकाल | ,, |
| प्रतिष्ठाधिकारिण | २५६ |
| प्रतिमाविचार | ,, |
| पचसूत्रीनिणय | २५६ |
| शालग्रामादिपूज्यसख्या | ,, |
| शूद्रस्य विप्रद्वाराशालग्रामपूजा | २५७ |
| रुद्राक्षतुलस्यादिसर्वजपमालाना सस्कार | २५८ |
| रुद्राक्षधारणसख्या | ,, |
| शिवे अभ्यगस्नानादिमानम् | ,, |
| श्रीविष्ण्वादिपचायतनानि | ,, |
| केशवादिचतुर्विंशतिमूर्तय | ,, |
| सिद्ध्यनुसारेणदेवमूर्तिप्रतिष्ठाप्रयोग | २५९ |
| स्थिराचार्या क्रमो विशेषश्च | २६३ |
| प्राय स्थिरचलार्चयो साधारणप्रयोग | २६४ |
| अथातोपि सक्षिप्त एकाध्वरविधानेन चल प्रतिष्ठा प्रयोग | २६७ |
| पुनरर्चानिमित्तानि पुन प्रतिष्ठा | ,, |
| देवालयादिभगे विचार | २६८ |
| जीर्णोद्धारविधि | ,, |
| प्रतिमाभगादिशान्ति | २६९ |
| पुष्पे ग्राह्याग्राह्यविधि | ,, |
| शिवनिर्माल्यग्रहणविचार | २७१ |
| नक्षत्रसज्ञा | ,, |
| कृषिमुहूर्तादि | ,, |
| धान्यमत्र | २७२ |
| वस्त्रादिविचार | ,, |
| शस्त्रघटनधारणे | ,, |
| सेवाकरणम् | ,, |
| अथवाहनारोह | ,, |
| राजदर्शन नृत्य च | ,, |
| हट्टरचनाक्रयविक्रयश्च | ,, |
| सेतुबध पशुक्रिया च | २७३ |
| धनस्य ग्रहणादिविचार | ,, |
| नष्टलाभे | ,, |
| राजाभिषेक | ,, |
| कूपादिखनने | ,, |
| क्षौरविचार | ,, |
| रोगोत्पत्तौ नक्षत्रफल रोगशातिर्दिनाधिश्च | २७४ |
| सर्वनक्षत्रसाधारण शातिप्रयोग | २७८ |
| सर्वरोगनाशकानि | ,, |
| औषधभक्षणे नक्षत्राणि | ,, |
| रोगमुक्तस्नानविचार | ,, |
| अभ्यग | ,, |
| वास्तुप्रकरणम् | २७६ |

नारभो मेषारभो वा सूर्यस्य राशिद्वय भोगात्मको वसतादिषट्कसंज्ञकः सौर ऋतुः ॥ चैत्रमारभ्य मासद्वयात्मको वसतादिषट्संज्ञकश्चांद्रः ॥ मलमासे तु किंचिदूनन-वतिसंख्यैर्दिनैश्चाद्र ऋतुः॥श्रौतस्मार्तादौ चाद्रऋतुस्मरण प्रशस्तम्॥ मासश्चतुर्द्धा ॥ चांद्रः सौरः सावनो नाक्षत्र इति ॥ शुक्लप्रतिपदादिरमातः कृष्णप्रतिपदादि-पूर्णिमान्तो वा चांद्रो मासः॥तत्रापि शुक्लादिर्मुख्यः ॥ कृष्णादिस्तु विध्योत्तर एव ग्राह्यः ॥ अयमेव चैत्रादिसंज्ञकः कर्मादौ स्मर्तव्यः ॥ केचिन्मीनराशिमारभ्य सौराणा चैत्रादिसंज्ञामाहुः ॥ अर्कसंक्रातिमारभ्योत्तरसंक्रात्यवधिः सौरो मासः॥ त्रिंशद्दिनैः सावनः ॥ चंद्रस्याश्विन्यादिसप्तविंशतिनक्षत्रभोगेन नाक्षत्रो मासः ॥ प्रतिपदादिपौर्णिमातः शुक्लपक्षः ॥ प्रतिपदादिदर्शांतः कृष्णपक्षः ॥ दिवसः षष्टिघटिकात्मकः ॥ ॥ इति धर्मसिंधुसारे प्रथमोद्देशः ॥ १ ॥

## अथ संक्रातिनिर्णय उच्यते ।

मेषे सूर्यसंक्रातौ प्रागूर्ध्वं पंचदश पंचदश घटिकाः पुण्यकालः ॥ दशदशेत्येके ॥ वृषे पूर्वाः षोडश ॥ मिथुने पराः षोडश ॥ कर्के पूर्वास्त्रिंशत् ॥ सिंहे पूर्वाः षोडश ॥ कन्याया पराः षोडश ॥ तुलाया प्रागूर्ध्वं च पंचदश पंचदश दश दश इत्येके ॥ वृश्चिके पूर्वा. षोडश ॥ धनुषि परा' षोडश ॥ मकरे पराश्चत्वारिंशत् ॥ कुंभे पूर्वाः षोडश ॥ मीने पराः षोडश ॥ घटिकाद्वयाद्यल्पदिनशेषे मिथुनकन्याधनुर्मीनेष्वपि मकरेपि पूर्वा एव पुण्याः ॥ प्रभाते घटिकाद्वयाद्यल्पकाले वृषसिंहवृश्चिककुंभेष्वपि कर्केपि परा एव पुण्याः ॥ प्रभाते कर्कसंक्रांतौ पूर्वदिने पुण्यमित्येके॥रात्रौ संक्रमे मध्यरात्रादर्वाक् संक्रांतौ पूर्वदिनोत्तरार्धे पुण्यम् ॥ मध्यरात्रात्परतः संक्रांतौ परदिनस्य पूर्वार्धं पुण्यम् ॥ निशीथमध्य एव संक्रांतौ दिनद्वयेपि पूर्वदिनोत्तरार्धं परदिनपूर्वार्धं च पुण्यम् ॥ इदं मकरकर्कोतिरिक्तं सर्वत्र रात्रिसंक्रमे ज्ञेयम् ॥ अयने तु मकरे रात्रिसंक्रमे सर्वत्र परदिनमेव पुण्यम् ॥ सूर्यास्तोत्तर घटिकात्रय सायसंध्या तत्र मकरसंक्रमे पूर्वदिने पुण्यम् ॥ सूर्योदयात प्राक् घटिकात्रय प्रातःसंध्या तत्र कर्कसंक्रातौ परदिने पुण्यमिति संध्याकाले विशेषो ज्योतिःशास्त्रे प्रसिद्धः ॥

## अथ दानम् ।

मेषे मेषदानम् ॥ वृषे गोदानम् ॥ मिथुने वस्त्रान्नादिदानम् ॥ कर्के घृतधेनुः ॥ छत्र सुवर्ण च सिंहे ॥ कन्याया गृह वस्त्र च ॥ तुलायां तिला गोरसाश्च देयाः ॥ वृश्चिके दीपः ॥ धनुषि वस्त्र यानं च ॥ मकरे काष्ठान्यग्निश्च ॥ कुंभे गोर्जल तृण च ॥ मीने भूमिर्मालाश्च देयाः ॥ एवमन्यान्यपि दानानि द्रष्टव्यानि ॥ अय-

नसक्रांतौ मेषतुलासक्रांतो च पूर्वं त्रिरात्रमेकरात्र वोपोष्य स्नानदानादि कार्यम् ॥ चरमोपोषणं सक्रातिमत्यहोरात्रे पुण्यकालवत्यहोरात्रे वा यथा पतेत्तथा कार्यम् ॥ अयमुपवासः पुत्रवद्गृहस्थभिन्नेन पापक्षयकामेन कार्यः काम्यो न तु नित्यः॥ सर्वसक्रांतिषु पिडरहित श्राद्ध कार्यम् ॥ अयनद्वये तु नित्य यथावत्तत्तत्सक्रांतिषु दानादिकं कर्तव्यम् ॥ तथैव ताभ्यः पूर्वमयनांशप्रवृत्तौ तत्तत्सक्रात्युचितस्नानदानादिकं कर्तव्यम् ॥ अयनाशा ज्योतिःशास्त्रे प्रसिद्धाः ॥ ते चेदानी द्वादशाधिकसप्तदशशतसख्याके शालिवाहनशके एकविंशतिरयनाशा इत्येकविंशतितमे दिने पूर्वमयनांशपर्वकाल इति पर्यवसितोऽर्थः ॥ एव न्यूनाधिकशके ऊह्यम् ॥ वृषसिंहवृश्चिककुंभेषु सक्रान्तिषु विष्णुपदसज्ञा ॥ मिथुनकन्याधनुर्मीनेषु सक्रातिषु षडशीतिसज्ञा ॥ मेषतुलयोर्विषुवसज्ञा ॥ कर्कमकरयोरयनसज्ञा ॥ एतासु चतुर्विधासूत्तरोत्तर पुण्याधिक्यम् ॥ मगलकृत्येषु सर्वसक्रातिष्वविशेषेण पूर्वतः परतश्च षोडश घटिकास्त्याज्याः ॥ चद्रादिसक्रांतिषु तु पूर्वत्र परत्र च मिलित्वा क्रमेण द्वे नव द्वे चतुरशीतिः षट् सार्धशत च घटिकास्त्याज्याः ॥ रात्रौ संक्रमणे ग्रहणवद्रात्रावेव स्नानदानादिक कर्तव्यमिति केचित् ॥ रात्रौ सक्रमणेपि दिवैव स्नानादिक न तु रात्राविति तु सर्वसमतम् ॥ बहुदेशाचारश्चैवम् ॥ यस्य जन्मर्क्षे रविसक्रमस्तस्य धनक्षयादिपीडा तत्परिहाराथ पद्मपत्रादियुक्तजलेन स्नानम् ॥ विषुवायनयोरह्नि सक्रमे पूर्वापररात्रौ तदह्नि च अध्यापनाध्ययने च वर्जयेत् ॥ एव पक्षिणीसक्रातिर्द्वादशप्रहरपर्यंतमनध्यायादिकमिति तात्पर्यम् ॥ अन्योऽपि विशेषोऽयनसक्रातौ वक्ष्यते ॥ ॥ इति सक्रात्युद्देशो द्वितीयः ॥ २ ॥

## अथ मलमास.।

स द्विविधः ॥ अधिमासः क्षयमासश्च ॥ सक्रातिरहितो मासोऽधिमासः ॥ सक्रांतिद्वययुक्तो मासः क्षयमासः ॥ पूर्वाधिमासादुत्तरोधिमासस्त्रिंशत्तममासमारभ्याष्टसु नवसु वा मासेष्वन्यतमो भवति ॥ क्षयमासस्तु एकचत्वारिंशदधिकशतसख्यैर्वर्षैर्वा भवति न त्वधिकमासवदल्पकालेन ॥ क्षयमासः कार्तिकमार्गशीर्षपौषेष्वन्यतमो भवति नेतर' ॥ यस्मिन्वर्षे क्षयसासस्तस्मिन्वर्षेऽधिकमासद्वयम् ॥ क्षयमासात्पूर्वमेकोधिकमासः ॥ ॥ क्षयमासानतरमेकोधिकमास इति ॥

## अथाधिमासोदाहरणम्।

चेत्रामावास्यायां मेषसक्रातिः ॥ ततः शुक्लप्रतिपदमारभ्यामावास्यापर्यंत सक्रातिर्नास्ति ॥ ततः शुक्लप्रतिपदि वृषभसक्रांतिरिति ॥ पूर्वसक्रांतिरहितो मासोधिकवैशाखसज्ञः ॥ वृषभसक्रांतियुतस्तु शुद्धवैशाखसंज्ञः ॥

## अथ क्षयमासोदाहरणम् ।

भाद्रपदकृष्णामावास्यायां कन्यासक्रांतिस्तत आश्विनोधिकमासः ॥ शुद्धाश्विनप्रतिपदि तुलासक्रांतिः कार्तिके शुक्लप्रतिपदि वृश्चिकसक्रांतिः ॥ ततो मार्गशीर्षशुद्धप्रतिपदि धनुःसक्रांतिस्तस्मिन्नेव मासेऽमावास्यायां मकरसक्रांतिरिति धनुर्मकरसंक्रांतिद्वययुक्त एको मास' क्षयमासमज्ञकः ॥ स च मार्गशीर्षपौषाख्यमासद्वयात्मक एको मासो ज्ञेयः ॥ तस्य प्रतिपदादितिथीनां पूर्वार्धे मार्गशीर्ष उत्तरार्द्धे पौष इत्येवं सर्वतिथीनां मासद्वयात्मकत्वात् ॥ अत्र तिथिपूर्वार्द्धे मृतस्य मार्गशीर्षे प्रत्यब्दश्राद्धम् ॥ उत्तरार्द्धे मृतस्य पौषे एव जनने वर्धापनादिविधिरपि॥ तत ऊर्ध्वं माघामावास्यायां कुंभसक्रांतिः ॥ ततः फाल्गुनोधिमासः ॥ शुद्धफाल्गुनं शुक्लप्रतिपदि मीनसक्रांतिः ॥ एव पूर्वापराधिमासद्वययुक्तः ॥ क्षयमासो यस्मिन्वर्षे तत्र त्रयोदशमासात्मकं किंचिदूननवत्यधिकशतत्रयदिनैर्वर्षम् ॥ तत्र क्षयमासात्पूर्वोऽधिमासः ससर्पसज्ञः सर्वकर्महेः शुभकर्मणि न त्याज्यः ॥ अहस्पतिसज्ञः क्षयमासादुत्तरभाव्यधिमासश्च सर्वकर्मसु वर्ज्यः ॥ एव त्रिवत्सरांतरस्थः केवलोऽधिकमासोपि वर्ज्यः ॥ तत्रवर्ज्यावर्ज्यनिर्णयः ॥ अनन्यगतिक नित्य नैमित्तिक काम्य चाधिमासक्षयमासयोः कर्तव्यम् ॥ सगतिक नित्य नैमित्तिक काम्य च वर्ज्यम् ॥ ॥ तथाहि ॥ सध्याग्निहोत्रादि नित्य ग्रहणस्नानादि नैमित्तिक कारीर्यादिक रक्षोगृहीतजीवनार्थ रक्षोघ्नेष्ट्यादिक च काम्य मलमासेऽपि कार्यम् ॥ ज्योतिष्टोमादि नित्य जातेष्ट्यादि नैमित्तिकं पुत्रकामेष्ट्यादि काम्य च मलमासोत्तरं शुद्धमास्येवकर्तव्यम् ॥ आरब्धकामस्य मलमासेप्यनुष्ठानम् ॥ नूतनारभः समाप्तिश्च न कर्तव्या ॥ तथा पूजालोपादिनिमित्तकपुनर्मूर्तिप्रतिष्ठां गर्भाधानाद्यन्नप्राशनांतसस्कारान्प्राप्तकान् अनन्यगतिकान् ज्वरादिरोगशांतिमलभ्ययोगे श्राद्ध व्रतादिक नैमित्तिक प्रायश्चित्त नित्यश्राद्ध ऊनमासिकादिश्राद्धानि दर्शश्राद्ध च मलमासेपि कुर्यात् ॥ चैत्रादौ मलमासे मृतानां कदाचिद्भद्रुकालेन तस्मिन्नेव चैत्रादौ मलमासे प्राप्ते मलमास एव प्रतिसांवत्सरिक श्राद्ध कर्तव्यम् ॥ चैत्रादौ शुद्धमासे मृतानां तु प्रत्याब्दिक श्राद्ध मलमासे न कर्तव्य शुद्ध एव कार्यम् ॥ शुद्धमासे मृताना प्रथमाब्दिक तु मलमासे एव कार्यम् ॥ न शुद्धे ॥ द्वितीयाब्दिक तु शुद्धे एव ॥ एकादशाहांतकर्म सपिंडीकरण च मलेपि कार्यम् ॥ द्वितीयमासिकादिश्राद्ध तु मले शुद्धे चावृत्त्या द्विवारं कर्तव्यम् ॥ एव च यत्र द्वादशमासिकम् अधिकमासे प्राप्तं तस्य मले शुद्धे च द्विवार कृत्वा ऊनाब्दकाले ऊनाब्दिक च कृत्वा चतुर्दशे मासे प्रथमाब्दिक कार्यम्॥ यस्मिन्वर्षे क्षयमासाव्यवहितोधिमासः यथा कार्तिकोधिमासस्तदुत्तरो मासो

वृश्चिकधनुःसक्रांतियुक्तत्वात्क्षयसज्ञकस्तत्र कार्तिकमासस्थ प्रत्याब्दिक पूर्वेधिमासे उत्तरे क्षयमासे च कार्यम् ॥ तत्रापि क्षयाव्यवहितपूर्वो मासो यथाश्विनोधिमासो मार्गशीर्षः क्षयमात्रस्तात्रापि आश्विनमासगत श्राद्ध अधिके शुद्धे चाश्विने कार्यम्॥ द्वयोरपि कर्माहत्वादिति भाति ॥ व्यवहितक्षयमासगत त्वाब्दिक क्षयमासे एव कार्यम् ॥ तथापूर्वोक्तमार्गशीर्षगतं पौषगत चाब्दिकमेकस्मिन्नेव मासे तिथिपूर्वार्धादिभागं विनैव कार्यमिति फलितम् ॥

## अथ मलमासेवर्ज्यानि ।

उपाकर्मोत्सर्जने अष्टकश्राद्धानि गृहप्रवेशश्चूडामौजीबधविवाहास्तीर्थादियात्रा वास्तुकर्मैतान्यपिवर्ज्यानि ॥ देवप्रतिष्ठा कूपारामाद्युत्सर्गः नूतनवस्त्रालकारधारणम् तुलापुरुषादिमहादानानि यज्ञकर्मारभानमपूर्वतीर्थदेवदर्शन संन्यासः काम्यवृषोत्सर्गः राजाभिषेको व्रतानि सगतिकमन्नप्राशन समावर्तनमतिक्रांतनामकर्मादिसस्काराः पवित्रारोपणदमनार्पणे श्रवणाकर्म सर्पबल्यादि पाकसस्थाः शय नपरिवर्तनाद्युत्सवः शपथदिव्यादिकर्मैतानि मले वर्ज्यानि ॥ निमित्तकानि रजोदोषशांतिविच्छिन्नाधानपुनःप्रतिष्ठादीनि यदि निर्मितानतरमेव क्रियते तदा न मलमासादिदोषः ॥ कालातिपत्तौ तु शुद्धे एव कर्तव्यानि ॥ आग्रयण दुर्भिक्षसकटे मलमासे कार्यम् ॥ अन्यथा शुद्धे एव ॥ युगादिमन्वादिश्राद्धानां मासद्वयेव्यावृत्तिः ॥ क्षयात्पूर्वोधिमासः ससर्पसज्ञकः पूर्वमुक्तस्तत्र चूडाकर्मव्रतबधविवाहाग्न्याधानयज्ञोत्सवमहालयराजाभिषेका एव वर्ज्याः नान्यानि कर्माणि ॥ अपूर्वव्रतारभो व्रतसमाप्तिश्च मलमासे न भवति ॥ सपूर्वमाघस्नानादेः क्षयमासेप्यारभसमाप्ती॥इति मकरसक्रांतियुक्तक्षयमासगतपूर्णिमाया माघस्नानमारभ्य सक्रांतियुतमाघपौर्णमास्या समापनीयम् एव कार्तिकेप्यूह्यम् ॥ यत्र वैशाखादिरधिकस्तत्र वैशाखस्नानादिमासव्रताना चैत्रपौर्णमास्यारब्धानां शुद्धवैशाखपौर्णमास्या समाप्तिरिति तेषां मासद्वयमनुष्ठानम् ॥

## शुक्रास्तादिषु वर्ज्यानि ।

यन्मलमासे वर्ज्यमुक्त तद्गुरुशुक्रास्तबाल्यवार्धकेष्वपि ज्ञेयम् ॥ तत्रास्तात्प्राक् सप्ताह वार्धकम् उदयानतर सप्ताह बाल्यमिति मध्यमः पक्षः ॥ पचदशाहदशाहपचाहत्र्यहादिपक्षा आपदनापदादिविषयतया देशकालविशेषवरतया च योज्याः ॥

## अथ सिहस्थे वर्ज्यानि ।

अय वर्ज्यावर्ज्यनिर्णयः सिहस्थे गुरावपि ज्ञेयः ॥ तत्र विशेष उच्यते ॥ कर्णवेधचौलमौजीबधविवाहदेवयात्रात्रतवास्तुकर्मदेवप्रतिष्ठासंन्यासा विशेषतो वर्ज्या इति ॥

## अथ सिंहस्थापवादे यात्रादिनिर्णयश्च ।

मघानक्षत्रगते सिंहाशगते च गुरौ सर्वदेशेषु सर्वमांगलिककर्मणां निषेधः ॥ सिंहांशोत्तर गोदादक्षिणे भागीरथ्युत्तरे सिंहस्थदोषो नास्ति ॥ गगागोदामध्यदेशे तु सर्वसिंहस्थे विवाहव्रतबधयोर्दोषः ॥ अन्यकर्माणि सिंहाशोत्तर सर्वदेशेषु कर्तव्यानि मेषस्थे सूर्ये सर्वदेशेषु सर्वमागलिककर्मणा सर्वसिंहस्थे न दोषः ॥ क्वचिद्गुरुस्थैकेपि दोषाभाव उक्तः ॥ अत्र सिंहस्थे गुरौ गोदावरीस्नान कन्यागते कृष्णास्नान महापुण्यम् ॥ गोदावर्या यात्रिकाणां मुंडनोपवासावावश्यकौ न तु तत्तीरवासिनाम् ॥ गर्भिण्यामपि भार्यायां विवाहादिमगलोत्तरमपि गोदावर्या मुंडने दोषो नास्ति ॥ गगागोदावरीयात्रायां मलमासगुरुशुक्रास्तादिदोषो नास्ति ॥ मलमासे व्रतविशेषोन्यत्र ज्ञेयः ॥ ॥ इति मलमासगुरुशुक्रास्तसिंहगुरुवर्ज्यावर्ज्यनिर्णयस्तृतीयोद्देशः ॥ ३ ॥

## अथ तिथिनिर्णये सामान्यपरिभाषा ।

तिथिर्द्विविधा पूर्णा सखडा च ॥ सूर्योदयमारभ्य षष्टिनाडिकाव्याप्ता पूर्णा ॥ एतदन्या सखडा ॥ सखडापि द्विविधा ॥ शुद्धा विद्धा च ॥ सूर्योदयमारभ्यास्तमयपर्यंत विद्यमाना शिवरात्र्यादौ निशीथपर्यंत विद्यमाना च शुद्धा तदन्या विद्धा ॥ वेधोपि द्विविधः ॥ प्रातर्वेधः सायवेधश्च ॥ सूर्योदयोत्तर षड्घटिकापरिमिततिथ्यंतरस्पर्शात्मकः प्रातर्वेधः ॥ सूर्यास्तात्प्राक् षड्घटिपरिमिततिथ्यंतरस्पर्शः सायवेधः ॥ एकादशीव्रतविषये तु वेधो वक्ष्यते ॥ क्वचित्तिथिविशेषे वेधाधिक्यम् ॥ पञ्चमी द्वादशनाडीभिः षष्ठी विद्धा करोति ॥ दशमी पचदशभिरेकादशीवेधकृत् ॥ चतुर्दशी अष्टादशनाडीभिः पचदशी विध्यति ॥ विद्धाश्च तिथयः क्वचित्कर्मणि ग्राह्याः कुत्रचित्त्याज्याश्च भवति॥ तत्र सपूर्णा शुद्धा च तिथिः प्रायेण निर्णय नापेक्षते सदेहाभावात् ॥ निषेधविषये सखडापि न निर्णयार्हा ॥ निषेधस्तु निवृत्त्यात्मा कालमात्रमपेक्षते इति वचनेनाष्टम्यादिषु नारिकेलादिभक्षणनिषेधादेस्तत्कालमात्रव्याप्ततिथ्यपेक्षणात् ॥ ॥ विहितव्रतादिविषये तु निर्णय उच्यते ॥ ॥ तत्र कर्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिर्ग्राह्या ॥ यथा विनायकादिव्रते मध्याह्नादौ पूजाविधानान्मध्याह्नादिव्यापिनी ॥ दिनद्वये कर्मकालव्याप्तावव्याप्तौ तदेकदेशव्याप्तौ वा युग्मवाक्यादिना पूर्वविद्धायाः परविद्धाया वा तिथेर्ग्राह्यत्वम् ॥ युग्म वाक्य तु ॥ "युग्माग्नियुगभूतानां षण्मुन्योर्वसुरध्रयोः॥रुद्रेण द्वादशी युक्ता चतुर्दश्या च पूर्णिमा ॥ प्रतिपद्यप्यमावास्यातिथ्योर्युग्मं महाफलम्" इति ॥ युग्मं द्वितीया अग्निस्तृतीया ॥ द्वितीया तृतीया विद्धा ग्राह्या ॥ द्वितीया

तृतीया विद्धा ग्राह्येत्येव द्वितीयातृतीययोर्युग्म चतुर्थीपचम्योर्युग्म षष्ठीसप्तम्योर्युग्मं अष्टमीनवम्योर्युग्मम् एकादशीद्वादश्योर्युग्म चतुर्दशीपौर्णमास्योर्युग्म अमावास्या-प्रतिपदोर्युग्ममित्यर्थः ॥ क्वचिच्चतुर्थी गणनाथस्य मातृविद्धा प्रशस्यते इत्यादि-विशेषवाक्यैर्ग्राह्यत्वनिर्णयः ॥ वचनवशेन ग्राह्यायास्तिथेः कर्मकाले सत्त्वाभावे साकल्यवचनैः सत्त्व भावनीयम् ॥ तानि च ॥ यां तिथि समनुप्राप्य उदय याति भास्करः ॥ सा तिथिः सकला ज्ञेया स्नानदानजपादिष्वित्यादीनि ॥ यां तिथि समनुप्राप्य यात्यस्त यामिनीपतिः ॥ सा तिथिः सकला ज्ञेया स्नानदानादिक-र्मसु ॥ उदयोत्तर द्विमुहूर्ताधिकस्यास्ता-प्राक् त्रिमुहूर्ताधिकस्य प्रायेणेय द्विविधा साकल्यव्याप्तिर्ज्ञेया ॥ ॥ इति समान्यनिर्णयश्चतुर्थोंद्देशः ॥ ४ ॥

## अथ कर्मविशेषे निर्णयः ।

कर्माणि द्विविधानि ॥ दैवानि पित्र्याणि च ॥ दैवानि षड्विधानि ॥ एकभक्त-नक्तायाचितोपवासव्रतदानाख्यानि ॥ मध्याह्ने एकवारमेकान्नभोजनमेकभक्तम् ॥ रात्रावेव प्रदोषकाले भोजन नक्तम् ॥ याचना विना तदिने लब्धस्यान्नादेर्भोजन-मयाचितम् ॥ दिनातरलब्धस्यापि पाचक स्त्रीपुत्रादिक प्रति याचनमंतरेण भोज-नमयाचितमिति केचित्॥अहोरात्रे भोजनाभाव उपवासः॥पूजाद्यात्मकः कर्मविशेषो व्रतम् ॥ स्वत्वनिवृत्तिपूर्वक परस्वत्वापादन दानम् ॥ तानि च एकभक्तादीनि क्वचि द्व्रतांगतया विहितानि क्वचिदेकादश्याद्युपवासप्रतिनिधितया विहितानि क्वचि-त्स्वतत्राणि इति त्रिविधानि ॥ तत्रान्यागानां प्रतिनिधिभूतानां च तत्तत्प्रधानवशेन निर्णयः ॥ ॥ स्वतत्राणां निर्णय उच्यते ॥ ॥ तत्र दिन पचधा विभज्य प्रथम-भागः प्रातःकालो ज्ञेयः ॥ द्वितीयः सगवः ॥ तृतीयो मध्याह्नः ॥ चतुर्थोपरा-ह्णः ॥ पचमः सायाह्नः ॥ सूर्यास्तोत्तर त्रिमुहूर्तः प्रदोषः ॥

## अथैकभक्ते तिथिनिर्णयः ।

तत्रैकभक्ते मध्याह्नव्यापिनी तिथिर्ग्राह्या ॥ तत्रापि दिनार्धसमयेऽतीते त्रिशद्-घटिकामध्यमदिनमानेन षोडशादिघटीत्रय मुख्यो भोजनकालः ॥ तत ऊर्ध्वं आसाय गौणकालः ॥ अत्र पूर्वेद्युरेव मुख्यकाले व्याप्तिः परेद्युरेव व्याप्तिः उभये-द्युर्व्याप्तिः उभयत्रापि व्याप्त्यभावः उभयत्र साम्येनैकदेशव्याप्तिर्वैषम्येणैकदेशव्या-प्तिरिति षट् पक्षा भवति ॥ तत्र पूर्वेद्युरेव मुख्यकाले ग्राह्यतिथिसत्त्वे पूर्वैव ॥ परत्रैव सत्त्वे परैवेत्यसदेहः ॥ उभयत्रापि पूर्णव्याप्तित्वे युग्मवाक्यान्निर्णयः ॥ उभयत्र व्याप्त्यभावे पूर्वैव गौणकालव्याप्तिसत्त्वात् ॥ साम्येनैकदेशव्याप्तौ पूर्वा ॥ वैषम्येणैकदेशव्याप्तौ दिनद्वयेपि कर्मपर्याप्ततिथिलाभे युग्मवाक्यान्निर्णयः ॥ कर्म-पर्याप्ततिथ्यलाभे पूर्वैवेति ॥ इत्येकभक्तम् ॥ अथनक्तम् ॥ तत्र सूर्यास्तोत्तरत्रिमु-

द्वर्तात्मकप्रदोषव्यापिनीतिथिर्नक्ते ग्राह्या ॥ अन्यतरदिने तद्व्याप्तौ तदेकदेशस्पर्शे वा सैव ग्राह्या ॥ भोजनं त्वस्तोत्तरं घटिकात्रयसंध्याकालं त्यक्त्वा कार्यम् ॥ संध्याकाले भोजननिद्रामैथुनाध्ययनवर्जनात् ॥ यतिभिरपुत्रविधुरैर्विधवाभिश्च नक्तं सायाह्नव्यापिन्यां दिनाष्टमभागे कार्यम् ॥ रात्रौ तेषां भोजननिषेधात् ॥ एवं सौरनक्तमपि सायाह्नव्यापिन्यां दिवैव कार्यम् ॥ दिनद्वये प्रदोषव्याप्तौ परा ॥ दिनद्वये प्रदोषव्याप्त्यभावे परत्रैव ॥ सायाह्ने दिनाष्टमे नक्तं कार्यम् ॥ न तु रात्रौ ॥ साम्येनैकदेशव्याप्तौ परैव ॥ वैषम्येण प्रदोषैकदेशव्याप्तौ तदाधिक्यवती पूर्वापि ग्राह्या ॥ यदि पूजाभोजनपर्याप्तं तदाधिक्यं लभ्यते ॥ नोचेत् साम्यपक्षवदुत्तरैव नत्वाधिक्यवशात्पूर्वैवेति ॥

## अथ नक्तव्रतेऽर्कवारादिदोषाभावः ।

नक्तव्रतभोजनं वैधत्वाद्रविवासरसंक्रांत्यादावपि रात्रावेव कार्यम् ॥ रविवारादौ रात्रिभोजननिषेधस्य रागप्राप्तभोजनपरत्वात् ॥ एकादश्याद्युपवासप्रत्याम्नायभूतं नक्तं तूपवासनिर्णीतदिन एवेति ॥

## अथ याचिते निर्णयः ।

अयाचितस्य त्वहोरात्रसाध्यत्वादुपवासवन्निर्णयः ॥ पित्र्याणामपराह्णादिव्यापित्वेन निर्णयस्तत्तत्प्रकरणे वक्ष्यते ॥ एकभक्तनक्तायाचितोपवासानां पूर्वतिथावनुष्ठितानां परेद्युस्तिथ्यन्ते पारणम् ॥ यामत्रयोर्ध्वगामिन्यां तिथौ प्रातःपारणमिति सर्वत्र ज्ञेयमिति माधवः ॥ ॥ इत्येकभक्तादिनिर्णयः पंचमोदेशः ॥ ५ ॥

## अथ व्रतपरिभाषा ।

तत्र स्त्रीशूद्राणां द्विरात्राधिकोपवासेनाधिकारः ॥ स्त्रीणामपि भर्त्रनुज्ञां विना व्रतोपवासादौ नाधिकारः ॥ उपवासदिने च काष्ठेन दंतधावनं न कार्यम् ॥ पर्णादिना द्वादशगंडूषैर्वा कार्यम् ॥ जलपूर्णं ताम्रपात्रं गृहीत्वोदङ्मुखः प्रातरुपवासादिव्रतं संकल्पयेत् ॥ अत्रापूर्वव्रतारंभो व्रतोद्यापनं च मलमासे गुर्वाद्यस्ते वैधृतिव्यतीपातादिदुर्योगे विष्टौ क्रूरवारनिषिद्धे दर्शादितिथौ न भवति ॥ एवं खंडतिथावपि न भवति ॥ उदयस्था तिथिर्या हि न भवेद्दिनमध्यभाक् ॥ सा खंडा न व्रतानां स्यादारंभश्च समापनमिति सत्यव्रतोक्तेः ॥

## अथ सामान्यतो व्रतधर्माः ।

'क्षमा सत्यं दया दानं शौचमिंद्रियनिग्रहः ॥ देवपूजा च हवनं संतोषस्तेयवर्जनम् ॥' सर्वव्रतेष्वयं धर्मः ॥ अत्र होमो व्याहृतिभिः ॥ काम्यव्रते विशेषो

ज्ञेयः ॥यद्देवताया उपोषणव्रतं तद्देवताजपस्तद्ध्यानं तत्कथाश्रवणं तदर्चनं तन्नाम-कीर्तनश्रवणादिकं कार्यम् ॥ उपवासे अन्नावलोकनं गंधादिकमभ्यंगं ताबूलमनुलेपनं च त्यजेत् ॥ सभर्तृकस्त्रीणां सौभाग्यव्रते अभ्यंगतांबूलादि न वर्ज्यम् ॥ "अष्टैतान्यव्रतघ्नानि आपो मूलं फलं पयः ॥ हविर्ब्राह्मणकाम्या च गुरोर्वचन-मौषधम् ॥"

## अथ व्रतनियमादिभंगे प्रायश्चित्तम् ।

प्रमादादिना व्रतभंगे दिनत्रयमुपोष्य क्षौरं कृत्वा पुनर्व्रतं कुर्यात् ॥ अश-क्तस्योपवासप्रतिनिधिरेकब्राह्मणभोजनं तावद्धनादिदानं वा सहस्रगायत्रीजपो वा द्वादश प्राणायामा वा प्रायश्चित्तम् ॥ स्वीकृतं व्रतं कर्तुमशक्तः प्रतिनिधिना कारयेत् ॥ पुत्रः पत्नी भर्ता भ्राता पुरोहितः सखा चेति प्रतिनिधयः ॥ पुत्रा-दिः पित्राद्युद्देशेन व्रतं कुर्वन् स्वयमपि व्रतफलं लभते ॥

## अथोपवासनाशकानि ।

"असकृज्जलपानाच्च सकृत्तांबूलचर्वणात् ॥ उपवासः प्रणश्येत दिवा स्वाप मैथुनात् ॥ स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम् ॥ संकल्पोध्यवसा क्रियानिर्वृत्तिरेवच"इत्यष्टविधं मैथुनम् ॥प्राणसंकटे त्वसकृज्जलपाने दोषो नास्ति . चर्मस्थं जलं गोभिन्नक्षीरं मसूरजंबीरफलं शुक्तिर्वूर्णमित्यामिषगणो व्रते वर्ज्यः॥ अश्रुपातक्रोधादिना सद्यो व्रतनाशः ॥ परान्नभोजने चापि यस्यान्नं तस्य तत्फल-म् ॥ तिलमुद्गभिन्नचणकादिकोशीधान्यं माषादिकं मूलकं चेत्येवमादिक्षारगणं लवणमधुमांसादिकं च वर्जयेत् ॥'श्यामाकाश्चैव नीवारा गोधूमाश्च व्रते हिताः ॥' व्रीहिमुद्गयवतिलकंगुकलायादिधान्यं रक्तेतरमूलकं सूरणादिकंदः सैंधवसामुद्रल-वणे गव्यदधिसर्पिर्दुग्धानि पनसफलमाम्रफलं नारिकेलं हरीतकी पिप्पली जीरकं शुंठी तिंत्तिणी कदलीलवली धात्रीफलानि गुडेतरेक्षुविकार इत्येतान्यतैल पक्वानि हविष्याणि ॥ गव्यं तक्रं माहिषं घृतमपि क्वचित् ॥

## अथानुक्तौ व्रतविधिः ।

अनुक्तव्रतविधिस्थले माषादिपरिमितसुवर्णरजतादिप्रतिमा पूज्या ॥ द्रव्या-नुक्तावाज्यहोमः ॥ देवतानुक्तौ प्रजापतिः ॥ मंत्रानुक्तौ समस्तव्याहृतिः ॥ संख्या-नुक्तावष्टोत्तरशतमष्टाविंशतिरष्टौ वा होमसंख्याः ॥ उपवासे कृते ब्राह्मणभोजनं तत्सांगतार्थम् ॥ उद्यापनानुक्तौ गां सुवर्णं वा दद्यात् ॥ विप्रवचनाद्व्रतसांगता ॥ विप्रवचनं दक्षिणां दत्त्वैव ग्राह्यं सर्वत्र ॥ गृहीतव्रतत्यागे चांडालतुल्यत्वम् ॥ विधवाभिर्व्रतादौ चित्ररक्तादिवस्त्रं न धार्यं श्वेतमेव धार्यम् ॥ सूतकादौ स्त्रीणां

रजोदोषादौ ज्वरादौ च गृहीतव्रतादौ शारीरानियमान् स्वयं कुर्यात् ॥ पूजादिकमन्यद्वाराकारयेत् ॥ अपूर्वारंभस्तु सूतकादौ न भवति ॥ "काम्ये प्रतिनिधिर्नास्ति नित्ये नैमित्तिके च सः ॥ काम्येष्युपक्रमादूर्ध्वं केचित्प्रतिनिधिं विदुः ॥ न स्यात्प्रतिनिधिर्मत्रस्वामिदेवाग्निकर्मसु ॥ नापि प्रतिनिधातव्यं निषिद्धं वस्तु कुत्रचित् ॥"

## अथ व्रतादिसन्निपाते ।

व्रतादिसन्निपाते दानहोमाद्यविरुद्धं क्रमेण कार्यम् ॥ विरुद्धे तु नक्तभोजनोपवासादावेकं स्वयं कृत्वान्यत्पुत्रभार्यादिना कारयेत् ॥ यत्र चतुर्दश्यष्टम्यादौ दिवाभोजननिषेधो व्रतांतरपारणा च प्राप्ता तत्र भोजनमेवकार्यम् ॥ पारणाया विधिप्राप्तत्वात् ॥ निषेधस्तु रागप्राप्तभोजनपरः ॥ एवं रविवारादौ संक्रष्टचतुर्थ्यादिव्रते त्रिभोजनमेव कार्यम् ॥ यत्राष्टम्यादौ दिवाभोजननिषेधो रात्रौ तु रविवारायुक्तभोजननिषेधस्तत्रार्थप्राप्त उपवासः ॥ यत्र तु पुत्रवद्बृहस्थस्य संक्रांत्यादावासोपि निषिद्धो भोजनस्याष्टम्यादिप्रयुक्तनिषेधस्तत्र किंचिद्भक्ष्यं प्रकल्प्योस एव कार्यः ॥ चांद्रायणादौ एकादश्यादिप्राप्तौ ग्राससंख्यानियमेन भोजव कार्यम् ॥ एवं कृच्छ्रादिव्रतेपि ॥

## अथैकादश्यां पारणाप्राप्तौ ।

एवं एकादश्यामेकांतरोपवासादिप्रयुक्तपारणायां प्राप्तायां जलपारणं कृत्वोपवसेत् ॥ एवं द्वादश्यां मासोपवासश्राद्धप्रदोषादिप्रयुक्तपारणाप्रतिबंधे जलपारणं कार्यम् ॥ एकादश्यादौ संक्रमे पुत्रवद्बृहस्थोपवासनिषेध एकादश्युपवासश्च प्राप्तस्तत्रापि किंचिदापो मूलं फलं पयो वा भक्ष्यं प्रकल्प्यम् ॥ द्वयोरुपवासयोर्नक्तयोरेकभक्तयोर्वैकस्मिन्दिने प्राप्तौ अमुकोपवासममुकोपवासं चोभयं तंत्रेण करिष्ये इति संकल्प्य सहैव वोपवासपूजाहोमानामनुष्ठानम् ॥ यत्रोपवासैकभक्तयोरेकदिने प्राप्तिस्तत्र तिथिद्वैधे गौणकालव्याप्तिमाश्रित्य एकं पूर्वतिथौ द्वितीयं शेषतिथौ कार्यम् ॥ अखंडतिथावेकं पुत्रादिना कारयेदित्युक्तम् ॥ एवं काम्यं नित्यस्य बाधकमित्यादिवाक्यैः काम्यनित्यादिबलाबलबाधाबाधसंभवासंभवादि विचार्यानुष्ठानमूह्यम् ॥ ॥ इति सामान्यव्रतपरिभाषोद्देशः षष्ठः ॥ ६ ॥

## अथ प्रतिपदादिनिर्णयः ।

शुक्लप्रतिपत्पूजाव्रतादौ अपराह्णव्याप्तिसत्त्वे पूर्वविद्धा ग्राह्या ॥ सायाह्नव्याप्तिसत्त्वेपि पूर्वेवेति माधवाचार्याः ॥ अन्यथा द्वितीयायुता ग्राह्या ॥ कृष्णप्रतिपत्सर्वापि द्वितीयायुतैव ॥ उपवासे तु पक्षद्वयेपि प्रतिपत्पूर्वविद्धैव ग्राह्या ॥ अपरा-

ह्नव्यापिन्यां प्रतिपदि करणीयस्योपवासादेः संकल्पं प्रातरेव कुर्यात् ॥ संकल्पकाले प्रतिपदादितिथ्यभावेपि संकल्पे प्रतिपदादितिथिरेव वक्तव्या न त्वमावास्यादिः ॥ एवमुपोष्या द्वादशी शुद्धेत्यादिस्थले एकादशीव्रतप्रयुक्तपूजासंकल्पादौ एकादश्येव कीर्तनीया ॥ न तु द्वादशी ॥ संध्याग्निहोत्रादिकर्मातरेषु तु तत्तत्कालव्यापिनी द्वादश्यादिरेवेति मम प्रतिभाति ॥ संकल्पश्च सूर्योदयात्प्रागुषःकाले सूर्योदयोत्तरं प्रातःकालाख्यत्रिमुहूर्तस्याद्यमुहूर्तद्वये प्रशस्तः ॥ तृतीयो मुहूर्तस्तु निषिद्धः ॥ ॥ इति प्रतिपन्निर्णयः सप्तमोद्देशः ॥ ७ ॥

## अथ द्वितीयानिर्णयः ।

द्वितीया शुक्लपक्षे परविद्धा ग्राह्या ॥ कृष्णपक्षे द्वेधाविभक्तदिनपूर्वभागात्मकपूर्वाह्णप्रविष्टा चेत्पूर्वा ग्राह्या ॥ अन्यथा तु कृष्णपक्षेपि परविद्धैव ॥ ॥ इति द्वितीयानिर्णयोष्टम उद्देशः ॥ ८ ॥

## अथ तृतीयानिर्णयः ।

तृतीया रंभाव्रते पूर्वविद्धा ग्राह्या ॥ रंभाव्यतिरिक्तव्रतेषु त्रिमुहूर्तद्वितीयाविद्धा पूर्वा त्यक्त्वा परदिने त्रिमुहूर्तव्यापिनी ग्राह्या ॥ पूर्वदिने त्रिमुहूर्तन्यूनद्वितीयावेधे परदिने त्रिमुहूर्तव्याप्त्यभावे पूर्वा ग्राह्या ॥ पूर्वदिने त्रिमुहूर्तद्वितीयावेधे परदिने त्रिमुहूर्तन्यूनापि ग्राह्या ॥ गौरीव्रते तु कलाकाष्ठादिपरिमितस्वल्पद्वितीयायुक्तापि निषिद्धा ॥ परदिने कलाकाष्ठादिपरिमिता स्वल्पापि तृतीया परिग्राह्या ॥ यदा तु दिनक्षयवशात्परदिने स्वल्पापि चतुर्थीयुता तृतीया न लभ्यते पूर्वदिने च द्वितीयाविद्धा तदा द्वितीयाविद्धैव ग्राह्या ॥ यदा च दिनवृद्धिवशात्पूर्वदिने षष्टिघटिका तृतीया परदिने च घटिकादिशेषवती तदा पूर्वा शुद्धां षष्टिघटिकामपि त्यक्त्वा चतुर्थीयुतैव गौरीव्रते ग्राह्या ॥ ॥ इति तृतीयानिर्णयो नवमोद्देशः ॥ ९ ॥

## अथ चतुर्थीनिर्णयः ।

चतुर्थी गणेशव्रतातिरिक्तोपवासकार्ये पंचमीयुता ग्राह्या ॥ गौरीविनायकव्रतयोस्तु मध्याह्नव्यापिनी ग्राह्या ॥ परदिन एव मध्याह्नव्यापिनी चेत्परैव ॥ दिनद्वये मध्याह्नव्यापित्वे दिनद्वये मध्याह्नव्याप्त्यभावे साम्येन वैषम्येण वैकदेशे व्याप्तौ च पूर्वैव ॥ तृतीयायोगप्राशस्त्यात् ॥ नागव्रते तु पूर्वदिन एव मध्याह्नव्यापिनी चेत्पूर्वैव ॥ उभयदिनमध्याह्नव्याप्त्यादिपक्षचतुष्टये पंचमीयुतैव ग्राह्या ॥ संकष्टचतुर्थी तु चंद्रोदयव्यापिनी ग्राह्या ॥ परदिने एव चंद्रोदयव्याप्तौ परैव ॥ उभयदिने चंद्रोदयव्यापित्वे तृतीयायुतैव ग्राह्या ॥ दिनद्वये चंद्रोदयव्याप्त्यभावे परैव ॥ ॥ इति चतुर्थीनिर्णयो दशमोद्देशः ॥ १० ॥

## अथ पंचमीनिर्णयः ।

पंचमी शुक्लपक्षे कृष्णपक्षे च कर्ममात्रेपि चतुर्थीविद्धा ग्राह्या ॥ स्कंदोपवासे तु षष्ठीयुता ग्राह्या ॥ नागव्रते पंचमी परविद्धा ग्राह्या ॥ परेद्युस्त्रिमुहूर्तन्यूना पंचमी पूर्वेद्युस्त्रिमुहूर्तन्यूनचतुर्थ्या विद्धा तदा पूर्वैव ॥ त्रिमुहूर्ताधिकचतुर्थीविधे द्विमुहूर्तापि परैव ॥ ॥ इति पंचमीनिर्णय एकादशोद्देशः ॥ ११ ॥

## अथ षष्ठीनिर्णयः ।

षष्ठी स्कंदव्रते पूर्वविद्धा ॥ अन्यव्रतेषु परविद्धैव ॥ पूर्वेद्युः षण्मुहूर्तन्यूनपंचम्या वेधे पूर्वापि ॥ षष्ठीसप्तम्योरविवासरयोगे पद्मकयोगः ॥ ॥ इति षष्ठीनिर्णयो द्वादशोद्देशः ॥ १२ ॥

## अथ सप्तमीनिर्णयः ।

सप्तमी कर्ममात्रे षष्ठीयुतैव ग्राह्या ॥ यदा पूर्वेद्युरस्तमयपर्यंता षष्ठीति दिवा षष्ठीविद्धा न लभ्यते परेद्युश्चाष्टमीविद्धा तदा चागत्या परैव ॥ एवं तिथ्यंतरनिर्णयेष्वप्यूह्यम् ॥ ॥ इति सप्तमीनिर्णयस्त्रयोदशोद्देशः ॥ १३ ॥

## अथाष्टमीनिर्णयः ।

व्रतमात्रेष्टमी शुक्लपक्षे परा कृष्णपक्षे पूर्वा ॥ मिलितशिवशक्त्योरुत्सवे कृष्णापि परा ॥ बुधाष्टमी शुक्लपक्षे प्रातःकालमारभ्यापराह्णपर्यंतं यदिने मुहूर्तमात्रोपिबुधवासरयोगः सा ग्राह्या ॥ सायाह्नकाले चैत्रमासे श्रावणादिमासचतुष्टये कृष्णपक्षे च न ग्राह्या ॥ सर्वकृष्णाष्टमीषु कालभैरवोद्देशेन केचिदुपवसंति तत्र मार्गशीर्षकृष्णाष्टम्यां भैरवजयंतीत्वात्तद्वन्निर्णयौचित्येन मध्याह्नव्यापिनी ग्राह्या दिनद्वये मध्याह्नव्याप्तौ पूर्वैव ॥ प्रदोषव्यापिनीति कौस्तुभे ॥ अत उभयदिने प्रदोषव्याप्तौ द्विविधवाक्याविरोधात्परैव ॥ पूर्वत्र प्रदोषव्याप्तिरेव परत्र मध्याह्न एव तदा बहुशिष्टाचारानुरोधात्प्रदोषगा पूर्वैव ॥ यत्तु अर्कपर्वद्वये रात्रौ चतुर्दश्यष्टमीदिवेति वचनाद्दिवाभोजननिषेधमात्रपालनं न तु किंचिद्व्रतम् ॥ तत्र 'निषेधस्तु निवृत्त्यात्मा कालमात्रमपेक्षते' इति वचनाद्भोजनकालव्यापिनीमष्टमीं त्यक्त्वा नवम्यां सप्तम्यां वा भोक्तव्यमिति भाति ॥ युक्तमयुक्तं वा सद्भिर्विचारणीयम् ॥ ॥ इत्यष्टमीनिर्णयश्चतुर्दशोद्देशः ॥ १४ ॥

## अथ नवमीनिर्णयः ।

नवमी सर्वत्राष्टमीविद्धैव ग्राह्या ॥ ॥ इति नवमीनिर्णयः पंचदशोद्देशः ॥ ॥१५॥

## अथ दशमीनिर्णयः ।

दशमी तूपवासादौ नवमीयुतैव ग्राह्या ॥ पूर्वविद्धाया अलाभे उत्तरविद्धा ग्राह्या ॥ ॥ इति दशमीनिर्णयः षोडशोद्देशः ॥ १६ ॥

## अथैकादशीनिर्णयः ।

तत्रैकादश्युपवासो द्विधा ॥ भोजननिषेधपरिपालनात्मको व्रतात्मकश्च ॥ आद्ये पुत्रवद्गृहस्थादीनां कृष्णपक्षेपि अधिकारः ॥ व्रतात्मकोपवासस्तु अपत्ययुक्तैर्गृहस्थैश्च कृष्णपक्षे न कार्यः ॥ किंतु समंत्रकं व्रतसंकल्पमकृत्वा यथाशक्ति नियमयुतं भोजनवर्जनमेव कार्यम् ॥ एवं तिथिक्षये शुक्लैकादश्यामपि ज्ञेयम् ॥ शयनी बोधिनीमध्यवर्त्तिकृष्णैकादशीषु सापत्यगृहस्थादीनां सर्वेषामधिकारः विष्णुसायुज्यकामैरायुःकामैः पुत्रकामैश्च काम्यव्रतं पक्षद्वयेपि कार्यम् ॥ तत्र न कोपि निषेधः ॥ वैष्णवगृहिणां कृष्णैकादश्यपि नित्योपोष्या ॥ इदमेकादशीव्रतं शैववैष्णवसौरादीनां सर्वेषां नित्यम् ॥ अकरणे प्रत्यवायश्रवणात् ॥ संपत्त्यादिफलश्रवणात्काम्यं च भवति ॥ केचिन्मुहूर्तादिमितदशमीसत्त्वे दशम्यामेव भोजनं कर्तव्यम् ॥ सूर्योदयात्पूर्वमेव प्रवृत्तायां शुद्धाधिकाधिकद्वादशिकायां तु नैरंतर्येणोपवासद्वयं कार्यमिति तिथिपालनमपि वदंति तन्न युक्तम् ॥

## अथैकादशीव्रताधिकारः ।

अष्टमवर्षादूर्ध्वमशीतिवर्षपर्यंतम् एकादशीव्रताधिकारः ॥ शक्तस्य तु अशीतेरूर्ध्वमप्यधिकारः ॥ सभर्तृकाणां स्त्रीणां भर्त्रनुज्ञां पित्राद्यनुज्ञां विनोपवासव्रताद्याचरणे व्रतवैफल्यं भर्त्रायुःक्षयो नरकश्च ॥ अशक्तानां तु नक्तं हविष्यान्नमनौदनं वा फलं तिलाः क्षीरमथांबु चाज्यम् ॥ यत्पंचगव्यं यदि वापि वायुः प्रशस्तमत्रोत्तरमुत्तरं चेति पक्षेषु शक्तितारतम्येनैकपक्षाश्रयणं न त्वेकादशीत्यागः॥ प्रमादादिनैकादश्यामुपोषणाद्यकरणे द्वादश्यामपि व्रतं कार्यम् ॥ द्वादश्यामप्यकरणे यवमध्यचांद्रायणं प्रायश्चित्तम् ॥ नास्तिक्यादकरणे पिपीलिकामध्यचांद्रायणम् ॥ अशक्तपतिपुत्राद्युद्देशेन स्त्रीपुत्रभगिनीभ्रात्रादिभिरेकादशीव्रताचरणे क्रतुशतजं पुण्यम् ॥

## अथैकादशीव्रतदिननिर्णयः ।

तत्र व्रताधिकारिणो द्विविधा वैष्णवाः स्मार्ताश्च ॥ तत्र यद्यपि यस्य दीक्षास्ति वैष्णवीत्यादिलक्षणयुक्ता वैष्णवास्तद्भिन्नाः स्मार्ता इति महानिबंधेषूक्तम् ॥ तथापि स्वपारंपर्यप्रसिद्धमेव वैष्णवत्वं स्मार्तत्वं च वृद्धा मन्यंत इति सिंधूक्तमेव सर्वदेशे सर्वशिष्टपरिगृहीतं प्रचरति ॥ वेधोपि द्विविधः ॥ अरुणोदये दशमीवेधः सूर्योदये तद्वेधश्च ॥ सूर्योदयात् प्राक् चतुर्घटिकात्मकोरुणोदयः ॥ सूर्योदयस्तु स्पष्टः ॥ तेन षट्पंचाशद्घटिकानंतरं कलामात्रदशमीप्रवेशेऽरुणोदयवेधो वैष्णवविषयः ॥ षष्टिघटिकात्मकसूर्योदयोत्तरं पलादिमात्रदशमीसत्त्वे सूर्योदयवेधः स्मा-

र्तविषयः ॥ ज्योतिर्विदादिवादेन वेधादिसंदेहे तु ॥ "बहुवाक्यविरोधेन ब्राह्मणेषु विवादिषु ॥ एकादशीं परित्यज्य द्वादशीं समुपोषयेत् ॥" तथा च एकादशी द्विविधा विद्धा शुद्धा च ॥ अरुणोदयवेधवती विद्धा॥ तां त्यक्त्वा वैष्णवैर्द्वादश्येवोपोष्या ॥ अरुणोदयवेधरहिता शुद्धा ॥ सा चतुर्विधा ॥ एकादशीमात्राधिक्यवती १ द्वादशीमात्राधिक्यवती २ उभयाधिक्यवती ३ अनुभयाधिक्यवती ४ अत्राधिक्यं सूर्योदयोत्तरसत्त्वम् ॥ तत्रोदाहरणम् ॥ दशमी नाड्यः ५५ एकादशी ६०–१ द्वादश्याः क्षयः ५८ इयमेकादशीमात्राधिक्यवती वैष्णवैः परोपोष्या स्मार्तगृहस्थैः पूर्वा ॥ १ ॥ अथ दशमी ५५ एकादशी ५८ द्वादशी ६० इयं शुद्धा द्वादशीमात्राधिक्यवती ॥ अत्र वैष्णवानां द्वादश्यामुपोषणम् ॥ स्मार्तानां पूर्वा ॥ २ ॥ अथ दशमी ५५ एकादशी ६०–१ द्वादशी ५ इयं शुद्धा उभयाधिक्यवती ॥ अत्र सर्वैर्वैष्णवैः स्मार्तैश्च परैवोपोष्या ॥ ३ ॥ अथ दशमी ५५ एकादशी ५७ द्वादशी ५८ इयमनुभयाधिक्यवती शुद्धा वैष्णवैः स्मार्तैश्च पूर्वैवोपोष्या ॥ इति संक्षेपतो वैष्णवनिर्णयः ॥

## अथ स्मार्तनिर्णयः ।

तत्र सूर्योदयवेधवती विद्धा तद्रहिता शुद्धा चेति ॥ द्विविधापि प्रत्येकं चतुर्धा ॥ एकादशी मात्राधिक्यवती ॥ १ ॥ उभयाधिक्यवती ॥ २ ॥ द्वादशीमात्राधिक्यवती ॥ ३ ॥ अनुभयाधिक्यवतीत्येवं अष्ट भेदा भवंति ॥ ४ ॥ अत्रोदाहरणानि ॥ दशमी ५८ एकादशी ६०–१ द्वादश्याः क्षयः ५८ इयं शुद्धा एकादशी मात्राधिक्यवती ॥ १ ॥ दशमी ४ एकादशी २ द्वादश्याः क्षयः ५८ एवं विद्धा एकादशी मात्राधिक्यवती ॥ २ ॥ अत्रोभयत्रापि स्मार्तानां गृहिणां पूर्वोपोष्या ॥ यतिभिर्निष्कामिगृहिभिर्वनस्थैर्विधवाभिर्वैष्णवैश्च परैवोपोष्या ॥ विष्णुप्रीतिकामैस्तु स्मार्तैरुपवासद्वयं कार्यमिति केचित् ॥ उभयाधिक्यवती शुद्धा यथा–दशमी ५८ एकादशी ६० द्वादशी ४ उभयाधिक्यवती विद्धा यथा–दशमी २ एकादशी ३ द्वादशी ४ अत्र उभयत्रापि स्मार्तैर्वैष्णवैश्च सर्वैश्चावशिष्टा परैवैकादश्युपोष्या ॥ ३ ॥ द्वादशीमात्राधिक्यवती शुद्धा यथा–दशमी ५८ एकादशी ५९ द्वादशी ६०–१ अत्रशुद्धत्वात्स्मार्त्तानामेकादश्यामेवोपवासो न द्वादश्यामिति माधवमतम् ॥ हेमाद्रिमते तु सर्वैः परा द्वादश्येवोपोष्या ॥ केचित्तु मुमुक्षुभिः स्मार्तैः परोपोष्येत्याहुः ॥ द्वादशी मात्राधिका विद्धा यथा–दशमी १ एकादशी क्षयगामिनी ५८ द्वादश्या वृद्धिः ६०–१ तत्रैकादश्या विद्धत्वात्तु द्वादश्यामेव स्मार्तानामप्युपवासः ॥ एवं चोभयाधिक्ये द्वादशीमात्राधिक्ये च स्मार्तानां विद्धायास्त्यागो नान्यत्र ॥ वैष्णवानां तु षाड्विधामप्याधिक्यवतीं

त्यक्ता द्वादश्युपोष्या ॥ अनुभयाधिक्यवती शुद्धा यथा–दशमी ५७ एकादशी ५८ द्वादशी ५९ स्मार्तानामेकादश्यामेवोपवासो न द्वादश्याम् ॥ वैष्णवानां तु विद्धत्वात् द्वादश्यामेवोपवासः ॥ अनुभयाधिक्यवती विद्धा यथा–दशमी २ एकादश्याः क्षयः ५६ द्वादशी ५५ अत्रापि स्मार्तानामेकादश्यामुपवासः ॥ वैष्णवानां द्वादश्यामुपवासः ॥ अस्मिन्नुभयाधिक्यवती विद्धा चरमे भेदे प्रथमभेददय इव यतिभिर्मुमुक्षुभिर्विधवाभिः परोपोष्या ॥ विष्णुप्रीतिकामैरुपवासद्वयं कार्यमितितुल्ययुक्त्या प्रतिभाति ॥ इदानीं शिष्टास्तु हेमाद्रिमतं निष्कामत्वादिकं चानादृत्य माधवमतेनैव सर्वस्मार्तनिर्णयमविशेषेण वदंति न तु क्वचिदुपवासद्वयं शुद्धाधिकद्वादशिकायां सर्वेषामेकं परोपवासं वा वदंतीति सर्वत्र देशेषु प्रायो माधवोक्तानुसार एव प्रचार इति बोध्यम् ॥ एतेन वैष्णवाष्टादशभेदानां स्मार्ताष्टादशभेदानां च निर्णयः सर्वोपि गतार्थो भवतीति विभावनीयम् ॥ विस्तरस्तु महाग्रंथेष्वनुसंधेयः ॥ अत्राष्टादशभेदानां पृथक्पृथगुदाहरणकथने तन्निर्णयकथने च बालानां व्यामोहमात्रं स्यादिति स निर्णयः पृथगेव पट्टे लिखित्वा स्थापितोनुसंधेयः ॥ अत्रार्धरात्रोत्तरं दशमीसत्त्वे कपालवेधो द्विपंचाशद्घटिकादशमीसत्त्वे छायावेधस्त्रिपंचाशद्घटीत्वे दशम्या ग्रस्ताख्यो वेधश्चतुःपंचाशत्त्वे संपूर्णाख्यः पंचपंचाशत्त्वेऽतिवेधः षट्पंचाशत्त्वे महावेधः सप्तपंचाशत्त्वे प्रलयाख्योष्टपंचाशत्त्वे महाप्रलय एकोनषष्टित्वे घोराख्यः षष्टित्वे राक्षसाख्य इति वेधभेदा नारदेनोक्ता मध्वादिमतानुसारिभिः कैश्चिदेव केचिदेवानुसृताः ॥ माधवाचार्यादिसर्वसंमतस्तु षट्पंचाशद्घटीवेध एवेति ज्ञेयम् ॥ दशमीपंचदशघटीभिरेकादशी दूषितेति तूपवासातिरिक्तव्रते ॥

## अथ व्रतप्रयोगः ।

उपवासात्पूर्वदिने प्रातः कृतनित्यक्रियः ॥ "दशमीदिनमारभ्य करिष्येहं व्रतं तव। त्रिदिनं देवदेवेश निर्विघ्नं कुरु केशव" इति संकल्प्य मध्याह्न एकभक्तं कुर्यात्॥ तत्र नियमाः ॥ कांस्यमांसमसूरादिवास्वापातिभोजनात्यंबुपानपुनर्भोजनमैथुनक्षौद्रानृतभाषणचणककोद्रवशाकपरान्नद्यूततैलतिलपिष्टतांबूलवर्जनादयः ॥ एकभक्तानन्तरं काष्ठेन दंतधावनं कुर्यात् ॥ निशि भूतल्पे शयित्वा प्रातरेकादश्यां पर्णादिना दंतधावनं कार्यं न तु काष्ठेन ॥ स्नानादिनित्यक्रियांते पवित्रपाणिरुदङ्मुखो वारिपूर्णं ताम्रपात्रमादाय संकल्पं कुर्यात् ॥ "एकादश्यां निराहारो भूत्वाहमपरेहनि । भोक्ष्यामि पुण्डरीकाक्ष शरणं मे भवाच्युतेति ॥" अनेन मन्त्रेण पुष्पांजलिं वा हरौ दद्यात् ॥ अशक्तस्य त्वेकादश्यां जलाहार एकादश्यां क्षीरभक्षणमेकादश्यां फलाहार एकादश्यां नक्तभोजीत्याद्यूहेन शक्त्यनुसारेण संकल्पः ॥ शैवानां रुद्रगायत्र्या संकल्पः सौराणां नित्यगायत्र्या नाम्ना वा संकल्पः ॥ अयं संकल्पः

सूर्योदयोत्तरं दशमीसत्त्वे स्मार्तैरेकादश्यां रात्रौ कार्यः ॥ अर्धरात्रादुपरि दशम्यनुवृत्तौ सर्वैरेकादश्यां मध्याह्नोत्तरं कार्यः ॥ संकल्पोत्तरमष्टाक्षरमंत्रेण त्रिरभिमंत्रितं तज्जलं पिबेत् ॥ ततः पुष्पमंडपं कृत्वा तत्र ॥ "पुष्पैर्गंधैस्तथा धूपैर्दीपैर्नैवेद्यकैः परैः ॥ स्तोत्रैर्नानाविधैर्दिव्यैर्गीतवाद्यैर्मनोहरैः ॥ दंडवत्प्रणिपातैश्च जयशब्दैस्तथोत्तमैः ॥ हरिं संपूज्य विधिवद्रात्रौ कुर्यात्प्रजागरम्॥" एकादश्यां नियमाः॥ पाखंडिसंभाषणस्पर्शदर्शनवर्जनब्रह्मचर्यसत्यभाषणदिवास्वापवर्जनादयः परिभाषोक्ताश्च ज्ञेयाः पाखंडिदर्शनादौ तु "सूर्यं पश्येत्ततः शुचिः ॥ संस्पर्शे तु बुधः स्नायाच्छुचिरादित्य दर्शनात् ॥ संभाष्य ताञ्शुचिषदं चिंतयेदच्युतं बुधः" इत्यादि प्रायश्चित्तम्॥ उपवासदिने श्राद्धप्राप्तौ श्राद्धशेषसर्वान्नैनैकं पात्रं परिविष्य तत्सर्वान्नावघ्राणं कृत्वा पात्रं गवादिभ्यो देयम् ॥ कंदमूलफलाहाराद्यनुकल्पेनोपवासकर्त्रा तु स्वभक्ष्यस्यैव फलादेः पितृब्राह्मणपात्रेषु परिवेषणपूर्वकं तच्छेषभक्षणं कार्यम् ॥ "एकादश्यां यदा भूप मृताहः स्यात्कदाचन ॥ तद्दिनं तु परित्यज्य द्वादश्यामेव कारयेत्" इत्यादिवचनानि यथाचारं वैष्णवपराणि ॥ वैष्णवैः षोडशमहालयकरणपक्षे एकादश्यधिकरणकं द्वादश्यधिकरणकं च महालयं तंत्रेण करिष्ये ॥ ॥ इति संकल्प्य महालयद्वयं द्वादश्यां कार्यम् ॥

## अथ काम्योपवासादौ सूतकादिप्राप्तौ ।

काम्योपवासे सूतकप्राप्तौ शारीरनियमात्स्वयं कृत्वा सूतकांते पूजादानब्राह्मण भोजनादिकं कार्यम् ॥ नित्योपवासे सूतकादिप्राप्तौ स्नात्वा हरिं प्रणम्य नीराहारादिकं स्वयं कृत्वा पूजादिकं ब्राह्मणद्वारा कार्यम् ॥ दानादेर्लोपो न ॥ सूतकांतेनुष्ठानावश्यकत्वात् ॥ एवं रजस्वलादिदोषेपि ॥ द्वादश्यां प्रातर्नित्यपूजां विधाय भगवते व्रतं समर्पयेत् ॥ "अज्ञानतिमिरांधस्य व्रतेनानेन केशव ॥ प्रसीद सुमुखो नाथ ज्ञानदृष्टिप्रदो भव" इति तत्र मन्त्रः ॥

## अथ व्रतनियमभंगे प्रायश्चित्तम् ।

दशम्यादिषूक्तानां नियमानां भंगे दिवास्वापे बहुशो जलपाने मिथ्याभाषणे वा तत्तन्नियमभंगमुद्दिश्य नारायणाष्टाक्षरमन्त्रजपमष्टोत्तरशतसंख्यया कुर्यात् ॥ अल्पदोषे नामशतत्रयजपः ॥ रजस्वलाचांडालरजकसूतिकादिशब्दस्य व्रतमध्ये श्रवणेष्टोत्तरसहस्रगायत्रीजपः ॥ ततो नैवेद्यतुलसीमिश्रितान्नेन पारणं कार्यम् ॥ आमलकीफलस्य पारणायां भक्षणेऽसंभाष्यभाषणादिदोषनाशः ॥ पारणं च द्वादश्युल्लंघने महादोषाद्द्वादशीमध्य एव कार्यम् ॥ स्वल्पद्वादशीसत्त्वे रात्रिशेषे आमाध्याह्नांताः क्रियाः सर्वा अपकृष्य कार्याः ॥ अग्निहोत्रहोमस्य नापकर्ष इति केचित् ॥ एवं श्राद्धस्यापि नापकर्षो रात्रौ श्राद्धनिषेधात् ॥ अतिसंकटे श्राद्धे

प्रदोषादिव्रते च तीर्थजलेन पारणं कार्यम् ॥ द्वादशीभूयस्त्वे द्वादशीप्रथमपादं हरिवासरसंज्ञकमुल्लंघ्य पारणं कार्यम् ॥

## अथ पारणाकालः ।

कलामात्राया अपि द्वादश्या अभावे त्रयोदश्यां पारणम् ॥ द्वादश्या मध्याह्नोर्ध्वं सत्त्वेप्रातर्मुहूर्तत्रयमध्य एव पारणं न मध्याह्नादौ इति बहवः ॥ बहूनां कर्मकालानां बाधापत्तेरपराह्ण एवेति केचित् ॥

## अथ श्रवणद्वादशी ।

द्वादश्यां सर्वमासेषु शुक्लायां कृष्णायां वा श्रवणयोगे शक्तेनैकादशीद्वादश्योर्द्वयोरप्युपवासः कार्यः ॥ अशक्तेनैकादश्यां फलाहाराद्यनुकल्पं कृत्वा श्रवणद्वादश्यामुपवासः कार्यः ॥ विष्णुशृंखलयोगसत्त्वे त्वेकादश्यामेव श्रवणद्वादशीप्रयुक्तमप्युपवासं कृत्वा द्वादश्यां श्रवणयोगरहितायां पारणं कार्यम् ॥ द्वादश्याः श्रवणतो न्यूनत्वे श्रवणयुक्तायामपि द्वादश्यामेव पारणम् ॥ द्वादश्युल्लंघने दोषात् ॥ विष्णुशृंखलयोगादिनिर्णयो भाद्रपदमासगतश्रवणद्वादशीप्रकरणे वक्ष्यते ॥

## अथ द्वादश्या नियमाः ।

"दिवा निद्रा परान्नं च पुनर्भोजनमैथुने ॥ क्षौद्रं कांस्यामिषं तैलं द्वादश्यामष्ट वर्जयेत्" ॥ द्यूतक्रोधचणककोद्रवमाषतिलपिष्टमसूरनेत्रांजनमिथ्याभाषणलोभायासप्रवासभारवाहनाध्ययनतांबूलादीनि वर्जयेत् ॥ एते च नियमाः काम्यव्रते आवश्यकाः ॥ नित्यव्रते तु ॥ "शक्तिमांस्तु पुमान्कुर्यान्नियमं सविशेषणम् ॥ विशेषनियमाशक्तोऽहोरात्रं भुजिवर्जितः ॥ निगृहीतेंद्रियः श्रद्धासहायो विष्णुतत्परः ॥ उपोष्यैकादशीं पापान्मुच्यते नात्रसंशयः ॥ अन्यं भुंक्ष्वेति यो ब्रूयाद्भुंक्ते वा यः स नारकी ॥ एकादशीव्रताद्विष्णुसायुज्यं लभते श्रियम्" ॥ इत्येकादशीव्रतनिर्णयः॥ कार्यांतरेष्वेकादशी द्वादशीयुतैव ग्राह्या॥ ॥इत्येकादशीनिर्णयोद्देशः सप्तदशः१७॥

## अथ द्वादशीनिर्णयः ।

द्वादशी त्वेकादशीविद्धा ग्राह्या ॥ अथाष्टौ महाद्वादश्यः ॥ शुद्धाधिकैकादशीयुक्ता द्वादशी उन्मीलनीसंज्ञा ॥ १ ॥ द्वादश्येव शुद्धाधिका वर्धते सा वंजुली ॥ २ ॥ सूर्योदये एकादशी ततः क्षयगामिनी द्वादशी द्वितीयसूर्योदये त्रयोदशी एवमेकाहोरात्रे तिथित्रयस्पर्शात्रेस्पर्शासंज्ञा द्वादशी ॥ ३ ॥ दर्शस्य पौर्णमास्या वा यदा दिनवृद्धिस्तदा पक्षवर्धिनीसंज्ञा ॥ ४ ॥ पुष्यर्क्षयुता जया ॥ ५ ॥ श्रवणयुता विजया ॥ ६ ॥ पुनर्वसुयुता जयन्ती ॥ ७ ॥ रोहिणीयुता पापनाशिनी ॥ ८ ॥ एताः पापक्षयमिच्छिकाम उपवसेत् ॥ श्रवणयुता त्वेकादशीवन्नित्या ॥ एतास्वशक्तः

स्वैकादशीद्वादश्योरेकत्वे तन्त्रेणोपवासः ॥ पार्थक्ये शक्तस्योपवासद्वयम् ॥ यस्त्वारब्धव्रतद्वय उपवासद्वयाशक्तश्च तस्य द्वादशीसमुपोषणाद्व्रतद्वयपुण्यलाभः ॥ तत्र श्रवणर्क्षयोगो मुहूर्तमात्रोपि ग्राह्यः ॥ पुष्यादियोगः सूर्योदयमारभ्यास्तमयपर्यंतश्चेदुपवासः ॥ पारणं तु तिथिनक्षत्रसंयोगोपोषणे उभयांतेऽन्यतरांते वेति सर्वसामान्यनिर्णयः ॥ ॥ इति द्वादशीनिर्णयोद्देशोऽष्टा० ॥ १८ ॥

## अथ त्रयोदशीनिर्णयः ।

त्रयोदशी शुक्ला पूर्वा कृष्णोत्तरा॥शनिवारादियुक्तां कांचिच्छुक्लत्रयोदशीमारभ्य संवत्सरपर्यंतं प्रतिपक्षं त्रयोदशीषु शनिवारयुक्तास्वेव चतुर्विंशतिशुक्लत्रयोदशीषु वा कर्तव्यं यत्प्रदोषसमये शिवपूजानक्तभोजनात्मकं प्रदोषव्रतं तत्र सूर्यास्तमानोत्तरत्रिमुहूर्तात्मकप्रदोषव्यापिनी त्रयोदशी ग्राह्या ॥ दिनद्वये प्रदोषव्याप्तौ साम्येन तदेकदेशस्पर्शे वा उत्तरा ॥ वैषम्येणैकदेशस्पर्शे तदाधिक्यवती पूर्वापि ग्राह्या ॥ यदि देवपूजाभोजनपर्याप्तं तदाधिक्यं लभ्येत ॥ नोचेत्साम्यपक्षवदुत्तरैव ॥ उभयत्र सर्वथा व्याप्त्यभावेपि परैव ॥ ॥ इति त्रयोदशीनिर्णयोद्देशऊ० ॥ १९ ॥

## अथ चतुर्दशीनिर्णयः ।

चतुर्दशी तु शुक्ला परा कृष्णा पूर्वा ॥ यत्तु प्रतिमासं कृष्णचतुर्दश्यां [शिवरात्रिव्रतं काम्यमनुष्ठीयते तत्र महाशिवरात्रिवन्निशीथव्यापिन्येव ग्राह्या ॥ उभयत्र निशीथव्याप्तौ परा प्रदोषव्याप्तेराधिक्यात् ॥ कैश्चित्प्रदोषमात्रव्यापिनी गृह्यते तत्र मूलं चिंत्यम् ॥ यत्तु चतुर्दश्यां दिवाभोजननिषेध एव नित्यत्वात्परिपाल्यते तत्र भोजनकालव्यापिनीं चतुर्दशीं त्यक्त्वा त्रयोदश्यां पंचदश्यां वा भोक्तव्यम् ॥ शिवरात्रिव्रतिभिस्तु चतुर्दश्यामेव पारणा कर्तव्या ॥ न तत्र चतुर्दश्यष्टमी दिवेति भोजननिषेधप्राप्तिः ॥ विधिप्राप्तेर्निषेधाप्रवेशात् ॥ ॥ इति चतुर्दशीनिर्णयोद्देशो विंशः ॥ २० ॥

## अथ पूर्णिमामावास्ययोर्निर्णयः ।

पूर्णिमामावास्ये तु सावित्रीव्रतं विना परेग्राह्ये ॥ यत्तु कैश्चिच्छ्रावणीद्वताशनीपौर्णमास्योः कुलधर्मादौ पूर्वविद्धयोर्ग्राह्यत्वोक्तेः सर्वा पौर्णमासी कुलधर्मादौ पूर्वा गृह्यते तत्र मूलं मृग्यम्॥ अष्टादशनाडिकातो न्यूनचतुर्दशीसत्त्वे तादृशचतुर्दशीविद्धस्य 'भूतोष्टादशनाडीभिः'इति वचनाददूषकत्वप्रतीतेरस्तु वा तादृशस्थले कुलधर्मे पूर्वत्र ग्राह्यत्वम् ॥ अष्टादशनाडिकाधिकचतुर्दशीविद्धे तु पूर्वविद्धा पौर्णमासी न ग्राह्येति मे प्रतिभाति ॥ अमावास्या भौमसोमवारयुता स्नानदानादौ महापुण्या ॥ एवं भानुयुता सप्तमी भौमयुता चतुर्थी च ॥ यत्तु सोमयुतामावास्यायामश्वत्थपूजाद्यात्मकं सोमवतीव्रतमनुष्ठीयते तत्रापराह्णपर्यंतं मुहूर्तमात्रयोगेपि व्रतं कार्यम्॥

दिनांत्यषड्घटिकात्मकसायाह्नयोगे रात्रियोगे च कार्यमिति शिष्टाचारः ॥ यतीनां क्षौरादावुदये त्रिमुहूर्तव्यापिनी पौर्णमासी ग्राह्या ॥ तृतीयमुहूर्तस्पर्शाभावे चतुर्दशीयुता ॥ ॥ इति पंचदशीनिर्णयोद्देश एकविंशतितमः ॥ २१ ॥

## अथेष्टिकालः ।

पक्षांता उपस्तव्याः॥पक्षाद्या यष्टव्याः॥उपवासोन्वाधानाख्यं कर्म ॥ 'पर्वणो यश्चतुर्थांश आद्याः प्रतिपदस्त्रयः ॥ यज्ञकालः स विज्ञेयः प्रातरुक्तो मनीषिभिः ॥ प्रतिपत्तुर्यचरणे न यष्टव्यमिति स्थितिः॥' तत्र पर्वप्रतिपदोः पूर्णत्वे संदेहाभावः ॥ पर्वण्यन्वाधानस्योत्तरदिने यागस्य यथोक्तकाललाभात् ॥ पर्वणः खंडत्वे तु पर्वापेक्षया प्रतिपदो ह्रासवृद्धिघटिका गणयित्वा तदर्धं ह्रासे पर्वणि वियोज्य वृद्धौ संयोज्य संधिकालं ज्ञात्वान्वाधानादिकाले निर्णेतव्यः ॥ यत्र ह्रासवृद्धी न स्तस्तत्र यथास्थितः स्पष्ट एव संधिः॥ तत्र संधिश्चतुर्विधः ॥ पूर्वाह्णसंधिर्मध्याह्नसंधिरपराह्नसंधी रात्रिसंधिश्चेति ॥ द्वेधा विभक्तदिनस्य पूर्वार्द्धं पूर्वाह्णः ॥ अपरार्धमपराह्णः ॥ पूर्वाह्णपराह्णसंधिभूतो घटिकाद्वयात्मको मुहूर्तो मध्याह्नः ॥ आवर्तनापरपर्याय इति कौस्तुभे ॥ उभयसंधिरेकपलात्मक एव मध्याह्नो न तु घटिकाद्वयात्मक इति प्रायेणेदानीं शिष्टाचारः ॥ तत्रोक्तरीत्या ह्रासवृद्ध्यर्थवियोजनसंयोजनेन निर्णीतः ॥ पर्वप्रतिपदोः संधिर्यदि पूर्वाह्णे मध्याह्ने वा भवति तदा संधिदिनात्पूर्वदिनेन्वाधानं संधिदिने यागः ॥ यद्यपराह्णे रात्रौ वा संधिस्तदा संधिदिनेन्वाधानं तत्परदिने यागः ॥

## अथोदाहरणम् ।

पर्व सप्तदशघटीमितं प्रतिपदेकादशघटीमिता तत्र षड्घटीमितः प्रतिपत्क्षयस्तदर्धं घटीत्रयं पर्वणि वियोजितं जातः संधिश्चतुर्दशघटीमितः ॥ अयं त्रिंशद्घटीमिते दिनमाने पूर्वाह्णसंधिः ॥ अष्टाविंशतिघटीमिते तु दिनमानेऽयमेव मध्याह्नसंधिः ॥ अत्र संधिदिने यागः ॥ पूर्वदिनेन्वाधानम् ॥ पर्व १४ प्रतिपत् १९ अत्र पंचघटिका वृद्धिः ॥ तदर्धं सार्धघटीद्वयं पर्वणि संयोजितं जातः संधिः सार्धषोडशघटीमितः ॥ अयमपराह्णसंधिः ॥ अत्र संधिदिनेन्वाधानं परेद्युर्यागः ॥

## अथात्र बालबोधार्थं प्रकारांतरम् ।

सूर्योदयोत्तरं विद्यमानाः पर्वनाडिकाः प्रतिपन्नाडिकाश्चैकीकृताः सत्यो यदि दिनमानतो न्यूनास्तदा पूर्वाह्णसंधिः ॥ यदि दिनमानसमास्तदा मध्याह्नसंधिः ॥ यदि दिनमानादधिकास्तदापराह्णसंधिरिति ॥ इत्थं सूर्योदयोत्तरमनुवर्तमानपर्वप्रतिपदोः क्षयवृद्धिभ्यामेव संध्यवलोकनमिदानीं सर्वत्र शिष्टाचारेषु प्रसिद्धम् ॥

कौस्तुभादौ तु चतुर्दशी दिनस्था उदयात्पूर्वं पर्वणो गतघटिका उदयादेष्यघटिकाश्चैकीकृत्यैवं प्रतिपदः पर्वदिनस्था उत्तरदिनस्थाश्च घटिका एकीकृत्य पर्वापेक्षया प्रतिपदो वृद्धिक्षयौ ज्ञेयौ ॥ तद्यथा ॥ चतुर्दशी २२ पर्व १७ चतुर्दशीदिनस्थाः पर्वनाडिकाः ॥ ३८ उत्तरदिनस्थाः १७ एकीकृत्य जाताः ५५ पर्वदिनस्थाः प्रतिपन्नाड्यः ॥ ४३ उत्तरदिनस्थाः ११ एकीकृत्य जाताः ५४ अत्रैका घटी प्रतिपत्क्षयस्तदर्धमर्धघटी पर्वणि वियोजिता जातः संधिः सार्धषोडशनाड्यः॥ अयमपराह्णसंधिः ॥ प्रथममते त्वत्र पूर्वाह्णसंधिः स्थितः ॥ तथा चतुर्दशी २४ पर्व १७ पूर्वं गतनाड्यः॥३६ एष्ययोगे जाताः ५३ प्रतिपत्११ गतैष्ययोगे जाताः ५४ अत्र पूर्वोक्तरीत्या क्षयोदाहरणे एवैका घटी वृद्धिस्तदर्धसंयोजने सार्द्धसप्तदशनाडीमितोऽपराह्णसंधिः ॥ एवं च पूर्वमतैतन्मतयोरत्यंतं विरोधः ॥ वृद्धिक्षयादिसर्ववैपरीत्यात् ॥ अत्र मते घटीद्व्याधिका वृद्धिः क्षयो वा न संभवतीति परेह्नि घटिकान्यूनास्तथैवाधिकाश्च 'याः' इति बहुवचनमसंगतमितिदूषणं पुरुषार्थचिंतामणौ द्रष्टव्यम् ॥

## अथ पौर्णमास्या विशेषः ।

संगवकालादूर्ध्वं त्रयोदशादिघटीमारभ्यार्द्धाह्नात्पूर्वं संधौ सद्यस्कालापौर्णमासी तस्या संधिदिने एवान्वाधानं यागश्च सद्योनुष्ठेयः ॥ इदं पौर्णमास्यां सद्यस्कालत्वं वैकल्पिकमिति केचित् ॥ अमावास्यायां सर्वत्र द्व्यहकालतैव न कदाचिदपि सद्यस्कालता ॥ पूर्णमास्याममायां चापराह्णसंधौ प्रतिपच्चतुर्थपादे यागो न दोषाय ॥ अमावास्यायामपराह्णसंधावपि प्रतिपदि त्रिमुहूर्ताधिकद्वितीयाप्रवेशे चन्द्रदर्शनसंभवेन चन्द्रदर्शने यागनिषेधादमावास्यायामेवेष्टिश्चतुर्दश्यामन्वाधानं बौधायनादीनाम् ॥ अमावास्यायां सप्तघटीमितप्रतिपदभावे चंद्रदर्शनेपि प्रतिपद्येव बौधायनैरिष्टिः कार्या ॥ आश्वलायनापस्तंबादीनां तु चंद्रदर्शननिषेधो नास्तीति प्रतिपद्येवेष्टिः ॥ यत्र संधिदिने इष्टिस्तत्र सा प्रतिपद्येव समापनीया न तु पर्वणि ॥ पर्वणि यागसमाप्तौ पुनर्यागः कर्तव्यः ॥ एवमेव स्मार्ते पार्वणस्थालीपाकनिर्णयः ॥ केचित्तु स्मार्ते स्थालीपाकः प्रतिपद्येव समापनीय इति नियमो नास्ति ॥ पूर्वाह्ण एव स्थालीपाकं समाप्य संधेरूर्ध्वं प्रतिपदि ब्राह्मणभोजनमात्रं कार्यम् ॥ जयंतोपि संधिसन्निकृष्टे प्रातःकाल एव स्थालीपाकमाहेति विशेषमाहुः ॥ श्रौतेपि ब्राह्मणभोजनमात्रं प्रतिपदि कार्यम् ॥ अन्यत्तंत्रं पूर्वाह्ण एव समापनीयं न प्रतिपदपेक्षेति पुरुषार्थचिंतामणावुक्तम् ॥ कातीयानां पौर्णमासेष्टिनिर्णयः पूर्वोक्तः सर्वसाधारण एव न तत्र कश्चिद्विशेषः ॥ इति सिंध्वादिबहुग्रंथसंमतम् ॥ अन्ये तु पूर्वाह्णसंधौ संधिदिनेन्वाधानं परेह्नि याग इति पूर्णमासीविषये कातीयानां विशेषमाहुः ॥

## अथामावास्याया कातीयाना विशेषः ।

अमाविषये त्रेधा विभक्तदिनस्य प्रथमो भागः पूर्वाह्णः ॥ द्वितीयो भागो मध्याह्नः ॥ तृतीयो भागोऽपराह्णः ॥ तत्र रात्रिसंधौ प्रतिपद्दिने चंद्रदर्शने सत्यपि परेषामिव कातीयानामपि संधिदिने पिंडपितृयज्ञोन्वाधानं च परदिने चेष्टिरिति निर्विवादम् ॥ पूर्वाह्णे दिनद्वितीयभागाख्यमध्याह्ने च संधौ संधिपूर्वदिनेन्वाधानपिंडपितृयज्ञौ संधिदिने चेष्टिः ॥ तदा चतुर्दशीदिनेऽमावास्याया दिनतृतीयभागाख्यापराह्णे यदि पूर्णव्याप्तिस्तर्ह्यमायुक्तेऽपराह्णे पिंडपितृयज्ञ इति न संदेहः ॥ यदि तृतीयभागाख्यापराह्णांत्यभागेऽपराह्णैकदेशेऽमावास्याव्याप्तिस्तर्ह्यमावास्यायां प्राप्तायां पिंडपितृयज्ञो न चतुर्दश्यामित्येकः पक्षः ॥ चतुर्दश्यंते भागे पिंडपितृयज्ञश्चन्द्रस्य परमक्षीणत्वादित्यपरः पक्षः ॥

## अथापराह्णसंधौ चत्वारः पक्षाः ।

संधिदिने एव दिनतृतीयभागाख्यापराह्णेऽमायाः पूर्णव्याप्तिरिति प्रथमः पक्षः ॥ यथा चतुर्दशी २९ अमा ३० प्रतिपत् २९ दिनमानं च त्रिंशत् ३० ॥ अत्र संधिदिनेन्वाधानपितृयज्ञौ परदिने यागः ॥ संधिपूर्वदिने एवोक्तापराह्णेऽमायाः पूर्णव्याप्तिरिति द्वितीयः पक्षः ॥ यथा चतुर्दशी २० अमा २२ प्रतिपत् २४ दिनं ३० अत्र संधिदिनात्परदिने मुहूर्तत्रयात्मकप्रातःकाले प्रतिपत्पादत्रयावच्छिन्नयागकाललाभात्संधिदिनेन्वाधानपितृयागौ प्रतिपदि चेष्टिरिति कौस्तुभमतम् ॥ त्रिमुहूर्ता द्वितीया चेत्प्रतिपद्यापराह्णिकी ॥ अन्वाधानं चतुर्दश्यां परतः सोमदर्शनादिति वचनाच्चतुर्दश्यां पिंडपितृयज्ञोपवासौ संधिदिने चेष्टिरिति परमतम् ॥ अथापरं द्वितीयपक्षोदाहरणम् ॥ चतुर्दशी १८ अमा १८ प्रतिपत् १९ दिनं २७ अत्र प्रतिपद्दिने प्रातःपादत्रयावच्छिन्नयागकालाभावात्संधिदिने एव सर्वमते कातीयानामिष्टिः ॥ पूर्वदिने पिंडपितृयज्ञोपवासौ ॥ दिनद्वये साम्येन वैषम्येण वैकदेशव्याप्तिरिति तृतीयः पक्षः ॥ यथा चतुर्दशी २५ अमा २५ प्रतिपत् २४ दिनमानं ३० इयं साम्येनापराह्णव्याप्तिः ॥ अत्र कौस्तुभमतपरमतोक्तरीत्या द्वेधा निर्णयः ॥ यथा वा चतुर्दशी २५ अमा २० प्रतिपत् १७ दिनं २७ इयमपि साम्येनैकदेशव्याप्तिः ॥ अत्र सर्वमते संधिदिने एव कातीयेष्टिः पूर्वदिने च पिंडपितृयज्ञोपवासौ ॥ ॥ अथ वैषम्येणैकदेशव्याप्तिः ॥ चतुर्दशी २५ अमा २३ प्रतिपत् २३ दिनं ३० अत्रापि पूर्वोक्तमतद्वयेन द्वेधा निर्णयो ज्ञेयः ॥ यथा वा चतुर्दशी २५ अमा २२ प्रतिपत् १८ दिनं ३० इयमपि वैषम्येणैकदेशव्याप्तिः ॥ अत्रापि सर्वमते संधिदिने कातीयेष्टिश्चतुर्दश्यामुपवासपिंडपितृयज्ञौ यथा वा चतुर्दशी २५ अमा २७ प्रतिपत् २९ दिनं ३० अत्र संधिदिनेन्वाधानयागौ प्रतिपदीष्टिः ॥ संधिदिने एवैः

कदेशव्याप्तिरिति चतुर्थः पक्षः ॥ यथा चतुर्दशी ३१ अमा २६ प्रतिपत् २३ दिनं ३० यथा वा चतुर्दशी २८ अमा २२ प्रतिपत् १७ दिनं २७ अत्रोभयत्रापि संधिदिने एव पिंडपितृयज्ञान्वाधाने यागस्तु परेह्नि प्रतिपदि ॥ एवंच कात्यायनमतेपि सर्वत्रोदाहरणे चन्द्रदर्शननिषेधप्रतिपालनं न संभवति ॥ किंतु कुत्रचिन्निषेधादरात्पूर्वत्र यागादिकं क्वचित्तु चंदद्रर्शनवत्येव दिने ॥ एवं पिंडपितृयज्ञोपीति ध्येयम् ॥ दर्शश्राद्धार्थममावास्यानिर्णयः सर्वसाधारणः पृथगेव वक्ष्यते ॥

## अथ सामगानामिष्टेर्निर्णयः ।

तत्र पौर्णमासी सर्वसाधारणा पूर्वोक्तैव ॥ अमावास्यायां तु रात्रिसंधौ प्रतिपद्येव चंद्रदर्शनेपि यागः ॥ अपराह्णसंधौ तु प्रातः षड्घटिकात्मकप्रतिपदाद्यपादत्रयरूपयागकालालाभे प्रतिपदि चंद्रदर्शनेपीष्टिः संधिदिने चोपवासपितृयज्ञौ ॥ उक्तयागकालालाभे संधिदिने यागः ॥ पूर्वदिने चतुर्दश्यां पितृयज्ञोपवासौ ॥ एवं च सामगैरपि चंद्रदर्शननिषेधः कात्यायनवदेव यथासंभवं पालनीयः ॥ ॥ इति सामगनिर्णयः ॥ ॥ इति यागकालनिर्णयोद्देशो द्वाविंशः ॥ २२ ॥

## अथ पिंडपितृयज्ञकालः ।

तत्राश्वलायनानां यस्मिन्नहोरात्रे अमावास्याप्रतिपदोः संधिस्तदिनापराह्णे पंचधा विभक्तदिनचतुर्थभागरूपे पिंडपितृयज्ञः ॥ स चापराह्णसंधावन्वाधानदिने भवति ॥ मध्याह्ने पूर्वाह्णे वा संधौ यागादिने यागोत्तरमपराह्णे भवति ॥ यदाहोरात्रसंधौ तिथिसंधिस्तदान्वाधानदिने एव पिंडपितृयज्ञः ॥ एवमापस्तंबहिरण्यकेशीमतानुसारिणामपि संधिदिने एव पितृयज्ञः ॥ स चापराह्णेधिवृक्षसूर्ये वा कार्यः ॥ अपराह्णश्च पंचधा विभक्तदिनचतुर्थभागो नवधा विभक्तदिनसप्तमभागो वा ॥ सांख्यायनकात्यायनसामगानामन्वाधानदिने एव पिंडपितृयज्ञः पूर्वमेव उक्तः ॥ स च त्रेधा विभक्तदिनतृतीयभागरूपेऽपराह्णे कार्यः ॥ गृह्याग्निमतां बह्वृचानां दर्शश्राद्धपिंडपितृयज्ञयोरेकस्मिन् दिने प्राप्तौ व्यतिषंगेणानुष्ठानम् ॥ व्यतिषंगो नामोभयोः सहप्रयोगः ॥ खंडपर्वणि तु पूर्वेद्युः केवलदर्शश्राद्धमुत्तरेह्नि केवलः पिंडपितृयज्ञः ॥ श्रौताग्निमतां तु केवलपिंडपितृयज्ञ एव दक्षिणाग्नौ कार्यो न व्यतिषंगेण ॥ श्रौताग्निमतां संपूर्णे दश इत्थं क्रमः ॥ आदावन्वाधानं ततो वैश्वदेवस्ततः पिंडपितृयज्ञस्ततो दर्शश्राद्धमिति ॥ अस्मिन्नेव काले जीवत्पितृकेण साग्निकेन होमांते वा पितुः पित्रादित्रयोद्देशेन पिंडसहितोवाऽपिंडपितृयज्ञः कार्यः ॥ यद्वा पिंडपितृयज्ञो नैवारब्धव्यः ॥ इष्टिलोपे पादकृच्छ्रं प्रायश्चित्तम् ॥ इष्टिद्वयलोपेऽर्धकृच्छ्रम् ॥ इष्टित्रयलोपेऽग्निनाशात्पुनराधानम् ॥ पिंडपितृयज्ञलोपे वैश्वानरेष्टिः

प्रायश्चित्तम् ॥ इष्टिस्थाने सप्तहोतारं होष्यामीति संकल्प्य तन्मंत्रेण चतुर्गृहीताज्येन पूर्णाहुतिर्वा कार्या ॥ इति पिंडपितृयज्ञोदेशस्य० ॥ २३ ॥

## अथ श्राद्धेऽमावास्या निर्णीयते ।

पंचधा विभक्तदिनचतुर्थभागाख्याऽपराह्णव्यापिन्यमावास्या दर्शश्राद्धे ग्राह्या ॥ पूर्वेद्युरेव परेद्युरेव वाऽपराह्णे कात्स्न्येनैकदेशेन वा व्यापित्वे सैव ग्राह्या ॥ उभयदिनेप्यपराह्णे वैषम्येणैकदेशव्यापित्वे याधिकव्यापिनी सा ग्राह्या ॥ दिनद्वये साम्येनैकदेशव्याप्तौ तिथिक्षये पूर्वा ॥ तिथिवृद्धौ तिथिसाम्ये च परा ॥ तत्र समव्याप्तौ तिथिवृद्धिक्षयसाम्योदाहरणानि ॥ चतुर्दशी १९ अमा २३ दिनं ३० अत्र दिनद्वयेपि समा पंचघटिकैकदेशव्याप्तिश्चतुर्दश्यपेक्षया चतुर्घटिकाभिरमाया वृद्धिसत्त्वादुत्तरा ग्राह्या ॥ तथा चतुर्दशी २३ अमा १९ अत्रैका घटिका समाव्याप्तिर्घटिकाचतुष्टयेन तिथिक्षयात्पूर्वा ग्राह्या ॥ अथ चतुर्दशी २१ अमा २१ अत्र घटीत्रयेण दिनद्वयेंशतः समाव्याप्तिस्तिथेस्तु वृद्धिक्षयाभावेन समत्वात्परा ग्राह्या ॥ दिनद्वये पूर्णापराह्णव्याप्तौ तिथिवृद्धित्वात्परा ग्राह्या ॥ यदा दिनद्वयेप्यपराह्णस्पर्शाभावस्तदा गृह्याग्निमद्भिः श्रौताग्निमद्भिश्च सिनीवालीसंज्ञिका चतुर्दशीमिश्रा पूर्वा ग्राह्या ॥ निरग्निकैः स्त्रीशूद्रादिभिश्च कुहूसंज्ञिका प्रतिपन्मिश्रा परा ग्राह्येति माधवाचार्यसंमतो दर्शनिर्णयः प्रायः सर्वत्र शिष्टैराद्रियते पुरुषार्थचिंतामणौ तु बह्वृचैस्तैत्तिरीयैश्च साग्निकैरपराह्णव्याप्त्यसत्त्वेपीष्टिदिनात्पूर्वदिने एव दर्शश्राद्धं कार्यम् ॥ तथा च दिनद्वये कात्स्न्येनापराह्णव्याप्तौ परत्रैव दर्शः एकदेशेनापराह्णव्याप्तौ प्रतिपद्वृद्ध्या प्रतिपदीष्टावुत्तरत्रैव दर्शः ॥ द्वितीयदिने एवापराह्णव्याप्तौ तु यदि प्रतिपत्क्षयवशाद्दर्शदिन एवेष्टिप्राप्तिस्तदा बह्वृचानां सिनीवाली तैत्तिरीयाणां कुहूर्ग्राह्या ॥ सामगानां विकल्पेन द्वयम् ॥ यदा पूर्वदिनेपराह्णेऽधिका व्याप्तिः परदिने स्वल्पा तदा सामगानां पूर्वा तैत्तिरीयाणामुत्तरा ॥ उभयत्रापराह्णस्पर्शाभावेपि सामगानां पूर्वा तैत्तिरीयाणां परेत्याद्युक्तम् ॥ दर्शे दर्शश्राद्धवर्षश्राद्धयोर्दर्शमासिकयोर्दर्शश्राद्धोदकुंभश्राद्धयोश्च संपाते देवताभेदाच्छ्राद्धद्वयं कार्यम् ॥ तत्रादौ मासिकाब्दिकादिश्राद्धं कृत्वा पाकांतरेण दर्शश्राद्धं कार्यम् ॥ वैश्वदेव आब्दिकादिश्राद्धशेषेण पृथक्पाकेन वा दर्शश्राद्धात्प्राग् भवति ॥ आहिताग्निस्तु वैश्वदेवं पिंडपितृयज्ञं च कृत्वाब्दिकं कुर्यात् ॥ दर्शश्राद्धमनुपनीतविधुरप्रवासस्थैरपि कार्यम् ॥ अमाश्राद्धातिक्रमे 'न्यूषुवाचम्' इति ऋचं शतवारं जपेत् ॥ ॥ इति दर्शनिर्णयोद्देशश्च० ॥ २४ ॥

## अथेष्टिस्थालीपाके प्रथमारंभविचारः ।

इष्टिस्थालीपाकौ पौर्णमास्यामारब्धव्यौ न तु दर्शे ॥ आधानगृहप्रवेशनीयहोमानंतरमेव पौर्णमास्यां यदि दर्शपौर्णमासारंभः क्रियते तदा मलमासपौषमास-

शुक्रास्तादिदोषो नास्ति ॥ तत्रातिक्रमे तु शुद्धमासादिप्रतीक्षेत्येके ॥ सर्वथा शुद्धकाले पर्वारंभ इत्यपरे ॥ ॥ इतीष्ट्यादिप्रारंभनिर्णयोद्देशः पं० ॥ २५ ॥

## अथ विकृतिकालः ।

ता विकृतयस्त्रिविधाः ॥ नित्या आग्रयणचातुर्मास्याद्याः ॥ नैमित्तिक्यो जातेष्ट्यादयः ॥ काम्याः सौर्यादयः ॥ एताः पुरुषार्थाः ॥ एवं क्रत्वंगभूता अपि द्विविधाः नित्यानैमित्तिकाश्च ॥ तत्र विकृतिषु सद्यस्कालत्वद्व्यहकालत्वयोर्विकल्पः ॥ एवं पर्वणि शुक्लपक्षगतदेवनक्षत्रेषु वा कर्तव्या इति विकल्पः ॥ तत्र पर्वणि करणपक्षेऽपराह्णादिसंधौ संधिदिने सद्यस्कालां द्व्यहकालां वा विकृतिं कृत्वा प्रकृतेरन्वाधानम् ॥ मध्याह्ने पूर्वाह्णे वा संधौ संधिदिने प्रकृतिं समाप्य सद्यस्काल एव विकृतिः कार्या ॥ कृत्तिकादीनि विशाखांतानि चतुर्दश नक्षत्राणि देवनक्षत्राणीत्युच्यन्ते ॥ आग्रयणे विशेषो द्वितीयपरिच्छेदे वक्ष्यते ॥ अन्वारंभणीयेष्टिश्चतुर्दश्यां कार्या ॥ ॥ इति विकृतिसामान्यनिर्णयोद्देशः ष० ॥ २६ ॥

## अथ पशुयागकालः ।

पशुयागस्तु वर्षर्त्तौ श्रावण्यादिचतुर्णां पर्वणामन्यतमे पर्वणि दक्षिणायनदिने उत्तरायणदिने वा कार्यः ॥ तत्र खंडपर्वणि विकृतिसामान्योक्तपर्वनिर्णयः ॥ ॥ इति पशुयागोद्देशः स० ॥ २७ ॥

## अथ चातुर्मास्यकालः ।

तत्प्रयोगे चत्वारः पक्षाः ॥ फाल्गुन्यां चैत्र्यां वा पौर्णमास्यां वैश्वदेवपर्व कृत्वा चतुर्षुचतुर्षु मासेष्वाषाढ्यादिष्वेकैकं पर्वेत्येवं यावज्जीवमनुष्ठानमिति यावज्जीवपक्षः ॥ उक्तरीत्या संवत्सरपर्यंतमनुष्ठाय सवनेष्ट्या पशुयागेन वा सोमयागेन वा समापनं सांवत्सरः पक्षः ॥ प्रथमेहनि वैश्वदेवपर्व ॥ चतुर्थदिने वरुणप्रघासपर्व ॥ अष्टमनवमयोः साकमेधपर्व ॥ द्वादशे शुनासीरीयपर्वेति द्वादशाहपक्षः ॥ पंचभिर्दिनैः समाप्तौ यथाप्रयोगपक्षः ॥ द्वादशाहयथाप्रयोगपक्षयोरुदगयने शुक्लपक्षे देवनक्षत्रेष्वारभ्य शुक्लपक्ष एव समाप्तिरिति बहवः ॥ कृष्णपक्षे वा समाप्तिरिति केचित् ॥ द्वादशाहपंचाहपक्षयोरपि सवनेष्ट्यादिना समापने कृते सकृत्करणम् ॥ तदभावे प्रतिवत्सरमनुष्ठानम् ॥ क्वचिदैकाहिकप्रयोगपक्षोप्युक्तः ॥ स च चैत्र्यादिषु चतसृषु पौर्णमासीष्वेकस्यां कस्यांचिद्भवति ॥ क्वचित्तु सप्ताहपक्षः ॥ स यथा ॥ द्व्यहे वैश्वदेवपर्व ॥ तृतीयदिने वरुणप्रघासः ॥ चतुर्थे गृहमेधीया ॥ पंचमे महाहवींषि ॥ षष्ठे पितृयज्ञादिसाकमेधपर्वशेषः ॥ सप्तमे शुनासीरीयपर्वेति ॥ अत्र शुक्लपक्षादिः पंचाहपक्षोक्तः कालः ॥ ॥ इति चातुर्मास्यकालनिर्णयोद्देशोऽष्टा० ॥२८॥

## अथ काम्यनैमित्तिकादीष्टिकालः ।

काम्येष्टीनां विकृतिसामान्यनिर्णयानुसारेण पर्वण्यनुष्ठानं शुक्लपक्षस्थदेवनक्षत्रे वा ॥ जातेष्टिस्तु पत्न्या विंशतिरात्र्यात्मककर्मान्यधिकाराख्यजननाशौचनिवृत्तौ सत्यां पर्वणि कार्या ॥ ग्रहदाहेष्ट्यादिनैमित्तिकेष्टीनां निमित्तानंतरमनुष्ठाने पर्वाद्यपेक्षा नास्ति तदसंभवे पर्वापेक्षा ॥ क्रत्वर्थानां नित्यानां क्रतुना सहैवानुष्ठानं न तत्र पृथक्कालापेक्षा ॥ हविर्दोषोद्देशादिनैमित्तिकक्रत्वर्थेष्टयस्तु स्विष्टकृदुत्तरं समिष्टयजुषः प्राक् निमित्तस्मरणे तदानीमेव तदीयतंत्रोपजीवनेन निर्वापप्रभृति कार्याः ॥ तदनंतरस्मरणे तत्प्रयोगं समाप्य पुनरन्वाधानादिविधिना कार्याः ॥ ॥ इति काम्यनैमित्तिकादीष्टीनां निर्णयोद्देश ऊन० ॥ २९ ॥

## अथाधानकालो नक्षत्राणि च ।

आधानं तु पर्वणि नक्षत्रे चोक्तम् ॥ तत्र संकल्पप्रभृतिपूर्णाहुतिपर्यंतप्रयोगपर्याप्तं पर्व ग्राह्यम् ॥ तदसंभवे गार्हपत्याधानाद्याहवनीयाधानपर्यंतं विद्यमानं ग्राह्यम् ॥ एवं नक्षत्रस्यापि निर्णयः ॥ दिनद्वये कर्मकालव्याप्तपर्वसत्त्वे यत्रोक्तनक्षत्रयोगस्तद्ग्राह्यम् ॥ वसंतर्तुपर्वोक्तनक्षत्रेत्येतत्त्रितयसंनिपाते प्रशस्ततमम् ॥ ऋत्वभावे मध्यमम् ॥ केवले पर्वणि नक्षत्रे वाधमम् ॥ नक्षत्राणि तु कृत्तिकारोहिणीविशाखापूर्वाफाल्गुन्युत्तराफाल्गुनीमृगोत्तराभाद्रपदेति सप्ताश्वलायनसूत्रोक्तानि ॥ कृत्तिकारोहिणीत्युत्तरामृगपुनर्वसुपुष्यपूर्वाफाल्गुनीपूर्वाषाढाहस्तचित्राविशाखानुराधाश्रवणज्येष्ठारेवतीति सूत्रांतरोक्तानि॥सोमपूर्वाधाने तु 'नर्तुपृच्छेन्न नक्षत्रम्'इति वचनात्सोमकालानुरोधेनैवाधानं न तत्र पृथक्कालविचारः ॥ ॥इत्याधानकालोद्देशस्त्रि० ॥३०॥

## अथ ग्रहणनिर्णयः ।

चंद्रसूर्यग्रहणं यावच्चाक्षुषदर्शनयोग्यं तावत्पुण्यकालः ॥ अतो ग्रस्तास्तस्थलेऽस्तोत्तरं द्वीपांतरे ग्रहणसत्त्वेपि दर्शनयोग्यत्वाभावान्न पुण्यकालः ॥ एवं ग्रस्तोदये उदयात्पूर्वं न तु पुण्यकालः ॥ मेघादिप्रतिबंधेन चाक्षुषदर्शनासंभवे शास्त्रादिना स्पर्शमोक्षकालौ ज्ञात्वा स्नानदानाद्याचरेत् ॥ रविवारे सूर्यग्रहश्चंद्रवारे चंद्रग्रहश्चूडामणिसंज्ञस्तत्र दानादिकमनंतफलम् ॥ ग्रहस्पर्शकाले स्नानं मध्ये होमः सुरार्चनं श्राद्धं च मुच्यमाने दानं मुक्ते स्नानमिति क्रमः ॥ तत्र स्नानजलेषु तारतम्यम् ॥ "शीतमुष्णोदकात्पुण्यमपारक्यं परोदकात् ॥ भूमिष्ठमुद्धृतात्पुण्यं ततः प्रस्रवणोदकम् ॥ ततोपि सारसं पुण्यं ततः पुण्यं नदीजलम् ॥ ततस्तीर्थनदी गंगा पुण्यात्पुण्यस्ततोम्बुधिः"इति ॥ ग्रहणे स्नानं च सचैलत्वं मुक्तिस्नानपरमिति केचित् ॥ मुक्तिस्नानाभावे सूतकित्वानपगमः ॥ ग्रहणे स्नानममंत्रकम् ॥ सुवा-

सिनीभिस्त्रीभिराशिरस्नानं कार्यम् ॥ शिष्टस्त्रियस्तु ग्रहणेषु शिरःस्नानं कुर्वंति ॥ जाताशौचे मृताशौचे च ग्रहणनिमित्तं स्नानदानश्राद्धादि कार्यमेव ॥ "स्नाने नैमित्तिके प्राप्ते नारी यदि रजस्वला ॥ पात्रांतरिततोयेन स्नानं कृत्वा व्रतं चरेत् ॥ न वस्त्रपीडनं कुर्यान्नान्यद्वासश्च धारयेत्" ॥ त्रिरात्रमेकरात्रं वा समुपोष्य ग्रहणे स्नानदानाद्यनुष्ठाने महाफलम् ॥ एकरात्रपक्षे ग्रहणदिनात्पूर्वदिने उपवास इति केचित् ॥ ग्रहणसंबंधाहोरात्र उपवास इत्यपरे ॥ पुत्रवद्गृहिणो ग्रहणसंक्रांत्यादौ नोपवासः ॥ पुत्रवत्पदेन कन्यावानपि ग्राह्य इति केचित् ॥ ग्रहणे देवपितृतर्पणं कार्यमिति केचित्॥ "सर्वेषामेव वर्णानां सूतकं राहुदर्शने॥"तेन ग्रहणकाले स्पृष्टवस्त्रादेः क्षालनादिना शुद्धिः कार्या ॥ अत्र गोभूहिरण्यधान्यादिदानं महाफलम् ॥ तपोविद्योभययुक्तं मुख्यं दानपात्रम् ॥ सत्पात्रे दानात्पुण्यातिशयः ॥ "सर्वं गंगासमं तोयं सर्वे व्याससमा द्विजाः ॥ सर्वं भूमिसमं दानं ग्रहणे चंद्रसूर्ययोः"इत्युक्तिः पुण्यसामान्याभिप्राया ॥ अत एव ॥ "सममब्राह्मणे दानं द्विगुणं ब्राह्मणव्रुवे ॥ श्रोत्रिये शतसाहस्रं पात्रे त्वानंत्यमश्नुते"॥ इति तारतम्यमुक्तम् ॥ अब्राह्मणे संस्कारादिरहिते जातिमात्रे ब्राह्मणे दानं यथोक्तफलम् ॥ गर्भाधानादिसंस्कारयुतो वेदाध्ययनाध्यापनरहितो ब्राह्मणव्रुवस्तत्र दानमुक्तं द्विगुणफलम् ॥ वेदाध्ययनादियुते श्रोत्रिये सहस्रफलम् ॥ विद्यासदाचरणादियुते पात्रेऽनंतफलमित्यर्थः ॥ ग्रहणे श्राद्धमामेन हेम्ना वा कार्यम् ॥ संपन्नश्चेत्पक्वान्नेन कुर्यात् ॥ सूर्यग्रहणे तीर्थयात्रांगश्राद्धवद्घृतप्रधानान्नेन श्राद्धं कार्यम ॥ग्रहणे श्राद्धभोक्तुर्महादोषः ॥ ग्रहणे तुलादानादिकं संपन्नेन कार्यम् ॥

## अथ ग्रहणे मंत्रदीक्षा।

"चंद्रसूर्यग्रहे तीर्थे महापर्वादिके तथा ॥ मंत्रदीक्षां प्रकुर्वाणो मासक्षौदीन्न शोधयेत् ॥" मंत्रदीक्षाप्रकारस्तंत्रे द्रष्टव्यः ॥ दीक्षाग्रहणमुपदेशस्याप्युपलक्षणम् ॥ "युगेयुगे तु दीक्षासीदुपदेशः कलौ युगे ॥ चंद्रसूर्यग्रहे तीर्थे सिद्धक्षेत्रे शिवालये ॥ मंत्रमात्रप्रकथनमुपदेशः स उच्यते" ॥ मंत्रग्रहणे सूर्यग्रहणमेव मुख्यम् ॥ चंद्रग्रहणे दारिद्र्यादिदोषोक्तेरिति केचित् ॥

## अथ ग्रहणे पुरश्चरणविधिः ।

"चंद्रसूर्योपरागे च स्नात्वा पूर्वमुपोषितः ॥ स्पर्शादिमोक्षपर्यंतं जपेन्मंत्रं समाहितः ॥ जपाद्दशांशतोहोमस्तथा होमाच्च तर्पणम् ॥ होमाशक्तौ जपं कुर्याद्धोमसंख्या चतुर्गुणम्"॥मूलमंत्रमुच्चार्य तदंते द्वितीयांतं मंत्रदेवतानामोच्चार्यामुकां देवतामहं तर्पयामि नम इति यवादियुक्तजलांजलिभिस्तर्पणं होमदशांशेन कार्यम् ॥ एवं नमोंतमूलमंत्रमुक्त्वामुकां देवतामहमभिषिंचाम्यनेनेत्युच्चार्य जलेन स्वमूर्ध्न्यभिषिंचेदितिमार्जन तर्पणदशांशेन कार्यम् ॥ मार्जनदशांशेन ब्राह्मणभोजनम् ॥

एवं जपहोमतर्पणमार्जनविप्रभोजनात्मकपंचप्रकारं पुरश्चरणम् ॥ तर्पणाद्यसंभवे तत्तत्संख्याचतुर्गुणो जप एव कार्यः ॥ अयं च ग्रहणे पुरश्चरणप्रकारो ग्रस्तोदये ग्रस्तास्ते च न संभवति ॥ पुरश्चरणांगोपवासः पुत्रवद्दुहिणापि कार्यः ॥ पुरश्चरणकर्तुः स्नानदानादिनैमित्तिककर्मलोपे प्रत्यवायप्रसंगान्नैमित्तिकं स्नानदानादिकं भार्यापुत्रादिप्रतिनिधिद्वारा कार्यम् ॥ अत्रेत्थमितिकर्तव्यता ॥ स्पर्शकालात्पूर्वं स्नात्वामुकगोत्रोमुकशर्माहं राहुग्रस्ते दिवाकरे निशाकरे वामुकदेवताया अमुकमंत्रसिद्धिकामो ग्रासादिमुक्तिपर्यंतममुकमंत्रस्य जपरूपं पुरश्चरणं करिष्ये इति संकल्पं च कृत्वासनबंधन्यासादिकं च स्पर्शात्पूर्वमेव विधाय स्पर्शादिमोक्षपर्यंतं मूलमंत्रजपं कुर्यात् ॥ ततः परदिने स्नानादिनित्यकृत्यं विधायामुकमंत्रस्य कृतैतद्ग्रहणकालिकामुकसंख्याकं पुरश्चरणजपसांगतार्थं तदशांशहोमतदशांशतर्पणतदशांशमार्जनतदशांशब्राह्मणभोजनानि करिष्ये इति संकल्प्य होमादिकं तत्तच्चतुर्गुणद्विगुणान्यतरजपं वा कुर्यात् ॥ ग्रहणकाले च तत्प्रेरितः पुत्रादिरमुकशर्मणोमुकगोत्रस्यामुकग्रहणस्पर्शस्नानजनितश्रेयःप्राप्त्यर्थं स्पर्शस्नानं करिष्य इत्यादि संकल्पपूर्वकं तदीयस्नानदानादिकं कुर्यात् ॥ पुरश्चरणमकुर्वद्भिरपि गुरूपदिष्टः स्वस्वेष्टदेवतामंत्रजपो गायत्रीजपश्चावश्यं ग्रहणे कार्योऽन्यथा मंत्रमालिन्यम् ॥

## अथ ग्रहणे शयनमूत्रादिकृते ।

ग्रहणकाले शयने कृते रोगो मूत्रे दारिद्र्यं पुरीषे कृमिर्मैथुने ग्रामसूकरोभ्यंग कुष्ठी भोजने नरक इति ॥

## अथ पक्वान्नग्रहणे विचारः ।

पूर्वपक्वमन्नं ग्रहणोत्तरं त्याज्यम् ॥ एवं ग्रहणकालस्थितजलपाने पादकृच्छ्राभिधानाज्जलमपि त्याज्यम् ॥ कांजिकं तक्रं घृततैलपाचितमन्नं क्षीरं च पूर्वासिद्धं ग्रहणोत्तरं ग्राह्यम् ॥ घृते सन्धिते गोरसेषु ग्रहणकाले कुशांतरायं कुर्यात ॥

## अथ वेधविचारः ।

सूर्यग्रहे ग्रहणप्रहरादर्वाक् यामचतुष्टयं वेधः ॥ चन्द्रग्रहे तु प्रहरत्रयम् ॥ तथा च दिनप्रथमप्रहरे सूर्यग्रहे पूर्वरात्रिप्रहरचतुष्टये न भोक्तव्यम् ॥ द्वितीये यामे ग्रहणे रात्रिद्वितीययामादौ न भोक्तव्यम् ॥ एवं रात्रिप्रथमप्रहरे चंद्रग्रहे दिनद्वितीययामादौ न भुंजीत ॥ रात्रिद्वितीययामादौ ग्रहणे दिनतृतीययामादौ न भुंजीत ॥ बालवृद्धातुरविषये तु सार्धप्रहरात्मको मुहूर्तत्रयात्मको वा वेधः ॥ शक्तस्य वेधकाले भोजने त्रिदिनमुपोषणं प्रायश्चित्तम् ॥ ग्रहणकाले भोजने प्राजापत्यं प्रायश्चित्तम् ॥ चंद्रस्य ग्रस्तोदये तु यामचतुष्टयवेधात्तत्पूर्वं दिवा न भुंजीत ॥ केचित्तु चंद्रपूर्णमंडलग्रासे यामचतुष्टयं वेध एकदेशग्रासे यामत्रयमित्याहुः ॥

ग्रस्तास्ते तु "ग्रस्तावेवास्तमानं तु रवींदू प्राप्नुतो यदि ॥ परेद्युरुदये स्नात्वा शुद्धोभ्यवहरेन्नरः" ॥ अत्र स्नात्वा शुद्ध इत्युक्त्या शुद्धमंडलदर्शनकालिकस्नानात्पूर्वमशुद्धिप्रतिपादनाज्जलाहरणपाकादिकं शुद्धबिंबोदयकालिकस्नानात्पूर्वं न कार्यमिति भाति ॥ सूर्यग्रस्तास्तादौ पुत्रवद्गृहिण उपवासनिषेधात्तेन षण्मुहूर्तात्मकं वेधं त्यक्त्वा ग्रहणात्पूर्वं भोक्तव्यमिति केचित् ॥ पुत्रवद्गृहिणापि तत्रोपवास एव कार्य इति माधवमतमेव तु शिष्टाचारानुसृतं युक्तम् ॥ सूर्यग्रस्तास्ते चंद्रग्रस्तोदये चाहिताग्निनान्वाधानं विधाय जलेन व्रतं कार्यं न तु भोजनम् ॥ चंद्रग्रस्तास्ते उत्तरदिने संध्याहोमादौ न दोषः ॥ तत्राल्पकालेन शास्त्रतो मुक्तिनिश्चये मुक्त्यनंतरं स्नात्वा होमादिकं कर्तव्यम् ॥ चिरकालेन मुक्तौ होमकालातिक्रमप्रसंगाद्ग्रस्तोदय इव ग्रहणमध्ये एव संध्यां होमं च कृत्वा शास्त्रतो मुक्तिकाले स्नात्वा ब्रह्मयज्ञादिनित्यकर्म कर्तव्यमिति भाति ॥ दर्शे ग्रहणनिमित्तकश्राद्धेनैव दर्शश्राद्धसंक्रांतिश्राद्धानां प्रसंगसिद्धिर्भवति ॥ ग्रहणदिने पित्रादेर्वार्षिकश्राद्धप्राप्तौ सति संभवेन्ने कार्यम् ॥ ब्राह्मणाद्यलाभेनासंभवे त्वामेन हेम्ना वा कार्यम् ॥

## अथ जन्मराशेः शुभाशुभविचारः ।

स्वजन्मराशेस्तृतीयषष्ठैकादशदशमराशिस्थितं ग्रहणं शुभप्रदम् ॥ द्वितीयसप्तमनवमपंचमस्थानेषु मध्यमम् ॥ जन्मचतुर्थाष्टमद्वादशराशिस्थितमनिष्टप्रदम् ॥

## अथ राशौ ग्रहणे दानविधिः ।

यस्य जन्मराशौ जन्मनक्षत्रे वा ग्रहणं तस्य विशेषतोनिष्टप्रदम् ॥ तेन गर्गाद्युक्ता शांतिः कार्या ॥ अथवा बिंबदानं कार्यम् ॥ तद्यथा ॥ चंद्रग्रहे रजतमयं चंद्रबिंबं सुवर्णमयं नागबिंबं च कृत्वा सूर्यग्रहे सौवर्णं सूर्यबिंबं नागबिंबं च कृत्वा घृतपूर्णे ताम्रपात्रे कांस्यपात्रे वा निधाय तिलवस्त्रदक्षिणासाहित्यं संपाद्य मम जन्मराशिजन्मनक्षत्रस्थितामुकग्रहसूचितसर्वानिष्टप्रशांतिपूर्वकमेकादशस्थानस्थितग्रहणसूचितशुभफलावाप्तये बिंबदानं करिष्ये–इति संकल्प्य सूर्यं चंद्रं राहुं च ध्यात्वा नमस्कृत्य ॥ "तमोमय महाभीम सोमसूर्यविमर्दन ॥ हेमतारप्रदानन मम शांतिप्रदो भव ॥ विधुंतुद नमस्तुभ्यं सिंहिकानंदनाच्युत ॥ दानेनानेन नागस्य रक्ष मां वेधजाद्भयात्" इति मन्त्रमुच्चार्य॥इदं सौवर्णं राहुबिंबं नागं सौवर्णं रविबिंबं राजतं चंद्रबिंबं वा घृतपूर्णकांस्यपात्रनिहितं यथाशक्ति तिलवस्त्रदक्षिणासहितं ग्रहणसूचितारिष्टविनाशार्थं शुभफलप्राप्त्यर्थं च तुभ्यमहं संप्रददे इति दानवाक्येन पूजितब्राह्मणाय दद्यात् ॥ एवं चतुर्थाद्यनिष्टस्थानेष्वपि दानं कार्यमिति भाति ॥यस्य जन्मराश्यादिग्रहणं तेन राहुग्रस्तरवींदुबिंबं नावलोकनीयम्॥इतरजनैरपि पटजलादिव्यवधाननैव ग्रस्तबिम्बं द्रष्टव्यं न साक्षात् ॥ मङ्गलकार्येषु पूर्णग्रासे

चन्द्रग्रहणद्वादश्यादितृतीयांतं दिनसप्तकं वर्ज्यम् ॥ सूर्यपूर्णग्रासे एकादश्यादिचतुर्थ्यंतदिनानि वर्ज्यानि ॥ खंडग्रहणे चतुर्दश्यादिदिनत्रयं वर्ज्यम् ॥ ज्योतिर्निबंधेषु ग्रासपादतारतम्येन दिनाधिक्योनत्वं तारतम्येन योजितम् ॥ ग्रस्तास्ते पूर्वदिनत्रयं वर्ज्यम् ॥ ग्रस्तोदये परं दिनत्रयं वर्ज्यम् ॥ ग्रहणनक्षत्रं षण्मासं पूर्णग्रासे वर्ज्यम् ॥ पादादिग्रासे सार्धमासादितारतम्येन योज्यम् ॥ पूर्वसंकल्पितस्य द्रव्यस्य ग्रहणोत्तरं दाने तद्द्विगुणं देयं भवति ॥ ॥ इति ग्रहणनिर्णयोद्देश एकत्रिंशः॥३१॥

## अथ समुद्रस्नानम् ।

समुद्रे पौणमास्यमावास्यादिपर्वसु स्नायात् ॥ भृगुभौमादिने स्नानं वर्जयेत् ॥ "अश्वत्थसागरौ सेव्यौ न स्पर्शस्तु कदाचन ॥ अश्वत्थं मंदवारे तु सागरं पर्वणि स्पृशेत् ॥ न कालनियमः सेतौ समुद्रस्नानकर्मणि" ॥ समुद्रस्नानप्रयोगोन्यत्र ज्ञेयः ॥ ॥ इति धर्मसिंधुसारे समुद्रस्नानोद्देशो द्वात्रिंशः ॥ ३२ ॥

## अथ तिथिविशेषे नक्षत्रविशेषे वारादौ च विधिनिषेधाः ।

"सप्तम्यां न स्पृशेत्तैलं नीलवस्त्रं न धारयेत्॥न चाप्यामलकैः स्नानं न कुर्यात्कलहं नरः ॥ सप्तम्यां नैव कुर्वीत ताम्रपात्रेण भोजनम्" ॥ नंदातिथिष्वभ्यंगो वर्ज्यः ॥ रिक्तासु क्षौरं वर्ज्यम् ॥ जयासु मांसं शूद्राद्यैर्वर्ज्यम् ॥ पूर्णासु स्त्री वर्ज्या ॥ रविवारेऽभ्यंगो भौमवारे क्षौरं बुधे योषिच्च वर्ज्या ॥ चित्राहस्तश्रवणेषु तैलं वर्ज्यम् ॥ विशाखाप्रतिपत्सु क्षौरं वर्ज्यम् ॥ मघाकृत्तिकात्र्युत्तरासु स्त्री न सेव्या ॥ तिलभक्षणं तिलतर्पणं च सप्तम्यां न ॥ नारिकेलमष्टम्यामलाबुं नवम्यां पटोलं दशम्यां निष्पावमेकादश्यां मसूरं द्वादश्यां वार्ताकं त्रयोदश्यां वर्ज्यम्॥ "पूर्णिमादर्शसंक्रांतिचतुर्दश्यष्टमीषु च॥ नरश्चांडालयोनौ स्यात्तैलस्त्रीमांससेवनात्" ॥ पूर्णिमादर्शसंक्रांतिद्वादशीषु श्राद्धदिने च वस्त्रं न पीडयेत् ॥ रात्रौ मृद्गोमयमुदकं च नाहरेत् ॥ गोमूत्रं प्रदोषकाले न गृह्णीयात् ॥ अमादिपर्वस्ववश्यं शांत्यर्थं तिलहोमी स्यादात्मरक्षणाय दानादिकं च कुयात् ॥ पर्वसु नाधीयीत ॥ शौचाचमनब्रह्मचर्यादिसेवी स्यात् ॥ प्रतिपदर्शषष्ठीनवमीतिथिषु श्राद्धदिने जन्मदिने व्रते चोपवासे च रविवारे मध्याह्नस्नानसमये च काष्ठेन दंतधावनं वर्ज्यम् ॥ "अलाभे दंतकाष्ठानां निषिद्धेपि दिने तथा ॥ अपां द्वादशगंडूषैः पत्रैर्वा शोधयेन्मुखम्" ॥ अत्र सर्वत्र निषेधेषु तिथ्यादिकं तत्कालव्यापि ग्राह्यम् ॥ ॥ इति धर्मसिंधुसारे तिथ्यादौ विधिनिषेधसंग्रहोद्देशस्त्रयस्त्रिंशत्तमः ॥ ३३ ॥

"मीमांसाधर्मशास्त्रज्ञाः सुधियोऽनलसा बुधाः ॥ कृतकार्याः प्राङ्निबंधैस्तदर्थं नायमुद्यमः ॥ ये पुनर्मदमतयोऽलसा अज्ञाश्च निर्णयम् ॥ धर्मं वेदितुमिच्छंति रचितस्तदपेक्षया ॥ निबंधोयं धर्मसिंधुसारनामा सुबोधनः ॥ अमुना प्रीयतां श्रीमद्विट्ठलो भक्तवत्सलः"॥ 'सर्वत्र मूलवचनानीह ज्ञेयानि तद्विचारश्च ॥ कौस्तुभ-निर्णयसिंधुश्रीमाधवकृतनिबंधेभ्यः ॥ प्रेम्णा सद्भिर्ग्रंथः सेव्यः शब्दार्थतः स दोषोपि॥ संशोध्य वापि हरिणा सुदाममुनिसतुषपृथुकमुष्टिरिव' ॥ ॥ ॥

इति श्रीमदनंतोपाध्याय सूनुकाशीनाथोपाध्यायविरचिते
धर्मसिन्धुसारे प्रथमपरिच्छेदः समाप्तः ॥

॥ श्रीः ॥

# द्वितीयपरिच्छेदः ।

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ ॥ श्रीपांडुरंगं विबुधांतरंगं नौमी-दिरां माधवमंदिरां च ॥ सतामनंतं हितमामनंत गुरुं गरिष्ठं जननीं वरिष्ठाम् ॥ ॥१॥ काशीनाथाभिधेनात्रानंतोपाध्यायसूनुना ॥ सामान्यं निर्णयं प्रोच्य विशेषेण विनिर्णयः ॥२॥ संगृह्यते धर्मसिंधुसाराख्ये कालगोचरे ॥ ग्रंथे प्रस्फुटबोधाय पुनरुक्तिर्न दूषणम् ॥३ ॥ प्रथमपरिच्छेदे मासविशेषानपेक्षसामान्यतस्तिथ्यादिनिर्णयमभिधायास्मिन्द्वितीयपरिच्छेदे चैत्रादिमासविशेषोपादानेन प्रतिपदादितिथिषु विहितसंवत्सरकृत्यानिर्णयसारं संगृह्णीमः ॥ अत्र शुक्लप्रतिपदादिरमांत एव मासः ॥ प्रायेण दाक्षिणात्यैरादियत इति तमेवाश्रित्य निर्णय उच्यते ॥ अत्र किंचित्पूर्वपरिच्छेदोक्तमपि पुनर्विशेषोक्तिभिर्दृढीक्रियत इति पुनरुक्तिर्न दोषाय ॥

## अथ मेषसंक्रमणपुण्यकालः ।

तत्र मेषसंक्रांतौ पूर्वाः पराश्च दशदश नाड्यः पुण्यकालः ॥ रात्रौ त्वर्धरात्रात्प्राक्संक्रमे पूर्वदिनोत्तरार्द्धं पुण्यम् ॥ अर्धरात्रात्परतः संक्रमे उत्तरदिनस्य पूर्वार्द्धं पुण्यम् ॥ अर्धरात्रे संक्रमे दिनद्वयं पुण्यम् ॥

## अथ वत्सरारंभस्तिथिनिर्णयश्च ।

तत्र चैत्रशुक्लप्रतिपदि वत्सरारंभः ॥ तत्रौदयिकी प्रतिपद्ग्राह्या ॥ दिनद्वये उदयव्याप्तौ अव्याप्तौ वा पूर्वा ॥ चैत्रमलमासत्वे वत्सरारंभनिमित्तकं तैलाभ्यंगं संकल्पादौ नूतनवत्सरनामकीर्तनाद्यारंभं च मलमासप्रतिपद्येव कुर्यात् ॥ प्रतिगृहं ध्वजारोपणं निंबपत्राशनं वत्सरादिफलश्रवणं नवरात्रारंभो नवरात्रोत्सवादिनिमित्ताभ्यंगादिश्च शुद्धमासप्रतिपदि कार्यः ॥ वत्सरारंभनिमित्तकोपि तैलाभ्यंगः शुद्धप्रतिपद्येवेति मयूखे उक्तम् ॥ अस्यां तैलाभ्यंगो नित्यः ॥ अकरणे प्रत्यवायोक्तेः ॥

## अथ नवरात्रारंभः ।

अस्यामेव प्रतिपदि देवीनवरात्रारंभः ॥ अत्र परयुता मुहूर्तमात्रापि प्रतिपद्ग्राह्या ॥ अत्र मुहूर्तपरिमाणम् ॥ "मुहूर्तमह्नो रात्रेश्च प्रोचुः पंचदशं लवम्" इत्युक्तं सर्वत्र ज्ञेयम् ॥ पारणादिविशेषनिर्णयः शारदनवरात्रवद्बोध्यः ॥ अत्रैव प्रपादानम् ॥ तत्र मंत्रः ॥ "प्रपेयं सर्वसामान्या भूतेभ्यः प्रतिपादिता ॥ अस्याः प्रदानात्पितरस्तृप्यंतु हि पितामहाः ॥ अनिवार्यं ततो देयं जलं मासचतुष्टयम्" ॥

प्रपां दातुमशक्तेन प्रत्यहमुदकुंभो द्विजगृहे देयः ॥ तत्र मंत्रः ॥ "एष धर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः ॥ अस्य प्रदानात्सकला मम संतु मनोरथाः"॥

## अथ कल्पादयः ।

इयमेव प्रतिपत्कल्पादिरपि ॥ एवं वैशाखशुक्लतृतीया फाल्गुनकृष्णतृतीया शुक्ला चैत्रपंचमी माघे त्रयोदशी कार्तिके सप्तमी मार्गशीर्षे नवमी एता अपि कल्पादयो बोध्याः ॥ आसु श्राद्धात्पितृतृप्तिः ॥

## अथ मत्स्यजयंतीपक्षः ।

चैत्रशुक्लप्रतिपन्मत्स्यजयंतीत्येके ॥

## अथ गौरीव्रतम् ।

चैत्रे दधिक्षीरघृतमधुवर्जनं दंपतीपूजनात्मकं गौरीव्रतं कार्यम् ॥

## अथ चंद्रव्रतम् ।

चैत्रशुक्लद्वितीयायां निशामुखे बालेंदुपूजनात्मकं चंद्रव्रतं कार्यम् ॥

## अथ मासमांदोलनगौरीव्रतम् ।

अस्यामेव दमनकेन गौरीशिवपूजम् ॥ चैत्रशुक्लतृतीयायां गौरीं शिवयुता संपूज्यांदोलनव्रतं मासपर्यंतं कार्यम् ॥ अत्र तृतीया मुहूर्तमात्रापि परा कार्या ॥ द्वितीययायुक्ता न कार्या ॥ चतुर्थीयुतायां वैधृत्यादियोगेपि सैव कार्या ॥ द्वितीया-योगनिषेधस्य बलवत्त्वात् ॥

## अथ रामांदोलनव्रतम् ।

अस्यामेव तृतीयायां श्रीरामचंद्रस्य दोलोत्सवमारभ्य मासपर्यंतं पूजापूर्वक-मांदोलनं कार्यम् ॥ एवं देवतांतराणामपि ॥ इयमेव तृतीया मन्वादिरपि ॥ अत्रैव सर्वमन्वादिनिर्णय उच्यते ॥ तत्र मन्वादयश्चैत्रे शुक्लतृतीया पौर्णमासी च॥ ज्येष्ठे पौर्णिमा ॥ आषाढस्य शुक्लदशमी पौर्णमासी च ॥ श्रावणस्य कृष्णाष्टमी ॥ भाद्रपदस्य शुक्लतृतीया ॥ आश्विनस्य शुक्लनवमी ॥ कार्तिकस्य शुक्लद्वादशी पौर्ण-मासी च ॥ पौषे शुक्लैकादशी ॥ माघे शुक्लसप्तमी ॥ फाल्गुनस्य पौर्णमास्य-मावास्या चेति चतुर्दश ज्ञेयाः ॥ एतास्तु मन्वादयः शुक्लपक्षस्थाः दैवे पित्र्ये कर्मणि पूर्वाह्णव्यापिन्यो ग्राह्याः ॥ पूर्वाह्णोत्र द्वेधा विभक्तदिनपूर्वो भागस्तत्रैव श्राद्धादिविधानात् ॥ दैवान्मानुषाद्वापराधात् पूर्वाह्णे श्राद्धाद्यनुष्ठानासंभवेऽपराह्ण व्यापिन्यो ग्राह्याः ॥ दिनपूर्वाह्णेऽपराह्णे वा श्राद्धाद्यनुष्ठेयम्॥ न तु दिनोत्तरार्द्धगत-मध्याह्नभागे इति तात्पर्यम्॥कृष्णपक्षस्थास्तु दैवे पित्र्ये च कर्मणि पंचधा विभक्त दिनचतुर्थभागाख्यापराह्णव्यापिन्यो ग्राह्या मन्वादिषु पिंडरहितं श्राद्धं कार्यम् ॥

## अथ श्राद्धफलम्।

अत्र श्राद्धैर्द्विसहस्रवर्षं पितॄणां तृप्तिः ॥

## अथ मन्वादिश्राद्धलोपे प्रायश्चित्तम्।

मन्वादिश्राद्धं च नित्यम् ॥ अत एव तदकरणे "त्वं भुवः प्रतिमानम्" इत्यृङ्मंत्रस्य शतवारं जले जपः प्रायश्चित्तं कार्यम् ॥

## अथ षण्णवतिश्राद्धसंख्या।

एवं षण्णवतिश्राद्धान्यपि नित्यानि ॥ तानि च ॥ "अमा १२ युग ४ मनु १४ क्रांति १२ धृति १२ पात १२ महालयाः १५ ॥ अष्टका ५ ऽन्वष्टका ५ पूर्वेद्युः ५ श्राद्धैर्नवतिश्च षट्" इति ज्ञेयानि ॥

## अथ दशावतारजयंत्यः।

चैत्रशुक्लतृतीयायामपराह्णे मत्स्योत्पत्तिः ॥ वैशाखपूर्णिमायां सायं कूर्मोत्पत्तिः ॥ भाद्रपदशुक्लतृतीयायामपराह्णे वराहोत्पत्तिः ॥ वैशाखशुक्लचतुर्दश्यां सायं नारसिंहावतारः ॥ भाद्रपदशुक्लद्वादश्यां मध्याह्ने वामनप्रादुर्भावः ॥ वैशाखशुक्लतृतीयायां मध्याह्ने परशुरामोद्भवः ॥ प्रदोषे इति बहवः ॥ चैत्रशुक्लनवम्यां मध्याह्ने दाशरथिरामाभिव्यक्तिः ॥ श्रावणकृष्णाष्टम्यां निशीथे श्रीकृष्णाविर्भावः ॥ आश्विनशुक्लदशम्यां सायं बुद्धोऽभूत् ॥ श्रावणशुक्लषष्ठ्यां सायं कल्किर्जात इति तत्तत्कालव्यापिन्यो ग्राह्याः ॥ अत्र मत्स्यकूर्मवराहबुद्धकल्कीनामाषाढादिमासांतराण्येकादश्यादितिथ्यंतराणि प्रातरादिकालांतराणि च वचनांतरानुसारेणोक्तानि कल्पभेदेन व्यवस्थापनीयानि स्वस्वपरिगृहीतपक्षानुसारेण तत्तदुपासकैरुपोष्याणि ॥ श्रीरामकृष्णनृसिंहजयंत्य एव नित्याः सर्वैरुपोष्याः ॥

## अथ गणेशदमनकचतुर्थी।

चैत्रशुक्लचतुर्थ्यां मध्याह्नव्यापिन्यां लड्डुकादिभिः श्रीगणेशमर्चयित्वा दमनकारोपणं कुर्यात् ॥ विघ्ननाशं सर्वान्कामांश्च प्राप्नुयात् ॥

## अथ शुक्लपंचम्यां व्रतानि।

चैत्रशुक्लपंचम्यामनंतादिनागान्पूजयित्वा क्षीरसर्पिर्नैवेद्यं दद्यात् ॥ अस्यामेव पंचम्यां लक्ष्मीपूजनम् ॥ अत्रैवोच्चैःश्रवादिपूजनात्मकं हयव्रतमुक्तम् ॥ अत्र सर्वत्र पंचमी सामान्यनिर्णयानुसारेण ग्राह्या ॥ एवमग्रेपि ॥ यत्र विशेषनिर्णयो नोच्यते तत्र प्रथमपरिच्छेदोक्त एव निर्णयोऽनुसंधेयः ॥ षष्ठ्यां स्कंदस्य दमनकारोपणम् ॥ सप्तम्यां भास्करस्य मनदकपूजनं नवम्यां देव्याः ॥ सर्वदेवानां पौर्ण-

मास्यामित्यन्यत्र विस्तरः ॥ चैत्रशुक्लाष्टम्यां भवान्या उत्पत्तिः ॥ तत्र नवमीयुता ग्राह्या ॥

## अथाशोककलिका ।

अत्र पुनर्वसुयुताष्टम्यामष्टाशोककलिकाप्राशनम् ॥ तत्र मंत्रः ॥ "त्वामशोक नराभीष्ट मधुमाससमुद्भव ॥ पिबामि शोकसंतप्तो मामशोकं सदा कुरु" इति ॥

## अथ वाजपेयफलस्नानयोगः ।

अत्रैव योगविशेषे कृत्यम्॥ "पुनर्वसुबुधोपेता चैत्रे मासि सिताष्टमी ॥ प्रातस्तु विधिवत्स्नात्वा वाजपेयफलं लभेत" इति ॥

## अथ रामनवमीनिर्णयः ।

चैत्रशुक्लनवमी रामनवमी ॥ चैत्रशुक्लनवम्यां पुनर्वसुयुताया मध्याह्ने कर्के लग्ने मेषस्थे सूर्ये उच्चस्थे ग्रहपंचके श्रीरामजन्मश्रवणात् ॥ अस्यां मध्याह्नव्यापिन्यामुपोषणं कार्यम् ॥ पर्वैद्युरेव मध्याह्ने सत्त्वे सैव ग्राह्या ॥ दिनद्वये मध्याह्नव्याप्तावव्याप्तौ वा परा ॥ अष्टमीविद्धाया निषेधात् ॥ अतः पूर्वेद्युः सकलमध्याह्नव्यापिनीमपि त्यक्त्वा मध्याह्नैकदेशव्यापिन्यपि परैव ग्राह्या ॥ केचित्त्वष्टमीविद्धां मध्याह्नव्यापिनीं पुनर्वसुयुतामपि त्यक्त्वा परेद्युस्त्रिमुहूर्तापि नवमी सर्वैरप्युपोष्या यदि तु दशम्या ह्रासवशेन पारणादिने स्मार्तानामेकादशीव्रतप्राप्तिस्तदा स्मार्तैरष्टमीविद्धोपोष्या वैष्णवैर्मुहूर्तत्रययुता परैवोपोष्या शुद्धाया नवम्या अलाभे मुहूर्तत्रयन्यूनत्वे वा सर्वैरप्यष्टमीविद्धैवोपोष्येत्याहुः ॥ इदं व्रतं नित्यं काम्यं च ॥

## अथ व्रतप्रयोगः ।

अष्टम्यामाचार्यं संपूज्य ॥ "श्रीरामप्रतिमादानं करिष्येहं द्विजोत्तम ॥ तत्राचार्यो भव प्रीतः श्रीरामोसि त्वमेव मे" ॥ इति प्रार्थ्य॥"नवम्यामंगभूतेन एकभक्तेन राघव॥ इक्ष्वाकुवंशतिलक प्रीतो भव भवप्रिय"इत्येकभक्तं संकल्प्य साचार्यो हविष्यं भुंजीत ॥ पूजामंडपं तत्र वेदिं च कृत्वा नवम्यां प्रातः ॥ "उपोष्य नवमीं त्वद्य यामेष्वष्टसु राघव ॥ तेन प्रीतो भव त्वं मे संसाराद्राहि मां हरे" इत्युपोषणं संकल्प्य ॥ "इमां स्वर्णमयीं रामप्रतिमां त्वां प्रयत्नतः॥ श्रीरामप्रीतये दास्ये रामभक्ताय धीमते" इति प्रतिमादानं संकल्पयेत्॥ श्रीरामनवमीव्रतांगभूतां षोडशोपचारैः श्रीरामपूजां करिष्ये इति संकल्प्य वेदिकायां सर्वतोभद्रे कलशं संस्थाप्य पूर्णपात्रे सवस्त्रेन्युत्तारणादिविधिना प्रतिमायां श्रीरामं प्रतिष्ठाप्य पुरुषसूक्तेन षोडशोपचारैः संपूज्य पुष्पपूजांते "रामस्य जननी चासि रामात्मकमिदं जगत् ॥ अतस्त्वां पूजयिष्यामि लोकमातर्नमोस्तु ते" ॥ इति कौसल्यां संपूज्य ॥ ॐ

नमो दशरथायेति दशरथं संपूज्य सर्वपूजां समाप्य मध्याह्ने फलपुष्पजलादिपूर्णेन शंखेनार्घ्यं दद्यात् ॥ तत्र मंत्रः ॥ "दशाननवधार्थाय धर्मसंस्थापनाय च ॥ दानवानां विनाशाय दैत्यानां निधनाय च ॥ परित्राणाय साधूनां जातो रामः स्वयं हरिः ॥ गृहाणार्घ्यं मया दत्तं भ्रातृभिः सहितोनघ" इति ॥ रात्रौ जागरणं कृत्वा प्रातर्नित्यपूजां विधाय मूलमंत्रेण पायसाष्टोत्तरशताहुतीर्हुत्वा पूजां विसृज्याचार्याय प्रतिमां दद्यात् ॥ "इमां स्वर्णमयीं रामप्रतिमां समलंकृताम् ॥ शुचिवस्त्रयुगच्छन्नां रामोहं राघवाय ते ॥ श्रीरामप्रीतये दास्ये तुष्टो भवतु राघवः" ॥ इति मंत्रः ॥ "तव प्रसादं स्वीकृत्य क्रियते पारणा मया ॥ व्रतेनानेन संतुष्टः स्वामिन् भक्तिं प्रयच्छ मे" इति प्रार्थ्य ॥ नवम्यंते पारणं कुर्यात् ॥ इदं व्रतं मलमासे न कार्यम् ॥ एवं जन्माष्टम्यादिव्रतमपि न कार्यम् ॥ अस्यामेव नवम्यां देवीनवरात्रसमाप्तिः कार्या ॥ एतन्निर्णय आश्विननवरात्रनवमीवत् ॥

## अथ श्रीकृष्णांदोलोत्सवः ।

चैत्रशुक्लैकादश्यां कृष्णस्यांदोलनोत्सवः ॥ "दोलारूढं प्रपश्यंति कृष्णं कलिमलापहम् ॥ अपराधसहस्रैस्तु मुक्तास्ते धूनने कृते ॥ तावत्तिष्ठंति पापानि जन्मकोटिकृतान्यपि ॥ क्रीडंते विष्णुना सार्द्धं वैकुंठे देवपूजिताः" इत्यादिकस्तन्महिमा ॥ चैत्रशुक्लद्वादश्यां विष्णोर्दमनोत्सवः ॥ स च पारणाहे ॥ "पारणाहे न लभ्येत द्वादशी घटिकापि चेत् ॥ तदा त्रयोदशी ग्राह्या पवित्रदमनार्पणे" इत्युक्तेः ॥ शिवस्य चतुर्दश्यां कार्यः ॥

## अथ दमनारोपणप्रयोगः ।

उपवासदिने नित्यपूजां कृत्वा दमनकस्थानं गत्वा ऋयेण तमादाय चंदनादिना संपूज्य श्रीकृष्णपूजार्थं त्वां नेष्ये इति प्रार्थ्य प्रणमेत् ॥ अन्यदेवतासु यथादैवतमूहः ततो दमनकं गृहमानीय पंचगव्येन शुद्धोदकेन च प्रक्षाल्य देवाग्रे स्थापयित्वा तस्मिन्नेव दमनकेशोककालवसंतकामान्काममात्रं वा गंधादिभिः पूजयेत् ॥ तत्र ॥ "नमोस्तु पुष्पबाणाय जगदाह्लादकारिणे ॥ मन्मथाय जगन्नेत्रे रतिप्रीतिप्रियाय ते" इति कामावाहनमंत्रः ॥ "काम भस्मसमुद्भूत रतिबाष्पपरिप्लुत ॥ ऋषिगंधर्वदेवादिविमोहक नमोस्तु ते" इति दमनकमुपस्थाय ॥ 'ॐ कामाय नमः' इति मंत्रेण सपरिवाराय कामरूपिणे दमनकाय गंधाद्युपचारान् दद्यात् ॥ ततो रात्रौ देवं संपूज्याधिवासनं कुर्यात् तदित्थम् ॥ देवाग्रे सर्वतोभद्रं संपाद्य तत्र कलशं संस्थाप्य तत्र धौतवस्त्राच्छन्नं दमनकं वैणवपटले स्थापितं निधाय ॥ "पूजाथ देवदेवस्य विष्णोर्लक्ष्मीपतेः प्रभोः ॥ दमन त्वमिहागच्छ सांनिध्यं कुरु ते नमः" इति दमनकदेवतामावाह्य प्रागाद्यष्टदिक्षु क्लीं कामदेवाय नमो ह्रीं रत्यै नमः ॥ १ ॥

क्लीं भस्मशरीराय नमो ह्रीं रत्यै० ॥२॥ क्लीं अनंगाय नमो ह्रीं रत्यै०॥ ३ ॥ क्लीं मन्मथाय नमो ह्रीं रत्यै० ॥४॥ क्लीं वसंतसखाय नमो ह्रीं रत्यै०॥ ५ ॥ क्लीं स्मराय नमो ह्रीं रत्यै० ॥ ६ ॥ क्लीं इक्षुचापाय नमो ह्रीं रत्यै० ॥ ७ ॥ क्लीं पुष्पबाणास्त्राय नमो ह्रीं रत्यै० ॥ ८ ॥ इति पूजयेत् ॥ "तत्पुरुषाय विद्महे कामदेवाय धीमहि ॥ तन्नोनंगः प्रचोदयात्" ॥ इति गायत्र्या दमनकमष्टोत्तरशतमभिमंत्र्य गंधादिभिः संपूज्य ह्रीं नमः इति पुष्पांजलिं दत्त्वा नमोस्तु पुष्पबाणायेति पूर्वोक्तावाहनमंत्रेण नमेत् ॥ "क्षीरोदधिमहानागशय्यावस्थितविग्रह ॥ प्रातस्त्वां पूजयिष्यामि संनिधौ भव ते नमः" इति देवं प्रार्थ्य पुष्पांजलिं दत्त्वा तस्यामेकादश्यां रात्रौ जागरणं कुर्यात् ॥ प्रातर्नित्यपूजां कृत्वा पुनर्देवं संपूज्य दूर्वागंधाक्षतयुतां दमनकमंजरीमादाय मूलमंत्रं पठित्वा ॥ "देवदेव जगन्नाथ वांछितार्थप्रदायक ॥ हृत्स्थान् पूरय मे विष्णो कामान्कामेश्वरीप्रिय ॥ इदं दमनकं देव गृहाण मदनुग्रहात् ॥ इमां सांवत्सरीं पूजां भगवन्परिपूरय" ॥ पुनर्मूलं जप्त्वा देवे दमनमर्पयेत् ॥ ततो यथाशोभं दत्त्वांगदेवताभ्यो दत्त्वा देवं प्रार्थयेत् ॥ "मणिविद्रुममालाभिर्मंदारकुसुमादिभिः ॥ इयं सांवत्सरी पूजा तवास्तु गरुडध्वज ॥ वनमालां यथा देव कौस्तुभं सततं हृदि ॥ तद्वद्दामनकीं मालां पूजां च हृदये वह ॥ जानताजानता वापि न कृतं यत्तवार्चनम् ॥ तत्सर्वं पूर्णतां यातु त्वत्प्रसादाद्ममापते ॥ जितं ते पुंडरीकाक्ष नमस्ते विश्वभावन ॥ हृषीकेश नमस्तेस्तु महापुरुषपूर्वज ॥ मंत्रहीनं क्रियाहीनम्" इत्यादि च संप्रार्थ्य पंचोपचारैर्देवं संपूज्य नीराज्य ब्राह्मणेभ्यो दमनं दत्त्वा स्वयं शेषं संधार्य सुहृद्युतः पारणां कुर्यात् ॥ मंत्रदीक्षारहितैर्नाऽर्पणीयम् ॥ अस्य गौणकालः श्रावणमासावधिः ॥ नेदं मलमासे भवति ॥ शुक्लास्तादौ तु कर्तव्यम् ॥ इति दमनारोपणविधिः ॥ अस्यामेव भारते ॥ "अहोरात्रेण द्वादश्यां चैत्रे विष्णुरितिस्मरन् ॥ पुंडरीकमवाप्नोति देवलोकं च गच्छति" इति चैत्रशुक्लत्रयोदश्यामनंगपूजनव्रतम् ॥ तत्र त्रयोदशी पूर्वविद्धा ग्राह्या ॥

## अथ चतुर्दश्यां नृसिंहस्य दोलनोत्सवः ।

अत्रैव शिवस्यैकवीराया भैरवस्य च दमनकैः पूजनम् ॥ अत्र चतुर्दशी पूर्वविद्धा परार्द्धव्यापिनी ग्राह्या ॥ अपरार्द्धव्याप्त्यभावेऽपरार्द्धस्पर्शिन्यपि पूर्वा ग्राह्या ॥ तदभावे परा ग्राह्या ॥ चैत्रपौर्णमासी सामान्यनिर्णया परा ग्राह्या ॥ पूर्वोक्ततत्तिथौ दमनकपूजनाकरणेस्यामेव सर्वदेवानां दमनकपूजनम् ॥ चैत्र्यां चित्रायुतायां चित्रवस्त्रदानं सौभाग्यदम् ॥ रविगुरुमंदवारयुतचैत्र्यां स्नानश्राद्धादिभिरक्षयपुण्यम्

## अथ वैशाखस्नानविधिः ।

चैत्रस्य शुक्लैकादश्यां पौर्णमास्यां वा मेषसंक्रांतिमारभ्य वा वैशाखस्नानारंभः॥ तत्र मंत्रः ॥ "वैशाखं सकलं मासं मेषसंक्रमणे रवेः ॥ प्रातः संनियमः स्नास्ये प्रीयतां मधुसूदनः ॥ मधुहंतुः प्रसादेन ब्राह्मणानामनुग्रहात् ॥ निर्विघ्नमस्तु मे पुण्यं वैशाखस्नानमन्वहम् ॥ माधवे मेषगे भानौ मुरारे मधुसूदन ॥ प्रातःस्नानेन मे नाथ फलदो भव पापहन् " इति ॥ अत्र हविष्याशनब्रह्मचर्यादयो नियमाः ॥ एवं संपूर्णस्नानाशक्तौ त्रयोदश्यादिदिनत्रयमंते स्नायात् ॥ इयं पौर्णमासी मन्वादिः पूर्वमुक्ता ॥

## अथ वारुणीयोगनिर्णयः ।

चैत्रकृष्णत्रयोदशी शततारकानक्षत्रयुता वारुणीसंज्ञका स्नानादिना ग्रहणादिपर्वतुल्यफलदा ॥ शनिवारयुक्ता महावारुणी शुभयोगशनिवारशततारकायुक्ता महामहावारुणी॥अत्र योगे कृष्णादिः पौर्णमास्यंतो मासस्तेनामांतमासे फाल्गुनकृष्णत्रयोदशी ग्राह्येति वोध्यम् ॥ चैत्रकृष्णचतुर्दश्यां शिवसन्निधौ स्नानेन भौमवारयुतायां गंगायां स्नानेन पिशाचत्वाभावः फलम् ॥ इति श्रीमदनंतोपाध्यायसूनुकशीनाथोपाध्यायविरचिते धर्मसिंधुसारे चैत्रमासकृत्यनिर्णयोद्देशः समाप्तः ॥

## अथ वैशाखे वृषभसंक्रमः ।

अत्र वृषसंक्रमे पूर्वाः षोडश नाडिकाः पुण्यकालः ॥ रात्रौ च प्रागुक्तम् ॥ अत्र प्रातःस्नानं तिलैः पितृतर्पणं धर्मघटदानं च कार्यम् ॥

## अथ वसंतपूजनम् ।

अत्र ब्राह्मणानां गंधमाल्यपानककदलीफलादिभिर्वसंतपूजा कार्या ॥

## अथ देवस्य जलाधिवासविधिः ।

वैशाखे ज्येष्ठे वा यत्र मासे ऊष्मबाहुल्यम् ॥ तत्र प्रातर्नित्यपूजां कृत्वा गंधोदकपूर्णपात्रे विष्णुं संस्थाप्य पंचोपचारैः संपूज्य तत्रैव जले सूर्यास्तपर्यंतमधिवास्य रात्रौ स्वस्थाने स्थापयित्वा पंचोपचारैः संपूजयेत्तेन तीर्थोदकेन गृहदारादि यतमात्मानं पावयेत् ॥ एतच्च द्वादश्यां दिवा न कार्यम्॥रात्रौ किंचित्कालं जलस्थं पूजयित्वा स्वस्थाने स्थापयेत् ॥

## अथ तुलसीभिः पूजने मुक्तिः ।

अत्र मासे कृष्णगौराख्यतुलसीभिर्विष्णुं त्रिकालमर्चयेन्मुक्तिः फलम् ॥

## अथाश्वत्थसेवनविधिः ।

प्रातः स्नात्वा बहुतोयेनाश्वत्थमूलं सिंचेत् ॥ प्रदक्षिणाश्च कुर्यात् ॥ अनेककुलतारणं फलम् ॥

## अथ गोकंडूयनम् ।

एवं गवां कंडूयनेपि ॥

## अथ मासव्रतम् ।

अत्र मासे एकभक्तनक्तमयाचितं वा सर्वेप्सितफलप्रदम् ॥

## अथ प्रपादानं गलतिबंधनादि ।

अत्र मासे प्रपादानं देवे गलंतिकाबंधनं व्यजनच्छत्रोपानच्चंदनादिदानमहाफलम्॥

## अथ वैशाखे मलमासे मासद्वयं स्नानादिव्रतम् ।

यदा वैशाखो मलमासो भवति तदा काम्यानां तत्र समाप्तिनिषेधात् ॥ मासद्वयं वैशाखस्नानहविष्यशनादिनियमा अनुष्ठेयाः चांद्रायणादिकं तु मलेपि समापनीयम् ॥ वैशाखशुक्लतृतीयायां गंगास्नानं यवहोमो यवदानं यवाशनं च सर्वपापापहम् ॥

## अथ तृतीयायां चन्दनपूजा ।

"यः करोति तृतीयायां कृष्णं चंदनभूषितम् ॥ वैशाखस्य सिते पक्षे स याति अच्युतमंदिरम्" ॥ इयमक्षय्यतृतीयासंज्ञिका ॥ अस्यां यत्किंचिज्जपहोमपितृतर्पणदानादि क्रियते तत्सर्वमक्षयम् ॥ इयं रोहिणीबुधयोगे महापुण्या ॥ अस्यां जपहोमादिकृत्येपि वक्ष्यमाणयुगादिवन्निर्णयः ॥ इयं कृतयुगस्यादिः ॥ अत्र युगादिश्राद्धमपिंडकमनुष्ठेयम् ॥ श्राद्धासंभवे तिलतर्पणमप्यत्र कार्यम् ॥ अत्र शुक्लयुगादिकृत्यं पूर्वाह्णे कार्यम् ॥ तत्रासंभवेपराह्णेपि ॥ कृष्णयुगादिकार्यं त्वपराह्ण इत्यादिमन्वादिप्रकरणोक्तो निर्णयः ॥ द्वेधा विभक्तदिनपूर्वार्द्धैकदेशव्यापिनी दिनद्वये चेत्त्रिमुहूर्तोधिकव्याप्तिसत्त्वे परा ॥ त्रिमुहूर्तन्यूनत्वे पूर्वा ॥ "मन्वादौ च युगादौ च ग्रहणे चंद्रसूर्ययोः ॥ व्यतीपाते वैधृतौ च तत्कालव्यापिनी क्रिया" इति वचनेन साकल्यव्याप्तिवाक्यानामपवादात् ॥ श्राद्धादिकं तृतीयामध्ये एव कर्तव्यम् ॥ पुरुषार्थचिंतामणौ तु सप्तमाष्टमनवममुहूर्तानां गांधर्वकुतुपरौहिणसंज्ञकानां युगादिश्राद्धकालत्वाच्छुक्ले मध्यमदिनमाने त्रयोदश्यादिपंचदश्यंतघटीत्रयव्यापिन्यां श्राद्धम् ॥ कृष्णे तु षोडशीमारभ्य घटीत्रये ॥ उभयत्र तादृशघटीत्रयव्याप्तौ सत्यामसत्यां वा शुक्ला परा ॥ यदा तु परेद्युस्त्रयोदशघटीतः पूर्वं समाप्ता

पूर्वेद्युस्त्रयोदश्यादिघटीत्रये तदेकदेशे वा विद्यते तदा कर्मकालशास्त्रबाहुल्यात्पूर्वैव ग्राह्येत्युक्तम् इदमेव युक्तमिति भाति ॥

## अथोदकुंभदानप्रयोगः ।

अत्र देवतोद्देशेन पित्रुद्देशेन चोदकुंभदानमुक्तम् ॥ तत्र श्रीपरमेश्वरप्रीतिद्वारा उदकुंभदानकल्पोक्तफलावाप्त्यर्थं ब्राह्मणायोदकुंभदानं करिष्ये ॥ तदंगकुंभपूजनं ब्राह्मणपूजनं च करिष्ये इति संकल्प्य सूत्रवेष्टितं गंधफलयवाद्युपेतं कलशं पंचोपचारैर्ब्राह्मणं च संपूज्य ॥ तत्र मंत्रः॥"एष धर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः ॥ अस्य प्रदानात्सकला मम संतु मनोरथाः" इति मंत्रेण दद्यात्॥ पित्रुद्देशे तु पितृणामक्षय्यतृप्त्यर्थमुदकुंभदानं करिष्ये इति संकल्प्य पूर्ववत्कुंभब्राह्मणौ संपूज्योदकुंभे गंधतिलफलादि निक्षिप्य ॥ "एष धर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः ॥ अस्य प्रदानात्तृप्यंतु पितरोपि पितामहाः ॥ गंधोदकतिलैर्मिश्रं सान्नं कुंभं फलान्वितम् ॥ पितृभ्यः संप्रदास्यामि अक्षय्यमुपतिष्ठतु " इति मंत्रेण दद्यात् ॥ युगादौ समुद्रस्नानं महाफलम् ॥ वैशाखस्याधिमासत्वेयुगादिश्राद्धं मासद्वयेपि कार्यम्॥ युगादिषूपवासो महाफलः ॥ युगादिमन्वादौ रात्रिभोजने 'अभिस्ववृष्टिम्' इति मंत्रजपः ॥

## अथ युगादिश्राद्धलोपे प्रायश्चित्तम् ।

युगादिश्राद्धलोपे युगादिश्राद्धलोपजन्यप्रत्यवायपरिहारार्थमृग्विधानोक्तं प्रायश्चित्तं करिष्ये इति संकल्प्य 'नयसद्यावा'इत्यृचं शतवारं जपेत् ॥ अयं निर्णयः सर्वयुगादौ ज्ञेयः ॥ इत्यक्षय्यतृतीयानिर्णयः ॥

## अथ परशुरामजयंती ।

इयमेव तृतीया परशुरामजयंती ॥ इयं रात्रिप्रथमयामव्यापिनी ग्राह्या ॥ पूर्वेद्युरेव प्रथमयामव्याप्तौ पूर्वा ॥ दिनद्वये रात्रिप्रथमयामे साम्येन वैषम्येण वैकदेशव्याप्तौ परा ॥ अत्र प्रदोषे परशुरामं संपूज्यार्घ्यं दद्यात् ॥ तत्र मंत्रः ॥ "जमदग्निसुतो वीर क्षत्रियांतकर प्रभो ॥ गृहाणार्घ्यं मया दत्तं कृपया परमेश्वर" इति ॥

## अथ गंगापूजनम् ।

वैशाखशुक्लसप्तम्यां गंगोत्पत्तिस्तस्यां मध्याह्नव्यापिन्यां गंगापूजनं कार्यम् ॥ दिनद्वये तद्व्याप्तौ पूर्वा ॥

## अथाग्निष्टोमफलकपूजनम् ।

"वैशाखमासे द्वादश्यां पूजयेन्मधुसूदनम् ॥ अग्निष्टोममवाप्नोति सोमलोकं च गच्छति" ॥

## अथ नृसिंहजयंती ।

वैशाखशुक्लचतुर्दशी नृसिंहजयंती सा सूर्यास्तमयकालव्यापिनी ग्राह्या ॥ दिनद्वये तद्व्याप्तौ तदव्याप्तौ वा परैव ॥ स्वातीनक्षत्रशनिवारादियोगे सातीवप्रशस्ता ॥

## अथ व्रतप्रयोगः ।

त्रयोदश्यां कृतैकभक्तश्चतुर्दश्यां मध्याह्ने तिलामलकैः स्नात्वा॥ "उपोष्येहं नारसिंह भुक्तिमुक्तिफलप्रद ॥ शरणं त्वां प्रपन्नोस्मि भक्तिं मे नृहरे दिश"इति मंत्रेण व्रतं संकल्प्याचार्य वृत्वा सायंकाले धान्यस्थोदकुंभे पूर्णपात्रे सौवर्णप्रतिमायां षोडशोपचारैर्देवं संपूज्यार्घ्यं दद्यात् ॥ तत्र मंत्रः ॥ "परित्राणाय साधूनां जातो विष्णुर्नृकेसरी ॥ गृहाणार्घ्यं मया दत्तं सलक्ष्मीर्नृहरिः स्वयम्" ॥ रात्रौ जागरणं कृत्वा प्रातर्देवं संपूज्य विसृज्याचार्याय धेनुयुतां प्रतिमां दद्यात् ॥ तत्र मंत्रः ॥ "नृसिंहाच्युत गोविंद लक्ष्मीकांत जगत्पते ॥ अनेनार्चाप्रदानेन सफलाः स्युर्मनोरथाः" ॥

## अथ प्रार्थना ।

"मद्वंशे ये नरा जाता ये जनिष्यंति चापरे ॥ तांस्त्वमुद्धर देवेश दुःसहाद्भवसागरात् ॥ पातकार्णवमग्नस्य व्याधिदुःखांबुवारिधेः ॥ नीचैश्च परिभूतस्य महादुःखगतस्य मे ॥ करावलम्बनं देहि शेषशायिञ्जगत्पते ॥ श्रीनृसिंह रमाकान्त भक्तानां भयनाशन ॥ क्षीरांबुधिनिवासस्त्वं चक्रपाणे जनार्दन ॥ व्रतेनानेन देवेश भुक्तिमुक्तिप्रदो भव" ॥ इति ॥ ततो ब्राह्मणैः सह तिथ्यंते पारणां कुर्यात् ॥ यामत्रयोर्ध्वगामिन्यां चतुर्दश्यां तु पूर्वाह्ण एव पारणम् ॥

## अथ पौर्णमासीदानानि ।

पौर्णमास्यां घृतान्नसहितोदकुंभदाने गोदानफलम् ॥ स्वर्णतिलयुक्तद्वादशोदकुम्भदाने ब्रह्महत्यापापान्मुक्तिः ॥ अत्र यथाविधि कृष्णाजिनदाने पृथ्वीदानफलम् ॥ स्वर्णमधुतिलसर्पिर्युतकृष्णाजिनदाने सर्वपापनाशः ॥ अत्र तिलस्नानं तिलहोमस्तिलपात्रदानं तिलतैलेन दीपदानं तिलैः पितृतर्पणं मधुयुक्ततिलदानं महाफलम् ॥ तत्र तिलपात्रदानमन्त्रः "तिला वै सोमदैवत्याः सुरैः सृष्टास्तु गोसवे ॥ स्वर्गप्रदाः स्वतन्त्राश्च ते मां रक्षन्तु नित्यशः" ॥

## अथ वैशाखस्नानोद्यापनादिदानानि च ।

वैशाखशुक्लद्वादश्यां पौर्णमास्यां वा वैशाखस्नानोद्यापनम् ॥ तत्रैकादश्यां पौर्णमास्यां वोपोष्य कलशे सौवर्णप्रतिमायां सलक्ष्मीकं विष्णुं संपूज्य रात्रौ जागरणं कृत्वा प्रातर्ग्रहपूजनपूर्वकं पायसेन तिलाज्यैर्वा यवैर्वा अष्टोत्तरशतं होमः ॥

" प्रतद्विष्णुरिदंविष्णुः " इति वा मन्त्रेण कार्यः ॥ सांगतार्थं गोदानं पादुकोपानच्छत्रव्यजनोदकुंभदानं शय्यादिदानं च कार्यम् ॥ अशक्तेन कृसराद्यन्नैर्दशब्राह्मणभोजनं कार्यम् ॥ एतत्पौर्णमासीमारभ्य ज्येष्ठशुक्लैकादशीपर्यंतं जलस्थविष्णुपूजोत्सवः कार्यः ॥ वैशाखामावास्याभावुकाख्यदिनं तत्परं करिसंज्ञकदिनं च शुभेषु वर्ज्यम् ॥ ॥ इति श्रीमदनंतोपाध्यायसूनुकाशीनाथोपाध्यायविरचिते धर्मसिन्धुसारे वैशाखमासकृत्योद्देशः ॥

## अथ ज्येष्ठकृत्ये मिथुनसंक्रांतिः ।

मिथुनसंक्रांतौ पराः षोडशनाड्यः पुण्यकालः ॥ रात्रौ तु प्रागुक्तम् ॥

## अथ ब्रह्मदेवपूजनव्रतम् ।

ज्येष्ठे मासे पिष्टेन ब्रह्ममूर्त्तिं कृत्वा वस्त्राद्यैः पूजयेत् ॥ सूर्यलोकप्राप्तिः ॥ अत्र मासे जलधेनुदानमुक्तम् ॥

## अथ करवीरव्रतम् ।

ज्येष्ठशुक्लप्रतिपदि करवीरव्रतम् ॥ ज्येष्ठशुक्लतृतीयायां रंभाव्रतम् ॥ सा पूर्वविद्धा ग्राह्या ॥

## अथ पूर्वविद्धापरविद्धयोः सर्वत्र निष्कर्षः ।

यत्र पूर्वविद्धा ग्राह्यतयोच्यते तत्रास्तात्पूर्वं द्विमुहूर्ताधिकाया ग्राह्यत्वं ज्ञेयं न न्यूनायाः ॥ तत्रापि यदि परेद्युः सूर्यास्तमयपर्यंतं पूर्वविद्धायास्तिथेः सत्त्वे तदा सत्यपि पूर्वविद्धा ग्राह्यत्ववचने पूर्वविद्धां त्यक्त्वा अखण्डत्वाच्छुद्धत्वात्परैव ग्राह्या ॥ यदा तु ग्राह्यायाः पूर्वविद्धायाः पूर्वेद्युर्मुहूर्तद्वयात् न्यूनत्वं परेद्युश्चास्तमयात्प्राक् समाप्तत्वं तदापि परैव ग्राह्या एवं सर्वत्रोह्यम् ॥ रंभाव्रते पंचाग्नितपनपरा स्त्री पुमान्वा भवानीं स्वर्णप्रतिमायां संपूज्य यथोक्तविधि होमादि कृत्वा सपत्नीकाय गृहं सोपस्करं दद्यात् ॥ दांपत्यानि भोजयेत् ॥ विशेषविधिर्व्रततग्रंथे ज्ञेयः ॥

## अथोमावतारः ।

चतुर्थ्यामुमावतारस्तत्रोमापूजनव्रतम् ॥ अष्टम्यां शुक्ला देवी पूज्या नवम्यामुपोष्य देवीं पूजयेत् ॥

## अथ गङ्गावतारः ।

ज्येष्ठशुक्लदशम्यां गंगावतारः ॥ इयं दशहरासंज्ञिका ॥ अत्र दश योगा उक्ताः ॥ "ज्येष्ठे मासि १ सितेपक्षे २ दशम्यां ३ बुध ४ हस्तयोः ५॥ व्यतीपाते ६ गरा ७

नन्दे ८ कन्याचंद्रे ९ वृषे रवौ १० " इति ॥ गराख्यं करणम् ॥ बुधवारहस्तयोगे आनन्दाख्यो योगः ॥ अत्र दशमीव्यतीपातयोर्मुख्यत्वम् ॥ तेन यस्मिन्दिने कतिपययोगवती दशमी पूर्वाह्णे लभ्यते तत्र दशहरात्रतं कार्यम् ॥ दिनद्वये पूर्वाह्णे तत्सत्त्वे यत्र बहूनां योगः सा ग्राह्या ॥ ज्येष्ठे मलमासे सति तत्रैव दशहरा कार्या न तु शुद्धे ॥ " दशहरासु नोत्कर्षश्चतुर्ष्वपि युगादिषु " इति हेमाद्रौ ऋष्यशृंगोक्तेः ॥ अत्र काशीवासिभिर्दशाश्वमेधतीर्थे स्नात्वा गंगापूजनं कार्यम् ॥ इतरदशस्थैः स्वसंनिहितनद्यां स्नात्वा गंगापूजनादिकं कार्यम् ॥

## अथ दशहरात्रतविधिः ।

देशकालौ संकीर्त्य ममैतज्जन्मजन्मांतरसमुद्भूतत्रिविधकायिकचतुर्विधवाचिकत्रिविधमानसिकमिति स्कांदोक्तदशविधपापनिरासत्रयस्त्रिंशच्छतपितृद्धारब्रह्मलोकावाप्त्यादिफलप्राप्त्यर्थं ज्येष्ठमाससितपक्षदशमीबुधवारहस्ततारकागरकरणव्यतीपातानंदयोगकन्यास्थचंद्रवृषस्थसूर्येति दशयोगपर्वण्यस्यां महानद्यां स्नानं तीर्थपूजनं प्रतिमायां जाह्नवीपूजां तिलादिदानं मूलमंत्रजपमाज्यहोमं च यथाशक्ति करिष्ये ॥ यथाविधि स्नानं दशवारं कृत्वा जले स्थितो दशवारं सकृद्वा वक्ष्यमाणं स्तोत्रं पठित्वा वासः परिधानादिपितृतर्पणांतं नित्यं विधाय तीर्थपूजां विधाय सर्पिर्मिश्रान्दशप्रसृतिकृष्णतिलान् तीर्थैजलिना प्रक्षिप्य गुडमिश्रान्सक्तुपिंडान्दश प्रक्षिपेत् ॥ ततो गंगातटे ताम्रे मृन्मये वा स्थापिते कलशे सौवर्णादिप्रतिमायां गंगामावाहयेत् ॥ तत्र मंत्रः ॥ नमो भगवत्यै दशपापहरायै गंगायै नारायण्यै रेवत्यै शिवायै दक्षायै अमृतायै विश्वरूपिण्यै नंदिन्यै ते नमो नमः ॥ अयं रुद्रादिसाधारणः द्विजमात्रविषयो विंशत्यक्षरो यथा ॥ ॐ नमः शिवायै नारायण्यै दशहरायै गंगायै स्वाहेति ॥ एवं गंगामावाह्य ॥ नारायणं रुद्रं ब्रह्माणं सूर्यं भगीरथं हिमाचलं च नाममंत्रेण तत्रैवावाह्योक्तमूलमंत्रमुच्चार्य श्रीगंगायै नारायणरुद्रब्रह्मसूर्यभगीरथहिमवत्सहितायै आसनं समर्पयामीत्येवमासनाद्युपचारैः पूजयेत् ॥ दशविधैः पुष्पैः संपूज्य दशांगं धूपं दत्त्वा दशविधनैवेद्यांते तांबूलं दक्षिणां दत्त्वा दशफलान्यर्पयेत्॥दश दीपान्दत्त्वा पूजां समापयेत् ॥ दशविप्रेभ्यः प्रत्येकं षोडशषोडश मुष्टितिलान्सदक्षिणान्दद्यात् ॥ एवं यवानपि ॥ ततो दश गा एकां वा गां दद्यात् ॥ मत्स्यकच्छपमंडूकान् सौवर्णान् राजतान्पिष्टमयान्वा संपूज्य तीर्थे क्षिपेत् ॥ एवं दीपान्प्रवाहयेत् ॥

## अथ दशहरांगहोमप्रयोगः ।

जपहोमचिकीर्षायां पूर्वोक्तमूलमंत्रस्य पंचसहस्रसंख्यो जपो दशांशेन होमः यथाशक्ति वा जपहोमौ ॥ तत्र दशहरात्रतांगत्वेन होमं करिष्ये इति संकल्प्य

स्थंडिलेग्निं प्रतिष्ठाप्यान्वाधाने चक्षुषी आज्येनेत्यंते श्रीगंगाममुकसंख्ययाज्येन नारायणादिषड्देवता एकैकयाज्याहुत्या शेषेण स्विष्टकृतमित्यादिप्रोक्षण्यादिषट्पात्राण्यासाद्याज्यं संस्कृत्य यथान्वाधानं जुहुयात् ॥ दश ब्राह्मणान्सुवासिनीश्च भोजयेत् ॥ प्रतिपद्दिनमारभ्य स्नानादिपूजांतो विधिः कार्य इति केचित् ॥

## अथ गंगास्तोत्रं यथा स्कांदे ।

ब्रह्मोवाच ॥ "नमः शिवायै गंगायै शिवदायै नमोनमः ॥ नमस्ते रुद्ररूपिण्यै शांकर्यै ते नमोनमः ॥ नमस्ते विश्वरूपिण्यै ब्रह्ममूर्त्यै नमोनमः ॥ सर्वदेवस्वरूपिण्यै नमो भेषजमूर्तये ॥ सर्वस्य सर्वव्याधीनां भिषक्श्रेष्ठ्यै नमोस्तु ते ॥ स्थाणुजंगमसंभूतविषहंत्र्यै नमोनमः ॥ भोगोपभोगदायिन्यै भोगवत्यै नमोनमः ॥ मंदाकिन्यै नमस्तेस्तु स्वर्गदायै नमोनमः ॥ नमस्त्रैलोक्यभूषायै जगद्धात्र्यै नमोनमः ॥ नमः स्त्रीशुक्लसंस्थायै तेजोवत्यै नमोनमः ॥ नंदायै लिंगधारिण्यै नारायण्यै नमोनमः ॥ नमस्ते विश्वमुख्यायै रेवत्यै ते नमोनमः ॥ बृहत्यै ते नमस्तेस्तु लोकधात्र्यै नमोनमः ॥ नमस्ते विश्वमित्रायै नंदिन्यै ते नमोनमः ॥ पृथ्व्यै शिवामृतायै च सुवृषायै नमोनमः ॥ शांतायै च वरिष्ठायै वरदायै नमोनमः ॥ उस्रायै सुखदोग्ध्र्यै च संजीविन्यै नमोनमः ॥ ब्रह्मिष्ठायै ब्रह्मदायै दुरितघ्न्यै नमोनमः ॥ प्रणतार्तिप्रभंजिन्यै जगन्मात्रे नमोस्तु ते ॥ सर्वापत्प्रतिपक्षायै मंगलायै नमोनमः ॥ शरणागतदीनार्तपरित्राणपरायणे ॥ सर्वस्यार्तिहरे देवि नारायणि नमोस्तु ते ॥ निर्लेपायै दुर्गहंत्र्यै दक्षायै ते नमोनमः ॥ परात्परतरे तुभ्यं नमस्ते मोक्षदे सदा ॥ गंगे ममाग्रतो भूया गंगे मे देवि पृष्ठतः ॥ गंगे मे पार्श्वयोरेहि त्वयि गंगेस्तु मे स्थितिः ॥ आदौ त्वमंते मध्ये च सर्वं त्वं गां गते शुभे ॥ त्वमेव मूलप्रकृतिस्त्वं हि नारायणः परः ॥ गंगे त्वं परमात्मा च शिवस्तुभ्यं नमः शिवे ॥ य इदं पठति स्तोत्रं भक्त्या नित्यं नरोपि यः ॥ शृणुयाच्छ्रद्धया युक्तः कायवाक्चित्तसंभवैः ॥ दशधा संस्थितैर्दोषैः सर्वैरेव प्रमुच्यते ॥ सर्वान्कामानवाप्नोति प्रेत्य ब्रह्मणि लीयते ॥ ज्येष्ठे मासि सिते पक्षे दशमी हस्तसंयुता ॥ तस्यां दशम्यामेतच्च स्तोत्रं गंगाजले स्थितः ॥ यः पठेद्दशकृत्वस्तु दरिद्रो वापि चाक्षमः ॥ सोपि तत्फलमाप्नोति गंगां संपूज्य यत्नतः ॥ अदत्तानामुपादानं हिंसा चैवाविधानतः ॥ परदारोपसेवा च कायिकं त्रिविधं स्मृतम् ॥ पारुष्यमनृतं चैव पैशुन्यं चापि सर्वशः ॥ असंबद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम् ॥ परद्रव्येष्वभिध्यानं मनसानिष्टचिंतनम् ॥ वितथाभिनिवेशश्च मानसं त्रिविधं स्मृतम् ॥ एतानि दश पापानि हर त्वं मम जाह्नवि ॥ दशपापहरा यस्मात्तस्माद्दशहरा स्मृता ॥ त्रयस्त्रिंशच्छतं पूर्वान्पितॄनथ पितामह

हान् ॥ उद्धरत्येव संसारान्मन्त्रेणानेन पूजिता ॥ 'नमो भगवत्यै दशपापहरायै गंगायै नारायण्यै रेवत्यै शिवायै दक्षायै अमृतायै विश्वरूपिण्यै नंदिन्यै ते नमो-नमः' ॥ सितमकरनिषण्णां शुभ्रवर्णां त्रिनेत्रां करधृतकलशोद्यत्सोत्पलामत्यभीष्टाम् ॥ विधिहरिहररूपां सेंदुकोटीरजुष्टां कलितसितदुकूलां जाह्नवीं तां नमामि ॥ आदावादिपितामहस्य निगमव्यापारपात्रे जलं पश्चात्पन्नगशायिनो भगवतः पादोदकं पावनम् ॥ भूयः शंभुजटाविभूषणमणिर्जह्नोर्महर्षेरियं देवी कल्मषनाशिनी भगवती भागीरथी दृश्यते ॥ गंगागंगेति यो ब्रूयाद्योजनानां शतैरपि ॥ मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति " ॥ इति स्तोत्रेण स्तुत्वा होमांते प्रतिमोत्तर पूजां कृत्वा ॥ विसृज्याचार्याय मूलमन्त्रेण दद्यात् ॥ ॥ इति दशहराविधिः ॥

## अथ निर्जला एकादशी तदंगकुंभदानमन्त्रः ।

ज्येष्ठशुक्लैकादशी निर्जला ॥ अस्यां नित्याचमनादिव्यतिरिक्तजलपानवर्जनेनोपवासे कृते द्वादशैकादश्युपवासफलम् ॥ द्वादश्यां च निर्जलोपोषितैकादशी व्रतांगत्वेन सहिरण्यसशर्करोदकुंभदानं करिष्ये इति संकल्प्य ॥ " देवदेव हृषीकेश संसारार्णवतारक ॥ उदकुंभप्रदानेन यास्यामि परमां गतिम् " इति मंत्रेण शर्करायुतं सहिरण्यमुदकुंभं दद्यात् ॥

## अथ गवामयनक्रतुफलपूजा ।

ज्येष्ठमासासितद्वादश्यामहोरात्रं त्रिविक्रमपूजनाद्गवामयनाख्यक्रतुफलसिद्धिः ॥

## अथ ज्यैष्ठ्यां दानानि ।

ज्येष्ठपौर्णमास्यां तिलदानादश्वमेधफलम् ॥ ज्येष्ठानक्षत्रयुतायां ज्यैष्ठ्यां छत्रोपानद्दानान्नराधिपत्यप्राप्तिः ॥

## अथ बिल्वत्रिरात्रव्रतम् ।

ज्येष्ठपूर्णिमायां बिल्वत्रिरात्रिव्रतमुक्तम् ॥ अत्र सा परविद्धा ग्राह्या ॥ अस्यामेव वटसावित्रीव्रतम् ॥ अत्र व्रते त्रयोदश्यादिदिनत्रयमुपवासः ॥ अशक्तौ तु त्रयोदश्यां नक्तं चतुर्दश्यामयाचितं पौर्णमास्यामुपोषणम् ॥ अत्र पौर्णमासी निर्णयानुसारेण यथा त्रिरात्रं भवेत्तथा त्रयोदश्यादिदिनत्रयं ग्राह्यम् ॥ तत्र पूर्णिमासूर्यास्तमयात्पूर्वं त्रिमुहूर्ताधिकव्यापिनी चतुर्दशीविद्धा ग्राह्या ॥ त्रिमुहूर्तन्यूनत्वे परैव ॥ " भूतोष्टादशनाडीभिर्दूषयत्युत्तरां तिथिम् " ॥ इति वचनं सावित्रीव्रतातिरिक्तं ज्ञेयम् ॥ सावित्रीव्रतोपवासेऽष्टादशनाडीविद्धाया अपि ग्राह्यत्वात् ॥ यत्तु केवलपूजनात्मकमुपवासरहितं सावित्रीव्रतं सर्वत्र स्त्रियोनुतिष्ठंति तत्र भूतोष्टादशेतिवेधो व्रतदानादिपरो न तूपवासपर इति निर्णयसिंधुलिखितमाधवाशयानुसारेणा-

ष्टादशनाडीचतुर्दशीसत्त्वे परैव पूजाव्रते ग्राह्या ॥ उपवासव्रते तु पूर्वेति मम प्रतिभाति ॥ अत्र पारणं पूर्णिमांते कर्त्तव्यम् ॥ अत्र रजस्वलादिदोषे पूजादि ब्राह्मणद्वारा कार्यम् ॥ स्वयमुपवासादिकं कार्यमित्यादयः स्त्रीव्रते विशेषाः प्रथमपरिच्छेदे ज्ञेयाः ॥ अत्र पूजोद्यापनादिविधिर्व्रतग्रंथेषु प्रसिद्धः ॥

## अथ महाज्यैष्ठीयोगः ।

अत्र ज्येष्ठपूर्णिमायां ज्येष्ठानक्षत्रे बृहस्पतिश्चन्द्रश्च रोहिणीनक्षत्रे तु सूर्यस्तदा महाज्यैष्ठीयोगस्तत्र स्नानदानादिकं कार्यम् ॥ अस्याः पौर्णमास्या मन्वादित्वादत्र पिंडरहितं श्राद्धमुक्तम् ॥ एतन्निर्णयश्चैत्र उक्तः ॥ अत्र मासे विप्रेभ्यश्चन्दनव्यजनोदकुंभादिकं त्रिविक्रमप्रीतये देयम् ॥ ॥ इति श्रीमदनंतोपाध्यायसूनुकाशीनाथोपाध्यायविरचिते धर्मसिंधुसारे ज्येष्ठमासनिर्णयोदेशः ॥

## अथाषाढे दक्षिणायनसंज्ञा कर्कसंक्रान्तिः ।

कर्कसंक्रातौ पूर्वं त्रिंशन्नाड्यः पुण्यकालः ॥ तत्रापि संक्रान्तिसन्निहिता नाड्यः पुण्यतमाः ॥ रात्रावर्धरात्रात्प्राक्परतश्च संक्रमेपि पूर्वदिने पुण्यकालः ॥ तत्रापि मध्याह्नात्परतः पुण्यतमत्वम् ॥ सूर्योदयोत्तरं घटिकाद्वयात्प्राक् संक्रमे परत एव पुण्यम् ॥ ज्योतिर्ग्रंथे तु सूर्योदयात्प्राग् घटीत्रयात्मकसंध्यासमयेपि कर्कसंक्रम परदिने एव पुण्यमित्युक्तम् ॥ अत्र दानोपवासादि प्रथमपरिच्छेदे उक्तम् ॥ कर्ककन्याधनुःकुंभस्थे रवौ केशकर्तनादिकं निषिद्धम् ॥

## अथ मासव्रतदानादिकम् ।

आषाढे मास्येकभक्तव्रते कृते बहुधनधान्यपुत्रप्राप्तिः ॥ अत्र मासे उपानच्छत्रलवणामलकानि वामनप्रीत्यै देयानि ॥

## अथ श्रीरामरथोत्सवः ।

आषाढशुक्लद्वितीयायां पुष्यनक्षत्रयुतायां केवलायां वा श्रीरामस्य रथोत्सवः ॥

## अथ मन्वादिद्वयम् ।

आषाढशुक्लपक्षे दशमी पौर्णमासी च मन्वादिः ॥ तन्निर्णयस्तूक्तः ॥ अथैकादश्यां विष्णुशयनोत्सवः ॥ तत्र सोपस्करे मंचके सुप्तां श्रीविष्णुप्रतिमां शंखादिचतुरायुधां लक्ष्मीसंवाहितचरणां नानाविधोपचारैः संपूजयेत् ॥ "त्वयि सुप्ते जगन्नाथे जगत्सुप्तं भवेदिदम् ॥ विबुद्धे त्वयि बुध्येत तत्सर्वं सचराचरम्" ॥ इति प्रार्थ्य उपोष्य जागरणं कृत्वा द्वादश्यां पुनः संपूज्य त्रयोदश्यां गीतनृत्यवाद्यादिकं निवेदयेत् ॥ एवमिदं त्रिदिनसाध्यं व्रतम् ॥ तत्र स्मार्तैर्वैष्णवैश्च स्वस्वे-

कादशीव्रतदिने शयनीव्रतमारब्धव्यम् ॥ रात्रौ शयनोत्सवः ॥ दिवा प्रबोधोत्सवः ॥ द्वादश्यां पारणाहे शयनप्रबोधोत्सवाविति केचित् ॥ अत्र देशाचाराद्व्यवस्था ॥ नेदं मलमासे कार्यम् ॥

## अथाषाढद्वादशीपारणानिर्णयः ।

आषाढशुद्धद्वादश्यामनुराधायोगरहितायां पारणं कार्यम् ॥ तत्राप्यनुराधाप्रथमपादयोग एव वर्ज्यः ॥ यदा तु द्वादशी स्वल्पा वर्ज्यनक्षत्रयोगो द्वादशीमतिक्रम्य विद्यते तदा निषेधमनादृत्य द्वादश्यामेव पारणं कार्यमिति कौस्तुभे उक्तम् ॥ संगवकालभागं त्यक्त्वा प्रातर्मध्याह्नभागे वा भोक्तव्यमिति पुरुषार्थचिंतामणौ ॥

## अथ चातुर्मास्यव्रतसंकल्पः ।

द्वादश्यां पारणोत्तरं सायं पूजां कृत्वा चातुर्मास्यव्रतसंकल्पं कुर्यादिति कौस्तुभे॥ एकादश्यामेवेति निर्णयसिंधुः ॥ चातुर्मास्यव्रतप्रथमारंभो गुरुशुक्रास्तादावाशौचादौ च न भवति ॥ द्वितीयाद्यारंभस्त्वस्तादावाशौचादौ च भवत्येव ॥ चातुर्मास्यव्रतं शैवादिभिरपि कार्यम् ॥ व्रतग्रहणप्रकारस्तु ॥ भगवतो जातीपुष्पादिभिर्महापूजां कृत्वा ॥ "त्वयि सुप्ते जगन्नाथे जगत्सुप्तं भवेदिदम् ॥ विबुद्धे च विबुध्येत प्रसन्नो मे भवाच्युत" इति प्रार्थ्याग्रे कृतांजलिः॥ "चतुरो वार्षिकान्मासान्देवस्योत्थापनावधि ॥ श्रावणे वर्जयेच्छाकं दधि भाद्रपदे तथा ॥ दुग्धमाश्वयुजे मासि कार्तिके द्विदलं तथा ॥ इमं करिष्ये नियमं निर्विघ्नं कुरु मेऽच्युत ॥ इदं व्रतं मया देव गृहीतं पुरतस्तव ॥ निर्विघ्नं सिद्धिमायातुप्रसादात्ते रमापते :॥ गृहीतेऽस्मिन्व्रते देव पंचत्वं यदि मे भवेत् ॥तदा भवतु संपूर्णं प्रसादात्ते जनार्दन"॥ इति प्रार्थ्य देवाय शंखेनार्घ्यं निवेदयेत् ॥ एतानि व्रतानि नित्यानि ॥

## अथ शाकव्रतांतरेषु च ।

हविष्यभक्षणादिव्रतांतरचिकीर्षायां "श्रावणे वर्जयेच्छाकम्' इति श्लोकस्थाने 'हविष्यान्नं भक्षयिष्ये देवाहं प्रीतये तव" इत्यूहः कार्यः ॥शाकव्रते व्रतांतरे च समुच्चयेन कर्तव्ये तं श्लोकं पठित्वा व्रतांतरमंत्रं वदेत् ॥ एवं गुडवर्जनादिधारणापारणादिव्रतेषु ॥ "वर्जयिष्ये गुडं देव मधुरस्वरसिद्धये ॥ वर्जयिष्ये तैलमहं सुंदरांगत्वसिद्धये ॥ योगाभ्यासी भविष्यामि प्राप्तुं ब्रह्मपदं परम् ॥ मौनव्रती भविष्यामि स्वाज्ञापालनसिद्धये ॥ एकांतरोपवासं च प्राप्तं ब्रह्मपदं परम् "इत्यादिरीत्योहः कार्यः ॥ निषिद्धान्नवर्जनेच्छायाम् ॥ "वृंताकादिनिषिद्धानि हरे सर्वाणि वर्जये"॥ इति संकल्पः ॥ तानि च चातुर्मास्ये निषिद्धानि ॥

## अथामिषगणः ।

प्राण्यंगचूर्णं चर्मस्थोदकं जंबीरं बीजपूरं यज्ञशेषभिन्नं विष्ण्वनिवेदितान्नं दग्धान्नं मसूरं मांसं चेत्यष्टविधमामिषं वर्जयेत् ॥ निष्पावराजमाषधान्ये लवणं शाकं वृंताकं कलिंगफलं अनेकबीजफलं निर्बीजं मूलकं कूष्मांडमिक्षुदंडं नूतनबदरीधात्रीफलानि चिंचां मंचकादिशयनमनृतुकाले भार्यागमनं परान्नं मधु पटोलं माषकुलित्थसितसर्षपांश्च वर्जयेत् ॥ वृंताकबिल्वोदुंबरकलिंगभिःसटास्तु वैष्णवैः सर्वमासेषु वर्ज्याः ॥ अन्यत्र तु गोछागीमहिष्यन्यदुग्धं पर्युषितान्नं द्विजेभ्यः क्रीता रसा भूमिलवणं ताम्रपात्रस्थं गव्यं पल्वलजलं स्वार्थपक्कमन्नमित्यामिषगण उक्तः ॥ "चतुर्ष्वपि हि मासेषु हविष्याशी न पापभाक्" ॥ हविष्याणि तु ॥ व्रीहियवमुद्गतिलकंगुकालायश्यामाकगोधूमधान्यानि रक्तभिन्नमूलकं सूरणादिकंदः सैंधवसामुद्रलवणं गव्यानि दधिसर्पिर्दुग्धानि पनसाम्रनारीकेरफलानि हरीतकीपिप्पलीजीरकंशुंठीचिंचाकदलीलवलीधात्रीफल्यानि गुडेतरेक्षुविकार इत्येतान्यतैलपक्वानि ॥ गव्यं तक्रं माहिषं घृतं क्वचित् ॥

## अथ काम्यव्रतानि ।

गुडवर्जनान्मधुरस्वरता ॥ तैलवर्जनात्सुंदरांगता ॥ योगाभ्यासी ब्रह्मपदं प्राप्नोति ॥ तांबूलत्यागाद्भोगी मधुरकंठश्च ॥ घृतत्यागी स्निग्धतनुः ॥ शाकत्यागी पक्वान्नभुक् ॥ पादाभ्यंगत्यागाद्वपुःसौगंध्यम् ॥ दधिदुग्धतक्रत्यागाद्विष्णुलोकः ॥ स्थालीपाचितान्नत्यागाद्दीर्घसंततिः ॥ भूमौ दर्भशायी विष्णुदासः ॥ भूमिभोजनान्नृपत्वम् ॥ मधुमांसत्यागान्मुनिः ॥ एकांतरोपवासाद्ब्रह्मलोकः ॥ नखकेशधारणाद्दिनेदिने गंगास्नानम् ॥ मौनादस्खलिताज्ञा ॥ विष्णुवंदनाद्गोदानफलम् ॥ विष्णुपादस्पर्शात्कृतकृत्यता ॥ हरेरालये संमार्जनादिना नृपत्वम् ॥ शतप्रदक्षिणाकरणाद्विष्णुलोकः ॥ एकभक्ताशनादग्निहोत्रफलम् ॥ अयाचितेन वापीकूपोत्सर्गादिपूर्तफलम् ॥ षष्ठाहःकालभोजनाच्चिरस्वर्गः ॥ पर्वेषु भोजनात्कुरुक्षेत्रवासफलम् ॥ शिलाभोजनात्प्रयागस्नानम् ॥ एवं मासचतुष्टयसाध्यानां व्रतानां संकल्पमेकादश्यां द्वादश्यां वा कृत्वा श्रावणमासव्रतविशेषसंकल्प इहैव कार्यः ॥

## अथ शाकव्रतनिर्णयः ।

"अहं शाकं वर्जयिष्ये श्रावणे मासि माधव" इति ॥ अत्र शाकशब्देन लोके प्रसिद्धाः फलमूलपुष्पपत्रांकुरकांडत्वगादिरूपा वर्ज्या न तु व्यंजनमात्रम् ॥ शुंठीहरिद्रादिजीरकादिकमपि वर्ज्यम् तत्र तत्कालोद्भवानामातपादिशोषितकालांतरोद्भवानां च सर्वशाकानां वर्जनं कार्यम् ॥ अथैषां चातुर्मास्यव्रतानां समाप्तौ कार्तिक्यां दानानि तत्रैव वक्ष्यंते ॥

## अथ तप्तमुद्राधारणनिर्णयः ।

शयनीबोधिन्योस्तप्तमुद्राधारणमुक्तं रामार्चनचंद्रिकायाम् ॥ अत्र तप्तमुद्राधारणे विधायकानि प्रशंसावचनानि निषेधकानि निंदावचनानि च बहुतराण्युपलभ्यंते तेषां शिष्टाचाराद्व्यवस्था ॥ येषां कुले पितृपितामहादिभिस्तप्तमुद्राधारणादिधर्मोनुष्ठितस्तैस्तथैवानुष्ठेयः येषां तु कुलेषु न केनाप्यनुष्ठितस्तैर्न स्वमतिविलसितश्रद्धया तद्धर्मोनुष्ठेयो दोषश्रवणादिति तात्पर्यम् ॥

## अथ नरमेधफलकपूजा ।

आषाढशुक्लद्वादश्यां वामनपूजनेन नरमेधफलम् ॥ पूर्वाषाढायुतायां पौर्णमास्यामन्नपानादिदानादक्षय्यान्नादिप्राप्तिः ॥ अस्यामेव पौर्णमास्यां प्रदोषव्यापिन्यां श्रीशिवस्य शयनोत्सवः ॥

## अस्यामेव कोकिलाव्रतम् ।

तत्र ॥ "स्नानं करिष्ये नियता ब्रह्मचर्ये स्थिता सती ॥ भोक्ष्यामि नक्तं भूशय्यां करिष्ये प्राणिनां दयाम्" इति मासव्रतं संकल्प्य कोकिलारूपिणीं शिवां प्रत्यहं संपूज्य नक्तभोजनम् ॥ यस्मिन्वर्षेधिकाषाढस्तस्मिन्नेव वर्षे शुद्धाषाढे व्रतं कार्यमित्याचारः स निर्मूलः ॥ आषाढस्य श्रावणस्य वा पौर्णमास्यां चतुर्दश्यामष्टम्यां वा शिवपवित्रारोपणमुक्तम् ॥

## अथ संन्यासिनां व्यासपूजा क्षौरादि ।

अस्यां पौर्णमास्यां संन्यासिनां चातुर्मास्यावाससंकल्पांगत्वेन क्षौरव्यासपूजादिकं विहितम् ॥ अत्र कर्मण्यौदयिकी त्रिमुहूर्ता पौर्णमासी ग्राह्या ॥ "चातुर्मास्यस्य मध्ये तु वपनं वर्जयेद्यतिः ॥ चातुर्मासं द्विमासं वा सदैकत्रैव संवसेत्" ॥ तत्रादौ क्षौरं विधाय द्वादशमृत्तिकास्नानानि प्राणायामादिविधिं च कृत्वा व्यासपूजां कुर्यात् ॥

## अथ संक्षेपेण तद्विधिः ।

देशकालौ संकीर्त्य चातुर्मास्यावासं कर्तुं श्रीकृष्णव्यासभाष्यकाराणां सपरिवाराणां पूजनं करिष्ये इति संकल्प्य ॥ मध्ये श्रीकृष्णं तत्पूर्वतः प्रादक्षिण्येन वासुदेवसंकर्षणप्रद्युम्नानिरुद्धानावाह्य श्रीकृष्णपंचकदक्षिणभागे व्यासं तत्पूर्वतः प्रादक्षिण्येन सुमंतुजैमिनिवैशंपायनपैलानिति व्यासपंचकमावाह्य श्रीकृष्णादि वामे भाष्यकारं श्रीशंकरं तत्पूर्वतः प्रादक्षिण्येन पद्मपादविश्वरूपत्रोटकहस्तामलकाचार्यानावाह्य श्रीकृष्णपंचके श्रीकृष्णपार्श्वयोर्ब्रह्मरुद्रौ पूर्वादिचतुर्दिक्षु सनकादीन्कृष्णपंचकात्पुरतः गुरुपरमगुरुपरमेष्ठिगुरुपरात्परगुरून् ब्रह्मवसिष्ठशक्तिपराशरव्यासशुकगौडपादगोविंदपादशंकराचार्यान्ब्रह्मनिष्ठांश्चावाह्य पंचकत्रयस्यायेयै

गणेशमीशान्यां क्षेत्रपालं वायव्ये दुर्गां नैर्ऋत्ये सरस्वतीं प्रागाद्यष्टदिक्ष्विंद्रादिलोकपालांश्चावाह्य पूजयेत् ॥ तत्र नारायणाष्टाक्षरेण श्रीकृष्णपूजा ॥ अन्येषां प्रणवादिनमोंतैस्तन्नाममंत्रैः पूजा कार्या ॥ पूजांते असति प्रतिबंधे चतुरो वार्षिकान्मासानिह वसामीति मनसा संकल्प्य ॥ "अहं तावन्निवत्स्यामि सर्वभूतहिताय वै ॥ प्रायेण प्रावृषि प्राणिसंकुलं वर्त्म दृश्यते ॥ अतस्तेषामहिंसार्थं पक्षान्वै श्रुतिसंश्रयात् ॥ स्थास्यामश्चतुरो मासानत्रैवासति बाधके" ॥ इति वाचिकसंकल्पं कुर्यात् ॥ ततो गृहस्थाः प्रतिब्रूयुः "निवसंतु सुखेनात्र गमिष्यामः कृतार्थताम् ॥ यथाशक्ति च शुश्रूषां करिष्यामो वयं मुदा" इति ॥ ततो वृद्धानुक्रमेण यतीन्गृहस्था यतयश्चान्योन्यं नमस्कुर्युः ॥ एतद्विधिः पौर्णमास्यामसंभवे द्वादश्यां वा कार्यः ॥

## अथाषाढकृष्णद्वितीयायामशून्यशयनव्रतम् ।

अत्र लक्ष्मीयुतं विष्णुं पर्यंके संपूज्य॥"पत्नी भर्तुर्वियोगं च भर्ता भार्यासमुद्भवम् ॥ नाप्नुवंति यथा दुःखं दांपत्यानि तथा कुरु" इत्यादिभिर्दांपत्याभंगप्रार्थनार्थैर्मन्त्रैः प्रार्थयेत् ॥ ततश्चन्द्रायार्घ्यं दत्त्वा नक्तभोजनं कार्यम् ॥ एवं मासचतुष्टयं कृष्णद्वितीयासु संपूज्य सपत्नीकाय शय्यादानं कृत्वा तां प्रतिमां च सोपस्करां दद्यात् ॥ अस्मिन्व्रते अक्षय्यं दांपत्यसुखं पुत्रधनाद्यवियोगो गार्हस्थ्यावियोगश्च सप्तजन्मसु भवति ॥ अत्र व्रते चंद्रोदयव्यापिनी तिथिर्ग्राह्या ॥ चंद्रोदये पूजाद्युक्तेः दिनद्वये सत्त्वेऽसत्त्वे वा परैव ॥ ॥ इति श्रीमदनंतोपाध्यायसूनुकाशीनाथोपाध्याय विरचिते धर्मसिंधुसारे आषाढमासनिर्णयोद्देशः ॥

## अथ श्रावणमासे सिंहसंक्रांतिः ।

सिंहे पराः षोडश नाड्यः पुण्यकालः रात्रौ तूक्तम् ॥

## अथ मासव्रतानि ।

अत्र मासे एकभक्तव्रतं नक्तव्रतं विष्णुशिवाद्यभिषेकश्चोक्तः ॥

## अथ सिंहे गोप्रसूतौ ।

"सिंहराशिगते सूर्ये यस्य गौश्च प्रसूयते" ॥ तेन व्याहृतिभिर्घृतात्कायुतसंख्यया सर्षपहोमं कृत्वा सा गौर्ब्राह्मणाय देया ॥

## अथ निशीथे गोः क्रंदने ।

एवं निशीथे गोः क्रंदनेपि मृत्युंजयमंत्रेण होमादिरूपा शांतिः कार्या ॥

## अथ वडवामहिषीप्रसूतौ ।

एवं श्रावणमासे दिवाश्विनीप्रसवोपि निषिद्धः ॥ "माघे बुधे च महिषी श्रावणे

वडवा दिवा ॥ सिंहे गावः प्रसूयंते स्वामिनो मृत्युदायकाः" ॥ इत्युक्तेरत्रापि शांतिः शांतिग्रंथतो ज्ञेया ॥

## अथ सोमवारभौमवारव्रतम् ।

"सोमवारव्रतं कार्यं श्रावणे वै यथाविधि ॥ शक्तेनोपोषणं कार्यमथवा निशि भोजनम्" ॥ एवं श्रावणे भौमवारे गौरीपूजाप्युक्ता श्रावणशुक्लचतुर्थी मध्याह्नव्यापिनी पूर्वयुता ग्राह्या ॥

## अथ नागपंचमीव्रतम् ।

श्रावणशुद्धपंचमी नागपंचमी ॥ इयमुदये त्रिमुहूर्तव्यापिनी परविद्धा ग्राह्या ॥ परेद्युस्त्रिमुहूर्तन्यूना पंचमी पूर्वेद्युस्त्रिमुहूर्तन्यूनचतुर्थ्या विद्धा तदा पूर्वैव ॥ त्रिमुहूर्ताधिकचतुर्थीवेधे द्विमुहूर्तापि परैव ॥ मुहूर्तमात्रा तु न ग्राह्येति मम प्रतिभाति ॥ अस्यां भित्त्यादिलिखिता मृन्मया वा यथाचारं नागाः पूज्याः ॥

## अथ शाकदानमंत्रः ।

श्रावणशुक्लद्वादश्यां मासं कृतस्य शाकवर्जनव्रतस्य सांगतार्थं ब्राह्मणाय शाकदानं करिष्ये इति संकल्प्य ब्राह्मणं संपूज्य ॥ "उपायनमिदं देव व्रतसंपूर्णहेतवे ॥ शाकं तु द्विजवर्याय सहिरण्यं ददाम्यहम्" ॥ इति मंत्रेण पक्वमामं वा शाकं दद्यात् ॥ ततो "दधि भाद्रपदे मासे वर्जयिष्ये सदा हरे" इति दधिव्रतं संकल्पयेत् ॥ अत्र दधिमात्रं वर्ज्यं तक्रादीनामनिषेधः ॥

## अथ विष्णोः पवित्रारोपणकालः ।

अथ पारणाहे द्वादश्यां विष्णोः पवित्रारोपणम् ॥ पारणाहे द्वादश्यसत्त्वे त्रयोदश्यां पारणाहे तत्र संभवे श्रवणर्क्षे पूर्णिमायां वा कार्यम् ॥ शिवपवित्रं चतुर्दश्यामष्टम्यां वा पौर्णमास्यां वा कार्यम् ॥ एवं देवीगणेशदुर्गादीनां चतुर्दशीचतुर्थीतृतीयानवम्यादयो यथाकुलाचारं तिथयः ॥ तत्तत्तिथिष्वसंभवे सर्वदेवानां श्रावणपौर्णमास्यां वा कार्यम् ॥ तत्रासंभवे कार्तिक्यवधिर्गौणकालः ॥ इदं नित्यम् ॥

## अथ पवित्राकरणेप्रायश्चित्तम्

"अकुर्वाणो व्रजत्यधः ॥ तस्य सांवत्सरी क्रिया निष्फला" इत्याद्युक्तेः ॥ गौणकालेप्यकरणे ॥ "तदायुतं जपेन्मंत्रं स्तोत्रं वापि समाहितः" इत्युक्तरयुतसंख्याकतद्देवतामूलमंत्रजपः प्रायश्चित्तम् ॥ तत्र पूर्वेद्युरधिवासनं परेह्नि पवित्रारोपणम् ॥ द्व्यहकालासंभवे सद्योधिवासनपूर्वकं तत्कार्यम् ॥

## अथ संक्षेपतः पवित्रकरणप्रयोगः ।

कार्पाससूत्रस्य नवसूत्रीं विधायाष्टोत्तरशतनवसूत्र्या देवजानुपर्यंतं चतुर्विंशद्ग्रंथिकमुत्तमं पवित्रम् ॥ चतुःपंचाशन्नवसूत्र्या ऊरुलंबि द्वादशग्रंथिकं मध्यमम् ॥ सप्तविंशतिनवसूत्र्याष्टग्रंथिकं नाभिपर्यंतं कनिष्ठं पवित्रं च कृत्वा विंशत्युत्तरशतेन सप्तत्या वा नवसूत्र्याः पादलंबिनीं वनमालामष्टोत्तरशतचतुर्विंशत्यन्यतरग्रंथिकां कृत्वा द्वादशनवसूत्र्या द्वादशग्रंथिकं गंधपवित्रं सप्तविंशतिनवसूत्र्या गुरुपवित्रं त्रिसूत्र्यांगदेवतापवित्राणि कुर्यात् ॥

## अथ शिवपवित्राणि ।

शिवपवित्राणि लिंगविस्तारानुसारेण कुर्यात् ॥ सर्वाणि पवित्राणि पंचगव्येन प्रोक्ष्य प्रणवेन प्रक्षाल्य मूलेनाष्टोत्तरशतमभिमंत्र्य ग्रंथीन्कुकुंमेन रंजयित्वा सर्व पवित्राणि वंशपात्रे संस्थाप्य वस्त्रेण पिधाय देवपुरतो न्यस्य ॥ "क्रियालोपविधानार्थं यत्त्वया विहितं प्रभो ॥ मयैतत्क्रियते देव तव तुष्टयै पवित्रकम्॥न मे विघ्नो भवेदेव कुरु नाथ दयां मयि ॥ सर्वथा सर्वदा विष्णो मम त्वं परमा गतिः" इति प्रार्थ्याधिवासनं कुर्यात् ॥

## अथाधिवासनादिप्रयोगः ।

तत्र देशकालौ संकीर्त्य मम संवत्सरकृतपूजाफलावाप्त्यर्थममुकदेवताप्रीत्यर्थमधिवासनविधिपूर्वकं पवित्रारोपणं करिष्य इति संकल्प्य देवपुरतः सर्वतोभद्रे जलपूर्णं कुंभं संस्थाप्य कुंभे वंशपात्रं तत्र तानि पवित्राणि निधाय तेषु ॥ "संवत्सरस्य यागस्य पवित्रीकरणाय भोः ॥ विष्णुलोकात्पवित्राद्य आगच्छेह नमोस्तु ते" ॥ इति मंत्रेण मूलमंत्रेण चावाह्य त्रिसूत्र्यां ब्रह्मविष्णुरुद्रान्नवसूत्र्याम् ॐकारसोमवह्निब्रह्मनागेशसूर्यशिवविश्वेदेवानुत्तममध्यमकनिष्ठपवित्रेषु विष्णुब्रह्मरुद्रान्सत्त्वरजस्तमांस्यावाह्य वनमालायां प्रकृतिं चावाह्य मूलमंत्रेण श्रीपवित्राद्यावाहितदेवताभ्यो नम इत्यंतेन गंधाद्युपचारैः पूजयेत् ॥ ततः पूर्वसंपादितं वितस्तिमात्रं द्वादशग्रंथिकं गंधपवित्रमादाय ॥ "विष्णुतेजोद्भवं रम्यं सर्वपातकनाशनम् ॥ सर्वकामप्रदं देव तवांगे धारयाम्यहम्" इति मंत्रेण मूलसंपुटितेन देवपादयोः समर्पयेत् ॥ देवस्य करे बध्नीयादित्यन्ये ॥ ततो देवं पंचोपचारैः संपूज्य प्रार्थयेत् ॥ "आमंत्रितोसि देवेश पुराणपुरुषोत्तम ॥ प्रातस्त्वां पूजयिष्यामि सान्निध्यं कुरु केशव ॥ क्षीरोदधिमहानागशय्यावस्थितविग्रह ॥ प्रातस्त्वां पूजयिष्यामि सन्निधौ भव ते नमः" ॥ ततः साष्टांगं प्रणम्य पुष्पांजलिं दद्यात् इत्यधिवासनम् ॥

## अथ पवित्रारोपणमंत्रादि ।

अत्र सर्वत्र मूलमन्त्रो गुरूपदिष्टस्तांत्रिको वैदिको वा देवगायत्रीरूपो वा ग्राह्यः॥ ततो रात्रिं सत्कथाजागरेणातिवाह्य प्रातःकाले सद्योधिवासने गोदोहांतरिते वा काले पवित्रारोपणांगभूतं देवपूजनं पवित्रपूजनंच करिष्ये इति संकल्प्य देवं पवित्राणि च फलाद्युपनैवेद्यांतगंधाद्युपचारैः संपूज्य गंधदूर्वाक्षतयुतं कनिष्ठं पवित्रमादाय ॥ " देवदेव नमस्तुभ्यं गृहाणेदं पवित्रकम् ॥ पवित्रीकरणार्थाय वर्षपूजाफलप्रदम् ॥ पवित्रकं कुरुष्वाद्य यन्मया दुष्कृतं कृतम् ॥ शुद्धो भवाम्यहं देव त्वत्प्रसादात्सुरेश्वर" इति मन्त्रेण मूलसंपुटितेन दत्त्वा मध्यमोत्तमपवित्रे वनमालां चैव मेवैतन्मन्त्रावृत्त्या दद्यात् ॥ अंगदेवताभ्यो नाम्ना समर्प्य महानैवेद्यं दत्त्वा नीराज्य प्रार्थयेत् ॥ "मणिविद्रुममालाभिर्मंदारकुसुमादिभिः ॥ इयं सांवत्सरी पूजा तवास्तु गरुडध्वज ॥ वनमालां यथा देव कौस्तुभं सततं हृदि ॥ तद्वत्पवित्रतंतूंस्त्वं पूजां च हृदये वह ॥ जानता जानतावापि यत्कृतं न तवार्चनम्॥केनचिद्विघ्नदोषेण परिपूर्णं तदस्तु मे ॥ मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर ॥ यत्पूजितं मया देव परिपूर्णं तदस्तु मे ॥ अपराधसहस्राणि क्रियंतेहर्निशं मया॥दासोयमिति मां मत्वा क्षमस्व परमेश्वर " इति ॥ अत्र शिवादौ ॥ गरुडध्वजेत्यादौ वृषवाहनेत्यूहः ॥ वनमालामिति श्लोकस्य तु लोपः ॥ देव्यां तु देवदेवसुरेश्वरेत्यादौ देविदेवि सुरेश्वरीत्यादि स्त्रीप्रत्ययांतपदोहः कार्यः ॥ शेषं समानम् ॥ ततो गुरुं संपूज्य पवित्रं दत्त्वान्यब्राह्मणेभ्यः सुवासिनीभ्यश्चान्यानि दत्त्वा स्वयमपि सकुटुंबो धारयेत् ॥ ततो ब्राह्मणैः सह भुक्त्वा त्रिरात्रं ब्रह्मचर्यादि नियमवान् देहे पवित्राणि धारयेत् ॥ देवस्य स्नानादिकोपचारान्पवित्राण्युत्तार्य कारयेत् ॥ त्रिरात्रांते देवं संपूज्य पवित्राणि विसर्जयेत् ॥

## अथात्र पूर्णिमा पूर्वविद्धा ग्राह्या ।

अत्र शिवादिपवित्रारोपणे चतुर्दशी पूर्वविद्धा ग्राह्या ॥ एवं पूर्णिमापि त्रिमुहूर्तसायाह्नव्याप्ता पूर्वविद्धैव ग्राह्या ॥ अष्टम्यादितिथ्यंतराण्यपि पवित्रारोपणे प्रथमपरिच्छेदोक्तसामान्यतिथिनिर्णयानुसारेण ग्राह्याणि ॥ ॥ इति पवित्रारोपणविधिः ॥

## अथ बह्वृचानामुपाकर्मकालः ।

तत्र बह्वृचानां श्रावणशुक्लपक्षे श्रवणनक्षत्रं पञ्चमी हस्त इति कालत्रयम् ॥ तत्र श्रवणं मुख्यः कालः ॥ तदलाभे पञ्चम्यादिः तथा च कालतत्त्वविवेचने संग्रहकारिकायाम् ॥ "पर्वणि श्रवणे कार्यं ग्रहसंक्रांत्यदूषिते ॥ अध्वर्युभिर्बह्वृचैश्च कथंचित्तदसंभवे ॥ तत्रैव हस्तपंचम्यां तयोः केवलयोरपि" ॥ तत्र दिनद्वये

श्रवणसत्त्वे यदि पूर्वदिने सूर्योदयमारभ्य प्रवृत्तं श्रवणं द्वितीयादिने सूर्योदयोत्तरं त्रिमुहूर्तं वर्तते तदा परदिन एवोपाकर्म धनिष्ठायोगप्राशस्त्याद्यदि त्रिमुहूर्तं न्यूनं तदा पूर्वदिन एव संपूर्णव्याप्तेर्यदि पूर्वदिने सूर्योदये नास्ति परदिने सूर्योदयोत्तरं मुहूर्तद्वयं वर्तते तदोत्तरदिने एव ॥ उत्तराषाढावेधनिषेधात् ॥ यदि परदिने मुहूर्तद्वयन्यूनं पूर्वदिने चोत्तराषाढाविद्धं तदा पंचम्यादिकालो ग्राह्यः ॥ पञ्चमी हस्त इति कालद्वयं त्वौदयिकं मुहूर्तत्रयव्यापि मुख्यम् ॥ तदलाभे पूर्वविद्धमपि ॥ एवं भाद्रपदशुक्लपक्षेपि ॥ श्रवणपञ्चमीहस्तकालत्रयनिर्णयो ज्ञेयः ॥ एतद्बह्वृचैः पूर्वाह्णे कार्यम् ॥

## अथ यजुर्वेद्युपाकर्मनिर्णयः ।

तत्र बह्वृचानां श्रवणवत्सर्वयजुर्वेदिनां श्रावणपौर्णमासी मुख्यः कालः ॥ पौर्णमास्याः खंडत्वे यदा पूर्णिमा पूर्वदिने मुहूर्ताद्यनंतरं प्रवृत्ता द्वितीयादिने षण्मुहूर्तं व्यापिनी तदा सर्वयाजुषाणामुत्तरैव ॥ यदा शुद्धाधिकतया दिनद्वयेपि सूर्योदयव्यापिनी तदा सर्वयाजुषाणां पूर्वैव ॥ पूर्वदिने मुहूर्ताद्यनंतरं प्रवृत्ता द्वितीयादिने मुहूर्तद्वयत्रयादिव्यापिनी षण्मुहूर्तन्यूना तदा तैत्तिरीयैरुत्तरा ग्राह्या ॥ तैत्तिरीयभिन्नयाजुषैः पूर्वा ग्राह्या ॥ यदा पूर्वदिने मुहूर्ताद्यनंतरं प्रवृत्ता द्वितीयादिने मुहूर्तद्वयन्यूना भवति क्षयवशान्नास्त्येव वा तदा सर्वयाजुषाणा पूर्वैव ॥

## अथ हिरण्यकेशीयानाम् ।

हिरण्यकेशीतौत्तिरीयाणां श्रावणी पौर्णमासी मुख्यकालस्तदभावे श्रावणे हस्तः ॥ श्रावणशुक्लपंचमी तु तत्सूत्रेऽनुक्तेर्न ग्राह्या ॥ एतदेव भाद्रपदेपि कालद्वयमिति विशेषः ॥ खण्डतिथित्वे निर्णयः पूर्वोक्त एव ॥ हस्तनक्षत्रमप्यौदयिकं संगवस्पर्शि ग्राह्यमन्यथा पूर्वविद्धमेव ॥

## अथापस्तंबानाम् ।

आपस्तंबानां श्रावणी पौर्णमासी मुख्या तदभावे भाद्रपदीति विशेषः ॥

## अथ बौधायनानाम् ।

बौधायनानां श्रावणी पौर्णमासी मुख्या दोषसंभावनया तदभावे आषाढीति विशेषः ॥ एतेषामपि खंडतिथित्वे पूर्वोक्त एव निर्णयः ॥

## अथ काण्वमाध्यंदिनानाम् ।

अथ काण्वमाध्यंदिनादिकात्यायनानां श्रवणयुता श्रावणपूर्णिमा केवला वा हस्तयुक्ता पञ्चमी केवला वा मुख्यकालः ॥ अतः केवलश्रवणे केवलहस्ते च तैर्न कार्यम् ॥ श्रावणमासे विघ्नदोषे भाद्रपदगतपूर्णिमापंचम्योः कार्यम् ॥ तिथेः

खंडत्वे षण्मुहूर्ताधिक्ये उत्तरा ॥ षण्मुहूर्तन्यूनत्वे पूर्वा ग्राह्येत्यादिः पूर्वोक्त एव निर्णयः ॥

## अथ सामवेदिनाम् ।

अथ सामवेदिनां भाद्रपदशुक्लपक्षे हस्तनक्षत्रं मुख्यकालः॥ संक्रांत्यादिदोषेण तत्रासंभवे श्रावणमासे हस्तो ग्राह्य इति निर्णयसिंधुः ॥ अन्ये तु भाद्रपदहस्ते दोषसंभवे श्रावणपौर्णमास्यामुपाकर्म कृत्वा भाद्रपदस्थहस्तपर्यंतं न पठनीयं ततः परं पठनीयमित्याहुः॥ हस्तस्य खंडत्वे दिनद्वयेपराह्णपूर्णव्याप्तावपराह्णैकदेशस्पर्शे वा परदिने एवोपाकर्म ॥ पूर्वदिन एवापराह्णपूर्णव्याप्तौ पूर्वत्रैव ॥ सर्वत्र सामगानामपराह्णस्यैवोपाकर्मकालत्वेनोक्तेः ॥ पूर्वदिन एवापराह्णैकदेशस्पर्शे दिनद्वयेप्यपराह्णस्पर्शाभावे वा परत्रैव ॥ येषां सामवेदिनां प्रातःसंगवौ कर्मकालत्वेनोक्तौ तेषां पूर्वत्रापराह्णव्याप्तिं त्यक्त्वा परदिने संगवोर्ध्वं वर्तमानहस्तग्रहणम् ॥ सिंहस्थे सूर्ये उपाकर्म विधानं तु यदि श्रावणे हस्तः पूर्णिमा वा सिंहस्थसूर्ये भवति तदा तत्रोपाकर्म न कर्कस्थे इति सामगानां श्रावणमासगतहस्तपर्वणोर्व्यवस्थापरम् ॥ अन्यशाखिनां सिंहस्थरवेर्विधिर्निषेधो वा नास्ति ॥

## अथार्थववेदिनाम् ।

अथर्ववेदिनां तु श्रावण्यां भाद्रपदगतायां वा पौर्णमास्यामुपाकर्म ॥ तिथिखंडे औदयिकसंगवकालव्यापिनी तिथिर्ग्राह्येति ॥

## अथ सर्वशाखिनां साधारणविधिः।

सर्वशाखिनां श्रावणभाद्रपदमासगतस्वस्वगृह्योक्तकालेषु ग्रहणसंक्रात्याशौचादिदोषसंभावनायां सर्वथा कर्मलोपप्राप्तौ शाखांतरोक्तकालानां ग्राह्यत्वमावश्यकम् ॥ तत्रापस्तंबबौधायनसामगादीनां श्रावणभाद्रपदगतपंचमीपूर्णिमादेरप्यविशेषेण ग्राह्यत्वप्राप्तौ नर्मदोत्तरदेशे सिंहगते सूर्ये पंचम्यादेर्ग्रहणं नर्मदादक्षिणभागे कर्कटस्थे सूर्ये श्रावणपंचम्यादेर्ग्रहणमिति व्यवस्थेति कौस्तुभे उक्तम् ॥ तेन ऋग्वेदिनामपि सर्वथा कर्मलोपप्रसक्तौ पूर्णिमापि सिंहस्थकर्कटस्थादिव्यवस्थया ग्राह्येति मम प्रतिभाति ॥ सर्वशाखिभिः श्रावणमासमुख्यकाले पर्जन्याभावेन व्रीह्याद्यौषधिप्रादुर्भावाभावे आशौचादौ वा भाद्रपदश्रवणादौ कार्यम् ॥ औषधिप्रादुर्भावाभावेपि श्रावणमासे कार्यमिति कर्कादिमतम् ॥ सर्वशाखिनां गृह्योक्तमुख्यकालत्वेन निर्णीते दिने ग्रहणस्य संक्रांतेर्वा सत्त्वे संक्रांतिरहिताः पंचम्यादयो ग्राह्याः ॥

## अथ ग्रहणसंक्रातावुपाकर्म ।

ग्रहणसंक्रांतियोगश्चोपाकर्मसंबंधिन्यहोरात्रे भविष्यन्मध्यरात्रात्पूर्वमतीतमध्यरात्रादूर्ध्वं चेति यामाष्टके विद्यमानश्रवणनक्षत्रपूर्णिमादितिथ्यस्पृष्टोप्युपाकर्मदूषकः

केचित्तूक्तयामाष्टकादन्यत्रापि विद्यमानो ग्राह्यश्रवणादिनक्षत्रपर्वादितिथिस्पर्शी चेत्सोपि दूषक इत्याहुः ॥

## अथ नूतनोपाकर्म ।

नूतनोपनीतानां प्रथमोपाकर्म गुरुशुक्रास्तादौ मलमासादौ सिंहस्थे गुरौ च न कार्यम् ॥ द्वितीयाद्युपाकर्म तु अस्तादावपि कार्यम् ॥ मलमासे तु द्वितीयाद्यपि न कार्यम् ॥ प्रथमोपाकर्म स्वस्तिवाचननांदिश्राद्धादि कृत्वा कार्यम् ॥ नूतनोपनीतानां श्रावणमासगतपंचमी हस्तश्रवणादिकालेषु गुरुशुक्रास्तादिप्रतिबंधेनोपाकर्मारंभाभावे भाद्रपदमासगतपंचमी श्रवणादयो ग्राह्याः ॥ "मौंजीं यज्ञोपवीतं च नवदंडं च धारयेत् ॥ अजिनं कटिसूत्रं च नववस्त्रं तथैव च" इति ब्रह्मचारिणो विशेषः प्रतिवर्षं ज्ञेयः ॥ उपाकर्मोत्सर्जने ब्रह्मचारिसमावृतगृहस्थवानप्रस्थैः सर्वैः कर्तव्ये ॥ उत्सर्जनकालस्तु नेह प्रपंच्यते ॥ "उपाकर्मदिनेथ वा" इति वचनानुसारेण सर्वशिष्टानामिदानीमुपाकर्मादिने एवोत्सर्जनकर्मानुष्ठानाचारेण तन्निर्णयस्यानुपयोगात् ॥ एते उपाकर्मोत्सर्जने यद्यन्यैर्द्विजैः सह करोति तदा लौकिकाग्नौ कुर्यात् ॥ यद्येकः करोति तदा स्वगृह्याग्नौ कुर्यात् ॥ कात्यायनैस्त्वौपवसथ्येऽग्नावेव होतव्यं न लौकिकाग्नौ ॥

## अथ पंचावत्तिवादिविचारः ।

बह्वृचादिः स्वयं चतुरवत्ती बहुभिश्चतुरवत्तिभिरुपाकर्मादिकं कुर्वन्नेकस्यापि जामदग्न्यादेः पंचावत्तिनः सत्त्वे तदनुरोधेन पंचावत्तमेव कुर्यात् ॥ चतुरवत्तिनामपि पंचावत्तित्वस्य वैकल्पिकत्वोक्त्या तेषामपि कर्म वैगुण्याभावात् ॥

## अथाकरणे प्रायश्चित्तम् ।

अकरणे दोषश्रवणेन प्रत्यब्दमेते कर्तव्ये ॥ क्वचित्पुस्तके निर्णयसिंधावेव तदकरणे प्राजापत्यकृच्छ्रमुपवासो वा प्रायश्चित्तं दृश्यते न सर्वत्र ॥ उपाकर्मोत्सर्जनयोरुभयोरप्यृषिपूजनमुक्तम् ॥ ऋष्यादितर्पणं तूत्सर्जन एव ॥ अत्र विवाहोत्तरं तिलतर्पणे न दोषः ॥

## अथ संकल्पे विशेषः ।

अत्र संकल्पे अधीतानां छन्दसामाप्यायनद्वारा श्रीपरमेश्वरप्रीत्यर्थमुपाकर्मदिने अद्योत्सर्जनाख्यं कर्म करिष्ये इति ॥ उपाकर्मणि तु ॥ अधीतानामध्येष्यमाणानां छन्दसां यातयामता निरासेनाप्यायनद्वारा श्रीपरमेश्वरप्रीत्यर्थमिति विशेषः ॥ अवशिष्टः सर्वोपि प्रयोगविशेषः स्वस्वगृह्यानुसारेण ज्ञेयः ॥ अत्र नदीनां रजोदोषो न ॥ ब्रह्मादिदेवऋष्यादीनां जले सांनिध्यं तेन स्नानात्सर्वदोषक्षयः ॥

ऋषिपूजनस्थानस्थितजलस्पर्शनपानाभ्यां सर्वकामावाप्तिः ॥ इति सर्वशाखिसाधारणनिर्णयः ॥

## अथ रक्षाबन्धनम् ।

अथ रक्षाबन्धनमस्यामेव पूर्णिमायां भद्रारहितायां त्रिमुहूर्ताधिकोदयव्यापिन्यामपराह्णे प्रदोषे वा कार्यम् ॥ उदयत्रिमुहूर्तन्यूनत्वे पूर्वेद्युर्भद्रारहिते प्रदोषादिकाले कार्यम् ॥ इदं ग्रहणसंक्रांतिदिनेपि कर्तव्यम् ॥ मन्त्रस्तु ॥ "येन बद्धो बली राजा दानवेंद्रो महाबलः ॥ तेन त्वामभिबध्नामि रक्षे मा चल मा चल" इति ॥ अत्रैव पूर्णिमायां हयग्रीवोत्पत्तिः ॥

## अथ कुलधर्मादौ पौर्णमासी ।

श्रावणपूर्णिमा कुलधर्मादौ त्रिमुहूर्त्तसायाह्नव्याप्ता पूर्वविद्धैव ग्राह्या ॥ त्रिमुहूर्त्तन्यूनत्वे परा ॥

## अथ श्रवणाकर्मादिसंस्था ।

अस्यामेव पौर्णमास्यामाश्वलायनानां श्रवणाकर्मसर्पबलिश्च रात्रावुक्तः ॥ तैत्तिरीयाणां तु सर्पबलिरेवोक्तः ॥ कात्यायनानां सामगानां च श्रवणाकर्मसर्पबली द्वावप्युक्तौ ॥ अत्र पौर्णमासी अस्तमयप्रभृतिप्रवृत्तकर्मपर्याप्तकालव्यापिनी चेत् पूर्वैव ग्राह्या ॥ दिनद्वये तत्सम्बन्धस्य सत्त्वेऽसत्त्वे वा परैव ॥ प्रयोगस्तु स्वस्वसूत्रे ज्ञेयः ॥

## अथाकरणे प्रायश्चित्तम् ।

श्रवणाकर्मसर्पबल्याश्वयुजी प्रत्यवरोहणादिपाकसंस्थानां स्वस्वकालेष्वकरणे प्राजापत्यं प्रायश्चित्तं कार्यम् ॥ न तु कालांतरे तदनुष्ठानम् ॥

## अथ पत्न्या रजस्यपि कार्याः ।

श्रवणाकर्मादिसंस्थाः पत्न्यामृतुमत्यामपि कार्याः ॥ प्रथमारम्भस्तु न भवति ॥

## अथ संकटचतुर्थीनिर्णयः ।

श्रावणकृष्णचतुर्थ्यां प्रारभ्य कृष्णचतुर्थीषु यावज्जीवमेकविंशतिवर्षाणि एकवर्षं वा संकटचतुर्थीव्रतं कार्यम् ॥ अशक्तौ प्रतिवर्षं श्रावणचतुर्थ्यामेव कार्यम् ॥ अत्र चन्द्रोदयव्याप्त्या तिथिनिर्णयः प्रथमपरिच्छेदे उक्तः ॥ सोद्यापनव्रतसमाप्तिप्रयोगः कौस्तुभादौ ज्ञेयः ॥

## अथ जन्माष्टमीव्रतम् ।

तत्राष्टमी द्विविधा ॥ शुद्धा विद्धा च ॥ दिवारात्रौ वा सप्तमीयोगरहिता यत्र दिने यावती तत्र तावती शुद्धा ॥ दिवारात्रौ वा सप्तमीयोगवती यस्मिन्नहोरात्रे

यावती तत्र तावती विद्धा ॥ सा पुनर्द्विविधा ॥ रोहिणीयुता रोहिणीयोगरहिता चेति ॥ तत्र रोहिणीयोगरहिता केवलाष्टमीभेदः ॥ सप्तमीनाड्यः ५९ पलानि५९ अष्टमी ५८।५ अस्यां शुद्धायां संदेहो नास्ति द्वितीयकोट्यभावात् ॥ सप्तमी २ अष्टमी ५५ अस्यां विद्धायामप्यसंदेहः दिनांतरे अभावेन द्वितीयकोट्यभावात् ॥ यदा दिनद्वये केवलाष्टमी वर्तते तदा चत्वारः पक्षाः ॥ पूर्वेद्युरेव निशीथव्यापिनी १ परेद्युरेव निशीथव्यापिनी २ दिनद्वयेपि निशीथव्यापिनी ३ दिनद्वयेपि निशीथव्याप्त्यभाव इति ४ ॥ राज्यर्धं निशीथपदार्थः स्थूलसूक्ष्मदृष्ट्या त्वष्टमो मुहूर्तो निशीथः ॥ तत्र पूर्वेद्युरेव निशीथव्यापिनी यथा १ सप्तमी ४० अष्टमी४२ अत्र सप्तमीयुता पूर्वविद्धैवाष्टम्युपोष्या ॥ यथाष्टमी ६०।४ इयं शुद्धाधिकापि पूर्वैव ॥ परेद्युरेव निशीथे यथा २ सप्तमी ४७ अष्टमी ४६ अत्र परैवाष्टम्युपोष्या उभयत्र निशीथे यथा ३ सप्तमी ४२ अष्टमी ४६ अत्रापि परैवाष्टमी ग्राह्या ॥ दिनद्वये निशीथव्याप्त्यभावो यथा ४ सप्तमी ४७ अष्टमी ४२ अत्रापि परैवाष्टमी ग्राह्या ॥ अत्र सर्वत्र सप्तमीयुक्तायां रात्रिपूर्वार्धावसाने कलयाप्यष्टम्याः सत्त्वे एव निशीथव्यापित्वं नवमीयुतायां रात्र्युत्तरार्धादिभागे सत्त्वे एवोत्तरत्र निशीथव्यापित्वं सप्तमीदिने उत्तरभागे एव सत्त्वे नवमीयुतदिने पूर्वभाग एव सत्त्वे च निशीथा व्यापित्वपक्ष एव मन्तव्यः ॥ एवं वक्ष्यमाणरोहिणीयुक्तभेदेष्वपि ज्ञेयम् ॥ अथ रोहिणीयुताष्टमी अत्र सिंधुमतनवीनमतभेदः ॥ रोहिणीयुताष्टम्यामपि पूर्वदिने एव निशीथेष्टमीरोहिण्योर्योगः ॥ परदिन एव तयोर्निशीथे योगः ॥ दिनद्वये निशीथे योग इति पक्षत्रयम् ॥ पूर्वेद्युरेव निशीथे योगो यथा १ सप्तमी ४० तद्दिने कृत्तिका ३५ अष्टमी ४६ तद्दिने रोहिणी ३६ अत्र पूर्वविद्धैवाष्टम्युपोष्या परदिने एव निशीथयोगो यथा २ सप्तमी ४२ तद्दिने कृत्तिका ५० अष्टमी ४७ रोहिणी ४६ अत्र परैवाष्टमी ग्राह्या ॥ दिनद्वये निशीथेष्टमीरोहिण्योर्योगो यथा ३ सप्तमी ४२ कृत्तिका ४३ अष्टमी ४७ रोहिणी ४८ अत्र परैवाष्टमी ग्राह्या ॥ अथ रोहिणीयुताष्टम्यामेव दिनद्वयेपि निशीथे रोहिणीयोगाभावो बहुधा संभवति ॥ परेद्युरेव निशीथव्यापिनी अष्टमी परेद्युरेव निशीथादन्यत्र रोहिणीयुक्ता चेत्येकः पक्षः यथा सप्तमी ४७ अष्टमी ५० अष्टमीदिने कृत्तिका ४६ अत्र पक्षे परैवाष्टमी ग्राह्या ॥ १ ॥ एतत्तुल्ययुक्त्या पूर्वेद्युरेव निशीथव्यापिनी पूर्वेद्युरेव निशीथादन्यत्र रोहिणीयुतेति पक्षेपि पूर्वैव ग्राह्या ॥ दिनद्वयेपि निशीथादन्यत्र रोहिणीयुता परेद्युरेव निशीथव्यापिनीति द्वितीयः पक्षः ॥ समप्तमी ४८ तद्दिने कृत्तिका ३० अष्टमी ४८ रोहिणी २५ अत्रापि परैव ग्राह्या ॥ २ ॥ दिनद्वयेपि निशीथादन्यत्र रोहिणीयुक्ता पूर्वेद्युरेव निशीथव्यापिनी तृतीयो यथा सप्तमी २५ कृत्तिका ४८ अष्टमी २० रोहिणी ४३ अत्रापि परैव ॥ ३ ॥ रोहिणीयोगसाम्येपि

पूर्वत्र सप्तमीविद्धत्वात् ॥ यथा वाष्टमी ६० । ४ कृत्तिका ५० अत्र पूर्वैव ग्राह्या ॥ अहोरात्रद्वये रोहिणीयोगसाम्येपि पूर्वस्याः शुद्धत्वात्पूर्णव्याप्तेश्च ॥ दिनद्वयेपि निशीथव्यापिनी परेद्युरेव निशीथादन्यत्र रोहिणायुतेति चतुर्थः ॥ यथा सप्तमी ४३ अष्टमी ४९ कृत्तिका ४६ अत्र परैवाष्टमी ॥ ४ ॥ एवं दिनद्वयेपि निशीथव्यापिनी पूर्वत्रैव निशीथादन्यत्र रोहिणीयुतेति पंचमो यथा सप्तमी ४१ तद्दिने रोहिणी ४३ अष्टमी ४७ अत्र पूर्वैवाष्टम्युपोष्या ॥ ५ ॥ दिनद्वयेपि निशीथव्यापिनी दिनद्वयेपि निशीथादन्यत्र रोहिणीयुतेति षष्ठो यथा सप्तमी ४२ कृत्तिका४८ अष्टमी ४९ रोहिणी ४२ अत्र परैव ॥ ६ ॥ दिनद्वयेपि निशीथव्यापिनी पूर्वेद्युरेव निशीथादन्यत्र रोहिणीयुतेति सप्तमो यथा सप्तमी ४८ तद्दिने रोहिणी ५८ अष्ट-

४२ अत्र परैवाष्टमी ग्राह्या ॥ ७ ॥ अत्रैव पक्षे परेद्युरेवोभयत्र वा निशीथादन्यत्र रोहिणीयोगेपि परैवेति कैमुत्येन सिद्धम् ॥ पूर्वेद्युरेव निशीथव्यापिनी परेद्युरेव निशीथादन्यत्र रोहिणीयुतेति चरमः पक्षः ॥ यथा सप्तमी ३० अष्टमी २५ तद्दिने कृत्तिका ५ यथा वाष्टमी ६० । ४ अष्टमीशेषदिने कृत्तिका १ अत्रोदाहरणद्वयेपि परैवाष्टमी ग्राह्या स्वल्पस्यापि रोहिणीयोगस्य प्राशस्त्येन मुहूर्त्तमात्राया अपि परस्या ग्राह्यतया पूर्वत्र विद्यमानाया निशीथव्याप्तेरनादरात् ॥ ८ ॥ सर्वपक्षेषु यदि परदिने मुहूर्तन्यूना वर्तते तदा सा न ग्राह्या किंतु पूर्वैवेति पुरुषार्थचिंतामणावुक्तम् ॥ परेद्युरेव निशीथव्यापिनी पूर्वेद्युरेव निशीथादन्यत्र रोहिणीयुता यथा सप्तमी ४८ रोहिणी ५५ अष्टमी ४८ अत्र परैव ॥ विद्धायां निशीथोत्तरं रोहिणीयोगस्याप्रयोजकत्वात् ॥ अत्र विस्तरेणोक्तानां बहुपक्षाणां संक्षेपेण निर्णयसंग्रहः पुरुषार्थचिंतामणौ ॥ शुद्धसमायां शुद्धन्यूनायां वा विद्धसमायां विद्धन्यूनायां वा केवलाष्टम्यां संदेह एव नास्ति ॥ शुद्धाधिकापि केवलाष्टमी पूर्वैव ॥ विद्धाधिका तु पूर्वदिन एव निशीथव्याप्तौ पूर्वा ॥ दिनद्वये निशीथव्याप्ताव्याप्तौ वा परैवेति ॥ अथ रोहिणीयोगे यदि शुद्धसमायां शुद्धन्यूनायां वा ईषदपि रोहिणीयोगस्तदा न संदेहः ॥ शुद्धाधिकायां पूर्वदिने दिनद्वयेपि वा रोहिणीयोगे पूर्वैव ॥ शुद्धाधिकायामुत्तरदिन एव रोहिणीयोगे मुहूर्त्तमात्रा परैव ॥ विद्धाधिकायां पूर्वदिन एव निशीथात्पूर्वं निशीथे वा रोहिणीयोगे पूर्वा ॥ दिनद्वयेपि परत्रैव वा निशीथे वा निशीथं विहाय रोहिणीयोगे परैवेति संक्षेपेण निर्णयसंग्रहः ॥ एवं कौस्तुभादिनवीनग्रंथानुसृतमाधवमतानुसारेण जन्माष्टमी निर्णीता ॥ अत्र केचित्केवलाष्टमी जन्माष्टमी सैव रोहिणीयुता जयन्ती संज्ञकेति जयन्त्यष्टम्योर्व्रतैक्यमाहुः ॥ अन्ये तु जन्माष्टमीव्रतं जयन्तीव्रतं च भिन्नं रोहिणीयोगाभावे जयन्तीव्रतलोपाज्जन्माष्टमीव्रतमेव कार्यम् ॥ "यस्मिन्वर्षे जयन्त्याख्ययोगो जन्माष्टमी तदा ॥ अन्तर्भूता जयन्त्यां स्यात् " इति जयन्तीदिने निशी-

थाख्यकर्मकालेऽष्टम्याद्यभावेपि साकल्यवचनापादितकर्मकालव्याप्तिमादाय व्रतद्वयमपि जयन्तीदिन एव तन्त्रेणानुष्ठेयम् ॥ व्रतद्वयस्याप्यकरणे महादोषश्रवणेन फलश्रवणेन च नित्यकाम्योभयरूपत्वात् ॥ न तु निशीथव्याप्तायां पूर्वाष्टम्यां जन्माष्टमीव्रतं कृत्वा ॥ जयन्तीदिने पारणमनुष्ठेयं नित्यव्रतलोपे प्रत्यवायापातादित्याहुः ॥ निर्णयसिंधौ तूक्तरीत्या माधवमतमुपपाद्य हेमाद्रिमतेन जन्माष्टमीव्रतमेव नित्यं जयंतीव्रतं तु नित्यमपि कलियुगे लुप्तमिति केचिन्नानुतिष्ठंतीत्युक्त्वा स्वमतेन यस्मिन्वर्षे पूर्वदिने एव निशीथेष्टमी परदिन एव निशीथादन्यत्र जयत्याख्ययोगस्तत्रोपोषणद्वयं कार्यम् ॥ व्रतद्वयस्यापि नित्यत्वेनाकरणे दोषाज्जयंत्यामष्टम्यंतर्भावोक्तिस्तु मूर्खप्रतारणमात्रमिति प्रतिपादितम् ॥ मम तु कौस्तुभादिनवीनग्रंथपरिगृहीतमाधवमतरीत्या जयंत्यंतर्भावेनाष्टमीव्रतानुष्ठानमेव युक्तं प्रतिभाति ॥ अत्र व्रते बुधसोमवारयोगः प्राशस्त्यविधायको न तु रोहिणीवन्निर्णायकः ॥

## अथात्र पारणानिर्णयः ।

अथ द्वितीयदिने भोजनरूपं पारणं व्रतांगं विहितं तत्कालो निर्णीयते ॥ केवलतिथ्युपवासे तिथ्यंते नक्षत्रयुक्ततिथ्युपवास उभयांते पारणं कार्यम् ॥ यदि तिथिनक्षत्रयोरेकतरांतो दिने लभ्यते उभयांतस्तु रात्रौ तदा दिवैवान्यतरांते पारणम् ॥ यदा दिवा नैकस्याप्यंतस्तदा निशीथादर्वागन्यतरांते उभयांते वा पारणम् ॥ यदा तु निशीथाव्यवहितपूर्वक्षणे एकतरांत उभयांतो वा तदा निशीथेपि पारणं कार्यम् ॥ भोजनासंभवे पारणासंपत्त्यर्थं फलाद्याहारो विधेयः ॥ केचित्तूक्तविषये निशीथे पारणं न कार्यं किंतूपवासात्तृतीयेह्नि दिवा कार्यमित्याहुस्तन्न युक्तम् ॥ अशक्तस्त्वेकतरांताभावेप्युत्सवांते प्रातरेव देवपूजाविसर्जनादि कृत्वा पारणं कुर्यात् ॥

## अथ संक्षेपेण व्रतविधिः ।

प्रातः कृतनित्यक्रियः प्राङ्मुखो देशादि संकीर्त्य तत्काले सप्तम्यादिसत्त्वेपि प्रधानभूताष्टमीमेव संकीर्त्य श्रीकृष्णप्रीत्यर्थं जन्माष्टमीव्रतं करिष्ये ॥ जयंतीयोगसत्त्वे जन्माष्टमीव्रतं जयंतीव्रतं च तन्त्रेण करिष्ये इति संकल्पयेत् ॥ ताम्रपात्रे जलं गृहीत्वा ॥ "वासुदेवं समुद्दिश्य सर्वपापप्रशांतये ॥ उपवासं करिष्यामि जन्माष्टम्यां नभस्यहम् ॥" अशक्तौ फलानि भक्षयिष्यामीत्याद्यूहः ॥ "आजन्म मरणं यावद्यन्मया दुष्कृतं कृतम् ॥ तत्प्रणाशय गोविंद प्रसीद पुरुषोत्तम" इति पात्रस्थं जलं क्षिपेत् ॥ ततः सुवर्णरजतादिमय्यो मृन्मय्यो वा भित्त्यादिलिखिता वा प्रतिमा यथाकुलाचारं कार्याः ॥ ता यथा पर्यंके प्रसुप्तदेवक्याः स्तनं पिबंतीं श्रीकृष्णप्रतिमां निधाय जयंतीसत्त्वे त्वन्यदेवक्या उत्संगे द्वितीयां श्रीकृष्णमूर्तिं

निधाय पर्यंकस्थदेवकीचरणसंवाहनपरां लक्ष्मीं निधाय भित्त्यादौ खड्गधरं वसुदेवं नन्दगोपीगोपाँल्लिखित्वा प्रदेशांतरे मंचके प्रसूतकन्यया सह यशोदाप्रतिमां पीठांतरे वसुदेवदेवकीनंदयशोदाश्रीकृष्णरामचंडिका इति सप्त प्रतिमाः स्थापयेत् ॥ एतावत्प्रतिमाकरणाशक्तौ वसुदेवादिचंडिकांताः सप्त वा यथाचारं यथाशक्ति वा कृत्वा अन्याः सर्वा यथायथं ध्यायेदिति भाति ॥ निशीथासन्नप्राक्काले स्नात्वा श्रीकृष्णप्रीत्यर्थं सपरिवारश्रीकृष्णपूजां करिष्ये इति संकल्प्य न्यासान् शंखादिपूजांतं नित्यवत्कृत्वा॥"पर्यंकस्थां किंनराद्यैर्युतां ध्यायेत्तु देवकीम्॥ श्रीकृष्णं बालकं ध्यायेत्पर्यंके स्तनपायिनम्॥श्रीवत्सवक्षसं शांतं नीलोत्पलदलच्छविम्॥संवाहयंती देवक्याः पादौ ध्यायेच्च तां श्रियम्॥" एवं ध्यात्वा देवक्यै नमः इति देवकीमावाह्य मूलमंत्रेण पुरुषसूक्तऋचा वा श्रीकृष्णाय नमः श्रीकृष्णमावाहयामीत्यावाह्य लक्ष्मीं चावाह्य देवक्यै वसुदेवाय यशोदायै नंदाय श्रीकृष्णाय रामाय चंडिकायै इति नाम्नावाह्य लिखितादिदेवताः सकलपरिवारदेवताभ्यो नम इत्यावाह्य मूलेन सूक्तऋचा वात्रावाहितदेवक्यादिपरिवारसहितश्रीकृष्णाय नम इत्यासनपाद्यार्घ्याचमनीयाभ्यंगस्नानानि दत्त्वा पंचामृतस्नानांते चंदनेनानुलेपयेत् ॥ शुद्धोदकाभिषेकांते वस्त्रयज्ञोपवीतगंधपुष्पाणि धूपदीपौ च ॥ "विश्वेश्वराय विश्वाय तथा विश्वोद्भवाय च ॥ विश्वस्य पतये तुभ्यं गोविंदाय नमोनमः ॥ यज्ञेश्वराय देवाय तथा यज्ञोद्भवाय च ॥ यज्ञानां पतये नाथ गोविंदाय नमोनमः" इति मंत्राभ्यां मूलमंत्रादिसमुच्चिताभ्यां दद्यात्॥ "जगन्नाथ नमस्तुभ्यं संसारभयनाशन ॥ जगदीश्वराय देवाय भूतानां पतये नमः" इति नैवेद्यम् ॥ मूलमंत्रादिकं सर्वत्र योज्यम् ॥ तांबूलादि नमस्कारप्रदक्षिणापुष्पांजल्यंतं कार्यम् ॥ अथोद्यापनप्रकरणोक्तविधिना पूजा ॥ सा यथा उक्तप्रकारेण ध्यानावाहने कृत्वा ॥ "देवा ब्रह्मादयो ये च स्वरूपं न विदुस्तव ॥ अतस्त्वां पूजयिष्यामि मातुरुत्सङ्गवासिनम्"॥ पुरुष एवेदमासनम्॥ "अवतारसहस्राणि करोषि मधुसूदन ॥ न ते संख्यावताराणां कश्चिज्जानाति तत्त्वतः" ॥ एतावानस्येति पाद्यम् ॥ "जातः कंसवधार्थाय भूभारोत्तारणाय च ॥ देवानां च हितार्थाय धर्मसंस्थापनाय च ॥ कौरवाणां विनाशाय पांडवानां हिताय च ॥ गृहाणार्घ्यं मया दत्तं देवक्या सहितो हरे" ॥ त्रिपादूर्ध्व इत्यर्घ्यम् ॥ "सुरासुरनरेशाय क्षीराब्धिशयनाय च ॥ कृष्णाय वासुदेवाय ददाम्याचमनं शुभम्" ॥ तस्माद्विराडित्याचमनीयम् ॥ "नारायण नमस्तेस्तु नरकार्णवतारक ॥ गंगोदकं समानीतं स्नानार्थं प्रतिगृह्यताम्" ॥ यत्पुरुषेणेति स्नानम् ॥ "पयोदधिघृतक्षौद्रशर्करास्नानमुत्तमम् ॥ तृप्त्यर्थं देवदेवेश गृह्यतां देवकीसुत"इति पंचामृतम्॥ शुद्धोदकस्नानमाचमनम् ॥ "क्षौमं च पट्टकूलं च मयानीतांशुकं शुभम् ॥ गृह्यतां देवदेवेश मया दत्तं सुरोत्तम" ॥ तं यज्ञमिति वस्त्रम् ॥ " नमः कृष्णाय देवाय शंखचक्रधराय च ॥

ब्रह्मसूत्रं जगन्नाथ गृहाण परमेश्वर" ॥ तस्माद्यज्ञादिति यज्ञोपवीतम् ॥ "नानागंधसमायुक्तं चंदनं चारुचर्चितम् ॥ कुंकुमाक्ताक्षतैर्युक्तं गृह्यतां परमेश्वर" ॥ तस्माद्यज्ञात्सर्वहुतऋचेति गंधम् ॥ "पुष्पाणि यानि दिव्यानि पारिजातोद्भवानि च ॥ मालतीकेसरादीनि पूजार्थं प्रतिगृह्यताम्" ॥ तस्मादश्वा इति पुष्पम् ॥ अथांगपूजा ॥ श्रीकृष्णाय नमः पादौ पूजयामि ॥ संकर्षणाय० गुल्फौ पूजयामि ॥ कालात्मने नमः जानुनी पू० ॥ विश्वकर्मणे नमः जंघे पू० ॥ विश्वनेत्राय० कटिं पू० ॥ विश्वकर्त्रे नमः मेढ्रं पू० ॥ पद्मनाभाय० नाभिं पू० ॥ परमात्मने नमः हृदयं पू० ॥ श्रीकंठाय० कंठं पू० ॥ सर्वास्त्रधारिणे नमः बाहू पू० ॥ वाचस्पतये नमः मुखं पूजयामि ॥ केशवाय० ललाटं पू० ॥ सर्वात्मने० शिरः पू० ॥ विश्वरूपिणे नारायणाय नमः सर्वांगं पूजयामि ॥ वनस्पतिरसो० यत्पुरुषं० धूपम् ॥ "त्वं ज्योतिः सर्वदेवानां तेजस्त्वं तेजसां परम् ॥ आत्मज्योतिर्नमस्तुभ्यं दीपोयं प्रतिगृह्यताम्०" ॥ ब्राह्मणोस्य० दीपम् ॥ "नानागंधसमायुक्तं भक्ष्यभोज्यं चतुर्विधम् ॥ नैवेद्यार्थं मया दत्तं गृहाण परमेश्वर" ॥ चंद्रमाम० नैवेद्यम् ॥ आचमनं करोद्धर्त्तनम् ॥ "तांबूलं च सकर्पूरं पूगीफलसमन्वितम् ॥ मुखवासकरं रम्यं प्रीतिदं प्रतिगृह्यताम्" ॥ तांबूलम् ॥ "सौवर्णं राजत ताम्रं नानारत्नसमन्वितम् ॥ कर्मसाद्गुण्यसिद्ध्यर्थं दक्षिणा प्रतिगृह्यताम् ॥ रंभाफलं नालिकेरं तथैवाम्रफलानि च ॥ पूजितोसि सुरश्रेष्ठ गृह्यतां कंससूदन" ॥ नाभ्या आसी० नीराजनम् ॥ यानि कानि० सप्तास्यासन्० प्रदक्षिणाम् ॥ यज्ञेनेत्यादिवेदमंत्रैः पुष्पांजलिम् ॥ नमस्कारान् ॥ अपराधस० पूजां निवेदयेत् ॥

## अथ चंद्रार्घ्यदानमंत्रः ।

सर्वोपचारपूजनसमाप्तौ द्वादशांगुलविस्तारं रौप्यमयं स्थंडिलादि लिखितं वा रोहिणीयुतं चंद्रम् ॥ "सोमेश्वराय सोमाय तथा सोमोद्भवाय च ॥ सोमस्य पतये नित्यं तुभ्यं सोमाय वै नमः" ॥ इति संपूज्य सपुष्पकुशचंदनं तोयं शंखेनादाय ॥ "क्षीरोदार्णवसंभूत अत्रिगोत्रसमुद्भव ॥ गृहाणार्घ्यं शशांकेदं रोहिण्या सहितो मम ॥ ज्योत्स्नापते नमस्तुभ्यं ज्योतिषां पतये नमः ॥ नमस्ते रोहिणीकांत अर्घ्यं नः प्रतिगृह्यताम् ॥" इति मंत्राभ्यां चंद्रायार्घ्यं दद्यात् ॥ ततः श्रीकृष्णायार्घ्यं दद्यात् ॥ तत्र मंत्रः ॥ "जातः कंसवधार्थाय भूभारोत्तारणाय च ॥ पांडवानां हितार्थाय धर्मसंस्थापनाय च ॥ कौरवाणां विनाशाय दैत्यानां निधनाय च ॥ गृहाणार्घ्यं मया दत्तं देवक्या सहितो हरे" इति ॥ ततः प्रार्थयेत् ॥ "त्राहि मां सर्वलोकेश हरे संसारसागरात् ॥ त्राहि मां सर्वपापघ्न दुःखशोकार्णवात्प्रभो ॥ सर्वलोकेश्वर त्राहि पतितं मां भवार्णवे ॥ त्राहि मां सर्वदुःखघ्न रोगशोकार्णवाद्धरे ॥ दुर्गतां-

स्त्रायसे विष्णो ये स्मरंति सकृत्सकृत् ॥ त्राहि मां देवदेवेश त्वत्तो नान्योस्ति रक्षिता ॥ यद्वा कचन कौमारे यौवने यच्च वार्धके ॥ तत्पुण्यं वृद्धिमायातु पापं दह हलायुध" इति ॥

## अथ कीर्तनविधिः ।

अथ पूजानंतरकृत्यमग्निपुराणे ॥ "इत्येवं पूजयित्वा तु पुरुषसूक्तैः सवैष्णवैः ॥ स्तुत्वा वादित्रनिर्घोषैर्गीतवादित्रमंगलैः ॥ सुकथाभिर्विचित्राभिस्तथा प्रेक्षणकैरपि ॥ पूर्वेतिहासैः पौराणैः क्षिपेत्तां शर्वरीं नृप" इति ॥ अत्र कथासु वैचित्र्यं देशभाषाकाव्यकृतम् ॥ सूक्तानां प्रागुक्तैः पुराणकथानामंतेऽभिधानात् ॥ प्रेक्षणकानि नृत्यादीनि ॥ तथा च वैदिकसूक्तकरणकस्तुतिविशिष्टः पौराणेतिहासमिश्रितो गीतनृत्ययुतदेशभाषाकाव्यप्रमुखकथाकरणको जागरो विप्रादिवर्णत्रयस्य विधीयते ॥ शूद्रादीन्प्रति एतादृशजागरस्य विधातुमयोग्यत्वाद्भचनांतरेण तु सूक्तादिरहितगीतादिविशिष्टो वर्णचतुष्टयसाधारणो विधीयते ॥ गोकुलस्थजन्मलीलादिश्रवणोत्तरं वैष्णवैः परस्परं दध्यादिभिः सेचनं कार्यम् ॥ "दधिक्षीरघृतांबुभिः । आसिंचंतो विलिंपंतो" इत्यादि श्रीभागवतवचनेन तथाविधिकल्पनात् ॥ अयमुत्सवोऽधुना महाराष्ट्रदेशे गोपालकालेति व्यवह्रियत इति मे भाति ॥ एतत्सर्वं कौस्तुभे श्रीमदनंतदेवैः स्पष्टीकृतमस्तीति न मद्यमसूया कार्या॥ एतादृशकथायुतो जागरोन्यत्र रामनवम्येकादश्याद्युत्सवेष्वप्यूह्यः ॥ पूजाजागरादिविशिष्टव्रतोत्सवसाम्यात् ॥ महाराष्ट्रीयेषु तथाचाराच्च ॥ भगवत्प्रेमादिभाग्यशालिनस्तु 'पर्वणि स्युरुतान्वहम्'इति न्यायेन प्रत्यहमेवोक्तविधकथोत्सवं कुर्वतीति भाति ॥ ततो नवम्यां ब्राह्मणान्भोजनदक्षिणादिभिः संतोष्योक्तपारणानिर्णीते काले भोजनं कुर्यात् ॥

## अथ प्रतिमासं जन्माष्टमी ।

अस्यैव जयंतीव्रतस्य संवत्सरसाध्यः प्रयोगः श्रावणकृष्णाष्टमीमारभ्य प्रतिमासं कृष्णाष्टम्यामुक्तविधिना पूजादिरूपः पुराणांतरे उक्तः ॥ अत्रोद्यापनविधिर्ग्रंथांतरे ज्ञेयः ॥ ॥ इति जन्माष्टमीनिर्णयोदेशः ॥

## अथ श्रावणदर्शे दर्भग्रहणम् ।

"नभोमासस्य दर्शे तु शुचिर्दर्भान् समाहरेत् ॥ अयातयामास्ते दर्भा विनियोज्याः पुनःपुनः" ॥ केचिद्भाद्रामायां दर्भग्रहणमाहुः ॥

## अथ दर्भभेदा दश ।

"कुशाः काशा यवा दूर्वा उशीराश्च सकुंदकाः ॥ गोधूमा व्रीहयो मुञ्जा दश दर्भाः सबल्वजाः ॥ विरिंचिना सहोत्पन्न परमेष्ठिनिसर्गज ॥ नुद सर्वाणि पापानि

दर्भं स्वस्तिकरो भव ॥ एवं मंत्रं समुच्चार्य ततः पूर्वोत्तरामुखः ॥ हुंफट्कारेण मंत्रेण सकृच्छित्त्वा समुद्धरेत् ॥" चतुर्भिर्दर्भैर्विप्रस्य पवित्रकं क्षत्रियादेरेकैकं न्यूनम् ॥ "सर्वेषां वा भवेद्वाह्यां पवित्रं ग्रंथितं न वा" ॥ ॥ इति श्रीमदनंतोपाध्यायसूनुकाशीनाथोपाध्यायविरचिते धर्मसिंधुसारे श्रावणमासनिर्णयोद्देशः ॥

## कन्यासंक्रांतिः ॥

तत्र कन्यासंक्रांतौ पराः षोडश नाड्यः पुण्यकालः ॥

## अथ मासकृत्यम् ।

भाद्रपदमासे एकान्नाहारव्रताद्धनारोग्यादिफलम् ॥ अत्र मासे हृषीकेशप्रीत्यर्थं गुडौदनलवणादेर्दानम् ॥

## अथ हरितालिकाव्रतम् ।

भाद्रपदशुक्लतृतीयायां हरितालिकाव्रतम् ॥ तत्र मुहूर्तमात्रा ततो न्यूनापि परा ग्राह्या ॥ यदा क्षयवशात्परदिने नास्ति तदा द्वितीययुतापि ग्राह्या ॥ यदा तु शुद्धाधिका तदा पूर्वदिने षष्टिघटिकामितामपि त्यक्त्वा परदिने स्वल्पापि चतुर्थीयुतैव ग्राह्या ॥ गणयोगप्राशस्त्यात् ॥ अत्र व्रते भवानीशिवयोः पूजनमुपवासश्च स्त्रीणां नित्यः ॥ तत्र ॥ "मंदारमालाकुलितालकायै कपालमालांकितशेखराय ॥ दिव्यांबरायै च दिगंबराय नमः शिवायै च नमः शिवाय" ॥ इत्यादयः पूजामंत्रा ज्ञेयाः ॥

## अथ विनायकचतुर्थीव्रतम् ।

शुक्लचतुर्थ्यां सिद्धिविनायकव्रतम् ॥ सा मध्याह्नव्यापिनी ग्राह्या ॥ दिनद्वये साकल्येन मध्याह्नव्याप्तावव्याप्तौ वा पूर्वा ॥ दिनद्वये साम्येन वैषम्येण वैकदेशव्याप्तावपि पूर्वैव ॥ वैषम्येण व्याप्तावधिकव्यापिनी चेत्परेति केचित् ॥ पूर्वदिने सर्वथा मध्याह्नस्पर्शो नास्त्येव परदिने एव मध्याह्नस्पर्शिनी तदैव परा ॥ पूर्वदिने एकदेशेन मध्याह्नव्यापिनी परदिने संपूर्णमध्याह्नव्यापिनी तदा परैव एवं मासांतरेपि निर्णयः ॥ इयं रविभौमवारयोगे प्रशस्ता ॥

## अथात्र चंद्रदर्शननिषेधः ।

अत्र चतुर्थ्यां चंद्रदर्शने मिथ्याभिदूषणं दोषस्तेन चतुर्थ्यामुदितस्य पंचम्यां दर्शनं विनायकव्रतादिनेपि न दोषाय पूर्वदिने सायाह्नमारभ्य प्रवृत्तायां चतुर्थ्यां विनायकव्रताभावेपि पूर्वेद्युरेव चंद्रदर्शने दोष इति सिध्यति ॥ चतुर्थ्यामुदितस्य न दर्शनमिति पक्षे त्ववशिष्टपंचषण्मुहूर्तमात्रचतुर्थीदिनेपि निषेधापत्तिः ॥ इदानीं

लोकास्त्वेकतरपक्षाश्रयेण विनायकव्रतादिने एव चंद्रं न पश्यंति न तूदयकाले दर्शनकाले वा चतुर्थीसत्त्वासत्त्वे नियमेनाश्रयंति ॥

## अथ चंद्रदर्शने मंत्रजपः ।

दर्शने जाते तद्दोषशांतये ॥ "सिंहः प्रसेनमवधीत्सिंहो जांबवता हतः ॥ सुकुमारक मारोदीस्तव ह्येष स्यमंतकः" इति श्लोकजपः कार्यः ॥

## अथ गणेशपूजा ।

तत्र मृन्मयादिमूर्तौ प्राणप्रतिष्ठापूर्वकं विनायकं षोडशोपचारैः संपूज्यैकमोदकेन नैवेद्यं दत्त्वा सगंधा एकविंशतिदूर्वा गृहीत्वा ॥ गणाधिपायोमापुत्रायाघनाशनाय विनायकायेशपुत्राय सर्वसिद्धिप्रदायकायैकदंतायेभवक्त्राय मूषकवाहनाय कुमारगुरवे इति दशनामभिर्दूर्वयोर्द्वयंद्वयं समर्प्यावशिष्टामेकां दूर्वामुक्तदशनामभिः समर्पयेत् ॥ दश मोदकान्विप्राय दत्त्वा दश स्वयं भुंजीतेति संक्षेपः ॥

## अथ ऋषिपंचमीनिर्णयः ।

भाद्रशुक्लपंचमी ऋषिपंचमी सा मध्याह्नव्यापिनी ग्राह्या ॥ दिनद्वये मध्याह्नव्याप्तौ तदव्याप्तौ च पूर्वैव ॥ अत्र ऋषीन्पूजयित्वा कर्षणादिरहितभूमिजन्यशाकाहारं कुर्यात् ॥ "शुक्ले भाद्रपदे षष्ठ्यां स्नानं भास्करपूजनम् ॥ प्राशनं पंचगव्यस्य अश्वमेधफलाधिकम्" ॥ इयं सूर्यषष्ठी सप्तमीयुता ग्राह्या ॥ अस्यामेव स्वामिकार्तिकेयदर्शनाद्ब्रह्महत्यादिपापनाशः ॥

## अथ दूर्वाष्टमीव्रतम् ।

भाद्रशुक्लाष्टमी दूर्वाष्टमी सा पूर्वा ग्राह्या ॥

## अथ ज्येष्ठादेवीपूजानिर्णयः ।

इयं ज्येष्ठा मूलर्क्षयुता त्याज्या ॥ अलाभे तद्युक्तापि ग्राह्या॥ इदं दूर्वापूजनव्रतं कन्यार्केऽगस्त्योदये च वर्ज्यम् ॥ इदं स्त्रीणां नित्यम् ॥ अत्र ज्येष्ठादेवीपूजाव्रतं केवलाष्टमीप्राधान्येन केवलज्येष्ठानक्षत्रप्राधान्येन चोक्तम्॥तत्र दाक्षिणात्याः केवलज्येष्ठानक्षत्र एव कुर्वंति ॥ तच्चानुराधायामावाहनं ज्येष्ठायां पूजनं मूले विसर्जनमिति त्रिदिनं ज्ञेयम् ॥ आवाहनविसर्जनदिनयोः पूजनदिनानुरोधेन निर्णयः ॥ तत्र यदा पूर्वमध्याह्नमारभ्य प्रवृत्ता ज्येष्ठा द्वितीयादिने मध्याह्ने मध्याह्नात्पूर्वं वा समाप्यते तदा पूर्वदिने एव पूजनं यदा पूर्वदिने मध्याह्नोत्तरं प्रवृत्ता परदिने मध्याह्ने समाप्ता तदाष्टमीयोगवशेन पूर्वा परा वा ग्राह्या॥ उभयत्राष्टमीयोगे पूर्वैव॥ यदा पूर्वत्र मध्याह्नमारभ्य मध्याह्नोत्तरं वा प्रवृत्ता परदिने मध्याह्नोत्तरमपराह्णं स्पृशति तदाष्टमीयोगाभावेपि परैव ॥

## अथ विष्णुपरिवर्त्तनोत्सवः ।

भाद्रपदशुक्लैकादश्यां द्वादश्यां वा पारणोत्तरं विष्णुपरिवर्त्तनोत्सवः ॥ तत्र ॥ 'श्रुतेश्च मध्ये परिवर्तमेति' इति वचनात्त्रेधा विभक्तश्रवणमध्यभागयोगस्यैकादश्यां सत्त्वे तत्रैव द्वादश्यां सत्त्वे द्वादश्यामेव उभयत्र नक्षत्रयोगाभावे द्वादश्यामेवेत्यादि व्यवस्था ज्ञेया ॥ तत्र संध्यायां विष्णुं संपूज्य ॥ "वासुदेव जगन्नाथ प्राप्तेयं द्वादशी तव ॥ पार्श्वेन परिवर्तस्व सुखं स्वपिहि माधव" इति मंत्रेण प्रार्थयेत् ॥

## अथ श्रवणद्वादशीनिर्णयः ।

अथ श्रवणद्वादशीव्रतम् ॥ तत्र यत्र दिने मुहूर्तमात्रादिः स्वल्पोपि द्वादश्याः श्रवणयोगस्तत्रोपोषणम् ॥ उत्तराषाढाविद्धश्रवणनिषेधवाक्यानि तु निर्मूलानि ॥ यदा पूर्वदिने एकादशीविद्धा द्वादशी परदिनेऽनुवर्तते दिनद्वयेपि च श्रवणयोगस्तदा पूर्वदिने एकादशी द्वादशी श्रवणेति त्रितययोगरूपविष्णुशृंखलयोगात्पूर्वैवोपोष्या ॥ तत्रोदाहरणम् ॥ एकादशी १८ उत्तराषाढा ६ द्वादशी २० श्रवण १२ यथावा एकादशी १८ उत्तराषाढा २५ द्वादशी २० श्रवण १८ अत्र द्वितीयोदाहरणे एकादश्याः श्रवणयोगाभावेपि श्रवणयुक्तद्वादशीस्पर्शमात्रेण विष्णुशृंखलयोगः ॥ द्विविधोप्ययं योगो दिवैव ग्राह्यो न तु रात्रौ इति पुरुषार्थचिंतामणौ ॥ रात्रावपि निशीथोत्तरमपि योगो ग्राह्य इति निर्णयसिंधुः ॥ रात्रेः प्रथमप्रहरपर्यंतं तिथ्योः श्रवणयोगो ग्राह्यो न द्वितीयप्रहरादावित्यपरे ॥ अत्र चरमपक्ष एव युक्तो भाति ॥ अत्र विष्णुशृंखलयोगे व्रतद्वयोपोषणं तंत्रेणैकादश्यामेव कृत्वा द्वादश्यां वक्ष्यमाणपारणानिर्णयानुसारेण पारणं कार्यम् ॥ यदोक्तविष्णुशृंखलयोगो नास्ति तदा यदि शुद्धाधिकाद्वादशीदिनद्वयेपि श्रवणयोगः पूर्वदिने चोदये श्रवणाभावस्तदोत्तरैव ग्राह्या ॥ यदोभयदिने सूर्योदये द्वादश्यां श्रवणयोगस्तदा पूर्वैव ॥ विद्धाधिकायामपि परत्रैवोदये उदयोत्तरं वा श्रवणयोगे परैवेति निर्विवादम् ॥ उभयत्र श्रवणयोगे उक्तविधविष्णुशृंखलयोगे पूर्वा अन्यथा परैवेति विज्ञेयम् ॥

## अथात्रोपवासनिर्णयः ।

एवं यत्रैकादशीश्रवणद्वादश्योर्नैरंतर्येणोपवासप्राप्तिस्तत्र शक्तेनोपवासद्वयं कार्यम् ॥ व्रतद्वयस्यापि नित्यत्वात् ॥ व्रतद्वयस्यैकदैवतत्वान्न पारणालोपदोषः ॥

## अथोपवासद्वयासामर्थ्ये ।

यस्तूपवासद्वयासमर्थ एकादशीव्रतसंकल्पात्पूर्वं च निजसामर्थ्यं निश्चिनोति तेनैकादश्यां फलाद्याहारं कृत्वा द्वादश्यां निरशनं कार्यम् ॥ न चैकादशीव्रतलोपः ॥

"उपोष्य द्वादशीं पुण्यां विष्णुऋक्षेण संयुताम् ॥ एकादश्युद्भवं पुण्यं नरः प्राप्नोत्यसंशयम्" ॥ इति नारदोक्तेः "श्रवणेन युता चेत्स्याद् द्वादशी सा हि वैष्णवैः ॥ स्मार्तैश्चोपोषणीया स्यात्त्यजेदेकादशीं तदा" ॥ इति माधवोक्तेश्च ॥ अत्रैकादशीत्यागपदेन फलाहारो बोध्यते न तु भोजनम् ॥ यस्तूपवासद्वयशक्तिभ्रमेण कृतैकादशीव्रतसंकल्पः ॥ संकल्पोत्तरं च द्वितीयोपवासासामर्थ्यमनुभवति तदा तेनैकादश्यामुपोष्य द्वादश्यां विष्णुपूजनं कृत्वा पारणं कार्यम् ॥ अत्र व्रतांगपूजनं कृतोपवाससमर्थ उपवासप्रतिनिधिरूपं विष्णुपूजनं करिष्य इति संकल्प्य पुनः पूजनं कुर्यात् ॥ अत्र द्वादश्यां श्रवणयोगाभावे एकादश्यां श्रवणयोगे तत्रैव श्रवणद्वादशीव्रतं कार्यम् ॥ विद्धैकादश्यां श्रवणयोगे तु येषां यत्रैकादशीव्रतप्राप्तिस्तेषां तंत्रेणोपवासद्वयसिद्धिः ॥ अन्येषां गृहीतश्रवणद्वादशीव्रतानामुपवासद्वयम् ॥ तत्राशक्तानां पूर्वेद्यु फलाहारः परेऽह्नि निरशनमिति भाति ॥

## अथ पारणानिर्णयः ।

उभयांते पारणं मुख्यः पक्षः ॥ अन्यतरांते गौणः पक्षः ॥ तत्र विष्णुशृंखलाभावे त्रयोदश्यामुभयांते पारणम् ॥ विष्णुशृंखलयोगे तु पूर्वदिने तंत्रेण कृतोपवासद्वयस्य परदिने श्रवणर्क्षाद्द्वादश्याधिक्ये श्रवणमतिक्रम्य द्वादश्यां पारणम् ॥ यदि च द्वादश्यपेक्षया श्रवणाधिक्यं पारणादिने भवति तदा एकादशीव्रतपारणायां द्वादश्युल्लंघने दोषोक्तेर्द्वादश्यामेव पारणम् ॥ न त्वन्यतरापेक्षा ॥ तत्र सति संभवे श्रवणमध्यभागं विंशत्यादिघटिकात्मकं त्यक्त्वा पारणम् ॥ यथैकादशी ३० उत्तराषाढा २९ द्वादशी २९ श्रवण २९ अत्र पूर्वेद्युस्तंत्रेणोपवासद्वयं कृत्वा परेऽह्नि श्रवणमध्यभागमवशिष्टं नवघटिकात्मकं त्यक्त्वा द्वादश्यां चरमे विंशतिघटीरूपे श्रवणभागे पारणम् ॥ एवमुक्तोदाहरणे एव एकादश्याः दशनाडिकात्वे द्वादश्या अष्टनाडिकात्वे द्वादशीश्रवणयोः पंचदशचत्वारिंशन्नाडिकात्वे वा श्रवणमध्यभागत्यागे द्वादश्युल्लंघनापत्तौ संगवकालं त्यक्त्वा मुहूर्तत्रयपर्यंतं सप्तममुहूर्तादौ वा ऋक्षमध्यभागे एवं भोक्तव्यम् ॥

## अथ मासांतरे श्रवणद्वादशी ।

अयं मध्यभागत्यागो भाद्रपदगतश्रवणद्वादशीव्रत एव ॥ न तु माघफाल्गुनमासकृष्णपक्षगतश्रवणद्वादशीव्रतपारणायाम् ॥ मासांतरगतश्रवणभागे विष्णुपरिवर्तनाभावात् ॥ ये तु भाद्रे श्रवणमध्यवर्जनमात्रेण निषेधचारितार्थ्यं मन्यमाना विष्णुशृंखलयोगाभावेपि श्रवणमध्यमात्रं त्यक्त्वा भुंजते ते नित्यश्रवणद्वादशीव्रतमाहात्म्यानभिज्ञा भ्रांता एव ॥ अयं सर्वोपि निर्णयो मासांतरगतश्रवणद्वादशीव्रतेष्यूह्यः ॥

## अत्र व्रते कृत्यम् ।

श्रवणद्वादशीव्रते नदीसंगमे स्नात्वा कलशे स्वर्णमयं जनार्दननामानं विष्णुं संपूज्य वस्त्रयज्ञोपवीतोपानहच्छत्रादि समर्प्योपोष्य पारणादिने दध्योदनयुतं वस्त्रवेष्टितं जलपूर्णघटं छत्रादियुतां पूजितां सपरिवारां तां प्रतिमां च दद्यात् ॥ तत्र मंत्रः ॥ "नमोनमस्ते गोविंद बुधश्रवणसंज्ञक ॥ अघौघसंक्षयं कृत्वा सर्वसौख्यप्रदो भव" ॥ इति ॥

## अथ वामनजयंती ।

भाद्रशुक्लद्वादश्यां श्रवणयुतायां मध्याह्ने वामनोत्पत्तिः ॥ अतो मध्यह्नव्यापिनी द्वादशी मध्याह्ने ततोन्यत्र काले वा श्रवणयुता ग्राह्या ॥ उभयदिने श्रवणयोगे पूर्वैव ॥ सर्वथा द्वादश्याः श्रवणयोगाभावे एकादश्यामेव श्रवणसत्त्वे मध्याह्नव्यापिनीमपि द्वादशीं विहायैकादश्यामेव व्रतं कार्यम् ॥ शुद्धैकादश्यां श्रवणाभावे दशमीविद्धैकादश्यामपि श्रवणयुतायां व्रतम् ॥ पूर्वदिन एव मध्याह्नव्यापिनी द्वादशी परदिने मध्याह्नादन्यत्र काले श्रवणयुता तदा पूर्वैव ॥ तिथिद्वयेपि श्रवणयोगाभावे द्वादश्यामेव मध्याह्नाव्यापिन्यां व्रतम् ॥ दिनद्वये मध्याह्नव्याप्तौ तदव्याप्तौ चैकादशीयुतैव ग्राह्या ॥ पारणा तु पूर्वोक्तरीत्योभयांतेन्यतरांते वा कार्या ॥ अत्र मध्याह्ने नदीसंगमे स्नात्वा सौवर्णं वामनं संपूज्यार्घ्यं सौवर्णपात्रेण दद्यात् ॥ तत्र पूजामंत्रः ॥ "देवेश्वराय देवाय देवसंभूतिकारिणे ॥ प्रभवे सर्वदेवानां वामनाय नमोनमः" ॥ अथार्घ्यमंत्रः ॥ "नमस्ते पद्मनाभाय नमस्ते जलशायिने ॥ तुभ्यमर्घ्यं प्रयच्छामि बालवामनरूपिणे ॥ नमः शार्ङ्गधनुर्बाणपाणये वामनाय च ॥ यज्ञभुक्फलदात्रे च वामनाय नमोनमः" ॥ ततः परदिने सपरिवारं वामनं द्विजाय दद्यात् ॥ "वामनः प्रतिगृह्णाति वामनोहं ददामि ते ॥ वामनः सर्वतोभद्रं द्विजाय प्रतिपादये" ॥ इति दानमंत्रः ॥

## अथ दधिव्रतं समाप्य पयोव्रतारंभः ।

अस्यामेव द्वादश्यां रात्रौ देवपूजां कृत्वा तत्रासंभवे दिवैव वा दधिव्रतं निवेद्य दधिदानं कृत्वा दुग्धव्रतसंकल्पं कुर्यात् ॥ अत्र पयोव्रते पयोविकारस्य पायसादेर्दुग्धपाचितान्नस्य च वर्जनम् ॥ दध्यादेः पयोविकारस्यापि न वर्जनम् ॥ एवं दधिव्रते तक्रादेर्न वर्जनम् ॥ यत्र प्रसूताया गोर्दशदिनेषु संधिन्यादेश्च क्षीरनिषेधस्तत्र क्षीरविकारस्य दधितक्रादेः सर्वस्यैव वर्जनम् ॥

## अथ भाद्रशुक्लचतुर्दश्यामनंतव्रतम् ।

तत्रोदये त्रिमुहूर्तव्यापिनी चतुर्दशी ग्राह्येति मुख्यः पक्षस्तदभावे द्विमुहूर्ता

ग्राह्येत्यनुकल्पः ॥ द्विमुहूर्तन्यूना तु पूर्वैव ग्राह्या ॥ दिनद्वये सूर्योदयव्यापित्वे संपूर्णत्वात्पूर्वैव ॥ अथ पूर्वाह्णो मुख्यः कर्मकालः ॥ तदभावे मध्याह्नोपि ॥ अत्र व्रते चतुर्दशग्रंथियुतदोरकेऽनंतपूजनादिविधिस्तदुद्यापनविधिश्च कौस्तुभादौ ज्ञेयः ॥

## अथ दोरकनाशे प्रायश्चित्तम् ।

पूजितदोरकनाशे तु गुरुं वृत्वा तदनुज्ञया यथाशक्ति कृच्छ्रादिप्रायश्चित्तं विधायाष्टोत्तरशतमाज्येन द्वादशाक्षरवासुदेवमंत्रेण हुत्वा केशवादिचतुर्विंशतिनामभिः सकृत्सकृत् हुत्वा होमशेषं समाप्य नूतनदोरके पूर्ववत्पूजनादि चरेत् ॥

## अथागस्त्योदयश्च ।

सूर्यस्य वृषभसंक्रमोत्तरं सप्तमदिनेऽगस्त्योस्तं प्रतियाति ॥ सिंहसंक्रांत्युत्तरमेकविंशतितमे दिने उदयमेति ॥ तत्र कंन्यासंक्रांतेः पूर्वसप्तदिनमध्येऽगस्त्यपूजनं तदर्घ्यादिकं कार्यम् ॥

## अथ प्रोष्ठपदीश्राद्धकृत्यम् ।

भाद्रपदपौर्णमास्यां प्रपितामहान्परान्पित्रादींस्त्रीन्त्सपत्नीकान्वसुरुद्रादित्यस्वरूपान् मातामहादित्रयं च सपत्नीकमुद्दिश्य श्राद्धं कार्यम् ॥ इदं पार्वणत्वादपराह्णे पुरूरवार्द्रवदेवयुक्तं सपिंडकं कार्यम् ॥ केचित्तु प्रपितामहस्य पित्रादित्रयमात्रमुद्दिश्य नांदीश्राद्धधर्मेण सत्यवसुदेवयुक्तं श्राद्धं कार्यं नात्र मातामहाद्युद्देश इत्याहुः ॥ इदं प्रोष्ठपदीश्राद्धं सकृन्महालयपक्षे सकलकृष्णपक्षव्यापिमहालयपक्षे चावश्यकम् ॥ पंचम्यादिमहालयपक्षेषु कृताकृतम् ॥

## अथ महालये पक्षाः ।

अत्र शक्तेन भाद्रपदापरपक्षे प्रतिपदमारभ्यं दर्शांतं तिथिवृद्धौ षोडश महालयाः कर्तव्याः ॥ वृद्धिक्षयाभावे पंचदशैव महालयाः ॥ तिथिक्षये च चतुर्दशैव ॥ अशक्तेन तु पंचम्यादिषु षष्ठ्यादिष्वष्टम्यादिषु दशम्यादिष्वेकादश्यादिषु वा दर्शांततिथिषु कार्याः ॥ अत्राप्यशक्तेनानिषिद्धे कस्मिंश्चिदेकस्मिन्दिने सकृन्महालयः कर्तव्यः ॥ प्रतिपदादिदर्शांतपक्षे चतुर्दशी न वर्ज्या ॥ पंचम्यादिदर्शांतादिपंचपक्षेषु चतुर्दशीं वर्जयित्वान्यतिथिषु महालयाः ॥ सकृन्महालयेपि चतुर्दशी वर्जनीया ॥

## अथ सकृन्महालये वर्ज्यम् ।

सकृन्महालये प्रतिपत् षष्ठ्येकादशी चतुर्दशी शुक्रवारो जन्मनक्षत्रं जन्मनक्षत्राद्दशममेकोनविंशं नक्षत्रं च रोहिणी मघा रेवती चेति वर्ज्यानि ॥ क्वचित्रयोदशी सप्तमी रविवारो भौमवारेपि वर्ज्य उक्तः ॥

## अथ मृततिथौ सकृन्महालयः ।

पितृमृततिथौ सकृन्महालयकरणे नंदादिनिषेधो नास्ति ॥ "अशक्तः पितृपक्षे तु करोत्येकदिने यतः॥निषिद्धेपि दिने कुर्यात्पिंडदानं यथाविधि" इति वचनात् ॥ मृततिथौ श्राद्धासंभवे निषिद्धतिथ्यादिदिनं वर्जयित्वा महालयः ॥ तत्रापि द्वादश्यमावास्याष्टमीभरणीव्यतीपातेषु मृततिथ्यभावेपि सकृन्महालये कोपि तिथ्यादिनिषेधो नास्ति ॥

## अथ संन्यासिना महालयः ।

संन्यासिनां महालयस्त्वपराह्णव्यापिन्यां द्वादश्यामेव सपिंडकः कार्यो नान्यतिथौ ॥

## अथ चतुर्दशीपौर्णमासीमृतस्य महालयनिर्णयः ।

चतुर्दश्यां मृतस्यापि महालयश्चतुर्दश्यां न भवति ॥ "श्राद्धं शस्त्रहतस्यैव चतुर्दश्यां प्रकीर्तितम्" इति नियमेन सर्वतो बलिष्ठेन प्रतिवार्षिकश्राद्धातिरिक्तश्राद्धस्य चतुर्दश्यां निषेधात् ॥ एवं पौर्णमासीमृतस्यापि महालयः पौर्णमास्यां कार्यः ॥ अपरपक्षत्वाभावेन तस्यां महालयाप्राप्ते तेन चतुर्दशीमृतस्य पौर्णमासी मृतस्य वा महालयो द्वादश्यमावास्यादितिथिषु कार्यः ॥

## अथ महालयगौणकालः ।

अथ कन्यार्कः प्राशस्त्यसंपादको न तु निमित्तम् ॥ "आदौ मध्येवसाने वा यत्र कन्यां व्रजेद्रविः॥ सपक्षः सकलः श्रेष्ठः श्राद्धषोडशकं प्रति" इत्यादिस्मृतेः ॥ अमावास्यापर्यंतं तिथावसंभवे आश्विनशुक्लपंचमीपर्यंतं यस्मिन्कस्मिंश्चित्तिथौ महालयः ॥ तत्रासंभवे यावद्वृश्चिकदर्शनं व्यतीपातद्वादश्यादिपर्वणि कार्यः ॥

## अथेदमन्नेनैव ।

मृताहे महालये च श्राद्धं पक्वान्नेनैव कार्यं न त्वामान्नादिना ॥

## अथ पिंडदानं कार्यम् ।

"महालये गयाश्राद्धे मातापित्रोर्मृतेहनि ॥ कृतोद्वाहोपि कुर्वीत पिंडदानं यथाविधि ॥

## अथ महालये देवतापरिगणनम् ।

पक्षश्राद्धे पित्रादिपार्वणत्रयपत्न्याद्येकोद्दिष्टपितृगणसहितसर्वपित्रुद्देशेन सपत्नीकपित्रादित्रयसपत्नीकमातामहादित्रयेतिषड्दैवतमात्रोद्देशेन वा षड्दैवतैकोद्दिष्टगणोद्देशेन वा प्रत्यहं महालय इति पक्षत्रयम् ॥ एवं पंचम्यादिपक्षेष्वपि ॥ सकृन्महालये तु सर्वपित्रुद्देशेनैव ॥ तत्र देवतासंकल्पः ॥ पितृपितामहप्रपितामहानां मा-

वृतत्सपत्नीपितामहीतत्सपत्नीप्रपितामहीतत्सपत्नीनाम् ॥ यद्वाऽस्मत्सापत्नमातुरिति पृथगुद्देशः ॥ मातामहमातृपितामहमातृप्रपितामहानां सपत्नीकानां यथानामगोत्राणां वस्वादिरूपाणां पार्वणविधिना पत्न्याः पुत्रस्य कन्यकायाः पितृव्यस्य मातुलस्य भ्रातुः पितृष्वसुर्मातृष्वसुरात्मभगिन्याः पितृव्यपुत्रस्य जामातुर्भागिनेयस्य श्वशुरस्य श्वश्वा आचार्यस्योपाध्यायस्य गुरोः सख्युः शिष्यस्यैतेषां यथानामगोत्ररूपाणां पुरुषविषये सपत्नीकानां स्त्रीविषये सभर्तृकसापत्यानामेकोद्दिष्टविधिना महालयापरपक्षश्राद्धमथवा सकृन्महालयापरपक्षश्राद्धं सदैवं सद्यः करिष्ये इति ॥ एतेषां मध्ये ये केचिज्जीवंति तान्विहायेतरेषामुद्देशः ॥ मातामहादिषु पत्न्या जीवने सपत्नीकेत्यस्य स्त्रीषु भर्त्रादेरनुच्चारः ॥ "महालये गयाश्राद्धे वृद्धौ चान्वष्टकासु च ॥ नवदैवतमत्रेष्टं शेषं षाट्पौरुषं विदुः ॥ अन्वष्टकासु वृद्धौ च प्रतिसंवत्सरे तथा ॥ महालये गयायां च सपिंडीकरणात्पुरा ॥ मातुः श्राद्धं पृथक्कार्यमन्यत्र पतिना सह" ॥ इत्यादिस्मृत्यनुसारात्पार्वणत्रयमेवोक्तम् ॥ केचित्तु मातामह्यादित्रयं पृथगुच्चार्य द्वादशदेवताकं पार्वणचतुष्टयमाहुः ॥ एता एव देवता गयायां तीर्थश्राद्धे नित्यतर्पणे च ज्ञेयाः ॥ महालये धूरिलोचनसंज्ञका विश्वेदेवाः ॥

## अथात्र ब्राह्मणविभागः ।

अत्र सति विभवे देवार्थं द्वौ विप्रौ पार्वणत्रयार्थं प्रतिपार्वणं त्रीनित्येवं नव पत्न्याद्येकोद्दिष्टगणे प्रतिदैवतमेकैकमेव विप्रान्निमंत्रयेत् ॥ अशक्तौ देवार्थमेकं प्रतिपार्वणमेकमिति पार्वणत्रये त्रीन्सर्वैकोद्दिष्टगणार्थमेकमिति निमंत्रयेत् ॥ देवार्थं विप्रद्वयपक्षे प्रतिपार्वणे त्रय एव कार्याः ॥ न तु देवार्थं द्वौ प्रतिपार्वणमेक इति वा प्रतिपार्वणं त्रीन्देवार्थमेक इति वा वैषम्यं कार्यम् ॥ एवं सर्वत्रामावास्यादिश्राद्धेष्वपि ज्ञेयम् ॥ अत्यशक्तौ पार्वणद्वयार्थमेकोपि कार्यः ॥

## अथ महालये महाविष्णुः ।

महालये अंते महाविष्ण्वर्थं विप्रोवश्यं निमंत्रितव्य इति विशेषः कौस्तुभे ॥

## अथ सापत्नमातुः ।

जीवन्मातृकः सापत्नमातुरेकोद्दिष्टं कुर्यान्न पार्वणम् ॥ अनेकाः सापत्नमातरो यस्य तेन सर्वमात्रुद्देशेनैक एव विप्रः पिंडश्च कार्योर्घ्यपात्रं पृथक् ॥ स्वजनन्या सहानेकमातृत्वे स्वजनन्या सह सर्वमात्रर्थमेकोपि विप्रः पिंडोर्घ्यश्चेति पार्वणमेवं न पृथक् सापत्नमात्रेकोद्दिष्टमिति वा ॥ सर्वसापत्नमातॄणां पृथगेवैकोद्दिष्टमिति वा पक्षः ॥

## अथाग्नौकरणबर्हिर्निर्णयः ।

महालये पार्वणार्थेऽग्नौकरणमेकोद्दिष्टगणार्थं त्वग्नौकरणं कृताकृतम् ॥ करणपक्षे एकोद्दिष्टगणार्थमग्नौकरणान्नं पृथक्पात्रे ग्राह्यम् ॥ महालये सर्वपार्वणार्थमेकोद्दिष्टार्थं च सकृदाच्छिन्नं बर्हिरेकमेव ॥ दर्शादौ तु प्रतिपार्वणं बर्हिर्भिन्नमेव ॥ अवशिष्टश्राद्धप्रयोगोनेकमातृत्वेऽभ्यंजनादिमंत्रोहश्च श्राद्धसागरे स्वस्वशाखोक्तप्रयोगग्रंथेषु च ज्ञेयः ॥

## अथ परेहनि तर्पणादि ।

सकृन्महालये श्राद्धांगं तिलतर्पणं परेहन्येव सर्वपित्रुद्देशेन प्रातःसंध्यायः पूर्वमेव प्रातःसंध्योत्तरं वा ब्रह्मयज्ञांगतर्पणाद्भिन्नमेव कार्यम् ॥ प्रतिपदादिपंचम्यादिपक्षेषु विप्रविसर्जनांते एव श्राद्धपूजितपित्रुद्देशेन तर्पणं कार्यम् ॥

## अथ महालये पत्न्यां रजसि ।

पत्न्यां रजस्वलायां सकृन्महालयो न कार्यः कालांतराणां सत्त्वात् ॥ अमाय रजोदोषे आश्विनशुक्लपंचमीपर्यंतं गौणकाले महालयः ॥ प्रतिपदादिष्वन्येषु पक्षेषु प्रारंभदिने पाकात्पूर्वं पत्नी रजस्वला चेदुत्तरोत्तरपक्षस्वीकारः ॥ पाकारंभोत्तरं चेत्तां गृहांतरे अवरुध्य महालयः कर्तव्यः ॥ एवं विधवाकर्तृकश्राद्धेपि ज्ञेयम् ॥

## अथ पक्षव्यापिश्राद्धे सूतकप्राप्तौ कृत्यनिर्णयो वक्ष्यते ।

भ्रात्रादिमहालयश्च तत्रैवोत्तरार्धे ज्ञेयः ॥ अत्रापुत्रविधवा मम भर्तृतत्पितृपितामहानां भर्तुर्मातृपितामहीप्रपितामहीनां मम पितृपितामहप्रपितामहानां मम मातृपितामहीप्रपितामहीनां मम मातामहमातृपितामहमातृप्रपितामहानां मम मातामहीमातृपितामहीमातृप्रपितामहीनां तृप्त्यर्थं सकृन्महालयापरपक्षश्राद्धं करिष्ये इति स्वयं संकल्प्य ब्राह्मणद्वाराग्नौकरणादिसहितं सर्वमविकृतं प्रयोगं कारयेत् ॥ ब्राह्मणस्त्वमुकनाम्न्या यजमान्या भर्तृतत्पितृपितामहेत्याद्युच्चार्य प्रयोगं कुर्यात् ॥ अशक्तौ भर्त्रादित्रयं स्वपित्रादित्रयं स्वमात्रादित्रयं स्वमातामहादित्रयं सपत्नीकमिति पार्वणचतुष्टयोद्देशेन महालयः ॥ अत्यशक्तौ स्वभर्त्रादित्रयं स्वपित्रादित्रयं चेति पार्वणद्वयमेव कार्यम् ॥

## पितरि संन्यस्ते जीवति विचारः ।

महालयः पितरि संन्यस्ते पातित्यादियुते वा जीवत्पितृकेणापि पुत्रेण पितुः पित्रादिसर्वपित्रुद्देशेन पिंडदानरहितः सांकल्पविधिना कार्यः ॥ "वृद्धौ तीर्थे च संन्यस्ते ताते च पतिते सति ॥ येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुतः ॥

मुंडनं पिंडदानं च प्रेतकर्म च सर्वशः ॥ न जीवत्पितृकः कुर्याद्विवाहं पितरेव च" इत्यादिवचनात् ॥ पिंडददानादिविस्तरं कर्तुमशक्तेनापि सांकल्पविधिः कार्यः ॥

## अथ गर्भिणीपतिजीवत्पितृकयोरशक्तस्य सांकल्पिकविधिः ।

सांकल्पिकविधावर्घ्यदानं १ समंत्रकावाहनं २ अग्नौकरणं ३ पिंडदानं ४ तीर्थकेरदानं ५ स्वधां वाचयिष्ये ६ ॥ ॐ स्वधोच्यतामित्यादिस्वधावाचनप्रयोगं वर्जयेत ॥

## अनेकब्राह्मणालाभे ।

अनेकब्राह्मणालाभे देवस्थाने शालग्रामादिदेवमूर्तिं संस्थाप्य श्राद्धं कार्यम् ॥ तथा विप्रालाभे दर्भबटुविधिना श्राद्धम् ॥

## अथ प्रथमाब्दे महालयः ।

पित्रोर्मरणे प्रथमाब्दे महालयः कृताकृतः ॥ महालयो मलमासे न कार्यः ॥

## अथापरपक्षे वार्षिकप्राप्तौ ।

अपरपक्षे प्रतिवार्षिकप्राप्तौ मृततिथौ वार्षिकं कृत्वा तिथ्यंतरे सकृन्महालयः कार्यः ॥ प्रतिपदादिदर्शांतादिपक्षेषु मृततिथौ वार्षिकं कृत्वा पाकांतरेण महालयः ॥

## अथ दर्शे महालयवार्षिकयोः प्राप्तौ ।

अमायां प्रतिवार्षिकसकृन्महालयप्राप्तौ पूर्वं वार्षिकं ततो महालयस्ततो दर्शश्राद्धमिति त्रयं पाकभेदेन ॥ महालयमात्रप्राप्तावपि पूर्वं महालयस्ततो दर्शः ॥

## अथ सकृन्महालये मृततिथिनिर्णयः ।

मृततिथौ सकृन्महालयपक्षे तत्तिथेर्ग्राह्यत्वनिर्णयोपराह्णव्याप्त्या दर्शवदिति भाति ॥

## अथ भरणीश्राद्धनिर्णयः ।

अत्रापरपक्षे भरणीश्राद्धाद्गयाश्राद्धफलप्राप्तिः ॥ भरणीश्राद्धमप्पिंडकं षड्दैवतं सांकल्पविधिना कार्यम् ॥ देवा धूरिलोचनौ पुरूरवार्द्रवौ वा भरणीश्राद्धं काम्यं गयाश्राद्धफलकामेन प्रतिवर्षं कार्यम् ॥ केचित्पित्रादिमरणोत्तरं प्रथमवर्षे एव कुर्वंति ॥ द्वितीयादिवर्षे न कुर्वंति तत्र मूलं चिंत्यम् ॥ मम तु "न दैवं नापि वा पित्र्यं यावत्पूर्णो न वत्सरः" इत्यादिवचनेन सर्वस्यापि दर्शादिश्राद्धस्य प्रथमाब्दे निषेधाद्वर्षांते एव पितृत्वप्राप्तेश्च द्वितीयादिवर्षे एव कर्तुं युक्तमिति भाति ॥ यत्तु पितृभिन्नोपि योयो म्रियते तस्यतस्य प्रथमाब्दे भरणीश्राद्धं क्रियते तत्रापि

मूलं न पश्यामः ॥ गयाश्राद्धफलार्थमाचारमनुसृत्य क्रियते चेन्मृताद्येकमेव पार्वणमुद्दिश्य सदैवं कार्यम् ॥ अत्र सपिंडत्वाचारोपि चिंत्यः ॥

## अथ माघ्यावर्षश्राद्धनिर्णयः ।

अत्रापरपक्षे सप्तम्यादिदिनत्रये माघ्यावर्षश्राद्धं कर्तु पूर्वेद्युः श्राद्धं करिष्ये ॥ माघ्यावर्षश्राद्धं करिष्येऽन्वष्टक्यश्राद्धं करिष्ये इति क्रमेण संकल्पं कृत्वा सर्वोप्यष्टकाविधिराश्वलायनैः कार्यः ॥ इदमाश्वलायनानामष्टकाविकृतिरूपमेकाष्टकाकरणपक्षेपि कार्यम् ॥ इतरशाखिनां त्वष्टकारूपमेवेति पंचाष्टकाकरणपक्षेष्टकाश्राद्धं करिष्य इति संकल्प्य कार्यमेकाष्टकापक्षे तु न कार्यम् ॥

## अथान्वष्टक्यश्राद्धम् ।

नवम्यामन्वष्टक्यश्राद्धं नवदैवतं सर्वशाखिभिरष्टम्यामष्टकाश्राद्धकरणेपि गृह्याग्नौ यथोक्तविधिना कार्यम् ॥ अस्यामन्वष्टक्यस्य मुख्यत्वात् ॥ गृह्याग्निरहितैस्तु येषां पूर्वं माता मृता पश्चात्पिता मृतस्तैर्मृतमातापितृकैः पाणिहोमादिविधिना नवदैवत्यं कार्यम् ॥

## अथाविधवानवमीश्राद्धम् ।

जीवत्पितृकेण मृतमातृकेणानुपनीतेनापि मात्रादित्रितयमात्रोद्देशेनैकपार्वणकं पुरूरवार्द्रवदेवसहितं सपिंडकं श्राद्धं कार्यम् ॥ स्वमातरि जीवंत्यां मृतसापत्नमात्रादित्रयोद्देशेन कार्यम् ॥ स्वमातृसापत्नमात्रोर्मृतौ द्विवचनप्रयोगेण सापत्नमात्रैक्ये च मात्रा सह बहुवचनप्रयोगेणैकस्मिन्विप्रे एक एव क्षणोर्घ्यः पिंडश्चैक एव देयः॥पितामहीप्रपितामह्योर्द्वौ विप्रौ पिंडौ चेत्येवं पार्वणमावश्यकम्॥केचिन्मातृद्वित्वे विप्रपिंडादिभेदमाहुः ॥ स्वमातृसापत्नमातृजीवने तु गृह्याग्निरहितेन मृतपितृकेणापि न कार्यम् ॥ अन्वष्टक्ये मातृयजनस्य मुख्यत्वादत एवात्र कैश्चिन्मातृपार्वणस्यैव प्राथम्यमुक्तमिति भाति ॥ पूर्वं पितृमृतौ पश्चान्मातृमृतावपि गृह्याग्निमतामस्यां नवम्यामन्वष्टक्यमावश्यकं नित्यत्वात् ॥ अन्येषां पश्चान्मातृमृतौ नावश्यकम् ॥ केचिन्नवम्यां पूर्वमृतमातृश्राद्धं 'मृते भर्तरि लुप्यते' इति वचनप्रामाण्यमाश्रित्य पितृमरणोत्तरं न कुर्वंति ॥ भर्तुरग्रे सह दाहेन वा मृतानां मातामहीभगिनीदुहितृमातृष्वसृपितृष्वस्रादीनामपुत्राणां पितृमात्रादिकुलोत्पन्नानां सर्वासामेव सौभाग्यवतीनामस्यां नवम्यां श्राद्धं कार्यम् ॥ भर्तुरग्रे मृतानां तत्तद्भर्तृमरणोत्तरं च न कार्यम् ॥ अत एवास्या अविधवानवमीत्वप्रसिद्धिः ॥ अतः पत्न्या अपि नवमीश्राद्धं कार्यम् ॥

## अथास्य दौहित्रप्रतिपच्छ्राद्धस्य च गौणकालः ।

अस्याविधवानवमीश्राद्धस्य महालयवद्यावद्गृश्निकदर्शनं गौणकालः ॥ एवं दौहित्रप्रतिपच्छ्राद्धस्यापीति कालतत्त्वविवेचने ॥

## अथात्र सुवासिनी ।

अत्राविधवानवमीश्राद्धे सुवासिनीनां प्रतिसांवत्सरिकश्राद्धादौ च सुवासिनीभोजनमपि कार्यम् ॥ "भर्तुरग्रे मृता नारी सह दाहेन वा मृता ॥ तस्याः स्थाने नियुंजीत विप्रैः सह सुवासिनीम्" ॥ इत्यादि मार्कंडेयवचनात् ॥

## अथात्र पिंडदानम् ।

अस्यां नवम्यां पिंडदानं जीवत्पितृकेणापि गर्भिणीपतिना चापि कार्यम् ॥

## अथान्वष्टक्यलोपे प्रायश्चित्तम् ।

नवमीश्राद्धासंभवे ममान्वष्टक्याकरणजनितप्रत्यवायपरिहारार्थं शतवारमेभिर्ऋुभिः सुमना इति मंत्रजपं करिष्ये इति संकल्प्य तज्जपं कुर्यात् ॥ अन्वष्टक्ये सामवेदिभिः पितृपार्वणमेव कार्यम् ॥ मातृमातामहपार्वणे न कार्ये इति सिंधुः ॥

## अथात्र द्वादश्यां संन्यासिनां महालयः ।

स चापराह्णव्यापिन्यामित्युक्तम् ॥ तत्र वैष्णवा अपराह्णव्यापिन्या द्वादश्या एकादशीव्रतदिने सत्त्वे स्वल्पायामपि द्वादश्यां शुद्धत्रयोदश्यां वैकादशीपारणादिने एव संन्यासिदैवत्यं श्राद्धं कुर्वंति ॥ मम त्वीदृशे विषये वैष्णवैः संन्यासिमहालयो दर्शे कार्य इति भाति ॥

## अथ मघात्रयोदशीश्राद्धम् ।

अथ त्रयोदश्यां मघायुतायां केवलायां वा श्राद्धं नित्यम् ॥ केवलमघायामपि श्राद्धं कार्यम् ॥

## अथात्र श्राद्धविधौ बहुग्रंथेषु बहवः पक्षाः ।

अपुत्रेण पुत्रिणा वा गृहिणा सपत्नीकपितृपार्वणमातामहपार्वणाभ्यां पितृव्यभ्रातृमातुलपितृष्वसृमातृष्वसृभगिनीश्वशुरादिपार्वणैश्च सहितमपिंडकं सांकल्पविधिना श्राद्धं कार्यम् १ ॥ अथवा पित्रादिपार्वणद्वयं महालयवत्पितृव्याद्येकोद्दिष्टगणांश्चोद्दिश्य सांकल्पविधिना श्राद्धं कार्यम् २ ॥ यद्वा दर्शवत् षड्दैवतं श्राद्धमपिंडकं कार्यम् ३ ॥ अथवा निष्कामेन पुत्रिणा श्राद्धविधिना श्राद्धं नानुष्ठेयं किंतु पित्रादिपार्वणद्वयं केवलपितृव्यादिसहितं वोद्दिश्यैतेषां तृप्त्यर्थं ब्राह्मणभोजनं करिष्ये इति संकल्प्य ॥ पितृरूपिणे ब्राह्मणाय गंधं समर्पयामीत्येवं पंचोपचारान्समर्प्य ॥ ब्रह्मार्पणमित्यादिपठित्वानेन ब्राह्मणभोजनेन पित्रादिरूपीश्वरः प्रीयतामि-

त्यन्नमुत्सृज्य पायसादिमधुरान्नेन ब्राह्मणान् भोजयित्वा दक्षिणाभिः संतोष्य स्वयं भुंजीतेत्येतावदेव कर्तव्यम् ४ ॥ अपुत्रिणः सकामस्य च पिंडदानरहितश्राद्धविधिना श्राद्धं न दोषाय ५ ॥ क्वचिदपुत्रिणः पिंडदानमप्युक्तम् ६ ॥ एवमुक्तपक्षेष्वन्यतमपक्षेण मघात्रयोदशीश्राद्धमवश्यानुष्ठेयम् ॥ अकरणे दोषोक्तेर्नित्यत्वात् ॥

## अथ गजच्छाया ।

हस्तनक्षत्रस्थे सूर्ये मघायुता त्रयोदशी गजच्छायासंज्ञिता अस्यां श्राद्धेन फलभूयस्त्वम् ॥

## अथ युगादिसंपाते तंत्रादिनिर्णयः ।

अत्र महालयस्य युगादेश्च प्राप्तौ मघात्रयोदशीमहालययुगादिश्राद्धानि तंत्रेण करिष्य इति संकल्प्य तंत्रेण कुर्यात् ॥ न तु दर्शेन नित्यश्राद्धस्येव कस्यचित्प्रसंगसिद्धिः ॥ अत्रैवं भाति ॥ अंगानामैक्यं प्रधानमात्रभेदस्तंत्रम् ॥ तेन विश्वेदेवपाकाद्यंगानामैक्यं विप्रार्घ्यपिंडादेर्भेद एव ॥ प्रसंगसिद्धिस्थले तु प्रधानमपि न भिद्यते इति ॥ त्रयोदशीश्राद्धेऽपरपक्षत्वाद्धूरिलोचना विश्वेदेवाः श्राद्धसागरे उक्ताः ॥ अविभक्तैरपि भ्रातृभिर्मघात्रयोदशीश्राद्धं पृथक्कार्यमिति सिंधुकौस्तुभादौ विभक्तैरपि सहैवेति श्राद्धसागरे ॥

## अथ शस्त्रादिहते चतुर्दशी ।

अथात्र चतुर्दश्यां पित्रादित्रयमध्ये एकस्यापि शस्त्रविषाग्निजलादिशृंगिव्याघ्रसर्पादिनिमित्तेन दुर्मरणेन मृतस्यैकोद्दिष्टविधिना श्राद्धं कार्यम् ॥

## अथात्रैकोद्दिष्टनिर्णयः ।

पित्रादिद्वयोः शस्त्रादिहतत्वे एकोद्दिष्टे कार्ये ॥ पित्रादीनां त्रयाणा शस्त्रादिहतत्वे पार्वणमेव कार्यम् ॥ केचिदेकोद्दिष्टत्रयं कार्यमित्याहुः ॥ सह गमने प्रयागादौ च विधिप्राप्तेऽग्निजलादिमरणे चतुर्दशीश्राद्धं न कार्यम् ॥ युद्धप्रायोपवेशनयोर्वैधत्वेपीदं कार्यम् ॥ अत्र शस्त्रादिहतपितृव्यभ्रात्रादेरप्यपुत्रस्यैकोद्दिष्टं कार्यम् ॥ इदं धूरिलोचनसंज्ञकदेवसहितं कार्यम् ॥ अत्र संबंधगोत्रनामाद्यच्चार्यामुकनिमित्तेन मृतस्य चतुर्दशीनिमित्तकोद्दिष्टं श्राद्धं सदैवं सपिंडं करिष्य इति संकल्प्य प्रत्येकोद्दिष्टमेकार्घ्यैकपवित्रमेकपिंडयुतं श्राद्धं कार्यम् ॥ पित्रादेर्भ्रात्रादेश्च शस्त्रहतत्वे पृथक्पाकादिना महालयवत्सह तंत्रेण वैकोद्दिष्टद्वयादि ॥ एवं चतुर्दश्यामेकोद्दिष्टं कृत्वा पित्रादिसर्वपितृगणोद्देशेन सकृन्महालयस्तिथ्यंतरेऽवश्यं कार्यः ॥

## अथ चतुर्दश्यां वार्षिके ।

अस्यां चतुर्दश्यां यदा शस्त्रादिमृतयोर्मातापित्रोर्मृताहस्तदा चतुर्दशीनिमित्तमे-

कोद्दिष्टं कृत्वा पुनस्तदैव मृतादित्रयोद्देशेन सांवत्सरिकं पार्वणविधिना कार्यमिति श्राद्धसागरे ॥ कौस्तुभादौ तु सांवत्सरिकपार्वणेनैव चतुर्दशीश्राद्धसिद्धिर्न पृथक्कार्यमित्युक्तं दिनांतरे च सकृन्महालयः कार्यः ॥

## अथ चतुर्दशीश्राद्धविघ्ने ।

अत्र चतुर्दशीश्राद्धस्य कथंचिद्विघ्ने त्वत्रैव पक्षेऽग्रिमपक्षे वा दिनांतरे तत्पार्वणेन विधिनैव कार्यं न त्वेकोद्दिष्टम् ॥ अत्रैकोद्दिष्टेऽपराह्णव्यापिन्येव चतुर्दशी ग्राह्या न त्वितरैकोद्दिष्टातिथिवत् मध्याह्नव्यापिनीति कौस्तुभे ॥

## अथामायां गजच्छाया ।

हस्तनक्षत्रे सूर्ये सति चांद्रहस्तनक्षत्रयुतामावास्यां गजच्छाया तस्यां श्राद्धदानादि कार्यम् ॥ इत्यमायां गजच्छाया ॥

## अथ दौहित्रप्रतिपच्छ्राद्धम् ।

आश्विनशुक्लप्रतिपदि दौहित्रेणानुपनीतेनापि सपत्नीकमातामहस्य पार्वणं मातुले सत्यप्यवश्यं कार्यम् ॥ मातामहीसत्त्वे केवलमातामहपार्वणम् ॥ इदं जीवत्पितृकेणापि कार्यम् ॥ इदं सपिंडकमपिंडकं वा ॥ अत्र पुरूरवार्द्रवसंज्ञका विश्वेदेवाः भूरिलोचना इति केचित् ॥ इयं प्रतिपदपराह्णव्यापिनी ग्राह्येति बहवः ॥ संगवव्यापिनीति केचित् ॥ अस्य श्राद्धस्य यावद् वृश्चिकदर्शनं गौणकाल इति तत्त्वविवेचने ॥ ॥ इति महालयादिनिर्णयोद्देशः ॥

## अथ कपिलाषष्ठी ।

भाद्रपदकृष्णपक्षे भौमवारव्यतीपातरोहिणी युता षष्ठी कपिलाषष्ठी ॥ अत्र हस्तस्थे सूर्ये फलातिशयः ॥ अयं योगो दिवैव ग्राह्यो न तु रात्रौ सूर्यपर्वत्वादिति भाति ॥ " अस्यां हुतं च दत्तं च सर्वं कोटिगुणं भवेत " ॥ अत्र श्राद्धं कार्यमिति विशेषवचनं नोपलभ्यते तथाप्यलभ्ययोगे श्राद्धविधानाद्दर्शवत्षड्दैवतं श्राद्धं कार्यम् ॥

## अथात्र संक्षेपतो व्रतविधिः ।

सूर्योद्देशेनोपवासं संकल्प्य देवदारूशीरकुंकुमैलामनःशिलापद्मकाष्ठतंडुलान्मधुगव्याभ्यां लेपयित्वा क्षीरालोडितेन कल्केनांगं विलिप्य स्नायात् ॥ तत्र मन्त्रः ॥ " आपस्त्वमसि देवेश ज्योतिषां पतिरेव च ॥ पापं नाशय मे देव वङ्मनःकायकर्मजम् " ॥ ततः पंचगव्येन स्नात्वा पंचपल्लवैर्मार्जयित्वा मृत्तिकास्नानं कुर्यात् ॥ तर्पणादिनित्यविधिं कृत्वा वरुणं पूजयित्वा सर्वतोभद्रमध्ये कलशोपरि तंडुलादौ पद्मं लिखित्वा तस्याष्टसु पत्रेषु पूर्वादौ सूर्यं तपनं स्वर्णरेतसं रविमा-

दित्यं दिवाकरं प्रभाकरं सूर्यमित्यावाह्य मध्ये सौवर्णरथे सूर्यमग्रेऽरुणं चावाह्य करवीरार्कादिपुष्पैर्धूपादिभिः संपूजयेत् ॥ दिक्पालादिदेवताः संपूज्य द्वादशार्घ्यान्सूर्याय दद्यात् ॥ सविस्तरः पूजादिविधिर्द्वादशार्घ्यमंत्राश्च कौस्तुभे ज्ञेयाः ॥ सूर्याग्रे ॥ "प्रभाकर नमस्तुभ्यं संसारान्मां समुद्धर ॥ भुक्तिमुक्तिप्रदो यस्मात्तस्माच्छांतिं प्रयच्छ मे ॥ नमोनमस्ते वरद ऋक्सामयजुषां पते ॥ नमोस्तु विश्वरूपाय विश्वधात्रे नमोस्तु ते" इति प्रार्थ्य ॥ उदुत्यमित्यादि सौरसूक्तानि जपित्वा रात्रौ जागरणं कृत्वा प्रातराकृष्णेनेति मंत्रेणार्कसमिच्चर्वाज्यतिलैः प्रतिद्रव्यमष्टोत्तरशतं हुत्वा घंटादिसर्वालंकारयुतां कपिलां गां मंत्रैः संपूज्य विप्राय दद्यात् ॥ गोपूजामंत्राः कौस्तुभे ॥ दानमंत्रस्तु ॥ "नमस्ते कपिले देवि सर्वपापप्रणाशिनि ॥ संसारार्णवमग्नं मां गोमातस्त्रातुमर्हसि" ॥ वस्त्रयुगच्छत्रां सघंटामित्यादिविशेषणान्युक्त्वेमां गां तुभ्यमहं संप्रददे इति दत्त्वा सुवर्णदक्षिणां दद्यात् ॥ ततस्तस्मै विप्राय रथं सूर्यप्रतिमां च दद्यात् ॥ तत्र मंत्रः ॥ "दिव्यमूर्तिर्जगच्चक्षुर्द्वादशात्मा दिवाकरः ॥ कपिलासहितो देवो मम मुक्तिं प्रयच्छतु ॥ यथा त्वं कपिले पुण्या सर्वलोकस्य पावनी ॥ प्रदत्ता सह सूर्येण मम मुक्तिप्रदा भव" इत्यादि ॥ ततः कपिलाप्रार्थनादिविस्तारः कौस्तुभे ॥ अथवोपोषणजागरहोमादिविधिमकृत्वा षष्ठ्यामेव स्नानरथादिपूजनकपिलादानादि कार्यम् ॥ इति संक्षेपतः कपिलाषष्ठीव्रतविधिः ॥ ॥ इति श्रीमदनंतोपाध्यायसूनुकाशीनाथोपाध्यायविरचिते धर्मासिंधुसारे भाद्रपदमासकृत्यनिर्णयोद्देशः ॥

## अथाश्विने तुलासंक्रातिः ।

तुलामेषसंक्रांतिर्विषुवसंज्ञा ॥ तस्याः पूर्वाः पराः पंचदशपंचदश नाड्यः पुण्यकालः ॥ विशेष प्रागुक्त एव ॥ आश्विनशुक्लप्रतिपदि देव्या नवरात्रारंभः ॥ नवरात्रशब्द आश्विनशुक्लप्रतिपदमारभ्य महानवमीपर्यंतं क्रियमाणकर्मनामधेयम् ॥ तत्र कर्मणि पूजैव प्रधानम् ॥ उपवासादिकं स्तोत्रजपादिकं चांगम् ॥ तथा च यथाकुलाचारमुपवासैकभक्तनक्तायाचितान्यतमव्रतयुक्तं यथाकुलाचारं सप्तशतीलक्ष्मीहृदयादिस्तोत्रजपसहितं प्रतिपदादिनवम्यंतनवतिथ्यधिकरणकपूजाख्यं कर्म नवरात्रशब्दवाच्यम् ॥ पूजाप्राधान्योक्तेरेव ॥ क्वचित्कुले जपोपवासादिनियमस्य व्यतिरेक उपलभ्यते ॥ पूजायास्तु न क्वापि कुले नवरात्रकर्मण्यभावो दृश्यते ॥ यत्कुले नवरात्रमेव नानुष्ठीयते तत्र नवरात्रपूजादेरप्यभाव आस्तां नाम ॥

## अथ नवरात्रारंभनिर्णयः ।

स च नवरात्रारंभः सूर्योदयोत्तरं त्रिमुहूर्तव्यापिन्यां प्रतिपदि कार्यः ॥ तदभावे द्विमुहूर्तव्यापिन्यामपि ॥ क्वचिन्मुहूर्तमात्रव्यापिन्यामप्युक्तः ॥ सर्वथा दर्शयुक्तप्र-

तिपदि न कार्य इति बहुग्रंथसंमतम् ॥ मुहूर्तन्यूनव्याप्तौ सूर्योदयास्पर्शे वा दर्शयुतापि ग्राह्या ॥ प्रथमदिने षष्टिघटिका प्रतिपद्वितीयदिने मुहूर्तद्वयादिपरिमिता वर्तते तदा पूर्णत्वात्पूर्वैव ग्राह्या ॥ द्वितीयावेधनिषेधोप्येतत्पक्षद्वये एव योज्यः ॥ पुरुषार्थचिंतामणौ तु पूर्वदिने मुहूर्तचतुष्टयोत्तरं मुहूर्तपंचकोत्तरं वा प्रवृत्ता द्वितीयदिने मुहूर्तद्वयादिपरिमिता प्रतिपत् तदापरस्याः क्षयगामितया निषिद्धत्वादमायुक्तापि पूर्वैव ग्राह्येत्युक्तम् ॥ तत्र सूर्योदयोत्तरं दृशघटीमध्ये तत्रासंभवे मध्याह्नाभिजिन्मुहूर्ते प्रारंभः कार्यो न त्वपराह्णे ॥ एवं च प्रतिपद आद्यषोडशनाडीनिषेधश्चित्रावैधृतियोगनिषेधश्चोक्तकालानुरोधेन सति संभवे पालनीयो न तु निषेधानुरोधेन पूर्वाह्णः प्रारंभकालः प्रतिपत्तिथिर्वातिक्रमणीयः ॥ अत्र कर्मणि ब्राह्मणादिचतुर्वर्णस्य म्लेच्छादेश्चाधिकारः ॥ तत्र विप्रेण जपहोमान्नबलिनैवेद्यैः सात्त्विकी पूजा कार्या ॥ "नैवेद्यैश्च निरामिषैर्मद्यं दत्त्वा ब्राह्मणस्तु ब्राह्मण्यादेव हीयते ॥' मद्यमपेयमदेयम्"इत्यादिनिषेधान्मांसमद्यादियुतराजसपूजायां ब्राह्मणस्य नाधिकारः ॥ मद्यपाने मरणांतप्रायश्चित्तोक्तेः ॥ स्पर्शे तदंगच्छेदोक्तेश्चाल्पप्रायश्चित्तेन दोषानपगमेन पातित्यापातात् ॥ इत्थमेव सर्वे प्राचीना नवीनाश्च निबंधकारानिर्बंधेन लिखंति ॥ नवीनतरा भास्कररायप्रभृतयोपि सप्तशतीटीकादौ प्राचीनग्रन्थाननुसृत्यैवमेव परिकुर्वंति सभायां चैतन्मतमेव श्लाघंते चाचरणं त्वन्यथा कुर्वंति तत्किं स्वयं दुर्दैववशेन ब्राह्मण्यभ्रष्टोऽभूवमन्येप्येवं माभूवन्निति भूतदयया वा स्वपातित्यगोपनाय वान्येषां कलियुगस्थविप्राणामधिकाराभावालोचनया वेति न वयं तत्त्वं जानीमः ॥ क्षत्रियवैश्ययोर्मांसादियुतजपहोमसहितराजसपूजायामप्यधिकारः स च केवलं काम्य एव न तु नित्यः ॥ निष्कामक्षत्रियादेः सात्त्विकपूजाकरणे मोक्षादिफलातिशयः ॥ एवं शूद्रादेरपि च शूद्रादेर्मंत्रहीना जपादिरहिता मांसादिद्रव्यका तामसपूजापि विहिता ॥ शूद्रेण सप्तशत्यादिजपहोमसहिता सात्त्विकी पूजा ब्राह्मणद्वारा कार्या ॥ स्त्रीशूद्रादेः स्वतः पौराणमंत्रपाठेपि नाधिकारः ॥ अत एव " शूद्रः सुखमवाप्नुयात " इत्यत्र भाष्ये स्त्रीशूद्रयोः श्रवणादेव फलं न तु पाठादित्युक्तम् ॥ एतेन स्त्रीशूद्रयोर्गीताविष्णुसहस्रनामपाठो दोषायैवेति ज्ञेयम् ॥ क्वचित्पौराणमंत्रयुक्तपूजायां स्त्रीशूद्रयोः स्वतोप्यधिकार उक्तः ॥ जपहोमादौ विप्रद्वारैव॥ म्लेच्छादीनां तु ब्राह्मणद्वारापि जपहोमे समन्त्रपूजायां च नाधिकारः ॥ किन्तु तैस्तत्तदुपचाराणां देवीमुद्दिश्य मनसोत्सर्गमात्रं कर्तव्यम् ॥

## अथ नवरात्रेनुकल्पाः ।

तृतीयादिनवम्यंतं सप्तरात्रं वा कर्तव्यम् ॥ पंचम्यादिपञ्चरात्रं वा ॥ सप्तम्यादित्रिरात्रं वा ॥ अष्टम्यादिद्विरात्रं वा ॥ एकाहपक्षे केवलाष्टम्यां केवलनवम्यां

वा ॥ एषां पक्षाणां स्वस्वकुलाचारानुसारेण प्रतिबन्धादिना पूर्वपूर्वपक्षासंभवानुसारेण वा व्यवस्था ॥ तत्र तृतीयापंचम्योर्निर्णयः प्रतिपदादिवत् ॥ सप्तम्यादि निर्णयस्तु वक्ष्यते ॥ नवरात्रादिपक्षेषु क्षयवृद्धिवशेन दिनाधिक्यन्यूनत्वे पूजाद्यावृत्तिः कार्या ॥ केचित्तु दिनक्षयेष्टावेव पूजाश्चण्डीपाठांश्च कुर्वंति ॥ इदं देवीपूजनात्मकं नवरात्रं कर्म नित्यम् ॥ अकरणे दोषश्रवणात् ॥ फलश्रवणात्काम्यं च ॥ अत्र नवरात्रे घटस्थापनं प्रातर्मध्याह्ने प्रदोषकाले चेति त्रिकालं द्विकालमेककालं वा स्वस्वकुलदेवतापूजनं सप्तशत्यादिजपोऽखण्डदीप आचारप्राप्तमालाबंधनमुपवासनक्तैकभक्तादिनियमः सुवासिनीभोजनं कुमारीभोजनपूजनादि अन्ते सप्तशत्यादिस्तोत्रमन्त्रहोमादीत्येतानि विहितानि ॥ एतेषां मध्ये क्वचित्कुले घटस्थापनादीनि द्वित्रादीन्येवानुष्ठीयंते न सर्वाणि क्वचिद्घटस्थापनादिरहितानि कानिचित्क्वचित्क्वचित्सर्वाण्येवेत्येतेषां समुच्चयविकल्पौ कुलाचारानुसारेण व्यवस्थितौ ज्ञेयौ॥कुलपरंपराप्राप्तादधिकं शक्तिसत्त्वेपि नानुष्ठेयमिति शिष्टाचारः ॥ फलकामनया प्रार्थितमुपवासादिकं कुलाचाराभावेपि कुर्वंति ॥ इदं कलशस्थापनं रात्रौ न कार्यम् ॥ तत्र कलशस्थापनार्थं शुद्धमृदा वेदिकां कृत्वा पंचपल्लवदूर्वाफलतांबूलकुंकुमधूपादिसंभारान्संपादयेत् ॥

## अथ संक्षेपतो नवरात्रारंभप्रयोगः ।

प्रतिपदि प्रातः कृताभ्यंगस्नानः कुंकुमचंदनादिकृतपुंड्रो धृतपवित्रः सपत्नीको दशघटिकामध्येऽभिजिन्मुहूर्ते वा देशकालौ संकीर्त्य मम सहकुटुंबस्यामुकदेवताप्रीतिद्वारा सर्वापच्छांतिपूर्वकदीर्घायुर्धनपुत्रादिवृद्धिशत्रुजयकीर्तिलाभप्रमुखचतुर्विधपुरुषार्थसिद्ध्यर्थमद्यप्रभृति महानवमीपर्यंतं प्रत्यहं त्रिकालमेककालं वामुकदेवतापूजामुपवासनक्तैकभक्तान्यतमनियमसहितमखंडदीपप्रज्वालनं कुमारीपूजनं चंडीसप्तशतीपाठं सुवासिनीभोजनमित्यादि यावत्कुलाचारप्राप्तमनूद्यैवमादिरूपं शारदीयनवरात्रोत्सवाख्यं कर्म करिष्ये ॥ देवतापूजांगत्वेन घटस्थापनं च करिष्ये ॥ तदादौ निर्विघ्नतासिद्ध्यर्थं गणपतिपूजनं पुण्याहवाचनं चंडीसप्तशतीजपाद्यर्थं ब्राह्मणवरणं च करिष्ये ॥ एतानि कृत्वा घटस्थापनसत्त्वे महीद्यौरिति भूमिं प्रार्थ्य स्पृष्ट्वा तस्यां भव्यंकुरारोपणार्थं शुद्धमृदं प्रक्षिप्योषधयः समिति तस्यां मृदि यवादीन्प्रक्षिप्याकलशेष्विति कुंभं निधायेमंमे गंगे इति जलेनापूर्य गंधद्वारामिति गंधमोषधीरिति सर्वौषधीः कांडात्कांडादिति दूर्वा अश्वत्थेव इति पंचपल्लवान्स्योनापृथिवीति मृदः याः फलिनीरिति फलं सहिरत्नानि हिरण्यरूप इति रत्नहिरण्ये प्रक्षिप्य युवासुवासा इति सूत्रेणावेष्ट्य पूर्णादर्वीति पूर्णपात्रं निधाय तत्त्वायामीति वरुणं संपूज्य तत्कलशोपरि कुलदेवतामिमां संस्थाप्य पूजयेत् स्वस्थाने एव वा

संस्थाप्य पूजयेत् ॥ तद्यथा ॥ "जयंती मंगला काली भद्रकाली कपालिनी ॥ दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोस्तु ते ॥ आगच्छ वरदे देवि दैत्यदर्पनिषूदिनि ॥ पूजां गृहाण सुमुखि नमस्ते शंकरप्रिये" ॥ अनेन पुरुषसूक्तप्रथममृग्भ्यां चावाह्य 'जयंतीमंगलाकाली' इति मंत्रेण सूक्तऋग्भिश्चासनादिषोडशोपचारैः संपूजयेत् ॥ 'सर्वमंगलमांगल्ये' इत्यादिभिः संप्रार्थ्य ॥ प्रत्यहं बलिदानपक्षे माषभक्तेन कूष्मांडेन वा बलिं दद्यात् ॥ अंते एव वा बलिदानं न वा बलिदानम् ॥ ब्राह्मणः पारणादिने कूष्मांडबलिदानं कुर्यात् ॥ "कूष्मांडो बलिरूपेण मम भाग्यादवस्थितः ॥ प्रणमामि ततः सर्वरूपिणं बलिरूपिणम् ॥ चंडिकाप्रीतिदानेन दातुरापद्विनाशनम् ॥ चामुंडा बलिरूपाय बले तुभ्यं नमोस्तु ते" इति प्रार्थ्य ॥ "यज्ञार्थं बलयः सृष्टाः स्वयमेव स्वयंभुवा ॥ अतस्त्वां घातयाम्यद्य तस्माद्यज्ञेऽवधो विधिः" ॥ ॐ ह्रीं ऐं ह्रीं कौशिकि कूष्मांडरसेनाप्यायताम् ॥ पादौ प्रक्षाल्याचम्य शांतापृथिवीति शांतिः शांतिः शांतिः ॥ ततः अखंडदीपकं देव्याः प्रीतये नवरात्रकम् ॥ "उज्ज्वालयेदहोरात्रमेकचित्तो धृतव्रतः" इत्यखंडदीपं प्रतिष्ठापयेत् ॥

## अथ चंडीपाठप्रकारः ।

यजमानेन वृतोहं चंडीसप्तशतीपाठं नारायणहृदयलक्ष्मीहृदयपाठं वा करिष्ये इत्यादि संकल्प्य ॥ आसनादि विधाय आधारे अन्यहस्तलिखितं पुस्तकं स्थापयित्वा 'नारायणं नमस्कृत्य' इति वचनात् ॥ ॐ नारायणाय नमः ॥ नराय नरोत्तमाय नमः ॥ देव्यै सरस्वत्यै नमः ॥ व्यासाय नमः ॥ इति नमस्कृत्य प्रणवमुच्चार्य सर्वपाठांते प्रणवं पठेत् ॥ पुस्तकवाचने नियमाः ॥ हस्ते पुस्तकं न धारयेत् ॥ स्वयं ब्राह्मणभिन्नेन च लिखितं विफलम् ॥ "अध्यायं प्राप्य विरमेन्न तु मध्ये कदाचन ॥ कृते विरामे मध्ये तु अध्यायादि पठेत्पुनः" ॥ ग्रंथार्थं बुध्यमानः स्पष्टाक्षरं नातिशीघ्रं नातिमंदं रसभावस्वरयुतं वाचयेत् ॥

## अथ काम्यपाठः ।

त्रिवर्गफलकामेन चंडीपाठः सदैव कर्तव्यः ॥ "तस्मात्[illegible]मैतन्माहात्म्यं पठितव्यं समाहितैः ॥ श्रोतव्यं च सदा भक्त्या" इत्यादिवचनात् ॥ नैमित्तिकपाठोप्युक्तः ॥ "शांतिकर्मणि सर्वत्र तथा दुःस्वप्नदर्शने ॥ ग्रहपीडासु चोग्रासु माहात्म्यं शृणुयान्मम" इति ॥ तथा ॥ "अरण्ये प्रांतरे वापि दावाग्निपरिवारितः ॥ दस्युभिर्वा वृतः शून्ये गृहीतो वापि शत्रुभिः" ॥ इत्यादिसंकटान्युद्दिश्य ॥ "सर्वबाधासु घोरासु वेदनाभ्यर्दितोपि वा ॥ स्मरन्ममैतन्माहात्म्यं नरो मुच्येत संकटात्" इत्युक्तम् ॥

## अथ कामनार्थे पाठसंख्या ।

उपसर्गोपशांत्यर्थं त्रयः पाठाः कार्याः ॥ ग्रहपीडाशांतये पंच ॥ महाभये सप्त ॥ शांत्यर्थं वाजपेयफलार्थं च नव ॥ राजवश्यार्थमेकादश ॥ वैरिनाशार्थं द्वादश ॥ स्त्रीपुंवश्यार्थं चतुर्दश ॥ सौख्याय लक्ष्म्यर्थं च पंचदश ॥ पुत्रपौत्रधनधान्यार्थं षोडश ॥ राजभयनाशाय सप्तदश ॥ उच्चाटनायाष्टादश ॥ वनभये विंशतिः ॥ बंधमोचनाय पंचविंशतिः ॥ दुश्चिकित्स्यरोगकुलच्छेदायुर्नाशवैरिवृद्धिव्याधिवृद्धित्रिविधोत्पातादिमहासंकटनाशो राज्यवृद्धिश्च शतावृत्तिभिः ॥ सहस्रावर्तनैः शताश्वमेधफलं सर्वमनोरथाव्याप्तिर्मोक्षश्चेति वाराहीतंत्रे उक्तम् ॥ सर्वत्र काम्यपाठे आदौ संकल्पपूर्वकं पूजनमंते बलिदानं च कार्यम् ॥ अत्राचाराद्वेदपारायणमपि कार्यम् ॥ तद्विधिर्बौधायनोक्तः कौस्तुभे ज्ञेयः ॥

## अथ कुमारीपूजा ।

"एकवर्षा तु या कन्या पूजार्थं तां विवर्जयेत्" ॥ द्विवर्षकन्यामारभ्य दशवर्षावधि कुमारीणां क्रमेण ॥ कुमारिका त्रिमूर्तिः कल्याणी रोहिणी काली चंडिका शांभवी दुर्गा भद्रेति नामानि ॥ आसां कुमारीणां प्रत्येकं पूजामन्त्राः फलविशेषाः लक्षणानि चान्यत्र ज्ञेयानि ॥ ब्राह्मणेन ब्राह्मणीत्येवं सवर्णा प्रशस्ता ॥ विजातीयापि क्वचित्कामनाविशेषेणोक्ता ॥ एकैकवृद्ध्या प्रत्यहमेका वा कुमारी पूज्या ॥ " मन्त्राक्षरमयीं लक्ष्मीं मातृणां रूपधारिणीम् ॥ नवदुर्गात्मिकां साक्षात्कन्यामावाहयाम्यहम् ॥ जगत्पूज्ये जगद्वंद्ये सर्वशक्तिस्वरूपिणि ॥ पूजां गृहाण कौमारि जगन्मातर्नमोस्तु ते " ॥ इति मन्त्रेण पादप्रक्षालनपूर्वकं वस्त्रकुंकुमगन्धधूपदीपभोजनैः पूजयेदिति संक्षेपः कुमारीपूजावद्देवीपूजाचंडीपाठश्चैकोत्तरवृद्ध्यापि विहितः ॥ भवानीसहस्रनामपाठोपि क्वचिदुक्तः ॥ अयं शारदनवरात्रोत्सवो मलमासे निषिद्धः ॥ शुक्रास्तादौ तु भवति ॥ प्रथमारंभस्तु न कार्यः ॥

## अथाशौचे नवरात्रप्रकारः ।

शावाशौचजननाशौचयोस्तु सर्वोपि घटस्थापनादिविधिर्ब्राह्मणद्वारा कार्यः ॥ केचिदारंभोत्तरं मध्ये आशौचपाते स्वयमेवारब्धपूजादिकं कार्यमित्याहुः ॥ शिष्टास्त्वाशौचे पूजादेवतास्पर्शादेर्लोकविद्विष्टत्वादन्येनैव कारयंति ॥ अपरे तु तृतीयादिपञ्चम्यादिसप्तम्याद्यनुकल्पेन नवरात्रविधीनां सम्वात्प्रतिपद्याशौचे तृतीयाद्यनुकल्पाश्रयणं कुर्वंति ॥ सर्वथा लोपप्रसक्तावेव ब्राह्मणद्वारा कुर्वंति ॥ उपवासादि शारीरनियमः स्वयं कार्यः ॥ एवं रजस्वलाप्युपवासादिकं स्वयं कृत्वा पूजादिकमन्येन कारयेत् ॥ अत्र सभर्तृकस्त्रीणामुपवासे गन्धतांबूलादिग्रहणं न दोषायेत्याहुः ॥

## अथ पंचम्यामुपांगललितात्रतम् ।

अत्र पंचमी अपराह्णव्यापिनी ग्राह्या ॥ अपराह्णस्यैव तत्पूजाकालत्वोपपत्तेः ॥ दिनद्वये कात्स्न्र्येनापराह्णव्याप्तौ साम्येन वैषम्येण वापराह्णैकदेशव्याप्तौ च पूर्वैव युग्मवाक्यात् ॥ परत्रैवापराह्णव्याप्तौ पर्वैव ॥ केचित्तु रात्रिव्यापिनीं गृह्णंति पूजादिकं च रात्रावेव कुर्वन्ति तत्र मूलं चिन्त्यम् ॥ अत्र पूजादिविधिर्ग्रंथान्तरे प्रसिद्ध इति न लिख्यते ॥

## अथ पुस्तके सरस्वतीपूजा ।

आश्विनशुक्लपक्षे मूलनक्षत्रे पुस्तकेषु सरस्वतीमावाह्य पूजयेत् ॥ "मूलेषु स्थापनं देव्याः पूर्वाषाढासु पूजनम् ॥ उत्तरासु बलिं दद्याच्छ्रवणेन विसर्जयेत्" इति वचनात् ॥ अत्र "पूजयेत्प्रत्यहम्" इति रुद्रयामलवचनात् मूले आवाहनं तदंगभूतं पूजनं च करिष्य इति संकल्प आवाहनपूजने कार्ये ॥ पूर्वाषाढासु पूजनं करिष्ये इति संकल्प्यावाहनरहितपूजैव केवलम् ॥ उत्तराषाढासु बलिदानं तदंगभूतां पूजां च करिष्य इत्येवं ते कार्ये ॥ श्रवणेन विसर्जनं कर्तुं तदंगभूतां पूजां करिष्ये इति संकल्प्य संपूज्य विसर्जयेदिति क्रमः ॥ तत्र मूलस्य प्रथमे पादे सूर्यास्तात्प्राक् त्रिमुहूर्तव्यापिनि सरस्वत्यावाहनम् ॥ त्रिमुहूर्तन्यूनत्वे रात्रौ वा प्रथमपादसत्त्वे तस्य विशेषवचनं विना ग्राह्यत्वाभावाद्द्वितीयादिपादे परदिने एवावाहनम् ॥ एवं पूर्वाषाढादिनक्षत्रं पूजादौ दिनव्याप्येव ग्राह्यम् ॥ विसर्जनं तु श्रवणप्रथमपादे रात्रिभागगतेपि कार्यं विशेषवचनात् ॥ तच्च रात्रेः प्रथमप्रहरपर्यंतमेवेति भाति ॥

## अथ सप्तम्यादौ पत्रिकापूजा ।

अथ सप्तम्यादिदिनत्रये पत्रिकापूजनं विहितम् ॥ तत्र सप्तम्यादितिथित्रयं सूर्योदये मुहूर्तमात्रमपि ग्राह्यम् ॥ तत्राधिवासनादिप्रयोगविस्तरः कौस्तुभादौ ज्ञेयः ॥ यतु सप्तमीप्रभृति त्रिरात्रं नवरात्रकर्म कुर्वति ॥ तत्र सप्तमी सूर्योदयोत्तरं मुहूर्तार्धिकव्यापिनी ग्राह्या ॥ मुहूर्तन्यूनत्वे पूर्वा ॥

## अथ महाष्टमीनिर्णयः ।

अथ महाष्टमी घटिकामात्राप्यौदयिकी नवमीयुता ग्राह्या ॥ सप्तमी स्वल्पयुता [illegible] त्याज्या ॥ यदा तु पूर्वत्र सप्तमीयुता परत्रोदये नास्ति घटिका न्यूना वा भवति तदा पूर्वा सप्तमीविद्धापि ग्राह्या ॥ इयं भौमवारेतिप्रशस्ता ॥ यदा च पूर्वेद्युः षष्टिघटिकाष्टमी परदिने मुहूर्तादिव्यापिनी तदा नवमीयुतामप्युत्तरां त्यक्त्वा संपूर्णत्वात्पूर्वैव ग्राह्या ॥ एवं नवम्याः क्षयवशेन दशमीदिने सूर्यो-

दयोत्तरमनुवृत्त्यभावेऽष्टमी नवमीयुतामौदयिकीमपि त्यक्त्वा सप्तमीयुतैवाष्टमी ग्राह्या ॥ अष्टम्यां पुत्रवतोपवासो न कार्यः ॥ कुलाचारप्राप्तौ किंचिद्भक्ष्यं प्रकल्प्य कार्यः ॥

## अथ महानवमीनिर्णयः ।

महानवमी तु बलिदानव्यतिरिक्तविषये पूजोपोषणादावष्टमीविद्धा ग्राह्या ॥ सा च यद्यष्टमी दिने सायं त्रिमुहूर्ता स्यात्तदैव ग्राह्या ॥ त्रिमुहूर्तन्यूनत्वे परैव ग्राह्या ॥ नवमीप्रयुक्तमहाबलिदाने तु दशमीविद्धा ॥ यदा शुद्धाधिका नवमी तदा बलिदानमपि पूर्णत्वात्पूर्वत्रैव कार्यम् ॥ अष्टमीनवम्योः संधौ पूजोक्ता साष्टमीनवम्योः पृथक्के दिवारात्रौ वाष्टम्यंतनाडीनवम्याद्यनाड्योः कार्या ॥ यदि त्वष्टमीनवम्योर्मध्याह्नेऽपराह्णे वा योगस्तदाष्टमीनवमीपूजयोरप्येकदिने एव प्राप्तेरष्टमीनवमीपूजां तत्संधिपूजां च तंत्रेण करिष्ये इति संकल्प्य तंत्रेण पूजा कार्या ॥ यदि शुद्धाधिकाष्टमी तदा पूर्वेद्युरष्टमीपूजा ॥ परेद्युः संधिपूजा नवमीपूजयोस्तंत्रम् ॥ अत्र नवरात्रे स्वयं पूजादिकं कर्तुमशक्तावन्येन कारयेत्॥षोडशोपचारपूजाविस्तरं कर्तुमशक्तो गंधादिपंचोपचारपूजां कुर्यात् ॥

## अथ नवमीहोमकालः ।

नवम्यां पूजां विधाय होमः कार्यः ॥ केचिदष्टम्यामेव होम इत्याहुः ॥ अन्ये त्वष्टम्यामुपक्रम्य नवम्यां होमः समापनीयः ॥ स चारुणोदयमारभ्य सायंकालपर्यंतमष्टमीनवम्योः संधौ संभवति ॥ निशायां तत्संधौ तु रात्रौ होमादेरयोग्यत्वान्नवम्यामेव होमोपक्रमसमाप्ती कार्ये इत्याहुः ॥ अत्र यथाकुलाचारं व्यवस्था ॥

## अथ होममंत्रपक्षाः ।

स च होमो नवार्णमंत्रेण कार्यः ॥ अथवा 'जयंती मंगलाकाली' इति श्लोकेन ॥ अथवा "नमो देव्यै महादेव्यै" इति श्लोकेन ॥ अथवा सप्तशतीश्लोकैः ॥ अथवा सप्तशतीस्तोत्रस्य सप्तशतमंत्रैः कवचार्गलाकीलकरहस्यत्रयश्लोकसंहितैर्होमः सप्तशतीमंत्रविभागोऽन्यत्र ज्ञेयः ॥ अत्रापि विकल्पेषु यथाकुलाचारं व्यवस्था ॥ होमद्रव्यं च सर्पिर्मिश्रितं शुक्लतिलमिश्रितं च पायसं केवलतिलैर्वा होमः ॥ क्वचित्किंशुकपुष्पदूर्वासर्षपलाजपूगयवश्रीफलरक्तचंदनखंडनानाविधफलानामपि पायसे मिश्रणं कार्यमित्युक्तम् ॥ होमश्च जपदशांशेन कार्यः ॥ कुलाचारप्राप्तश्चेन्नृसिंहभैरवादिदैवत्यमंत्रे होमोपि कार्यः ॥ अत्र सविस्तरः सग्रहमखो होमप्रयोगः कौस्तुभे ज्ञेयः ॥

## अथ बलिदाननिर्णयः ।

ब्राह्मणेन माषादिमिश्रान्नेन कूष्मांडेन वा कार्यम् ॥ यद्वा ॥ घृतमयं यवपिष्टादिमयं वा सिंहव्याघ्रनरमेषादिकं कृत्वा खड्गेन घातयेत् ॥ ब्राह्मणेन पशुमांसमद्यादिबलिदाने ब्राह्मण्यभ्रष्टता ॥ सकामेन क्षत्रियादिना सिंहव्याघ्रनरमहिषच्छागसूकरमृगपक्षिमत्स्यनकुलगोधादिप्राणिस्वगात्ररुधिरादिमयो बलिर्देयः ॥ कृष्णसारमृगः क्षत्रियादिभिरपि न देयः ॥ अत्र बलिदानमंत्रादिप्रकारः सिंधौ ज्ञेयः ॥ अत्र शतचंडीसहस्रचंडीप्रयोगः कौस्तुभादौ ज्ञेयः ॥

## अथाशौचे समाप्तिनिर्णयः ।

द्विविधाशौचेपि नवम्यां होमं घटादिदेवतोत्थापनं च ब्राह्मणद्वारा कारयित्वा स्वयं पारणं कृत्वा आशौचांते ब्राह्मणभोजनं दक्षिणादिदानं च कार्यम् ॥ एवं रजस्वलापि पारणकाले पारणं कृत्वा शुद्धौ दानादिकं कुर्यात् ॥ विधवायास्तु रजोदोषे भोजननिषेधात्पारणापि शुद्ध्युत्तरमेव ॥ एवं व्रतांतरेप्यूह्यम् ॥

## अथ लोहाभिसारिकं कर्म ।

प्रतिपदादि यावदष्टमी लोहाभिसारिकं कर्म राज्ञां विहितम् ॥ तत्र छत्रचामरादिराजचिह्नानां गजाश्वादीनां चापादिशस्त्राणां दुंदुभ्यादीनां च पूजाहोमादिकं कार्यम् ॥

## अथाश्वपूजादि ।

ये हयान्पालयंति ते राजभिन्ना अपि स्वातीयुतामाश्विनप्रतिपदं द्वितीयां वारभ्य नवमीपर्यंतं वाजिनीराजनाख्यं कर्म कुर्युः ॥ तत्रोच्चैःश्रवःपूजा रैवतपूजा च प्रतिमायां कार्या ॥ प्रत्यक्षमश्वपूजा नीराजनं च कार्यम् ॥ कर्मद्वयेपि तत्पूजामंत्रा होमादिमंत्राः सविस्तरप्रयोगश्च कौस्तुभे ॥ इदानीमश्वंतः प्राकृतजनास्तु विजयादशम्यामश्वान् तोयेऽवगाह्य पुष्पमालादिभिर्विभूष्याश्वशालायां प्रवेशयंति ॥ तत्र ॥ "गंधर्वकुलजातस्त्वं मा भूयाः कुलदूषकः ॥ ब्राह्मणः सत्यवाक्येन सोमस्य वरुणस्य च ॥ प्रभावाच्च हुताशस्य वर्धयत्वं तुरंगमान् ॥ रिपून्विजित्य समरे सह भर्त्रा सुखी भव" इति मंत्रेण केवलाश्वपूजापि कर्तुमुचिता ॥

## अथ पारणाविसर्जनयोः कालः ।

तत्र विसर्जनं दशम्यां कार्यम् ॥ दिनद्वये दशमीसत्त्वे पूर्वदशम्यां श्रवणांत्यपादयोगे तत्रैव विसर्जनम् ॥ तत्र तद्योगाभावे तु परदशम्यामेव ॥ परत्र दशम्यभावे पूर्वदशम्यां नक्षत्रयोगे सत्यसति वा कार्यं नक्षत्रयोगानुरोधेन क्रियमाणं विसर्जनमपराह्णेपि भवति अन्यथा प्रातरेव ॥ तत्र मृदादिप्रतिमाया विसर्जनपूर्वकं जलादौ

त्यागः ॥ परंपरया पूजिताया धातुप्रतिमायास्तु घटादिस्थापनादुत्तिष्ठेत्यादिमंत्रैरुत्थापनमात्रं कार्यं न तु विसर्जनम् ॥ यद्दिने विजर्सनं तत्रैव नियमत्यागस्यौचित्यात् ॥ विसर्जनोत्तरं तद्दिने एव पारणं कार्यम् ॥ अन्ये तु सत्यपि दशम्यां विसर्जनविधौ नवम्यामेव पारणं कार्यम् ॥ नवम्यां पारणं कुर्यादशम्यामभिषेकं च कृत्वा मूर्तिं विसर्जयेदित्यादिवचनादित्याहुः॥अत्रैवं व्यवस्था॥प्रथमदिने स्वल्पाष्टम्या युक्ता नवमी द्वितीयदिने पारणपर्याप्तनवम्या युक्ता दशमी तत्परदिने श्रवणयुक्ता विसर्जनार्हा दशमी तत्राष्टमीनवम्युपवासयोः प्रथमदिने सिद्धत्वादवशिष्टनवम्यां पारणमवशिष्टदशम्यां विसर्जनम् ॥ यदा तु अवशिष्टनवमीदिने एव दशमी श्रवणनक्षत्रयुक्ता विसर्जनार्हा तदा विसर्जनोत्तरं पारणम् ॥ यदा पूर्वदिने षष्टिदंडाष्टमी परदिनेष्टमीशेषयुता नवमी तत्परदिने नवमीशेषयुता दशमी तदा नवमीयुक्तदशम्यामेव विसर्जनोत्तरं पारणा ॥ अथ नवमी षष्टिदंडा द्वितीयदिने नवमीशेषयुक्ता दशमी तत्रापि नवमीयुक्तदशम्यामेव विसर्जनपारणे ॥ यदा त्वष्टमीनवमीदशम्यस्तिस्रोपि तिथयः सूर्योदयमारभ्यास्तमयपर्यंतमखंडास्तत्तत्कृत्यपर्याप्तास्तदा दाक्षिणात्यानां नवम्यामेव पारणाचासन्नवम्यामेव पारणविसर्जने ॥ येषां दशम्यामेवाचारस्तेषां तदुभयं दशम्यामेव ॥

## अथ विजयादशमी ।

सा परदिन एवापराह्णव्याप्तौ परा ॥ दिनद्वयेऽपराह्णव्याप्तौ दिनद्वयेपि श्रवणयोगे सत्यसति वा पूर्वा ॥ एवं दिनद्वयेऽपराह्णव्याप्त्यभावेपि श्रवणयोगसत्त्वासत्त्वयोः पूर्वैव ॥ दिनद्वयेऽपराह्णव्याप्त्यव्याप्त्योरेकतरदिने श्रवणयोगे यद्दिने श्रवणयोगः सैव ग्राह्या ॥ एवमपराह्णैकदेशव्याप्तावूह्यम् ॥ यदा पूर्वदिने एवापराह्णव्याप्तापरदिने च श्रवणयोगाभावस्तदापि पूर्वैव ॥ यदा तु पूर्वदिने एवापराह्णव्यापिनी परदिने च मुहूर्तत्रयादिव्यापिनी अपराह्णात् पूर्वमेव समाप्तापरत्रैव श्रवणयोगवती तदा परैव ॥ अपराह्णे दशम्यभावेपि ॥ "यां तिथिं समनुप्राप्य उदयं याति भास्करः" इत्यादिसाकल्यवचनैः श्रवणयुक्ताया ग्राह्याया औदयिकस्वल्पदशम्याः कर्मकालेसत्त्वापादनात् ॥ सिंधौ त्विदं परदिनेऽपराह्णकाले श्रवणसत्त्वे एव ॥ श्रवणस्याप्यपराह्णात्पूर्वमेव समाप्तौ तु पूर्वैवेत्युक्तम् ॥ युक्तं चैतत् ॥ यदा परदिने एवापराह्णव्याप्तिः पूर्वदिने एवापराह्णात्परत्र सायाह्नादौ श्रवणयोगस्तदा तु परैव ग्राह्येति मम प्रतिभाति ॥ अत्रापराजितापूजनं सीमोल्लंघनं शमीपूजनं देशांतरयात्रार्थिनां प्रस्थानं च विहितम् ॥ तत्पूजाप्रकारस्त्वपराह्णे ग्रामादीशान्यां दिशि गत्वा शुचिदेशे भुवमुपलिप्य चंदनादिनाष्टदलमालिख्य ॥ मम सकुटुंबस्य क्षेमसिद्ध्यर्थमपराजितापूजनं करिष्ये इति संकल्प्य ॥ मध्ये अपराजितायै नम इत्य-

पराजितामावाह्य तद्दक्षिणे क्रियाशक्त्यै नम इति जयां वामत उमायै नम इति विजयां चावाह्य ॥ अपराजितायै नमः ॥ जयायै नमः ॥ विजयायै नमः ॥ इति नाममंत्रैः षोडशोपचारपूजां कृत्वा प्रार्थयेत् ॥ "इमां पूजां मया देवि यथाशक्ति निवेदिताम् ॥ रक्षार्थं तु समादाय व्रज स्वस्थानमुत्तमम्" इति॥ अथ राज्ञः संकल्पे यात्रायां विजयसिद्ध्यर्थमिति विशेषः ॥ पूजानमस्कारांते ॥ "हारेण तु विचित्रेण भास्वत्कनकमेखला ॥ अपराजिता भद्ररता करोतु विजयं मम" इत्यादिमन्त्रैर्विजयं प्रार्थ्य पूर्ववद्विसृजेदिति संक्षेपः ॥

## अथ शमीपूजनमन्त्रादि ।

ततः सर्वे जनाः ग्रामाद्बहिरीशानदिगवस्थितां शमीं गत्वा पूजयेयुः ॥ सीमोल्लंघनं तु शमीपूजनात्पूर्वं पश्चाद्वा कार्यम् ॥ राजा त्वश्वमारुह्य सहपुरोहितः सामात्यः शमीमूलं गत्वा वाहनादवरुह्य स्वस्तिवाचनपूर्वकं शमीं संपूज्य कार्योद्देशानमात्यैः सह संवदन्प्रदक्षिणां कुर्यात् ॥ पूजाप्रकारस्तु ॥ मम दुष्कृतामंगलादिनिरासार्थं क्षेमार्थयात्रायां विजयार्थं च शमीपूजां करिष्ये ॥ शम्यलाभे अश्मंतकवृक्षपूजनं करिष्ये इति संकल्पः ॥ राजा तु शमीमूले दिक्पालपूजां वास्तुदेवतापूजां च कुर्यात् ॥ " अमंगलानां शमनीं शमनीं दुष्कृतस्य च ॥ दुःस्वप्ननाशिनीं धन्यां प्रपद्येहं शमीं शुभाम्" इति पूजामन्त्रः ॥ पूजांते ॥ " शमी शमयते पापं शमी लोहितकंटका ॥ धरिष्यर्जुनबाणानां रामस्य प्रियवादिनी ॥ करिष्यमाणयात्रायां यथाकालं सुखं मया ॥ तत्र निर्विघ्नकर्त्री त्वं भव श्रीरामपूजिते" इति प्रार्थयेत् ॥ अश्मंतकपूजने ॥ " अश्मंतक महावृक्ष महादोषनिवारण ॥ इष्टानां दर्शनं देहि शत्रूणां च विनाशनम् " इति प्रार्थयेत् ॥ राजा शत्रोर्मूर्त्तिं कृत्वा शस्त्रेण विध्येत् ॥ प्राकृताः शमीशाखाश्छित्त्वा आनयन्ति तन्निर्मूलम् ॥ "गृहीत्वा साक्षतामार्द्रां शमीमूलगतां मृदम् ॥ गीतवादित्रनिर्घोषैरानयेत्स्वगृहं प्रति ॥ ततो भूषणवस्त्रादि धारयेत्स्वजनैः सह ॥ नीराज्यमानः पुण्याभिर्युवतीभिः सुमंगलम् " इति ॥

## अथ देशांतरं गच्छतो यात्राकालः ।

अत्र देशांतरं जिगमिषुभिर्विजयमुहूर्ते चन्द्राद्यानुकूल्याभावेपि प्रयाणं कार्यम् ॥ तत्र विजयमुहूर्तो द्विविधः ॥ " ईषत्सन्ध्यामतिक्रम्य किंचिदुद्भिन्नतारकः ॥ विजयो नाम कालोयं सर्वकामार्थसाधकः" इत्येकः ॥ "एकादशो मुहूर्तोपि विजयः परिकीर्तितः ॥ तस्मिन्सर्वैर्विधातव्या यात्रा विजयकांक्षिभिः" इत्यपरः ॥ उक्तद्वयान्यतरमुहूर्ते दशमीयुक्ते प्रस्थानं कार्यं न त्वेकादशीयुक्ते॥ "आश्वयुक्शुक्लदशमी विजयाख्याखिले शुभा॥ प्रयाणे तु विशेषेण किं पुनः श्रवणान्विता" इति ज्योतिर्ग्रंथोक्तैरन्यान्यपि कर्माणि मासविशेषनिरपेक्षाण्यत्र चन्द्राद्यानुकूल्याभावेप्यनुष्ठे-

यानि ॥ मासविशेषे विहितानि तु चूडाकर्मविष्ण्वादिदेवताप्रतिष्ठादीनि न कुर्यात् ॥ राज्ञां पट्टाभिषेके नवमीविद्धा दशमी श्रवणयुतापि न ग्राह्या किं त्वौदयिक्येव ग्राह्या ॥

## अथ कार्तिकस्नानविधिः ।

आश्विनस्य शुक्लां दशमीमेकादशीं पौर्णमासीं वारभ्य मुहूर्तावशिष्टायां रात्रौ तीर्थादौ गत्वा प्रत्यहं मासपर्यंतं कार्तिकस्नानं कार्यम् ॥ तत्प्रकारः विष्णुं स्मृत्वा देशकालौ संकीर्त्य ॥ " नमः कमलनाभाय नमस्ते जलशायिने ॥ नमस्तेस्तु हृषीकेश गृहाणार्घ्यं नमोस्तु ते " इत्यर्घ्यं दत्त्वा ॥ "कार्तिकेहं करिष्यामि प्रातःस्नानं जनार्दन ॥ प्रीत्यर्थं तव देवेश दामोदर मया सह ॥ ध्यात्वाहं त्वां च देवेश जलेस्मिन्स्नातुमुद्यतः ॥ तव प्रसादात्पापं मे दामोदर विनश्यतु " ॥ इति मन्त्राभ्यां स्नात्वा पुनरर्घ्यं द्विर्दद्यात् ॥ तत्र मन्त्रौ ॥"नित्ये नैमित्तिके कृष्ण कार्तिके पापनाशने ॥ गृहाणार्घ्यं मया दत्तं राधया सहितो हरे ॥ व्रतिनः कार्तिके मासि स्नातस्य विधिवन्मम ॥ गृहाणार्घ्यं मया दत्तं राधया सहितो हरे"॥ कुरुक्षेत्रगंगापुष्करादितीर्थविशेषेण फलविशेषः ॥ अथान्योपि विशेषः ॥ "कार्तिकं सकलं मासं नित्यस्नायी जितेन्द्रियः ॥ जपन्हविष्यभुक् शान्तः सर्वपापैः प्रमुच्यते ॥ स्मृत्वा भागीरथीं विष्णुं शिवं सूर्यं जलं विशेत् ॥ नाभिमात्रे जले तिष्ठन्व्रती स्नायाद्यथाविधि"॥ इदं कार्तिकस्नानं प्रातःस्नानं प्रातःसन्ध्यां च कृत्वा कार्यम् ॥ ताभ्यां विनेतरकर्मानधिकारात् ॥ यद्यपि प्रातःसंध्यायाः सूर्योदये समाप्तिस्तथाप्यत्र वचनबलादुदयात्पूर्वं सन्ध्यां समाप्य कार्तिकस्नानं कार्यमिति निर्णयसिन्धावुक्तम् ॥ न चैवं ग्रन्थांतरे दृश्यते ॥ एवं मासस्नानाशक्तौ त्र्यहं स्नायात् ॥

## अथ मासव्रतानि ।

अन्येषामपि कार्तिकमासव्रतानामत्रैवारंभः ॥ तानि यथा ॥ " तुलसीदललक्षेण कार्तिके योर्चयेद्धरिम् ॥ पत्रेपत्रे मुनिश्रेष्ठ मौक्तिकं लभते फलम् " ॥ तुलसीमंजरीभिर्हरिहरार्चने मुक्तिः फलम् ॥ रोपणपालनस्पर्शैः पापक्षयः ॥ तुलसीछायायां श्राद्धात्पितृतृप्तिस्तुलसीशोभितगृहे तीर्थरूपे यमकिंकरा नायांति ॥ इत्यादि तुलसीमाहात्म्यम् ॥ एवं धात्रीमाहात्म्यमपि ॥ "कार्तिके धात्रिवृक्षाधश्चित्रान्नैस्तोषयेद्धरिम् ॥ ब्राह्मणान्भोजयेद्भक्त्या स्वयं भुंजीत बन्धुभिः" ॥ धात्रीछायासु श्राद्धं धात्रीपत्रैः फलैश्च हरिपूजनं च महाफलम् ॥ देवर्षिसर्वयज्ञतीर्थानां धात्रीवृक्षे निवासोक्तेः ॥

## अत्रैव हरिजागरविधिः ।

" जागरं कार्तिके मासि यः कुर्यादरुणोदये ॥ दामोदराग्रे सेनानीर्गोसहस्रफलं

लभेत् ॥ शिवविष्णुगृहाभावे सर्वदेवालयेष्वपि ॥ कुर्यादश्वत्थमूलेषु तुलसीनां वनेष्वपि ॥ विष्णुनामप्रबंधानि यो गायेद्विष्णुसन्निधौ ॥ गोसहस्रप्रदानस्य फलमाप्नोति मानवः ॥ वाद्यकृत्पुरुषश्चापि वाजपेयफलं लभेत् ॥ सर्वतीर्थावगाहोत्थं नर्तकः फलमाप्नुयात् ॥ सर्वमेतल्लभेत्पुण्यं तेषां तु द्रव्यदः पुमान् ॥ अर्चनादर्शनाद्वापि तत्षडंशमवाप्नुयात् " इति कौस्तुभे ॥ सर्वाभावे ब्राह्मणानां विष्णुभक्तानां वाश्वत्थवटयोर्वा सेवनं कुर्यादिति तत्रैव ॥

## अथ व्रतांतराणि ।

" सरोरुहाणि तुलसी मालती मुनिपुष्पकम् ॥ कार्तिके विहितान्येवं दीपदानं च पंचमम् " ॥ कार्तिके मासोपवासो वानप्रस्थयतिविधवाभिः कार्यः ॥ गृहस्थैर्न कार्यः ॥ "कृच्छ्रं वाप्यतिकृच्छ्रं वा प्राजापत्यमथापि वा ॥ एकरात्रं व्रतं कुर्यात्त्रिरात्रव्रतमेव वा ॥ शाकाहारं फलाहारं पयोहारमथापि वा ॥ चरेद्यवान्नहारं वा संप्राप्ते कार्तिके व्रती" ॥

## अथ कार्तिके वर्ज्यानि ।

पलांडुलशुनहिंगुच्छत्राकगृंजनमूलकालाबुशिग्रुवृंताककूष्मांडबृहतीफलकलिंगकपित्थतैललवणशाकद्विपाचितान्नपर्युषितान्नदग्धान्नानि माषमुद्गमसूरचणककुलित्थनिष्पावाढक्यादिद्विदलानि च वर्जयेत् ॥ सप्तम्यां धात्रीफलं तिलांश्चाष्टम्यां नालिकेरं रविवारे धात्रीफलं सर्वदा वर्ज्यम् ॥

## मासव्रते दानानि ।

कांस्यपात्रे भोजनवर्जनव्रते कांस्यपात्रं घृतपूर्णं दद्यात् ॥ मधुत्यागे घृतपायसशर्करादानं समाप्तौ कार्यम् ॥ तैलत्यागे तिलदानम् ॥ कार्तिके मौनभोजी सतिलां घण्टां दद्यात् ॥ स्वर्णयुतानि माषयुतानि त्रिंशत्कूष्मांडान्यत्र मासे दद्यात् ॥ कार्तिके कांस्यभोजी कृमिभुक् ॥ फलवर्जने फलं रसत्यागे रसः धान्यत्यागे धान्यानि च देयानि सर्वत्र गोदानं वा ॥ "एकतः सर्वदानानि दीपदानं तथैकतः ॥ कार्तिके दीपदानस्य कलां नार्हति षोडशीम् " एतावद्व्रतासंभवे चातुर्मास्यव्रतासंभवे कार्तिके किंचिद्व्रतमवश्यं कार्यम् ॥ "अव्रतः कार्तिको येषां गतो मूढधियामिह ॥ तेषां पुण्यस्य लेशोपि न भवेत्सूकरात्मनाम् " इत्युक्तेः ॥ शालग्रामादिदेवताग्रे स्वस्तिकमण्डलादिकं रंगवल्ल्यादिना करोति सा स्वर्गादिफलं भुक्त्वा सप्तजन्मसु वैधव्यं नाप्नोति ॥ कार्तिके पुराणेतिहासश्रवणारंभसमाप्ती विहिते ॥ तत्प्रकारः ॥ "ब्राह्मणं वाचकं कुर्यान्नान्यवर्णजमादरात् ॥ श्रावयेच्चतुरो वर्णान्कृत्वा ब्राह्मणमग्रतः ॥ विस्पष्टमद्भुतं शांतं स्पष्टाक्षरपदं तथा ॥ कलास्वरसमायुक्तं रसभावसमन्वितम् ॥ ब्राह्मणादिषु सर्वेषु ग्रन्थार्थं चार्पयेन्नृप ॥ य एवं वाचयेद्राजन्म विप्रो

व्यास उच्यते ॥ समाप्तेषु पुराणेषु शक्त्या तं तर्पयेन्नृप ॥ वाचकः पूजितो येन प्रसन्नास्तस्य देवताः ॥ श्राद्धे यस्य द्विजो भुंक्ते वाचकः श्रद्धयान्वितः ॥ भवंति पितरस्तस्य तृप्ता वर्षशतं नृप " इति ॥ कार्तिकस्नानकालेभिलाषाष्टकं काशीखंडोक्तं पुत्रकामेन पठितव्यम् ॥ अत्रैव दुग्धव्रतं समर्प्य दुग्धदानं कृत्वा द्विदलव्रतं संकल्पयेत् ॥ अत्रोत्पत्तौ येषां दलद्वयं दृश्यते ते वर्जनीया इत्येके ॥ अन्ये त्वेवं लक्षणायां वचनाभावात्स्वरूपतो येषां द्विदलं दृश्यते ते वर्ज्या न त्वन्ये नापि पत्रपुष्पादिकमित्याहुः ॥ एवमन्यान्यपि तांबूलकेशकर्तनादिवर्जनरूपाणि व्रतानि ज्ञेयानि ॥

## अथात्राकाशदीप उक्तः ।

सूर्यास्ते गृहाददूरे पुरुषप्रमाणं यज्ञियं काष्ठं भूमौ निखन्य तस्य मूर्ध्न्यष्टदलाद्याकृतिनिर्मिते दीपयंत्रमध्ये मुख्यदीपं समंततोष्टाविति संस्थाप्य निवेदयेत्॥ "दामोदराय नभसि तुलायां दोलया सह ॥ प्रदीपं ते प्रयच्छामि नमोनंताय वेधसे" इति मंत्रः ॥ एवं मासमाकाशदीपदानान्महच्छ्रीप्राप्तिः ॥

## अथ कोजागरव्रतम् ।

आश्विनपौर्णमास्यां कोजागरव्रतम् ॥ सा पूर्वत्रैव निशीथव्याप्तौ पूर्वा ॥ उत्तरदिने एव दिनद्वयेपि वा निशीथव्याप्तौ दिनद्वये निशीथास्पर्शे वोत्तरैव॥ केचित्पूर्वदिने निशीथव्याप्तिरेव परदिने प्रदोषव्याप्तिरेव तदा परेत्याहुः ॥ अत्र लक्ष्मीद्वयोः पूजनं जागरणमक्षक्रीडा च विहिता ॥ तत्र पद्मासनस्थां लक्ष्मीं ध्यात्वाक्षतपुंजे ॐलक्ष्म्यै नम इत्यावाहनादिषोडशोपचारैः संपूज्य ॥ "नमस्ते सर्वदेवानां वरदासि हरिप्रिये ॥ या गतिस्त्वत्प्रपन्नानां सा मे भूयात्त्वदर्चनात्" इति पुष्पांजलिं दत्त्वा नमेत् ॥ "चतुर्दंतसमारूढो वज्रपाणिः पुरंदरः ॥ शचीपतिश्च ध्यातव्यो नानाभरणभूषितः" इति ध्यात्वाऽक्षतपुंजादाविंद्राय नम इति संपूज्य ॥ "विचित्रैरावतस्थाय भास्वत्कुलिशपाणये ॥ पौलोम्यालिंगितांगाय सहस्राक्षाय ते नमः" इति पुष्पांजलिं दत्त्वा नमेत् ॥ "नारीकेरोदकं पीत्वा अक्षक्रीडां समारभेत् ॥ निशीथे वरदा लक्ष्मीः को जागर्तीति भाषिणी ॥ तस्मै वित्तं प्रयच्छामि अक्षैः क्रीडां करोति यः" ॥ नारीकेरान्पृथुकांश्च देवेभ्यः पितृभ्यः समर्प्य बंधुभिः सह स्वयं भक्षयेत् ॥ अस्यामेवाश्वयुजीकर्माश्वलायनैः कार्यम् ॥ तच्च पर्वद्वैधे पूर्वाह्णसंधौ शेषपर्वणि प्रकृतीष्टिं कृत्वा कार्यम् ॥ अपराह्णसंधौ विकृतिमिमां कृत्वा प्रकृतेरन्वाधानम् ॥ तत्प्रयोगोन्यत्र ज्ञेयः ॥

## अथाग्रयणकालः ।

आश्विनकार्तिकयोः पौर्णमास्याममावास्यायां वा शुक्लपक्षगतकृत्तिकादिविशा-

कार्यम् ॥ इमामेव द्वादशीमारभ्य पंचसु दिनेषु पूर्वरात्रे नीराजनविधिर्नारदेनोक्तः ॥ " नीराजयेयुर्देवांश्च विप्रान् गाश्च तुरंगमान् ॥ ज्येष्ठाञ्ज्येष्ठाञ्जघन्यांश्च मातृमुख्याश्च योषितः " इति ॥ त्रयोदश्यामपमृत्युनाशार्थं यमाय निशामुखे बहिर्दीपो देयः ॥

## अथ गोत्रिरात्रव्रतम् ।

इमामेव त्रयोदशीमारभ्य गोत्रिरात्रव्रतमुक्तम् ॥ तत्प्रयोगः कौस्तुभे ॥

## अथाश्विनकृष्णनरकचतुर्दशी ।

आश्विनकृष्णचतुर्दश्यां चन्द्रोदयव्यापिन्यां नरकभीरुभिस्तिलतैलेनाभ्यंगस्नानं कार्यम् ॥ अत्र रात्र्यंत्ययाममारभ्यारुणोदयावधिस्ततश्चंद्रोदयावधिस्ततःसूर्योदयावधिरिति कालत्रये पूर्वपूर्वो जघन्य उत्तरोत्तरः श्रेष्ठः अतश्चंद्रोदयोत्तरो मुख्यः कालः प्रातःकालो गौणः ॥ तत्र पूर्वदिने एव चंद्रोदयव्याप्तौ पूर्वा ॥ परत्रैव तद्व्याप्तौ परा ॥ अस्मिन्पक्षे तद्दिनेऽस्तमयादिकाले विहितमुल्कादानदीपदानादिकं तत्काले चतुर्दश्यभावेपि कार्यम् ॥ दिनद्वये चंद्रोदयव्याप्तौ पूर्वा ॥ दिनद्वये चंद्रोदयाव्याप्तौ पक्षत्रयं संभवति ॥ पूर्वत्र चंद्रोदयोत्तरमुषःकालं सूर्योदयं च व्याप्य प्रवृत्ता चतुर्दशी परत्र चंद्रोदयात्पूर्वं समाप्ता ॥ यथा त्रयोदशी घट्यः ५८ पलानि ५० चतुर्दशी ५७ अस्मिन्प्रथमपक्षे उषःकालैकदेशे चतुर्दशीयुक्तेभ्यंगस्नानं कार्यम् ॥ अथ पूर्वत्र सूर्योदयमात्रं व्याप्य प्रवृत्ता परत्र चंद्रोदयात्पूर्वं समाप्ता ॥ अथवा सूर्योदयास्पर्शेन क्षय एव चतुर्दश्याः ॥ यथा त्रयोदशी ५९ पलानि ५९ चतुर्दशी ५७ यथा वा त्रयोदशी २ तद्दिने चतुर्दशी ५४ अत्र पक्षद्वये परत्र चंद्रोदयेभ्यंगस्नानम् ॥ चतुर्थयामादिजघन्यकाले चतुर्दशीव्याप्तिसत्त्वात् ॥ एतत्पक्षद्वये केचिदरुणोदयात्पूर्वमपि चतुर्दशीमध्ये एव स्नानं कार्यमिति वदंति ॥ अपरे वरुणोदयोत्तरं चंद्रोदयादिकालेऽमावास्यायुक्तेपि स्नानमिति वदंति ॥ यत्तु चतुर्दशीक्षये पूर्वत्र त्रयोदश्यां चंद्रोदये स्नानमित्याहुस्तदयुक्तम् ॥अत्राभ्यंगस्नाने विशेषः ॥ "सीतालोष्टसमायुक्त सकंटकदलान्वित ॥ हर पापमपामार्ग भ्राम्यमाणः पुनःपुनः" इति मंत्रेण लांगलोद्धृतलोष्टयुतापामार्गतुंबीचक्रमर्दनशाखानां स्नानमध्ये त्रिवारं भ्रामणं कार्यम् ॥ अभ्यंगस्नानोत्तरं तिलकादि कृत्वा कार्तिकस्नानं कार्यम् ॥ उक्तकालेषु स्नानासंभवे सूर्योदयोत्तरं गौणकालेपि यत्यादिभिरप्यवश्यमभ्यंगस्नानं कार्यम् ॥

## अथात्र यमतर्पणम् ।

कार्तिकस्नानोत्तरं यमतर्पणं कार्यम् ॥ तद्यथा ॥ यमाय नमः यमं तर्पयामीत्युक्त्वा तिलमिश्रांस्त्रीनंजलीन्सव्येनापसव्येन वा देवतीर्थेन पितृतीर्थेन वा दक्षिणामुखो

दद्यात् ॥ एवमग्रेपि ॥ धर्मराजाय नमः मृत्यवे० अंतकाय० वैवस्वताय० कालाय० सर्वभूतक्षयाय० औदुंबराय० दध्नाय० नीलाय० परमेष्ठिने० वृकोदराय० चित्राय० चित्रगुप्ताय० ॥ जीवत्पितृकस्तु यवैर्देवतीर्थेन सव्येन कुर्यात् ॥ "ततः प्रदोषसमये दीपान्दद्यान्मनोहरान् ॥ देवालये मठे वापि प्राकारोद्यानवीथिषु ॥ गोवाजिहस्तिशालायामेवं घस्रत्रयेपि च" ॥

## अथोल्कादानं दीपप्रज्वालनम् ।

"तुलासंस्थे सहस्रांशौ प्रदोषे भूतदर्शयोः ॥ उल्काहस्ता नराः कुर्युः पितॄणां मार्गदर्शनम्"॥तत्र दानमंत्रः ॥ "अग्निदग्धाश्च ये जीवा येप्यदग्धाः कुले मम ॥ उज्ज्वलज्ज्योतिषा दग्धास्ते यांतु परमां गतिम् ॥ यमलोकं परित्यज्य आगता ये महालये ॥ उज्ज्वलज्ज्योतिषा वर्त्म प्रपश्यंतु व्रजंतु ते" ॥ अस्यां नक्तभोजनं महाफलम् ॥

## अथामावास्याभ्यंगनिर्णयः ।

अथाश्विनामावास्यायां प्रातरभ्यंगः प्रदोषे दीपदानलक्ष्मीपूजनादि विहितम् तत्र सूर्योदयं व्याप्यास्तोत्तरं घटिकाधिकरात्रिव्यापिनि दर्शे सति न संदेहः ॥ अत्र प्रातरभ्यंगदेवपूजादिकं कृत्वापराह्णे पार्वणश्राद्धं कृत्वा प्रदोषसमये दीपदानोल्काप्रदर्शनलक्ष्मीपूजनानि कृत्वा भोजनं कार्यम् ॥ अत्र दर्शे बालवृद्धादिभिर्नैर्दिवा न भोक्तव्यम् ॥ रात्रौ भोक्तव्यमिति विशेषो वाचनिकः ॥ तथा च परदिने एव दिनद्वयेपि वा प्रदोषव्याप्तौ परा ॥ पूर्वत्रैव प्रदोषव्याप्तौ लक्ष्मीपूजनादौ पूर्वा ॥ अभ्यंगस्नानादौ परा ॥ एवमुभयत्र प्रदोषव्याप्त्यभावेपि पुरुषार्थचिंतामणौ तु पूर्वत्रैव व्याप्तिरिति पक्षे परत्र यामत्रयाधिकव्यापिदर्शे दर्शापेक्षया प्रतिपद्वृद्धिसत्त्वे लक्ष्मीपूजादिकमपि परत्रैवेत्युक्तम् ॥ एतन्मते उभयत्र प्रदोषाव्याप्तिपक्षेपि परत्र दर्शस्य सार्धयामत्रयाधिकव्याप्तित्वात्परैव युक्तेति भाति ॥ चतुर्दश्यादिदिनत्रयेपि दीपावलिसंज्ञके यत्रयत्राह्नि स्वातीनक्षत्रयोगस्तस्यतस्य प्राशस्त्यातिशयः अस्यामेव निशीथोत्तरं नगरस्त्रीभिः स्वगृहांगणादलक्ष्मीनिःसारणं कार्यम् ॥ ॥ इति श्रीमदनंतोपाध्यायसूनुकाशीनाथोपाध्यायविरचिते धर्मसिन्धुसारे द्वितीयपरिच्छेदे आश्विनमासकृत्यनिर्णयोद्देशः ॥

## अथ कार्तिकमासः ।

वृश्चिकसंक्रांतौ पूर्वाः षोडश नाद्याः पुण्याः शेषं प्राग्वत् ॥ अथ कार्तिकशुक्लप्रतिपत्कृत्यम् ॥ अत्राभ्यंग आवश्यकः ॥ एवं चतुर्दश्यादिदिनत्रयेभ्यंगाद्युत्सवस्याकरणे नरकादिदोषश्रवणात्करणे लक्ष्मीप्राप्त्यलक्ष्मीपरिहारादिफलश्रवणाच्च नित्यकाम्योभयरूपत्वम् ॥

## अथ बलिपूजानिर्णयः ।

अस्यां प्रतिपदि बलिपूजा दीपोत्सवो गोक्रीडनं गोवर्धनपूजा मार्गपालीबन्धनं वष्टिकाकर्षणं नववस्त्रादिधारणाद्युत्सवो द्यूतं नारीकर्तृकनीराजनं मंगलमालिका चेत्येवमादीनि कृत्यानि ॥

## अथात्र प्रतिपत्पूर्वासंभवे परत्र सर्वा ग्राह्या ।

तत्र यद्युदयं व्याप्य दशमुहूर्ता प्रतिपत्तदा चन्द्रदर्शनाभावाच्चंद्रदर्शनप्रयुक्तद्वितीयावेधनिषेधाप्रवृत्तेः सर्वकार्याणि परप्रतिपद्येव भवन्ति ॥ इष्टिनिर्णयप्रकरणे त्रिमुहूर्त्तोद्वितीयाप्रवेशमात्रेण चन्द्रदर्शनमुक्तं तत्सूक्ष्मदर्शनाभिप्रायम् ॥ अत्र तु स्थूलदर्शनमेव निषेधप्रयोजकं तच्च षण्मुहूर्तोद्वितीयाप्रवेश एवेति न विरोध इति भाति ॥ यदि नवमुहूर्तो नास्ति तदा बलिपूजागोक्रीडागोवर्धनपूजामार्गपाली-बंधनवष्टिकाकर्षणानि पूर्वविद्धप्रतिपदि कार्याणि ॥ अभ्यंगनववस्त्रादिधारणद्यूत-नारीकर्तृकनीराजनमंगलमालिकादीन्यौदयिकमुहूर्तव्यापिन्यामपि कार्याणि ॥ बलिपूजादेः केनचिन्निमित्तेन पूर्वविद्धायामनुष्ठानासंभवे परविद्धायामनुष्ठानं कार्यं न तु कर्मत्यागस्तिथ्यंतरपरिग्रहो वा ॥ यथा बौधायनीयाद्यैः स्वस्वसूत्रोक्तानुष्ठानासंभवे आपस्तंबीयादिसूत्रोक्तानुष्ठानं कार्यं न तु कर्मलोपः शाखांतरपरिग्रहो वा तद्वदिति माधवीये स्पष्टम् ॥ तत्र राजा पंचवर्णरंगैर्बलिं द्विभुजमालिख्यान्यजनाः शुक्लतंडुलैर्विरच्य पूजयेयुः ॥ तत्र मंत्रः ॥ "बलिराज नमस्तुभ्यं विरोचनसुत प्रभो ॥ भविष्येंद्र सुरारीते पूजेयं प्रतिगृह्यताम्" ॥ बलिमुद्दिश्य यत्किंचिद्दानकरणेऽक्षय्यं विष्णुप्रीतिकरं तत् ॥ "यो यादृशेन भावेन तिष्ठत्यस्यां मुनीश्वर ॥ हर्षदैन्यादि-रूपेण तस्य वर्षं प्रयाति हि" ॥

## अथास्यां द्यूतविधिः ।

"अस्यां द्यूतं प्रकर्तव्यं प्रभाते सर्वमानवैः ॥ तस्मिन्द्यूते जयो यस्य तस्य संवत्सरं जयः ॥ विशेषवच्च भोक्तव्यं प्रशस्तैर्ब्राह्मणैः सह ॥ बलिराज्ये दीपदाना-त्सदा लक्ष्मीः स्थिरा भवेत् ॥ दीपैर्नीराजनादत्र सैषा दीपावलिः स्मृता ॥ बलि-राज्यं समासाद्य यैर्न दीपावलिः कृता ॥ तेषां गृहे कथं दीपाः प्रज्वलिष्यंति केशव" इत्यादि ॥ अत्र लक्ष्मीपूजा चोक्ता ॥ "लक्ष्मीर्या लोकपालानां धेनुरूपे-ण संस्थिता ॥ घृतं वहति यज्ञार्थे मम पापं व्यपोहतु ॥ अग्रतः संतु मे गावो गावो मे संतु पृष्ठतः ॥ गावो मे हृदये संतु गवां मध्ये वसाम्यहम् ॥ इति मंत्राभ्यां गवां सवत्सानां बलीवर्दानां च पूजनं विभूषणं च कृत्वा दोहनभार-वाहनादिकं वर्जयेत् ॥

## अथ गोवर्धनपूजा ।

मुख्यगोवर्धनसान्निध्ये तस्यैव पूजा ॥ तदसान्निध्ये गोमयेनान्नकूटेन वा गोवर्धनं कृत्वा तत्सहितगोपालपूजा कार्या ॥ तत्र श्रीकृष्णप्रीत्यर्थं गोवर्धनपूजनगोपालपूजनात्मकं महोत्सवं करिष्ये इति संकल्प्य ॥ "बलिराज्ञो द्वारपालो भवानद्य भव प्रभो ॥ निजवाक्यार्थनार्थाय सगोवर्धन गोपते" ॥ इति मंत्रेण सगोवर्धनं गोपालमावाह्य स्थापयेत् ॥ ततः ॥ "गोपालमूर्ते विश्वेश. शक्रोत्सवविभेदक ॥ गोवर्धनकृतच्छत्र पूजां मे हर गोपते ॥ गोवर्धन धराधार गोकुलत्राणकाकर ॥ विष्णुबाहुकृतच्छाय गवां कोटिप्रदो भव" इति मंत्राभ्यां श्रीगोपालगोवर्धनौ षोडशोपचारैः पूजयेत् ॥ ततः यथावैभवं महानैवेद्यो देयः ॥ ततः तदंगत्वेन प्रत्यक्षधेनौ मृद्धेनौ वा गोपूजां पूर्वोक्तमंत्राभ्यां कृत्वा "आगावो अग्मन्प्रैते वदंतु" इति ऋग्भ्यां गृहसिद्धचरुहोमः कार्यः ॥ ब्राह्मणेभ्योन्नगवादिदानं गोभ्यस्तृणदानं गिरये बलिदानं च ॥ ततो गोविप्रहोमाग्निगिरिप्रदक्षिणा सहचरीभिर्गोभिर्युतैः कार्या ॥ अथापराह्णे मार्गपालीबंधनम् ॥ तत्र पूर्वस्यां दिशि कुशकाशमयरज्जुविशेषं यथाचारं कृत्वोच्चस्तंभे वृक्षे च बद्धा ॥ "मार्गपालि नमस्तेस्तु सर्वलोकसुखप्रदे ॥ विधेयैः पुत्रदाराद्यैः पुनरेहि व्रतस्य मे" ॥ इति नमस्कृत्य प्रार्थ्य तदधो मार्गेण गोगजादिसहिताः विप्रराजादयः सर्वे गच्छेयुः ॥ एवं काशादिमयीं वष्टिकां दृढां कृत्वैकतो राजपुत्रा अन्यत्र हीनजातयो जयज्ञानार्थं कर्षयेयुः अत्र हीनजातिजये राजजयः ॥ प्रातर्द्यूतं कार्यमित्युक्तमेवं नारीभिर्नीराजनमपि प्रातरेव कार्यम् ॥ रात्रौ गीतवाद्याद्यत्सवः कार्यः ॥ "नवैर्वस्त्रैश्च संपूज्या द्विजसंबंधिबांधवाः" इति ॥

## अथ यमद्वितीया ।

"यमो यमुनया पूर्वं भोजितः स्वगृहे स्वयम् ॥ अथो यमद्वितीया सा प्रोक्ता लोके युधिष्ठिर" ॥ अस्यां निजगृहे न भोक्तव्यं यत्नेन भगिनीहस्ताद्भोक्तव्यम् ॥ तेन धनधान्यसुखलाभः ॥ वस्त्रालंकरणैः सर्वा भगिन्यः पूज्याः स्वभगिन्यभावे मित्रादिभगिन्यः पूज्याः ॥ भगिन्या अपि भ्रातृपूजने अवैधव्यं भ्रातुश्चिरजीवनं तदकरणे सप्तजन्मसु भ्रातृनाशः ॥ इयं पूर्वेद्युरेवापराह्णव्याप्तौ पूर्वा ॥ उभयत्र व्याप्त्यव्याप्त्यादिपक्षांतरेषु परैव ॥ अस्यां यमुनास्नानमपराह्णे चित्रगुप्तयमदूतसहितयमपूजनं यमायार्घ्यदानं च विहितम् ॥

## अथ वह्निषष्ठी ।

कार्तिकशुक्लषष्ठ्यां भौमयुतायां वह्निं समभ्यर्च्य तत्प्रीत्यर्थं विप्रभोजनं कार्यम् ॥ कार्तिकशुक्लाष्टमी गोपाष्टमी ॥ अत्र गोपूजनगोप्रदक्षिणगवानुगमनैरिष्टकामा-

वाप्तिः ॥ कार्तिकशुक्लनवम्यां मथुराप्रदक्षिणोक्ता ॥ इयं युगादिरपि ॥ अस्यां पूर्वाह्लव्यापिन्यामपिंडकश्राद्धमुक्तम् ॥ अत्र विशेषो वैशाखप्रकरणे उक्तः ॥

## अथ भीष्मपंचकव्रतम् ।

एकादश्यादिदिनपंचके भीष्मपंचकव्रतमुक्तम् ॥ तच्च शुद्धैकादश्यामारभ्य चतुर्दश्यविद्धौदयिकपौर्णमास्यां समापनीयम् ॥ यदि शुद्धैकादश्यामारंभे क्षयवशेन पौर्णमास्यां पंचदिनात्मकव्रतसमाप्तिर्न घटते तदा विद्धैकादश्यामप्यारंभः ॥ शुद्धैकादश्यामारंभेपि दिनवृद्धिवशेन परविद्धपौर्णमास्यां समापने यदि षड्दिनापत्तिस्तदा चतुर्दशीविद्धपौर्णिमायामपि समाप्तिः कार्या ॥ व्रतप्रयोगः कौस्तुभादौ ज्ञेयः ॥

## अथैकादश्यां शिवविष्णुदीक्षा ।

कार्तिकमासे एकादश्यादिपर्वणि चंद्रताराबलान्विते शिवविष्णुमंत्रग्रहणादिरूपा दीक्षा कर्तव्या॥ 'कार्तिके तु कृता दीक्षा नृणां जन्मविमोचनी' इति नारदोक्तेः ॥ तथात्र तुलसीकाष्ठमाला धारणमुक्तं स्कांदे द्वारकामाहात्म्ये विष्णुधर्मे च ॥ 'निंद्य केशवे मालां तुलसीकाष्ठसंभवाम्॥ वहते यो नरो भक्त्या तस्य नश्यंति पातकम्॥ तुलसीकाष्ठसंभूते भाले कृष्णजनप्रिये ॥ बिभर्मि त्वामहं कंठे कुरु मां कृष्णवल्लभम् ॥ एवं संप्रार्थ्य विधिवन्मालां कृष्णगलेर्पिताम् ॥ धारयेत्कार्तिके यो वै स गच्छेद्वैष्णवं पदम्" इति निर्णयसिंधौ स्पष्टम् ॥ यत्तु तत्रैव मालाधारणप्रकरणांते सर्वपुस्तकेष्वदृश्यमानमप्यत्र मूलं चिंत्यमिति वाक्यं क्वचिन्निर्णयसिंधुपुस्तके दृश्यते तस्य मालाधारणविधिवाक्यानां नाप्रामाणिकत्वे तात्पर्यम् ॥ स्वयमेव स्कंदपुराणरत्नाकरधृतविष्णुधर्मस्थत्वेनोक्तानां स्वयमेवाप्रामाणिकत्वोक्तौ व्याघातप्रसंगात् ॥ "तुलसीकाष्ठघटिते रुद्राक्षाकारकारिते: ॥ निर्मितां मालिकां कंठे निधायार्चनमारभेत् ॥ तुलसीकाष्ठमालाया भूषितः कर्म आचरन् ॥ पितॄणां देवतानां च कृतं कोटिगुणं भवेत्" ॥ इति पद्मपुराणे पातालखंडे नवसप्ततितमाध्याये प्रत्यक्षोपलभ्यमानवचनविरोधाच्च किं तु आषाढमासप्रकरणे आषाढशुक्लद्वादश्यामनुराधायोगरहितायां पारणं कार्यमित्युक्ता तत्र प्रमाणत्वेन "आभाकासितपक्षेषु मैत्रश्रवणरेवती ।" 'मैत्राद्यपादे त्वपितीह विष्णुः" इत्यादीनि भविष्यस्थविष्णुधर्मस्थानि वाक्यानि लिखित्वा यथांते इदं निर्मूलमित्युक्तम् ॥ एवं प्रकरणांतरेपि तस्य च माधवादिमूलग्रंथेषु नोपलभ्यत इत्येव तत्परिभाषातात्पर्यं न त्वप्रामाणिकत्वे ॥ तथात्वे भाद्रकार्तिकयोस्तद्वाक्यानुसारेण पारणनिर्णयलेखनासांगत्यप्रसंगात् ॥ कौस्तुभादिसर्वनवीनग्रंथेषु तद्वाक्यानुसारेणैव निर्णयस्यासंगत्यापाताच्च ॥ सर्वाशिष्टानां तदनुसारेणैव पारणाचरणस्याप्यप्रमाणत्वापत्तेश्च ॥ तदत्रापि ज्ञेयम् ॥ एतेन माधवादिष्वनुपलं-

भादेवाप्रामाण्यापत्तिरिति निरस्तम् ॥ बहूनां माधवादिलिखितानां वाक्यानामाचाराणां चाप्रामाण्यापत्तेः ॥ यत्र तु यानि यस्त्वित्येवमादिरूपेण यत्पदोपक्रममनूद्य तानि निर्मूलानीत्येवमादिरीत्या दुष्यंते यथा श्रवणद्वादशीप्रकरणे श्रवणस्योत्तराषाढावेधनिषेधकवाक्यानि तत्र तेषामप्रमाणत्वे एव सर्वथा तात्पर्यमिति सूक्ष्मबुद्धयो विदां कुर्वंतु ननु माधवादिग्रंथेष्वनुपलंभान्न निर्मूलत्वमुच्यते ॥ किं तु काष्ठमालाधारणनिषेधवाक्यानां बाधकानामुपलंभादिति चेत्किं तानि वाक्यानि सामान्यतः काष्ठमालाधारणनिषेधकानि दृश्यंते विशेषतस्तुलसीकाष्ठमालानिषेधकानि वा ॥ आद्ये सामान्यतः काष्ठमालानिषेधवाक्यानां विशेषरूपैस्तुलसीधात्रीकाष्ठमालाधारणविधिवाक्यैर्बाधः स्पष्टः ॥ द्वितीये षोडशीग्रहणाग्रहणवद्विहितप्रतिषिद्धत्वेन विकल्पमवगच्छ ॥ स च विकल्पो वैष्णवावैष्णवविषयतया व्यवस्थितो भविष्यति ॥ मूलवाक्येषु वैष्णवादिति न निर्मूलत्वसंभवः ॥ अत एव तद्वाक्यानां माधवाद्यनुल्लेखस्याशयो हरिवासरलक्षणवाक्येषु पुरुषार्थचिंतामणौ वैष्णवानामेवावश्यकत्वादेतदनुपन्यासेपि माधवादीनां न न्यूनतेत्युक्तरीत्योहितुं शक्यः॥ एवं धात्रीकाष्ठमालाधारणविधिर्ज्ञेयः ॥ रामार्चनचंद्रिकादौ तुलसीकाष्ठमालया जपविधिवाक्यानि तुलसीकाष्ठघटितैर्मणिभिर्जपमालिकेत्यादीनि स्पष्टानि ॥ एवं ग्रन्थांतरेषु बहूनि वाक्यानुपलभ्यंते ॥ सर्वदेशीयवैष्णवेषु तुलसीकाष्ठमालाधारणजपाचारश्चोपलभ्यते ॥ भस्मादिधारणद्वेषिवैष्णवस्पर्धया शैवागमाग्रहिभिः केवलं द्विष्यत इत्यलं बहुनेति दिक् ॥

## अथ धात्रीमूले देवपूजाविधिः ।

सर्वपापक्षयद्वारा श्रीदामोदरप्रीत्यर्थं धात्रीमूले श्रीदामोदरपूजां करिष्ये ॥ पुरुषसूक्तेन षोडशोपचारैः संपूज्य गंधपुष्पफलयुतमर्घ्यं दद्यात् ॥ "अर्घ्यं गृहाण भगवन्सर्वकामप्रदो भव ॥ अक्षया संततिर्मेस्तु दामोदर नमोस्तु ते" ॥ ततोपराधसहस्राणीति प्रार्थ्य धात्रीं कुंकुमगंधादिनाभ्यर्च्य पुष्पैः पूजयेत् ॥ धात्र्यै नमः शांत्यै नमः कांत्यै नमः मेधायै नमः प्रकृत्यै० विष्णुपत्न्यै० महालक्ष्म्यै० रमायै० कमलायै० इंदिरायै० लोकमात्रे० कल्याण्यै० कमनीयायै० सावित्र्यै० जगद्धात्र्यै० गायत्र्यै० सुधृत्यै० अव्यक्तायै० विश्वरूपायै० सुरूपायै० अब्धिभवायै० ॥ ततो धात्रीमूले सव्येन तर्पणं कार्यम् ॥ "पिता पितामहश्चान्ये अपुत्रा ये च गोत्रिणः ॥ ते पिबंतु मया दत्तं धात्रीमूलेऽक्षयं पयः ॥ आब्रह्मस्तंबपर्यंतं० ॥ दामोदरनिवासायै धात्र्यै देव्यै नमोस्तु ते ॥ सूत्रेणानेन बध्नामि सर्वदेवनिवासिनीम्" ॥ इति सूत्रेण वेष्टयेत् ॥ धात्र्यै नम इति चतुर्दिक्षु बलीन्दत्त्वाष्टदीपान्दद्यात् ॥ अष्टकृत्वः प्रदक्षिणीकृत्य नमेत ॥ "धात्रि देवि नमस्तुभ्यं सर्वपापक्षयंकरि ॥ पुत्रान्देहि म-

हाप्राज्ञे यशो देहि बलं च मे ॥ प्रज्ञा मेधां च सौभाग्यं विष्णुभक्तिं च शाश्वतीम् ॥ नीरोगं कुरु मां नित्यं निष्पापं कुरु सर्वदा" ॥ ततो घृतपूर्णं सहेमकांस्यपात्रं दद्यादिति संक्षेपः ॥

## अथ पारणादिनिर्णयः ।

कार्तिकशुक्लद्वादश्यां रेवतीयोगरहितायां पारणं कार्यम् ॥ अपरिहार्ययोगे चतुर्थपादोवर्ज्य इत्यादि विशेषः श्रवणनिर्णयप्रकरणोक्तो द्रष्टव्यः ॥

## अथ प्रबोधोत्सवतुलसीविवाहौ ।

तत्र प्रबोधोत्सवः कार्तिकशुक्लैकादश्यां क्वचिदुक्तः ॥ रामार्चनचंद्रिकादौ द्वादश्यामुक्तः ॥ उत्थापनमंत्रे द्वादशीग्रहणाद्द्वादश्यामेव युक्तः तत्रापि द्वादश्या रेवत्यंतपादयोगो रात्रिप्रथमभागे प्रशस्तः तदभावे तत्रैव रात्रौ रेवतीनक्षत्रमात्रयोगेपि ॥ तदभावे रात्रिप्रथमभागे केवलद्वादश्यपि ॥ एवं केवलरेवत्यपि ॥ द्वादशीरेवत्योरुभयोरपि रात्रावभावे दिवैव द्वादशीमध्ये कार्य इति कौस्तुभे स्थितं तथापि पारणाहे पूर्वरात्राविति वचनात्पारणाहे रात्रिपूर्वभागे द्वादश्यभावेपि त्रयोदश्यामेव पारणाहे प्रबोधोत्सव इति देशाचारः ॥

## अथ तुलसीविवाहकालः ।

एवं तुलसीविवाहस्य नवम्यादिदिनत्रये एकादश्यादिपूर्णिमांते यत्र क्वापि दिने कार्तिकशुक्लांतर्गतविवाहनक्षत्रेषु वा विधानादनेककालत्वं तथापि पारणाहे प्रबोधोत्सवकर्मणा सह तंत्रतयैव सर्वत्रानुष्ठीयते इति सोपि पारणाहे पूर्वरात्रौ कार्यः ॥ प्रबोधोत्सवात्पृथक्चिकीर्षायां कालांतरे वा कार्यः ॥ तत्र पुण्याहवाचननांदीश्राद्धविवाहहोमाद्यंगसहिततुलसीविवाहप्रयोगः कौस्तुभादौ ज्ञेयः ॥ संक्षेपतस्तु प्रबोधोत्सवेनैकतंत्रतया शिष्टाचारमनुसृत्य लिख्यते ॥ देशकालौ संकीर्त्य श्रीदामोदरप्रीत्यर्थं प्रबोधोत्सवं संक्षेपतस्तुलसीविवाहविधिं च तंत्रेण करिष्ये तदंगतया पुरुषसूक्तेन विधिना षोडशोपचारैस्तंत्रेण महाविष्णुपूजां तुलसीपूजां च करिष्ये ॥ न्यासादि विधाय श्रीविष्णुं तुलसीं च ध्यात्वा 'सहस्रशीर्षा०' इति महाविष्णुं तुलसीं चावाह्य ॥ 'पुरुष एव०' इत्यादिभिः श्रीमहाविष्णवे दामोदराय श्रीदेव्यै तुलस्यै च नम आसनमित्यादिस्नानांते मंगलवाद्यैः सुगंधितैलहरिद्राभ्यां नागवल्लीदलगृहीताभ्यामुष्णोदकेन च मंगलस्नानं विष्णवे तुलस्यै च सुवासिनीभिः कारयित्वा स्वयं वा दत्त्वा पंचामृतस्नानं समर्प्य शुद्धोदकेनाभिषिच्य वस्त्रयज्ञोपवीतचंदनं दत्त्वा तुलस्यै हरिद्राकुंकुमकंठसूत्राद्यलंकारान्दत्त्वा मंत्रपुष्पांतपूजां समाप्य घंटादिवाद्यघोषेण देवं प्रबोधयेत् ॥ तत्र मंत्राः ॥ 'इदं विष्णुर्योजागार' इति त्वाचारप्राप्तः ॥ "ब्रह्मेंद्ररुद्रादिकुबेरसूर्यसोमादिभिर्वंदितवंदनीय ॥ बुध्यस्व देवेश जगन्नि-

वास मंत्रप्रभावेण सुखेन देव ॥ इयं च द्वादशी देव प्रबोधार्थं तु निर्मिता ॥ त्वयैव सर्वलोकानां हितार्थं शेषशायिना ॥ उत्तिष्ठोत्तिष्ठ गोविंद त्यज निद्रां जगत्पते ॥ त्वयि सुप्ते जगत्सुप्तमुत्थिते चोत्थितं जगत ॥ एवमुत्थाप्य चरणं पवित्रं० ॥ गता मेघा वियच्चैव निर्मलं निर्मला दिशः ॥ शारदानि च पुष्पाणि गृहाण मम केशव" इत्यादिमंत्राभ्यां पुष्पांजलिं दद्यात ॥ अथाचारात्तुलसीसंमुखां श्रीकृष्णप्रतिमां कृत्वा मध्येंतःपटं धृत्वा मंगलाष्टकपद्यानि पठित्वांतःपटं विसृज्याक्षतप्रक्षेपं कृत्वा दामोदरहस्ते तुलसीदानं कुर्यात् ॥ "देवीं कनकसंपन्नां कनकाभरणैर्युताम् ॥ दास्यामि विष्णवे तुभ्यं ब्रह्मलोकजिगीषया" ॥ मया संवर्धितां यथाशक्त्यलंकृतामिमां तुलसीं देवीं दामोदराय श्रीधराय वराय तुभ्यमहं संप्रददे इति देवपुरतः साक्षतजलं क्षिपेत् ॥ श्रीमहाविष्णुः प्रीयतामित्युक्त्वेमां देवीं प्रतिगृह्णातु भवानिति वदेत् ॥ ततो देवहस्तस्पर्शं तुलस्याः कृत्वा "क इदं कस्मा अदात्कामः कामायादात्कामो दाता कामः प्रतिग्रहीता कामं समुद्रमाविश कामेन त्वा प्रतिगृह्णामि कामैतत्ते वृष्टिरसि द्यौस्त्वा ददातु पृथिवी प्रतिगृह्णातु" इति मंत्रमन्येन वाचयेत् ॥ यजमानः ॥ "त्वं देवि मेऽग्रतो भूयास्तुलसी देवि पार्श्वतः ॥ देवि त्वं पृष्ठतो भूयास्त्वद्दानान्मोक्षमाप्नुयाम्" ॥ दानस्य प्रतिष्ठासिद्ध्यर्थमिमां दक्षिणां तुभ्यमहं संप्रददे देवपुरतो दक्षिणामर्पयेत् ॥ ततः "स्वस्ति नो मिमीतां शं नः" इत्यादि स्वस्त्यशाखोक्तानि शांतिसूक्तानि विष्णुसूक्तानि च पठेयुः ॥ तुलसीयुताय विष्णवे महानीराजनं कृत्वा मंत्रपुष्पं दत्त्वा सपत्नीकः सगोत्रजः सामात्यो यजमानश्चतस्रः प्रदक्षिणाः कुर्वीत ॥ ब्राह्मणेभ्यो दक्षिणां दत्त्वा यथाशक्ति ब्राह्मणभोजनं संकल्प्य कर्मेश्वरार्पणं कुर्यात् ॥

## अथ व्रतोद्यापनं चातुर्मास्ये ।

एवं देवं प्रबोध्य कार्तिके यद्यद्द्रव्यवर्जनं कृतं तत्तद्द्रव्यमुत्करीत्या द्रव्यांतरं च ब्राह्मणेभ्यो दत्त्वा व्रतसंपूर्णतां प्रार्थयेत् ॥ "इदं व्रतं मया देव कृतं प्रीत्यै तव प्रभो ॥ न्यूनं संपूर्णतां यातु त्वत्प्रसादाज्जनार्दन" इति ॥ ततो व्रतं भगवदर्पणं कुर्यात् ॥ चातुर्मास्यव्रतसमाप्तिरप्येवमेवेति केचित् ॥ कार्तिकमासव्रतोद्यापनं चातुर्मास्यव्रतोद्यापनं च चतुर्दश्यां पूर्णिमायां वेत्यपरे ॥

## अथ वैकुंठचतुर्दशी ।

पूर्वेद्युरुपवासं कृत्वाऽरुणोदयव्यापिन्यां चतुर्दश्यां शिवं संपूज्य प्रातः पारणं कार्यम् ॥ तथा च चतुर्दशीयुक्तारुणोदयवत्यहोरात्रे उपवासः फलितः ॥ उभयत्रारुणोदयव्याप्तौ परत्रारुणोदये पूजा पूर्वत्रोपवासः ॥ उभयत्राव्याप्तौ चतुर्दशीयुक्ताहोरात्रे एवारुणोदये पूजा पूर्वत्रोपवासश्च ॥ केचित्तु विष्णुपूजायामियं निशीथ-

व्यापिनी ग्राह्या ॥ दिनद्वये तद्व्याप्तौ निशीथप्रदोषोभयव्यापिनी ग्राह्येत्याहुः ॥ अस्यामेव चतुर्दश्यां परविद्धायां कार्तिकमासव्रतोद्यापनांगत्वेनोपवासं कृत्वाधिवासनं विधाय ॥ "रात्रौ जागरणं कुर्याद्गीतवाद्यादिमंगलैः ॥ नराणां जागरे विष्णोर्गीतं नृत्यं च कुर्वताम् ॥ गोसहस्रं च ददतां फलं समुदाहृतम्" ॥ इत्यादिवाक्यैर्विहितं गीतनृत्यवाद्यविष्णुचरितपठनस्वेच्छालापलीलानुकारैर्हरिजागरं कृत्वा परविद्धपौर्णमास्यां सपत्नीकाचार्यं वृत्वा 'अतो देव' इति द्वाभ्यां तिलपायसं हुत्वा गोदानं कार्यमिति मासव्रतोद्यापनम् ॥ कार्तिकशुक्लद्वादशी पौर्णमासी च मन्वादिः सा पौर्वाह्णिकी ग्राह्या ॥ अन्यत्पूर्वमुक्तम् ॥ अस्यां चातुर्मास्यव्रतसमाप्तिः ॥

## अथ तत्र चातुर्मास्यव्रतानां समाप्तौ दानानि ।

नक्तव्रते वस्त्रयुग्मम् ॥ एकांतरोपवासे गौः ॥ भूशयने शय्या ॥ षष्ठकालभोजने च गौः ॥ व्रीहिगोधूमादिधान्यत्यागे सौवर्णव्रीहिगोधूमादिदानम् ॥ कृच्छ्रव्रते गोयुग्मम् ॥ शाकाहारे गौः ॥ पयोमात्रभक्षणे पयोवर्जने च गौः ॥ मधुदधिघृतवर्जने वस्त्रं गौश्च ॥ ब्रह्मचर्ये स्वर्णम् ॥ तांबूलवर्जने वस्त्रयुग्मम् ॥ मौने घंटावृतकुंभौ वस्त्रद्वयं च ॥ रंगवल्लीकरणे गौः सुवर्णपद्मं च ॥ दीपदानव्रते दीपिका वस्त्रद्वयं च ॥ भूमिभोजने कांस्यपात्रं गौश्च ॥ गोग्रासे गोवृषौ ॥ प्रदक्षिणाशते वस्त्रम् ॥ अभ्यंगवर्जने तैलपूर्णघटः ॥ नखकेशधारणे मधुसर्पिर्हेमदानम् ॥ यत्र विशेषतो दानं नोक्तं तत्र स्वर्णं गौश्च ॥ गुडवर्जने गुडपूर्णं ससुवर्णं ताम्रपात्रम् ॥ एवं लवणवर्जने लवणपूर्णं ताम्रपात्रमिति केचित् ॥

## अथ लक्षप्रदक्षिणानमस्कारोद्यापनम् ।

अस्यामेव लक्षप्रदक्षिणा लक्षनमस्काराणामाषाढ्यादावारब्धानामुद्यापनं कार्यम् ॥ एवं तुलसीलक्षपूजां कार्तिके माघे वारभ्य प्रत्यहं सहस्रतुलसीसमर्पणेन लक्षं समाप्य माघ्यां वैशाख्यां वोद्यापनं कार्यम् ॥ एवं पुष्पादिलक्षपूजा अपि ॥ तत्र बिल्वपत्रलक्षेण लक्ष्मीप्राप्तिः फलम् ॥ दूर्वालक्षेणारिष्टशांतिः ॥ चंपकलक्षेणायुष्यम् ॥ अतसीलक्षेण विद्या ॥ तुलसीलक्षेण विष्णुप्रसादः ॥ गोधूमतंडुलादिप्रशस्तधान्यलक्षेण दुःखनाशः ॥ एवं सर्वपुष्पैः सर्वकामावाप्तिः ॥ एवं लक्षवर्तिव्रतमपि मासत्रयं कृत्वा कार्तिके माघे वैशाखे वोत्तरोत्तरप्रशस्ते समापनीयम् ॥ एवं धारणपारणव्रतोद्यापनमपि पौर्णमास्यामेव ॥ कार्तिकमासव्रतानां मासोपवासादीनां द्वादश्यामेव समापनम् ॥ तत्रासंभवे पौर्णमास्याम् ॥ एवं गोपद्मव्रतमाषाढशुक्लैकादश्यादावारभ्य प्रत्यहं त्रयस्त्रिंशद्गोपद्मानि विलिख्य ॥ गंधपुष्पैः प्रपूज्य तावत्संख्याकार्घ्यनमस्कारप्रदक्षिणाः कृत्वा कार्तिकद्वादश्यां त्रयस्त्रिंशदपूपवायनं

दद्यादेवं संवत्सरपंचकमनुष्ठायोद्यापनं कुर्यात् ॥ लक्षप्रदक्षिणादि गोपद्मपर्यंतोद्यापनानामिति कर्तव्यताः कौस्तुभे द्रष्टव्याः ॥ कार्तिके पौर्णमास्याः कृत्तिकानक्षत्रयोगे महापुण्यत्वं रोहिणीयोगे महाकार्तिकीत्वम् ॥ कार्तिक्यां कृत्तिकायोगे यः कार्तिकेयदर्शनं करोति स सप्तजन्मसु धनाढ्यो वेदपारगो विप्रो भवेत् ॥

## अथ पद्मकयोगः ।

विशाखास्थे सूर्ये सति यद्दिने चंद्रनक्षत्रं कृत्तिका तत्र पद्मकयोगः ॥ अयं पुष्करतीर्थेतिप्रशस्तः ॥ अस्यामेव त्रिपुराख्यदीपदानमुक्तम् ॥

## अथ काम्यवृषोत्सर्गकालः ।

कार्तिकपौर्णमास्यां काम्यवृषोत्सर्गोतिप्रशस्तः ॥ एवं गजाश्वरथधृतधेन्वादिमहादानमपि प्रशस्तम् ॥ वृषोत्सर्गस्याश्विनीपौर्णमासीग्रहणद्वयमयनद्वयं विषुवद्वयं चेति कालांतराणि ॥ अन्यत्र माघी चैत्री वैशाखी फाल्गुन्याषाढी चेति पौर्णमास्यो रेवतीनक्षत्रं वैधृतिव्यतीपातौ युगादिमन्वादिसूर्यसंक्रांतिपितृक्षयाहाष्टका अपि काला उक्ताः ॥ अत्र वृषोत्सर्गप्रयोगोतिविस्तृतो नानाशाखाभेदभिन्नः कौस्तुभे द्रष्टव्यः ॥ कार्तिककृष्णाष्टमी कालाष्टमी ॥ इयं पौर्णिमांतमासपक्षे मार्गशीर्षकृष्णाष्टमीत्युच्यते ॥ सेयं मध्याह्नव्यापिनी ग्राह्या ॥ दिनद्वये मध्याह्नव्याप्तौ पूर्वैवेति सिंधौ स्थितम् ॥ प्रदोषव्यापिनीति कौस्तुभे ॥ उभयदिने प्रदोषव्याप्तौ तदेकदेशस्पर्शे वा परैव ॥ यदा पूर्वत्र प्रदोषव्याप्तिरेव परत्र मध्याह्नव्याप्तिरेव तदा बहुशिष्टाचारानुरोधात्प्रदोषव्याप्त्यैव निर्णयो न मध्याह्नव्याप्त्येति भाति ॥ अत्र कालभैरवपूजां कृत्वा त्रयोर्घ्या देयाः ॥ उपवासो जागरश्च कार्यः ॥ ॥ इति श्रीमदनंतोपाध्यायसूनुकाशीनाथोपाध्यायविरचिते धर्मसिंधुसारे कार्तिकमासकृत्यनिर्णयोद्देशः ॥

## अथ मार्गशीर्षे धनुःसंक्रांतिः ।

धनुःसंक्रांतौ पराः षोडश नाह्यः पुण्याः ॥ अन्यत्प्रागुक्तम् ॥

## अथ नागपूजापंचमी ।

मार्गशीर्षशुक्लपंचम्यां नागपूजा दाक्षिणात्यानां प्रसिद्धा ॥ इयं षष्ठीयुता ग्राह्येति विशेषः प्रथमपरिच्छेदे उक्तः ॥

## अथ चंपाषष्ठी ।

मार्गशीर्षशुक्लषष्ठी चंपाषष्ठी महाराष्ट्रेषु प्रसिद्धा ॥ अत्र तिथिद्वैधे यस्मिन्दिने रविवारभौमवारशततारकावैधृतीनां मध्येधिकैर्योगः सा पूर्वा परा वा मुहूर्तत्रयव्यापिनी ग्राह्या ॥ दिनद्वयेपि योगाभावे परैव त्रिमुहूर्ता ग्राह्या ॥ इयमेव स्कंद-

षष्ठी सा पूर्वा ग्राह्या ॥ अथ सप्तम्यां सूर्यव्रतं तद्विधिः कौस्तुभे ॥ मृगयुतायां पौर्णमास्यां लवणदाने सुंदररूपता ॥

## अथ दत्तजयंती ।

मार्गशीर्षपौर्णमास्यां दत्तात्रेयोत्पत्तिः ॥ इयं प्रदोषव्यापिनी ग्राह्या ॥ मार्गशीर्षशुक्लचतुर्दश्यां पौर्णमास्यां वा प्रदोषे आश्वलायनैः प्रत्यवरोहणं कार्यम् ॥ तत्र कर्मकालव्यापिनी तिथिः ॥ तत्प्रयोगः प्रयोगरत्नकौस्तुभादौ ज्ञेयः ॥

## अथान्वष्टकादि ।

मार्गशीर्षादिमासचतुष्टयस्य कृष्णाष्टमीष्वष्टकाश्राद्धानि तत्पूर्वसप्तमीषु पूर्वेद्युः श्राद्धानि तदुत्तरनवमीषु चान्वष्टक्यश्राद्धानि कर्तव्यानि ॥ एवं भाद्रपदकृष्णपक्षेष्यष्टकादिश्राद्धानि कार्याणीति पंचाष्टकापक्ष आश्वलायनभिन्नशाखिनाम् ॥ आश्वलायनानां तु मार्गादिचतुरष्टकापक्ष एव ॥ भाद्रपदकृष्णाष्टम्यां तु माघ्यावर्षश्राद्धं करिष्य इति संकल्प्य सर्वमष्टकाश्राद्धवत्कार्यम् ॥ सप्तम्यां तु माघ्यावर्षश्राद्धं कर्तुं पूर्वेद्युः श्राद्धं करिष्ये इति संकल्पः ॥ नवम्यामन्वष्टकाश्राद्धं करिष्ये इति संकल्पे विशेषः ॥ एवं च भाद्रपदकृष्णाष्टमीश्राद्धस्य माघ्यावर्षसंज्ञकत्वादाश्वलायनानां चतुरष्टकापक्षः ॥ अन्यशाखिनां पौषादिष्यष्टकापक्षोपि ॥ एवं सर्वाष्टकाः कर्तुमशक्तेनैकैवाष्टका कार्या ॥ सा च माघपौर्णमास्यनंतरकृष्णपक्षस्य सप्तम्यामष्टम्यां नवम्यामिति दिनत्रये कार्या ॥ दिनत्रये श्राद्धत्रयं कर्तुमशक्तेन माघकृष्णाष्टमीश्राद्धमेव कार्यम् ॥ तत्राष्टकाश्राद्धेऽपराह्णव्यापिन्यष्टमी ग्राह्या ॥ दिनद्वये व्याप्यव्याप्यादौ दर्शवन्निर्णयः ॥ अष्टम्यनुरोधेन पूर्वपरदिनयोः पूर्वेद्युः श्राद्धान्वष्टक्यश्राद्धे कार्ये ॥ न तु सप्तम्यादेरपराह्णव्याप्तिरपेक्षणीया ॥ एकदिनेप्यशक्तस्य प्रत्याम्नायाः ॥ अनडुहो यवसमाहरेत् ॥ अग्निना वा कक्षं दहेदपि वानूचानेभ्य उदकुंभमाहरेत् ॥ अपि वा श्राद्धमंत्रानधीयीतेति ॥ क्वचिदुपवासोप्युक्तः ॥ एवं श्रवणाकर्मादिपाकसंस्थालोपे प्रतिपाकयज्ञं प्राजापत्यं कृच्छ्रं प्रायश्चित्तमुक्तम् ॥ मलमासेष्टकादिश्राद्धानि न कार्याणीति नारायणवृत्तिः ॥ अष्टकादिश्राद्धत्रयप्रयोगः कौस्तुभप्रयोगरत्नादौ ॥ अत्राष्टमीश्राद्धे कामकालसंज्ञकौ विश्वेदेवौ ॥ सप्तमीनवम्योस्तु पुरूरवार्द्रवाविति ॥ आहिताग्नेः पूर्वेद्युः श्राद्धांगहोमोष्टकाङ्गहोमोऽन्वष्टकाग्नौकरणहोमौ दिनत्रये हविःअर्पणं च दक्षिणाग्नौ भवतीति विशेषः ॥ विशेषमनाहिताग्निवत् ॥

## अथ अष्टकान्वष्टकालोपे प्रायश्चित्तम् ।

अष्टकालोपे प्राजापत्यमुपवासो वा प्रायश्चित्तम् ॥ अन्वष्टक्यलोपे तद्दिने शतवारमेभिर्द्युभिः सुमना इति मंत्रजपः ॥

## अथ द्वादशमासेषु रविवाराः ।

मार्गशीर्षादिरविवारेषु काम्यं सौरव्रतमुक्तम् ॥ तत्र भक्ष्याणि ॥ मार्गे तुलसीपत्रत्रयम् ॥ पौषे त्रिपलं घृतम् ॥ माघे तिलानां मुष्टित्रयम् ॥ फाल्गुने त्रिपलं दधि ॥ चैत्रे त्रिपलं दुग्धम् ॥ वैशाखे गोमयम् ॥ ज्येष्ठे तोयांजलित्रयम् ॥ आषाढे मरीचकत्रयम् ॥ श्रावणे त्रिपलाः सक्तवः ॥ भाद्रे गोमूत्रम् ॥ आश्विने शर्करा ॥ कार्तिके सद्धविरिति ॥ ॥ इति श्रीमदनंतोपाध्यायसूनुकाशीनाथोपाध्यायविरचिते धर्मसिंधुसारे मार्गशीर्षमासकृत्यनिर्णयोद्देशः ॥

## अथ पौषे मकरसंक्रांतिः ।

दिवामकरसंक्रमे संक्रांत्यनंतरं चत्वारिंशन्नाड्यः पुण्याः ॥ घटिकाद्यल्पदिनशेषे मकरसंक्रांतौ संक्रांत्यासन्नपूर्वकाले दिवैव स्नानश्राद्धदानभोजनानि कार्याणि ॥ रात्रौ श्राद्धदानादेर्निषेधात्स्वल्पदिनभागे स्नानश्राद्धभोजनादेः कर्तुमशक्यत्वाद्रात्रौ भोजननिषेधात्पुत्रवद्ग्रहिण उपवासनिषेधाच्च ॥ तस्मादीदृशे विषये परपुण्यकालत्वं बाधित्वा मकरसंक्रांतेः पूर्वभागे एव पुण्यत्वं ज्ञेयम् ॥ रात्रौ पूर्वभागे परभागे निशीथे वा मकरसंक्रमे उत्तरदिनं पुण्यम् ॥ तत्राप्युत्तरदिनपूर्वार्द्धं पुण्यतरम् ॥ तत्रापि सूर्योदयोत्तरं पंच नाड्यः पुण्यतमाः ॥ एवं रात्रिसंक्रांतिविषयेन्यत्रापि यत्र पूर्वदिनोत्तरार्धस्य पुण्यत्वं तत्र दिनांते पंचनाडीनां पुण्यतमत्वम् ॥ यत्रोत्तरदिनपूर्वार्द्धस्य पुण्यत्वं तत्रोदयोत्तरं पंचनाडीनां पुण्यतमत्वम् ॥ एवं दिवासंक्रमेपि संक्रांतित्रयनिहितनाडीनां मकरादिषूत्तरासां कर्कादिषु पूर्वासां पुण्यतमत्वं ज्ञेयम् ॥ "यायाः सन्निहिता नाड्यस्तास्ताः पुण्यतमाः स्मृताः" इत्युक्तेः ॥ मुहूर्तचिंतामण्यादौ तु सूर्यास्तादूर्ध्वं घटीत्रयं संध्याकालस्तत्र मकरसंक्रमे परदिनपुण्यत्वं बाधित्वा पूर्वदिने पुण्यत्वमुक्तम् ॥ नेदं सर्वत्र धर्मशास्त्रग्रंथेषु दृश्यते ॥ "शुक्लपक्षे तु सप्तम्यां संक्रांतिर्ग्रहणाधिका" ॥ अत्र कृत्यम् ॥ "रविसंक्रमणे प्राप्ते न स्नायाद्यस्तु मानवः ॥ सप्तजन्मनि रोगी स्यान्निर्धनश्चैव जायते" इति वचनात् मनुष्यमात्रस्य स्नानं नित्यम् ॥ एवं श्राद्धमप्यधिकारिणो नित्यम् ॥ तच्चापिंडकम् ॥ "संक्रांतौ यानि दत्तानि हव्यकव्यानि दातृभिः ॥ तानि नित्यं ददात्यर्कः पुनर्जन्मनिजन्मनि" ॥ अयनसंक्रांतौ त्रिदिनमुपवासः ॥ यद्वा संक्रांतिमत्यहोरात्रे पुण्यकालवत्यहोरात्रे वोपवासं कृत्वोक्तपुण्यकाले स्नानादिकं कार्यम् ॥ अयमुपवासः सापत्यगृहस्थेन न कार्यः ॥ "धेनुं तिलमयीं राजन्द्यात्रैवोत्तरायणे ॥ तिलतैलेन दीपाश्च देयाः शिवगृहे शुभाः ॥ सतिलैस्तंडुलैश्चैव पूजयेद्विधिवच्छिवम् ॥ तस्यां कृष्णतिलैः स्नानं कार्यं चोद्वर्तनं तिलैः ॥ तिला देयाश्च होतव्या भक्ष्याश्चैवोत्तरायणे" ॥ शुक्लतिलैर्देवादितर्पणं कृष्णतिलैः पितृतर्पणं च कार्यम् ॥ अत्र शंभौ घृताभिषेको महाफलः ॥ अत्र सुवर्णयुतं तिलताम्रपात्रं देयम् ॥ तत्प्रयोगो वक्ष्यते ॥

## अत्रैव शिवपूजाव्रतम् ।

पूर्वदिने उपोष्य संक्रांतिदिने तिलोद्वर्तनतिलस्नानतिलतर्पणानि कृत्वा शिवं गव्येनाज्येन मर्दयित्वा शुद्धोदकेन प्रक्षाल्य वस्त्राद्युपचारैः पूजयित्वा सुवर्णहीरकनीलपद्मरागमौक्तिकमिति पंचरत्नानि कर्षार्धं सुवर्णं वा समर्प्य तिलदीपैः ससुवर्णैः साक्षतैस्तिलैः संपूज्य घृतकंबलं दत्त्वा वितानचामरे समर्प्य विप्रेभ्यः ससुवर्णतिलान्दत्त्वा तिलान्हुत्वा विप्रान्यतींश्च संभोज्य दक्षिणां दत्त्वा सतिलं पंचगव्यं प्राश्य पारणं कुर्यादिति ॥ अत्र वस्त्रदानं महाफलम् ॥ "तिलपूर्वमनड्वाहं दत्त्वा रोगैः प्रमुच्यते" ॥ अत्र क्षीरेण भास्करं स्नापयेत्सूर्यलोकप्राप्तिः ॥ दिवा विषुवायनसंक्रांतौ तस्मिन्दिने पूर्वरात्रावागामिरात्रौ चानध्यायः ॥ रात्रौ तत्संक्रमे तस्यां रात्रौ पूर्वदिवसे आगामिदिवसे चेति पक्षिण्यनध्यायः ॥ अत्र रात्रौ संक्रमे ग्रहणवद्रात्रावेव स्नानदानादीति पक्षः कैश्चिल्लिखितो न सर्वशिष्टसंमतः ॥ अयनदिनं तत्परं करिसंज्ञकं च दिनं शुभेषु वर्ज्यमित्युक्तम् ॥ तत्रार्धरात्रादर्वागयनसंक्रांतौ तद्दिनं तत्परदिनं च वर्ज्यम् ॥ निशीथात्परत्र निशीथे वा संक्रांतौ परं तत्परं च वर्ज्यमिति भाति ॥ एवं ग्रहणेप्यूह्यम् ॥ पौषशुक्लाष्टम्यां बुधवासरयुतायां स्नानजपहोमतर्पणविप्रभोजनानि कार्याणि ॥ अस्यां भरणीयोगे महापुण्यत्वमित्येके ॥ रोहिण्यार्द्रायोगे इत्यपरे ॥ पौषशुक्लैकादशी मन्वादिः निर्णयः प्रागुक्तः ॥

## अथ माघस्नानम् ।

तत्र पौषस्य शुक्लैकादश्यां पौर्णमास्याममावास्यायां वा माघस्नानारंभः ॥ माघे द्वादशीपूर्णिमादौ समापनम् ॥ यद्वा मकरसंक्रमणप्रभृति कुंभसंक्रमणपर्यंतं माघस्नानं कार्यम् ॥ अथ स्नानकालः अरुणोदयमारभ्य प्रातःकालावधिः ॥ "उत्तमं तु सनक्षत्रं लुप्ततारं च मध्यमम् ॥ सवितर्युदिते भूप ततो हीनं प्रकीर्तितम् ॥ माघमासे रटंत्यापः किंचिदभ्युदिते रवौ ॥ ब्रह्मघ्नं वा सुरापं वा कं पतंतं पुनीमहे ॥" अत्राधिकारिणः ॥ "ब्रह्मचारी गृहस्थो वा वानप्रस्थोथ भिक्षुकः ॥ बालवृद्धयुवानश्च नरनारीनपुंसकाः" इति ॥ अथ जलतारतम्येन फलम् ॥ "तप्तेन वारिणा स्नानं यद्गृहे क्रियते नरैः ॥ षडब्दं फलदं तद्धि मकरस्थे दिवाकरे" ॥ वाप्यादौ द्वादशाब्दफलम् ॥ तडागे तद्द्विगुणम् ॥ नद्यां तच्चतुर्गुणम् ॥ महानद्यां शतगुणम् ॥ महानदीसंगमे तच्चतुर्गुणम् ॥ गंगायां सहस्रगुणम् ॥ गंगायमुनासंगमे एतच्छतगुणमिति यत्र कुत्रापि स्नाने प्रयागस्मरणं कार्यम् ॥ इदं समुद्रेप्यतिप्रशस्तम् ॥

## अथ स्नानविधिः ।

"माघमासंमिमं पूर्णं स्नास्येहं देव माधव ॥ तीर्थस्यास्य जले नित्यमिति संकल्प्य चेतसि" इत्येकं तीर्थं परिगृह्य ॥ "दुःखदारिद्र्यनाशाय श्रीविष्णोस्तोषणाय च ॥ प्रातःस्नानं करोम्यद्य माघे पापविनाशनम् ॥ मकरस्थे रवौ माघे गोविंदाच्युत माधव ॥ स्नानेनानेन मे देव यथोक्तफलदो भव ॥ इमौ मंत्रौ समुच्चार्य स्नायान्मौनसमन्वितः" ॥ प्रत्यहं सूर्यार्घ्यदानमंत्रः ॥ "सवित्रे प्रसवित्रे च परंधामजले मम ॥ त्वत्तेजसा परिभ्रष्टं पापं यातु सहस्रधा" इति ॥ पितृतर्पणादि नित्यं विधाय माधवं पूजयेत् ॥

## अथ मासनियमाः ।

"भूमौ शयीत होतव्यमाज्यं तिलसमन्वितम् ॥ हविष्यं ब्रह्मचर्यं च माघमासे महाफलम्" ॥ अत्रेंधनकंबलवस्त्रोपानहतैलघृततूलपूर्णपटीसुवर्णान्नदानानि महाफलानि ॥ "न वह्निं सेवयेत्स्नातो ह्यस्नातोपि वरानने ॥ होमार्थं सेवयेद्वह्निं शीतार्थं न कदाचन ॥ अहन्यहनि दातव्यास्तिलाः शर्करयान्विताः ॥ त्रयो भागास्तिलानां च शर्करायाश्चतुर्थकः" ॥ अत्राभ्यंगो वर्ज्यः ॥ "माघे मास्युषसि स्नानं कृत्वा दांपत्यमर्चयेत् ॥ माघे यत्नेन संत्याज्यं मूलकं मदिरोपमम् ॥ पितॄणां देवतानां च मूलकं नैव दापयेत्" ॥

## अथ माघे मलमासे ।

यदा माघो मलमासो भवति तदा काम्यानां तत्र समाप्तिनिषेधान्मासद्वयं स्नानं तन्नियमाश्च कर्तव्याः ॥ मासोपवासचांद्रायणादिकं तु मलमासे एव समापयेदित्युक्तम् ॥ इदं माघस्नानं नित्यकाम्योभयरूपम् ॥ मासपर्यंतं स्नानेप्यशक्तस्त्र्यहमेकाहं वा स्नायात् ॥ तत्राद्यं दिनत्रयमिति केचित् ॥ त्रयोदश्यादिदिनत्रयमिति बहुसंमतम् ॥ पौपूर्णिमानंतरास्वष्टमीसप्तमीनवमीष्वष्टकादिश्राद्धानि प्रागुक्तानि ॥

## अथार्धोदययोगनिर्णयः ।

पौषामावास्यायामर्धोदययोगः ॥ "अमार्कपातश्रवणैर्युक्ताचेत्पौषमाघयोः ॥ अर्धोदयः स विज्ञेयः कोटिसूर्यग्रहैः समः" ॥ किंचिन्न्यूनं महोदय इति चतुर्थपादं केचित्पठंति ॥ पौषमाघयोर्मध्यवर्तिनीत्यर्थ इत्येके ॥ अमांतमासे पौषस्य पूर्णिमांतमासे माघस्य चेत्यर्थ इत्यपरे ॥ सर्वथा पौषपौर्णमास्युत्तरामावास्येत्यर्थः ॥ "दिवैव योगः शस्तोयं न तु रात्रौ कदाचन ॥ अर्धोदये तु संप्राप्ते सर्वं गंगासमं जलम् ॥ शुद्धात्मानो द्विजाः सर्वे भवेयुर्ब्रह्मसंनिभाः ॥ यत्किंचिद्दीयते दानं तद्दानं मेरुसन्निभम्" ॥ अथामत्रदानप्रयोगः ॥ 'पात्रामत्रं च भाजने' इत्यमरः ॥

देशकालौ संकीर्त्य समुद्रमेखलायाः पृथ्व्यां सम्यग्दानफलकामोहमधोंदय-विहितामत्रदानं करिष्ये इति संकल्प्योपलिप्ते देशे धौततंडुलैरष्टदलं कृत्वा तत्र चतुःषष्टिपलं चत्वारिंशत्पलं वा पंचविंशतिपलं वा कांस्यपात्रं कृताग्न्युत्तारणं स्थापयेत् ॥ तत्राष्टगुंजात्मको माषः चत्वारिंशन्माषाः कर्षः ॥ 'पलं कर्षचतुष्टयम्' ॥ अमरसिंहमते तु ॥ अशीतिगुंजात्मकः कर्षः पलं कर्षचतुष्टयम् ॥ कांस्यपात्रे पायसं निक्षिप्य पायसेष्टदलं कृत्वा तत्कर्णिकायां कर्षतदर्धतदर्धान्यतमपरिमाणहैमलिंगं निधाय कांस्यपात्रे ब्रह्माणं पायसे विष्णुं लिंगे शिवं यथाधिकारं वैदिकैस्तैर्नामभिर्वावाहनाद्युपचारैः संपूजयेत् ॥ ततो विप्रं वस्त्रादिभिः पूजयेत् ॥ "सुवर्णपायसामत्रं यस्मादेतत्त्रयीमयम् ॥ आवयोस्तारकं यस्मात्तद्गृहाण द्विजोत्तम" ॥ अमुकगोत्रायामुकशर्मणे तुभ्यमिदं सुवर्णलिंगपायसयुक्तममत्रं समुद्रमेखलापृथ्वीदानफलकामोहं संप्रददे न ममेति विप्रहस्ते जलं दद्यात् ॥ विप्रः 'देवस्यत्वा' इति प्रतिगृह्णीयात् ॥ दाता दानस्य संपूर्णतार्थमिमां दक्षिणां संप्रदद इति यथाशक्ति हिरण्यं दद्यात् ॥ हेमाद्याद्युक्तप्रकारांतरेणाधोंदयव्रतप्रयोगो ब्रह्मादियुततिलपर्वतत्रयशय्यात्रयगोत्रयदानहोमादिसहितः कौस्तुभे द्रष्टव्यः ॥ ॥ इति श्रीमदनंतोपाध्याय-सूनुकाशीनाथोपाध्यायविरचिते धर्मसिंधुसारे पौषमासकृत्यनिर्णयोद्देशः समाप्तः ॥

## अथ माघे कुंभसंक्रांतिः ।

कुंभसंक्रांतौ पूर्वं षोडश नाड्यः पुण्याः ॥ माघे वेणीस्नानमहिमा ॥ "सितासिते तु यत्स्नानं माघमासे युधिष्ठिर ॥ न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि ॥ कुरुक्षेत्रसमा गंगा यत्र कुत्रावगाहिता ॥ तस्माद्दशगुणा विंध्ये काश्यां शतगुणा ततः ॥ काश्याः शतगुणा प्रोक्ता गंगायमुनयान्विता ॥ सहस्रगुणिता सापि माघे पश्चिमवाहिनी" ॥ अथ माघे तिलपात्रदानं प्रशस्तं तत्प्रयोगः ॥ "ताम्रपात्रे तिलान्कृत्वा पलषोडशनिर्मिते ॥ सहिरण्यं स्वशक्त्या वा विप्राय प्रतिपादयेत्" ॥ वाङ्मनःकायजत्रिविधपापनाशपूर्वकं ब्रह्मलोकप्राप्तिकामस्तिलपात्रदानं करिष्ये ॥ उक्तपरिमाणे ताम्रपात्रे प्रस्थतिलान्कर्षसुवर्णयुतान्यथाशक्तिसुवर्णयुतान्वा कृत्वा विप्रं संपूज्य ॥ "देवदेव जगन्नाथ वांछितार्थफलप्रद ॥ तिलपात्रं प्रदास्यामि तवाग्रे संस्थितो ह्यहम्" ॥ इति मंत्रेण दद्यात् ॥ "धान्यमानं तु कुडवो मुष्टीनां स्याच्चतुष्टयम् ॥ चत्वारः कुडवाः प्रस्थश्चतुःप्रस्थमथाढकम् ॥ अष्टाढको भवेद् द्रोणो द्विद्रोणः शूर्प उच्यते ॥ सार्धशूर्पो भवेत्खारीत्युक्तरीत्या 'पलं सुवर्णाश्चत्वारः कुडवं प्रस्थमाढकम् ॥ द्रोणश्च खारिका च" इति पूर्वपूर्वाच्चतुर्गुणमित्युक्तरीत्या वा प्रस्थमानस्वरूपं ज्ञेयम् ॥ यद्वा हिरण्यरहितांस्तिलांस्ताम्रपात्रे निधाय ॥ "तिलाः पुण्याः पवित्राश्च सर्वपापहराः स्मृताः ॥ शुक्लाश्चैव तथा कृष्णा विष्णुगात्रसमु-

द्भवाः ॥ यानि कानि च पापानि ब्रह्महत्यासमानि च ॥ तिलपात्रप्रदानेन तानि नश्यंतु मे सदा" इदं तिलपात्रं यथाशक्तिदक्षिणासहितं यमदैवत्यं ब्रह्मलोकप्राप्तिकामस्तुभ्यमहं संप्रददे इति दद्यात् ॥

## अथ सहिरण्यतुलसीपत्रदानमंत्रः ।

"सुवर्णतुलसीदानाद्ब्रह्मणः कायसंभवात् ॥ पापं प्रशममायातु सर्वे संतु मनोरथाः॥"

## अथ शालग्रामदानमंत्रः ।

"शालग्रामशिला पुण्या भुक्तिमुक्तिप्रदायिनी ॥ शालग्रामप्रदानेन मम संतु मनोरथाः ॥ चक्रांकितसमायुक्ता शालग्रामशिला शुभा ॥ दानेनैव भवेत्तस्या उभयोर्वांछितं फलम्" ॥

## अथ प्रयागे वेणीदानम् ।

तत्र सर्वेषां वपनविधिः ॥ "ऊर्ध्वमब्दाद्विमासोनाद्यदा तीर्थं व्रजेन्नरः ॥ तदा तद्वपनं शस्तं प्रायश्चित्तमृते द्विज" ॥ प्रयागे तु योजनत्रयादागतस्य दशमासादर्वागपि प्रथमयात्रायां तु जीवत्पितृकगुर्विणीपतिकृतचूडबालानामपि सभर्तृकस्त्रीणामपि वपनमिति विशेषः ॥ केचित्तु सभर्तृकस्त्रीणां "सर्वान्केशान्समुद्धृत्य च्छेदयेदंगुलद्वयम्" ॥ इत्याहुः ॥ तत्प्रयोगः ॥ वेणीभूतकेशा कृतमांगलिकवेषा स्त्री भर्तारं नत्वा तदाज्ञया सर्ववपनं ब्यंगुलं केशच्छेदं वा कृत्वा स्नात्वा त्रिवेणीपूजां कुर्यात् ॥ भर्त्रा वा कारयेत् ॥पूजांते पत्नी छिन्नवेणीयुक्तं वैणवपात्रमञ्जलौ धृत्वा तस्यां हैमवेणीं मौक्तिकादिकं च निधाय ॥ "वेण्यां वेणीप्रदानेन मम पापं व्यपोहतु ॥ जन्मांतरेष्वपि सदा सौभाग्यं मम वर्धताम्" इति त्रिवेण्यां क्षिपेत् ॥ विप्राः ॥ "सुमंगलीरियं वधूः०" इति पठेयुः ॥ ततो विप्रान्सुवासिनीश्च वस्त्रादिना तोषयेत् ॥

## अथ त्रिवेण्यां देहत्यागविधिः ।

"ये वै तन्वं विसृजंति धीरास्ते जना सो अमृतत्वं भजंते" इति श्रुतिर्माघमासविषया ॥ "तनुं त्यजति वै माघे तस्य मुक्तिर्न संशयः" इति ब्राह्मोक्तेः ॥ अन्यमासे तनुत्यागात्स्वर्गप्राप्तिः ॥ तत्र यथाशक्ति सर्वप्रायश्चित्तं कृत्वा श्राद्धाधिकारभावे स्वीयजीवच्छ्राद्धं सपिंडदानांतं कृत्वा गोदानानि कृत्वा कृतोपवासः पारणाहे फलोल्लेखपूर्वकं संकल्प्य विष्णुं ध्यात्वा वेणीं प्रविशेदिति ॥ जीवच्छ्राद्धप्रयोगः कौस्तुभे द्रष्टव्यः ॥ माघं प्रकृत्य ॥ "तिलस्नायी तिलोद्वर्ती तिलहोमी तिलोदकी ॥ तिलभुक् तिलदाता च षट् तिलाः पापनाशनाः" इत्युक्ते वाक्ये तिलस्नायिपदेन तिलयुक्तोदकेन स्नानं तिलहोमिपदेनायुतलक्षतिलहोमाद्यात्मकग्रहमखस्यापि संग्रहः ॥ तिलोदकीति पदेन तिलयुक्तोदकेन देवपूजातर्पणसंध्या-

दिकं पानं च कार्यमित्यर्थः ॥ स च होमस्त्रिधा ॥ "प्रथमोयुतहोमः स्याल्लक्षहोमस्ततः परः । कोटिहोमस्तृतीयस्तु सर्वकामफलप्रदः" इति ॥ लक्षहोमादिप्रयोगः कुंडमंडपनिर्माणादिसहितः कौस्तुभमयूखादौ ज्ञेयः ॥

## अथ माघचतुर्थी ।

माघशुक्लचतुर्थ्यां ढुंढिराजोद्देशेन नक्तव्रतं तत्पूजा तिललड्डुकादिनैवेद्यं तिलभक्षणं चोक्तम् ॥ अत्र प्रदोषव्यापिनी ग्राह्या ॥ अस्यामेव प्रदोषव्यापिन्यां कुंदपुष्पैः शिवं संपूज्योपवासं नक्तभोजनं वा कुर्याच्छ्रियं प्राप्नुयात् ॥ अत्र विनायकव्रतस्य तु भाद्रपदशुक्लचतुर्थीवन्निर्णयः ॥

## अथ वसंतपंचमी ।

माघशुक्लपंचमी वसंतपंचमी तस्यां वसंतोत्सवारंभः ॥ अस्यां रतिकामयोः पूजोक्ता ॥ इयं परत्रैव पूर्वाह्णव्याप्तौ परा अन्यथा पूर्वैव ॥

## अथ रथसप्तमी ।

माघशुक्लसप्तमी रथसप्तमी सारुणोदयव्यापिनी ग्राह्या ॥ दिनद्वये अरुणोदयव्याप्तौ पूर्वा ॥ यदा घटिकादिमात्रा षष्ठी सप्तमी च क्षयवशादरुणोदयात्पूर्वं समाप्यते तदा षष्ठीयुता ग्राह्या ॥ तत्र षष्ठ्यां सप्तमीक्षयघटीः प्रवेश्यारुणोदये स्नानं कार्यम् ॥ अत्र व्रते षष्ठ्यामेकभक्तं कृत्वा सप्तम्यामरुणोदये स्नानं कार्यम् ॥ तत्र मंत्रः ॥ "यदाजन्म कृतं पापं मया जन्मसुजन्मसु ॥ तन्मे रोगं च शोकं च माकरी हंतु सप्तमी ॥ एतज्जन्मकृतं पापं यच्च जन्मांतरार्जितम् ॥ मनोवाक्कायजं यच्च ज्ञाताज्ञाते च ये पुनः ॥ इति सप्तविधं पापं स्नानान्मे सप्तसप्तिके ॥ सप्तव्याधिसमायुक्तं हर माकरि सप्तमि" ॥ अथार्घ्यमंत्रः ॥ "सप्तसप्तिवहप्रीत सप्त लोकप्रदीपन ॥ सप्तमीसहितो देव गृहाणार्घ्यं दिवाकर" इति ॥ इयं मन्वादिरपि ॥ शुक्लपक्षमन्वादित्वात्पौर्वाह्णिकी ग्राह्येत्युक्तम् ॥ माघशुक्लाष्टमी भीष्माष्टमी ॥ अस्यां भीष्मोद्देशेन ये श्राद्धं कुर्वंति ते संततिमंतो भवंति ॥ तत्र श्राद्धं काम्यं तर्पणं तु नित्यम् ॥ तर्पणे कृते संवत्सरोपात्तदुरितनाशः ॥ अकृते पुण्यनाश इत्युक्तेः ॥ तत्र तर्पणमंत्रः ॥ "वैयाघ्रपद्यगोत्राय सांकृत्यप्रवराय च ॥ गंगापुत्राय भीष्माय आजन्मब्रह्मचारिणे ॥ अपुत्राय जलं दद्मि नमो भीष्माय वर्मिणे ॥ भीष्मः शांतनवो वीरः सत्यवादी जितेंद्रियः ॥ आभिरद्भिरवाप्नोतु पुत्रपौत्रोचितां क्रियाम्" इति ॥ एवमपसव्येन तर्पणं कृत्वाचम्य सव्येनार्घ्यं दद्यात् ॥ "वसूनामवताराय शंतनोरात्मजाय च ॥ अर्घ्यं ददामि भीष्माय आबाल्यब्रह्मचारिण" इति ॥ अत्र जीवत्पितृकस्य नाधिकार इति कौस्तुभे ॥ जीवत्पितृकस्याप्यधिकार इति बहवः ॥ अत्र मध्याह्नव्यापिन्यष्टमी ग्राह्या ॥ श्राद्धादेरे-

कोद्दिष्टत्वादिति ॥ माघशुक्लद्वादश्यां तिलोत्पत्तिरतोस्यामुपोष्य तिलस्नानं तिलैर्विष्णुपूजनं तिलनैवेद्यं तिलतैलेन दीपदानं तिलहोमस्तिलदानं तिलभक्षणं च कार्यम् ॥ माघी पौर्णिमा परा ॥ अत्र कृत्यम् ॥ "एवं माघावसाने तु देयं भोज्यमवारितम् ॥ भोजयेद्विजदांपत्यं भूषयेद्वस्त्रभूषणैः" ॥ कंबलाजिनरक्तवस्त्राणि तूलगर्भचोलकान्युपानहौ प्रच्छादनपदाश्चैतानि माधवः प्रीयतामित्युक्त्वा देयानि ॥

## अथ माघस्नानोद्यापनम् ।

अत्र कृतस्य माघस्नानस्य सांगतार्थमुद्यापनं करिष्य इति संकल्प्य ॥ "सवित्रे प्रसवित्रे च परं धाम जले मम ॥ त्वत्तेजसा परिभ्रष्टं पापं यातु सहस्रधा ॥ दिवाकर जगन्नाथ प्रभाकर नमोस्तु ते ॥ परिपूर्णं करिष्येहं माघस्नानं तवाज्ञया" ॥ इति मंत्राभ्यामपि संकल्पः कार्यः ॥ एवं चतुर्दश्यां संकल्पोपवासाधिवास्नानमाधवपूजनानि कृत्वा पौर्णिमायां तिलचर्वाज्यैरष्टोत्तरशतहोमं कृत्वा तिलशर्करागर्भत्रिंशन्मोदकात्मकवायनं देयम् ॥ तत्र मंत्रौ ॥ "सवितः प्रसवस्त्वं हि परं धाम जले मम ॥ त्वत्तेजसा परिभ्रष्टं पापं यातु सहस्रधा ॥ दिवाकर जगन्नाथ प्रभाकर नमोस्तु ते ॥ परिपूर्णं कुरुष्वेह माघस्नानमुषःपते" इति ॥ ततो दंपत्योः सूक्ष्मवाससी सप्तधान्यानि च दत्वा ब्राह्मणेभ्यो दांपत्याय च षड्रसभोजनं देयम् ॥ तत्र मंत्रः ॥ "सूर्यो मे प्रीयतां देवो विष्णुमूर्त्तिर्निरंजनः" इति ॥ "एवं माघप्लवी याति भित्त्वा देवं दिवाकरम् ॥ परिव्राडयोगयुक्तश्च रणे चाभिमुखो हतः" इति ॥ माघकृष्णाष्टम्यां चतुरष्टकाकरणाशक्त एकाष्टकां पूर्वेद्युःश्राद्धान्वष्टक्यश्राद्धसहितां कुर्यात् ॥ दिनत्रये कर्तुमशक्तोष्टम्यामेवैकामष्टकां कुर्यात् ॥

## अथ शिवरात्रिः ।

सा निशीथव्यापिनी ग्राह्या ॥ निशीथस्तु रात्रेरष्टमो मुहूर्त इत्युक्तम् ॥ तत्र परदिन एवार्धरात्रौ परा ॥ पूर्वत्रैव तद्व्याप्तौ पूर्वा ॥ दिनद्वयेप्यर्धरात्रव्याप्त्यभावेपि परैव ॥ दिनद्वये कात्स्न्येनैकदेशेन वार्धरात्रव्याप्तौ पूर्वेवेति हेमाद्याशयानुसारी कौस्तुभः ॥ परैवेति माधवनिर्णयसिंधुपुरुषार्थचिंतामण्यादयो बहवः ॥ परेद्युर्निशीथैकदेशव्याप्तौ पूर्वेद्युः संपूर्णतद्व्याप्तौ पूर्वैव ॥ पूर्वदिने निशीथैकदेशव्याप्तौ परदिने संपूर्णतद्व्याप्तौ परैव ॥ इदं व्रतं रविवारभौमवारयोगे शिवयोगयोगे चातिशस्तम् ॥

## अथ पारणानिर्णयः ।

यामत्रयादर्वाक् चतुर्दशीसमाप्तौ चतुर्दश्यंते पारणम् ॥ यामत्रयोर्ध्वगामिन्यां चतुर्दश्यां प्रातश्चतुर्दशीमध्ये एव पारणमिति माधवादयः ॥ निर्णयसिंधौ तु याम-

त्रयादर्वाक् चतुर्दशीसमाप्तावपि चतुर्दशीमध्य एव पारणं न तु कदाचिदपि चतुर्दश्यंते ॥ "उपोषणं चतुर्दश्यां चतुर्दश्यां च पारणम् ॥ कृतैः सुकृतलक्षैस्तु लभ्यते यदि वा न वा ॥ सिक्थेसिक्थे फलं तस्य शक्तो वक्तुं न पार्वति" इत्यादिना चतुर्दशीमध्ये पारणं पुण्यातिशयोक्तेरित्युक्तम् ॥ अत्रैवं व्यवस्था ज्ञेया ॥ यदा नित्यकृत्यपूर्वकपारणपर्याप्ता चतुर्दशी नास्ति तदा वा येषां चतुर्दशीशेषदिने दर्शादिश्राद्धप्रसक्तिस्तैर्वा तिथ्यंते पारणम् ॥ द्वादश्यामिवात्र नित्यकृत्यापकर्षकवाक्याभावात् ॥ तिथ्यंतपारणविधायकवाक्यसत्त्वेन संकटविषयकजलपारणविधिवाक्यानामत्राप्रवृत्तेश्च ॥ कर्मपर्याप्तचतुर्दशीसत्त्वे श्राद्धप्रसक्त्यभावे च तिथिमध्य एव पारणमिति ॥ अथ व्रतप्रयोगः ॥ त्रयोदश्यां कृतैकभक्तश्चतुर्दश्यां कृतनित्यक्रियः प्रातर्मंत्रेण संकल्पं कुर्यात् ॥ "शिवरात्रिव्रतं ह्येतत्करिष्येहं महाफलम् ॥ निर्विघ्नमस्तु मे वात्र त्वत्प्रसादाज्जगत्पते ॥ चतुर्दश्यां निराहारो भूत्वा शंभो परेहनि ॥ भोक्ष्येहं मुक्तिमुक्त्यर्थं शरणं मे भवेश्वर" इति ॥ द्विजस्तु ॥ 'रात्रीं प्रपद्ये जननीम्' इत्यृचावपि पठित्वा जलमुत्सृजेत् ॥ ततः सायाह्ने कृष्णतिलैः स्नानं कृत्वा धृतभस्मत्रिपुंड्ररुद्राक्षो निशामुखे शिवायतनं गत्वा क्षालितपादः स्वाचांत उदङ्मुखो देशकालौ संकीर्त्य शिवरात्रौ प्रथमयामपूजां करिष्ये इति यामचतुष्टये पूजाचतुष्टयचिकीर्षायां संकल्पः ॥ सकृत्पूजाचिकीर्षायां श्रीशिवप्रीत्यर्थं शिवरात्रौ श्रीशिवपूजां करिष्ये इति संकल्पः ॥ तत्रादौ सामान्यतः शिवपूजाविधिरुच्यते ॥ यामभेदेन विशेषस्तु वक्ष्यते ॥ अस्य श्रीशिवपंचाक्षरमंत्रस्य वामदेव ऋषिः ॥ अनुष्टुप् छंदः ॥ श्रीसदाशिवो देवता ॥ न्यासे पूजने जपे च विनियोगः ॥ वामदेवाय ऋषये नमः शिरसि ॥ अनुष्टुप्छंदसे नमो मुखे ॥ श्रीसदाशिवदेवतायै नमो हृदि ॥ ॐ नं तत्पुरुषाय नमो हृदये ॐ मं अघोराय नमः पादयोः ॐ शिं सद्योजाताय नमो गुह्ये ॐ वां वामदेवाय नमो मूर्ध्नि ॐ यं ईशानाय नमो मुखे ॐ ॐ हृदयाय नमः ॐ नं शिरसे स्वाहा ॐ मं शिखायै वषट् ॐ शिं कवचाय हुं ॐ वां नेत्रत्रयाय वौषट् ॐ यं अस्त्राय फट् ॥ कुंभपूजां विधाय ॥ "ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचंद्रावतंसं रत्नाकल्पोज्ज्वलांगं परशुमृगवराभीतिहस्तं प्रसन्नम् ॥ पद्मासीनं समंतात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं विश्वाद्यं विश्ववंद्यं निखिलभयहरं पंचवक्त्रं त्रिनेत्रम्" ॥ इति ध्यात्वा प्राणप्रतिष्ठां कृत्वा संस्थाप्य लिंगं स्पृशन् ॥ ॐ भूः पुरुषं सांबसदाशिवमावाहयामि ॥ ॐ भुवः पुरुषं सांब० ॐ स्वः पुरुषं सां० ॐ भूर्भुवः स्वः पुरुषं सां० इत्यावाहयेत् ॥ "स्वामिन्सर्वजगन्नाथ यावत्पूजावसानकम् ॥ तावत्त्वं प्रीतिभावेन लिंगेऽस्मिन्संनिधौ भव" इति पुष्पांजलिं दद्यात् ॥ स्थावरलिंगे संस्कृतचरलिंगे च प्राणप्रतिष्ठाद्यावाहनांतं न कार्यम् ॥ ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै

नमोनमः ॐ नमः शिवाय श्रीसांबसदाशिवाय नमः ॥ आसनं समर्पयामि ॥ स्त्रीशूद्रश्चेत् ॥ ॐ नमः शिवायेति पंचाक्षरीस्थाने श्रीशिवाय नम इति नमोंतमंत्रेण पूजयेत् ॥ ॐ भवेभवे नातिभवे भवस्व मां ॐ नमः शिवाय श्रीसांबसदाशिवाय नमः पाद्यं समर्पयामि ॥ ॐ भवोद्भवाय नमः ॐ नमः शिवाय श्रीसांब० अर्घ्यं० ॐ वामदेवाय नमः ॐ नमः शिवाय श्रीसां० आचमनीयम् ॥ ॐ ज्येष्ठाय नमः ॐ नमः शिवाय श्रीसांब० स्नानम् ॥ ततो मूलमंत्रेण अप्यायस्वेत्यादिभिश्च पंचामृतैः संस्नाप्य ॥ आपोहिष्ठेति तिसृभिः शुद्धोदकेन प्रक्षाल्यैकादशावृत्त्यैकावृत्त्या वा रुद्रेण पुरुषसूक्तेन च चन्दनकुंकुमकर्पूरवासितजलेनाभिषेकं कृत्वा ॐ नमः शिवायेति स्नानांते आचमनं दत्त्वा साक्षतजलेन तर्पणं कार्यम् ॥ भवं देवं तर्पयामि शर्वं देवं तर्पयामि ईशानं देवं तर्पयामि पशुपतिं देवं त० उग्रं देवं त० रुद्रं देवं त० भीमं देवं त० महांतं देवं त० भवस्य देवस्य पत्नीं त० शर्वस्य देवस्य पत्नीं त० ईशानस्य देवस्य पत्नीं त० पशुपतेर्देवस्य प० उग्रस्य देवस्य प० रुद्रस्य देवस्य प० भीमस्य देवस्य प० महतो देवस्य प० ॐ ज्येष्ठाय नमः ॐ नमः शिवाय श्रीसां० वस्त्रं० मूलेनाचमनं० ॐ रुद्राय नमः ॐ नमः शिवाय श्रीसां० यज्ञोपवीतं० मूलेनाचमनम् ॐ कालाय नमः ॐ नमः शिवाय श्रीसां० चन्दनं० ॐ कलविकरणाय नमः ॐ नमः शिवाय श्रीसां० अक्षतान् ॐ बलविकरणाय नमः ॐ नमः शिव॥ श्रीसांब० पुष्पाणि० सहस्रमष्टोत्तरशतं वा सहस्रादिनामभिर्मूलमंत्रेण वा बिल्वपत्राणि दद्यात् ॥ ॐ बलाय नमः ॐ नमः शिवाय श्रीसां० धूपं० ॐ बलप्रमथनाय० ॐ नमः शिवाय श्रीसांब० दीपं स० ॐ सर्वभूतदमनाय नमः ॐ नमः शिवाय श्रीसां० नैवेद्यं० मूलेनाचमनं फलं च० ॐ मनोन्मनाय० ॐ नमः शिवाय श्रीसां० तांबूलं० मूलेन वैदिकैर्मंत्रैश्च नीराजनं० ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥ ॐ नमः शिवाय श्रीसां० मंत्रपुष्पं० भवाय देवाय नमः शर्वाय देवायेत्याद्यष्टौ भवस्य देवस्य पत्न्यै इत्याद्यष्टौ नमस्कारान्कृत्वा ॥ शिवाय नमः रुद्राय० पशुपतये० नीलकंठाय० महेश्वराय० हरिकेशाय० विरूपाक्षाय० पिनाकिने० त्रिपुरांतकाय० शंभवे० शूलिने० महादेवाय० इति द्वादशनामभिर्द्वादशपुष्पांजलीन्दत्त्वा मूलेन प्रदक्षिणानमस्कारान्कृत्वा मूलमंत्रमष्टोत्तरशतं जप्त्वा क्षंमापयित्वाऽनेन पूजनेन श्रीसांबसदाशिवः प्रीयतामिति निवेदयेत् ॥ अथ चतुर्षु यामेषु पूजाचतुष्टये विशेषः ॥ तत्र प्रथमयामे मूलमंत्रांते श्रीशिवायासनं समर्पयामीति शिवनाम्ना सर्वोपचारसमर्पणम् ॥ द्वितीययामे शिवरात्रौ द्वितीययामपूजां करिष्य इति संकल्प्य ॥ श्रीशंकरायासनं समर्पयामीति शंकरनाम्ना ॥ तत्रो महानिशि पूजां करिष्य इति

संकल्प्य पूर्ववत्पूजा ॥ ततस्तृतीययामपूजां करिष्य इत्युक्त्वा श्रीमहेश्वरायासनमित्यादि महेश्वरनाम्ना ॥ एवमेव चतुर्थयामे श्रीरुद्रायेति रुद्रनाम्ना ॥ प्रतियामं तैलेनाभ्यंगपंचामृतोष्णोदकशुद्धोदकगंधोदकाभिषेकाः कार्याः ॥ यज्ञोपवीतांते गोरोचनकस्तूरीकुंकुमकर्पूरागरुचंदनमिश्रितानुलेपेन लिंगं लेपयेत् ॥ पंचविंशतिपलमितः सर्वोनुलेप इत्युनुलेपपरिमाणं यथाशक्ति वा ॥ धत्तूरकरवीरकुसुमैर्बिल्वपत्रैश्च पूजनमतिप्रशस्तम् ॥ पुष्पाभावे शालितंडुलगोधूमयवैः पूजा ॥ नैवेद्योत्तरं तांबूलमुखवासावुक्तौ ॥

## अथ तांबूलमुखवासलक्षणम् ।

नागवल्लीदलक्रमुकफलशुक्त्यादिचूर्णेति त्रयं तांबूलसंज्ञम्॥ एतदेव नारिकेरकर्पूरैलाकंकोलैः सहितं मुखवाससंज्ञम् ॥ एतेषामन्यतमद्रव्यालाभे तत्तद्द्रव्यं स्मरेद्बुधः॥ सर्वपूजांते प्रार्थना ॥ "नित्यनैमित्तिकं काम्यं यत्कृतं तु मया शिव ॥ तत्सर्वं परमेशान मया तुभ्यं समर्पितम्" इति ॥"शिवरात्रिव्रतं देव पूजाजपपरायणः ॥ करोमि विधिवद्दत्तं गृहाणार्घ्यं नमोस्तु ते" इत्यर्घ्यम् ॥ एवं यामचतुष्टयेर्घ्यभेदः कौस्तुभे ॥ ततः प्रभाते स्नात्वा पुनः शिवं संपूज्य पूर्वोक्तद्वादशनामभिर्द्वादशब्राह्मणानशक्तावेकं वा संपूज्य तिलपक्वान्नपूर्णान् द्वादशकुंभानेकं वा दत्त्वा व्रतमर्पयेत् ॥ "यन्मयाद्य कृतं पुण्यं तद्रुद्रस्य निवेदितम् ॥ त्वत्प्रसादान्मया देव व्रतमद्य समर्पितम् ॥ प्रसन्नो भव मे श्रीमन्सद्गतिः प्रतिपाद्यताम् ॥ त्वदालोकनमात्रेण पवित्रोस्मि न संशयः" इति ॥ ततो ब्राह्मणान् भोजयित्वा पूर्वनिर्णीते काले स्वजनैः सह पारणं कुर्यात् ॥ तत्र मंत्रः ॥ "संसारक्लेशदग्धस्य व्रतेनानेन शंकर ॥ प्रसीद सुमुखो नाथ ज्ञानदृष्टिप्रदो भव" इति ॥ इति शिवरात्रिव्रतविधिः ॥

## अथ मृन्मयलिंगे शिवपूजाचिकीर्षायां तद्विधिः ।

ॐ हराय नम इति मृदमाहृत्य शोधितायां तस्यां जलप्रक्षेपेण संपीड्य तेन पिंडेन ॥ ॐ महेश्वराय नम इति लिङ्गं कुर्यात् ॥ तच्च लिङ्गमशीतिगुञ्जात्मकवर्षादधिकपरिमाणमंगुष्ठमात्रं ततोधिकं वा कार्यं न न्यूनम् ॥ मृन्मयलिङ्गे पंचसूत्रसम्पादनाभावेपि न दोषः ॥ अत एव ॥ " सप्तकृत्वस्तुलारूढं वृद्धिमेति न हीयते ॥ बाणलिङ्गमिति प्रोक्तं शेषं नार्मदमुच्यते " ॥ इत्युक्तलक्षणाद्बाणलिंगादतिदुर्लभाद्दुःसंपाद्य पंचसूत्रसम्पादनात्सुवर्णादिलिङ्गाच्च मृन्मयलिङ्गं श्रेष्ठम् ॥ " द्वापरे पारदं श्रेष्ठं पार्थिवं तु कलौ युगे " इति वचनाच्च ॥ ततः ॐ शूलपाणये नमः शिव इह प्रतिष्ठितो भवेति सबिल्वपत्रे पूजापीठे प्रतिष्ठाप्य 'ध्यायेन्नित्यं महेशम् ' इति ध्यात्वा ॥ ॐ पिनाकधृषे नमः श्रीसांबसदाशिव इहागच्छेह प्रतिष्ठेह सन्निहितो भवेत्यावाहयेत् ॥ इह द्विजानां सर्वत्र मूलमन्त्रोपि ज्ञेयः ॥

ततः ' ॐ नमः शिवाय ' इति मूलमन्त्रेण पाद्यमर्घ्यमाचमनं दत्त्वा पशुपतये नमः इति मूलेन च स्नानं वस्त्रमुपवीतं गन्धपुष्पधूपदीपनैवेद्यफलतांबूलनीराजनमन्त्रपुष्पांजलीन्दत्त्वा शर्वाय क्षितिमूर्त्तये नमः इति प्राच्यां पूजयेत् ॥ भवाय जलमूर्तये नमः इतीशान्याम् ॥ रुद्रायाग्निमूर्तये नमः इत्युदीच्याम् ॥ उग्राय वायुमूर्तये नम इति वायव्याम् ॥ भीमायाकाशमूर्तये नम इति प्रतीच्याम् ॥ पशुपतये यजमानमूर्तये नम इति नैर्ऋत्याम् ॥ महादेवाय सोममूर्तये नम इति दक्षिणस्याम् ॥ ईशानाय सोममूर्तये नम इत्याग्नेय्याम् ॥ ततः स्तुत्वा नमस्कृत्य महादेवाय नम इति विसर्जयेदिति संक्षेपः ॥ विस्तरस्तु पुरुषार्थचिन्तामणौ ज्ञेयः ॥ शिवरात्रिश्चेत्पूर्वोक्तपूजाविधिः पार्थिवलिङ्गेपि कार्यः ॥ पार्थिवलिङ्गोद्यापनविधिः कौस्तुभादौ ज्ञेयः ॥ लिङ्गविशेषेण फलविशेषः ॥ आयुष्यं हीरजे लिङ्गे ॥ मौक्तिके रोगनाशः ॥ वैदूर्ये शत्रुनाशः ॥ पाद्मरागे लक्ष्मीः ॥ पुष्करागजे सुखम् ॥ ऐन्द्रनीले यशः ॥ मारकते पुष्टिः ॥ स्फाटिके सर्वकामाः ॥ राजते राज्यं पितृमुक्तिः ॥ हैमे सत्यलोकः ॥ ताम्रे पुष्टिरायुश्च ॥ पैत्तले तुष्टिः ॥ कांस्ये कीर्तिः ॥ लोहजे शत्रुनाशः ॥ सीसजे आयुष्यम् ॥ मतांतरे ॥ सौवर्णे ब्रह्मस्वपरिहारः स्थिरलक्ष्मीश्च ॥ एवं गंधमये सौभाग्यम् ॥ हस्तिदंतजे सेनापत्यम् ॥ व्रीह्यादिधान्यपिष्टजे पुष्टिसुखरोगनाशादि ॥ माषजे स्त्री ॥ नान्नीते सुखम् ॥ गोमयजे रोगनाशः ॥ गौडिन्नादि ॥ वंशांकुरजे वंशवृद्धिरित्यन्यविस्तरः ॥ एवं लिंगसंख्याविशेषात्फलविशेषः कौस्तुभे ॥ शिवनिर्माल्यग्रहणाग्रहणविचारस्तृतीयपरिच्छेदे ज्ञेयः ॥ मासशिवरात्रिनिर्णयः प्रथमपरिच्छेदे उक्तः ॥ शिवरात्रिव्रतोद्यापनं कौस्तुभादौ ज्ञेयम् ॥ मासशिवरात्रिव्रतोद्यापनमपि कौस्तुभे स्पष्टम् ॥ माघामावास्यायामपराह्णव्यापिन्यां युगादित्वादपिंडकं श्राद्धं कार्यम् ॥ तच्च दर्शश्राद्धेन सह तंत्रं कार्यम् ॥ माघामावास्यायां शततारकायोगे परमः पुण्यकालस्तत्र श्राद्धात्परमा पितृतृप्तिः ॥ धनिष्ठायोगे तु तिलान्नेन श्राद्धं कार्यम् ॥ तेन वर्षायुतकालं पितृतृप्तिः ॥ ॥ इति श्रीमदनंतोपाध्यायसूनुकाशीनाथोपाध्यायविरचिते धर्मसिंधुसारे माघमासकृत्यनिर्णयोद्देशः समाप्तः ॥

## अथ फाल्गुनमासः ।

मीनसंक्रांतौ पराः षोडश नाड्यः पुण्याः ॥ रात्रौ तु प्रायुक्तम् ॥ फाल्गुने गोव्रीहिवस्त्रदानं गोविंदप्रीतये कार्यम् ॥ अथ फाल्गुनशुद्धप्रतिपदमारभ्य द्वादशदिनपर्यंतं पयोव्रतं श्रीभागवते उक्तम् ॥ तत्प्रयोगो मूलानुसारेणोह्यः ॥

## अथ होलिकानिर्णयः ।

फाल्गुनीपौर्णमासी मन्वादिः ॥ सा पौर्वाह्णिकी इयमेव होलिका ॥ सा प्रदोषव्यापिनी भद्रारहिता ग्राह्या ॥ दिनद्वये प्रदोषव्याप्तौ परदिने प्रदोषैकदेशव्याप्तौ

वा परैव ॥ पूर्वदिने भद्रादोषात् ॥ परदिने प्रदोषस्पर्शाभावे पूर्वदिने प्रदोषे भद्रासत्त्वे यदि पूर्णिमा परदिने सार्धत्रियामा ततोधिका वा तत्परदिने च प्रतिपद्-वृद्धिगामिनी तदा परदिने प्रतिपदि प्रदोषव्यापिन्यां होलिका ॥ उक्तविषये यदि प्रतिपदो ह्रासस्तदा पूर्वदिने भद्रापुच्छे वा भद्रामुखमात्रं त्यक्त्वा भद्रायामेव वा होलिकादीपनम् ॥ परदिने प्रदोषस्पर्शाभावे पूर्वदिने यदि निशीथात्प्राक् भद्रासमाप्तिस्तदा भद्रावसानोत्तरमेव होलिकादीपनम् ॥ निशीथोत्तरं भद्रासमाप्तौ भद्रामुखं त्यक्त्वा भद्रायामेव ॥ प्रदोषे भद्रामुखव्याप्ते भद्रोत्तरं प्रदोषोत्तरं वा ॥ दिनद्वयेपि पूर्णिमायाः प्रदोषस्पर्शाभावे पूर्वदिन एव भद्रापुच्छे तदलाभे भद्रायामेव प्रदोषोत्तरमेव होलिका ॥ रात्रौ पूर्वार्धभद्राया ग्राह्यत्वोक्तेः ॥ न तु पूर्वप्रदोषादौ चतुर्दश्यां न वा परत्र सायाह्नादौ ॥ दिवा होलिकादीपनं तु सर्वग्रन्थविरुद्धम् ॥ इदं होलिकापूजनं श्रवणाकर्मादिवद्भुक्त्वापि कुर्वंति ॥ युक्तं चैतत् ॥ केचिद्धोलिकापूजनं कृत्वा भुंजते तेषां भोजनस्य पूजनस्य वा न नियमेन शास्त्रविहितकाललाभः ॥ इदं चन्द्रग्रहणसत्त्वे वेधमध्येपि कार्यम् ॥ ग्रस्तोदये परदिने प्रदोषे पूर्णिमा सत्त्वे ग्रहणमध्य एव कार्यम् ॥ अन्यथा पूर्वदिने ॥ भद्रामुखपुच्छलक्षणम् ॥ पूर्णिमायां भद्रायास्तृतीयपादांते घटीत्रयं पुच्छम् ॥ चतुर्थपादाद्यघटीपंचकं मुखम्॥ तथा च मध्यममानेन षष्टिघटीमितायां पूर्णिमायां पूर्णिमाप्रवृत्युत्तरं सार्धैकोनविंशतिघटिकोत्तरं घटीत्रयं पुच्छम् ॥ सार्द्धद्वाविंशतिघटिकोत्तरं घटीपंचकं मुखम् ॥ तिथेश्चतुःषष्टिघटीमितत्वे पूर्णिमाया एकविंशतिघटिकोत्तरं पुच्छम् ॥ चतुर्विंशतिघटिकोत्तरं मुखम्॥एवं तिथेर्मानांतरेप्यूह्यम् ॥ अथ पूजाविधिः॥देशकालौ संकीर्त्य सकुटुम्बस्य मम ढुंढाराक्षसीप्रीत्यर्थं तत्पीडापरिहारार्थं होलिकापूजनमहं करिष्ये इति संकल्प्य शुष्काणां काष्ठानां गोमयपिंडानां च राशिं कृत्वा वह्निना प्रदीप्य तत्र ॥ " अस्माभिर्भयसंत्रस्तैः कृता त्वं होलिके यतः ॥ अतस्त्वां पूजयिष्यामि भूते भूतिप्रदा भव " इति पूजामन्त्रेण श्रीहोलिकायै नमो होलिकामावाहयामीत्यावाह्य होलिकायै नम इति मन्त्रेणासनपाद्यादिषोडशोपचारान्दत्त्वा ॥ प्रार्थनामन्त्रः ॥ "वन्दितासि सुरेंद्रेण ब्रह्मणा शंकरेण च ॥ अतस्त्वं पाहि नो देवि भूते भूतिप्रदा भव" इति प्रार्थयेत् ॥ "तमग्निं त्रिः परिक्रम्य गायंतु च हसंतु च॥ जल्पं तु स्वेच्छया लोका निःशंका यस्य यन्मतम् " ॥ ज्योतिर्निबंधे ॥ "पंचमीप्रमुखास्तास्तु तिथयोऽनंतपुण्यदाः ॥ दश स्युः शोभनास्तासु काष्ठस्तेयं विधीयते ॥ चंडालसूतिकागेहाच्छिशुहारितवह्निना ॥ प्राप्तायां पूर्णिमायां तु कुर्यात्तत्काष्ठदीपनम् ॥ ग्रामाद्बहिश्च मध्ये वा तूर्यनादसमन्वितः ॥ स्नात्वा राजा शुचिर्भूत्वा स्वस्तिवाचनतत्परः ॥ दत्त्वा दानानि भूरीणि दीपयेद्धोलिकाचितिम् ॥ ततोभ्युक्ष्य चितिं सर्वां साज्येन पयसा सुधीः ॥ नारिकेराणि देयानि बीजपूरफलानि च ॥ गीतवा-

द्यैस्तथा नृत्यै रात्रिः सा नीयते जनैः ॥ तमग्निं त्रिः परिक्रम्य शब्दैर्लिंगभगांकितैः ॥ तेन शब्देन सा पापा राक्षसी तृप्तिमाप्नुयात् " ॥ एवं रात्रौ होलिकोत्सवं कृत्वा प्रातः प्रतिपदि यः श्वपचं स्पृष्ट्वा स्नानं कुर्यात् ॥ "न तस्य दुष्कृतं किंचिन्नाधयो व्याधयो पि च ॥ कृत्वा चावश्यकार्याणि संतर्प्य पितृदेवताः ॥ वंदयेद्धोलिकाभूतिं सर्वदुष्टोपशांतये " ॥ वन्दने मन्त्रः ॥ वन्दितासि सुरेंद्रेण ब्रह्मणा शंकरेण च ॥ अतस्त्वं पाहि नो देवि भूते भूतिप्रदा भव " इति ॥ होलिकादिनं करिसंज्ञकं तदुत्तरदिनं च शुभे वर्ज्यम् ॥

## अथ करिदिननिर्णयः ।

"होलिकाग्रहणभावुकायनं प्रेतदाहदिवसोत्र पंचमः ॥ तत्परं च करिसंज्ञकं दिनं बर्जितं सकलकर्मसूभयम् " इत्युक्तेः ॥ ग्रहणायनप्रेतदाहेषु निशीथविभागेन पूर्वदिनकरिदिनयोर्निर्णयो ज्ञेयः ॥ "नरो दोलागतं दृष्ट्वा गोविंदं पुरुषोत्तमम् ॥ फाल्गुन्यां संयतो भूत्वा गोविन्दस्य पुरं व्रजेत्" ॥ फाल्गुनकृष्णप्रतिपदि वसंतारंभोत्सवः ॥ सा चौदयिकी ग्राह्या ॥ दिनद्वये सत्त्वे पूर्वा ॥ अत्र तैलाभ्यंग उक्तः ॥ अत्र प्रतिपदि चूतपुष्पप्राशनमुक्तम् ॥ तत्प्रकारः ॥ गोमयोपलिप्ते गृहांगणे शुक्लवस्त्रासन उपविष्टः प्राङ्मुखः सुवासिन्या कृतचन्दनतिलकनीराजनः सचन्दनमाम्रकुसुमं प्राश्नीयात् ॥ तत्र मन्त्रः॥ "चूतमग्र्यं वसंतस्य माकन्दकुसुमं तव ॥ सचंदनं पिबाम्यद्य सर्वकामार्थसिद्धये" इति ॥ कृष्णद्वितीयायां देशग्रामाधिपतिर्वितते वितानादिशोभिते देशे रम्यासने उपविश्य पौरजानपदाँल्लोकान्सिंदूरादिक्षोदैश्चंदनादिभिः पट्टवासैश्च विकीर्य तेभ्यस्तांबूलादि दत्त्वा नृत्यगीतविनोदैर्महोत्सवं कुर्यात् ॥ इदानीं प्राकृतजनास्तु कृष्णपञ्चमीपर्यंतमुत्सवं कुर्वंति ॥ इति होलिकोत्सवः ॥ फाल्गुनामावस्या मन्वादिः सा पराह्णव्यापिनी ग्राह्या॥ ॥ इति श्रीमदनंतोपाध्यायसूनुकाशीनाथोपाध्यायविरचिते धर्मसिंधुसारे फाल्गुनमासकृत्यनिर्णयोद्देशः समाप्तः ॥

अथ परिच्छेदद्वयशेषाख्यं प्रकीर्णप्रकरणमुच्यते ॥ द्वादशस्वपि मासेषु श्राद्धे व्यतीपातादियोगस्य भरण्यादिनक्षत्रस्य चापराह्णव्याप्त्या दर्शवन्निर्णयो ज्ञेयः ॥ उपवासादौ प्रचुराचाराभावान्नोक्तः ॥

## अथ प्रभवादिचांद्रसांवत्सरभेदाः ।

प्रभवो विभवः शुक्लः प्रमोदोथ प्रजापतिः ॥ अंगिराः श्रीमुखो भावो युवा धाता तथैव च ॥ १ ॥ ईश्वरो बहुधान्यश्च प्रमाथी विक्रमो वृषः ॥ चित्रभानुः सुभानुश्च तारणः पार्थिवोव्ययः ॥ २ ॥ सर्वजित्सर्वधारी च विरोधी विकृतिः खरः ॥ नन्दनो विजयश्चैव जयो मन्मथदुर्मुखौ ॥ ३ ॥ हेमलम्बी विलम्बी च

विकारी शार्वरी प्लवः ॥ शुभकृच्छोभकृत्क्रोधी विश्वावसुपराभवौ ॥ ४ ॥ प्लवंगः कीलकः सौम्यः साधारणविरोधकृत् ॥ परिधावी प्रमादी च आनन्दो राक्षसो नलः ॥ ५ ॥ पिंगलः कालयुक्तश्च सिद्धार्थी रौद्रदुर्मती ॥ दुन्दुभी रुधिरोद्गारी रक्ताक्षी क्रोधनः क्षयः ॥ ६ ॥ इति रवे राशिसंक्रमवन्नक्षत्रसंक्रमेपि षोडश नाड्यः पूर्वत्र परत्र च पुण्यकालः ॥

## अथ चन्द्रादीनां संक्रांतौ पुण्यकालः ।

चन्द्रस्य संक्रांतौ प्राक् परत्र च त्रयोदशपलाधिका एका घटी पुण्यकालः ॥ भौमस्यैकपलाधिकाश्चतस्रो नाड्यः ॥ बुधस्य चतुर्दशपलाधिकास्तिस्रः ॥ गुरोः सप्तत्रिंशत्पलाधिकाश्चतस्रः ॥ शुक्रस्यैकपलाधिकाश्चतस्रः ॥ शनेः सप्तपलाधिकाः षोडश ॥ एताः सर्वाः प्राक् परत्र च बोद्धव्याः ॥ रात्रौ ग्रहाणां संक्रमे रात्रावेव पुण्यकालः ॥ सूर्यसंक्रांतिवद्दिवापुण्यत्वविधायकाभावात् ॥ चन्द्रादिसंक्रांतिषु स्नानं काम्यं न तु नित्यम् ॥ आदित्यादिसूचितपीडानिरासार्थस्नानानि ॥ मञ्जिष्ठागजमदकुंकुमरक्तचन्दनानि जलपूर्णे ताम्रपात्रे प्रक्षिप्य स्नानं सूर्यपीडाहरम् ॥ उशीरशिरीषकुंकुमरक्तचन्दनयुतशंखतोयेन स्नानं चन्द्रदोषहरम् ॥ खदिरदेवदारुतिलामलकयुतरौप्यपात्रे जलेन स्नानं भौमे ॥ गजमदयुतसंगमजलेन मृत्पात्रस्थेन स्नानं बुधे ॥ औदुम्बरबिल्ववटामलकानां फलैर्युतसौवर्णपात्रजलेन स्नानं गुरौ ॥ गोरोचनगजमदशतपुष्पाशतावरीयुतराजतपात्रजलेन स्नानं शुक्रे ॥ तिलमाषप्रियंगुगन्धपुष्पयुतलोहपात्रस्थजलेन स्नानं शनौ ॥ गुग्गुलुहिंगुहरितालमनःशिलायुतमहिषशृंगपात्रजलेन स्नानं राहौ ॥ वराहोत्खातपर्वताग्रमृच्छागक्षीरयुतखड्गपात्रजलेन स्नानं केतौ ॥

## अथ ग्रहप्रीत्यर्थं दानानि ।

माणिक्यगोधूमधेनुरक्तवस्त्रगुडहेमताम्ररक्तचन्दनकमलानि रवेः प्रीत्यर्थं देयानि ॥ वंशपात्रस्थतण्डुलकर्पूरमौक्तिकश्वेतवस्त्रघृतपूर्णकुम्भवृषभाश्चन्द्रस्य ॥ प्रवालगोधूममसूरिकारक्तवृषभगुडसुवर्णरक्तवस्त्रताम्राणि भौमस्य ॥ नीलवस्त्रसुवर्णकांस्यमुद्गरुत्मतदासीहस्तिदन्तपुष्पाणि बुधस्य ॥ पुष्परागमणिहरिद्राशर्कराश्वपीतधान्यपीतवस्त्रलवणसुवर्णानि सुरगुरोः ॥ चित्रवस्त्रश्वेताश्वधेनुवज्रमणिसुवर्णरजत गन्धतण्डुलाः शुक्रस्य ॥ इन्द्रनीलमाषतैलतिलकुलित्थमहिषीलोहकृष्णधेनवः शनेः ॥ गोमेदाश्वनीलवस्त्रकंबलतैलतिललोहानि राहोः ॥ वैदूर्यतैलतिलकंबलकस्तूरीछागवस्त्राणि केतोर्दानानि ॥ शनिपीडापरिहारार्थं शनिवारे तैलाभ्यंगस्तैलदानं च ॥

## अथ शनिव्रतम् ।

लोहमयं शनिं तैलकुम्भे लौहे मृन्मये वा निक्षिप्य कृष्णवस्त्राभ्यां कंबलेन वा युतं कृष्णैः गन्धपुष्पैश्च कृसरान्नैस्तिलौदनैः पूजयित्वा कृष्णाय द्विजाय तदभावेऽन्यस्मै स शनिर्देयः ॥ तत्र " शन्नो देवी " इति मन्त्रः ॥ शूद्रादेस्तु ॥ "यः पुनर्भ्रष्टराज्याय नलाय परितोषितः ॥ स्वप्ने ददौ निजं राज्यं स मे सौरिः प्रसीदतु ॥ नमोर्कपुत्राय शनैश्चराय नीहारवर्णाजनमेचकाय ॥ श्रुत्वा रहस्यं भवकामदस्त्वं फलप्रदो मे भव सूर्यपुत्र" इत्यादयः ॥ एवं व्रतं प्रतिशनिवारं संवत्सरं कार्यम् ॥ "कोणस्थः पिंगलो बभ्रुः कृष्णो रौद्रोंतको यमः ॥ सौरिः शनैश्चरो मन्दः पिप्पलादेन संस्तुतः" इति दश नामानि वा नित्यं पठनीयानि ॥

## अथ शनिस्तोत्रम् ।

पिप्पलाद उवाच ॥ "नमस्ते कोणसंस्थाय पिंगलाय नमोस्तु ते ॥ नमस्ते बभ्रुरूपाय कृष्णाय च नमोस्तु ते ॥ नमस्ते रौद्रदेहाय नमस्ते चांतकाय च ॥ नमस्ते यमसंज्ञाय नमस्ते सौरये विभो ॥ नमस्ते मन्दसंज्ञाय शनैश्चर नमोस्तुते ॥ प्रसादं कुरु देवेश दीनस्य प्रणतस्य च" ॥ अनेन स्तोत्रेण प्रत्यहं प्रातः शनिस्तवनेन सार्द्धसप्तवार्षिकशनिपीडानाशः ॥ रविवारे सूर्यपूजोपवाससूर्यमन्त्रजपैः सर्वरोगनाशः ॥ ह्रीं ह्रीं सः सूर्यायेति षडक्षरमन्त्रः ॥ इति प्रकीर्णनिर्णयः ॥ उक्त आद्यपरिच्छेदे सामान्येन विनिर्णयः ॥ द्वितीयेस्मिन्परिच्छेदे विशेषेण विनिर्णयः ॥ १ ॥ मीमांसाधर्मशास्त्रज्ञाः सुधियोनलसा नराः ॥ कृतकार्याः प्राङ्निबन्धैस्तदर्थं नायमुद्यमः ॥ २ ॥ ये पुनर्मदमतयोलसा अज्ञाश्च निर्णयम् ॥ धर्मं वेदितुमिच्छंति रचितस्तदपेक्षया ॥ ३ ॥ निबंधोयं धर्मसिंधुसारनामा सुबोधनः ॥ अमुना प्रीयतां श्रीमद्विट्ठलो भक्तवत्सलः ॥ ४ ॥ सर्वत्र मूलवचनानीह ज्ञेयानि तद्विचारश्च ॥ कौस्तुभनिर्णयसिंधुश्रीमाधवकृतनिबंधेभ्यः ॥ ५ ॥ प्रेम्णा सद्भिर्ग्रथः सेव्यः शब्दार्थतः सदोषोपि ॥ संशोध्य वापि हरिणा सुदामसुनिसतुषपृथुकमुष्टिरिव ॥ ६ ॥ इति श्रीमत्काश्युपाध्यायसूरिसूनुयज्ञेश्वरोपाध्यायानुजानंतोपाध्यायसूरिसुतकाशीनाथोपाध्यायविरचिते धर्मसिंधुसारे प्रकीर्णनिर्णयोद्देशः समाप्तः ॥

इति द्वितीय परिच्छेदः समाप्तः ॥ श्रीपांडुरंगार्पणमस्तु ॥

॥ श्रीः ॥

# तृतीयपरिच्छेद-

## पूर्वार्द्धम् ।

श्रीगणेशाय नमः ॥ श्रीपांडुरंगमकलंककलानिधानकांताननं यदबुधानमनं मुधा न॥ श्रीवत्सकौस्तुभरमोल्लसितोरसं तं वंदे पदाब्जभृतनंददुदारसंतम् ॥ १ ॥ भीमाप्रियं सुकरुणार्णवमाशुतोषं दीनेष्टपोषमघसंहतिसिंधुशोषम् ॥ श्रीरुक्मिणीमतिमुषं पुरुषं परं तं वंदे दुरंतचरितं हृदि संचरंतम् ॥ २ ॥ वंदे प्रतिव्रतमघानि शंकरं धत्तां स मे मूर्ध्नि दिवानिशं करम् ॥ शिवां च विघ्नेशमथो पितामहं सरस्वतीमाशु भजे पितामहम् ॥ ३ ॥ श्रीलक्ष्मीं गरुडं सहस्राशिरसं प्रद्युम्नमीशं कपिं श्रीसूर्यं विधुभौमबिदुरुकविच्छायासुतान्षण्मुखम् ॥ इंद्राद्यान्विबुधान्गुरूंश्च जननीं तातं त्वनंताभिधं नत्वार्यान्वितनोमि माधवमुखान्धर्माब्धिसारं मितम् ॥ ४ ॥ दृष्ट्वा पूर्वनिबंधान्प्राच्यांश्च नवांश्च तेषु सिद्धार्थान् ॥ प्रायेण मूलवचनान्युज्झित्य लिखामि बालबोधाय ॥ ५ ॥ उक्ता धर्माब्धिसारेस्मिन्निर्णयं कालगोचरम् ॥ परिच्छेदे प्रथमजे द्वितीये च यथाक्रमम् ॥ ६ ॥ अथ ॥ गर्भाधानादिसंस्कारान् धर्मान् गृह्यादिसंमतान् ॥ वक्ष्ये संक्षेपतः संतोऽनुगृह्णंतु दयालवः ॥ ७ ॥ काशीनाथाभिधेनात्रानंतोपाध्यायसूनुना ॥ निर्णीयते यदेतत्तु शोधनीयं मनीषिभिः८॥

### तत्रादौ गर्भाधानसंस्कार उच्यते ।

अथ तदुपयोगितया प्रथमरजोदर्शने दुष्टमासादि निर्णीयते ॥ तत्र चैत्रज्येष्ठाषाढभाद्रपदकार्तिकपौषमासा दुष्टाः ॥ प्रतिपद्रिक्काष्टमीषष्ठीद्वादशीपंचदश्योनिष्टफलास्तिथयः ॥ तथा रविभौममंदवारेषु भरणीकृत्तिकार्द्राश्लेषामघापूर्वात्रयविशाखाज्येष्ठानक्षत्रेषु विष्कंभगंडातिगंडशूलव्याघातवज्रपरिघपूर्वार्द्धव्यतीपातवैधृतियोगेषु विष्ट्यां ग्रहणे रात्रिसंध्यापराह्णकालेषु निद्रायां जीर्णरक्तनीलचित्रवस्त्रेषु नमत्वे परगृहे परग्रामेषु अल्पाधिकनीलादिरक्तत्वे चानिष्टफलम् ॥ संमार्जनीकाष्ठतृणाग्निशूर्पान्हस्ते दधाना कुलटा स्यात् ॥ वस्त्रे विषमा रक्तबिंदवः पुत्रफलाः समाः कन्याफलाः ॥

### अथ प्रथमर्तौ विशेषः ।

अथ प्रथमर्तौ अक्षतैरासनं कृत्वा तत्र तामुपविश्य पतिपुत्रवत्यः स्त्रियो हरिद्राकुंकुमगंधपुष्पस्रक्तांबूलादि तस्यै दत्त्वा दीपैर्नीराज्य सदीपालंकृते गृहे तां वासयेयुः सुवासिनीभ्यो गंधादिकं लवणमुद्गादि च दद्यात् ॥ अथ सर्वर्तुसाधारणनि-

यमाः ॥ त्रिरात्रमस्पृश्या भूत्वा अभ्यंगांजनस्नानादिवास्वापाग्निस्पर्शदंतधावनमांसाशनसूर्याद्यवलोकान् भूमौ रेखाकरणं च वर्जयेदधः शयीत ॥ अंजलिना ताम्रलोहपात्रेण वा जलं न पिबेत् ॥ या खर्वपात्रेण जलं पिबति तस्याः खर्वः पुत्रः ॥ नखनिकृंतने कुनखी पुत्रः ॥ पर्णेन पाने उन्मत्त इति ॥

## अथ द्वितीयतौ नियमाः ।

द्वितीयादिषु ऋतुषु तु प्रवासगंधमाल्यादिधारणतांबूलगोरसाभक्ष्याभक्षणपीठाद्यारोहणं वर्जयेत् ॥ मृन्मये आयसे भूमौ वा भुंजीत ॥

## अथ रजस्वलानैमित्तिकस्नाने ।

ग्रहणादिनिमित्तकस्नानप्राप्तौ नोदकमज्जनरूपं स्नानं किं तु पात्रांतरितजलेन स्नात्वा ॥ "न वस्त्रपीडनं कुर्यान्नान्यद्वासश्च धारयेत् ॥" एवं मृताशौचादिनिमित्तकस्नानप्राप्तावपि ॥

## अथ रजस्वलयोः स्पर्शादौ ।

सगोत्रयोर्योनिसंबंधिन्योर्वा ब्राह्मण्योः रजस्वलयोः परस्परं स्पर्शे उक्तरीत्या तदैव स्नानमात्रेण शुद्धिः ॥ बुद्ध्या स्पर्शे एकरात्रमुपवासः ॥ गोत्रादिसंबंधाभावे अबुद्ध्या स्पर्शे तस्मिन्दिने स्नात्वा न भुंजीत ॥ मत्या स्पर्शे तु आशुद्धेर्न भुंजीत ॥ भोजने तु शुद्ध्यनंतरं तावद्दिनसंख्ययोपवसेत् ॥ उपवासाशक्तौ तु तत्प्रत्याम्नायब्राह्मणभोजनादि कुर्यात ॥ सर्वत्र शुद्ध्युत्तरं पंचगव्याशनं ज्ञेयम् ॥ शूद्रीब्राह्मण्योः रजस्वलयोः स्पर्शे आशुद्धेरभोजनम् ॥ शुद्धौ कृच्छ्रप्रायश्चित्तं ब्राह्मण्याः ॥ शूद्यास्तु पादकृच्छ्रमात्रम् ॥

## अथ रजस्वलासूतिकयोश्चांडालादिस्पर्शे ।

रजस्वलायाः सूतिकाया वा चांडालस्पर्शे आशुद्धेर्न भोजनम् अतिकृच्छ्रं च ॥ अमत्या स्पर्शे प्राजापत्यम् ॥ दंडादिपरंपरया चांडालादिस्पर्शे स्नानमात्रम् ॥ भुंजानायाः स्पश प्राजापत्यं द्वादशब्राह्मणभोजनं च ॥ मिताक्षरायां तु ॥ पतितांत्यजचांडालैः कामतः स्पर्शे आशुद्धेरभुक्ता शुद्ध्युत्तरं प्रथमेह्नि स्पर्शे त्र्यहमुपवासः ॥ द्वितीये द्व्यहम् ॥ तृतीये एकाहः ॥ अकामतस्तु आशुद्धेरभोजनमात्रम् ॥ एवं ग्रामकुक्कुटसूकरश्ववायसरजकादिस्पर्शेपि ॥ अशक्तौ तु स्नात्वा यावन्नक्षत्रदर्शनमभोजनम् ॥ भुंजानायाः श्वचांडालादिस्पर्शे आशुद्धेरभोजनं षड्रात्रं गोमूत्रयावकाहारः॥ अशक्तौ सुवर्णदानं विप्रभोजनं वा उच्छिष्टयो रजस्वलयोः स्पर्शे उच्छिष्टचांडालेन स्पर्शे वा कृच्छ्रेण शुद्धिः ॥ उच्छिष्टद्विजस्पर्शे रजस्वलाया त्र्यहमूर्ध्वोच्छिष्टे अधरोच्छिष्टे त्वेकाहमुपवास इत्युक्तम् ॥ उच्छिष्टशूद्रस्पर्शे अधिकं कल्प्यम् ॥ पुष्पिण्याः सूतक्याद्यशुद्धनरस्पर्शे आशुद्धेरभोजनं भोजने तु

कृच्छ्रम् ॥ पंचनखद्विशफैकशफपशुस्पर्शे अंडजस्पर्शे चाशुद्धेरभोजनम् ॥ रजस्वलायाः श्वजंबूकगर्दभदंशे आशुद्धेरभोजनम् ॥ शुद्धौ पंचरात्रमुपवासः ॥ नाभेरूर्ध्वं दंशे दशरात्रं मूर्ध्नि दंशे विंशतिरात्रम् ॥ भुंजाना रजस्वला रजस्वलां पश्यति चेदाशुद्धेरभोजनम् ॥ चांडालं पश्यति चेदुपवासत्रयमपि ॥ कामतश्चांडालं पश्यति चेत्प्राजापत्यम् ॥ रजस्वलायाः शवसूतिकाभ्यां स्पर्शे शुद्ध्यंते त्रिरात्रमुपवासः आशुद्धेरभोजनं च भोजने तु कृच्छ्रम् ॥ सर्वत्र ब्रह्मकूर्चविधिना पंचगव्याशनमुक्तमेव ॥ आशौचिभिः स्पर्शे स्नानात्प्राग्रजोदर्शने चतुर्थदिनपर्यंतमभोजनम् ॥ अशक्तौ तु सद्यः स्नात्वा भुंजीत ॥ एवं बंधुमरणश्रवणे स्नानात्प्राग्रजोदर्शनेपि ॥ तथा रजोदर्शनोत्तरं बंधुमरणश्रवणेपि शक्तायाः आशुद्धेरभोजनमशक्तायाः सद्यःस्नानेन भोजनम् ॥ सर्वत्रास्पृश्यस्पर्शे अशक्तायाः स्नाने कृते भोजनम् ॥ शुद्ध्यंते अनशनप्रत्याम्नाय इति केचित ॥

## अथ रजसि जननमरणयोः प्रथमदिननिर्णयः ।

रजस्वलायाः प्रथमदिननिर्णयस्तु रात्रेः पूर्वभागद्वये पूर्वं दिनं प्रथमम् ॥ तृतीयभागे रजोदर्शने उत्तरदिनं प्रथमम् ॥ यद्वा अर्धरात्रात्पूर्वं पूर्वदिनं प्रथमम् ॥ अर्धरात्रादूर्ध्वमुत्तरदिनं प्रथमम् ॥ एवं जननमरणाशौचेपि ज्ञेयम् ॥

## अथ अष्टादशदिनादर्वाक् पुना रजोदर्शने ।

यस्याः प्रायेण मासे रजोदर्शनं तस्याः सप्तदशदिनपर्यंतं पुना रजोदर्शने स्नानाच्छुद्धिः ॥ अष्टादशाहे एकरात्रमशुचित्वम् ॥ एकोनविंशे द्विरात्रम् ॥ विंशतिप्रभृतित्रिरात्रम् ॥ यस्याः प्रायः पक्षेपक्षे रजोदर्शनं तस्याः दशदिनपर्यंतं स्नानाच्छुद्धिः ॥ एकादशाहे रजोदृष्टौ एकाहः ॥ द्वादशे द्विरात्रमूर्ध्वं त्रिरात्रम् ॥

## अथ रोगजे रजसि ।

रोगेण यद्रजः स्त्रीणामन्वहं प्रतिवर्त्तते ॥ तत्र नास्पृश्यत्वं किं तु रजोनिवृत्तिपर्यंतं पाकदैवपित्र्यकर्मानधिकारमात्रम् ॥

## अथ रोगजमध्ये मासजे ।

रोगजे वर्तमानेपि मासजं रजो निर्यात्येव तत्र सावधाना सती त्रिरात्रमशुचिर्भवेत् ॥ यत्तु गर्भिण्याः प्राक् प्रसवात् रोगजं रजोदर्शनं तत्र त्रिदिनमेवाशौचम् ॥

## अथ सूतिकाया रजसि ।

प्रसूतिकायाः किंचिदूनमासात्पूर्वं रजोनिवृत्तौ स्नानमात्रं पूर्णे मासे त्रिरात्रम् ॥

## अथ उच्छिष्टाया रजसि ।

उच्छिष्टा स्त्री यदि रजस्वला भवति तदा शुद्ध्यंते त्र्यहमधरोच्छिष्टे त्वेकाहमुपवासः ॥

## अथ रजोदर्शनाज्ञाने ।

अविज्ञातरजोदोषा यदि गृहे व्यवहरति तदा तया स्पृष्टं गोरसमृद्भांडादिकं जलादिकं च न त्याज्यम् ॥ सूतकवज्ज्ञानकालमारभ्यैव दोषात् ॥ अशुचित्वं तु ज्ञानदिनमारभ्य त्रिदिनमिति केचित् ॥ अन्ये तु द्वितीयादिदिने रजसि ज्ञाते सूतकवच्छेषदिनैरेव शुद्धिरित्याहुः ॥ एवं त्रिदिनं स्थित्वा चतुर्थेहनि षष्टिवारं मृत्तिकाशौचेन मलं प्रक्षाल्य दन्तधावनपूर्वकं संगवकाले स्नायात् ॥ सूर्योदयात्प्राक् स्नानं त्वनाचारः ॥

## अथ चतुर्थदिने कार्याकार्ये ।

चतुर्थेहनि रजोनिवृत्तौ भर्तृशुश्रूषणादौ शुद्धिः ॥ पंचमेहनि दैवपित्र्यकर्मणि शुद्धिः ॥ कानिचिद्दिनानि रजो यद्यनुवर्तेत तदा तन्निवृत्तिपर्यंतं दैवपित्र्ययोर्न शुद्धिः ॥ रोगेण त्वनुवृत्तौ प्रागुक्तम् ॥ केचित्तु चतुर्थदिवसे दर्शेष्ट्यादिश्रौतकर्माणि कर्तव्यानीत्याहुः ॥ अपरे तु इतरदिनापेक्षया चतुर्थदिनस्यैवानुकूलत्वे तत्रैव गर्भाधानं दुष्टरजोदर्शनशांतिश्च कर्तव्या ॥

## अथ महासंकटे चतुर्थदिने ग्राह्याग्राह्ये ।

महासंकटे श्रीसूक्तहोमपूर्वकाभिषेकोपनयनादिकमपि चतुर्थेहनि कर्तव्यमित्याहुः ॥ अयं चतुर्थेहन्यधिकारनिर्णयः सर्वथा रजोनिवृत्तावेव ज्ञातव्यः ॥

## अथातुरायाः स्नानविधिः ।

यदि ज्वरादिभिरातुरा चतुर्थेऽपि स्नातुमशक्ता तदा तामन्या नारी नरो वा दशवारं स्पृष्ट्वा स्नायादाचमेच्च ॥ प्रतिस्नानमातुरस्य वस्त्रमन्यदन्यत्परिधापनीयम् ॥ अन्ते स्पृष्टानां सर्ववस्त्राणां त्याग आर्द्रवस्त्रादिव्यवधानेन शुद्धवस्त्रग्रहणांते ब्राह्मणभोजनात्पुण्याहवाचनाच्च शुद्धिः ॥ "सर्वेषामप्यातुराणामेवं शुद्धिर्विधीयते" एवं शुद्ध्यंते शुभदिने दुष्टरजोदर्शनप्रयुक्तां शौनकोक्तां भुवनेश्वरीशांतिं ग्रन्थांतरोक्तां वा शांतिं विधाय गर्भाधानं कार्यम् ॥

## अथ ग्रहणकाले रजसि ।

सूर्यग्रहे रजोदर्शने हैमं सूर्यबिंबं तन्नक्षत्ररूपं च सीसेन राहुं च कृत्वा संपूज्यार्कसमिद्भिः सूर्यं नक्षत्रेशं पुष्यै राहुं दूर्वाभिर्हुत्वाज्यचरुतिलैश्च जुहुयात् ॥ चन्द्रग्रहे राजतं चन्द्रबिंबं पालाश्यश्च समिध इति विशेषः ॥ ग्रहणव्यतीपातादिबहुतरदोषे रजोदर्शने तु द्वितीयादिरजोदर्शने शांतिपूर्वकं गर्भाधानं कार्यम् ॥

## अथ गर्भाधाने अस्तादिविचारः ।

गर्भाधाने गुरुशुक्रास्ताधिकमासादिदोषो नास्ति ॥ यदि तु प्रथमरजोदर्शने

शांतिर्न कृता द्वितीयादिरजोदर्शने शुक्रास्तादिदोषप्रसक्तिस्तदा निमित्तानन्तरमेव ॥ यत्र नैमित्तिकानुष्ठानं तत्रास्तादिदोषाभावो मुख्यकालातिक्रमे तु अस्तादिदोषोस्त्येवेति सामान्यनिर्णयानुसारेण ऋतुशान्तिरस्तादौ न कार्या ॥ तदनुरोधेन गर्भाधानं च न कार्यमिति भाति ॥ शांतिश्च सग्रहमखैव कार्या ॥

## अथ भुवनेश्वरीशांतिः ।

शांतौ भुवनेश्वरी प्रधानदेवता इंद्रेंद्राण्यौ पार्श्वदेवते॥ एवं कलशत्रयेपि प्रतिमात्रयस्थापनम् ॥ ग्रहाणामर्कादिसमिधश्चरुराज्यं च द्रव्यम् ॥ प्रधानदेवताया दूर्वास्तिलमिश्रगोधूमाः पायसमाज्यं चेति हविश्चतुष्टयम् ॥ एवं पार्श्वदेवतयोरपि ॥ पायसस्य स्थंडिलाग्नौ श्रपणमेव कार्यं न तु ग्रहसिद्धस्य ग्रहणम् ॥ ग्रहहोमार्थं ग्रहसिद्धचरुः ॥ पात्रासादनकाले पायसश्रपणार्थमेका स्थाली ग्रहसिद्धान्नसंस्कारार्थमपरेति स्थालीद्वयम् ॥ अनेककर्तृकाज्यहोमप्रसक्तावनेकस्रुवासादनम् ॥ आज्येन सह हविस्त्रयस्य गृहसिद्धान्नस्य च पर्यग्निकरणम् ॥ स्रुवादिसंमार्गांते ग्रहसिद्धान्नमासादितचरुस्थाल्यामादायाभावधिश्रित्याभिघारणादिबर्हिरासादनांतं कुर्यात्ततः पायसाभिघारणाद्यासादनांतरम् ॥ अन्वाधाने हविस्त्यागे च प्रधानदेवतायाः भुवनेश्वरीपदेन सवितृपदेन वोच्चारः ॥ गायत्र्या होमोक्तेः ॥ आज्यभागांते यजमानोन्वाधानानुसारेण प्रतिदैवतमष्टाविंशत्याहुतिपर्याप्तमर्कादिजातीयसमिच्चर्वाज्यात्मकं हविस्त्रयं सूर्याय सोमाय भौमाय बुधायै बृहस्पतये शुक्राय शनये राहवे केतवे न मम ॥ अष्टाष्टसंख्यापर्याप्तं तद्धविस्त्रयं तत्तदधिदेवताप्रत्यधिदेवताभ्यो न मम ॥ चतुश्चतुःसंख्यापर्याप्तं तद्धविस्त्रयं विनायकादिभ्यः क्रतुसंरक्षणक्रतुसाद्गुण्यदेवताभ्यो न मम ॥ अष्टोत्तरशतसंख्याकाहुतिपर्याप्तं दूर्वातिलगोधूमपायसाज्येति हविश्चतुष्टयं भुवनेश्वर्यै न मम ॥ यद्वा सवित्रे न मम ॥ एवमष्टाविंशतिसंख्यापर्याप्तं तच्चतुष्टयमिंद्रेंद्राणीभ्यां न ममेति त्यागं कुर्यात् ॥ बहुतरदोषेऽष्टोत्तरसहस्रसंख्याको होमो भुवनेश्वर्या इंद्रेंद्राण्योरष्टोत्तरसंख्याक इंद्रेंद्राण्योर्होमः कृताकृतः ॥ होमांते ग्रहादिबलयः भुवनेश्वर्यादिबलयोऽभिषेकश्चेति संक्षेपः ॥ समंत्रकः सविस्तरः प्रयोगः स्वस्वशाखीयानुसारेण ज्ञेयः ॥

## अथ शांत्यादिस्मार्तकर्मानुष्ठानक्रमः ।

"संकल्पः स्वस्तिवाग्विप्रवरणं भूतनिःसृतिः ॥ पंचगव्यैर्भूमिशुद्धिर्मुख्यदैवतपूजनम् ॥ १ ॥ अग्निप्रतिष्ठासूर्यादिग्रहस्थापनपूजनम्॥ देवतान्वाहितिः पात्रासादनं हविषां कृतिः ॥ २ ॥ यथाक्रमं त्यागहोमाविति पौर्वांगकः क्रमः ॥ पूजास्विष्टं नवाहुत्या बलिः पूर्णाहुतिस्तथा ॥ ३ ॥ पूर्णपात्रविमोकाद्यग्न्यर्चनांतेभिषेचनम् ॥ मानस्तोकेति भूतिश्च देवपूजाविसर्जने ॥ ४ ॥ श्रेयोग्रहो दक्षिणादि-

दानं कर्मेश्वरार्पणम् ॥ क्रमोयमुत्तरांगानां प्रायः स्मार्तेष्विति स्थितिः " ॥ ५ ॥ एवं मदनरत्नोक्ता बौधायनोक्ता च शांतिः कौस्तुभे द्रष्टव्या ॥ प्राग्रजोदर्शनात् पत्नीगमने ब्रह्महत्यादिदोषोक्तेः किंचित्प्रायश्चित्तं विधेयमिति भाति ॥

## अथ ऋतुकालनिर्णयः । ऋतौ गमनागमनविचारस्तदपवादश्च ।

ऋतौ तु गमनमावश्यकम् ॥ अन्यथा भ्रूणहत्यादोषः ॥ अयं च मनसि कामे सति द्वेषादिना स्त्रियमनुपगच्छतो ज्ञेयः ॥ विरक्तस्य न कोपि दोष इति श्रीभागवते 'लोके व्यवाया० ' इति पद्ये टीकायां च स्पष्टम् ॥ ऋतुकालस्तु रजोदर्शनादिनमारभ्य षोडशदिनपर्यंतं ज्ञेयः ॥ तत्र प्रथमदिनचतुष्टयैकादशत्रयोदशदिनेषु गमनं वर्ज्यम् ॥ अवशिष्टदिनेषु पुत्रार्थिना समदिने कन्यार्थिना विषमदिने गमनं कार्यम् ॥ तत्राप्युत्तरोत्तररात्रीणां प्राशस्त्यम् ॥ एकस्यां रात्रौ सकृदेव गमनं कार्यम् ॥ सकृद्गमनं च युग्मासु सर्वासु आवश्यकमिति केचित् ॥ अन्यकाले प्रतिबंधादिना गमनासंभवे श्राद्धैकादश्यादिदिनेपि ऋतुगमनं कार्यमिति केचित् ॥

## अथ अनृतौ गमनविचारः ।

स्त्रीणां वरमनुस्मरन् पत्नीच्छयानृतावपि गच्छन्न दोषभाक् किं तु ब्रह्मचर्यहानिमात्रम् ॥ "ऋतौ गच्छति यो भार्यामनृतौ नैव गच्छति ॥ यावज्जीवं ब्रह्मचारी मुनिभिः परिकीर्तितः ॥

## अथ स्त्रीगमने निषिद्धकालः ।

अष्टमीचतुर्दशीपूर्णिमाऽमावास्यासूर्यसंक्रांतिवैधृतिव्यतीपातपरिघपूर्वदलविष्टिसन्ध्यासु मातापित्रोर्मृतदिने श्राद्धतत्प्राग्दिने जन्मनक्षत्रे दिवा च स्त्रीगमनं वर्ज्यम् ॥

## अथ गर्भाधानकालः ।

चतुर्थीषष्ठीचतुर्दश्यष्टमीपंचदशीरहितास्तिथयः प्रशस्ताः चन्द्रबुधगुरुशुक्रवाराः शुभाः ॥ मूलमघारेवतीज्येष्ठानक्षत्राणि वर्ज्यानि ॥ भरणीकृत्तिकार्द्राश्लेषापूर्वात्रयविशाखा मध्यमानि ॥ शेषाणि शुभानि ॥ सर्वकार्येषु गोचरे चन्द्रबलमावश्यकम् ॥

## अथ चन्द्रबलविचारः ।

तद्यथा ॥ "चन्द्रोन्नमधनं सौख्यं रोगं कार्यक्षतिं श्रियम् ॥ स्त्रियं मृत्युं नृपभयं सुखमायं व्ययं क्रमात् ॥ १ ॥ स्थानेषु द्वादशस्वेतज्जन्मराशेः प्रयच्छति ॥ शुक्लपक्षे शशी श्रेष्ठो द्विपंचनवमेष्वपि ॥ २ ॥" अथानेकभार्यस्य ऋतुयौगपद्ये विवाहक्रमेण ऋतुक्रमेण वा गर्भाधानम् ॥ अथ ऋतावप्यगमने दोषापवादः ॥ "व्याधितो बन्धनस्थो वा प्रवासेष्वथ पर्वसु ॥ वृद्धां वन्ध्यामसद्वृत्तां मृतापत्यामपुष्पिणीम् ॥ कन्यासूं बहुपुत्रां च आगच्छन्नैव दोषभाक् ॥

## अथ गर्भाधाने औपासनम् ।

तत्र प्रथमर्तुगमनं गर्भाधानहोमं गृह्याग्नौ कृत्वा कार्यं द्वितीयादिकऋतुगमने च न होमादिकम् ॥ येषां सूत्रे होमो नोक्तस्तैर्होमवर्ज्यमन्त्रपाठादिरूपो गर्भाधानसंस्कारः प्रथमगमने कार्यः ॥ आहिताग्नेरर्धाधानिनोऽनाहिताग्नेश्चोपासनाग्निसिद्धिसत्त्वे तत्रैव होमः ॥

## अथ गृह्याग्निविच्छेदप्रायश्चित्तम् ।

औपासनाग्निविच्छेदे द्वादशदिनपर्यंतमयाश्चेत्याज्याहुत्या तत ऊर्ध्वं प्रायश्चित्तपूर्वकं पुनः संधानविधिनाग्निमुत्पाद्य तत्र कार्यः ॥ तत्र प्रत्यब्दं प्राजापत्यकृच्छ्रप्रायश्चित्तम् ॥ तत्रेत्थं संकल्पः ॥ मम गृह्याग्निविच्छेददिनादारभ्यैतावंतं कालं गृह्याग्निविच्छेदजनितदोषपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं गृह्याग्निविच्छेददिनादारभ्यैतावदब्दपर्यंतं प्रत्यब्दमेकैककृच्छ्रान् यथाशक्ति तत्प्रत्याम्नायगोनिष्कयीभूतरजतनिष्कनिष्कार्धनिष्कपादनिष्कपादार्धान्यतमद्रव्यदानेनाहमाचरिष्ये ॥ तथा एतावद्दिनेषु गृह्याग्निविच्छेदेन लुप्तसायंप्रातरौपासनहोमद्रव्यं लुप्तदर्शपौर्णमासस्थालीपाकादिकर्मपर्याप्तव्रीह्याद्याज्यद्रव्यं च तन्निष्क्रयं वा दातुमहमुत्सृजे ॥ कृच्छ्रप्रत्याम्नायांतरचिकीर्षायां तथोहः कार्यः ॥ अशीतिगुंजात्मको निष्कपादः ॥ अयं चतुर्गुणितो निष्कः ॥ एवं संकल्प्य विच्छिन्नस्य गृह्याग्नेः पुनःसंधानं करिष्य इति संकल्पपूर्वकं स्वस्वसूत्रानुसारेण गृह्याग्निं संसाधयेत् ॥

## सर्वाधान्यर्धाधानिनोर्गृह्याग्निसिद्धिविचारः ।

सर्वाधानिनाप्येवमेव पुनःसंधानेन गृह्याग्निमुत्पाद्य गर्भाधानपुंसवनादिहोमः कार्यः तत्र कृच्छ्रसंकल्पो होमादिद्रव्यदानसंकल्पश्च न कार्यः ॥ गर्भाधानहोमं कर्तुं गृह्यपुनःसंधानं करिष्ये इत्येवं संकल्प्य गर्भाधानांतेऽग्नित्यागः ॥ अर्धाधानिनामपि पक्षद्वयम् ॥ गृह्याग्नौ सायंप्रातर्होमस्थालीपाकाः कार्या इत्येकः पक्षः ॥ गृह्याग्निः केवलं संरक्ष्यो न तु तत्र होमादि कार्यमित्यपरः ॥ आद्यपक्षे पूर्वोक्तहोमादिद्रव्यदानं कार्यम् ॥ होमाद्यकरणपक्षे प्रायश्चित्तमात्रं कार्यं न तु द्रव्यदानम् ॥

## अथाग्निद्वयसंसर्गः ।

द्विभार्यस्याग्निद्वयसंसर्गात्पूर्वमुभयाग्न्यनुगतौ उभयविच्छेददिनादब्दगणनया पृथक्पृथक् कृच्छ्रप्रायश्चित्तं पृथक्पृथक् होमद्रव्यदानम् ॥ स्थालीपाकद्रव्यदानं च कृत्वा पुनःसंधानद्वयेनाग्निद्वयमुत्पाद्याग्निद्वयसंसर्गं विधाय तत्र गर्भाधानहोमः अग्निद्वयसंसर्गात्पूर्वम् ॥ एकाग्न्यनुगतौ तन्मात्रप्रायश्चित्तं तद्धोमद्रव्यमात्रदानं च कार्यम् ॥ न तु स्थालीपाकद्रव्यदानम् ॥ भार्यांतरस्यासंनिधाने यस्यां गर्भाधानं

तदग्निविच्छेदप्रायश्चित्तादिना गृह्याग्निमुत्पाद्य तत्र होमः ॥ सर्वत्र पुनःसंधाने स्थालीपाकानारंभे स्थालीपाकादिद्रव्यदानं कृताकृतम् ॥

## अथ गर्भाधानसंकल्पः ।

एवं यथायथं गृह्याग्निसिद्धिं कृत्वा ममास्यां भार्यायां संस्कारातिशयद्वारा अस्यां जनिष्यमाणसर्वगर्भाणां बीजगर्भसमुद्भवैनोनिबर्हणद्वारा श्रीपरमेश्वरप्रीत्यर्थं गर्भाधानाख्यं कर्म करिष्ये ॥ तदंगत्वेन स्वस्तिवाचनेत्यादि संकल्प्य पुण्याहवाचनमातृकापूजननांदीश्राद्धानि कृत्वा यथागृह्यं गर्भाधानसंस्कारः कार्यः ॥ अत्र गर्भाधानकर्मणो ब्रह्मदेवताकत्वात्पुण्याहवाचनांते कर्मांगदेवता ब्रह्मा प्रीयतामिति वदेत् ॥ औपासनांगे स्वस्तिवाचने अग्निसूर्यप्रजापतयः प्रीयंताम् ॥ स्थालीपाकारंभेऽग्निः प्रीयतामिति एवमन्यत्र ग्रन्थांतरादूह्यम् ॥

## अथ नांदीश्राद्धविचारः ।

गौर्यादिमातृकापूजनं नांदीश्राद्धांगम् ॥ यत्र नांदीश्राद्धं न क्रियते तत्र मातृकापूजनमपि न कार्यम् ॥ तत्र पूर्वं मातृपार्वणं ततः पितृपार्वणं ततः सपत्नीकमातामहपार्वणमिति पार्वणत्रयात्मकनांदीश्राद्धम् ॥ मातृजीवने सपत्नमातृमरणेपि न मातृपार्वणम् ॥ एवं मातामह्या जीवने मातामहीसपत्न्या मरणेपि न मातामहादेः सपत्नीकत्वम् ॥ एवं दर्शादावपि मातृजीवने सपत्नमातृमरणेपि न सपत्नीकत्वं पित्रादेः ॥ अत्र स्वधाशब्दस्थाने स्वाहाशब्दः ॥ सव्येनैव सर्वाः क्रियाः ॥ प्रतिपार्वणं दैवे च युग्मा ब्राह्मणाः ॥ कुशस्थाने दूर्वाः ॥ विवाहादिमंगलकर्मांगे वृद्धिश्राद्धे ॥ यज्ञादिकर्मांगे तु अमूला दर्भा ग्राह्याः ॥ दूर्वा दर्भाश्च युग्मा एव ॥ उदङ्मुखः कर्ता प्राङ्मुखा विप्राः ॥ प्रङ्मुखो वा कर्ता उदङ्मुखा विप्राः॥ पूर्वाह्णकालः प्रदक्षिणं कर्म ॥ आधानांगं त्वपराह्णे कार्यम् ॥ पुत्रजन्मनिमित्तकं रात्रावपि ॥ एवं च विश्वेदेवार्थविप्रसहिता अष्टौ विप्रा अत्यशक्तौ चत्वारो वा ॥ वृद्धिश्राद्धे विश्वेदेवाः सत्यवसुसंज्ञकाः ॥ सोमयागगर्भाधानपुंसवनसीमन्तोन्नयनाधानादिकर्मांगभूतवृद्धिश्राद्धे क्रतुदक्षसंज्ञकाः ॥

## अथ नांदीश्राद्धावश्यकत्वानावश्यकत्वविचारः ।

गर्भाधानादिसंस्कारेषु वापीदेवप्रतिष्ठादिपूर्तकर्मस्वपूर्वाधानादिषु संन्यासस्वीकारे काम्यवृषोत्सर्गे गृहप्रवेशे तीर्थयात्रायां श्रवणाकर्मसर्पबल्याश्वयुज्याग्रयणादिपाकसंस्थानां प्रथमारंभे नांदीश्राद्धमावश्यकम् ॥ पुनराधाने सोमयागादिभिन्ने असकृत्क्रियमाणे कर्मणि अष्टकादिश्राद्धकर्मसु च नांदीश्राद्धं न कार्यम् ॥ गर्भाधानपुंसवनसीमन्तचौलमौंजीविवाहातिरिक्तसंस्कारेषु श्रवणाकर्मादिषु च नांदीश्राद्धं वैकल्पिकम्॥जातकर्मांगं पुत्रजन्मनिमित्तकं च नांदीश्राद्धं पृथगेव ॥ जन्मकाले एव

जातकर्मणि क्रियमाणे पुत्रजन्मनिमित्तकं जातकर्मांगं च वृद्धिश्राद्धं तन्त्रेण करिष्ये इति संकल्प्य सकृदेव कार्यम् ॥ नामकर्मणा सह जातकर्मचिकीर्षायां पुत्रजन्मनिमित्त जन्मकाल एव हेम्ना कृत्वा कर्मांगं नामकर्मकाले कार्यम् ॥ तदा तदकरणे नामकर्मकाल एव पुत्रजन्मनिमित्तकं जातकर्मनामकर्मांगं च नांदीश्राद्धं तन्त्रेण करिष्य इति संकल्प्यैकमेव कार्यम् ॥ एवं चौलादिकर्मणा सह जातकर्मादिषु क्रियमाणेषु पुत्रजन्मनिमित्तकं चौलांतसंस्कारांगं च नांदीश्राद्धं तन्त्रेण करिष्ये इति संकल्पः ॥ तथा च सहैव क्रियमाणेषु चौलादिष्वन्येषु च कर्मसु नांदीश्राद्धस्य सकृदेवानुष्ठानं न तु प्रतिकर्म पृथगनुष्ठानम् ॥ एवं यमलयोर्युगपदेकसंस्कारकरणेपि ज्ञेयम् ॥

## अथ नांदीमुखपदविचारः ।

ऋक्शाखिभिः कात्यायनैश्च पितृपितामहप्रपितामहा इति पितृपूर्वक उच्चारः कार्यः ॥ अन्यशाखिभिस्तु प्रपितामहपितामहपितरो नांदीमुखा इति प्रपितामहपूर्वक उच्चारः ॥ मातृपार्वणे नांदीमुखशब्दे ङीष् विकल्पान्नांदीमुख्य इति नांदीमुखा इति पक्षद्वयमुच्चारे ॥ अनादिसंज्ञात्वेन 'नखमुखात्संज्ञायाम्' इति निषेधानवतारादिति पुरुषार्थचिन्तामणिकारः ॥

## अथ वृद्धिश्राद्धकर्तुर्जीवत्पितृकत्वे निर्णयः ।

"जीवेत्तु यदि वर्गाद्यस्तं वर्गं तु परित्यजेत्" इति न्यायेन जीवत्पितृकः स्वापत्यसंस्कारेषु मातृमातामहपार्वणयुतं नांदीश्राद्धं कुर्यात् ॥ मातरि जीवंत्यां मातामहपार्वणकमेव ॥ मातामहे जीवति मातृपार्वणकमेव ॥ केवलमातृपार्वणे विश्वेदेवा न कार्याः ॥ वर्गत्रयाद्येषु मातृपितृमातामहेषु जीवत्सु नांदीश्राद्धलोप एव मृतसंस्कारेषूचितः ॥ द्वितीयविवाहाधानपुत्रेष्टिसोमयागादिषु स्वसंस्कारकर्मसु 'येभ्य एव पिता दद्यात्तेभ्यो दद्यात्' ॥ तथा च मृतमातृमातामहकोपि जीवत्पितृकः स्वसंस्कारे पितुर्मातृपितामहीप्रपितामह्यः ॥ पितुः पितृपितामहप्रपितामहाः ॥ पितुर्मातामहमातृपितामहमातृप्रपितामहाः इत्येव पार्वणत्रयमुद्दिश्य श्राद्धं कुर्यात् ॥ न तु स्वमातृमातामहपार्वणोद्देशः ॥

## पितरि पितामहे जीवति विचारः ।

पितरि पितामहे च जीवति स्वसंस्कारे पितामहस्य मातृपितामहीप्रपितामह्य इत्याद्युद्देशः ॥ एवं प्रपितामहेपि योज्यम् ॥ पितुर्मात्रादिजीवने तत्पार्वणलोप एव ॥ तथा च 'येभ्य एव पिता दद्यात्' इति पक्षस्य स्वर्गाद्यजीवने तत्पार्वणलोप इति द्वारलोपपक्षस्य च स्वसंस्कारस्वापत्यसंस्कारभेदेन व्यवस्था सिद्धांति-

तेति ज्ञेयम् ॥ केचित्तु पक्षद्वयस्यैच्छिको विकल्पो न तु व्यवस्थित इत्याहुः ॥ एवं मृतपितृकस्य जीवन्मातृमातामहस्य पितृपार्वणेनैव नांदीश्राद्धसिद्धिर्ज्ञेया ॥

## अथ समावर्तने नांदीश्राद्धकर्तुर्देवतायाश्च विचारः ।

समावर्तनस्य माणवककर्तृत्वेपि तदंगभूतनांदीश्राद्धे पितुस्तदभावे ज्येष्ठभ्रात्रादेरधिकार इति केचित्॥ तत्र पिता पुत्रसमावर्तने स्वपितृभ्यो नांदीश्राद्धं कुर्यात्॥ पिता जीवत्पितृकश्चेत्सुतसंस्कारत्वाद्वारलोपपक्षो युक्त इति भाति ॥ माणवकपितुः प्रवासादिना असंनिधाने भ्रात्रादिर्माणवकस्य पितुर्मातृपितामहीप्रपितामह्य इत्याद्युच्चार्य श्राद्धं कुर्यात् ॥ मृतपितृकमाणवकसमावर्तने पितृव्यभ्रात्रादिरस्य माणवकस्य मातृपितामहीत्याद्युच्चारयेत् ॥ भ्रात्रादेरभावे स्वयमेव स्वपितृभ्यो दद्यात् ॥ एवं जीवत्पितृकोपि पितुरसंनिधाने भ्रात्रादेरभावे पितुः पितृभ्यः स्वयमेव नांदीमुखं कुर्यात् ॥ उपनयनेन कर्माधिकारस्य जातत्वात् ॥ एवं विवाहेपि द्रष्टव्यम् ॥ मृतपितृकस्य चौलोपनयनादिकं पितृव्यमातुलादिः कुर्वन्नस्य संस्कार्यस्य पितृपितामह्येत्याद्युच्चार्य श्राद्धं कुर्यात् ॥ जीवतः पितुरसंनिधानेन कुर्वन्मातुलादिरस्य संस्कार्यस्य पितुर्जनकादीनुद्दिश्य कुर्यान्न तु संस्कार्यस्य मृतानपि मात्रादीनिति संक्षेपः ॥

## अथ नांदीश्राद्धप्रयोगे पिंडादिविचारः ।

नांदीश्राद्धे पिंडदानं कुलधर्मानुसारेण वैकल्पिकम् ॥ पिंडेषु दधिमधुबदरद्राक्षामलकमिश्रणम् ॥ दक्षिणायां द्राक्षामलकानि ॥ प्रथमांतेन संकल्पः ॥ सर्वत्रोच्चारे संबंधनामगोत्रं वर्जयेत् ॥ मालतीमल्लिकाकेतकीकमलानां माला देया न तु रक्तपुष्पाणाम् ॥ कुंकुमचंदनाद्यलंकृताः सर्वे ॥ नांदीश्राद्धारंभे पाकांतरेण वैश्वदेवः साग्निकानग्निकैः सर्वशाखिभिः कार्यः ॥ द्वयोर्द्वयोर्विप्रयोर्युगपन्निमंत्रणम् ॥ भवद्भ्यां क्षणः क्रियतामों तथा प्राप्नुतां भवंतौ प्राप्नवावेत्युक्तिः ॥ शंनोदेवीत्यनुमंत्र्य यवानेव क्षिपेत् ॥ "यवोसि सोमदेवत्यो गोसवे देवनिर्मितः ॥ प्रत्नवद्भिः प्रत्तः पुष्ट्या नांदीमुखान्पितॄनिमाँल्लोकान्प्रीणया हि नः स्वाहा न मम" इति पित्र्ये मंत्रः द्विर्द्विर्गंधादिदानम् ॥ पाणिहोमोग्नये कव्यवाहनाय स्वाहा सोमाय पितृमते स्वाहेति ॥ अत्र श्राद्धे नापसव्यं न तिलाः न च पितृतीर्थेन दानम् ॥ पावमानीश्चंवतीः शकुनिसूक्तं स्वस्तिसूक्तं च श्रावयेत् ॥ मधुवाता इति ऋचस्थाने उपास्मै गायेति पंचर्चः ॥ अक्षन्नमीमदंतेति च तृप्तिप्रश्नस्थाने संपन्नमिति ॥ दैवे रुचितमिति प्रश्नः ॥ पूर्वाग्रेषु कुशेषु दूर्वासु वा एकस्य द्वौ द्वौ पिंडौ ॥ अक्षय्यस्थाने नांदीमुखाः पितरः प्रीयन्ताम् ॥ स्वधावाचनस्थाने नांदीमुखान्पितॄन् वाचयिष्ये इत्यादिना स्वधां प्रयुंजीत ॥ त्र्यमूषु वाजिनमिति विप्रविसर्जनम् ॥ केचिन्नांदीश्राद्धांते

वैश्वदेवो बह्वृचानामित्याहुः ॥ नात्र श्राद्धांगतर्पणम् ॥ अत्राहिताग्निना पिंडदानं कार्यम् ॥ पितुर्मात्रादिवर्गत्रयोद्देशेन श्राद्धे "पितुर्मातामही चैव तथैव प्रपितामही" इत्यादिश्लोकपाठः ॥ द्वारलोपपक्षे यत्पार्वणलोपस्तत्पार्वणविषयकश्लोकैकदेशलोपः केवलमातृपार्वणे देवा न कार्याः 'एता भवंतु सुप्रीताः' इत्यूहः कार्यः ॥ सांकल्पविधिना संक्षिप्तनांदीश्राद्धप्रयोगः प्रयोगरत्नादौ द्रष्टव्यः ॥ ॥ इति नांदीश्राद्धविचारः ॥

## अथ संकटे गर्भाधानप्रयोगः ।

एवं स्वस्तिवाचनं ऋतुदक्षसंज्ञकविश्वेदेवयुतं च नांदीश्राद्धं गर्भाधानांगं कृत्वा यथाशाखं गर्भाधानसंस्कारः कार्यः ॥ आश्वलायनैर्गृह्याग्नौ प्राजापत्यं चरुं हुत्वा विष्णुं षड्वारं सकृत्प्रजापतिं चाज्येन हुत्वा जपोपस्थाननस्तःकरणादिकं कार्यम् ॥ "विष्णुर्योनिं जपेत्सूक्तं योनिं स्पृष्ट्वा त्रिभिर्व्रती ॥ गर्भाधानं ततः कुर्यात्सुपुत्रो जायते ध्रुवम्" ॥ एवं नेजमेषेत्यादिजपोपि ॥ सर्वथा होमासंभवेऽश्वगंधारसमुदीर्ष्वात इति मंत्रेण दक्षिणनासायामासिच्योपगमनं कार्यम् ॥ एवं गर्भाधानसंस्कारमकृत्वा स्त्रीगमने गर्भोत्पत्तौ तत्प्रायश्चित्तं गोदानं कृत्वा पुंसवनं कार्यम् ॥

## अथ मैथुनांते विचारः ।

"ऋतौ तु गर्भशंकित्वात्स्नानं मैथुनिनः स्मृतम् ॥ अनृतौ तु यदा गच्छेच्छौच मूत्रपुरीषवत्" इत्युक्तरीत्या शौचं कृत्वाऽऽचामेत् ॥ आचमनं विना मूत्रपुरीषोत्सर्गे तु ॥ "तैलाभ्यक्तस्त्वनाचांतः श्मश्रुकर्मणि मैथुने ॥ मूत्रोच्चारं यदा कुर्यादहोरात्रेण शुद्ध्यति" इत्येकाहोपवासः ॥ स्त्रीणां तु न स्नानम् ॥ "शयनादुत्थिता नारी शुचिः स्यादशुचिः पुमान्" इत्युक्तेः ॥ इति गर्भाधानाद्युपयोगिनिर्णयः ॥

## अथ नारायणबलिविचारः ।

एवं कृतेपि गर्भाधाने यदि गर्भोत्पत्त्यभावो मृतापत्यता वा तदा प्रतिबंधकप्रेतोपद्रवनिवृत्त्यर्थं नारायणबलिर्नागबलिश्च कार्यः ॥ तत्र नारायणबलिः शुक्लैकादश्यां पंचम्यां श्रवणे वा कालांतरानुपलब्धेः ॥ तत्प्रयोगः परिशिष्टस्मृत्यर्थसारानुसारी कौस्तुभे ॥ शुक्लैकादश्यां नदीतीरे देवालयादौ तिथ्यादिकीर्तनांतेमदीयकुलादिवृद्धिप्रतिबंधकप्रेतस्य प्रेतत्वनिवृत्त्यर्थं नारायणबलिं करिष्ये ॥ विधिना स्थापितकुंभद्वये हेमादिप्रतिमयोर्विष्णुं वैवस्वतं यमं चावाह्य पुरुषसूक्तेन यमाय सोममिति मंत्रेण च षोडशोपचारैः संपूजयेत् ॥ अत्र केचित्कुंभपंचके ब्रह्मविष्णुशिवयमप्रेतान् पूजयंति ॥ तत्पूर्वभागे रेखायां दक्षिणाग्रकुशेषु शुंधतां विष्णुरूपी प्रेत इति दशस्थानेषु दक्षिण-

संस्था अपो निनीय मधुघृततिलयुतान् दशपिंडान् काश्यपगोत्र देवदत्तप्रेत विष्णुदैवत अयं ते पिंड इति दक्षिणमुखः प्राचीनावीती वामं जान्वाच्य पितृतीर्थेन दद्यात् ॥ गंधादिभिरभ्यर्च्य प्रवाहणांतं कृत्वा विसर्जयेत् ॥ तस्यामेव रात्रौ श्वः करिष्यमाण-श्राद्धे क्षणः क्रियतामिति एकं त्रीन् पंच वा विप्रान् निमंत्र्योपोषितो जागरं कुर्यात् । श्वोभूते मध्याह्ने विष्णुं संपूज्य विष्णुरूपं प्रेतं विष्णुब्रह्मशिवयमप्रेतान्वोद्दिश्यैकोद्दिष्टविधिना पादप्रक्षालनादितृप्तिप्रश्नांतं कृत्वा रेखाकरणाद्यवनेजनांतं तूष्णीं कृत्वा विष्णवे ब्रह्मणे शिवाय सपरिवाराय यमायेति चतुरः पिंडान्नाममंत्रैर्दत्त्वा विष्णुरूपं प्रेतं ध्यायन् काश्यपगोत्र देवदत्त विष्णुरूपप्रेत अयं ते पिंड इति पंचमं पिंडं दत्त्वा चर्चनादिप्रवाहणांते आचांतान् दक्षिणादिभिः संतोष्य तेष्वेकस्मै गुणवते प्रेतबुद्ध्या वस्त्राभरणादि दत्त्वा विप्रान्वेदेत् ॥ भवंतः प्रेताय तिलोदकांजलिदानं कुर्वंत्विति ॥ ते च पवित्रपाणयः कुशतिलतुलसीयुतातिलांजलिं प्रेताय काश्यपगोत्राय विष्णुरूपिणे अयं तिलांजलिरिति दद्युः ॥ विप्रान्वाचयेत् ॥ अनेन नारायणबलिकर्मणा भगवान् विष्णुरिमं देवदत्तं प्रेतं शुद्धमपापमहं करोत्विति विसृज्य स्नात्वा भुंजीतेति ॥ सिंधौ तु कुंभपंचके विष्णुब्रह्मशिवयमप्रेतेति पंचकं पूजयेत् ॥ स्वर्णरूप्यताम्रलोहमयाश्चत्वारः ॥ प्रेतो दर्भमयः अग्निं प्रतिष्ठाप्य अपितत्वरं नारायणाय पुरुष सूक्तेन षोडशाहुतिभिर्हुत्वा दशपिंडांते पुरुषसूक्ताभिमंत्रितशंखोदकेन प्रेतं प्रत्यृचं तर्पयेत् ॥ विष्ण्वादिचतुर्भ्यो बलिं दद्यात् ॥ श्वोभूत एकोद्दिष्टविधिना श्राद्धपंचकं करिष्य इति संकल्प्य विप्रपंचके पाद्यादि पिंडदानांते तरणादीति विशेष उक्तः शेषं पूर्ववत् ॥

## अथ नागबलिः ।

स च दर्शे पौर्णमास्यां पंचम्यामाश्लेषायुतनवम्यां वा कार्यः ॥ तत्र पर्वदं प्रदक्षिणीकृत्य नत्वा तदग्रे गोवृषनिष्क्रयं निधाय सभार्यस्य ममेह जन्मनि जन्मांतरे वा जातसर्पवधदोषपरिहारार्थं प्रायश्चित्तमुपदिशंतु भवंतः "सर्वे धर्मविवेक्तार इत्यादि०" ॥ विप्रैश्चतुर्दशकृच्छ्रप्रायश्चित्तेनामुकप्रत्याम्नायद्वारा पूर्वोत्तरांगसहितेनाचरितेन तव शुद्धिर्भविष्यतीत्युपदिष्टो देशकालौ संकीर्त्य पर्वदुपदिष्टं चतुर्दशकृच्छ्रप्रायश्चित्तममुकप्रत्याम्नायेनाहमाचरिष्य इति संकल्प्य वपनादिविधिना तदाचरेत् ॥ वपनासंभवे द्विगुणः कृच्छ्रप्रत्याम्नायः ॥ सर्पवधदोषपरिहारार्थमिमं लोहदंडं सदक्षिणं तुभ्यमहं संप्रदद इति दत्त्वा गुर्वनुज्ञां लब्ध्वा गोधूमव्रीहितिलान्यतमपिष्टेन सर्पाकृतिं कृत्वा शूर्पे निधाय सर्पं प्रार्थयेत् ॥ "एहि पूर्वमृतः सर्प अस्मिन्पिष्टे समाविश ॥ संस्कारार्थमहं भक्त्या प्रार्थयामि समाहितः" ॥ आवाहनादिषोडशोपचारैः संपूज्य नत्वा भो सर्प इमं बलिं गृहाण ममाभ्युदयं कुर्विति

लिं दत्त्वा पादौ प्रक्षाल्याचामेत् ॥ देशकालौ संकीर्त्य सभार्यस्य ममेह जन्मनि जन्मांतरे वा ज्ञानादज्ञानाद्वा जातसर्पवधोत्थदोषपरिहारार्थं सर्पसंस्कारकर्म करिष्य इति संकल्प्य स्थंडिलेग्निं प्रतिष्ठाप्य ध्यात्वास्मिन्सर्पसंस्कारहोमकर्मणि देवतापरिग्रहार्थमन्वाधानं करिष्ये ॥ चक्षुषी आज्येनेत्येतेऽभावग्निं वायुं सूर्यमाज्येन सर्पमुखे प्रजापतिमाज्येनाज्यशेषेण सर्पं सद्यो यक्ष्ये इति समिधावाधायाग्नेराग्नेयदिशि प्रोक्षितभूमौ चितिं कृत्वाग्निं चितिं च परिसमुह्याग्नेयाग्रदर्भैः परिस्तीर्य परिषिच्य षट्पात्रासादनादि चक्षुषी हुत्वा सर्पं चित्यामारोप्य जलं श्रोत्रं च स्पृष्ट्वा अग्नौ भूस्वाहा अग्नय इदमित्यादि व्याहृतित्रयेणाज्याहुतीर्हुत्वा समस्तव्याहृतिभिश्चतुर्थीं सर्पः मुखे जुहुयात् ॥ आज्यशेषं स्रुवेणैव सर्पदेहे निषिंचेत् ॥ नात्र स्विष्टिकृदादिशेषम् ॥ चमसजलैः समस्तव्याहृत्या सर्पं पाणिना प्रोक्ष्य ॥ अग्नेरक्षाणो वसिष्ठोग्निर्गायत्री सर्पायाग्निदाने वि० ॥ अग्नेरक्षाणो अंहस ऋक् ॥ अथोपस्थानम् ॥ "नमो अस्तु सर्पेभ्यो ये के च पृथिवीमनु ॥ ये अंतरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः ॥ ये दोषणे दिवो ये वा सूर्यस्य रश्मिषु ॥ येषामप्सु सदस्कृतं तेभ्यः० या इषवो यातुधानानां ये वा वनस्पती ँरनु ॥ ये वा वटेषु शेरते तेभ्यः० ॥" "त्राहित्राहि महाभोगिन् सर्पोपद्रवदुःखतः ॥ संततिं देहि मे पुण्यां निर्दुष्टां दीर्घजीविनीम् ॥ प्रपन्नं पाहि मां भक्त्या कृपालो दीनवत्सल ॥ ज्ञानतोऽज्ञानतो वापि कृतः सर्पवधो मया ॥ जन्मांतरे तथैतस्मिन्मत्पूर्वैरथ वा विभो ॥ तत्पापं नाशय क्षिप्रमपराधं क्षमस्व मे ॥ इति सम्प्रार्थ्य नागेंद्रं स्नात्वागत्य ततः पुनः" ॥ व्याहृतिभिः क्षीराज्येनाग्निं संप्रोक्ष्य हुते सर्पजलेनाग्निं सिंचेत् "यज्ञोपवीतिना सर्वं सर्पसंस्कारकर्म तु ॥ नास्थिसंचयनं कुर्यात्स्नात्वाचम्य गृहं व्रजेत्" ॥ सभार्यस्य कर्तुस्त्रिरात्रमाशौचं ब्रह्मचर्यं च कार्यम् ॥ चतुर्थेहनि सचैलं स्नात्वा घृतपायसभक्ष्यैरष्टौ विप्रान् भोजयेत् ॥ तद्यथा सर्पस्वरूपिणे ब्राह्मणाय इदं ते पाद्यम् ॥ अनंतस्वरूपिणे० शेषस्वरूपिणे० कपिलस्वरूपिणे० नागस्वरूपिणे० कालिकस्वरूपिणे० शंखपालस्वरूपिणे० भूधरस्वरूपिणे० इत्यष्टसु दत्त्वा स्वपादौ प्रक्षाल्याचम्य सर्पस्वरूपिणे ब्राह्मणाय इदमासनम् ॥ आस्यताम्॥ एवमनंतादिषु।ततः सर्पस्थाने क्षणः क्रियतामित्यादि ॐ तथा प्राप्नोतु भवान् प्राप्नवानि ॥ भो सर्परूप इदं ते गंधम् ॥ एवमनंतादिषु॥ एवं पुष्पधूपदीपवस्त्रादि दत्त्वा ॥ अन्नं परिविष्य प्रोक्ष्य सर्पाय इदमन्नं परिविष्टं परिवेक्ष्यमाणं च दत्तं दास्यमानं चातृप्तेरमृतरूपेण स्वाहा संपद्यंतां न मम एवमनंतादिभ्योपि आचांतेषु भो सर्प अयं ते बलिरित्यादिनाममंत्रैर्बलिदानम् ॥ तेषु पिंडेषु वस्त्रादिपूजा च कार्या ॥ इदमपि सर्वं सव्येनैवं विप्रभ्यस्तांबूलदक्षिणादि दत्त्वा आचार्यं संपूज्य कलशे सुवर्णनागमावाहनादिषोडशोपचारैः संपूज्य प्रार्थयेत् ॥ " ब्रह्मलोके च ये सर्पाः शेषनागपुरोगमाः ॥ नमोस्तु तेभ्यः सुप्रीताः

प्रसन्नाः संतु ते सदा ॥ विष्णुलोके च ये सर्पा वासुकिप्रमुखाश्च ये ॥ नमोस्तु तेभ्यः सु० ॥ रुद्रलोके च ये सर्पास्तक्षकप्रमुखास्तथा ॥ नमोस्तु० ॥ खांडवस्य तथा दाहे स्वर्गं ये च समाश्रिताः ॥ नमोस्तु० ॥ सर्पसत्रे च ये सर्पा आस्तिकेन च रक्षिताः ॥ नमोस्तु० ॥ मलये चैव ये सर्पाः कर्कोटप्रमुखाश्च ये ॥ नमोस्तु० ॥ धर्मलोके च ये सर्पा वैतरण्यां समाश्रिताः ॥ नमोस्तु० ॥ ये सर्पाः पार्वतीयेषु दरीसंधिषु संस्थिताः ॥ नमोस्तु० ॥ ग्रामे वा यदि वारण्ये ये सर्पाः प्रचरंति हि ॥ नमोस्तु० ॥ पृथिव्यां चैव ये सर्पा ये सर्पा बलिसंस्थिताः ॥ नमोस्तु० ॥ रसातले च ये सर्पा अनंताद्या महाबलाः ॥ नमोस्तु०" ॥ एवं स्तुत्वा देशकालौ संकीर्त्य कृतस्य सर्पसंस्कारकर्मणः सांगतासिद्ध्यर्थमिमं हैमनागं सकलशं सवस्त्रं सदक्षिणं तुभ्यमहं संप्रददे न मम ॥ अनेन स्वर्णनागदानेनानंतादयो नागदेवताः प्रीयंताम् ॥ आचार्याय गोदानम् ॥ यस्य स्मृत्या च० ॥ मया कृतं सर्पसंस्काराख्यं कर्म तद्भवतां विप्राणां वचनात् परमेश्वरप्रसादात्सर्वं परिपूर्णमस्तु ॥ तथास्त्विति ते ब्रूयुः ॥ ब्राह्मणांस्तोषयेत ॥ सांगतार्थं ब्राह्मणान् भोजयेत् ॥ "कृत्वा सर्पस्य संस्कारमनेन विधिना नरः ॥ विरोगो जायते क्षिप्रं संततिं लभते शुभाम्" ॥ ॥ इति सर्पबलिः ॥

## अथ हरिवंशश्रवणांगप्रायश्चित्तविचारः ।

एवमपि पुत्रोत्पत्त्यसिद्धौ कर्मविपाकग्रंथोक्तहरिवंशश्रवणविधानं कुर्यात् ॥ तच्च षडब्दं चतुरब्दं त्र्यब्दं सार्धाब्दम् अब्दं वा प्रायश्चित्तं कृत्वा वा कार्यम् ॥ तत्र त्रिंशत्कृच्छ्रात्मकोऽब्दः ॥

## अथ कृच्छ्रलक्षणम् ।

कृच्छ्रस्तु द्वादशदिनसाध्यः ॥ तथा हि ॥ प्रथमे दिने मध्याह्ने हविष्यस्यैकभक्तस्य षड्विंशतिर्ग्रासा भोक्तव्याः ॥ द्वितीयेहनि नक्तं द्वाविंशतिर्ग्रासाः ॥ तृतीयेऽयाचितस्य चतुर्विंशतिर्ग्रासाः ॥ चतुर्थेहनि निरशनम् ॥ अयं पादकृच्छ्रः कथंचिच्त्रिगुणीकृतोयं प्राजापत्यकृच्छ्रः ॥ एकभक्तनक्तायाचितद्व्योपवासद्व्यैरर्धकृच्छ्रः यद्वा त्र्यहमयाचितं त्र्यहमुपवास इत्यर्धकृच्छ्रः ॥ एकभक्तनक्तायाचितोपवासैः कथंचित्त्रिगुणैः पादोनकृच्छ्रः ॥ एषु नवदिनेषु भोजनप्राप्तिस्तत्र ग्रासनियमं त्यक्त्वा पाणिपूरान्नभोजने अतिकृच्छ्रः ॥ एकग्रासपर्याप्तस्य प्राणधारणपर्याप्तस्य वा दुग्धस्य एवं विंशतिदिनेषु भक्षणे कृच्छ्रातिकृच्छ्रः ॥ एकदिने सकुशोदकमिश्रपंचगव्याशनम् एक उपवास इति द्वैरात्रिकः सांतपनकृच्छ्रः ॥ पंचगव्यकुशोदकानामेमिश्राणां कैकस्यैकैकदिने अशनमेक उपवास इति सप्ताहसाध्यो महासांतपनः ॥

## यतिसांतपनम् ।

त्र्यहं मिश्रितपंचगव्याशने यतिसांतपनम् ॥ तप्तानां दुग्धघृतजलानाम् एकैकस्य त्रिदिने पानमुपवासत्रयं चेति तप्तकृच्छ्रः ॥ शीतानां पाने शीतकृच्छ्रः ॥ द्वादशाहोपवासेन पराककृच्छ्रः ॥ यद्वा तप्तानां घृतादीनामेकैकदिनेऽशनं चतुर्थदिने उपवास इति दिनचतुष्टयसाध्यस्तप्तकृच्छ्रः ॥

## अथ यवमध्यचांद्रायणादि ।

शुक्लपक्षे प्रतिपदादितिथिषु मयूरांडसमानैकैकग्रासान् वर्धयन्पूर्णिमायां पंचदशग्रासाः क्षये चतुर्दश वृद्धौ षोडश संपद्यंते ॥ कृष्णपक्षे एकैकग्रासह्रासेन अमायामुपवास इति माससाध्यं यवमध्यसंज्ञं चांद्रायणम् ॥ कृष्णपक्षे प्रतिपदि चतुर्दशग्रासान् भुक्त्वा एकैकग्रासह्रासेन दर्शे अनशनं शुक्ले वृद्धिरिति कृष्णादिशुक्लांतं पिपीलिकामध्यचांद्रायणम् ॥ कृच्छ्रचांद्रायणादेः त्रिकालस्नानग्रासाभिमंत्रणादिविधियुतः प्रयोगः प्रायश्चित्तप्रकरणे ज्ञेयः ॥ अतिकृच्छ्रादिलक्षणं प्रसंगादत्रोक्तम् ॥ अब्दगणना तु प्राजापत्यकृच्छ्रैरेव ॥

## अथ प्रत्याम्नायाः ।

तत्र प्राजापत्यप्रत्याम्नायाः दशसहस्रगायत्रीजपः १ गायत्र्या सहस्रं तिलहोमः २ क्वचित्सहस्रं व्याहृत्या तिलहोम उक्तः ३ शतद्वयं प्राणायामाः ४ द्वादशब्राह्मणभोजनम् ५ यावत्केशशोषणं विरम्य तीर्थे द्वादश स्नानानि ६ वेदसंहितापारायणम् ७ योजनयात्रा ८ द्वादशसहस्रं नमस्काराः ९ द्वात्रिंशदुत्तरशतं प्राणायामान् कृत्वा अहोरात्रमुपोषितः प्राङ्मुखस्तिष्ठेत् १० गोमूत्रेण यावकभक्षणे ऐकाहिककृच्छ्रम् ११ कश्चिद्दुर्दैकादशिनीजपात्कृच्छ्रमाह १२ पावकेष्टिः १३ पावमानेष्टिः १४ षडुपवासाः प्राजापत्यप्रत्याम्नायाः १५ एकविप्रभोजनमुपवासस्य अत्यशक्तौ सहस्रगायत्रीजपो द्वादश प्राणायामा वेति स्मृत्यर्थसारे १६ "प्राजापत्येष्वशक्तस्तु धेनुं दद्यात्पयस्विनीम्॥ धेनोरभावे निष्कं स्यात्तदर्धं पादमेव वा" ॥ अशीतिगुंजात्मकः कर्षः चत्वारः कर्षा निष्कं निष्कनिष्कार्धनिष्कपादान्यतमप्रमाणं हेम रौप्यं वा धेनुमूल्यं वा देयम् ॥ अत्यशक्तेन निष्कपादार्धरजतं तत्समं धान्यादि वा देयम् ॥ अतिकृच्छ्रे गोद्वयम् ॥ सांतपने गोद्वयम् ॥ पराके तप्तकृच्छ्रे च गोत्रयम् ॥ कृच्छ्रातिकृच्छ्रे गवां चतुष्टयं गोत्रयं वा ॥ चांद्रायणेऽष्टौ पंचचतस्रस्तिस्रो वा गावः ॥ मासं पयोव्रते यावकव्रते मासोपवासे च पंच गावः ॥ मासं गोमूत्रयावकव्रते षड् गावः ॥

## अथ प्रायश्चित्तप्रयोगः ।

सचैलं स्नात्वाशक्तौ क्लिन्नवासाः पर्षदग्रे गोवृषप्रत्याम्नायं निष्कादिप्रमाणं ब्रह्मदंडं

निधाय साष्टांगं प्रणम्य पर्षदं प्रदक्षिणीकुर्यात् ॥ "सर्वे धर्मविवेक्तारो गोप्तारः सकला द्विजाः ॥ मम देहस्य संशुद्धिं कुर्वंतु द्विजसत्तमाः ॥ मया कृतं महाघोरं ज्ञातमज्ञातकिल्बिषम् ॥ प्रसादः क्रियतां मह्यं शुभानुज्ञां प्रयच्छथ ॥ पूज्यैः कृतपवित्रोहं भवेयं द्विजसत्तमाः ॥" मामनुगृह्णंतु भवंत इति वदेत् ॥ विप्रैः किं ते कार्यं मिथ्या मावादीः सत्यमेव वदेति पृष्टः स्वपापं ख्यापयेत् ॥ मया मम पत्न्या वा इह जन्मनि जन्मांतरे वा अनपत्यत्वमृतापत्यत्वादि निदानभूतबालघातविप्ररत्नापहारादि दुरितं कृतं तस्य नाशाय करिष्यमाणे हरिवंशश्रवणादौ कर्मविपाकोक्तविधाने अधिकारार्थं दीर्घायुष्मत्पुत्रादिसंततिप्राप्तये प्रायश्चित्तमुपदिशंतु भवंत इति प्रार्थयेत् ॥ ते च पापिना पूजितानुवादकाग्रे षडब्दत्र्यब्दसार्धाब्दान्यतमप्रायश्चित्तेन पूर्वोत्तरांगसहितेनाचरितेन तव शुद्धिर्भविष्यति तेन त्वं कृतार्थो भविष्यसीति वदेयुः ॥ अनुवादकः पापिनं वदेत् ॥ ततः कर्त्ता ॐ इत्यंगीकृत्य पर्षदं विसृज्य देशकालौ संकीर्त्य सभार्यस्य ममैतज्जन्मजन्मांतरार्जितानपत्यत्वमृतापत्यत्वादिनिदानभूतबालघातविप्ररत्नापहारादिजन्यदुरितसमूलनाशकर्मविपाकोक्तविधिनाधिकारसिद्धिद्वारा दीर्घायुष्मद्बहुपुत्रादिसंततिप्राप्तये षडब्दं त्र्यब्दं सार्धाब्दं वा प्रायश्चित्तं पूर्वोत्तरांगसहितममुकप्रत्याम्नायेनाहमाचरिष्ये इति संकल्प्य दिनांते केश नखरोमादि वापयित्वा स्नात्वा ॥ "आयुर्बलं यशोवर्चः प्रजाः पशुवसूनि च ॥ ब्रह्मप्रज्ञां च मेधां च त्वं नो देहि वनस्पते" ॥ इति विहितकाष्ठेन दंतधावनं कुर्यात् ॥ ततो दशस्नानानि ॥ तत्र भस्मस्नानम् ॥ ईशानाय नम इति शिरसि ॥ तत्पुरुषाय नम इति मुखे ॥ अघोराय नम इति हृदये ॥ वामदेवाय नमो गुह्ये ॥ सद्योजाताय नमः पादयोः ॥ प्रणवेन सर्वांगे भस्म विलिंपेत् ॥ ईशानादिपदोपेतैर्मंत्रैर्वा भस्मलेपः ॥

## अथ गोमयस्नानम् ।

गोमयमादाय प्रणवेन दिक्षु दक्षिणभागं तीर्थे चोत्तरभागं प्रक्षिप्य शेषं मानस्तोक इति अभिमंत्र्य गंधद्वारामिति सर्वांगमालिप्य हिरण्यशृंगमिति द्वाभ्यां प्रार्थ्य याः प्रवत इति तीर्थमभिमृश्य स्नात्वा द्विराचामेत् ॥

## अथ मृत्तिकास्नानम् ।

"अश्वक्रांते रथक्रांते विष्णुक्रांते वसुंधरे ॥ शिरसा धारयिष्यामि रक्षस्व मां पदेपदे" ॥ इति मृत्तिकामभिमंत्र्य ॥ "उद्धृतासि वराहेण कृष्णेन शतबाहुना ॥ मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतम्" ॥ इति तामादाय ॥ नमो मित्रस्येति सूर्याय प्रदर्श्य गंधद्वारामिति मंत्रेण स्योनापृथिवीति मंत्रेण वा इदं विष्णुरिति वा शिरःप्रभृत्यंगानि विलिंपेत् ॥ द्विराचामेत् ॥

## अथ वारिस्नानम् ।

आपो अस्मानित्युक्त्वा भास्कराभिमुखः स्थितः "इदं विष्णुर्जपित्वा च प्रतिस्रोतो निमज्जति" ततः पंचगव्यकुशोदकैः समंत्रकैः पृथक्पृथक् स्नात्वा स्नानांगतर्पणादि कुर्यात् ॥ विष्णुश्राद्धं पूर्वागगोप्रदानं च कृत्वाग्निं प्रतिष्ठाप्य पंचगव्यहोमं व्याहृतिभिरष्टोत्तरशतमष्टाविंशतिं वाज्यहोमं च कृत्वा व्रतं ग्रहीष्य इति विप्रान्प्रार्थ्य हुतशेषं पंचगव्यं प्रणवेन पिबेत् ॥ मुख्यप्रायश्चित्तकृच्छ्रान्संकल्पानुसारेणानुष्ठाय व्याहृत्याज्यहोमविष्णुश्राद्धगोदानानि पूर्ववत्कुर्यात् ॥ आज्यहोमे पंचगव्यहोमे च इध्माधानादिस्थालीपाकेतिकर्तव्यतां केचिन्नेच्छंति ॥ व्याहृत्याज्यहोमे पापापहमहाविष्णुर्देवतेति केचित् ॥ पंचगव्यविधिस्तु ताम्रे पलाशे वा पात्रे ताम्राया गोर्मूत्रमष्टमाषप्रमाणं गायत्र्यादाय गंधद्वारामिति श्वेतगोः शकृत् षोडशमाषमादाय आप्यायस्वेति पीतगोः क्षीरं द्वादशमाषं दधिक्राव्ण इति नीलगोर्दधि दशमाषं तेजोसि शुक्रमसीति कृष्णगोघृतमष्टमाषमादाय तत्र देवस्यत्वेति कुशोदकं चतुर्मांषं प्रक्षिप्य प्रणवेनालोडयेत् ॥ अत्र माषः पंचगुंजात्मकः तत्सप्तपत्रैः साग्रैः कुशैर्जुहुयात् ॥ इरावतीति पृथ्वीम् १ इदं विष्णुरिति विष्णुम् २ मानस्तोकेति रुद्रम् ३ शन्नोदेवीत्यपः ४ ब्रह्मजज्ञानमिति ब्रह्माणं वा अग्निं सोमं च नाम्ना गायत्र्या सूर्यं प्रजापतेनत्वदिति समस्तव्याहृतिभिर्वा प्रजापतिं प्रणवेन प्रजापतिमग्निं स्विष्टकृतं च नाम्नेत्येताः पंचगव्येन अग्निं वायुं सूर्यं प्रजापतिं चेति वा महाविष्णुं वा आज्येनाष्टाविंशतिसंख्याहुतिभिरित्यन्वाधानम् ॥ स्त्रीशूद्राणां होमो न कार्यः ॥ केचिद्ब्राह्मणद्वारा होमः कार्य इत्याहुः ॥ स्त्रीशूद्राणां पंचगव्यपाने विकल्प इति महार्णवः ॥ स्त्रीशूद्रौ विप्रैः पंचगव्यं कारयित्वा तूष्णीं पिबत इति स्मृत्यर्थसारः ॥ अयं प्रायश्चित्तविधिः कृच्छ्रून्यूनप्रायश्चित्तेषु न कार्यः कृच्छ्रप्रभृतिषु सर्वत्र प्रायश्चित्तेष्वनुष्ठेयः ॥ एवं कृच्छ्राद्यनुष्ठाय सूर्यारुणसंवादमहार्णवादिकर्मविपाकग्रंथोक्तं हरिवंशश्रवणादि कर्म कुर्यात् ॥

## अथ हरिवंशश्रवणसंकल्पः ।

तत्र शुभे दिने देशकालौ संकीर्त्य अनेकजन्मार्जितानपत्यत्वमृतापत्यत्वादि निदानभूतबालघातनिक्षेपाहरणविप्ररत्नापहरणादिजन्यदुरितसमूलनाशद्वारा दीर्घायुष्मद्बहुपुत्रादिसंततिप्राप्तिकामो हरिवंशं श्रोष्यामि इत्येकस्य कर्तृत्वे दंपत्योः कर्तृत्वे श्रोष्याव इति संकल्प्य गणेशपूजनस्वस्तिवाचननांदीश्राद्धानि विनायकशांतिं च कृत्वा हरिवंशश्रवणार्थं श्रावयितारमेकं त्वां वृण इति विप्रं वृत्वा वस्त्रालंकारैः पूजयेत् ॥ वाचकं प्रत्यहं पायसादिना भोजयेत् ॥ दंपती प्रतिदिनं त्रायंतामित्यादिवैदिकैः सुरास्त्वामित्यादिपौराणैश्च मंत्रैः सुस्नातावलंकृतौ तदेकचित्तौ

शृण्वंतौ तैलतांबूलक्षौरमैथुनखट्वाशयनानि यावत्समाप्ति वर्जयंतौ हविष्यं भुंजीयाताम् ॥ अंते वाचकाय गां सुवर्णत्रयमेकं वा सुवर्णदक्षिणां दत्त्वा प्रत्यवरोहमंत्रेण सहस्रं तिलाज्यं हुत्वा शतं विप्रान् चतुर्विंशति मिथुनानि वा पायसेन भोजयेदिति हरिवंशश्रवणप्रयोगः ॥

## अथ विधानांतराणि ।

"सौवर्णं बालकं कृत्वा दद्याद्दोलासमन्वितम् ॥ अथवा वृषभं दद्याद्विप्रोद्वाहनमेव वा ॥ महारुद्रजपो वापि लक्षपद्मैः शिवार्चनम् ॥ स्वर्णधेनुः प्रदातव्या सवत्सा वा यथाविधि ॥ वृतकुंभप्रदानं वा संक्षेपादिदमीरितम् ॥" अथवा प्रत्यहं पार्थिवलिंगपूजां कृत्वा अभिलाषाष्टकजपं संवत्सरं कुर्यात् ॥ अभिलाषाष्टकस्तोत्रं कौस्तुभे ज्ञेयम् ॥ एवमपि फलाप्राप्तौ दत्तकपुत्रो ग्राह्यः ॥

## अथ दत्तके ग्राह्याग्राह्यविचारः ।

ब्राह्मणानां सोदरभ्रातृपुत्रो मुख्यत्वात्प्रथमं ग्राह्यः ॥ तदभावे सगोत्रसपिंडो यः कश्चित्सापत्नभ्रातृपुत्रो वा ॥ तदभावे त्वसगोत्रसपिंडो मातुलकुलजपितृष्वस्रादिकुलजः ॥ तदभावे तु असपिंडः समानगोत्रः ॥ तदभावे तु असपिंडः पृथक्गोत्रोपि ॥ असगोत्रसपिंडेषु भागिनेयदौहित्रौ वर्ज्यौ ॥ एवं विरुद्धसंबंधापत्त्या पुत्रबुद्ध्यनर्हो मातुलोपि न ग्राह्यः ॥ अत एव सगोत्रसपिंडेषु भ्राता पितृव्यो वा न ग्राह्यः ॥ विप्रादीनां वर्णानां समानवर्ण एव तत्रापि देशभेदप्रयुक्तगुर्जरत्वांध्रत्वादिना समानजातीय एव ॥ सर्वोपि सभ्रातृक एव ग्राह्यः ॥ तत्रापि ज्येष्ठपुत्रो न ग्राह्यो न देयः ॥ शूद्रस्य दौहित्रभागिनेयावपि ग्राह्यौ ॥ अत्र मूलम्॥ "भ्रातृणामेकजातानामेकश्चेत्पुत्रवान्भवेत् ॥ सर्वे ते तेन पुत्रेण पुत्रिणो मनुरब्रवीत् ॥" अनेन वचनेन "नापुत्रस्य लोकोस्ति जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवान् जायते" इत्यादिशास्त्रबोधितस्याप्रजस्त्वप्रयुक्तदोषस्य निवृत्तिर्विधिना अस्वीकृतेनापि भ्रातृपुत्रेण पितृव्यस्य भवतीति बोध्यते ॥ अतः पुत्रसदृशत्वात् ग्राह्येषु मुख्य इति ज्ञाप्यते ॥ मुख्याभावे तत्सदृशः प्रतिनिधिरिति न्यायात् ॥ न चास्मादेव वाक्याद्विधिवत्प्रतिग्रहं विनैव तस्य पुत्रत्वमिति शंक्यम् ॥ तथासति औरसदत्तकादिद्वादशविधपुत्रवदेतस्य पत्नीतः पूर्वमेव धनहारित्वपिंडदत्वौचित्येन "पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा ॥ तत्सुता गोत्रजा बंधुः" इति तत्क्रमवाक्ये भ्रात्रनंतरं भ्रातृसुतनिवेशानुपपत्तेः ॥ तस्मात्पत्नीतः पूर्वं मदीयपिंडदानधनग्रहणेधिकारी कश्चित् भवत्विति कामनायां विधिवत्स्वीकृत एव तथाधिकारी भवति नान्यथा ॥ तादृशकामनाया अभावे तु पितृऋणापाकरणादिपारलौकिकमात्रार्थं दत्तपुत्रो न ग्राह्यः भ्रातृपुत्रेणैव तत्सिद्धेरित्येवं वचनतात्पर्यम् ॥ क्वचिद्देशे

वैदिकविधिं विनापि दातृग्रहीतृसंमतिराजपुरुषाद्यनुमत्यादिलौकिकव्यापारमात्रेणोपनयनादिसंस्कारकरणमात्रेण च सगोत्रसपिंडे पुत्रत्वसिद्धिव्यवहारो दृश्यते तत्र मूलं नोपलभ्यते ॥

## अथ सपत्न्याः सपुत्रत्वे सपत्न्या न ग्राह्यः ।

"सर्वासामेकपत्नीनामेका चेत्पुत्रिणी भवेत् ॥ सर्वास्तास्तेन पुत्रेण पुत्रिण्यो मनुरब्रवीत्" ॥ इति वचनं तु सापत्नपुत्रस्यागृहीतस्यापि पुत्रत्वपिंडदानाद्यधिकारित्वविधायकम् ॥ तेन एकसपत्न्याः सपुत्रत्वे अन्यसपत्न्या पुत्रो न ग्राह्यः ॥ "दौहित्रो भागिनेयश्च शूद्राणां विहितः सुतः ॥ ब्राह्मणादित्रये नास्ति भागिनेयसुतः क्वचित्" ॥ न त्वेवैकं पुत्रं दद्यात्प्रतिगृह्णीयाद्वेति न ज्येष्ठं पुत्रं दद्यादिति च ॥ अत्रौरसानेकपुत्रेण पुत्रदानं कार्यमिति विधीयते ॥ तेन पूर्वं दत्तको गृहीतस्तत औरसो जातस्तादृशानेकपुत्रेण दत्तक एकल औरसो वा न देयः ॥ सधवया स्त्रिया पत्यनुज्ञया पुत्रो गृहीतव्यो दातव्यश्च ॥ भर्त्रनुज्ञाभावे तु न ग्राह्यो न देयः ॥ एवं विधवयापि स्त्रिया त्वया पुत्रः स्वीकार्य इत्युक्ता भर्तरि मृते ग्राह्यः ॥ स्पष्टमीदृशानुज्ञाभावे भर्तृजीवनदशायां तन्मरणोत्तरं आप्तमुखाद्वा पुत्रस्वीकारविषयकभर्त्रभिप्रायं ज्ञातवत्यापि ग्राह्य इति सर्वसंमतम् ॥ एतदुभयविधभर्त्रनुज्ञाभावेपि तत्तच्छास्त्रात् नित्यकाम्यव्रतादिधर्माचरण इव पुत्रप्रतिग्रहेपि 'नापुत्रस्य लोकोस्ती'त्यादिसामान्यशास्त्रादेव विधवाया अधिकारः ॥ न स्त्री पुत्रं दद्यात्प्रतिगृह्णीयाद्वान्यत्र भर्त्रनुज्ञानादिति वसिष्ठवाक्यं तु भर्त्रनुज्ञारहितां प्रति पुत्राप्रतिग्रहाभ्यनुज्ञापरं न तु पुत्रप्रतिग्रहनिषेधपरम् ॥ शास्त्रप्राप्तनिषेधायोगात् ॥ अतस्तादृशस्त्रियाः पुत्रप्रतिग्रहप्रतिबंधेन वृत्तिलोपपिंडविच्छेदादि कुर्वन्नरकभाग्भवति "यो ब्राह्मणस्य वृत्तौ तु प्रतिकूलं समाचरेत् ॥ विड्भुजां तु कृमीणां स्यात्" इति शास्त्रादिति कौस्तुभे विस्तरः ॥ स्त्रीभिः पुत्रस्वीकारे व्रतादिवद्विप्रद्वारा होमादिकं कार्यम् ॥ एवं शूद्रेणापि ॥ विप्रः शूद्रदक्षिणामादाय वैदिकमंत्रैस्तदीयहोमादि करोति तत्र शूद्रःपुण्यफलभाग्भवति किंतु विप्रस्यैव प्रत्यवायः ॥ पुत्रं प्रतिगृह्य ग्रहीत्रा जातकर्माद्याश्चूडाद्या वा संस्काराः कार्या इति मुख्यपक्षः ॥ असंभवे सगोत्रसपिंडेषु कृतोपनयनोपि विवाहितोपि वा दत्तको भवति ॥ असंजातपुत्र एव विवाहितो ग्राह्य इति मे भाति ॥ असपिंडसगोत्रेषु कृतोपनयन एवेत्यपि भाति ॥ भिन्नगोत्रस्तु अकृतोपनयन एव ग्राह्यः ॥ केचित्तु कृतोपनयनोपि भिन्नगोत्रो ग्राह्य इत्याहुः ॥ ॥ इति ग्राह्याग्राह्यविवेकः ॥

## अथ ऋग्वेदिना पुत्रप्रतिग्रहप्रयोगः ।

पूर्वेद्युः कृतोपवासः पवित्रपाणिः प्राणानायम्य देशकालौ संकीर्त्य ममाप्रजस्त्वप्र-

युक्तपैतृकऋणापाकरणपुन्नामनरकत्राणद्वारा श्रीपरमेश्वरप्रीत्यर्थं शौनकोक्तविधिना पुत्रप्रतिग्रहं करिष्ये ॥ तदंगत्वेन स्वस्तिवाचनं आचार्यवरणं विष्णुपूजनमन्नदानं च करिष्ये ॥ आचार्यमधुपर्कांते विष्णुं संपूज्य ब्राह्मणादिभोजनं संकल्पयेत् ॥ आचार्यः यजमानानुज्ञया पुत्रप्रतिग्रहांगत्वेन विहितं होमं करिष्य इति संकल्प्य अग्निं प्रतिष्ठाप्य चक्षुषी आज्येनेत्यंते सकृदाग्नें सूर्यासावित्रीं षड्वारं चरुणा अग्निं वायुं सूर्यं प्रजापतिं चाज्येन शेषेण स्विष्टकृतमित्याद्यन्वाधाय अष्टाविंशतिमुष्टींस्तूष्णीं निरूप्य तथैव प्रोक्ष्याज्योत्पवनांतं कुर्यात् ॥ दातारं गत्वा एतस्मै पुत्रं देहीति याचयेत् ॥ दाता देशकालौ संकीर्त्य श्रीपरमेश्वरप्रीत्यर्थं पुत्रदानं करिष्ये इति संकल्प्य गणपतिपूजनांते प्रतिग्रहीतारं यथाशक्ति संपूज्य ॥ ये यज्ञेनेति पंचानां नाभानेदिष्टो मानवो विश्वेदेवास्त्रिष्टुप् ॥ पंचम्यनुष्टुप् ॥ पुत्रदाने विनियोगः ॥ ये यज्ञेनेति ऋक् पंचकांते इमं पुत्रं तव पैतृकऋणापाकरणपुन्नामनरकत्राणसिद्ध्यर्थमात्मनः श्रीपरमेश्वरप्रीत्यर्थं तुभ्यमहं संप्रददे न मम ॥ प्रतिगृह्णातु पुत्रं भवान् इति प्रतिग्रहीतृहस्ते जलं क्षिपेत् ॥ ग्रहीता देवस्यत्वेति हस्तद्वयेन प्रतिगृह्य स्वांके उपवेश्य अंगादंगात्संभवसीति मंत्रेण मूर्धनि जिघ्रेत् ॥ वस्त्रकुंडलाद्यलंकृतं गीतवाद्यैः स्वस्तिमंत्रैश्च स्वगृहमानीय पादौ प्रक्षाल्याचम्याचार्यदक्षिणतः स्वयं स्वदक्षिणे भार्यांत्संगे पुत्र इत्युपविशेत् ॥ आचार्यो बर्हिरासादनाद्याज्यभागांते चरुमवदाय ॥ यस्त्वाहृदेति द्वयोरात्रेयो वसुश्रुतोग्निस्त्रिष्टुप् पुत्रप्रतिग्रहांगहोमे वि० ॥ यस्त्वाहृदेति ऋग्द्वयेनैकमेवावदानं जुहुयात् ॥ यजमानोमय इदं न मम तुभ्यमग्ने पर्यवहन्त्सूर्यासावित्री सूर्यासावित्र्यनुष्टुप् ॥ सूर्यासावित्र्या इदं० सोमो दददिति पंचानां सूर्यासावित्री सूर्यासावित्री अनुष्टुभौ जगती त्रिष्टुबनुष्टुप् ॥ ॐ सोमो ददत ऋक् ५ पंचस्वपि सूर्यासा० एवं सप्तचर्वाहुतीर्हुत्वाज्यं व्यस्तसमस्तव्याहृतिभिर्हुत्वा स्विष्टकृदादि समाप्याचार्याय धेनुं दत्त्वा विप्रान् भोजयेत् ॥

## अथ यजुर्वेदिनां बौधायनोक्तरीत्या प्रयोगः ।

तत्र राज्ञः शिष्टानां बंधूनां चानुमतिं लब्ध्वा संकल्पादि आचार्यपूजनांतं प्राग्वत्कुर्यात् ॥ ब्राह्मणभोजनसंकल्पांते आचार्यो देवयजनोल्लेखनादि आप्रणीताभ्यः कुर्यात् ॥ ग्रहीता दातुः समक्षं गत्वा पुत्रं मे देहीति स्वयमेव भिक्षेत् ॥ दाता ददामीत्याह ॥ ततो दातुः संकल्पादि पुत्रदानांतं पूर्ववत् ॥ ग्रहीता धर्माय त्वा गृह्णामि संतत्यै त्वा गृह्णामीति परिगृह्यैनं पुत्रं वस्त्रकुंडलांगुलीयकैरलं कुर्यात् ॥ आचार्यः कुशमयं बर्हिः पालाशमयमिध्मं च संपाद्य परिधानप्रभृति अग्निमुखं कृत्वा चरुश्रपणासादनांते पूर्वागहोमं कृत्वा यस्त्वा हृदा कीरिणेति पुरोनुवाक्यामुक्त्वा

यस्मै त्वं सुकृते इति याज्यया हुत्वा व्यस्तसमस्तव्याहृतीर्हुत्वा स्विष्टकृदादि कुर्यात् ॥ आचार्याय दक्षिणावस्त्रकुंडलांगुलीयकं दद्यादिति ॥ परगोत्रोत्पन्नदत्तकस्योपनयनमात्रे पालकगोत्रेण कृते उपनयनोत्तरं प्रतिग्रहे वा दत्तकेनाभिवादनश्राद्धादि कर्म सुगोत्रद्वयोच्चारः कार्यः ॥ चूडादिसंस्कारे पालकेन कृते पालकैकगोत्र एव ॥

## अथ विवाहादौ गोत्रविचारः ।

विवाहे तु सर्वदत्तकेन जनकपालकयोरुभयोरपि पित्रोर्गोत्रप्रवरसंबंधिनी कन्या वर्जनीया ॥ नात्र साप्तपुरुषं पांचपुरुषमित्येवं पुरुषनियम उपलभ्यते ॥

## अथ दत्तकसापिंड्यविचारः ।

सापिंड्यं तु जनकगोत्रेणोपनयने जनकपितृमात्रोः कुले साप्तपुरुषं पांचपुरुषं ग्रहीतृमातृपितृकुले त्रिपुरुषम् ॥ ग्रहीतृगोत्रेणोपनयनमात्रे कृते उभयत्र पांचपुरुषं पितृकुले मातृकुले तु त्रिपुरुषम् ॥ जातकर्माद्युपनयनांतसंस्कारे ग्रहीत्रा कृते ग्रहीतृकुले साप्तपुरुषम् ॥ 'मातृतः पांचपूरुषम्' अतो न्यूनं जनककुले कल्प्यम् ॥ केचित्तु दत्तकप्रवेशे कुलद्वयेपि सर्वथा न्यूनमेव सापिंड्यमित्याहुः ॥ एवं दत्तकसंततेरपि सापिंड्यं ज्ञेयम् ॥

## अथ दत्तकसूतकविचारः ।

दत्तकस्य मरणे पूर्वापरपित्रोस्त्रिरात्रम् ॥ सपिंडानामेकाहमाशौचम् ॥ उपनीतदत्तकमरणादौ पालकसपिंडानां दशाहादीति नीलकंठीये दत्तकनिर्णये ॥एवं दत्तकेनापि पूर्वापरपित्रोर्मृतौ त्रिरात्रम् ॥ पूर्वापरसपिंडानां मरणे एकाहम् ॥ पित्रोरौर्ध्वदैहिककरणे तु कर्मांगं दशाहमेव ॥ दत्तकस्य पुत्रपौत्रादेर्जननमरणयोः सपिंडानामेकाहः ॥ सगोत्रसपिंडे दत्तीकृते तु सर्वेषां दशरात्रमेव ॥

## अथ दत्तकधनभागोक्तिः ।

पत्नीदुहित्रादिसत्त्वेपि दत्तक एव पितृधनभागी भवति ॥ दत्तकग्रहणोत्तरमौरसे जाते दत्तकश्चतुर्थांशभागी न समभागी ॥ केचित्तु प्रतिग्रहीत्रा जाताद्युपनयनांतसंस्कारे विधाने च कृते औरससमानांशभागित्वम् ॥ संस्कारमात्रकरणे विधानाभावे विवाहमात्रलाभो नान्यधनलाभः ॥ कतिपयसंस्कारकरणे चतुर्थांशलाभ इत्याहुः ॥

## अथ दत्तौरससमवाये औरसस्यैव पिंडदत्वम् ।

दत्तकसत्त्वेप्यौरसस्यैव पित्रोः पिंडदानेधिकारः ॥ जनकस्य पिंडदाभावे दत्तक एव जनकपालकयोरुभयोरपि श्राद्धं कुर्यात् ॥ धनं चोभयोर्गृह्णीयादिति नीलकंठीये ॥

## अथ [illegible]तकन्याविचारः ।

एवं दत्तकन्याया अपि स्वीकार उक्तविधिना कार्यः ॥ .तत्र परगोत्रोत्पन्नाया ग्रहणे विवाहे गोत्रद्वयवर्जनं प्राग्वत् ॥ पुत्रपत्न्योरभावे दत्तकन्यैव पितृधनभागिनी ॥ इति दत्तोपयोगी सर्वनिर्णयः ॥

## अथ कन्यानामेवोत्पत्तौ पुत्रार्थं पुत्रकामेष्टिः ।

ऋतुकालात्षष्ठे दिने सभार्यः कृताभ्यंगः प्राणानायम्य देशकालौ संकीर्त्य पुत्रकामः पुत्रकामेष्टिं करिष्ये इति संकल्प्य स्वस्तिवाचनादिनांदीश्राद्धांतेग्निं प्रतिष्ठाप्य॥ चक्षुषी आज्येनात्र प्रधानम् ॥ अग्निं पंचवारं वरुणं पंचवारं विष्णुं पृथ्वीं विष्णुं सोमं सूर्यासावित्रीं पायसेन शेषेण स्विष्टकृतमित्यादिनिर्वापकाले तूष्णीं षष्टिमुष्टीन्निरूप्य तथैव प्रोक्ष्य श्वेतवत्सश्वेतगोक्षीरेण चरुं पक्त्वाज्यभागांते ॥ आते गर्भ इति सूक्तद्वयस्य हिरण्यगर्भ ऋषिः ॥ क्रमेणाग्नीवरुणौ देवते॥ अनुष्टुब्जगत्यौ छंदसी॥ पायसचरुहोमे वि० ॐ आते गर्भो योनिमैतु पुमान्वाण इवेषुधिम् ॥ आवीरो जायतां पुत्रस्ते दशमास्यः स्वाहा ॥ अग्नय इदम् ॥ करोमि ते प्राजापत्यमागर्भो योनिमैतु ते अनूनःपुत्रो जायतामश्नोणो पिशाचधीतः स्वाहा ॥ अग्नय० ॥ पुमांस्ते पुत्रोनारीतं पुमाननुजायताम् ॥ तानि भद्राणि बीजान्यृषभा जनयंतु नौ स्वाहा अग्नय० ॥ यानि भद्राणि बीजान्यृषभा जनयंति नः ॥ तैरस्त्वं पुत्रान्विंदस्व सा प्रसूर्धेनुकाभव स्वाहा अग्नय० ॥ कामः समृध्यतां मह्यमपराजितमेव मे ॥ यं कामं कामये देव तन्मे वायो समर्धय स्वाहा अग्नय० ॥ अग्निरैतु प्रथमो देवतानां सोस्यै प्रजां सुंचतु मृत्युपाशात् ॥ तदयं राजा वरुणोनुमन्यतां यथेयं स्त्री पौत्रमघन्नरोदात्स्वाहा ॥ वरुणायेद० ॥ इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यै नयतु दीर्घमायुः॥अशून्योपस्था जीवतामस्तु माता पौत्रमानंदमभिप्रबुध्यतामियं स्वाहा॥ वरुणायेदं० ॥ माते गृहे निशि घोष उत्थादन्यत्र त्वद्दुर्दृत्यः संविशंतु ॥ मात्वंविके श्वर आवधिष्ठा जीवपत्नी पतिलोके विराजपश्यंती प्रजां सुमनस्यमाना स्वाहा ॥ वरुणाय० ॥ अप्रजस्तां पौत्रमृत्युं पाप्मानमुतवाघम् ॥ शीर्ष्णः स्रजमिवोन्मुच्य द्विषद्भ्यः प्रतिमुंचामि पाशं स्वाहा ॥ वरुणाये० ॥ देवकृतं ब्राह्मणकल्पमानं तेन हन्मि योनिषदः पिशाचान् ॥ क्रव्यादो मृत्यूनधरान्पातयामि दीर्घमायुस्तव जीवंतु पुत्राः स्वाहा ॥ वरुणायेदं० ॥ नेजमेषेति तिसृणां विष्णुस्त्वष्टा गर्भकर्ता विष्णु पृथ्वीविष्णवोनुष्टुप् ॥ नेजमेष० विष्णव० यथेयं पृथिवी० पृथिव्या इ० विष्णोः श्रेष्ठेन० विष्णवे० सोमो धेनुं राहुगणो गौतमः सोमस्त्रिष्टुप् ॥ सोमो धेनुं० सोमायेदं० तां पूषन्सूर्यासावित्री सूर्यासावित्री त्रिष्टुप् ॥ पायसहोमे वि० ॥ तां पूषञ्छिव० सूर्यासाविञ्या इ० ॥ इति पंचदशाहुतीर्हुत्वा स्विष्टकृद्धोमं कृत्वा दंपती

अपश्यंत्वेति द्वयोः प्रजावान्प्राजापत्यः प्रजापतिस्त्रिष्टुप् हुतशेषचरुप्राशने विनि०॥ अपश्यंत्वेति द्वाभ्यां प्राश्य ॥ पिशंगभृष्टिमित्यस्य दैवोदासिः पारुच्छेप इंद्रो गायत्री ॥ नाभ्यालंभने विनियोगः ॥ ॐ पिशंगभृ० इति दंपती नाभ्यालंभनं कुर्वताम् ॥ यजमानः प्रायश्चित्तादिहोमशेषं समाप्य ॥ विप्रेभ्यो गां सुवर्णादिदक्षिणां च दत्त्वा रात्रौ दंपती दर्भास्तरणे शयीयाताम् ॥ इति पुत्रकामेष्टिप्रयोगः ॥

## अथ पुंसवनम् ।

तत्र पुंसवनं व्यक्ते गर्भे द्वितीये चतुर्थे षष्ठेऽष्टमे वा मासे सीमंतेन सह वा कार्यम् ॥ शुक्लपंचमीमारभ्य कृष्णपंचमीपर्यंतं चतुर्थीनवमीचतुर्दशीपंचदशीवर्जिते तिथौ सूर्यभौमगुरुवारेषु प्रशस्तम् ॥ क्वचिच्चंद्रबुधशुक्रवाराउक्ताः ॥ नक्षत्राणि तु पुन्नामकानि प्रशस्तानि ॥ तानि च पुष्यश्रवणपुनर्वसुहस्तमृगाभिजिन्मूलानुराधाश्विनीत्येतानि ॥ अत्र पुष्यो मुख्यः ॥ तदभावे श्रवणस्तदभावे हस्तादीनि ॥ अयमेवानवलोभनस्यापि कालः ॥ पुंसवनेन सह करणीयत्वविधानात् ॥ पुंसवनानवलोभने प्रतिगर्भं कार्ये गर्भसंस्कारत्वात् ॥ गर्भाधानसीमंतोन्नयने तु स्त्रीसंस्कारत्वात्प्रतिगर्भं नावर्त्तेते ॥ किं तु प्रथमगर्भे एव कार्ये ॥ प्रथमगर्भे लोपे तु प्रतिगर्भं तयोर्लोपप्रायश्चित्तमावश्यकम् ॥ न च प्रथमापत्ये तयोः प्रायश्चित्तेन द्वितीयादिगर्भाणां संस्कारासिद्धिर्भवति ॥ प्रायश्चित्ते न हि प्रत्यवायपरिहारमात्रं न त्वपूर्वाख्यातिशयोत्पादनं तत्तु संस्कारविधिनैवेति युक्तं प्रतिगर्भं प्रायश्चित्तम् ॥ पुंसवनानवलोभनयोस्तु प्रथमगर्भेनुष्ठानेपि प्रतिगर्भं तयोर्लोपे प्रायश्चित्तम् ॥ तच्च पादकृच्छ्रं प्रतिसंस्कारं कार्यम् ॥ बुद्धिकृतलोपे द्विगुणम् ॥ पुंसवने पतिः कर्त्ता तदभावे देवरादिः ॥

## अथ सीमंतकालः ।

तच्चतुर्थेऽष्टमे षष्ठे पंचमे मासि वा विहितम् ॥ "नवमे मासि वा कुर्याद्यावद्गर्भविमोचनम् ॥ स्त्री यद्यकृतसीमंता प्रसूयेत कदाचन ॥ गृहीतपुत्रा विधिवत्सा तं संस्कारमर्हति " ॥ पक्षतिथिवारनक्षत्राणि पुंसवनोक्तान्येव प्रशस्तानि ॥ क्वचिद्दशमीपर्यंतं कृष्णोपि ग्राह्यः ॥ षष्ठ्यष्टमीद्वादश्यो रिक्ताः पंचदशी च वर्ज्यास्तासु संकटे चतुर्थीचतुर्दशीपौर्णमास्यो ग्राह्याः ॥ क्रमेणाष्टचतुर्दशदशनाडिका आद्यास्त्यक्त्वा षष्ठ्यष्टमीद्वादश्योपि ग्राह्याः ॥ पुंनक्षत्राणामलाभे रेवतीरोहिण्युत्तरात्रयाणि ग्राह्याणि ॥ उक्तनक्षत्राणां प्रथमांत्यपादौ त्यक्त्वा मध्यपादद्वयं ग्राह्यमित्युक्तम् ॥ इदं कर्म सकृदेव कार्यमित्युक्तम् ॥ कात्यायनानां तु गर्भसंस्कारत्वात्प्रतिगर्भमावर्तनीयम् ॥ सीमंतोन्नयने पतिरेव कर्ता ॥ गर्भाधानलोपे तत्प्रायश्चित्तार्थं विप्राय गां दत्त्वा पुंसवनादिकं कार्यम् ॥

## अथ पुंसवनसंकल्पः ।

तत्राश्वलायनानां देशकालादिकीर्तनांते ममास्यां भार्यायामुत्पत्स्यमानगर्भस्य गार्भिकवैजिकदोषपरिहारपुंरूपतासिद्धिज्ञानोदयप्रतिरोधपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं पुंसवनमनवलोभनं ममास्यां भार्यायां गर्भाभिवृद्धिपरिपंथिपिशितरुधिरप्रियालक्ष्मीभूतराक्षसीगणदूरनिरसनक्षेमसकलसौभाग्यनिदानमहालक्ष्मीसमावेशनद्वारा प्रतिगर्भं बीजगर्भसमुद्भवैनोनिबर्हणद्वारा च श्रीपरमेश्वरप्रीत्यर्थं स्त्रीसंस्काररूपं सीमंतोन्नयनाख्यं कर्म च तंत्रेण करिष्य इति संकल्पः सीमंतेन सह त्रयाणां करणे ज्ञेयः ॥ नांदीश्राद्धे ऋतुदक्षसंज्ञका विश्वेदेवाः ॥ पुंसवनस्य पृथक्त्वे पवमानसंज्ञकमौपासनाग्निं प्रतिष्ठापयेत् ॥ त्रयाणां सहत्वे मंगलनामानं प्रतिष्ठापयेत् ॥ गृह्याग्निविच्छेदे सर्वाधानिनश्चाग्न्युत्पत्तिः पूर्ववत् ॥ पुंसवने प्रजापतिं चरुणा सीमंते धातारं द्विः राकां द्विर्विष्णुं त्रिः प्रजापतिं सकृदाज्येन जुहुयात् ॥ अवशिष्टप्रयोगोन्यत्र ज्ञेयः ॥ शाखांतरेषु च तत्तद्ग्रंथेभ्यो ज्ञेयः ॥ अत्र प्रतिसंस्कारं दशदश त्रींस्त्रीन् वा ब्राह्मणान् भोजयेत् ॥ शक्तेन शतंशतम् ॥

## अथ सीमंतभुक्तौ प्रायश्चित्तम् ।

सीमंतान्नभोजने प्रायश्चित्तं पारिजाते ॥ "ब्रह्मौदने च सोमे च सीमंतोन्नयने तथा ॥ जातश्राद्धे तथा भुक्त्वा भोक्त्वा चांद्रायणं चरेत्" ॥ यद्वा अराइवेति मंत्रस्य शतवारं जपः ॥ एतच्च आधानांगब्रह्मौदनांगभोजन इव सीमंतांगभोजने ज्ञेयम् ॥ न तु तद्दिने तद्गृहे भोक्तृमात्रस्येति पारिजातोक्तमुक्तम् ॥

## अथ गर्भिणीधर्माः ।

"गर्भिणी कुंजराश्वादिशैलहर्म्यादिरोहणम् ॥ व्यायामं शीघ्रगमनं शकटारोहणं त्यजेत् ॥ न भस्मादावुपविशेन्मुसलोलूखलादिषु ॥ त्यजेज्जलावगाहं च शून्यं सद्म तरोस्तलम् ॥ कलहं गात्रभंगं च तीक्ष्णात्युष्णादिभक्षणम् ॥ संध्यायामतिशीताम्लं गुर्वाहारं परित्यजेत् ॥ व्यवायशोकासृङ्मोक्षं दिवास्वापं निशि स्थितिम् ॥ भस्मांगारनखैर्भूमिलेखनं शयनं सदा ॥ त्यजेदमंगलं वाक्यं न च हास्याधिका भवेत् ॥ न मुक्तकेशा नोद्विग्ना कुक्कुटासनगा न च ॥ गर्भरक्षा सदा कार्या नित्यं शौचनिषेवणात् ॥ प्रशस्तमंत्रलिखनाच्छस्तमाल्यानुलेपनात् ॥ विशुद्धगेहवसनाद्दानैः श्वश्वादिपूजनैः ॥ हरिद्राकुंकुमं चैव सिंदूरं कज्जलं तथा ॥ केशसंस्कारतांबूलं मांगल्याभरणं शुभम् ॥ चतुर्थे मासि षष्ठे वाप्यष्टमे गर्भिणीवधूः ॥ यात्रां विवर्जयेन्नित्यमाषष्ठात्तु विशेषतः" ॥

## अथ गर्भिणीपतिधर्माः ।

"गर्भिणीवाञ्छितं द्रव्यं तस्यै दद्याद्यथोचितम् ॥ सूते चिरायुषं पुत्रमन्यथा

दोषमर्हति ॥ सिंधुस्नानं द्रुमच्छेदं वपनं प्रेतवाहनम् ॥ विदेशगमनं चैव न कुर्याद्गर्भिणीपतिः ॥ वपनं मैथुनं तीर्थं श्राद्धभोजनमेव च ॥ वर्जयेत्सप्तमान्मासान्नाव आरोहणं तथा ॥ युद्धादि वास्तुकरणं नखकेशविकर्तनम् ॥ चौलं शवानुगमनं विवाहं च विवर्जयेत् ॥ मुंडनं पिंडदानं च प्रेतकर्म च सर्वशः ॥ न जीवत्पितृकः कुर्याद्गर्विणीपतिरेव च" ॥ अत्र कर्तनमपि निषिध्यते ॥ "वपनस्य निषेधेपि कर्तनं तु विधीयते" इति वाक्यं तु जीवत्पितृकादीनां यो वपननिषेधस्तत्र कर्तनविधिपरम् ॥ तदपवादः ॥ "क्षौरं नैमित्तिकं कुर्यान्निषेधे सत्यपि ध्रुवम् ॥ पित्रोः प्रेतविधानं च गर्भिणीपतिराचरेत् ॥" अन्वष्टक्याष्टकयोर्गर्भिणीपतिः पिंडदानं कुर्यात् ॥ केचित्पित्रोः प्रतिसांवत्सरिके पिंडदानं कुर्वंति ॥ दर्शमहालयादिषु नैव कार्यम् ॥ ॥ अथ गर्भस्रावहरं कांचनयज्ञोपवीतदानं महार्णवे ॥ इदं स्त्रीकर्तृकम् ॥ शुभदिने स्त्री आचम्य देशकालौ संकीर्त्य मम गर्भस्रावनिदानसकलदोषपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं वायुपुराणोक्तं सुवर्णयज्ञोपवीतदानविधिं करिष्ये इति संकल्प्य पलेन तदर्धेन यथाशक्ति वा हैमं यज्ञोपवीतं ग्रंथिप्रदेशे मौक्तिकयुतं कृत्वा तथैव वज्रमणियुतं राजतमुत्तरीयं च कृत्वोभयं पंचगव्येन गायत्र्या प्रक्षाल्य ताम्रपात्रे द्रोणमितं दधि निक्षिप्य तन्मध्ये द्रोणमितमाज्यं निक्षिप्याज्योपरि तदुभयं संस्थाप्य भर्ता ब्राह्मणो वा गायत्रीमंत्रेण गंधादिभिः पूजयेत् ॥ अष्टगुंजात्मको माषः दशमाषाः सुवर्णम् ॥ पलकुडवप्रस्थाढकद्रोणाः सुवर्णादिपूर्वपूर्वचतुर्गुणाः ॥ दध्याज्ययोर्द्रोणपरिमाणाभावे शक्त्यनुसारि प्रमाणम् ॥ ब्राह्मणद्वारा आज्यमधुमिश्रैस्तिलैरष्टोत्तरशतं गायत्र्या व्याहृतिभिर्वा होमं कारयेत् ॥ त्यागं भर्ता वा स्त्री वा कुर्यात् ॥ होमकर्तारं विप्रं वस्त्राद्यैः संपूज्य प्राङ्मुखाय तस्मै उदङ्मुखा स्त्री दानं कुर्यात् ॥ तद्यथा ॥ "उपवीतं परिमितं ब्रह्मणा विधृतं पुरा ॥ भव नौकास्य दानेन गर्भं संधारये ह्यहम्" ॥ इति मंत्रेण विप्रस्य नामगोत्रे उच्चार्य ताम्रपात्रस्थदध्याज्यसंस्थं सुपूजितं सोत्तरीयकमिदं यज्ञोपवीतं गर्भस्रावनिदानदोषपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं तुभ्यमहं संप्रददे न मम ॥ प्रतिगृह्यताम् ॥ विप्रः प्रतिगृह्णामीत्यादि ॥ यथाशक्ति दक्षिणां दत्त्वा अन्येभ्योपि यथाशक्ति दक्षिणां दत्त्वा प्रतिग्रहीतुरनुव्रज्य नमस्कारक्षमापनादि कृत्वा विप्रभोजनं संकल्प्य कर्मेश्वरायार्पयेत् ॥ एतच्च "स्रवद्गर्भा भवेत्सा तु बालकं हंति या विषैः" इत्युक्तेर्बालहत्याप्रायश्चित्तं कृत्वा कार्यम् ॥ अन्यत्र तु स्वर्णधेनुदानहरिवंशश्रवणादीन्युक्त्वा घृतपूर्णताम्रकलशदानादिविधानानि युक्तानि ॥

## अथ सूतिकागृहप्रवेशः ।

गृहे नैर्ऋत्यां सूतिकागृहं कृत्वा तत्राश्विनीरोहिणीमृगपुनर्वसुपुष्यत्र्युत्तराहस्त-

चित्रास्वात्यनुराधाधनिष्ठाशततारकानक्षत्रेषु रिक्तादिवर्ज्यातिथिषु चंद्रानुकूल्ये शुभलग्ने सूतिकाप्रवेशो गोविप्रदेवपूजनं कृत्वा मंत्रवाद्यघोषेण सापत्यस्त्रीभिः सह कार्यः असंभवे सद्यो वा ॥ प्रसवप्रातिबंधे ऋग्विधाने ॥ प्रमंदिने इत्यृचं विजिह्वीर्ष्वेति सूक्तं वा जपेत् ॥ एताभ्यामभिमंत्रितजलं वा पाययेत् ॥ तेन सुखप्रसवः ॥ शीघ्रप्रसवमंत्रस्तु ॥ "हिमवत्युत्तरे पार्श्वे सुरथा नाम यक्षिणी ॥ तस्याः स्मरणमात्रेण विशल्या गर्भिणी भवेत्" ॥ ॐ क्षीं ॐ स्वाहेति मंत्रेण दूर्वाकुरेण तिलतैलं शतं सहस्रं वाऽभिमंत्र्य किंचित्पाययेत् ॥ किंचिन्मात्रस्य गर्भे लेपश्च ॥ सम्यग्लेपे शीघ्रं सुखप्रसवः अस्थिमात्रावशिष्टगोमस्तकस्य सूतिकागृहोपरि निधाने सुखप्रसवः ॥ वंशनिंबयोस्त्वक् तुलसीमूलं कपित्थपत्रं करवीरबीजं च समभागं महिषीदुग्धेन पेषयित्वा तेन सतैलेन योनिलेपे सद्यः प्रसवः ॥

## अथ जातकर्म ।

मूलज्येष्ठाव्यतीपातादावनुत्पन्नस्य जातमात्रस्य पुत्रस्य पिता मुखं कुलदेवतावृद्धप्रणामपूर्वकमवलोक्य नद्यादावुदङ्मुखः स्नायात् ॥ तदसंभवे गृहे आनीताभिः शीताभिः स्वर्णयुताभिरद्भिः स्नायात् ॥ एतच्च रात्रावपि नद्यादौ कार्यम् ॥ अशक्तौ रात्रावग्निसन्निधौ स्वर्णयुतशीतोदकैः ॥ मूलादिषु जनने तु मुखमदृष्ट्वैव स्नानम् ॥ देशांतरगते जनके पुत्रजन्मश्रवणोत्तरं स्नानम् ॥ सर्वत्र स्नानात्प्राक् अस्पृश्यत्वम् ॥ एवं कन्योत्पत्तावपि स्नानं तत्प्रागस्पृश्यत्वं च ज्ञेयम् ॥ अन्यसपिंडाशौचमध्ये जननेपि पितुस्तात्कालिकी स्नानदानादौ जातकर्मणि च शुद्धिः ॥ केचिन्मृताशौचे पुत्रजनने जातकर्माशौचांते कार्यमित्याहुः ॥ नालच्छेदनात्पूर्वं संपूर्णसंध्यावंदनादिकर्माणि नाशौचम् ॥ प्रथमदिने पंचमषष्ठदशमादिने च दानप्रतिग्रहयोर्न दोषः ॥ घृतमन्नं न ग्राह्यम् ॥ ज्योतिष्टोमादिदीक्षावता स्वयमन्येन वा जातकर्म न कार्यं किं तु अवभृथस्नानांते दीक्षां विसृज्य स्वयं कार्यम् ॥ श्रेष्ठः कनिष्ठेन पुंसवनादिकं न कारयेत् ॥ जातकर्म तु कारयेत् ॥ अतिक्रांतं तु स्वयमेव कुर्यात् ॥ महारोगार्तो जातकर्म स्वयं न कुर्यात् ॥ " अच्छिन्ननाभि कर्तव्यं श्राद्धं वै पुत्रजन्मनि " ॥ पुत्रपदेन कन्यापि गृह्यते तथा च संस्कारांगभिन्नं कन्यापुत्रयोर्जन्मनिमित्तकं नांदीश्राद्धं विधीयते ॥ एतच्च रात्रावपि कार्यम् ॥ तच्च हेम्नैव कार्यं न त्वन्नादिना ॥

## अथ जातकर्मसंकल्पः ।

तथा च स्नातोऽलंकृतः पिता अकृतनालच्छेदमपीतस्तन्यमन्यैरस्पृष्टं प्रक्षालितं कुमारं मातुरुत्संगे कारयित्वाचमनादिदेशकालादिकीर्तनांते अस्य कुमारस्य गर्भाधानजनितदोषनिबर्हणायुर्मेधावृद्धिबीजगर्भसमुद्भवैनोनिबर्हणद्वारा श्रीपरमेश्वरप्रीत्यर्थं जातकर्म करिष्ये तदादौ च स्वस्तिपुण्याहवाचनं मातृकापूजनं च

करिष्ये॥हिरण्येन पुत्रजन्मनिमित्तकं जातकर्मांगं च नांदीश्राद्धं तंत्रेण करिष्ये इति संकल्प्य यथागृह्यं कुर्यात् ॥ "ततो दद्यात्सुवर्णं च भूमिं गां तुरगं रथम् ॥ छत्रं छागं च माल्यं च शयनं चासनं गृहम् ॥ तिलपूर्णानि पात्राणि सहिरण्यानि चैव हि ॥ भक्षयित्वा तु पक्वान्नं द्विजश्चांद्रायणं चरेत् ॥ सूतके तु सकुल्यानां न दोषो मनुरब्रवीत् ॥" अथारिक्तपाणिज्योंतिर्विदं संपूज्य तस्माज्जन्मलग्नगतशुभाशुभग्रहनिर्णयं ज्ञात्वा प्रतिकूलग्रहानुकूल्यार्थं तत्तद्ग्रहप्रीत्यर्थं दानानि कुर्यात् ॥ ग्रहमंत्रजपादिशांतिसूक्तजपादिकर्माणि विप्रान् वा नियोजयेत् ॥ ततो नालच्छेदं कारयित्वा हिरण्योदकेन मातुर्दक्षिणस्तनं प्रक्षाल्य मात्रा कुमारं पाययेत् ॥ तत्र इमां कुमार इत्यादिमंत्रं विप्रादिः पठेत् ॥ जातकर्माद्यन्नप्राशनांतसंस्कारेषु आश्वलायनानां होमः कृताकृतः ॥ होमपक्षे नांदीश्राद्धांते जातकर्मांगहोमं करिष्ये इति संकल्प्य लौकिकाग्निं प्रतिष्ठाप्यान्वाधानाद्याज्यभागांते अग्निमिंद्रं प्रजापतिं विश्वान्देवान्ब्रह्माणमाज्येन जुहुयात् ॥ मधुसर्पिःप्राशनादिमूर्धावघ्राणांते स्विष्टकृदादि कुर्यादिति क्रमः ॥ अन्येषां यथागृह्यं होमादि ज्ञेयम् ॥ कुमार्या अपि जातकर्मादिसंस्काराश्चौलांताः सर्वे अमंत्रकाः कार्याः ॥ विवाहस्तु समंत्रकः ॥ अतः कन्याया जातकर्मादिसंस्कारलोपे तत्तत्काले विवाहकाले वा प्रायश्चित्तं कृत्वा विवाहः कार्यः ॥ अत्र सर्वत्र जातकर्मनामकर्मादौ मुख्यकालातिक्रमे गुर्वाद्यस्तरहिते शुभनक्षत्रादौ जातकर्मादिकं कार्यम् ॥ तत्र जातकर्मणि नक्षत्राणि रोहिणीत्र्युत्तराश्विनीहस्तपुष्यानुराधारेवतीमृगचित्राश्रवणादित्रयस्वातीपुनर्वसवः ॥ रिक्तापर्वरहितास्तिथयः ॥ भौमशनिभिन्नवाराः ॥ भद्रावैधृत्यादिशून्ये सुकेंद्रलग्ने शुभम् ॥

## अथ पंचमषष्ठदिने षष्ठीपूजनप्रयोगः ।

अथ पंचमषष्ठदिनयोर्जन्मदानां पूजनम् ॥ रात्रेः प्रथमयामे पित्रादिः स्नात्वाचम्य देशकालौ संकीर्त्य अस्य शिशोः समातृकस्यायुरारोग्यप्राप्तिसकलानिष्टशांतिद्वारा श्रीपरमेश्वरप्रीत्यर्थं विघ्नेशस्य जन्मदानां जीवंत्यपरनाम्न्याः षष्ठीदेव्याः शस्त्रगर्भाभगवत्याश्च पूजनं करिष्ये इति संकल्प्य ॥ तंडुलपुंजेषु विघ्नेशं जन्मदाश्च नाममंत्रेणावाह्य ॥ "आयाहि वरदे देवि महाषष्ठीति विश्रुते ॥ शक्तिभिः सह बालं मे रक्ष जागरवासरे॥" इति षष्ठीदेवीमावाह्य नाम्ना भगवतीमावाह्य नामभिः ॥ "शक्तिस्त्वं सर्वदेवानां लोकानां हितकारिणी ॥ मातर्बालमिमं रक्ष महाषष्ठि नमोस्तु ते॥" इति मंत्रेण च षोडशोपचारैः संपूज्य प्रार्थयेत् ॥ "लंबोदर महाभाग सर्वोपद्रवनाशन ॥ त्वत्प्रसादादविघ्नेश चिरं जीवतु बालकः ॥ जननी सर्वभूतानां बालानां च विशेषतः ॥ नारायणि स्वरूपेण बालं मे रक्ष सर्वदा ॥ प्रेतभूतपिशाचे-

भ्यो डाकिनीशाकिनीषु च ॥ मातेव रक्ष बालं मे श्वापदे पन्नगेषु च ॥ गौरीपुत्रो यथा स्कंदः शिशुत्वे रक्षितः पुरा ॥ तथा ममाप्ययं बालः षष्ठिके रक्ष्यतां नमः॥" इति ॥ विप्रेभ्यस्तांबूलदक्षिणादि दद्यात् ॥ रात्रौ जागरणं कुर्यात् ॥ पंचमषष्ठदिनयोर्दानप्रतिग्रहयोर्न दोषः ॥ दशमदिने बलिदानं स्वीयेभ्योन्नदानं च कार्यम् ॥

## अथाशौचे कर्तव्यनिर्णयः ।

"सूतके मृतके कुर्यात्प्राणायाममंत्रकम् ॥ तथा मार्जनमंत्रांश्च मनसोच्चार्य मार्जयेत् ॥ गायत्रीं सम्यगुच्चार्य सूर्यायार्घ्यं निवेदयेत् ॥ उपस्थानं नैव कार्यं मार्जनं तु कृताकृतम् ॥" सूर्यं ध्यायन्नमस्कुर्यात् ॥ गायत्रीजपो न कार्यः ॥ अर्घ्यांता मानसी संध्येत्युक्तेः ॥ केचिन्मनसा दशगायत्रीजपः कार्य इत्याहुः ॥ वैश्वदेवब्रह्मयज्ञादयः पंच महायज्ञा न कार्याः ॥ वेदाभ्यासो न कार्यः ॥ औपासनहोमपिंडपितृयज्ञावसगोत्रेण कारयेत् ॥ केचिच्छ्रौतकर्मणि सद्यः शुद्धयुक्तेरग्निहोत्रहोमः स्नात्वाचम्य स्वयं कार्य इत्याहुः ॥ अपरे तु सर्वस्याप्याशौचापवादस्य अनन्यगतिकत्वात्सति ब्राह्मणे ब्राह्मणद्वारैव कार्यः ॥ ब्राह्मणाभावे स्वयं कार्य इत्याहुः ॥ स्थालीपाको न कार्यः ॥ आशौचांते कार्यः ॥ सर्वथा लोपप्रसक्तौ स्थालीपाकोपि ब्राह्मणद्वारा कार्यः ॥ अन्वाधानोत्तरं सूतकप्राप्तौ ब्राह्मणद्वारा श्रौतेष्टिस्थालीपाकौ ॥ होमादौ त्यागः स्नात्वा स्वयं कार्यः ॥ दर्शादिश्राद्धस्य लोप एव ॥ प्रतिसांवत्सरिकश्राद्धमाशौचांते एकादशाहे कार्यम् ॥ तत्रासंभवे दर्शव्यतीपातादिपर्वणि ॥ एवं पत्न्यामृतुमत्यामपि पिंडपितृयज्ञदर्शश्राद्धे कार्ये ॥ अन्वाधानोत्तरं रजोदोषे इष्टिस्थालीपाकौ कार्यौ ॥ अन्यथा कालांतरे दानप्रतिग्रहाध्ययनानि वर्ज्यानि ॥ आशौचेन्यस्यान्नं नाश्नीयात् ॥ पितृयज्ञस्थालीपाकश्रवणाकर्मादिसंस्थानां प्रथमारंभो ब्राह्मणद्वाराप्याशौचयोर्न भवति ॥ प्रथमारंभोत्तरं श्रवणाकर्मादिकं विप्रद्वाराशौचेपि पत्न्यार्तवेपि कार्यम् ॥ आग्रयणं तु न भवति ॥ अग्निसमारोपप्रत्यवरोहौ आशौचे न भवतः तेन समारोपोत्तरमाशौचे दर्शादिपर्वप्राप्तावग्निनाशात्तैत्तिरीयादीनां त्रिदिनं होमलोपे बह्वृचानां द्वादशदिनं होमलोपे अग्निनाशादाशौचांते श्रौतस्मार्तयोः पुनराधानमेव ॥ समारोपप्रत्यवरोहयोरन्यकर्तृकत्वाभावात् ॥ अग्न्यनुगमने प्रायश्चित्तपूर्वकं पुनरुत्पत्तिरन्यद्वारा भवति ॥

## अथ भोजनकाले सूतकप्राप्तौ ।

भोजनकाले आशौचप्राप्तौ मुखस्थं ग्रासं त्यक्त्वा स्नायात् ॥ तद्ग्रासभक्षणे एकोपवासः ॥ सर्वान्नभक्षणे त्रिरात्रोपवासः ॥ "सूतके सूतके चैव न दोषो राहुदर्शने॥" इत्युक्तेर्ग्रहणे स्नात्वा श्राद्धदानजपादिकमाशौचेपि कार्यम् ॥ एवं संक्रांतिस्नानदानादिकमपि ॥ संकटे नांदीश्राद्धोत्तरं मौंजीविवाहयोर्नाशौचम् ॥ संकटे मधुपर्को

त्तरमृत्विजां नाशौचम् ॥ यजमानस्य दीक्षणीयोत्तरं प्रागवभृथान्नाशौचम् ॥ अवभृथमाशौचोत्तरं कार्यम् ॥

## अथ व्रतादिष्वाशौचापवादः ।

व्रतेषु नाशौचमित्युक्तेरनन्तव्रतादिकमन्यैः कारयेत् ॥ प्रारब्धान्नसत्रस्यान्नदानादिषु नाशौचम् ॥ " पूर्वसंकल्पितान्नेषु न दोषः परिकीर्तितः ॥ " उदकदुग्धदधिघृतलवणफलमूलभर्जिताद्यन्नानां सूतकिगृहस्थितानां स्वयं ग्रहणे दोषाभावः ॥ सूतकिहस्तात्तु न ग्राह्यम् ॥ केचित्तंदुलादिकमपक्वान्नं ग्राह्यमाहुः ॥ ॥ इति संक्षेपेण निर्णयो विशेषस्तु वक्ष्यते ॥

## अथ सूतिकाशुद्धिः ।

दशाहांते सूतिकाया अस्पृश्यत्वनिवृत्तिर्नामकर्मजातकर्मादिप्राप्तकर्माधिकारश्च॥ ज्ञातेष्टिविवाहोपनयनादिकर्मसु तु पुत्रप्रसूनां विंशतिरात्रांतेऽधिकारः ॥ कन्याप्रसूनां मासांतेऽधिकारः ॥

## अथ जन्मनि दुष्टकालास्तच्छांतयश्च निर्णीयन्ते ।

तत्रादौ गोप्रसवः ॥ यत्र जन्मकाले पितुर्मातुः सुतस्य चारिष्टमुक्तं तत्र गोप्रसवशान्तिस्तत्तन्नक्षत्रादिशांतिश्च कार्या ॥ धनाद्यरिष्टेषु न कार्या ॥ मूलाश्लेषाज्येष्ठामघानक्षत्रेषु जनने चतुर्थपादादिषु पित्राद्यरिष्टाभावेपि गोप्रसवः ॥ अश्विनीरेवतीपुष्यचित्रासु नक्षत्रशांत्यभावेपि गोप्रसवशांतिरेव कार्या ॥ तत्रास्य शिशोरमुकदुष्टकालोत्पत्तिसूचितारिष्टनिरूत्यर्थं गोमुखप्रसवशान्तिं करिष्ये इति संकल्प्य गणेशपूजनमात्रं कृत्वा 'अंगादंगात्' इति मन्त्रेण शिशुमूर्धावघ्राणांते प्रयोगमध्य एव पुण्याहवाचनमिति कौस्तुभमयूखौ ॥ पुण्याहवाचनं शाखोक्तं कृत्वा मूर्धावघ्राणांते अस्य गोमुखप्रसवस्य पुण्याहं भवंतो ब्रुवंत्वित्येकवाक्यमेव त्रिर्वदेत् ॥ ऋत्विजश्च प्रतिब्रूयुः ॥ न तु शाखोक्तमिति कमलाकरः ॥ नांदीश्राद्धं न कार्यम् ॥ अग्निप्रतिष्ठांते कस्मिंश्चित्पीठे नवग्रहान् अधिदेवतादिरहितान् प्रतिष्ठाप्यान्वाधानं कुर्यात् ॥ आज्यभागांते अपः आपोहिष्ठेतिऋचेन अप्सु मे सोम इति गायत्र्या ऋचा च मिलितदधिमध्वाज्येन प्रत्यृचम् अष्टाष्टसंख्याहुतिभिर्विष्णुं तद्विष्णोरित्यृचा मिलितदधिमध्वाज्येनाष्टाहुतिभिः यक्ष्महणम् अक्षीभ्यामिति सूक्तेन प्रत्यृचमष्टाष्टमीलितदधिमध्वाज्याहुतिभिर्नवग्रहान्दधिमध्वाज्येनाष्टाष्टसंख्याहुतिभिः शेषेणेत्यादि मयूखादयः ॥ कमलाकरस्तु दधिमध्वाज्येनापश्चतुर्वारं विष्णुं सकृत् यक्ष्महणमक्षीभ्यामिति सूक्तेन प्रत्यृचमष्टाष्टसंख्याहुतिभिर्नवग्रहानेकैकयाहुत्या शेषेण स्विष्टकृतमित्याह ॥ आज्यभागहोमांते एकस्मिन् कुंभे विष्णुवरुणौ प्रतिमयोः संपूज्यौ ॥ प्रतिमासु विष्णुवरुणयक्ष्महणः पूज्या इति मयूखे ॥ ततो यथान्वाधानं होम इति

संक्षेपः ॥ अवशिष्टप्रयोगः शांतिग्रन्थेषु ॥ एवमग्रेपि देवताद्रव्याहुतिसंख्यानिमित्तफलमात्रं लिख्यते विस्तरोन्यत्र ज्ञेयः ॥

## अथ कृष्णचतुर्दशीजननशांतिः ।

"कृष्णपक्षे चतुर्दश्यां प्रसूतेः षड्विधं फलम्॥चतुर्दशीं च षड्भागां कुर्यादादौ शुभं स्मृतम् ॥ द्वितीये पितरं हन्ति तृतीये मातरं तथा ॥ चतुर्थे मातुलं हन्ति पंचमे वंशनाशनम् ॥ षष्ठे तु धनहानिः स्यादात्मनो वंशनाशनम्॥" तत्र चतुर्दश्याः षडंशानां मध्ये द्वितीयतृतीयषष्ठांशेषु जनने गोमुखप्रसवपूर्वकं चतुर्दशीशांतिः ॥ अन्यभागे केवलचतुर्दशीशांतिः ॥ अस्य शिशोः कृष्णचतुर्दश्या अमुकांशजननमूचितसर्वारिष्टनिरसनद्वारा श्रीपरमेश्वरप्रीत्यर्थमित्यादिसंकल्पः ॥ आग्नेय्यादिषु चतुर्दिक्षु चत्वारः कुम्भा मध्ये शतच्छिद्रकुम्भे प्रतिमायां रुद्रावाहनम् ॥ मयूखे तु पीठादौ रुद्रप्रतिमां संपूज्य तत्प्राच्यामुदीच्यां वा शतच्छिद्रादिपञ्चकलशस्थापनं पूजनम् अन्वाधाने ग्रहानष्टाष्टसंख्यसमिदाज्यचरुभिरधिदेवतादीन् एकैकसंख्यसमिच्चर्वाज्याहुतिभी रुद्रम् अश्वत्थप्लक्षपलाशखदिरसमिद्भिश्चर्वाहुतिभिराज्याहुतिभिर्मार्षैस्तिलैः सर्षपैश्च प्रतिद्रव्यमष्टोत्तरशताष्टाविंशत्यन्यतरसंख्यया त्र्यंबकमिति मंत्रेण अग्निं वायुं सूर्यं प्रजापतिं च तिलाज्याहुतिभिरमुकसंख्याभिः सकृद्वा व्यस्तसमस्तव्याहृतिभिः ॥ यद्वा प्रजापतिमेव समस्तव्याहृतिभिस्तिलैः शेषेणेत्यादि ॥

## अथ सिनीवालीकुहूदर्शजननशांतयः ।

तत्रामावास्यायाः प्रथमो यामः सिनीवाली अंत्योपांत्ययामौ कुहूः ॥ मध्यवर्तिपंचयामा दर्श इति केचित ॥ अपरे चतुर्दशीमात्रयुतेऽहोरात्रे वर्तमाना अमावास्या सिनीवाली ॥ प्रतिपन्मात्रयुतेऽहोरात्रे वर्तमाना कुहूः ॥ तेनामाया वासरत्रयस्पर्शित्वलक्षणदिनवृद्ध्यभावे सूर्योदयस्पर्शित्वाभावलक्षणक्षयाभावे च दर्शो नास्त्येव ॥ उदयात्पूर्वाहोरात्रे वर्तमानायाः सिनीवालीत्वात् ॥ उदयोत्तरं वर्तमानायाः कुहूत्वात् ॥ दिनक्षये सर्वाप्यमा दर्शसंज्ञा न तत्र सिनीवालीकुहूभागौ ॥ केवलचतुर्दशीकेवलप्रतिपद्युक्तत्वाभावात् ॥ एवं दिनवृद्धौ त्रिदिनस्पर्शे मध्यदिनस्था षष्टिनाडीमितामावास्या दर्शसंज्ञा चतुर्दश्यादियोगाभावात् ॥ पूर्वोत्तरदिनस्थौ भागौ सिनीवालीकुहूसंज्ञाविति आहुः ॥ इदं मयूखे स्पष्टम् ॥ "सिनीवाल्यां प्रसूता स्याद्यस्य भार्या पशुस्तथा ॥ गजाश्वमहिषी चैव शक्रस्यापि श्रियं हरेत् ॥ गोपक्षिमृगदासीनां प्रसूतिरपि वृत्तिहृत् ॥ कुहूप्रसूतिरत्यर्थं सर्वदोषकरी स्मृता ॥ यस्य प्रसूतिरेतेषां तस्यायुर्धननाशनम् ॥ शांत्यभावेर्हति त्यागमत्र जातो न संशयः ॥ अत्यागे नाशयेत्किंचित्स्वयं वा नाशमाप्नुयात् ॥"

## अथ सिनीवालीकुहूशांतिः ।

सिनीवालीजननसूचितेत्यादिः कुहूजननसूचितारिष्टनाशेत्यादिश्च संकल्पः ॥ कुहूजनने गोप्रसवोपीति केचित् ॥ अत्रोभयत्रापि चतुर्दशीशांतिवच्छतच्छिद्रकलशसहिताः पंचकलशाः ॥ मध्ये रुद्रः प्रधानदेवता इंद्रः पितरश्च पार्श्वदेवते इति प्रतिमात्रयम् ॥ इंद्रस्य पितॄणां च प्रधानरुद्रन्यूनसंख्यया प्रधानोक्तसर्वद्रव्यैर्होमः ॥ अवशिष्टान्वाधानदेवतोहश्चतुर्दशीशांतिवत् ॥ प्रधानदेवतापूजोत्तरं गोवस्त्रस्वर्णदानानि कृत्वा ॥

## अथ दशदानानां नामानि ।

"गोभूतिलहिरण्याज्यवासोधान्यगुडानि च ॥ रौप्यं लवणमित्येतद्दश दानानि दापयेत् ॥ क्षीराज्यगुडदानं च कृत्वा होमं समारभेत्॥" एतानि दानानि ऋत्विग्भ्यो देयानि ॥ तेनांते पृथग्दक्षिणादानं न कार्यम् ॥ अतएवात्र गवादेर्दक्षिणारूपत्वात्सदक्षिणं दानं न भवति ॥ अन्यत्र दशदानादीनां सदक्षिणं दानं कार्यम् ॥

## अथैतेषां मानम् ।

भुवो मानं गोचर्म ॥ सप्तहस्तो दंडः त्रिंशद्दंडा वर्तनम् दशवर्तनानि गोचर्म ॥ तिलानां द्रोणः सुवर्णरजतयोर्दशमाषतदर्धतदर्धान्यतममाज्यस्य चत्वारिंशत्पलानि ॥ वाससस्त्रिहस्तत्वम् ॥ धान्यस्य पंच द्रोणाः ॥ एवं गुडलवणयोः ॥ एतावत्प्रमाणाशक्तौ नित्यनैमित्तिके यथाशक्ति देयानि ॥ यथाशक्ति हिरण्यं वा तत्तत्प्रतिनिधित्वेन हिरण्यगर्भेति मंत्रेण देयम् ॥ नैमित्तिकादेरकरणे प्रत्यवायात् ॥ अभ्युदयादिफलार्थं तु दश दानानि शक्तिं विना न कार्याणीति भाति ॥ होमांते बलिदानाभिषेकादि ॥ इति सिनीवालीकुहूशांतिः ॥

## अथ दर्शशांतिः ।

"अथातो दर्शजातानां मातापित्रोर्दरिद्रता ॥ तद्दोषपरिहारार्थं शांतिं वक्ष्यामि ते सदा॥" अस्य दर्शजननमूचितारिष्टनिरासार्थं शांतिं करिष्ये इति संकल्पः॥ स्थंडिलात्पूर्वदेशे कलशं प्रतिष्ठाप्य कलशाग्न्योर्मध्ये सर्वतोभद्रपीठे ब्रह्मादिमंडलदेवता आवाह्य तन्मध्ये स्वर्णप्रतिमायां ये चेहेति मंत्रेण पितॄनावाहयेत् ॥ तद्दक्षिणे रजतप्रतिमायामाप्यायस्वेति सोममुत्तरतस्ताम्रप्रतिमायां सविता पश्चात्तादिति सूर्यं चावाह्य संपूज्याग्निं प्रतिष्ठाप्य सर्वतोभद्रैशान्यां ग्रहस्थापनादि ॥ अन्वाधाने आदित्यादिग्रहान् अमुकसंख्याभिः समिच्चर्वाज्याहुतिभिः पितॄन् अष्टाविंशतिसंख्याकाभिः समिच्चरुभ्यां सोमं सूर्यं च प्रत्येकमष्टोत्तरशतसंख्यसमिच्चर्वाज्याहुतिभिः शेषेण स्विष्टकृतमित्यादि ॥ अत्र स्विष्टकृतः पूर्वं मातापितृशिशूनां कलशोदकेनाभिषेकस्ततः स्विष्टकृद्बलिदानादीति विशेषः ॥ इति दर्शशान्तिः ॥

## अथ नक्षत्राणां शांतिः मूलादिजननफलं च ।

तत्र मूलनक्षत्रफलम् ॥ "पिता म्रियेत मूलाद्ये पादे पुत्रजनिर्यदि ॥ द्वितीये जननीनाशो धननाशस्तृतीयके ॥ चतुर्थे कुलनाशोतः शांतिः कार्या प्रयत्नतः ॥ क्वचिच्चतुर्थचरणः शुभ उक्तो मनीषिभिः ॥ एवं च दुहितुर्ज्ञेयं मूलजातफलं बुधैः॥" केचित्तु ॥ " न कन्या हन्ति मूलर्क्षे पितरं मातरं तथा ॥ मूलजा श्वशुरं हन्ति श्वश्रूमाश्लेषजा सुता ॥ ज्येष्ठायां तु पतिज्येष्ठं विशाखोत्था तु देवरम् ॥ शांतिर्वा पुष्कला स्याच्चेत्तर्हि दोषो न विद्यते॥" इत्याहुः ॥ " अभुक्तमूलसम्भवं परित्यजेत्तु बालकम् ॥ समाष्टकं पिताथवा न तन्मुखं विलोकयेत् ॥ ज्येष्ठांते घटिका चैका मूलादौ घटिकाद्वयम् ॥ अभुक्तमूलमथवा सन्धिनाडीचतुष्टयम् ॥ वृषालिसिंहेषु घटे च मूलं दिवि स्थितं युग्मतुलांगनांत्ये ॥ पातालगं मेषधनुःकुलीरनक्रेषु मर्त्येष्विति संस्मरंति॥" एतल्लग्नफलम् ॥ "स्वर्गे मूले भवेद्राज्यं पाताले च धनागमः ॥ मृत्युलोके यदा मूलं तदा शून्यं समादिशेत् ॥ नवमासं सार्पदोषो मूलदोषोष्टवर्षकम् ॥ ज्येष्ठा मासान्पंचदश तावद्दर्शनवर्जनम् ॥ व्यतीपातेंगहानिः स्यात्परिघे मृत्युमादिशेत् ॥ वैधृतौ पितृहानिः स्यान्नष्टेंदावंधतां व्रजेत् ॥ मूले समूलनाशः स्यात्कुलनाशो धृतौ भवेत् ॥ विकृतांगश्च हीनश्च सन्ध्ययोरुभयोरपि ॥ तद्वत्सदंतजातस्तु पादजातस्तथैव च ॥ तस्माच्छान्तिं प्रकुर्वीत ग्रहाणां क्रूरचेतसाम् ॥" व्यतीपातादौ ग्रहमखसहिता तत्तच्छांतिरवश्यं कार्या ॥ इतरशांतिषु ग्रहमखो नावश्यकः ॥

## अथ शान्तिकालनिर्णयः ।

" मुख्यकालं प्रवक्ष्यामि शांतिहोमस्य यत्नतः ॥ जातस्य द्वादशाहे तु जन्मर्क्षे वा शुभे दिने ॥" जननाद्द्वादशाहे शांतिकरणे शांत्युक्तनक्षत्राद्धुतिवह्निचक्रावलोकनादिकं नावश्यकम् ॥ कालांतरे आवश्यकम् ॥ एवमन्यशान्तिष्वपि ज्ञेयम् ॥

## अथाग्न्याहुतिचक्रम् ।

तद्यथा॥"शुक्लादितस्तिथिः सैव वारयुक्ताब्धिशेषिता ॥ खे गुणे भुवि वासोग्नेद्वर्येकयोः स्यादधो दिवि ॥" भूमावग्निः शुभः ॥ "होमाद्धुतिः सूर्यभतस्त्रिभंत्रिभं गण्यं मुहुस्तत्र च चंद्रभावधि ॥ सूर्यज्ञशुक्रार्कजचंद्रभूमिजा जीवस्तमः केतुरसत्यसन्मुखे ॥" संस्कारनित्यकर्मसु निमित्ताव्यवहितनैमित्तिकेषु रोगातुरे च वह्निचक्रादिकं नापेक्षितम् ॥ "अग्नेः स्थापनवेलायां पूर्णाहुत्यामथापि वा ॥ आहुतिर्वह्निवासश्च विलोक्यौ शांतिकर्मणि ॥" उत्तरारोहिणीश्रवणधनिष्ठाशततारकापुनर्वसुस्वातीमघाश्विनीहस्तपुष्यानुराधारेवतीनक्षत्रेषु गुरुशुक्रास्तमलमासरहिते शुभ-

वारतिथ्यादौ शांतिः कार्या ॥ निमित्ताव्यवहितनैमित्तिके रोगशांतौ च अस्तादिविचारणा नास्ति ॥ इति प्रसंगात्सर्वशांत्युपयोगिशुभदिननिर्णयः ॥

## अथ मूलशांतिप्रयोगः ।

अभुक्तमूलोत्पत्तौ वर्षाष्टकं शिशुत्यागस्ततः शांतिः ॥ तदन्यमूलोत्पत्तौ द्वादशाहे अव्यवहितागामिमूलयुते शुभदिने वा अन्यत्र शुभदिने वा गोप्रसवशांतिं कृत्वास्य शिशोर्मूलप्रथमचरणोत्पत्तिसूचितारिष्टनिरासार्थं सग्रहमखशांतिं करिष्ये इति संकल्पयेत् ॥ द्वितीयादिपादोत्पत्तौ संकल्पे तयोहः ॥ ब्रह्मसदस्यौ कृताकृतौ ॥ ऋत्विजोष्टौ चत्वारो वा ॥ मध्यकलशे स्वर्णप्रतिमायां रुद्रावाहनादि ॥ तस्य चतुर्दिक्षु कुम्भचतुष्टयेऽक्षतपुंजेषु वरुणपूजा ॥ यद्वा मध्यकुम्भे प्रतिमायां रुद्रस्तदुत्तरकुम्भे वरुणः पूज्य इति ॥ कुम्भद्वयं रुद्रकुम्भोत्तरतः ॥ कुम्भे प्रतिमासु निर्ऋतिमिन्द्रमपश्चावाह्य पद्मस्य चतुर्विंशतिदलेषु उत्तराषाढाद्यनुराधांतचतुर्विंशति नक्षत्राणां विश्वेदेवादिचतुर्विंशतिदेवतास्तंदुलपुञ्जादिष्वावाह्य दिक्षु लोकपालांश्चावाह्य पूजयेत् ॥ अग्निग्रहस्थापनाद्यन्तेऽन्वाधानेऽर्कादिग्रहान् समिच्चर्वाज्याहुतिभिः निर्ऋतिं प्रतिद्रव्यमष्टोत्तरशतसंख्याभिर्घृतमिश्रपायससमिदाज्यचर्वाहुतिभिः ॥ यद्वा पायसेनाष्टोत्तरशतसंख्यया समिदाज्यचरुभिरष्टाविंशतिसंख्यया इन्द्रमपश्च प्रतिद्रव्यमष्टाविंशतिसंख्यया पायससमिदाज्यचर्वाहुतिभिर्विश्वेदेवादिचतुर्विंशतिदेवता अष्टाष्टपायसाहुतिभी रक्षोहणमग्निं कृणुष्वपाज इति पंचदशऋग्भिः प्रत्यृचमष्टाष्टसंख्यकृसराहुतिभिः १२० सवितारं दुर्गां त्र्यंबकं कवीन् दुर्गां वास्तोष्पतिमग्निं क्षेत्रपालं मित्रावरुणावाग्निं चाष्टाष्टकृसराहुतिभिः श्रियं हिरण्यवर्णामिति पंचदशऋग्भिः प्रत्यृचमष्टाष्टसमिदाज्यचर्वाहुतिभिः सोमं त्रयोदशपायसाहुतिभिः रुद्रं स्वराजं चतुर्गृहीताज्येनाग्निं वायुं सूर्यं प्रजापतिं चाज्येन शेषेण स्विष्टकृतमित्यादि ॥ कवीनित्यत्र ऋत्विक्स्तुतिमित्युद्देशो मयूखादौ ॥ शूर्पत्रये निर्वापः ॥ तत्र प्रथमशूर्पे पायसार्थं तूष्णीं द्वादशमुष्टीन्निर्ऋतिमिन्द्रमपश्चोद्दिश्य निरुप्य ॥ द्वितीये चर्वर्थं तदेव त्रयमुद्दिश्य द्वादशमुष्टीन् पुनः प्रथमे षण्णवति मुष्टीन्पायसार्थं तृतीये शूर्पे कृसरार्थं चतुश्चत्वारिंशन्मुष्टीन्द्वितीये पुनश्चतुरो मुष्टीन्प्रथमे पुनः सोमार्थं चतुर्मुष्टीन्निरुप्य ततः शूर्पत्रये आहुतिपर्याप्ततण्डुलान् गृहीत्वा निर्वापसंख्यया प्रोक्ष्य पात्रत्रये हविस्त्रयं श्रपयेत् ॥ तिलमिश्रतंदुलपाकेन कृसरो भवति ॥ ग्रहार्थं गृहसिद्धान्नं ग्राह्यम् ॥ सर्वग्रन्थेषु निर्ऋत्याद्यर्थं निर्वापादिक्रमेण श्रपणमेवोक्तम् ॥ अतो गृहसिद्धान्न एव तिलदुग्धमिश्रेण कृसरादिसंपादनं प्रमादालस्यादिकृतकर्मभ्रंश एव ॥ ततो होमकाले यजमानस्यागं कुर्यात् ॥ तत्र एतावत्संख्याहुतिपर्याप्तं सामिदाज्यचरुद्रव्यमादित्यादिनवग्रहेभ्यो न मम ॥ एवमधिदेवतादिभ्यः ॥ ततोऽष्टोत्तरशतसंख्याहुतिपर्याप्तं घृतमिश्रपायसमष्टोत्तरशताहुतीनामष्टाविंशत्याहुतीनां वा

पर्याप्तं समिदाज्यचर्वात्मकद्रव्यत्रयमिदं निर्ऋतये न मम ॥ अष्टाविंशत्याहुतिपर्याप्तं पायससमिच्चर्वाज्यमिन्द्राय न मम ॥ एवमद्रयः ॥ अष्टाष्टाहुतिपर्याप्तं पायसं विश्वेभ्यो देवेभ्यो १ विष्णवे २ वसुभ्यो ३ वरुणाय ४ अजैकपदे ५ अहये बुध्न्याय ६ पूष्णे ७ अश्विभ्यां ८ यमाय ९ अग्नये १० प्रजापतये ११ सोमाय १२ रुद्राय १३ अदित्यै १४ बृहस्पतये १५ सर्पेभ्यः १६ पितृभ्यः १७ भगाय १८ अर्यम्णे १९ सवित्रे २० त्वष्ट्रे २१ वायवे २२ इन्द्राग्निभ्यां २३ मित्राय २४ न मम॥ विंशत्यधिकशताहुतिपर्याप्तं कृसरं रक्षोघ्नेऽग्नये न मम ॥ अष्टाष्टाहुतिपर्याप्तं कृसरं सवित्रे दुर्गायै त्र्यम्बकाय कविभ्यो दुर्गायै वास्तोष्पतयेऽग्नये क्षेत्रपालाय मित्रावरुणाभ्यामग्नये च न मम ॥ प्रतिद्रव्यं विंशत्यधिकशताहुतिपर्याप्तानि समिच्चर्वाज्यानि श्रियै न मम ॥ त्रयोदशाहुतिपर्याप्तं पायसं सोमाय ॥ चतुर्गृहीताज्यं रुद्राय स्वराजे ॥ एकैकाहुतिपर्याप्तमाज्यमग्नये वायवे सूर्याय प्रजापतये च न मम ॥ एवं सविस्तरं तत्तद्द्रव्यसंख्यादैवतोच्चारेण त्यागः सर्वत्र ज्ञेयः ॥ केचित्तु इदमुपकल्पितमन्वाधानोक्तद्रव्यजातमन्वाधानोक्ताहुतिसंख्यापर्याप्तमन्वाधानोक्ताभ्यो यक्ष्यमाणाभ्यो देवताभ्यो न ममेति संक्षेपेण त्यागं कुर्वंति ॥ ततो ग्रहमंत्रैर्निर्ऋत्यादिमन्त्रैश्च यथायथं होमांते ग्रहपूजास्विष्टकृन्नवाहुतिबलिदानपूर्णाहुतिपूर्णपात्रविमोकादिवह्निपूजांते यजमानाद्यभिषेके कृते धृतशुक्लवस्त्रगन्धो यजमानो मानस्तोक इति विभूतिं धृत्वा मुख्यदेवतापूजनविसर्जनश्रेयोग्रहणदक्षिणादानानि कुर्यात् ॥ शतं तदर्धं दश वा ब्राह्मणान् भोजयेदिति संक्षेपः ॥

## अथाश्लेषाशान्तिः ।

तत्राश्लेषाफलम् ॥ आश्लेषायाः क्रमेण पंचसप्तद्वित्रिचतुरष्टैकादशषट्नवपंचेति दशधा विभक्तनाडीषु क्रमेण राज्यं पितृनाशो मातृनाशः कामभोगः पितृभक्तिर्बलं हिंसकत्वं त्यागो भोगो धनमिति फलानि ॥ अथ पादविभागेन फलम् ॥ तत्राद्यपादः शुभः ॥ द्वितीये पादे धनस्य नाशः ॥ तृतीये मातुश्चतुर्थे पितुः ॥ आश्लेषांत्यपादत्रयजाता कन्या श्वश्रूं हंति ॥ एवं वरोप्यंत्यपादत्रयजः श्वश्रूं हंति ॥ "आश्लेषासर्वपादेषु शांतिः कार्या प्रयत्नतः ॥ जातस्य द्वादशाहे तु शांतिकर्म समाचरेत् ॥ असंभवे तु जन्मर्क्षे ह्यन्यस्मिन्वा शुभे दिने ॥" अथोक्तकाले गोमुखप्रसवं कृत्वा अस्य शिशोराश्लेषाजननसूचितसर्वारिष्टपरिहारेत्यादि संकल्पं कृत्वा मूलशांतिवत्कुंभद्वये रुद्रवरुणौ द्वौ संपूज्य चतुर्विंशतिदलपद्मस्थकुंभे प्रतिमायामाश्लेषाधिपतीन् सर्पानावाह्य तदक्षिणे पुष्यदेवतां बृहस्पतिमुत्तरतो मघादेवतां पितॄंश्चावाह्य दलेषु पूर्वदलमारभ्य प्रादक्षिण्येन पूर्वाधिपतिभगादिपुनर्वसुदेवतादितिपर्यंतचतुर्विंशतिदेवतावाहनादि कुर्यात् ॥ कौस्तुभे तु तैत्तिरीयकमंत्रैः पुष्यमघापूर्वादिनक्षत्रा-

णामावाहनमुक्तं न तु नक्षत्रदेवतानाम् ॥ ततो लोकपालानावाह्यावाहितसर्वदेवताः संपूज्याग्निं ग्रहांश्च प्रतिष्ठाप्यान्वादध्यात् ॥ आदित्यादिग्रहाद्युद्देशांते प्रधानदेवताः सर्पान्प्रतिद्रव्यमष्टोत्तरशतसंख्यमष्टाविंशतिसंख्यं वा घृतमिश्रपायससमिदाज्यचर्वाहुतिभिः बृहस्पतिं पितॄंश्चाष्टाविंशतिसंख्यमष्टसंख्यं वा तैरेव द्रव्यैर्भगादिचतुर्विंशतिदेवता अष्टाष्टपायसाहुतिभिः रक्षोहणमित्यादिशेषदेवतानिर्देशो मूलशांतिवत् ॥ तद्वदेव पायसकृसरचरूणां श्रपणं हविस्त्यागश्च कार्यः ॥ कौस्तुभोक्तप्रधानदेवतामंत्रैस्तत्तद्धोमः शेषं मूलशांतिवत् ॥

## अथ ज्येष्ठानक्षत्रफलं शांतिश्च ।

"ज्येष्ठाया दशभागेषु आद्ये मातामहीमृतिः ॥ मातामहं द्वितीये च तृतीये हंति मातुलम् ॥ तुर्ये जातो मातरं च हंत्यात्मानं तु पंचमे ॥ गोत्रजान्षष्ठभागे च सप्तमे तूभयं कुलम् ॥ अष्टमे स्वाग्रजं हंति नवमे श्वशुरं तथा ॥ दशमांशकजातस्तु सर्वं हंति शिशुर्ध्रुवम् ॥ ज्येष्ठर्क्षे तु पुमाञ्जातो ज्येष्ठभ्रातुर्विनाशकः ॥ ज्येष्ठर्क्षे कन्यका जाता हंति शीघ्रं धवाग्रजम् ॥ पादत्रये जातनरो ज्येष्ठोप्यत्र प्रजायते ॥ ज्येष्ठांत्यपादजातस्तु पितुः स्वस्य च नाशकः ॥" द्वादशाहे शांत्युक्तशुभदिने वा गोप्रसवशांतिं कृत्वास्य शिशोर्ज्येष्ठर्क्षजननसूचितसर्वारिष्टपरिहारद्वारेत्यादि संकल्प्य मध्यकलशे सुवर्णप्रतिमायां शचीसहितमैरावतारूढमिंद्रं लोकपालांश्चावाह्य रक्तवस्त्रद्वयशष्कुलीनैवेद्यसहितषोडशोपचारैः पूजयेत् ॥ तस्य चतुर्दिक्षु कुंभचतुष्टयं तत्पूर्वं मध्यभागे शतच्छिद्रं च निधाय पूर्णपात्रयुतेषु चतुर्षु फलादौ वरुणावाहनपूजनादि अन्वाधाने ग्रहान्वाधानांते इंद्रं पलाशसमिदाज्यचरुद्रव्यैः प्रतिद्रव्यमष्टोत्तरशतसंख्यया इंद्रायेंदोमरुत्वत इति मंत्रेण प्रजापतिमष्टोत्तरशततिलाहुतिभिः समस्तव्याहृतिमंत्रेण शेषेण स्विष्टकृतमित्यादि ॥ अष्टोत्तरशतं ब्राह्मणान् भोजयेत् ॥ इति ज्येष्ठाशांतिसंक्षेपप्रयोगः ॥

## अथ चित्रादिनक्षत्रशांतयः ।

"चित्राद्यैर्धे पुष्यमध्यद्विपादे पूर्वाषाढाधिष्ण्यपादे तृतीये ॥ जातः पुत्रश्चोत्तराद्ये विधत्ते पित्रोर्भ्रातुः स्वस्य चापि प्रणाशम् ॥" उत्तराफाल्गुन्याद्यपाद इत्यर्थः॥ अत्रेत्थं भाति ॥ चित्रापूर्वार्द्धे जातस्य गोप्रसवं कृत्वा नक्षत्राधिपतिप्रतिमां संपूज्य अजादानं कार्यम् ॥ एवं पुष्यद्वितीयतृतीयपादयोर्जनने गोप्रसवनक्षत्राधिपपूजागोदानानि कार्याणि ॥ उत्तराफाल्गुनीप्रथमपादे जनने नक्षत्राधिपपूजां तिलपात्रदानं च कुर्यात् ॥ एवं पूर्वाषाढातृतीयपादे जनने नक्षत्रेशपूजा कांचनदानं च ॥ मघाप्रथमपादजनने मूलवत्फलम् ॥ तत्र गोप्रसवनक्षत्रेशपूजनग्रहमखाः कार्याः ॥ मघाया आद्यघटीद्वयजनने नक्षत्रगंडांतशांतिरपि ॥ रेवत्यंतघटीद्वयेश्विन्याद्य-

घटीद्वये जनने नक्षत्रगंडांतशांतिगोप्रसवग्रहमखाः कार्याः ॥ रेवत्यश्विन्योरितरभागेषु मघांतिमपादत्रये च दोषविशेषानुक्तेर्न शांत्यादिकम् ॥ एवं विशाखाचतुर्थपादजनने श्यालकदेवरनाशादिदुष्टफलोक्तेर्ग्रहमखः कार्यः यत्र काले दुष्टफलमात्रमुक्तं शांतिर्नोक्ता तत्र ग्रहमख इति कमलाकरोक्तेः ॥ एवमितरत्रापूह्यम् ॥ इति नक्षत्रशांतयः ॥

## अथ व्यतीपातवैधृतिसंक्रांतिशांतिः ।

" कुमारजन्मकाले तु व्यतीपातश्च वैधृतिः ॥ संक्रमश्च रवेस्तत्र जातो दारिद्र्यकारकः ॥ अश्रियं मृत्युमाप्नोति नात्र कार्या विचारणा ॥ स्त्रीणां च शोकं दुःखं च सर्वनाशकरो भवेत् ॥ गोमुखप्रसवं कुर्याच्छांतिं च सनवग्रहाम् ॥" उक्तकाले संकल्पादिकं कृत्वा पंचद्रोणपरिमितव्रीहिराशिं कृत्वा तदुपरि सार्धद्रोणद्वयमिततण्डुलराशिं तदुपरि सपादद्रोणपरिमिततिलराशिं च कृत्वा तिलराशौ विधिना स्थापितकुम्भे सौवर्णप्रतिमायां सूर्यमावाह्य तदक्षिणोत्तरयोरग्निरुद्रावावाह्य तिस्रो देवता व्यतीपातशांतौ संक्रांतिशांतौ च पूजयेत् ॥ व्यतीपातसंक्रांत्योर्जनने व्यतीपातसंक्रांतिशांती तन्त्रेण संकल्प्यैकैव शांतिः कार्या ॥ अत्र पूजाहोमादेः प्रसंगसिद्धिः ॥ द्विगुणो वा प्रधानहोम इति भाति ॥ ग्रहपीठदेवतान्वाधानांते सूर्यम् उत्सूर्यो बृहदिति मन्त्रेण समिदाज्यचर्वाहुतिभिः प्रतिद्रव्यमष्टोत्तरशतसंख्याभिः अग्निं रुद्रं च तैरेव द्रव्यैः प्रत्येकमष्टाविंशतिसंख्याहुतिभिः अग्निं दूतमिति त्र्यंबकमिति मन्त्राभ्यां मृत्युंजयमष्टोत्तरशततिलाहुतिभिः शेषेणेत्यादि अभिषेकांते गोवस्त्रस्वर्णादि दत्त्वा शतं ब्राह्मणान् भोजयेत् ॥ इति व्यतीपातसंक्रांतिशांतिः ॥

## अथ वैधृतिशांतौ विशेषः ।

पूर्ववत् व्रीहितण्डुलतिलराशौ स्थापितकुम्भे मध्ये त्र्यम्बकमिति मन्त्रेण रुद्रं दक्षिणतः उत्सूर्य इति सूर्यमुत्तरतश्चाप्यायस्वेति सोममावाह्य पूजयेत् ॥ अन्वाधाने रुद्रं समिच्चर्वाज्यैः प्रतिद्रव्यमष्टोत्तरशतसंख्याहुतिभिः सूर्यसोमौ प्रत्येकमष्टाविंशतिसंख्यैस्तैरेव द्रव्यैर्मृत्युंजयमष्टोत्तरसहस्रशतान्यतरसंख्यतिलाहुतिभिः शेषेणेत्यादि ॥ अन्यत्पूर्ववत् ॥ संक्रांतिदिने वैधृतिसत्त्वे देवताभेदाच्छांतिद्वयं पृथक्कार्यम् ॥ इति वैधृतिशांतिः ॥

## अथैकनक्षत्रजननशांतिः ।

"एकस्मिन्नेव नक्षत्रे भ्रात्रोर्वा पितृपुत्रयोः ॥ प्रसूतिश्चेत्तयोर्मृत्युर्भवेदेकस्य निश्चितः ॥" पितृनक्षत्रे मातृनक्षत्रे वा कन्यायाः पुत्रस्य वोत्पत्तौ गोमुखप्रसवं कृत्वा शांतिः कार्या ॥ सोदरभ्रातृभगिन्योर्नक्षत्रे भ्रातुर्भगिन्या वोत्पत्तौ गोप्रसवमकृत्वैव शांतिमात्रं कार्यम् ॥ संकल्पे पित्रैकनक्षत्रोत्पत्तिसूचितसर्वारिष्टेत्याद्यूहः ॥

कलशे रक्तवस्त्रे यस्मिन्नक्षत्रे जन्म तन्नक्षत्रप्रतिमां तन्नक्षत्रदेवताप्रतिमां वा अग्निर्नः पातु कृत्तिका इत्यादि तैत्तिरीयमंत्रैः पूजयेत् ॥ अन्वाधाने इदं नक्षत्रममुकां नक्षत्रदेवतां वा समिच्चर्वाज्यैः प्रतिद्रव्यमष्टोत्तरशतसंख्यं शेषेणेत्यादि ॥ अंते ययोरेकनक्षत्रे जन्म तयोरभिषेकः ॥ अत्र ग्रहमखो नावश्यकः ॥ क्वचित्संपूजितहरिहरप्रतिमादानमप्युक्तम् ॥

## अथ ग्रहणशांतिः ।

"ग्रहणे चंद्रसूर्यस्य प्रसूतिर्यदि जायते ॥ इत्थं संजायते यस्तु तस्य मृत्युर्न संशयः ॥ व्याधिः पीडा च दारिद्र्यं शोकश्च कलहो भवेत्॥" अत्र गोमुखप्रसवः कार्य इति भाति ॥ ग्रहमखः कृताकृतः ॥ संकल्पे सूर्यग्रहणकालिकप्रसूतिसूचितेत्याद्यूहः ॥ ग्रहणकालिकनक्षत्रस्य नक्षत्रदेवताया वा हेमप्रतिमां सूर्यग्रहे सूर्यस्य हेमप्रतिमां चंद्रग्रहे राजतं चंद्रबिंबं कृत्वोभयत्र सीसेन राहोर्नागाकृतिं कृत्वा गोमयोपलिप्ते शुचिदेशे श्वेतवस्त्रोपरि देवतात्रयपूजनम् ॥ नात्र कलशस्थापनादि ॥ तत्र मध्ये आकृष्णेनेति सूर्यं दक्षिणतः स्वर्भानोरध इति राहुमुत्तरतो नक्षत्रदेवतां च पूजयेत्॥ चन्द्रग्रहे तु आप्यायस्वेति मध्ये चन्द्रः पूज्यः ॥ पार्श्वयो राहुनक्षत्रदेवते पूर्ववत् ॥ अन्वाधाने सूर्यग्रहे सूर्यमर्कसमिदाज्यचरुतिलैः प्रत्येकमष्टोत्तरशतसंख्यया राहुं दूर्वाज्यचरुतिलैस्तावत्संख्यैर्नक्षत्रदेवतां जलवृक्षसमिदाज्यचरुतिलैस्तावत्संख्यया शेषेणेत्यादि ॥ चंद्रग्रहे च चन्द्रं पालाशसमिदाज्यचरुतिलैः शेषं पूर्ववत् ॥ अन्ते ग्रहकलशोदकेन पंचगव्यपंचत्वक्पंचपल्लवादियुतलौकिकोदकेन च लौकिकेनैव वाभिषेकः ॥ वेधकाले जन्मनि नैव शांतिः ॥ किन्तु दुष्टकालत्वाद्युद्धाभिषेकः कार्य इति भाति ॥

## अथ नक्षत्रगण्डान्तशांतिः ।

रेवत्याश्लेषाज्येष्ठानक्षत्राणामंत्यघटीद्वयमश्विनीमघामूलानामाद्यघटीद्वयमिति घटिकाचतुष्टयमितं त्रिविधं नक्षत्रगण्डान्तम् ॥ "अश्विनीमघामूलानां पूर्वार्धे बाध्यते पिता ॥ पूषाहिशक्रपश्चार्धे जननी बाध्यते शिशोः ॥ सर्वेषां गण्डजातानां परित्यागो विधीयते ॥ वर्जयेद्दर्शनं यावत्तस्य षाण्मासिकं भवेत् ॥ शांतिं वा पुष्कलां कुर्यात्सोममंत्रेण भक्तिमान् ॥" अस्य शिशो रेवत्यश्विनीसंध्यात्मकगण्डान्तजननसूचितारिष्टनिरासार्थं नक्षत्रगण्डान्तशांतिं करिष्ये इत्यादिसंकल्पः ॥ गोमुखप्रसवं कृत्वा षोडशपलमष्टपलं वा चतुष्पलं वा कांस्यपात्रं विधाय तस्मिन्पायसं पयो वा निक्षिप्य तत्र नवनीतपूर्णं शंखं निधाय तस्मिन् राजतं चन्द्रबिंबं संस्थाप्य सोमोहमिति ध्यानपूर्वकं चन्द्रमाप्यायस्वेति पूजयेत् ॥ पूजांते आप्यायस्वेति मन्त्रस्य सहस्रं जपः ॥ ग्रहमखहोमः कार्यः ॥ नात्र प्रधानदेवताहोमः ॥ ग्रन्थान्तरे तु ता-

एकलशे राजतप्रतिमायां बृहस्पतिमंत्रेण वागीश्वरं संपूज्य तदुत्तरं कुंभचतुष्टये पंचपल्लवादिकं कुंकुमचन्दनकुष्ठगोरोचनानि क्षिप्त्वा वरुणं पूजयेदित्युक्तम् ॥ आचार्याय सशंखसमौक्तिकचंद्रदानम् ॥ ग्रन्थांतरपक्षे ताम्रपात्रसहितवागीश्वरदानम् ॥ आयुर्वृद्ध्यर्थं सहस्राक्षेणेति मन्त्रजपः ॥ दशावरब्राह्मणभोजनं चेति ॥

## अथ तिथिगण्डान्तलग्नगण्डान्तशांतिः ।

पंचमीषष्ठ्योर्दशम्येकादश्योः पंचदशीप्रतिपदोः संधिभूतं घटिकाद्वयं तिथिगण्डान्तम् ॥ कर्कसिंहयोर्वृश्चिकधनुषोर्मीनमेषयोश्च लग्नयोः सन्धिभूतैका घटिका लग्नगण्डान्तम् ॥ तत्र तिथिगण्डांते पूर्वार्धे जन्मनि तत्काले स्नात्वा वृषभदानं वा तन्मूल्यदानं कृत्वा सूतकांते शांतिः कार्या उत्तरार्धे जन्मनि शांतिमात्रम् ॥ लग्नगण्डान्ते पूर्वार्धे जन्मनि कांचनदानमुत्तरार्धे शांतिमात्रम् ॥ कुंभे हेमप्रतिमायां वरुणं संपूज्य वरुणोद्देशेन प्रतिद्रव्यमष्टोत्तरशतसंख्यया समिच्चर्वाज्यतिलयवानां होमः कार्यः ॥ यवव्रीहिमाषतिलमुद्गानां दक्षिणात्वेन दानमिति ॥

## अथ दिनक्षयभद्रादिशांतिः ।

"दिनक्षये च भद्रायां प्रसूतिर्यदि जायते ॥ यमघण्टे दग्धयोगे मृत्युयोगे च दारुणे ॥ दुष्टयोगतिथीनां च निषिद्धांशेषु चेत्तदा ॥ अतिदोषकरी प्रोक्ता तस्मिन्पापयुते सति ॥ " यमघण्टादयो ज्योतिर्ग्रंथे प्रसिद्धाः ॥ दुर्योगतिथीनां निषिद्धभागास्तु ॥ "विष्कंभवज्रयोस्तिस्रः षट् च गण्डातिगण्डयोः ॥ परिघार्धं पंच शूले व्याघातेऽकघटीस्त्यजेत् ॥ चतुःषडष्टनिर्ध्यर्कभूततिथ्याद्यनाडिकाः ॥ अष्टां ८ क ९ मनु १४ तत्त्वा २५ शा १० बाण ५ संख्या विवर्जयेत् ॥" इत्युक्ता ज्ञेयाः ॥ दिनक्षयादिदोषेष्वेकैकदोषदूषितकाले जनने शिवे रुद्रैकादशिन्यभिषेकः कार्यः ॥ द्वित्रादिदोषसमुच्चये ग्रहयज्ञाश्वत्थप्रदक्षिणादिसमुच्चयः ॥ "दीपं शिवालये भक्त्या घृतेन परिदापयेत् ॥ गाणपत्यं पौरुषसूक्तं सौरं मृत्युंजयं शुभम् ॥ शांतिजाप्यं रुद्रजाप्यं कृत्वा मृत्युंजयी भवेत् ॥" इति वाक्याद्बहुदोषे उक्तजपादिसमुच्चयोपि ॥

## अथ विषघटीशांतिः ।

तत्र कौस्तुभे तिथिवारनक्षत्राणां विषनाड्य उक्तास्तथापि ज्योतिर्ग्रंथेषु नक्षत्रविषघटीनामेव महादोषत्वेनोक्तेर्नक्षत्रविषघटीष्वेव जनने उक्तशांतिः कार्या ॥ तिथ्यादिविषघटीनामुपदोषत्वाद्बुद्राभिषेकादिकं कार्यम् ॥ विषघटीलक्षणं कौस्तुभादौ ज्ञेयम् ॥ "विषनाडीषु संजातः पितृमातृधनात्मनाम् ॥ नाशकृद्विषशस्त्राख्यैः क्रूरे लग्नेशकेपि च ॥ " एतद्विषनाडीषु शिशुजननसूचितारिष्टेत्यादिसंकल्पः ॥ एककुम्भे प्रतिमाचतुष्टये रुद्रयमाग्निमृत्युदेवताः कद्रुद्राय यमाय सोममग्निर्मूर्धा परं मृत्योरिति मन्त्रैः संपूजयेत् ॥ ग्रहान्वाधानांते रुद्रयमाग्निमृत्यून्समिच्चरुघृतति-

लाहुतिभिः प्रतिदैवतं प्रतिद्रव्यमष्टोत्तरशतसंख्याभिः शेषेणेत्यादि ॥ गृह्यसिद्धान्नस्य होमः ॥

## अथ यमलजननादिशांतिः ।

तत्र श्रौताग्निमतः सोम्ये मरुत्वते त्रयोदशकपालं पुरोडाशं निर्वपेदिति ऋग्वेदब्राह्मणोक्तेष्टिः ॥ यद्वा आश्वलायनसूत्रोक्तः केवलमारुतयागः ॥ गृह्याग्निमत आश्वलायनस्य गृह्याग्नौ मारुतश्चरुः "अथ यस्य वधूर्गौर्वा जनयेच्चेद्यमौ ततः ॥ स मरुद्भिश्चरुं कुर्यात्पूर्णाहुतिमथापि वा ॥" इति कारिकोक्तेः ॥ गृह्याग्निशून्यबह्वृचः कात्यायनोक्तशांतिं लौकिकाग्नौ कुर्यात् ॥ मम भार्यायां यमलजननसूचितसर्वारिष्टपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं मारुतेष्ट्या यक्ष्य इति संकल्पः श्रौताग्निमतः ॥ स्मार्ताग्निमतस्तु मारुतस्थालीपाकेन यक्ष्य इति संकल्पः ॥ निरग्निस्तु सग्रहमखां कात्यायनोक्तां शांतिं करिष्ये इति संकल्प्य स्वस्तिवाचनादि आचार्यवरणांतं कुर्यात् ॥ अष्टदिक्षु अष्टकलशान् विधिना संस्थाप्य उदकपूरणादिसर्वौषधीप्रक्षेपणांते वरुणं पूजयेत् ॥ अष्टकलशोदकैर्दंपत्योरभिषेकः ॥ आपोहिष्ठेति तिसृभिः कयान इति द्वे आनः स्तुत इति पंचेति सप्तभिरिंद्रोभिर्मोषुवरुण इति पंचभिरिदमाप इत्येकया अपन इत्यष्टभिराग्नेयीभिर्ऋग्भिः कार्यः ॥ अभिषिक्तौ दंपती धृतश्वेतवस्त्रचंदनौ उदङ्मुखौ तिष्ठेताम् ॥ प्राङ्मुख आचार्योऽग्निग्रहस्थापनांते अपस्तिसृभिराज्याहुतिभिरिंद्रं सप्तभिर्वरुणं पंचभिरप एकयाग्निमष्टाभिराज्याहुतिभिः पूर्वत्राभिषेकार्थमुक्तैश्चतुर्विंशतिमंत्रैरग्निं सोमं पवमानं पावकं मारुतं मरुतः यममंतकं मृत्युं चैकैकया चर्वाहुत्या नाममंत्रैः शेषेणेत्यादि अन्वाधध्यात् ॥ षट्त्रिंशद्वारं तूष्णीं निर्वापप्रोक्षणे ॥ अंते ग्रहकलशोदकादिनाभिषेकः ॥ दासीमहिषीवडवागोहस्तिनीनां यमलजननेपीयं शांतिः कार्या ॥ इयं शांतिर्ग्रहोत्पातेषूलूककपोतगृध्रश्येनानां गृहप्रवेशे स्तंभप्ररोहे वल्मीकप्ररोहे मधुजनने आसनशयनयानभंगे पल्लीपतने सरटारोहणे छत्रध्वजविनाशेषु अन्येषूत्पातेषु च कार्येति च कात्यायनमतम् ॥ सा च साग्निकैः कात्यायनैः स्वगृह्याग्नौ कार्या ॥ निरग्निकैस्तैरन्यैश्च लौकिकाग्नौ ॥ इति यमलजननादिशांतिः ॥

## अथ त्रिकप्रसवशान्तिः ।

"सुतत्रये सुता चेत्स्यात्तत्रये वा सुतो यदि ॥ मातापित्रोः कुलस्यापि तदानिष्टं महद्भवेत् ॥ ज्येष्ठनाशो वित्तहानिर्दुःखं वा सुमहद्भवेत् ॥" गोप्रसवं कृत्वा मम सुतत्रयजन्मानंतरं कन्याजननसूचितसर्वारिष्टेति वा कन्यात्रयजन्मानंतरं पुत्रजननसूचितेति वा निमित्तानुसारेण संकल्पः ॥ स्थंडिलपूर्वभागे ग्रहस्थापनांते तदुत्तरतः कलशपंचके स्वर्णप्रतिमासु ब्रह्मविष्णुमहेशेंद्ररुद्रानावाह्य पूजयेत् ॥ तत्र

मंत्राः ॥ ब्रह्मजज्ञानं० इदंविष्णु० त्र्यंबकं० यतइंद्र० कद्रुद्रायेति ग्रहपीठदेवतान्वाधानांते ब्रह्माणं विष्णुं महेशमिंद्रं रुद्रं च प्रत्येकं समिदाज्यचरुतिलैः प्रतिद्रव्यमष्टोत्तरसहस्राष्टोत्तरत्रिंशताष्टोत्तरशतान्यतमसंख्याहुतिभिः शेषेणेत्यादि ॥

## अथ दंतजननशांतिः ।

"उपरि प्रथमं यस्य जायंतेऽथ शिशोर्द्विजाः ॥ दंतैर्वा सह यस्य स्याज्जन्म भार्गवसत्तम ॥ द्वितीये च तृतीये च चतुर्थे पंचमे तथा ॥ यदा दंताश्च जायंते मासे चैव महद्भयम् ॥ मातरं पितरं वाथ खादेदात्मानमेव च ॥ बालानामष्टमे मासि षष्ठे मासि ततः पुनः ॥ दंता यस्य च जायंते माता वा म्रियते पिता ॥ बालकः पीड्यते वात्र स्वयमेव न संशयः ॥" केचित्तु अष्टमे मासि दंतजन्म शुभमाहुः ॥ तत्रास्य शिशोः प्रथममूर्ध्वदंतजननसूचितसर्वारिष्टेत्यादि सदंतजननसूचितेत्यादि वा द्वितीये मासे दंतजन्मसूचितेत्यादि वा संकल्पं यथानिमित्तं योजयेत् ॥ स्थंडिलोत्तरभागे नौकायां स्वर्णपीठे वा स्वस्तिकयुते बालमुपवेश्य सर्वौषध्यादियुक्तजलैः स्नापयित्वा स्थंडिलपूर्वतः कलशे प्रतिमासु धातारं वह्निं सोमं वायुं पर्वतान्केशवं चेति षड् देवताः संपूज्य ग्रहान्वाधानांते धातारं सकृच्चरुणा वह्न्यादिपंचदेवता एकैकयाज्याहुत्या शेषेणेत्यादि अन्वादध्यात् ॥ धात्रे त्वा जुष्टं निर्वपामीत्यादि निर्वापप्रोक्षणे ॥ नाम्ना चरुहोमः॥ स्रुवेण वह्न्यादिभ्यः पंचाज्याहुतयोपि नाम्नैव ॥ होमांते दक्षिणां दत्त्वा सप्ताहं यथाशक्ति ब्राह्मणान् भोजयेत् ॥ अष्टमदिने कांचनादि दत्त्वा कर्मेश्वरार्पणं कुर्यात् ॥ षष्ठाष्टममासयोर्दंतजनने तु एकस्या बृहस्पतिदेवतायाः पूजनं दधिमधुघृताक्तानामश्वत्थसमिधामष्टोत्तरशतं बृहस्पतिमंत्रेण होमः ॥ आज्येन स्विष्टकृदादि ॥ ॥ इति दन्तजननशांतिः ॥

## अथ प्रसववैकृतशांतिः ।

"यत्र गर्भे विपर्यासो मानुषाणां गवामपि ॥ अद्भुतानि प्रसूयंते तत्र देशस्य विप्लवः ॥ मानुषामानुषाणां च गोजाश्वमृगपक्षिणाम् ॥ जायंते जातिभेदाश्च सदन्ता विकृतास्तथा ॥ बहुशीर्षा अशीर्षा वा बहुकर्णा अकर्णकाः ॥ एकशृंगा द्वित्रिशृंगास्तथैव त्रिचतुर्भुजाः ॥ दीर्घकर्णा महाकर्णा गजकर्णाश्च मानवाः ॥ राजश्रेष्ठकुले नाशो धनस्य च कुलस्य च ॥ अष्टोत्तरसहस्राणि चरुं वै जुहुयाद्घृतम् ॥ समिधां तु पलाशानां तर्पयेत्पूर्ववद्विजान् ॥ अशिरा जायते जन्तुस्तथा द्वित्रिशिरास्तथा ॥ अत्र सूर्याद्भुते सूर्यं पूजयेज्जुहुयादपि ॥ दध्याज्यमधुसंयुक्ताः समिधस्त्वर्कसम्भवाः ॥ मृगी जनयते सर्पान्नण्डूकांश्चैव मानुषान् ॥ अत्राद्भुते गीष्पतये पूजां होमं च कारयेत् ॥ औदुम्बरस्य समिधो दधिसर्पिःसमन्विताः ॥ स्त्रीगर्भपातो यमलं प्रसूयंतेथवा स्त्रियः ॥ सदंताश्चैव जायन्ते जातमात्रा हसंति

च ॥ बुधाद्भुते बुधायात्र पूजाहोमौ समाचरेत् ॥ संक्षेपेण यथाप्रज्ञमित्थं जननशान्तयः ॥ उक्ता जपाभिषेकार्थसूक्तादिबहुविस्तृताः ॥ प्रयोगाः कौस्तुभादौ च प्रसिद्धा बहुशः पराः ॥ अनेन प्रीयतां देवो भगवान् विष्टलः प्रभुः ॥"

## अथ नामकरणकालः ।

तत्र जन्मदिने जातकर्मानंतरं तत्काले क्वचित् ॥ एकादशाहे द्वादशाहे वा विप्रस्य नामकर्म ॥ दशमदिने आशौचसत्त्वेपि वचनान्नामकर्म कार्यमिति केचित् ॥ क्षत्रियाणां त्रयोदशे षोडशे वा दिने ॥ वैश्यानां षोडशे विंशतितमे वा दिने ॥ द्वाविंशे मासांते वा शूद्राणाम् ॥ द्वाविंशे मासांते शततमे दिने वत्सरांते वेति विप्रादीनां गौणकालः ॥ मुख्यकाले कुर्वन् विप्रादिः पुण्यतिथिनक्षत्रचंद्रानुकूल्यादिगुणादरं न कुर्यात् ॥ उक्तमुख्यकालातिक्रमे शुभनक्षत्रादिकमावश्यकम् ॥ वैधृतिव्यतीपातसंक्रांतिग्रहणदिनामावास्याभद्रासु प्राप्तकालेपि नामकर्मादि शुभकर्म न कार्यम् ॥ अत्र मलमासगुरुशुक्रास्तादिदोषो नास्तीत्युक्तम् ॥ अपराह्णे रात्रौ च नामकर्म वर्ज्यम् ॥ अथोक्तकालातिक्रमेऽपेक्षितशुभतिथ्यादि ॥ चतुर्थीषष्ठ्यष्टमीनवमीद्वादशीचतुर्दशीपंचदशीरहितास्तिथयः प्रशस्ताः ॥ चंद्रबुधगुरुशुक्रा वासराः ॥ अश्विनीत्र्युत्तरारोहिणीमृगपुनर्वसुपुष्यहस्तस्वात्यनुराधाश्रवणधनिष्ठाशततारकारेवतीनक्षत्राणि ॥ वृषभसिंहवृश्चिकलग्नानि प्रशस्तानि ॥

## अथ देवतादिनामानि ।

तानि नामानि चतुर्विधानि ॥ देवतानाम मासनाम नाक्षत्रनाम व्यावहारिकनामेति ॥ तत्रामुकदेवताभक्त इत्याकारकं देवतानाम प्रथमम् ॥ "चैत्रादिमासनामानि वैकुंठोऽथ जनार्दनः ॥ उपेंद्रो यज्ञपुरुषो वासुदेवस्तथा हरिः ॥ योगीशः पुंडरीकाक्षः कृष्णोऽनंतोऽच्युतस्तथा ॥ चक्रीति द्वादशैतानि क्रमादाहुर्मनीषिणः ॥" इत्यनुसारेण मासनाम द्वितीयकम् ॥ मासाश्चात्र चांद्राः ॥ ते च शुक्लादिकृष्णांता एव यस्मिन्नक्षत्रे जन्म तन्नक्षत्रवाचकशब्दात्तत्र जात इत्यधिकारे विहितताद्धितप्रत्ययं कृते निष्पन्नं नाक्षत्रनाम तृतीयम् ॥ तद्यथा ॥ आश्वयुक् भरणः कार्तिकः रौहिणः मार्गशीर्षः आर्द्रकः पुनर्वसुः तिष्यः आश्लेषः मघः पूर्वाफल्गुनः उत्तराफल्गुनः हस्तः चैत्रः स्वातिः वैशाखः आनुराधः ज्यैष्ठः मूलकः पूर्वाषाढः उत्तराषाढः अभिजितः श्रावणः श्रविष्ठः शतभिषक् पूर्वाप्रौष्ठपादः उत्तराप्रौष्ठपादः रैवत इति ॥ केचित्तु चूचेचोलाश्विनी प्रोक्तेत्यादिज्योतिर्ग्रंथोक्तावककहडाचक्रानुसारेणाश्विन्यादयश्चतुर्षु चरणेषु चूडामणिश्चेदीशश्चोलेशो लक्ष्मण इत्यादिकानि नाक्षत्रनामानि कुर्वंति तन्न श्रौतग्रंथादिबहुसंमतम् ॥ सांख्यायनास्तु कृत्तिकोत्पन्नस्याग्निरर्कमिति नक्षत्रदेवतासंबद्धं नाक्षत्रं नाम कुर्वंति ॥ एवं का-

तीया अपि ॥ नाक्षत्रनामैवाभिवादनीयं गुप्तं चामौंजीबंधनात् मातापितरावेव जानीयाताम् ॥ व्यावहारिकं नाम चतुर्थम् ॥ तच्च कवर्गादिषु तृतीयचतुर्थपंचमवर्णहकारान्यतमवर्णाद्यावयवकम् ॥ यरलवान्यतममध्यवर्णयुतम् ऋलवर्णरहितं विसर्गांतं पित्रादिपुरुषत्रयान्यतमवाचकं शत्रुवाचकभिन्नं तद्धितप्रत्ययरहितं कृत्प्रत्ययांतं युग्माक्षरं पुंसामयुग्माक्षरं स्त्रीणां कार्यम् ॥ यथा देव इति हरिरिति ॥ उक्तसर्वलक्षणाभावे समाक्षरं पुंसामयुग्माक्षरं स्त्रीणामित्येकलक्षणयुतमेव यथा रुद्र इति राजेत्यादि ॥ अक्षरमत्र स्वरः ॥ व्यंजनेषु न संख्यानियमः ॥ अत्र विशेषः ॥ "द्व्यक्षरं प्रतिष्ठाकामश्चतुरक्षरं ब्रह्मवर्चसकामः ॥ अंत्यलकारेफं वर्जयेत्" इति ॥ आपस्तंबहिरण्यकेशिसूत्रे तु प्रातिपदिकादिधात्वंतं यथा हिरण्यदा इति उपसर्गयुतं वा सुश्रीरित्यादीति विशेष उक्तः ॥ तच्च व्यावहारिकं नाम शर्मपदांतं देवपदांतं वा ब्राह्मणस्य वर्मेति राजेति वा पदयुतं क्षत्रियस्य गुप्तदत्तान्यतरांतं वैश्यस्य दासांतं शूद्रस्य कार्यम् ॥

## अथ प्रासादगजाश्वादीनां नामविचारः ।

व्यावहारिकं नाम प्रासादादीनामपि कार्यम् ॥ "देवालयगजाश्वानां वृक्षाणां वापिकूपयोः ॥ सर्वापणानां पण्यानां चित्राणां योषितां नृणाम् ॥ काव्यादीनां कवीनां च पश्वादीनां विशेषतः ॥ राजप्रासादयज्ञानां नामकर्म यथोदितम् ॥" इत्युक्तेः ॥

## अथ प्रयोगे विशेषः ।

गर्भाधानादिसंस्कारलोपे प्रत्येकं पादकृच्छ्रं बुद्धिपूर्वकमकरणे प्रत्येकमर्धकृच्छ्रं प्रायश्चित्तं जातकर्मणः कालातिपत्तिनिमित्तकाज्यहोमपूर्वकं कार्यम् ॥ तद्यथा ॥ जातकर्मणः कालातिपत्तिनिमित्तकदोषपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं प्रायश्चित्तहोमं करिष्ये इति संकल्प्याग्निस्थापनेध्माधानादिपाकयज्ञतंत्रसहितं वह्निस्थापनाज्यसंस्कारपात्रसंस्कारमात्रसहितं वा भूर्भुवः स्वः स्वाहेति समस्तव्याहृत्याज्यहोमं कुर्यात् ॥ होमं समाप्य गर्भाधानपुंसवनानवलोभनसीमंतोन्नयनलोपजनितदोषपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थमेतावतः पादकृच्छ्रान्बुद्धिपूर्वकलोपेर्धकृच्छ्रान् तत्प्रत्यान्नायगोनिष्क्रयीभूतयथाशक्तिरजतद्रव्यदानेनाहमाचरिष्य इति संकल्प्य द्रव्यं दद्यात् ॥ जातकर्मनाम्नोः सह विकीर्षायां पूर्वोक्तजातकर्मसंकल्पवाक्यमुच्चार्य अस्य कुमारस्यायुरभिवृद्धिव्यवहारसिद्धिबीजगर्भसमुद्भवैनोनिबर्हणद्वारा श्रीपरमेश्वरप्रीत्यर्थं नामकर्म च तंत्रेण करिष्य इति संकल्प्य स्वस्तिवाचनादिकं कुर्यात् ॥ तत्र जातकर्मनामकर्मणोः पुण्याहं भवंतो ब्रुवंत्वित्युक्ता अस्य कुमारस्य जातकर्मणे एतन्नाम्ने अस्मै च स्वस्ति भवंतो ब्रुवंत्विति स्वस्तिपर्याये वदे-

त ॥ तदनुसारेणैव विप्रप्रतिवचनम् ॥ केवलनामचिकीर्षायां नामकर्मणः पुण्याह-मित्युक्त्वा स्वस्तिपर्याये अमुकनाम्ने अस्मै स्वस्ति भवंतो ब्रुवंत्विति वदेत् ॥ विप्राश्चामुकनाम्ने अस्मै स्वस्तीति प्रतिब्रूयुः ॥ लेखनादौ नामत्रयं शर्मादिपदरहितं कृत्वा व्यावहारिकं नाम शर्माद्यंतं कुर्यात् ॥ अभिवादने नाक्षत्रनामापि शर्माद्यंतं सर्वत्रोच्चारणीयम् ॥ अवशिष्टः प्रयोगः प्रयोगग्रंथेषु ज्ञेयः ॥

## अथ स्त्रीणां नामकर्म ।

संकल्पे अस्याः कुमार्या इति विशेषः ॥ स्वस्तिवाचने एतन्नाम्न्यै अस्यै स्वस्तीत्यादिभक्त्येत्यावंतं देवतानाम ॥ मासनामसु चक्रिणी वैकुंठी वासुदेवीति त्रीणि ङीबंतानि हरिरित्यविकृतम् अवशिष्टानि अष्टावाबंतानि रोहिणीकृत्तिकेत्येवं यथायथं नाक्षत्रनाम्नेति मातृदत्तमते ॥ आश्वलायनैर्नाक्षत्रनाम स्त्रीणां न कार्यम् ॥ व्यावहारिकं यज्ञदा शर्मदेति पुंवत् ॥ पूजादिकं वैदिकमंत्ररहितं पुंवत्कार्यम् ॥ पितुरसन्निधौ स्त्रीपुंसयोर्नाम पितामहादिः कुर्यात् ॥ इति नामकरणम् ॥

## अथांदोलारोहणम् ।

"आंदोलाशयने पुंसो द्वादशो दिवसः शुभः ॥ त्रयोदशस्तु कन्याया न नक्षत्रविचारणा ॥ अन्यस्मिन्दिवसे चेत्स्याच्छुभकालं विचारयेत् ॥" उत्तरात्रयरोहिणीहस्ताश्विनीपुष्येरेवत्यनुराधामृगचित्रापुनर्वसुश्रवणस्वातीनक्षत्रेषु शुभवारे रिक्तातिरिक्ततिथौ चंद्रताराबले कुलयोषिद्भिरांदोलाशयनं कार्यम् ॥

## अथ दुग्धपानम् ।

एकत्रिंशे दिने द्वितीयजन्मर्क्षे वा दोलारोहोक्तनक्षत्रैर्वा पूर्वाह्णमध्याह्नयोः कुलदेवताविप्रयोः पूजां विधाय शंखेन गोदुग्धं पाययेत् ॥ इति दुग्धपानम् ॥

## अथ जलपूजनम् ।

सूत्या मासोत्तरं बुधसोमगुरुवारेषु रिक्तान्यतिथौ श्रवणपुष्यपुनर्वसुमृगहस्तमूलानुराधानक्षत्रेषु जलस्थानं गत्वा जलपूजा कार्या ॥ अत्र गुरुशुक्रास्तचैत्रपौषमासाधिमासा वर्ज्याः ॥ इति जलपूजनम् ॥

## अथ सूर्यावलोकननिष्क्रमणे ।

तृतीये मासि सूर्यावलोकनं चतुर्थे मासि अन्नप्राशनकाले वा निष्क्रमणम् ॥ तत्र कालः ॥ "शुक्लपक्षः शुभः प्रोक्तः कृष्णश्चांत्यत्रिकं विना ॥ रिक्ता षष्ठचष्टमी दर्शो द्वादशी च विवर्जिता ॥" गुरुशुक्रबुधवारा अश्विनीरोहिणीमृगपुष्योत्तरात्रयहस्तधनिष्ठाश्रवणरेवतीपुनर्वस्वनुराधानक्षत्राणि च शस्तानि ॥ इदं निष्क्रमणं नित्यं काम्यं च ॥ सूर्यावलोकननिष्क्रमणयोर्नांदीश्राद्धं कृताकृतम् ॥

## अथ भूम्युपवेशनकालः ।

पंचममासे निष्क्रमोक्तितिथ्यादौ भौमबले सति भूम्युपवेशनं कार्यम् ॥

## अथान्नप्राशनकालः ।

षष्ठेऽष्टमे दशमे द्वादशे वा मासे पूर्णे वत्सरे वा पुंसोऽन्नप्राशनम् ॥ पंचममप्तमनवममासेषु स्त्रीणाम् ॥ "द्वितीया च तृतीया च पंचमी सप्तमी तथा ॥ त्रयोदशी च दशमी प्राशने तिथयः शुभाः ॥" बुधगुरुशुक्रवाराः शुभाः ॥ रविचंद्रवारौ क्वचित् ॥ अश्विनीरोहिणीमृगपुनर्वसुपुष्योत्तरात्रयहस्तचित्रास्वात्यनुराधाश्रवणधनिष्ठाशततारकारेवत्यः शुभाः ॥ जन्मनक्षत्रमशुभमिति क्वचित् ॥ भद्रावैधृतिव्यतीपातगंडातिगंडवज्रशूलपरिघा वर्ज्याः ॥ विष्णुशिवचंद्रार्कदिक्पालभूमिदिशाब्राह्मणान् संपूज्य मातुरंकगतस्य शिशोः कांचने कांस्ये वा पात्रे स्थितं दधिमधुघृतमिश्रं पायसं सुवर्णयुतहस्तेन समंत्रं प्राशयेत् ॥ सूर्यावलोकनादीन्यन्नप्राशनांतानि अन्नप्राशनकाले शिष्टाः सहैवानुतिष्ठंति एतेषां सहप्रयोगसंकल्पादिकं कौस्तुभादौ ज्ञातव्यम् ॥

## अथ जीविकापरीक्षा ।

अथान्नप्राशनांते कर्तव्यम् ॥ "अग्रतोऽथ परिन्यस्य शिल्पवस्तूनि सर्वशः ॥ शस्त्राणि चैव वस्त्राणि ततः पश्येत्तु लक्षणम् ॥ प्रथमं यत्स्पृशेद्बालः पुस्तकादि स्वयं तदा ॥ जीविका तस्य बालस्य तेनैव तु भविष्यति ॥" अन्नप्राशनांतसंस्कारेषु मलमासगुरुशुक्रास्तादिदोषो नास्ति इत्युक्तं तच्छुद्धकालेष्वसंभवे ज्ञेयम् ॥ तेन षष्ठादिमासे अस्तादिदोषसत्त्वेऽष्टमादिमासे कार्यम् ॥ इति सूर्यावलोकननिष्क्रमणभूम्युपवेशनान्नप्राशनजीविकापरीक्षणानि ॥

## अथ कर्णवेधः ।

" दशमे द्वादशे वाह्नि षोडशे कर्णवेधनम् ॥ मासे षष्ठे सप्तमे वा अष्टमे दशमेऽपि वा ॥ द्वादशे वा ततोब्दे च प्रथमे वा तृतीयके ॥ न कर्तव्यं समे वर्षे स्त्रीपुंसोः श्रुतिवेधनम् ॥" तृतीयादिवत्सरे मासाः ॥ "कार्तिके पौषमासे वा चैत्रे वा फाल्गुनेपि वा ॥ शुक्लपक्षः शुभः प्रोक्तो जन्ममासो निषेधितः ॥ भद्रायां विष्णुशयने कर्णवेधं विवर्जयेत् ॥" तेन कार्तिकमासविधिः शुक्लद्वादश्युत्तरं ज्ञेयः ॥ केचिन्मीनस्थसूर्ये चैत्रं धनुःस्थे पौषं मासं वर्जयंति ॥ "द्वितीया दशमी षष्ठी सप्तमी च त्रयोदशी ॥ द्वादशी पंचमी शस्ता तृतीया कर्णवेधने ॥" चन्द्रबुधगुरुशुक्रवाराः पुष्यपुनर्वसुमृगोत्तरात्रयहस्तचित्राश्विनीश्रवणरेवतीधनिष्ठाः शुभाः ॥ विष्णुरुद्रब्रह्मसूर्यचन्द्रदिक्पालनासत्यसरस्वतीगोब्राह्मणगुरुपूजां कृत्वालक्तकरसांकितं कर्ण पुंसः पूर्वं दक्षिणं विध्येत् पश्चाद्वामम् ॥ स्त्रीणां पूर्वं वामम् ॥ "सौ-

वर्णी राजपुत्रस्य राजती विप्रवैश्ययोः ॥ शूद्रस्य चायसी सूची बालकाष्ठांगुला मता ॥ कर्णरंध्रे स्वेश्छाया प्रविशेद्धर्द्धयेत्तथा ॥ अन्यथा दर्शने तस्य पूर्वपुण्यविनाशनम् ॥" इति कर्णवेधः ॥

## अथ बालस्य दृष्टिदोषादौ रक्षाविधिः ।

"वासुदेवो जगन्नाथः पूतनातर्जनो हरिः ॥ रक्षतु त्वरितो बालं मुंचमुंच कुमारकम् ॥ कृष्ण रक्ष शिशुं शंखमधुकैटभमर्दन ॥ प्रातःसंगवमध्याह्नसायाह्नेषु च संध्ययोः ॥ महानिशि सदा रक्ष कंसारिष्टनिषूदन ॥ यद्वोरजः पिशाचांश्च ग्रहान्मातृग्रहानपि ॥ बालग्रहान्विशेषेण च्छिंधिच्छिंधि महाभयान् ॥ त्राहि त्राहि हरे नित्यं त्वद्रक्षाभूषितं शिशुम् ॥ इति भस्माभिमंत्र्यैव भूषयेत्तेन भस्मना ॥ शिरोललाटाद्यंगेषु रक्षां कुर्याद्यथाविधि ॥" इति प्रयोगसारे ॥ " रक्षरक्ष महादेव नीलग्रीव जटाधर ॥ ग्रहैस्तु सहितो रक्ष मुंचमुंच कुमारकम् ॥" अमुं मंत्रं भूर्जपत्रे विलिख्य तत्पत्रं भुजे बध्नीयात् ॥ बालरोदनपरिहारार्थं यंत्रमुक्तं मयूखे ॥ षडस्रमध्ये ह्रींकारं तन्मध्ये शिशोर्नाम विलिख्य षट्कोणेषु ॐ लुलुवस्वाहेतिमंत्रषडक्षराणि विलिख्य तद्बहिर्नमिवट्टत्तद्वयं विलिख्य तद्बहिरधोमुखैरर्धचंद्रैरावेष्ट्य पंचोपचारैः संपूज्य बालहस्ते बध्नीयादिति ॥ बालग्रहशांत्यादिकं बालग्रहस्तवश्च शांतिकमलाकरशांतिमयूखयोर्द्रष्टव्यम् ॥

## अथ वर्धापनविधिः ।

स च वर्षपर्यंतं प्रतिमासं जन्मतिथौ कार्यः ॥ वर्षोत्तरं प्रत्यब्दं जन्मतिथौ कार्यः ॥ तिथिद्वैधे यत्र जन्मर्क्षयोगः सा ग्राह्या दिनद्वये जन्मनक्षत्रयोगसत्त्वासत्त्वयोरौदयिकी द्विमुहूर्ताधिका ग्राह्या ॥ द्विमुहूर्तन्यूनत्वे पूर्वा ॥ जन्ममासाधिमासत्वे शुद्धे मासे प्रत्याब्दिकवद्वर्धापनविधिर्न त्वधिके ॥ अथ संक्षेपतः प्रयोगः ॥ आयुराभिवृद्ध्यर्थं वर्षवृद्धिकर्म करिष्ये इति संकल्प्य तिलोद्वर्तनपूर्वकं तिलोदकेन स्नात्वा कृततिलकादिविधिर्गुरुं संपूज्याक्षतपुंजेषु देवताः पूजयेत् ॥ तत्रादौ कुलदेवतायै नम इति कुलदेवतामावाह्य जन्मनक्षत्रं पितरौ प्रजापतिं भानुं विघ्नेशं मार्कंडेयं व्यासं जामदग्न्यं राममं अश्वत्थामानं कृपं बलिं प्रह्लादं हनूमंतं विभीषणं षष्ठीं च नामैवावाह्य पूजयेत् ॥ षष्ठ्यै दधिभक्तनैवेद्यः पूजांते प्रार्थना च ॥ "चिरंजीवी यथा त्वं भो भविष्यामि तथा मुने ॥ रूपवान्वित्तवांश्चैव श्रिया युक्तश्च सर्वदा ॥ मार्कंडेय नमस्तेस्तु सप्तकल्पांतजीवन ॥ आयुरारोग्यसिद्ध्यर्थं प्रसीद भगवन् मुने ॥ चिरंजीवी यथा त्वं तु मुनीनां प्रवरो द्विज ॥ कुरुष्व मुनिशार्दूल तथा मां चिरजीविनम् ॥ मार्कंडेय महाभाग सप्तकल्पांतजीवन ॥ आयुरारोग्यसिद्ध्यर्थमस्माकं वरदो भव ॥" अथ षष्ठीप्रार्थना ॥ "जय देवि जगन्मातर्जग-

दानंदकारिणि ॥ प्रसीद मम कल्याणि नमस्ते षष्ठिदेवते ॥ त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च ॥ ब्रह्मविष्णुशिवैः सार्धं रक्षां कुर्वंतु तानि मे ॥" ततस्तिलगुडमिश्रं पयः पिबेत् ॥ तत्र मंत्रः ॥ "सतिलं गुडसंमिश्रमंजल्यर्धमितं पयः ॥ मार्कंडेयाद्वरं लब्ध्वा पिबाम्यायुर्विवृद्धये ॥" क्वचित्पूजितषोडशदेवताभ्यो नाम्ना प्रत्येकमष्टाविंशतिसंख्यतिलहोम उक्तः ॥ ततो विप्रभोजनम् ॥ तद्दिने नियमाः ॥ "खंडनं नखकेशानां मैथुनाध्वगमौ तथा ॥ आमिषं कलहं हिंसां वर्षवृद्धौ विवर्जयेत् ॥ मृते जन्मनि संक्रांतौ श्राद्धे जन्मदिने तथा ॥ अस्पृश्यस्पर्शने चैव न स्नायादुष्णवारिणा ॥"

## अथ चौलम् ।

"जन्मतो गर्भतो वाब्दे प्रथमेऽथ द्वितीयके ॥ तृतीये पंचमे वापि चौलकर्म प्रशस्यते ॥ यद्वा सहोपनीत्यात्र कुलाचाराद्व्यवस्थितिः ॥ माघफाल्गुनवैशाखज्येष्ठे मासि शुभं स्मृतम् ॥ जन्ममासेऽधिमासे न ज्येष्ठे ज्येष्ठस्य नो भवेत् ॥ शुक्लपक्षः शुभः प्रोक्तः कृष्णश्चांत्यत्रिकं विना ॥ द्वितीयाथ तृतीया च पंचमी सप्तमी शुभा ॥ दशम्येकादशी वापि त्रयोदश्यपि शस्यते ॥ रविभौमार्किशनयो वारा विप्रादिवर्णतः ॥ गुरुशुक्रबुधाः शुक्ले सोमः सर्वे शुभावहाः ॥" अश्विनीमृगपुनर्वसुपुष्यहस्तचित्रास्वातीज्येष्ठाश्रवणधनिष्ठाशततारकारेवत्यः शुभाः॥ "क्षौरप्रयाणभैषज्ये जन्मर्क्ष वर्जयेत्सदा ॥ आयुःक्षयोनुराधाग्न्युत्तरारोहिणीमघे" ॥ सिंहस्थे गुरौ चौलादिशुभकर्म न कार्यम् ॥ "सूनोर्मातरि गर्भिण्यां चूडाकर्म न कारयेत् ॥ पंचमाब्दात्प्रागूर्ध्वं तु गर्भिण्यामपि कारयेत् ॥ सहोपनीत्या कुर्याच्चेत्तदा दोषो न विद्यते ॥" पृथक् चूडाकर्म पृथगुपनयनं च मातरि गर्भिण्यां न कार्यम् ॥ उभयोः सहानुष्ठाने तु न दोषः ॥ गर्भिण्यामपि पंचममासपर्यंतं न दोषः ॥ "पंचमासादधः कुर्यादत ऊर्ध्वं न कारयेत् ॥" इत्युक्तेः । ज्वरितस्य चौलादिमंगलं न कार्यम् ॥ "विवाहव्रतचूडासु माता यदि रजस्वला ॥ व्रस्याः शुद्धेः परं कार्यं मंगलं मनुरब्रवीत् ॥" नांदीश्राद्धोत्तरं रजस्वलायां शांतिं कृत्वा कार्यम् ॥ केचित्तु मुहूर्तांतराभावे प्रारंभात्प्रागपि रजोदोषे श्रीपूजनादिविधिना शांतिं कृत्वा कार्यमित्याहुः ॥ मातुलपितृव्यादौ कर्तरि तत्पत्न्यां रजस्वलायामपि मंगलं नेति सिंधुः ॥ त्रिपुरुषात्मककुले षण्मासमध्ये मौंजीविवाहरूपमंगलोत्तरं मुंडनाख्यं चूडाकर्मादि न कार्यम् ॥ संकटे तु अब्दभेदे कार्यम् ॥ चतुःपुरुषपर्यंतं कुले सपिंडीकरणमासिकश्राद्धांतप्रेतकर्मसमाप्तेः प्राक् चूडाकर्मादिकमाभ्युदयिकं कर्म न कार्यम् ॥ "एकमातृजयोरेकवत्सरेपत्ययोर्द्वयोः ॥ न संस्कारः समानः स्यान्मातृभेदे विधीयते ॥" प्रारंभोत्तरं सूतकप्राप्तौ कूष्मांडीभिर्कृग्भिर्घृतं हुत्वा गां दत्त्वा चूडोपनयनोद्वाहना

दिकमाचरेत् ॥ अत्र विशेषो विवाहप्रकरणे वक्ष्यते ॥मध्ये मुख्यैका शिखा अन्याश्च पार्श्वादिभागेष्विति यथाकुलाचारं प्रवरसंख्यया शिखाश्चूडासमये कार्याः ॥ उपनयनकाले मध्यशिखेतरशिखानां वपनं कृत्वा मध्यभाग एवोपनयनोत्तरं शिखा धार्या ॥ चौलकर्मणि जातकर्मणि च भोजने सांतपनकृच्छ्रं प्रायश्चित्तम् ॥ अन्येषु संस्कारेषु उपवासेन शुद्धिः ॥ चूडांताः सर्वे संस्काराः स्त्रीणाममंत्रकाः कार्याः ॥ होमस्तु समंत्रकः ॥ होमोप्यमंत्रकः कार्यो न वा कार्य इति वृत्तिकृदादिमतम् ॥ एवं शूद्रस्याप्यमंत्रकं चौलम् ॥ इदानीं शिष्टेषु स्त्रीणां चूडादिसंस्कारकरणं न दृश्यते ॥ विवाहकाले चूडादिलोपप्रायश्चित्तमात्रं प्रकुर्वंति ॥ चौलोत्तरं मासत्रयपर्यंतं सपिंडैः पिंडदानं तिलतर्पणं च न कार्यम् ॥ महालये गयायां पित्रोः प्रत्यब्दश्राद्धे च पिंडदानादि कार्यम् ॥

## अथ विद्यारंभः ।

पंचमे वर्षे अक्षरलेखनारंभ उत्तरायणे कार्यः ॥ अत्र कुंभस्थः सूर्यो वर्ज्यः ॥ "शुक्लपक्षः शुभः प्रोक्तः कृष्णश्चांत्यत्रिकं विना ॥" द्वितीया तृतीया पंचमी दशम्येकादशीद्वादशीत्रयोदश्यः श्रेष्ठाः ॥अश्विनीमृगार्द्रापुनर्वसुपुष्यहस्तचित्रास्वात्यनुराधाश्रवणधनिष्ठाशततारकारेवत्यो भौमशनिभिन्नवाराश्च शुभाः ॥ विघ्नेशं लक्ष्मीनारायणौ सरस्वतीं स्ववेदं सूत्रकारं च पूजयित्वा गुरुं ब्राह्मणान् धात्रीं च संपूज्य नत्वा सर्वांस्त्रिः प्रदक्षिणीकृत्य प्रणवपूर्वकमक्षरमारभेत् ॥ ततो गुरुं नत्वा देवताः विसर्जयेत् ॥ ततोत्र भुवनमातः सर्ववाङ्मयरूपेणागच्छागच्छेति सरस्वत्यावाहनमंत्रः ॥ प्रणवेन षोडशोपचारार्पणम् ॥

## अथानुपनीतधर्माः ।

प्रागुपनयनात्कामचारकामवादकामभक्षाः ॥ तेन मूत्रपुरीषोत्सर्गादावाचमनाद्याचारो नास्ति लघुपातकहेतुलशुनपर्युषितोच्छिष्टादिभक्षणे दोषाभावः ॥ एवमपेयपाने अनृतावाच्यभाषणेपि ॥ महादोषहेतुमांसांत्यजरजस्वलादिस्पृष्टान्नभक्षणे मद्यादिपाने च दोषोस्त्येव ॥ "रजस्वलादिसंस्पर्शे स्नानमेव कुमारके ॥ शिशोरभ्युक्षणं प्रोक्तं बालस्याचमनं स्मृतम् ॥" तत्र प्रागन्नप्राशनाच्छिशुसंज्ञा ॥ तत ऊर्ध्वं प्राक् चौलात्त्रिवर्षाद्वा बालसंज्ञा ॥ तत आमौंजीबंधनात्कुमारसंज्ञा ॥ अत्राचमनमिति त्रिरुदकपानमेव ॥ नतु ओष्ठमार्जनादिकल्प इति ज्ञेयम् ॥ न चानुपनीतो वेदमुच्चारयेत् ॥ पित्रोरंत्यक्रियायां त्वनुपनीतेनापि मंत्रोच्चारः कार्यः ॥ स च द्वित्रिवर्षयोः कृतचूडस्यैव ॥ त्रिवर्षोर्ध्वं त्वकृतचूडस्यापि ॥ एतच्चौरसपुत्रविषयम् ॥ "पित्रोरनुपनीतोपि विदध्यादौरसः सुतः ॥ और्ध्वदैहिकमन्ये तु संस्कृताः श्राद्धकारकाः॥" इति स्कांदात् ॥ बालानामपथ्यं पित्रादिभिर्निवारणीयम् ॥

"तस्मात्सर्वप्रयत्नेन बालानग्रे तु भोजयेत् ॥" बालानां क्रीडनदाने स्वर्गसुखम् ॥ तेषां भोज्यप्रदाने गोदानफलम् ॥

## अथोपनयनम् ।

उपनयनं नाम आचार्यसमीपनयनांगको गायत्र्युपदेशप्रधानकः कर्मविशेषः उपनयनपदस्य योगरूढत्वात् ॥ तत्राधिकारिणः ॥ "पितैवोपनयेत्पुत्रं तदभावे पितुः पिता ॥ तदभावे पितुर्भ्राता तदभावे तु सोदरः ॥ " तदभावे सगोत्रसपिंडाः तदभावे मातुलादयः सगोत्रसपिंडाः तदभावे असपिंडसगोत्रजाः ॥ एते च कुमारापेक्षया वयोज्येष्ठा विवक्षिताः ॥ कनिष्ठकर्तृकोपनयनस्य निषिद्धत्वात् ॥ सर्वाभावे श्रोत्रियः ॥ "जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते ॥ विद्यत्वाच्चापि विप्रत्वं त्रिभिः श्रोत्रिय उच्यते ॥ कृच्छ्रत्रयं चोपनेता त्रीन् कृच्छ्रांश्च चतुश्चरेत् ॥" गायत्र्या द्वादशाधिकसहस्रजपश्चोपनेतृत्वाधिकारसिद्ध्यर्थं कार्यः ॥ केचिद्द्वादशसाहस्री जपंति ॥

## अथोपनयनकालः ।

गर्भतो जन्मतो वा पंचमेऽष्टमे वा वर्षे ब्राह्मणस्योपनयनम् ॥ एकादशे द्वादशे वा क्षत्रियस्य ॥ द्वादशे षोडशे वा वैश्यस्य ॥ "षष्ठे तु धनकामस्य विद्याकामस्य सप्तमे ॥ अष्टमे सर्वकामस्य नवमे कांतिमिच्छतः ॥" केचित्तु विप्रस्य षष्ठं न मन्यंते ॥ आ षोडशाद्वाविंशादा चतुर्विंशाच्च वर्षाद्ब्राह्मणादेर्गौणकालः ॥ अत्र गर्भादिसंख्या ॥ तथा च जन्मतः पंचदशवर्षपर्यंतं विप्रस्य न विशेषतः प्रायश्चित्तम् ॥ षोडशे वर्षे सशिखवपनमेकविंशतिरात्रं यावत्काशनमंते सप्तब्राह्मणभोजनमिति प्रायश्चित्तम् ॥ सप्तदशादिवर्षेषु कृच्छ्रत्रयादिप्रायश्चित्तपूर्वकमुपनयनं बोध्यम् ॥ विप्रक्षत्रिययोरुत्तरायणे मौंजीबंधः ॥ वैश्यस्य दक्षिणायनेपि ॥ वसंते ब्राह्मणमुपनयीत ग्रीष्मे राजन्यं शरदि वैश्यम् ॥ माघादिशुक्लांतपंचमासाः साधारणा वा सकलद्विजानामिति गर्गोक्तिर्वसंतालाभे शिशिरग्रीष्मावपि ग्राह्यौ ॥ वसंतविधिनोत्तरायणादिविधेः संकोचायोगात् ॥ एवं माघादिमासपंचकनियमात्पौषाषाढयोः सत्यप्युत्तरायणे उपनयनं न कार्यम् ॥ तत्रापि मीनार्कमारभ्य यावन्मिथुनप्रवेशं प्रशस्तः कालः मीनमेषयोस्तु प्रशस्ततरः ॥ मकरकुंभस्थेर्के मध्यमं मीनमेषस्थे उत्तमं वृषमिथुनस्थेऽधममुपनयनमित्यभिधानात् ॥ मीनार्कविशिष्टश्चैत्रोऽनिष्टबृहस्पत्यादिबहुविधदोषापवादकतया प्रशस्ततमः ॥ "जीवभार्गवयोरस्ते सिंहस्थे देवतागुरौ ॥ चंद्रसूर्ये दुर्बलेपि गोचरेनिष्टदे गुरौ ॥ मेखलाबंधनं कार्यं चैत्रे मीनगते रवौ॥" इत्यर्थकस्मृतेः ॥ अत्र गुरुशुक्रास्तदोषापवादोऽतिमहासंकटविषयत्वान्न कथनीयः॥मीनार्कचैत्रे जन्ममासनक्षत्रदोषो नास्ति॥ जन्ममासजन्म-

व्रजन्मातिथिजन्मलग्नजन्मराशिलग्नेषु विप्राणामुपनयनं न दोषाय ॥ क्षत्रियवैश्ययोरग्रथमगर्भे दोषो न ॥ ज्येष्ठापत्यस्य ज्येष्ठमासे मंगलं न ॥ "शुक्लपक्षः शुभः प्रोक्तः कृष्णश्चांत्यत्रिकं विना ॥" इति गुरूक्तेः कृष्णपक्षे दशमीपर्यंतं संकटे कार्यम् ॥ शिष्टास्तु संकटेपि कृष्णपक्षे पंचमीपर्यंतमेव कुर्वंति ॥

## अथ तिथिविचारः ।

द्वितीयातृतीयापंचमीषष्ठीदशम्येकादशीद्वादश्यः प्रशस्ताः ॥ क्वचित्सप्तमीत्रयोदशीकृष्णप्रतिपद्विधिः पुनरुपनयनमूकाद्युपनयनविषयः ॥ "तिथौ सोपपदाख्यायामनध्याये गलग्रहे ॥ अपराह्णे चोपनीतः पुनः संस्कारमर्हति ॥ सिता ज्येष्ठे द्वितीया च आश्विने दशमी सिता ॥ चतुर्थी द्वादशी माघे एताः सोपपदाः स्मृताः ॥ अनध्यायाः पौर्णमासी चतुर्दश्यष्टमी अमा ॥ प्रतिपत्सूर्यसंक्रांतिर्मन्वाद्याश्च युगादयः ॥ कृष्णपक्षे द्वितीयाश्च कार्तिकाषाढफाल्गुने ॥" विषुवायनसंक्रांत्योः पक्षिणी अनध्याय इति पूर्वपरिच्छेदे उक्तम् ॥ सोपपदानामनध्यायतिथीनां च दिनद्वये सूर्योदयोत्तरं सूर्यास्तात्पूर्वं च त्रिमुहूर्तसत्त्वे दिनद्वयमनध्यायः ॥ शिष्टास्तु प्रतिपच्छेषघटिकादिमात्रेपि व्रतबंधेऽनध्यायं वदंति ॥ विषुवायनेतरसंक्रांतिमन्वादियुगादिषु तु प्रथमद्वितीयपरिच्छेदोक्तरीत्या यत्र दिने संक्रांतिपुण्यकालो युगमन्वादिश्राद्धकालश्च तद्दिनेऽनध्यायः ॥ न तु तेषामस्तादौ मुहूर्तत्रयसत्त्वमनध्यायहेतुः ॥ "त्रयोदश्यादिचत्वारि सप्तम्यादि दिनत्रयम् ॥ चतुर्थी चैकतः प्रोक्ता अष्टावेते गलग्रहाः ॥" अत्र चतुर्थी नवमी च व्रतकाले त्याज्येति भाति ॥ केचिच्चतुर्थीशेषयुतपंचम्यां व्रतबंधं न कुर्वंति ॥ तत्र मूलं मृग्यम् ॥ नवमीशेषयुतदशम्यां मौंजी न कार्येति मयूखे ॥ अपराह्णस्त्रेधाविभक्तदिनतृतीयांशो व्रतबंधे वर्ज्यः ॥ दिनमध्यमभागो मध्यमः प्रथमभागो मुख्यः ॥ मन्वादियुगादयो द्वितीयपरिच्छेदे दर्शिताः ॥ तत्रोपनयने चैत्रशुक्लतृतीयाया मन्वादेर्वैशाखशुक्लतृतीयाया युगादेश्च प्रसक्तिः ॥ अन्येषां युगादिमन्वादितिथीनां प्रसक्तिर्नास्ति ॥ अनयोरपवादः सिंधुकौस्तुभादौ स्मर्यते ॥ "या चैत्रवैशाखसिता तृतीया माघस्य सप्तम्यथ फाल्गुनस्य ॥ कृष्णद्वितीयोपनये प्रशस्ता प्रोक्ता भरद्वाजमुनीद्रमुख्यैः ॥" इति ॥ अत्र माघसप्तम्याः मन्वादेरपवादः पुनरुपनयनादिविषयः फाल्गुनकृष्णद्वितीयायाश्चातुर्मास्यद्वितीयात्वेनानध्यायत्वं प्राप्तं तस्यापवादोयम् ॥ यत्तु "अनध्यायस्य पूर्वेद्युरनध्यायात्परेहनि ॥ व्रतारंभं विसर्गं च विद्यारंभं च वर्जयेत् ॥" इति स्मृत्यंतरं तद्द्वितीयाविध्यनुपपत्त्या गलग्रहत्वेन प्राप्तसप्तमीनवमीत्रयोदशीनिषेधानुवादकमिति भाति ॥ अप्राप्तनिषेधकत्वे मन्वादियुगादिसंक्रांत्यादिप्रयुक्तानध्यायेभ्योपि पूर्वपरदिनयोर्निषेधापत्त्या चैत्रशुक्लद्वितीयादेरपि निषिद्धत्वापातान्न चेष्टापत्तिः ॥ शिष्टाचारग्रंथेषु चानुपलंभान्मुहूर्तमार्तंडोक्त्या माघशुक्लद्वितीया कृष्णद्वितीया

वैशाखकृष्णद्वितीया चेत्यनध्यायत्रयमुपनयनेधिकं प्राप्नोति ॥ एतदपरे नाद्रियंते ॥ बहुग्रंथेषु मूलानुपलंभात् ॥ मौंजीप्रकरणे मुहूर्तचिंतामण्यादिग्रंथेषु क्वाप्यनुक्तेश्च ॥ अतो मार्तंडोक्तानामतिरिक्तानध्यायानामुपनिषत्पाठादिविषयत्वं न तु मौंजीविषयत्वमिति युक्तं भाति ॥ तत्र तृतीयाषष्ठीद्वादशीषु प्रदोषसत्त्वे मौंजी न कार्या ॥ रात्रेः प्रथमयामे चतुर्थी सार्द्धयामे सप्तमी यामद्वये त्रयोदशी चेत्तदा प्रदोषः ॥ दिनद्वये प्रथमयामादिषु चतुर्थ्यादिव्याप्तौ पूर्वदिने प्रदोषो नोत्तरदिने इति कौस्तुभे ॥ प्रदोषदिने मंदवारे कृष्णपक्षांत्यत्रिके चोपनयने पुनरुपनयनमिति मयूखे ॥ एते नित्यानध्यायाः ॥

## अथ नैमित्तिकाः ।

विवाहप्रतिष्ठोद्यापनादिप्वा समाप्तेः सगोत्राणामनध्याय इति स्मृत्यर्थसारोक्तेस्त्रिपुरुषसपिंडेषु ब्रह्मयज्ञादिवर्जनात् मौंजीविवाहादिनिमित्तकमंडपप्रतिष्ठाद्युत्सवसमाप्तिपर्यंतमुपनयनं न कार्यमिति भाति ॥ विवाहादिमंगलकरणे दोषो न ॥ शोभनदिने चानध्याय इत्युक्तेर्गर्भाधानादिशुभकार्यादिने एककुले एकगृहे वा व्रतबंधो न कार्य इति भाति ॥ भूकंपे भूविदारणे वज्रपाते उल्कापाते धूमकेतूत्पत्तौ ग्रहणे च दशाहं सप्ताहं वा व्रतबंधादिमंगलं न कार्यम् ॥ केचित्संकटे त्रिदिनमनध्यायमाहुः ॥ अकालवृष्टौ त्रिरात्रं पक्षिणी वानध्यायः ॥ पौषादिचैत्रांतमकालवृष्टिः ॥ केचिदार्द्रादिज्येष्ठांतसूर्यनक्षत्रादन्यत्राकालवृष्टिरित्याहुः ॥ यस्मिन् देशे यो वर्षाकालस्ततोन्यत्राकालवृष्टिरिति सिद्धांतः ॥ अतिवृष्टौ करकावृष्टौ रुधिरवृष्टौ च त्र्यहम् ॥ प्रातःसंध्यागर्जने त्वहोरात्रं गुरुशिष्यऋत्विङ्मरणे त्र्यहम् ॥ पशुमंडूकनकुलश्वाहिमार्जारमूषकैरंतरागमनेऽहोरात्रम् ॥ आरण्यमार्जारादिगमने त्रिरात्रम् ॥ सृगालवानरैर्द्वादशरात्रम् ॥ श्रवणद्वादशीयमद्वितीयामहाभरण्यादयोऽन्येप्यनध्याया नित्या नैमित्तिकाश्च बहवो ग्रंथेषूक्तास्तेषामुपनयने प्रसक्त्यभावादत्र नोक्ताः ॥ व्रतबंधे नांदीश्राद्धोत्तरं पूर्वोक्तप्रातर्गर्जितादिनैमित्तिकानध्यायप्राप्तौ ज्योतिर्निबंधे "नांदीश्राद्धं कृतं चेत्स्यादनध्यायस्त्वकालिकः ॥ तदोपनयनं कार्यं वेदारंभं न कारयेत् ॥" इति ॥ वेदारंभं न कारयेदिति निषेधो याजुषादिविषयः ॥ बह्वृचानामुपाकर्मण्येव वेदारंभोक्त्या मौंजीदिने वेदारंभाप्रसक्तेः तदोपनयनं कार्यमिति बह्वृचादिसर्वसाधारणः ॥ याजुषादिभिर्मौंज्युत्तरमपि अनध्यायप्राप्तौ वेदारंभो वर्ज्यः ॥ नांदीश्राद्धात्प्राक् नैमित्तिकानध्याये मुहूर्तांतरे कार्यम् ॥ मौंज्युत्तरमनुप्रवचनीयात्प्राक् गर्जने वक्ष्यते ॥ इति अनध्यायादिनिर्णयः ॥ इत्थं तिथिं तत्प्रसंगप्राप्तमनध्यायादिकं च विचार्य वारादि चिंत्यते ॥ गुरुशुक्रबुधवाराः श्रेष्ठाः ॥ सूर्यवारो मध्यमः ॥ चंद्रवारोऽधमः ॥ भौममंदवारौ निषिद्धौ ॥ सामवेदिनां क्षत्रिया-

णां च भौमवारः प्रशस्तः ॥ "शाखाधिपतिवारश्च शाखाधिपबलं तथा ॥ शाखाधिपतिलग्नं च दुर्लभं त्रितयं व्रते ॥ गुरुशुक्रौ भौमबुधावृग्वेदाद्यधिपाः स्मृताः ॥ पती सितेज्यौ विप्राणां नृपाणां कुजभास्करौ ॥ वैश्यानां शशभृत्सौम्याविति वर्णाधिपाः स्मृताः ॥ पितुः सूर्यबलं श्रेष्ठं शाखावर्णेशयोर्बटोः ॥ पितुर्बटोश्च सर्वेषां बलं वाक्पतिचंद्रयोः ॥" बटुतत्पित्रोरुभयोर्गुरुचंद्रबलालाभे बटोरुभयबलमावश्यकम् ॥ तत्र चंद्रबलं गर्भाधानप्रसंगे उक्तम् ॥ द्विपंचसप्तनवैकादशस्थो गुरुः शुभफलप्रदः ॥ जन्मतृतीयषष्ठदशमस्थानेषु पूजाहोमात्मकशांत्या शुभः ॥ चतुर्थाष्टमद्वादशस्थानेषु दुष्टफलः ॥ कर्कधनुर्मीनराशिषु चतुर्थादिस्थानेपि न दोषः ॥ अतिसंकटे चतुर्थद्वादशस्थो द्विगुणपूजाहोमादिना शुभः ॥ अष्टमस्तु त्रिगुणपूजादिना शुभः ॥ केचिदनिष्टो वामवेधेन शुभ इत्याहुस्तन्नेति राजमार्तंडः ॥ अष्टमवर्षादिमुख्यकाले गुरुबलाभावेपि मीनगतरवियुतचैत्रे वा शांत्या वा व्रतबंधः कार्यो न तु मुख्यकालातिक्रमः ॥ नित्यकालस्य बलीयस्त्वात् ॥

## अथ नक्षत्राणि ।

पूर्वात्रयहस्तचित्रास्वातीमूलाश्लेषार्द्राश्रवणेषु ऋग्वेदिनां मौंजी प्रशस्ता ॥ रोहिणीमृगपुष्यपुनर्वसुज्युत्तराहस्तानुराधाचित्रारेवतीषु याजुषाणाम् ॥ अश्विनीपुष्योत्तरात्रयार्द्राहस्तधनिष्ठाश्रवणेषु सामगानाम् ॥ अश्विनीमृगानुराधाहस्तधनिष्ठापुनर्वसुरेवतीषु अथर्ववेदिनाम् ॥ एषां नक्षत्राणामसंभवे भरणीकृत्तिकामघाविशाखाज्येष्ठाशततारका वर्जयित्वा सर्वाणि सर्वेषां ग्राह्याणि ॥ राजमार्तंडे पुनर्वसुनिषेधो निर्मूल इति बहवः ॥ केचिदृक्सामवेदिविषयः पुनर्वसुनिषेध इत्याहुः ॥ व्यतीपातवैधृतिपरिघार्धेषु विष्कंभादीनां निषिद्धनाडीषु भद्रायां ग्रहणे च मौंजी वर्ज्या ॥

## अथ लग्ने ग्रहबलम् ।

"व्रते ग्राह्या द्वादशाष्टषड्वर्ज्याः शुभखेचराः ॥ खलास्त्र्यायारिगाश्चंद्रः शुक्रगः कर्कगस्तनौ ॥ क्वचित्सूर्यस्तनौ श्रेष्ठोऽष्टमे वर्ज्योऽखिलग्रहः ॥ लग्नेशः शुक्रचंद्रौ च षष्ठे वर्ज्याः सितोत्यगः ॥ लग्ने चंद्रखलाश्चैवेंदुर्वर्ज्यो द्वादशाष्टमे ॥ पंचेष्टग्रहहीनं च लग्नं सर्वत्र वर्जयेत् ॥ तुलामिथुनकन्याख्या धनुर्वृषझषाह्वयाः ॥ नवमांशाः शुभाः प्रोक्ताः कर्कांशं वर्जयेद्व्रते ॥" षड्वर्गशुद्ध्यादिकमिष्टकालसाधनादिविचारश्च ज्योतिर्ग्रंथेभ्यो ज्ञातव्यः ॥ मातरि रजस्वलायां मातुलज्येष्ठभ्रात्रादीनां पित्रसान्निध्यात्कर्तॄणां पत्न्यां रजस्वलायां च मौंजीविवाहादि न कार्यम् ॥ नांदीश्राद्धोत्तरं मातृरजसि भ्रात्रादिकर्त्रंतरसत्त्वेपि संनिहितमुहूर्तांतरालाभे शांतिं कृत्वा कार्यम् ॥ अन्यथा मुहूर्तांतरे एव नांदीश्राद्धोत्तरं मातुलादिकर्तॄणां पत्नीरजोदोषे आरब्धत्वाच्छांतिं विनैव कार्यम् ॥ मौंजीविवाहोत्तरं मंडपोद्वासनात्प्राक् मातृरजोदोषेपि

शांतिः कार्या मंगलस्यासमाप्तत्वादिति मुहूर्तचिंतामणिटीकायाम् ॥ प्रारंभात्यागेपि रजोदोषे मुहूर्तांतरालाभे शांतिं कृत्वातिसंकटे व्रतबंधादिकं कार्यमिति कौस्तुभे ॥ शांतिप्रकारश्च ॥ ममामुकमंगले संस्कार्यजननीरजोदोषजनिताशुभफलनिरासार्थं शुभफलावाप्त्यर्थं श्रीपूजनादिशांतिं करिष्य इति संकल्प्य माषसुवर्णनिर्मितां लक्ष्मीं श्रीसूक्तेन षोडशोपचारैः संपूज्य स्वगृह्योक्तविधिना श्रीसूक्तेन प्रत्यृचं पायसं हुत्वा कलशोदकेनाभिषिच्य विष्णुं स्मृत्वा कर्मेश्वरार्पणं कुर्यादिति ॥ प्रारंभोत्तरं सूतकप्राप्तौ एकोदरयोः समानसंस्कारे प्रेतकर्मासमाप्तौ च चौलप्रकरणे उक्तम् ॥ विशेषस्तु वक्ष्यते ॥ अथ पदार्थसंपादनम् ॥ कौपीनं प्रावारार्थं कार्पासजमहतं संपाद्यम् ॥ "ईषद्धौतं नवं श्वेतं सदशं वस्त्रमहतसंज्ञम् ॥ प्रावारार्थमजिनं वा ॥ तच्च त्र्यंगुलं चतुरंगुलं वा बहिर्लोमाखंडं त्रिखंडं वाष्टचत्वारिंशदंगुलं धार्यम् ॥ त्रिखंडपक्षे चतुर्विंशत्यंगुलाष्टांगुलषोडशांगुलाः क्रमेण त्रयः खंडाः ॥ कार्पासं यज्ञोपवीतम् ॥ तन्निर्माणप्रकारः ॥ ब्राह्मणेन ब्राह्मणस्त्रीभिर्विधवादिभिश्च निर्मितं सूत्रं ग्राह्यम् ॥ संहतचतुरंगुलिमूलेषु षण्णवत्या सूत्रमावेष्ट्य तत्त्रिगुणीकृत्योर्ध्ववृत्तं वलितं कृत्वा पुनरधोवृत्तरीत्या त्रिगुणीकृतं तत्सूत्रं नवतंतुकं संपद्यते ॥ तत्त्रिरावेष्ट्य दृढग्रंथिं कुर्यात् ॥ "स्तनादूर्ध्वमधोनाभेर्न धार्यं तत्कथंचन ॥ विच्छिन्नं वाप्यधोयातं भुक्त्वा निर्मितमुत्सृजेत् ॥ सिद्धे मंत्राः प्रयोक्तव्याः" इति न्यायेन सिद्धं यज्ञोपवीतं त्रिगुणीकरणादिमंत्रैरभिमंत्रितं यज्ञोपवीतं परममिति मंत्रेण धारयेत् ॥ तद्यथा ॥ गायत्र्या त्रिगुणीकृत्यापोहिष्ठेति तिसृभिः प्रक्षाल्य पुनर्गायत्र्या त्रिगुणीकृत्य ग्रंथौ विष्णुब्रह्मरुद्रान्नमेत् ॥ केचिन्नवतंतुषु नवदेवतान्यासमाहुः ॥ ततो गायत्र्या दशवारमभिमंत्रिताभिरद्भिर्यज्ञोपवीतं प्रक्षाल्योदुत्यमिति त्र्यचेन सूर्याय प्रदर्श्य यज्ञोपवीतमिति मंत्रेण प्रथमं दक्षिणबाहुमुद्धृत्य पश्चात्कंठे धारयेदिति ॥ "उपवीतं ब्रह्मसूत्रं प्रोद्धृतं दक्षिणे करे ॥ प्राचीनावीतमन्यस्मिन्निवीतं कंठलंबिनम् ॥" चितिकाष्ठचितिधूमचांडालरजस्वलाशवसूतिकास्पर्शे स्नात्वा यज्ञोपवीतत्यागः ॥ कंठविलंबितत्वाद्यकृत्वा मलमूत्रोत्सर्गे च त्यागः ॥ मासचतुष्टयोत्तरं च यज्ञोपवीतत्यागः ॥ केचिज्जननशावाशौचयोरंतेपि तत्त्यागमाहुः ॥

## अथ जीर्णयज्ञोपवीतत्यागमंत्रः ।

समुद्रं गच्छ स्वाहेति मंत्रेण सप्रणवव्याहृतिभिर्वा जीर्णयज्ञोपवीतत्यागः ॥

## अथ यज्ञोपवीतनाशे प्रायश्चित्तम् ।

यज्ञोपवीतं प्रमादाद्गतं चेत्तूष्णीं लौकिकं धृत्वा मनोज्योतिरिति अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताम् ॥ वायो व्रतपते० आदित्य व्रतपते०

इत्यादिमंत्रचतुष्टयेन चतस्र आज्याहुतीर्हुत्वा विधिवन्नूतनं धारयेत् ॥ अथवा यज्ञोपवीतनाशजन्यदोषनिरासार्थं प्रायश्चित्तं करिष्ये इति संकल्प्य आचार्यवरणाग्निप्रतिष्ठाद्याज्यभागांते सवितारं गायत्र्या तिलैराज्येनाष्टोत्तरशतं सहस्रं वा जुहुयात् ॥ नूतनं धृत्वातिक्रांतसंध्याद्याचरेदिति ॥ यज्ञोपवीतहीनः क्षणं तिष्ठेच्चेच्छतगायत्रीजपः ॥ यज्ञोपवीतं विना भोजने विण्मूत्रकरणे वा गायत्र्यष्टसहस्रं जपः ॥ वामस्कंधात्कूर्परे मणिबंधांते वा पतिते यथास्थानं धृत्वा त्रीन् षड्वा यथाक्रमं प्राणायामान्कृत्वा नवं धारयेत् ॥ कोपादिना स्वयं यज्ञोपवीतत्यागे पूर्ववल्लौकिकं धृत्वा प्रायश्चित्तांते नवं धारयेत् ॥ ब्रह्मचारिणैकं यज्ञोपवीतम् ॥ स्नातकस्य द्वे ॥ उत्तरीयाभावे तृतीयकम् ॥ जीवत्पितृकेण जीवज्ज्येष्ठभ्रातृकेण चोत्तरीयं तत्स्थाने तृतीयं यज्ञोपवीतं वा न धार्यम् ॥ आयुष्कामस्य व्यधिकानि बहूनि यज्ञोपवीतानि ॥ "अभ्यंगे चोदधिस्नाने मातापित्रोर्मृतेहनि ॥ तैत्तिरीयाः कठाः कण्वाश्चरका वाजसनेयिनः ॥ कंठादुत्तार्य सूत्रं तु कुर्युर्वै क्षालनं द्विजाः ॥" अन्ययाजुर्वेदबह्वृचैः सामगैश्च कंठादुत्तारणे तत्यक्त्वा नवं धार्यम् ॥

## अथ मेखला ।

"मौंजी त्रिवृत्समा श्लक्ष्णा कार्या विप्रस्य मेखला ॥ त्रिवृता ग्रंथिनैकेन त्रिभिः पंचभिरेव च ॥ मुंजाभावे तु कर्तव्या कुशाश्मंतकबल्वजैः ॥ ब्राह्मणस्य भवेद्दंडः पालाशः केशसंमितः ॥ सर्वेषां यज्ञियो वा स्यादूर्ध्वं नासाग्रसंमितः ॥" बदुहस्तेन चतुर्हस्ता हस्तोच्छ्रिता चतुरस्रा सोपानांकिता प्राग्दक्प्रवणा कदलीस्तंभाद्यलंकृता वेदिः संपाद्या ॥ अथोपनयनांतर्गतपदार्थेषु विशेष उच्यते ॥ वासःपरिधानोत्तरं लौकिकमाचमनम् ॥ यज्ञोपवीतधारणोत्तरं तु यथाविधि ॥ आचमनविधिर्वक्ष्यते ॥ एवमाज्यपात्रादुत्तरभागे बदुमाचमय्य प्रणीतापश्चिमदेशरूपतीर्थेन प्रवेश्याचार्याग्न्योर्मध्येन नीत्वाचार्यदक्षिणत उपवेशयेत्॥ ततो बर्हिरास्तरणादिस्रुवसंमार्गांते यज्ञोपवीतदानाद्याचमनांतम् ॥ ततः शिष्यांजलौ जलावक्षारणादिसमिदाधानांतं गायत्र्युपदेशांगं बटोः शुचित्वसिद्धये अग्नये समिधमिति मंत्र एकश्रुत्या प्रयोक्तव्यः ॥ ततः परिदानाभिवादनांते आचारप्राप्तं गायत्रीपूजनं कृत्वाऽग्नेरुत्तरदेशे गायत्र्युपदेशः कार्यः ॥अवक्षारणमप्युत्तरदेशे उक्तम् ॥ प्राङ्मुख आचार्यः प्रत्यङ्मुखायोपविष्टाय बटवे गायत्रीमुपदिशेत् ॥

## अथोपसंग्रहणप्रकारः ।

उपसंग्रहणं नामामुकप्रवरान्वितामुकगोत्रोमुकशर्माहं भो अभिवादय इत्युक्त्वा दक्षिणोत्तरकर्णौ वामदक्षिणपाणिभ्यां स्पृष्ट्वा दक्षिणहस्तेन गुरोर्दक्षिणपादं वामेन

वामं स्पृष्ट्वा शिरोवनमनमिति ॥ एवं गुरुषु मातापित्रादिषु च अभिवादनपूर्वक-पादस्पर्शात्मकमुपसंग्रहणम् ॥ वृद्धतरेषु त्वभिवादनमात्रम् ॥ वृद्धेषु नमस्कारः ॥

## अथाभिवादननिषेधः ।

अशुचिं वमंतमभ्यक्तं स्नानं कुर्वंतं जपादिरतं पुष्पजलभैक्षादिभारवाहं न नमेत् ॥ तन्नमने उपवासः ॥ उपवासत्रयमन्यत्र ॥ शूद्रनतौ त्रिरात्रम् ॥ अंत्यजे कृच्छ्रं देवतागुरुयतिनमनाकरणे उपवासः ॥ अथ प्रत्यभिवादनम् ॥ तत्रांत्यस्वरः प्लुतः कार्यः ॥ तद्यथा ॥ आयुष्मान् भव सौम्य देवदत्त ३ ॥ एकारौकारांते नाम्नि हरा ३ इ शंभा ३ उ इति संध्यक्षरविश्लेषेण पूर्वभागाकारप्लुत इति ॥ अनुप्रवचनीयार्थ-भिक्षायां भिक्षां भवान्ददातु भिक्षां भवती ददात्विति वा भवच्छब्दमध्यकभिक्षा-वाक्यप्रयोगः ॥ अन्यभिक्षायामादावंते वा भवच्छब्द इति ॥

## अथ विनायकशांतिविचारः ।

अथोपनयनविवाहादौ निर्विघ्नफलप्राप्त्यर्थमुपसर्गनिरासाय वा सपिंडमरणादि-निमित्तकप्रतिकूलनिवृत्त्यर्थं वा विनायकशांतिः कार्या ॥ तत्र कालः ॥ शुक्लपक्षच-तुर्थी गुरुवारः पुष्यश्रवणोत्तरारोहिणीहस्ताश्विनीमृगनक्षत्राणि शस्तानि ॥ उपनय-नादौ तु प्रधानकालानुरोधेन यथासंभवकालो ग्राह्यः ॥ तत्रामुककर्मणो निर्विघ्न-फलसिद्ध्यर्थमिति वा उपसर्गनिवृत्यर्थमिति वामुकसपिंडमरणनिमित्तकाशु-चित्वप्रातिकूल्यनिरासार्थमिति वा संकल्प ऊह्यः ॥ अवशिष्टप्रयोगोन्यत्र ज्ञेयः ॥

## अथ ग्रहमखविचारः ।

विवाहोपनयनादिष्वभ्युदयकर्मस्वादौ ग्रहयज्ञं कुर्यात् ॥ श्राद्धातिरिक्तेष्वनाभ्यु-दयिकेष्वपि शांत्यादिकर्मसु ग्रहानुकूल्यकामो ग्रहयज्ञं कुर्यात् ॥ अरिष्टनिरासार्थमुत्पा-तेषु शांतिस्थानेष्वप्रधानोपि ग्रहमख उक्तः ॥ प्रधानकर्मणः पूर्वमव्यवहिते व्यव-हिते वा काले कुर्यात् ॥ व्यवहितपक्षे सप्तदिनाधिकव्यवधानं न कार्यं प्रतिग्रहं दशा-वरप्रधानाहुतिसंख्यायामेक एव ऋत्विक् ॥ दशाधिकपंचाशत्पर्यंतसंख्यायां चत्वार ऋत्विजः ॥ तत ऊर्ध्वं शतावरहोमेष्टौ ऋत्विजो नवम आचार्यः ॥ तत्राचार्य आ-चार्यकर्म कृत्वा आदित्याय जुहुयात् ॥ अष्टभ्यः सोमादिभ्योष्टौ ऋत्विजो जुहु-युः ॥ ऋत्विक्चतुष्टयपक्षे द्वाभ्यां ग्रहाभ्यामेकैको जुहुयात् ॥ आचार्योंकाय ॥ ताम्रादिमयीषु प्रतिमासु सर्वासु सौवर्णीषु वा फलेष्वक्षतपुंजेषु वा आदि-त्यादिपूजनम् ॥

## अथ होमसंख्यया कुंडादिमानम् ।

होमसंख्यानुसारेण कुंडस्य स्थंडिलस्य वा ग्रहवेद्याश्च हस्तादिमानम् ॥ तत्र प्रधानांगाहुतीनां पंचाशदवरसंख्यात्वे रत्निमितं कुंडम् ॥ शतावरत्वे अरत्निमि-

तम् ॥ सहस्रावरत्वे हस्तमितम् ॥ अयुतादिहोमे हस्तद्वयम् ॥ लक्षहोमे चतुर्हस्तम् ॥ तत्र कृतमुष्टिकरो रत्निः मुक्तकनिष्ठिकः करः अरत्निः ॥ चतुर्विंशत्यंगुलो हस्तः ॥ यवोनचतुस्त्रिंशदंगुलानि हस्तद्वयम् ॥ अष्टचत्वारिंशदंगुलानि हस्तचतुष्टयम् ॥ कुंडे मेखलायोनिनाभिखातादिमानं ग्रंथांतरेभ्यो ज्ञेयम् ॥ इदं कुंडादिमानं सर्वत्र ज्ञेयम् ॥ समिच्चर्वाज्यं द्रव्यम् ॥ "अर्कः पलाशः खदिरश्चापामार्गोथ पिप्पलः ॥ औदुंबरः शमी दूर्वा कुशोऽर्कादेः क्रमात्समित् ॥" केचित्तिलानपि आहुः ॥ अर्कादिप्रधानहोमसंख्यादशांशेनाधिदेवताप्रत्यधिदेवतानां होमः ॥ अधिदेवताद्यर्धसंख्यया ऋतुसंरक्षकऋतुसाद्गुण्यदेवतानाम् ॥ शांत्यंगभूते ग्रहयज्ञे बलिदानं कुर्वंति ॥ अन्यत्र ग्रहमखे बलिदानं न कुर्वंति ॥ प्रधानभूताया एकाहुतेरेकविप्रभोजनं श्रेष्ठम् ॥ शताहुतेरेकविप्रभोजनं मध्यमम् ॥ सहस्राहुतेरेकविप्रभोजनं जघन्यम् ॥ सुविस्तरप्रयोगादिकमन्यत्र ॥ ॥ इति ग्रहयज्ञः ॥

## अथ बृहस्पतिशांतिप्रयोगः ।

कुमारस्योपनयनकाले कन्याया विवाहे वा बृहस्पत्यानुकूल्याभावे शौनकाद्युक्ता शांतिः कार्या ॥ अस्य कुमारस्योपनयने अस्याः कन्यकाया विवाहे वा बृहस्पत्यानुकूल्यसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं बृहस्पतिशांतिं करिष्य इति संकल्प्याचार्यं वृणुयात् ॥ स्थंडिलेशान्यां यथाविधि स्थापिते श्वेतकलशे पंचगव्यकुशोदकविष्णुक्रांताशतावरीप्रमुखौषधीप्रक्षेपपूर्णपात्रनिधानांते हरिताक्षतनिर्मितदीर्घचतुरस्रपीठे हैमीं गुरुप्रतिमां प्रतिष्ठाप्य स्थंडिलेग्निस्थापनादि ॥ अन्वाधाने बृहस्पतिमश्वत्थसमिदाज्यसर्पिर्मिश्रपायसैः साज्येन मिश्रितयवव्रीहितिलेन च प्रतिद्रव्यमष्टोत्तरशताहुतिभिः शेषेण स्विष्टकृतमित्याद्याज्यभागांते प्रतिमायां षोडशोपचारैर्गुरुपूजा ॥ तत्र पीतवस्त्रयुग्मपीतयज्ञोपवीतपीतचंदनपीताक्षतपीतपुष्पघृतदीपदध्योदननैवेद्यार्पणांते माणिक्यं सुवर्णं वा दक्षिणां दत्त्वा ग्रहमखोक्तरीत्या कुंभानुमंत्रणांते बृहस्पतिमंत्रेण दधिमध्वाक्तसमिदाज्यगृहसिद्धपायसमिश्रितयवाद्यैर्यथान्वाधानं होमः ॥ होमशेषं समाप्य गंधादिभिर्बृहस्पतिं संपूज्य पीतगंधाक्षतपुष्पयुततास्रपात्रस्थजलेनार्घ्यं दद्यात् ॥ तत्र मंत्रः॥ "गंभीरदृढरूपांग देवेज्य सुमते प्रभो ॥ नमस्ते वाक्पते शांत गृहाणार्घ्यं नमोस्तु ते ॥" प्रार्थयेत् ॥ "भक्त्या यत्ते सुराचार्य होमपूजादि सत्कृतम् ॥ तत्त्वं गृहाण शांत्यर्थं बृहस्पते नमोनमः ॥ जीवो बृहस्पतिः सूरिराचार्यो गुरुरंगिराः ॥ वाचस्पतिर्देवमंत्री शुभं कुर्यात्सदा मम ॥" इति विसर्जनप्रतिमादानांते कुमारादियुतयजमानाभिषेकः ॥ तत्र मंत्राः ॥ आपोहिष्ठेति तिस्रः तत्त्वायामि० ३ स्वादिष्टया० ३ समुद्रज्येष्ठाः० ४ इदमापःप्रवहत० १ तामग्निवर्णा० १ याऽओषधीः० १ अश्वावतीर्गोमतीर्न० १

यद्देवादेवहेडनमित्याद्याः कूष्मांडमंत्राः पुनर्मनः पुनरायुरित्यंतास्तैत्तिरीयशाखायां प्रसिद्धाः कौस्तुभादौ लिखिता एतैरभिषिच्य विप्रान् भोजयेदिति ॥ ॥ इति बृहस्पतिशांतिः ॥

## अथोपनयनादौ संकल्पाः ।

तत्रोपनयनात्पूर्वेद्युराचार्यो ममोपनेतृत्वयोग्यतासिद्ध्यर्थं कृच्छ्रत्रयं तत्प्रत्याम्नायगोनिष्क्रयीभूतयथाशक्तिरजतद्रव्यदानेनाहमाचरिष्ये ॥ तथा द्वादशाधिकसहस्रगायत्रीजपमुपनेतृत्वयोग्यतासिद्ध्यर्थं करिष्ये इति संकल्पयेत् ॥

## अथ संस्कारलोपे प्रायश्चित्तम् ।

यदि पूर्वसंस्कारा अतीतास्तदा अस्य कुमारस्य पुंसवनादीनामथवा जातकर्मादीनां चौलांतानां संस्काराणां कालातिपत्तिजनितप्रत्यवायपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं प्रतिसंस्कारमेकैकां भूर्भुवःस्वःस्वाहेतिसमस्तव्याहृत्याज्याहुतिं होष्यामीति संकल्प्याग्निस्थापनेध्माधानादिपाकयज्ञतंत्रसहिता वह्निस्थापनाज्यसंस्कारपात्रसंमार्गमात्रसहिता वातीतसंस्कारसमसंख्यसमस्तव्याहृत्याज्याहुतीर्जुहुयात् ॥ ततोस्य कुमारस्य पुंसवनानवलोभनसीमंतोन्नयनजातकर्मनामकर्मसूर्यावलोकननिष्क्रमणोपवेशनान्नप्राशनचौलसंस्काराणां लोपनिमित्तप्रत्यवायपरिहारार्थं प्रतिसंस्कारं पादकृच्छ्रं प्रायश्चित्तं चौलस्यार्धं कृच्छ्रं बुद्धिपूर्वकलोपे प्रतिसंस्कारमर्धकृच्छ्रं चूडायाः कृच्छ्रं तत्प्रत्याम्नायगोनिष्क्रयीभूतयथाशक्तिरजतद्रव्यदानेनाहमाचरिष्ये ॥ चौलस्योपनीत्या सहकरणस्य कुलधर्मप्राप्तत्वे कालातिपत्तिहोमं चौललोपप्रायश्चित्तं च न कार्यम् ॥ केचित्संस्कारलोपप्रायश्चित्तं बटुना कारयंति ॥ ततो बटुर्मम कामचारकामवादकामभक्षादिदोषपरिहारद्वारोपनेयत्वयोग्यतासिद्ध्यर्थं कृच्छ्रत्रयप्रायश्चित्तं तत्प्रत्याम्नायगोनिष्क्रयीभूतयथाशक्ति रजतदानद्वारा आचरिष्ये इति संकल्पयेत् ॥ निष्कं निष्कार्धं निष्कपादं निष्कपादार्धं वा रजतं गोमूल्यं देयं न तु न्यूनम् ॥ अष्टगुंजमाषरीत्या चत्वारिंशन्माषो निष्क इत्युक्तम् ॥ ततः ॥ "प्रायश्चित्ते कृते पश्चादतीतमपि कर्म वै ॥ कार्यमित्येक आचार्या नेत्यन्येपि विपश्चितः ॥" इति वचनाज्जातकर्मादिसंस्काराः कार्या न कार्या इति पक्षद्वयम् ॥ तत्र प्रायश्चित्तेन प्रत्यवायपरिहारेपि संस्कारजन्यापूर्वोत्पत्त्यर्थं संस्कारानुष्ठानपक्षे संकल्पः ॥ पत्न्या कुमारेण च सहोपविश्य देशकालौ संकीर्त्यास्य कुमारस्य गर्भाद्युपानजनितदोषनिबर्हणायुर्मेधाभिवृद्धिवीजगर्भसमुद्भवैनोनिबर्हणद्वारा श्रीपरमेश्वरप्रीत्यर्थमतिक्रांतं जातकर्म तथा वीजगर्भसमुद्भवैनोनिबर्हणायुरभिवृद्धिव्यवहारासिद्धिद्वारा श्रीपरमेश्वर० नामकर्म आयुरभिवृद्धिद्वारा श्रीपरमेश्वर० सूर्यावलोकनमायुःश्रीवृद्धिवीजगर्भसमुद्भवैनोनिबर्हणद्वारा श्रीप० निष्क्रमण-

मायुरभिवृद्धिद्वारा श्रीप० उपवेशनं मातृगर्भमलप्राशनशुद्ध्यन्नाद्यब्रह्मवर्च-सतेजइंद्रियायुरभिवृद्धिबीजगर्भसमुद्भवैनोनिबर्हणद्वारा श्रीप० अन्नप्राशनं चाद्य करिष्ये ॥ बीजगर्भसमुद्भवैनोनिबर्हणबलायुर्वर्चोभिवृद्धिद्वारा श्रीपरमे० प्रीत्यर्थं चूडाकर्म द्विजत्वसिद्ध्या वेदाध्ययनाधिकारार्थमुपनयनं च श्वः करिष्ये ॥ जा-तादिसर्वसंस्कारांगत्वेन पुण्याहवाचनं मातृकापूजनं नांदीश्राद्धं च करिष्ये ॥ उप-नयनांगत्वेन मंडपदेवतास्थापनं कुलदेवतास्थापनं च करिष्ये ॥ इति स्वस्वगृह्यग्रं-थानुसारेण संकल्प्य नांदीश्राद्धांतं तंत्रेण कृत्वा मंडपदेवतास्थापनादिकं वटुपितृ-भ्यां सुहृत्कृतवस्त्रदानांतं कृत्वान्नप्राशनांताः संस्कारा यथागृह्यं पूर्वदिने कार्याः ॥ चौलोपनयने परदिने कार्ये ॥ सर्वेषां सद्यःकरणे पूर्वोक्तसंकल्पवाक्यांते उपनयनं चाद्य करिष्य इतिसंकल्पः ॥ संस्काराणामकरणपक्षे चूडाकर्मोपनयने संकल्प्यो-भयांगत्वेन पुण्याहवाचनं नांदीश्राद्धमुपनयनांगत्वेन मंडपदेवतास्थापनं कुलदे-वतास्थापनं च करिष्य इति संकल्पः ॥ नांदीश्राद्धांते पूर्वपूजितमातृकासहितमं-डपदेवतास्थापनम् ॥ ततः पूर्वोक्तरीत्या वेदिनिर्माणम् ॥ इति पूर्वदिनकृत्यम् ॥ ततः परदिनेऽतिक्रांतं चौलं कृत्वा पूर्व जातचौलं त्वभ्यंगस्नानेन स्नापयित्वा मात्रा सह भोजयेत् ॥ तदा ब्रह्मचारिभ्यो भोजनं देयमित्याचारः ॥ ततो देशकालौ संकीर्त्यास्य कुमारस्य द्विजत्वसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं गायत्र्युपदेशं कर्तुं तत्प्राच्यांगभूतं वपनादि करिष्य इति संकल्प्य वपनादि कुर्यात् ॥ मुख्यशिखान्य-शिखानां चौले धृतानामत्र वापनम् ॥ ततः स्नातमहतवस्त्रं बद्धशिखं कृतमंगल-तिलकं वटुं कुर्युः ॥ मौहूर्तिकं संपूज्य तदुक्ते सुमुहूर्ते आचार्यो वेद्यां प्राङ्मुख उपविष्टोंतःपटमपसार्य वटुमुखमीक्षेत ॥ कृतनमस्कारांते स्वांके कुर्वीत ॥ ततो विप्रा यथाचारं मंत्रैरुभयोः शिरस्यक्षतान् क्षिपेयुः ॥ एवं यथागृह्यमुपनयनप्रयोगं ज्ञात्वानुष्ठेयम् ॥ सर्वत्र वटुना गायत्र्यादिमंत्रान्वाचयन् संधिकृतं वर्णविकारं नान्यथा कुर्यात् ॥ प्रयोगशेषं समाप्य द्वे शते शतं यथाशक्ति वा ब्राह्मणभोजनं संकल्प्य विप्रेभ्यो भूयसीं दक्षिणां दद्यात् ॥ ततो ब्रह्मचारी नूतनभिक्षाभाजने मातरं मातृष्वस्रादिकां वा भिक्षां भवती ददात्विति अनुप्रवचनीयार्थं तण्डुलान्या-चेत ॥ पितरं भिक्षां भवान् ददाविति याचेत ॥ भैक्षमाचार्याय निवेद्य मध्याह्न-संध्यामुपास्य गुरुसंनिधावहःशेषं नयेत ॥ तद्दिने मध्याह्नसंध्या विकल्पितेत्यन्ये ॥ ब्रह्मयज्ञस्तु द्वितीयदिनमारभ्य गायत्र्या कार्यः ॥ अनुप्रवचनीयहोमारंभात्पूर्वं गर्जितवृष्ट्यादिसंभावनायां दिवैव चरुश्रपणांतं कृत्वास्तमिते जुहुयात् ॥ पाका-भावे गर्जितादिनिमित्ते तु शांतिं कृत्वा पाकः कार्यः ॥ ॥ अथ शांतिप्रयोगः ॥ ब्रह्मौदनपाकात्पूर्वं गर्जितेन सूचितस्य ब्रह्मचारिकर्तृकाध्ययनविघ्नस्य निरसनद्वारा

---

१ अनेकोद्देशेन तद्दृष्टांतानुष्ठानं तन्त्रम् ।

श्री०शांतिं करिष्ये इति संकल्प्य स्वस्तिवाचनाचार्यवरणे कृते आचार्योग्निं प्रतिष्ठाप्य चक्षुषी आज्येनेत्यंते सवितारमष्टोत्तरशतसंख्यसाज्यपायसाहुतिभिर्गायत्रीमंत्रेण शेषेण स्विष्टकृतमित्यादिप्रायश्चित्तहोमांते गायत्र्या सवितारमाज्येनेत्यन्वाधाय गृहसिद्धपायसहोमांते बृहस्पतिसूक्तजपः ॥ अंते आचार्याय धेनुं दत्त्वा शतं यथाशक्ति वा विप्रान् भोजयिष्ये इति संकल्पयेत् ॥

## अथ मेधाजननात्पूर्वमग्निनाशे विचारः ।

मेधाजननात्पूर्वकालिकाग्निकार्यं यावदुपनयनाग्निनाशे उपनयनाहुतिभिः कटिसूत्रधारणादिमाणवकसंस्कारावक्षारणाग्निकार्यगायत्र्युपदेशरहिताभिः पूर्वोत्तरतंत्रसहिताभिरग्निमुत्पाद्य तत्रानुप्रवचनीयपूर्वभाव्यग्निकार्यं कृत्वानुप्रवचनीयहोमं कृत्वा मेधाजननात्प्राक्तनान्यग्निकार्याणि कृत्वा मेधाजननं कार्यमिति कौस्तुभे उपपादितम् ॥ नष्टस्योपनयनाग्नेः पुनरुत्पत्तिं करिष्ये इति संकल्पः ॥ नष्टस्योपनयनाग्नेः पुनरुत्पत्तिहोमे विनियोग इति विशेष इति चोक्तम् ॥ मम तु उपनयनाहुतिभिरग्निमुत्पाद्य तत्र मेधाजननपूर्वभाव्यग्निकार्याणि कृत्वा मेधाजननं कार्यम् ॥ अनुप्रवचनपूर्वभाव्यग्निकार्यमनुप्रवचनीयहोमश्च न कार्य इति भाति ॥ गायत्र्युपदेशानुप्रवचनीयमेधाजननानां त्रयाणां समप्रधानभावेनाध्ययनांगत्वादग्नेस्त्रितयांगत्वात् कौस्तुभोक्तरीत्या गायत्र्युपदेशतत्पूर्वाग्निकार्यावृत्त्यभाववदनुप्रवचनीयतत्पूर्वाग्निकार्ययोरावृत्त्यभावौचित्यात् ॥ न ह्यग्निष्टोमांगपशुत्रयस्यांगे यूपे पशुद्वयानुष्ठानानंतरं नष्टे तृतीयपश्वर्थं यूपोत्पादने द्वितीयपश्वनुष्ठानमप्यावर्तते ॥ अत्र सदस्त्सद्भिर्विचार्यानुष्ठेयम् ॥ सायंसंध्याग्निकार्यं कृत्वानुप्रवचनीयहोमं ब्रह्मचारी कुर्यात् ॥ बटोरशक्तौ चरुश्चरुपणांतमन्यः कुर्यात् ॥ होममात्रं बटुः कुर्यात् ॥ हुतचरुशेषेण त्र्यवरब्राह्मणभोजनम् ॥

## अथ बटुव्रतम् ।

"क्षारादिवर्ज्यमश्नीयाद्ब्रह्मचारी दिनत्रयम् ॥ शयीताधश्चतुर्थेह्नि मेधाजननमाचरेत् ॥ यद्वा द्वादशरात्रं स्याद्ब्दव्रतमथापि वा ॥ मेधाजननविधिरन्यत्र ॥

## अथ मंडपदेवतोत्थापनम् ।

तच्च स्थापनदिनात्सप्तमदिवसे पंचमसप्तमदिनयोश्च शुभम् ॥ षष्ठदिने विषमदिने चाशुभम् ॥

## अथ मंडपोद्वासनपर्यंतं निषेधाः ।

"नांदीश्राद्धे कृते पश्चाद्यावन्मातृविसर्जनम् ॥ दर्शश्राद्धं क्षयश्राद्धं स्नानं शीतोदकेन च ॥ अपसव्यं स्वधाकारं नित्यश्राद्धं तथैव च ॥ ब्रह्मयज्ञं चाध्ययनं नदीसीमादिलंघनम् ॥ उपवासव्रतं चैव श्राद्धभोजनमेव च ॥ नैव कुर्युः सपिंडाश्च

मंडपोद्वासनावधि ॥" अत्र स्वधाकारग्रहणं तत्सहचरितवैश्वदेवनिषेधार्थम् ॥ अत्र सपिंडास्त्रिपुरुषपर्यंता इति पुरुषार्थचिंतामणौ ॥ "अभ्यंगे सूतके चैव विवाहे पुत्रजन्मनि ॥ मांगल्येषु च सर्वेषु न धार्यं गोपिचंदनम् ॥" एतेषु भस्मधारणमपि न कुर्वंति ॥ जननाशौचे भस्मगोपीचंदने निषिद्धे ॥ मृतके भस्म धार्यम् ॥

## अथ विकलांगोपनयनविचारः ।

षंढांधबधिरमूकपंगुकुब्जवामनादयः संस्कार्याः ॥ "मत्तोन्मत्तौ न संस्कार्यौ" इत्येके पातित्यं तु नास्ति ॥ कर्मानधिकारात् ॥ तदपत्यं संस्कार्यम् ॥ ब्राह्मण्यां ब्राह्मणादुत्पन्नो ब्राह्मण एवेति श्रुतेः ॥ अन्ये तु मत्तोन्मत्तावपि संस्कार्यावित्याहुः॥ तत्र होममाचार्यः करोति उपनयनं चाचार्यसमीपनयनमग्निसमीपनयनं वा गायत्रीवाचनं वा विकलांगविषये प्रधानम् ॥ एतत्रयान्यतममात्रं विकलांगे संपाद्यम् ॥ अन्यदंगं यथासंभवं कार्यम् ॥ मूकबधिरादेः सावित्रीवाचनासंभवे स्पृष्ट्वा सावित्रीजपः कार्यः ॥ संस्कारमंत्राः वासःपरिधानमंत्राश्चाचार्येण वाच्याः ॥ केचित्तूष्णीं वासःपरिधानादिकमाहुः ॥ एवं विवाहेपि कन्यास्वीकरणादन्यत्सर्वं विप्रेण कारयेदित्यादिवचनात् ॥ इति विकलांगोपनयनादिविचारः ॥ "अमृते जारजः कुंडो मृते भर्तरि गोलकः ॥" एतयोः कुंडगोलकयोः संस्कार्यत्ववचनं युगांतरविषयम् ॥ तस्य क्षेत्रजपुत्रविषयत्वात् ॥ कलियुगे दत्तौरसातिरिक्तपुत्राणां निषेधात् ॥ "ज्येष्ठे त्वकृतसंस्कारे गर्भाधानादिकर्मभिः ॥ कनिष्ठो नैव संस्कार्य इति शातातपोऽब्रवीत्॥"इदं चौलोपनयनांतसंस्काराविषयं विवाहविषये तु विकलांगेषु नायं नियमः ॥ कन्यास्वपि ज्येष्ठाया विवाहानंतरमेव कनिष्ठाया विवाहः ॥ ज्येष्ठपुत्रविवाहाभावेपि कनिष्ठा कन्या संस्कार्या ॥ ज्येष्ठस्योपनयनाभावे कनिष्ठा न विवाह्या ॥

## अथ पुनरुपनयनम् ।

तच्च त्रिविधम् ॥ प्रत्यवायनिमित्तकं प्रायश्चित्तभूतं पुनरुपनयनमाद्यम् ॥ तच्च जातकर्मादिसहितं तद्रहितं प्रायश्चित्तांतरसहितं केवलं चेत्यनेकविधम् ॥ कृतस्योपनयनस्योक्तकालाद्यंगवैगुण्येन वैफल्यापत्तावपरम् ॥ वेदांतराध्ययनार्थं विहितं तृतीयम् ॥ तत्र प्रथमं यथा ॥ अमत्या औषधांतरानाश्यरोगनाशार्थं पैष्ट्याः सुरायाः पाने त्रिमासं कृच्छ्राचरणं पुनरुपनयनं च ॥ मत्या पैष्ट्यन्यसुराया औषधार्थं पाने कृच्छ्रातिकृच्छ्रौ पुनरुपनयनं च॥ पैष्टीपाने द्वादशाब्दम्॥अज्ञानाद्वारुणीं गौडी माध्वी सुरां पीता चेत्पुनरुपनयनं तप्तकृच्छ्रं च ॥ अज्ञानादेतोर्विण्मूत्राणामशने सुरासंस्पृष्टान्नजलादिभक्षणे च पुनः संस्कारस्तप्तकृच्छ्रं च ॥ ज्ञात्वा विण्मूत्राद्यशने चांद्रायणपुनःसंस्कारौ ॥ लशुनपलांडुगृंजनविड्वराहग्रामकुक्कुटनरगो-

मांसभक्षणे द्विजातीनां तत्तत्प्रायश्चित्तांते पुनरुपनयनम् ॥ अविखरोष्ट्रमानुषीक्षीरपाने हस्तिनीवडवाक्षीरपाने च तप्तकृच्छ्रं पुनः संस्कारश्च ॥ रासभोष्ट्राद्यारोहणे कृच्छ्रः पुनः संस्कारश्च ॥ इदं हेमाद्रिमतमिति सिन्धौ क्वचित् मिताक्षरास्मृत्यर्थसारादिमते रासभोष्ट्रारोहे उपवासत्रयादिमात्रं न तु पुनः संस्कारः कौस्तुभाशयोप्येवमेव ॥ वृषभारोहणे अमत्या कृच्छ्रं मत्या कृच्छ्रत्रयादि ॥ केचिद्वृषारोहे पुनः संस्कारं कुर्वंति तत्र मूलं मृग्यम् एवमजबस्तमहिषारोहेपि ॥ मांसभक्षकपशोर्विड्भक्षणे पुनरुपनयनमात्रम् ॥ केचित्तु मानुषमलभक्षणेपि पुनः संस्कारमात्रमाहुः ॥ "प्रेतशय्याप्रतिग्राही पुनः संस्कारमर्हति ॥" जीवतो मृतवार्तां श्रुत्वांत्यकर्मकरणे तं घृतकुंभे निमज्योद्धृत्य स्नापयित्वा जातकर्माद्युपनयनांतसंस्कारान् कृत्वा त्रिरात्रव्रतांते पूर्वभार्यया तस्यां मृतायामन्यभार्यया वा विवाहः कार्यः आहिताग्निश्चेत्पुनराधानायुष्मदिष्ट्यादि ॥ तीर्थयात्रां विना कलिंगांगवंगांध्रसिंधुसौवीरम्लेच्छदेशप्रत्यंतवासिदेशगमने पुनः संस्कारः ॥ चांडालान्नभक्षणे चांद्रायणम् ॥ बुद्धिपूर्वभक्षणे कृच्छ्राब्दम् ॥ उभयत्र पुनः संस्कारः "अजिनं मेखलादंडो भैक्ष्यचर्याव्रतानि च ॥ निवर्तंते द्विजातीनां पुनः संस्कारकर्मणि ॥" वपनं मेखलेति स्मृत्यंतरे पाठः ॥ ब्रह्मचारिणो मधुमांसाशने पुनरुपनयनं प्राजापत्यं त्रिरात्रोपवासो वा ॥ मत्या भक्षणे पराकः ॥ अभ्यासे द्विगुणं पुनः संस्कारश्च ॥ पितृमातृगुरुभ्यो भिन्नस्य प्रेतस्यांत्यकर्मकरणे ब्रह्मचारिणः पुनरुपनयनम् ॥ हस्तमथितदधिभक्षणे बहिर्वेदिपुरोडाशाशने अभ्यासे कृच्छ्रः पुनः संस्कारश्च ॥ यः संन्यासं गृहीत्वा ततो निवृत्य गार्हस्थ्यं चिकीर्षति स षण्मासं कृच्छ्रान् कृत्वा जातकर्मादिसंस्कारैः संस्कृतः शुद्धो गार्हस्थ्यं कुर्यात् ॥ एवमनशनं मरणार्थं संकल्प्य निवृत्तोपि कुर्यात् ॥ "कर्मनाशाजलस्पर्शात् करतोयाविलंघनात् ॥ गंडकीबाहुतरणात्पुनः संस्कारमर्हति ॥"

## अथ द्वितीयं पुनरुपनयनम् ।

"प्रदोषे निश्यनध्याये मंदे कृष्णे गलग्रहे ॥ अपराह्णे चोपनीतः पुनः संस्कारमर्हति" ॥ अत्र प्रदोषः प्रदोषदिनं कृष्णः कृष्णपक्ष एकादश्यादिरित्यत्रिकरूपोऽपराह्णश्च दिनतृतीयभागरूप इत्युक्तम् ॥ अनध्याया अपि नित्या एव पूर्णिमाप्रतिपदादयः पुनरुपनयननिमित्तं न तु नैमित्तिका अकालवृष्ट्यादिनिमित्तकत्रिरात्रादयः ॥ नैमित्तिकेषु प्रातर्गर्जितनिमित्तानध्याय एव पुनः संस्कारनिमित्तम् ॥ अत्र विस्तारः कौस्तुभे ॥ अंसाभिमर्शपूर्वकं वटोः समीपमानयनं प्रधानकर्म तस्य विस्मरणे पुनरुपनयनम् ॥ एवं गायत्र्युपदेशविस्मरणेपि ॥

## अथ तृतीयपुनरुपनयननिमित्तप्रकारः ।

एकं वेदमधीत्यवेदांताराध्ययनचिकीर्षायां प्रतिवेदं पुनरुपनयनमित्येके ॥ अन्यवेदिनामृग्वेदाध्ययनार्थं पुनरुपनयनमित्यपरे ॥ अन्ये तु एकेनैवोपनयनेन वेदत्रयाध्ययनाधिकारः ॥ अथर्ववेदाध्ययनार्थं द्वितीयमुपनयनमित्याहुः ॥ तेन ऋगादिवेदत्रयाध्यायिनो मुंडमांडूक्याद्यथर्वणोपनिषदो विना पुनः संस्कारं पठंति ते चिंत्याः ॥ युगपदनेकवेदारंभे नोपनयनावृत्त्यपेक्षेति सकृदुपनीत्या युगपत्सकलवेदारंभः सिध्यतीत्यपरे ॥ तत्रैकवेदाध्ययनानंतरं यद्वेदाध्ययनचिकीर्षा तद्वेदेतिकर्तव्यताकं पुनरुपनयनम् ॥ तत्र वपनं ब्रह्मौदनं मेधाजननं दीक्षा च कृताकृता ॥ परिदानांता क्रिया भवति ॥ अनध्यायादिके द्वितीयपुनरुपनयननिमित्ते सर्वमविकृतं यथोक्तकाले उपनयनम् ॥ अथ प्रायश्चित्तार्थे व्रतबंधे विशेषः ॥ तत्र निमित्तानंतरमेव करणे उदगयनपुण्यनक्षत्राद्युक्तकालो नापेक्ष्यते ॥ अन्यथा तु यथोक्तकालापेक्षा ॥ तत्र कर्ता पिता ॥ तदभावे पितृव्यादिः सपिंडः तदभावेन्यः कश्चित् ॥ यत्र पुनरुपनयनमात्रं प्रायश्चित्तत्वेनोक्तं तत्र पर्षदुपदिष्टविधिना तदेव कार्यम् ॥ यत्र तु प्रायश्चित्तांतरसहितं विहितं तत्रोक्तविधिना प्रायश्चित्तं संस्कार्येण कारयित्वाचार्येण तस्योपनयनं कार्यम् ॥ यत्र च जातकर्मादिसंस्कारसहितमुपनयनं विहितं तत्र जातादिचौलांतसंस्कारान् कृत्वा कार्यम् ॥ पुनरुपनयने गायत्रीस्थाने तत्सवितुर्वृणीमह इत्यस्या उपदेशादाचार्येणास्या एव ऋचो द्वादशोत्तरसहस्रजपः कृच्छ्रत्रयं चोपनेतृत्वाधिकारार्थं कार्यम् ॥ तत्रास्य कृतोर्ध्वदैहिकस्य पुनः संस्कारद्वारा श्रीपरमेश्वरप्रीत्यर्थं जातकर्माद्युपनयनांतसंस्कारान् करिष्ये ॥ एवं निमित्तांतरेष्वपि संकल्प ऊह्यः सर्वसंस्कारोद्देशेन तंत्रेण नांदीश्राद्धादिश्मश्रुवपनानंतरं चौलकेशवपनम् ॥ मनुष्यादिक्षीरपानादिनिमित्तांतरे तु संस्कार्योमुकदोषपरिहारार्थं पर्षदुपदिष्टममुकप्रायश्चित्तं करिष्ये इति संकल्प्य तत्कुर्यात् ॥ आचार्यस्तु अस्यामुकदोषपरिहारार्थं पुनः संस्कारसिद्धिद्वारा श्री० पुनरुपनयनं करिष्ये इति संकल्प्योपनयनमात्रं कुर्यात् ॥ यत्रोपनयनमात्रोक्तिस्तत्र संस्कार्यस्य न संकल्पः किंत्वाचार्यस्यैव ॥ पुनरुपनयनं ग्रामाद्बहिः प्राच्यामुदीच्यां वा गत्वा कार्यम् ॥ नांदीश्राद्धांते मंडपदेवतास्थापनम् ॥ कृतमंगलस्नानं संस्कार्यं भोजयित्वा वपनपक्षे वपनस्नाने कारयित्वा अस्य प्रायश्चित्तार्थं पुनरुपनयनहोमे देवतापरिग्रहार्थमन्वाधानं करिष्ये अस्मिन्नन्वाहिताग्नावित्यादि नित्यवत् ॥ ब्रह्मचारिणः पुनरुपनयने समंत्रकं वासोधारणं नित्यमन्यस्य वैकल्पिकम् ॥ ब्रह्मसूत्रधारणादिसूर्येक्षणांतं नित्यवत् ततो युवा सुवासा इत्येतन्मंत्रकं प्रदक्षिणमावर्तनादिवासोबद्धांजलिग्रहणांते प्रणवव्याहृतीनाम् ऋष्यादि स्मृत्वा तत्सवितुर्वृणी इत्यस्य मह श्यावाश्वः सवितानुष्टुप् ॥ पुनरुपनयने उपदेशे विनि-

योगः ॥ पादोर्ध्वंशः सर्वामिति त्रिर्वाचयेत् ॥ ब्रह्मचारिणो मेखलादानादि नित्यवत् ॥ ब्रह्मचर्योपदेशांतम् अन्यस्य मेखलाजिनदंडधारणं पाक्षिकम् ॥ ब्रह्मचर्योपदेशो दिवा मास्वाप्सीरित्यंतः वेदमधीष्वेत्यादिकं न ततः स्विष्टकृदादि ॥ मेधाजननपक्षे तत्पर्यंताग्निधारणं भिक्षापूर्वकानुप्रवचनीयः॥ गायत्र्याः स्थाने तत्सवितुर्वृणीमह इति होमः ॥ त्रिरात्रव्रतांते यस्मिन्नाश्रमे पुनरुपनयनं तदाश्रमधर्मान्कुर्यात् ॥ यत्र पुनरुपनयनांते पुनर्विवाहः कृतौर्ध्वदैहिकादेः श्रूयते तत्र मेखलादिधारणपूर्वकं कतिचिद्दिनानि ब्रह्मचर्यं कृत्वोचितकाले समाप्य पूर्वभार्ययान्यया वा विवाहं कुर्यात ॥ इति ऋग्वेदिनां पुनः संस्कारः ॥

## अथ यजुर्वेदिनां पु० ।

तत्र बौधायनो ब्रह्मचारिणः पितृज्येष्ठाभ्यामन्योच्छिष्टभक्षणे स्त्रिया सह भोजने मधुमांसश्राद्धसूतकान्नगणान्नगणिकान्नाशने पुनरुपनयनमित्याद्युक्त्वाग्निमुखं कृत्वाज्यान्तपालाशसमिधमादाय वाचयति पुनस्त्वादित्या० कामाय स्वाहेति यन्म आत्मनो मिंदाभूदग्निः पुनरग्निश्चक्षुरदादिति द्राभ्यां हुत्वा चरुं पक्त्वा जुहोति सप्तते अग्ने० घृतेन स्वाहेति ततो येन देवाः पवित्रेणेति तिसृभिरुक्तैः ततः स्विष्टकृत्प्रभृति सिद्धमाधेनुवरप्रदानात् ॥ अथापरमापरिधानात्कृत्वा पालाशीं समिधमादाय व्रात्यप्रायश्चित्तं जुहोति व्याहृतीर्जुहोति ॥ अथापरो ब्राह्मणवचनात् सावित्र्यां शतकृत्वोभिमंत्रितं घृतं प्राश्य कृतप्रायश्चित्तो भवतीत्यादिकमवदत् अत्रोक्तपक्षाणां शक्ताशक्तभेदेन व्यवस्था ॥ इदं कौस्तुभे द्रष्टव्यम् ॥ एवं शाखांतरेष्वपि वपनमेखलाजिनदंडभैक्ष्यचर्याव्रतादिकं वैकल्पिकं व्यवस्थयानुष्ठाय स्वस्वशाखोक्तोपनयनं कार्यम् ॥

## अथ ब्रह्मचारिधर्माः ।

तत्र संध्यात्रयमग्निपरिचरणं भैक्षं च नित्यम् ॥ तत्राग्निकार्यं प्रातः सायं च सायमेव सकृद्वा ॥ तत्र पलाशखदिराश्वत्थशमीसमिधः श्रेष्ठास्तदलाभेऽर्कवेतसाम् भवच्छब्दपूर्विका भिक्षा विप्राणाम् ॥ सा च विप्रगृहेष्वेव ॥ आपदि शूद्रगृहेषु आमान्नं गृह्णीयात् हव्ये श्राद्धभिन्नकव्ये चाभ्यर्थितो भुंजीत ॥ अस्य ब्रह्मयज्ञोपि नित्यः ॥ स चोपाकरणात्पूर्वं गायत्र्या कार्यः ॥ गुरूच्छिष्टं मध्वादिकं निषिद्धमपि तदन्यापरिहार्यरोगनिवृत्त्यर्थं भक्षणीयं निषिद्धान्यत् गुरूच्छिष्टं त्वनौषधमपि भक्ष्यम् ॥ एवं ज्येष्ठभ्रातुः पितुश्चोच्छिष्टेषु ज्ञेयम् ॥ दिवास्वापो नेत्रे कज्जलमुपानच्छत्रं मंचादौ शयनं च वर्ज्यम् ॥ "तांबूलाभ्यंजनं चैव कांस्यपात्रे च भोजनम् ॥ यतिश्च ब्रह्मचारी च विधवा च विवर्जयेत् ॥" मधुसूतकान्नश्राद्धान्नादेर्निषेधाः पुनःसंस्कारप्रकरणोक्ता अनुसंधेयाः ॥ "मेखलामजिनं दण्डमुपवीतं च

नित्यशः ॥ कौपीनं कटिसूत्रं च ब्रह्मचारी विधारयेत् ॥" मेखलोपवीतादौ त्रुटिते जले प्रास्यान्यद्धारयेत् ॥ यज्ञोपवीतनाशे मनोऽयोतिरित्यनेन व्रातपतिभिश्चेति चतस्र आज्याहुतीर्जुहुयादित्युक्तम् ॥ अस्य गुरुपरिचर्याप्रकारोऽन्यत्र ज्ञेयः ॥

## अथ ब्रह्मचारिव्रतलोपे प्रायश्चित्तम् ।

संध्याग्निकार्यलोपेष्टसहस्रगायत्रीजपः ॥ क्वचित्सकृल्लोपे मानस्तोकेतिमंत्रस्य शतं जप उक्तः ॥ भिक्षालोपेऽष्टशतमभ्यासे द्विगुणं पुनः संस्कारश्च ॥ मधुमांसाद्यशने उक्तम् ॥ स्त्रीसंगे गर्दभपशुः एकानेकव्रतलोपसाधारणमृग्विधाने ॥ "तं वो धिया जपेन्मंत्रं लक्षं चैव शिवालये ॥ ब्रह्मचारी स्वधर्मेषु न्यूनं चेत्पूर्णमेति तत् ॥" उपाकर्म कृत्वा प्रागुक्तविद्यारंभकालेक्षरारंभोक्तविष्ण्वादिपूजाप्रकारेण वेदारंभः कार्यः ॥ द्विजस्त्रीणां युगांतरे मौंजीबंधो वेदाध्ययनं चासीत् ॥ कलियुगे तु नैतद्वयम् ॥ अतः स्त्रीणां वेदोच्चारणादौ दोषः ॥

## अथानध्यायाः ।

ते च नित्या नैमित्तिकाश्च प्रायेण मौंजीप्रकरणे उक्ताः ॥ततोन्येपि उभयविधानध्याया बहवो निबंधेषूक्तास्तेत्र न प्रपंच्यंते ॥ कलिकालेस्मिंस्तावदनध्यायपालनस्य दुर्मेधसामशक्यत्वात् ॥ तथा च हेमाद्रौ स्मृतिः ॥ "चतुर्दश्यष्टमीपर्वप्रतिपत्स्वेव सर्वदा ॥ दुर्मेधसामनध्यायास्त्वंतरागमनेषु च" इति ॥ अतः कलौ प्रतिपद्वयमष्टमीद्वयं चतुर्दशीद्वयं पूर्णिमा दर्शोऽयनसंक्रांतिरित्येतावत एवानध्यायांस्त्यक्त्वा वेदशास्त्रादिकमध्येतव्यम् ॥ पुंसां प्रायोल्पप्रज्ञत्वात् शिष्टाचारोप्येवमेव ॥ पूर्वदिने सायं परत्र प्रातश्च त्रिमुहूर्तानध्यायातिथिसत्त्वे उदयेस्तमये वापीत्यनेन दिनद्वयेऽनध्यायप्राप्तौ वचनांतरं केचिदाहुः ॥ क्वचिद्देशे यावत्तदिननाडिकास्तावदेव त्वनध्यायो न तन्मिश्रे दिनांतर इति ॥ इदमप्यल्पप्रज्ञाविषयम् ॥ चतुर्थीसप्तम्यादौ प्रदोषनिर्णय उक्तः ॥ प्रदोषेषु 'न स्मरेन्न च कीर्तयेत' इत्युक्तेरितरानध्यायतो दोषाधिक्यम् ॥"अनध्यायस्तु नांगेषु नेतिहासपुराणयोः ॥ न धर्मशास्त्रेष्वन्येषु पर्वण्येतानि वर्जयेत् ॥ नित्ये जपे च काम्ये च क्रतौ पारायणेपि च॥ नानध्यायोस्ति वेदानां ग्रहणे ग्राहणे स्मृतः ॥ "

## अथाध्ययनधर्माः ।

वेदारंभेवसाने च गुरोः पादोपसंग्रहणम् ॥ आदौ प्रणवमुच्चार्य वेदमधीत्यांते प्रणवमुच्चार्य भूमिं स्पृष्ट्वा विरमेत् ॥ रात्रेः प्रथमयामे चरमयामे च वेदाध्ययनम् ॥ "यामद्वयं शयानस्तु ब्रह्मभूयाय कल्पते ॥ " गुरुं पितरं मातरं च मन्येत कदापि न द्रुह्येत ॥ "अध्यापिता ये गुरुं नाद्रियंते शिष्या वाचा मनसा

कर्मणा वा ॥ यथैव तेन गुरोर्भोजनीयास्तथैव तान्न भुनक्ति श्रुतं तत् ॥" इत्यध्ययनधर्माः ॥

## अथ व्रतानि ।

तानि महानाम्नीव्रतमहाव्रतोपनिषद्व्रतगोदानव्रताख्यानि चत्वारि क्रमेण जन्मतस्त्रयोदशादिषु वर्षेषूत्तरायणे चौलोक्ततिथिनक्षत्रवारादिषु कार्याणि ॥ अत्र विस्तृतप्रयोगाः कौस्तुभादौ स्वस्वगृह्येषु च द्रष्टव्याः ॥ एतेषां लोपे प्रत्येकमेकैकं कृच्छ्रं चरित्वा गायत्र्या शताज्याहुतीर्जुहुयात् ॥ त्रीन् षट् द्वादश वा कृच्छ्रान् कुर्यात् इत्यन्यत्र ॥

## अथ समावर्तनम् ।

गुरवे क्षेत्राद्यन्यतमं दत्त्वा तदनुज्ञया स्नायात ॥ स्नानं नाम समावर्तनम् ॥ तानि च क्षेत्रं हेम गौरश्वश्च च्छत्रोपानहौ धान्यं वस्त्रत्रयं शाकमित्येतानि एषु यद्गुरोः प्रियं तद्देयम् ॥ दानं विनैव गुरुप्रीतौ तदनुज्ञयैव स्नायात॥क्षेत्रादिनापि न विद्यानिष्क्रयः॥ " एकैकमक्षरं यस्तु गुरुः शिष्ये निवेदयेत् ॥ पृथिव्यां नास्ति तद्द्रव्यं यद्दत्त्वा ह्यनृणी भवेत् " इत्युक्तेः ॥ स च स्नातकस्त्रिविधः ॥ विद्यास्नातको व्रतस्नातक उभयस्नातक इति ॥ तत्रैकं द्वौ त्रीन् चतुरो वा वेदान्वेदैकदेशं वाधीत्य तदर्थं च ज्ञात्वा द्वादशवर्षादिब्रह्मचर्यकालावधेः प्रागेव स्नाति स विद्यास्नातकः ॥ उपनयनव्रतसावित्रीव्रतवेदव्रतान्यनुष्ठाय वेदसमाप्तेः पूर्वमेव स्नातो व्रतस्नातकः ॥ द्वादशवर्षादिब्रह्मचर्यसमाप्त्या वेदं समाप्य स्नातो विद्याव्रतोभयस्नातकः ॥ तत्रोपनयनोत्तरं मेधाजननपर्यंतं त्रिरात्रद्वादशरात्रादिव्रतमुपनयनव्रतम् ॥ मेधाजननोत्तरमुपाकर्मान्तं ब्रह्मचारिधर्मानुष्ठानं सावित्रीव्रतम् ॥ तदुत्तरं वेदाध्ययनार्थं द्वादशवर्षादिकालावच्छिन्नं व्रतं वेदव्रतम् ॥ स्वाध्यायोध्येतव्य इति विधेरर्थज्ञानपर्यंतत्वाद्वेदार्थज्ञानं विना वेदाध्ययनमात्रेण समावर्तनेधिकारो नेति पूर्वमीमांसकाः॥वेदग्रहणमेव विधिफलम्॥पूर्वकांडार्थज्ञानं कर्मानुष्ठानाक्षिप्तम् ॥ उत्तरकांडार्थज्ञानं काम्यश्रोतव्यविधिप्राप्तमित्युत्तरमीमांसकाः॥तत्र संहिताब्राह्मणं च मिलित्वैको वेदः आरण्यकांडब्राह्मणांतर्गतमेव ॥ संपूर्णैकवेदाध्ययनेष्वशक्तो वेदैकदेशं पठेत् ॥ अत्यशक्तेन संहितायाः प्रथमचरमसूक्ते कतिपयसूक्तानां प्रथमा ऋचः सर्वसूक्तानां प्रथमा ऋचो वाध्येतव्याः ॥ एवं वेदैकदेशाध्ययनोत्तरं समावृतो विवाहितो वा ब्रह्मचर्योक्तनियमेन वेदाध्ययनं कुर्यात्॥ तत ऋतौ भार्यागमनं कार्यम्॥ब्रह्मचारिव्रतलोपप्रायश्चित्तं कृच्छ्रत्रयं कृत्वा महाव्याहृतिहोमं च कृत्वा समावर्तनं कार्यम् ॥ एतच्च संध्याग्निकार्यभिक्षालोपशूद्रादिस्पर्शकटिसूत्रमेखलाजिनत्यागादिवास्वापांजनपर्युषितभोजनादिव्रतभंगेषु अल्पकालमल्पव्रतभंगे ज्ञेयं बहुधर्मलोपे तु तंवोधियानव्यस्याशविष्ठमिति मन्त्रस्य लक्षजपः शिवा-

लये इत्युक्तम् ॥ एवं च महानाम्न्यादिव्रतलोपस्य ब्रह्मचर्यव्रतलोपस्य च प्रायश्चित्तोत्तरं समावर्तनाधिकारः ॥

## अथ समावर्तनकालः ।

तत्रोपनयनोक्तकाले समावर्तनमिति बहवो ज्योतिर्ग्रंथाः तेनानध्याये प्रदोषदिने भौमशनिवारयोः पौषापाढयोर्दक्षिणायने च न भवति॥मार्गशीर्षे विवाहप्रसक्तौ दक्षिणायनेपि भवति ॥ अन्यथा "अनाश्रमी न तिष्ठेत दिनमेकमपि द्विजः" इति निषेधातिक्रमापत्तेः ॥ अन्ये तु मौंज्युक्तकालोपादाने मूलाभावात् रिक्तात्रयपूर्णिमामावास्याष्टमीप्रतिपद्विन्नतिथिषु शुक्लेत्यत्रिकभिन्नकृष्णे च गुरुशुक्रास्तादिदिनक्षयभद्राव्यतीपातादिदोषशून्ये शुभवारे समावर्तनं कार्यम् ॥ नात्र प्रदोषसोपपदादितिथिवर्जनमावश्यकमित्याहुः ॥ पुष्यपुनर्वसुमृगरेवतीहस्तानुराधोत्तरात्रयरोहिणीश्रवणविशाखाचित्राः श्रेष्ठाः॥एतदलाभे मौंज्युक्तभानि क्वचिद्भौमशनिवारौ सिन्धावुक्तौ॥अथ मणिकुंडलवस्त्रयुगच्छत्रोपानद्युगदंडस्रगुन्मर्दनानुलेपनांजनोष्णीषाणि आत्मने आचार्याय च संपाद्यालाभे आचार्यायैव वा संपादयेत् ॥ देशकालौ संकीर्त्य मम ब्रह्मचर्यनियमलोपजनितसंभावितदोषपरिहारेण समावर्तनाधिकारसंपादनद्वारा श्रीपरमेश्वरप्रीत्यर्थमाज्यहोमपूर्वकं कृच्छ्रत्रयमहानाम्न्यादिव्रतचतुष्टयलोपजनितप्रत्यवायपरिहारार्थं प्रतिसंस्कारमेकैकं कृच्छ्रं च गायत्र्याज्यहोमपूर्वकं तंत्रेणाहमाचरिष्ये इति संकल्प्याग्निप्रतिष्ठापनादि चक्षुषी आज्येनात्र प्रधानम् ॥ अग्निं वायुं सूर्यं प्रजापतिं चतसृभिराज्याहुतिभिः ॥ अग्निं पृथिवीं महांतमेकयाज्याहुत्या वायुमन्तरिक्षं महांतमेकया० आदित्यं दिवं महांतमेकयाज्या० चन्द्रमसं नक्षत्राणि दिशो महांतमेकया० अग्निं द्विः० विभावसुं शतक्रतुमग्निमग्निं वायुं सूर्यं प्रजापतिं चेत्यष्टावेकैकयाज्याहुत्या शेषेणेत्यादि ॥ आज्यभागांते व्यस्तसमस्तव्याहृतिभिर्हुत्वा ॥ भूरग्नये च पृथिव्यै च महते च स्वाहा अग्नये पृथिव्यै महते इदमित्यादि यथान्वाधानं त्यागः ॥ भुवो वायवे चांतरिक्षाय च महते च स्वाहा॥सुवरादित्याय च दिवे च महते च स्वाहा ॥ भूर्भुवः स्वश्चन्द्रमसे च नक्षत्रेभ्यश्च दिग्भ्यश्च महते च स्वाहा ॥ चन्द्रमसे नक्षत्रेभ्यो दिग्भ्यश्च महत इदं पाहि नो अग्न एनसे स्वाहा ॥ पाहि नो विश्ववेदसे स्वाहा ॥ यज्ञं पाहि विभावसो स्वाहा ॥ सर्वं पाहि शतक्रतो स्वाहा ॥ पुनरूर्जानिवर्तस्वपुनरग्न इहायुषा ॥ पुनर्नः पाह्यंहसः स्वाहा ॥ सहरय्या निवर्तस्वाग्नेपिन्वस्वधारया ॥ विश्वप्स्निया विश्वतस्परि स्वाहा ॥ पुनर्व्यस्त समस्तव्याहृतिचतुष्टयम् ॥ व्रतचतुष्टयार्थं गायत्र्याज्यहोमः ॥ कृच्छ्रत्रयगोनिष्क्रयं दत्त्वा होमशेषं समापयेत् ॥ महानाम्न्यादिलोपे प्रत्येकमष्टोत्तरशतमष्टाविंशन्निमष्टौ वा गायत्र्याज्याहुतीर्हुत्वा एकैकं कृच्छ्रं चरेत् ॥ इति प्रायश्चित्तप्रयोगः ॥

## अथ समावर्तनसंकल्पादि ।

मम गृहस्थाश्रमार्हतासिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं समावर्तनं करिष्ये इति संकल्प्य नांदीश्राद्धांतं वटुरेव कुर्यात् ॥ ब्रह्मचारी जीवत्पितृकश्चेत्पितुर्मात्राद्युद्देशः ॥ ब्रह्मचार्यसक्तश्चेत्पित्रादिस्तत्प्रतिनिधित्वेन नांदीश्राद्धांतं कुर्यात् ॥ समावर्तने उपनयनादाविव पित्रादिरेव नांदीश्राद्धकर्त्तेति मतांतरेण प्रायुक्तम् ॥ अवशिष्टप्रयोगः स्वस्वगृह्यानुसारेण ॥ दश त्रीन्वा विप्रान् भोजयेत् ॥ "दास्यंति मधुपर्कं ये तत्रैतां रजनीं वसेत् ॥" ततो व्रतानि संकल्पयेत् ॥ तानि च स्वसूत्रोक्तानि स्मृत्युक्तानि चेति द्विविधानि ॥ सर्वाण्यपि पुरुषार्थान्येव न तु समावर्तनांगानि ॥ तत्राशक्तः सूत्रोक्तान्येव व्रतानि कुर्यात् ॥ शक्तस्तु स्मृत्युक्तान्यपि ॥ तानि यथा ॥ निमित्तं विना न नक्तं स्नास्यामि ॥ न नग्नः शयिष्ये ॥ न नग्नां स्त्रियमीक्षिष्येन्यत्र मैथुनात् ॥ वर्षति न धाविष्ये ॥ न वृक्षमारोहिष्ये ॥ न कूपमवरोहिष्ये ॥ न बाहुभ्यां नदीं तरिष्ये ॥ न प्राणसंशयमभ्यापत्स्ये इति सूत्रोक्तानि ॥ अथ स्मृत्युक्तानि ॥ नित्यं यज्ञोपवीतद्वयं धारयिष्ये ॥ सोदककमण्डलुं छत्रमुष्णीषं पादुके उपानहौ सुवर्णकुंडले दर्भमुष्टिं च धारयिष्ये ॥ कर्तनेन ह्रस्वीकृतकेशश्मश्रुनखः स्याम् निमित्तं विना मुंडनं न करिष्ये इत्यर्थः ॥ 'न समावृत्ता मुंडेरन्' इति निषेधात् ॥ नित्यमध्ययनरतः स्याम् ॥ स्वशरीरादुद्धृतं स्वनिर्माल्यं पुष्पचन्दनादि पुनर्न धारयिष्ये ॥ शुक्लांबरधरः स्याम् ॥ सुगंधिप्रियदर्शनः स्याम् ॥ विभवे सति जीर्णवासा मलवद्वासाश्च न स्याम् ॥ रक्तं वासः शरीरपीडावहं वा वस्त्रं न धारयिष्ये ॥ गुरुं विनान्यैर्धृतं वस्त्रमलंकारं स्रजं च न धारयिष्ये ॥ अशक्तस्तु अन्यधृतमपि वस्त्रादि प्रक्षाल्य धारयेत् ॥ अन्यधृतोपवीतमुपानहौ च न धारये कंथां न धारयिष्ये ॥ न स्वरूपमुदके निरीक्षिष्ये ॥ न भार्यया साकमेकपात्रे एककाले वाश्नीयाम् ॥ एतद्विवाहभिन्नविषयम् ॥ शूद्राय धर्मज्ञानं नीतिज्ञानं व्रतकल्पं च नोपदिशामि ॥ एतत्साक्षादुपदेशपरम् ॥ 'कृत्वा ब्राह्मणमग्रतः' इति ब्राह्मणद्वारकोपदेशे दोषाभावात् ॥ गृहमेधिशूद्राय स्वोच्छिष्टं न दास्ये ॥ शूद्राय होमशेषं न दास्ये ॥ उद्धतोदकेन तिष्ठन्नाचमनं न करिष्ये ॥ जानुमात्रे तदधिके वा जले तिष्ठदाचमने दोषाभावात् ॥ अशुचिना एकहस्तेन वा आनीतजलैर्नाचमिष्ये ॥ पादेन पादधावनं न करिष्ये ॥ अकल्पां स्त्रियं न गमिष्यामि ॥ न प्रावृतमस्तकोहनि पर्यटिष्यामि ॥ रात्रौ मलमूत्रोत्सर्गे च प्रावृतशिराः स्याम् ॥ सोपानत्कोशनाभिवादननमस्कारांश्च न करिष्ये ॥ पादेनासनं नापकर्षिष्यामि ॥ एवमन्यान्यपि स्मृत्युक्तानि ज्ञेयानि ॥ एतेषु व्रतेषु यानि कर्तुं शक्नुयात्तावन्त्येव संकल्पयेत् ॥ अत्र संकल्पितव्रतोल्लंघने मत्या कृते त्र्यहमभोजनम् अमत्या कृते एकरात्रमभोजनं प्रायश्चित्तम् ॥ अशक्तस्त्रीनेकं वा विप्रं भोजयेत ॥ इति स्नातकव्रतानि ॥

## अथातुरसमावर्तनम् ।

आतुरदशायां यथोक्तसमावर्तनासंभवे संक्षेपतस्तत्कार्यम् ॥ तत्प्रयोगः ॥ संकल्प्य ब्रह्मचारी लिंगानि मेखलादीनि त्यक्त्वा वपनं कृत्वा तीर्थे स्नात्वा वासः परिधानाचमनतिलकधारणानि कृत्वाग्निं प्रतिष्ठाप्य तत्र प्रजापतिं मनसा ध्यायंस्तूष्णीं समिधमादध्यात् ॥ अन्यदपि अविरोधि तूष्णीमेव कर्तव्यमिति ॥ इति समावर्तनानुकल्पः ब्रह्मचर्यदशायां दशाहाशौचहेतुसपिंडमरणे समावर्तनोत्तरमुदकदानपूर्वकं त्रिरात्रमतिक्रांताशौचं कार्यम् ॥ अनुपनीतसपिंडे मातुलादौ च मृतेऽतिक्रांताशौचं न ॥ एवं जननाशौचेप्यतिक्रांताशौचं न ॥ ततश्च दशाहाशौचापादकसपिंडकमृतौ समावर्तनोत्तरं त्रिरात्रमध्ये विवाहो न कार्यः ॥ कस्यचिन्मरणाभावे तु न विवाहे दोषः ॥ "इत्थं व्रतांतकर्माण्यनंतोपाध्यायसूनुना ॥ निर्णीय श्रीविट्ठलांघ्र्योर्वाग्विलासः समर्पितः ॥ अथ श्रीभगवत्पादौ पुंडरीकवरप्रदौ ॥ श्रीगुरून्पितरौ नत्वा विवाहं वक्तुमुद्यतः ॥ उद्वहेत्तु द्विजो भार्यां सवर्णां लक्षणैर्युताम् ॥ अव्यंगांगीं सौम्यनाम्नीं मृद्वंगीं च मनोहराम् ॥" भाविशुभाशुभज्ञानहेतुलक्षणविचारोष्टौ मृत्पिंडान् कृत्वेत्यादिरूप आश्वलायनसूत्रे उक्तः ज्योतिःशास्त्रोक्तराशिनक्षत्रादिघटितविचारोपि शुभाशुभादिज्ञानहेतुः ॥

## अथ विवाहे घटितविचारः ।

स च संक्षेपेणोच्यते ॥ तत्र मेषादिराशिस्वामिनः "भौमः शुक्रो बुधश्चंद्रः सूर्यः सौम्यो भृगुः कुजः ॥ गुरुः शनैश्चरो मंदः सुरेज्यो राशिपाः स्मृताः ॥"

## अथ ग्रहमैत्री ।

अत्र ग्रहाणां शत्रुमित्रादि ॥ रवेर्गुरुभौमचंद्रा मित्राणि शनिशुक्रौ शत्रू बुधः समः ॥ इंदोः सूर्यबुधौ मित्रे भौमगुरुशुक्रशनयः समाः अस्य शत्रुर्न ॥ कुजस्य बुधो रिपुः सूर्यगुरुचंद्रा मित्राणि शनिशुक्रौ समौ ॥ बुधस्यार्कशुक्रौ मित्रे चंद्रोरिः शनिभौमगुरवः समाः ॥ गुरोः सूर्यभौमचंद्रा मित्राणि ॥ शुक्रबुधौ शत्रू शनिः समः ॥ शुक्रस्य शनिबुधौ मित्रे सूर्यचंद्रावरी भौमगुरू समौ ॥ शनेः शुक्रबुधौ मित्रे कुजसूर्यचंद्रा अरयः गुरुः समः ॥

## अथ गुणविचारः ।

राश्योरेकाधिपत्ये राशिपत्योर्मित्रत्वे च पंच गुणाः ॥ राशिपयोःसमत्वशत्रुत्वेऽर्धो

गुणः ॥ समत्वमित्रत्वे चत्वारः ॥ शत्रुत्वमित्रत्वे एकः ॥ द्वयोः समत्वे त्रयः ॥ द्वयोः शत्रुत्वे गुणाभावः ॥

## अथ गणाः ।

पूर्वात्रयोत्तरात्रयभरणीरोहिण्यार्द्रा मनुष्यगणः ॥ हस्तरेवतीपुनर्वसुपुष्यस्वातीमृगश्रवणाश्विन्यनुराधा देवगणः ॥ कृत्तिकाश्लेषामघाचित्राविशाखाज्येष्ठामूलधनिष्ठाशततारका राक्षसगणः ॥ गणैक्ये शुभम् ॥ देवमनुष्ययोर्मध्यमम् ॥ देवराक्षसोर्वैरम् राक्षसमनुष्ययोर्मरणम् ॥ अतो मनुष्यराक्षसयोर्विवाहो न कार्यः ॥ अत्र गुणाः गणैक्ये षड्गुणाः ॥ वरो देवो नृगणा कन्यात्रापि षट् ॥ वैपरीत्ये पंच ॥ वरो राक्षसः कन्या देवगणा अत्रैकः ॥ वैपरीत्ये गुणाभावः ॥ मनुष्यराक्षसत्वेपि गुणाभावः ॥

## अथ राशिकूटम् ।

द्विर्द्वादशकत्वे निर्धनत्वम् ॥ नवपंचमत्वे निःपुत्रता ॥ षट्काष्टके मरणं विपत्तिर्वा ॥ उभयसप्तमे तृतीयैकादशेचतुर्थे दशमे च शुभम् ॥ नक्षत्रैक्ये चरणभेदे शुभम् ॥ अत्र राश्यैक्येतिशुभम् ॥ राशिभेदेपि कूटदोषो न ॥ नक्षत्रभेदे राश्यैक्ये च शुभम् ॥ अत्र नाडीगणादिदोषो न ॥ चरणैक्यं षट्काष्टकं च वर्ज्यम् ॥ द्विर्द्वादशके नवपंचमे च मध्यमम् ॥ शेषं शुभम् ॥

## अत्र गुणाः ।

सत्कूटे सप्त दुःकूटे ग्रहमैत्रीसत्त्वे चत्वारः ॥ अन्यथा एकः ॥ चरणैक्ये गुणाभावः ॥

## अथ नाडीविचारः ।

अश्विन्यार्द्रापुनर्वसूत्तराफल्गुनीहस्तज्येष्ठामूलशततारापूर्वाभाद्रपदेति प्रथमनाडी ॥ भरणीमृगपुष्यपूर्वाफल्गुनीचित्रानुराधापूर्वाषाढाधनिष्ठोत्तराभाद्रपदेति मध्यमनाडी ॥ कृत्तिकारोहिण्याश्लेषामघास्वातीविशाखोत्तराषाढाश्रवणरेवतीति चरमनाडी ॥ अत्र नाड्यैक्ये मृत्युः ॥ नाडीभेदेष्टौ गुणाः ॥ नाड्यैक्यं सर्वथा वर्ज्यम् शूद्रादौ पार्श्वैकनाडीद्वयं संकटे शुभम् ॥ अत्र वर्णवश्यभकूटयोनिकूटानामल्पगुणत्वात् विवाहविघटकत्वाभावाच्च स्वरूपं नोक्तम् ॥ अत्र सर्वगुणमेलनेन विंशतिगुणसंभवे मध्यमम् ॥ विंशत्यधिकगुणत्वेऽति शुभम् ॥ विंशत्यूनत्वे त्वशुभम् ॥ इति नक्षत्रादिघटितविचारः ॥

## अथ कन्यासापिंड्यविचारः ।

"अनन्यपूर्विकां कांतामसपिंडां यवीयसीम् ॥ अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजाम्" इति याज्ञवल्क्याद्युक्तकन्याविशेषणेषु कांतत्वनीरोगित्वभ्रातृमत्त्वभिन्नविशेषणानामभावे इह परत्र पातित्यात्तानि प्रपंच्यंते ॥ तत्रान्यपूर्विकाः पुरुषांतरपूर्विकाः ॥ मनोदत्ता वाचा दत्ताग्निं परिगता सप्तमं पदं नीता भुक्ता गृहीतगर्भा प्रसूतेति सप्तविधपुनर्भवास्तदभिन्नामनन्यपूर्विकाम् ॥ सप्तपदीविधेः पूर्वमाद्यानां तिसृणां संकटेन्येन विवाहो भवति ॥ सप्तपदीविधौ जाते बलाद्विवाहितापि नान्यत्र देया ॥ असपिंडां समानः एकः पिंडः पिंडदानक्रियामूलपुरुषशरीरं वा यस्याः सा सपिंडा तद्भिन्नाम् ॥

## अथ सापिंड्यलक्षणम् ।

तत्र ॥ "लेपभाजश्चतुर्थाद्याः पित्राद्याः पिंडभागिनः ॥ पिंडदः सप्तमस्तेषां सापिंड्यं सप्तपौरुषम्" इति मात्स्योक्तेरेकस्यां पिंडदानक्रियायां दातृत्वपिंडभाक्त्वलेपभाक्त्वान्यतमसंबंधेन प्रवेशो निर्वाप्य सापिंड्यमिति केषांचिन्मतम् ॥ अत्र स्त्रीणामपि पतिभिः सह कर्तृत्वात्सापिंड्यसिद्धिः मूलपुरुषैकशरीरावयवान्वयेनावयवसापिंड्यमित्यपरं मतम् ॥ यद्यपि भ्रातृपत्नीनां परस्परं नैतत्संभवति तथाप्याधारत्वेनैकशरीरान्वयः॥ एकमूलपुरुषावयवानां पुत्रद्वारा तास्वाधानादिति ज्ञेयम् ॥ उभयत्रापि गयादौ मित्रादेरपि पिंडभाक्त्वादेकशरीरान्वयस्य सप्तमात्परेषु परश्शतेष्वपि सत्त्वाच्चातिप्रसंगप्राप्तेः"वध्वा वरस्य वा तातः कूटस्थाद्यदि सप्तमः ॥ पंचमी चेत्तयोर्माता तत्सापिंड्यं निवर्तते" इत्यादिवचनैर्निरासः ॥ मातृत्वपितृत्वादिसंबंधे सत्येव पंचमसप्तमपर्यंतमेवेत्युभयनियमस्वीकारात्॥ तथा च पितृद्वारकसापिंड्यविचारे सप्तमादूर्ध्वं सापिंड्यनिवृत्तिः ॥ मातृद्वारकसापिंड्यविचारे तु पंचमादूर्ध्वं तन्निवृत्तिरिति निर्णयः ॥ अत्रोदाहरणानि ॥ "विष्णोर्मूलात्कांतिगौर्यौ जातौ ताभ्यां सुधीहरौ ॥ बुधमैत्रौ चैत्रशिवौ गणभूपौ मृडाच्युतौ ॥ १ ॥ तज्जातयोरष्टमयोर्विवाहो रतिकामयोः ॥ विष्णोर्मूलादत्तचैत्रौ सोममैत्रौ सुधीबुधौ ॥ २ ॥ ताभ्यां श्यामारती तज्ज्ञशिवगौर्योः करग्रहः ॥ विष्णोर्मूलादत्तचैत्रौ सोममैत्रौ सुधीबुधौ ॥ ३ ॥ ताभ्यां श्यामा नर्मदा च शिवकामौ रमाकवी ॥ मंडूकद्युतिसापिंड्यं रमाकव्योर्विवाहहृत् ॥ ४ ॥ विष्णोर्मूलादत्तचैत्रौ सोममैत्रौ सुधीबुधौ ॥ श्यामाशिवौ कांतिहरौ हरकांती न दंपती ॥ ५ ॥

| विष्णुर्मूलभूतः | विष्णुर्मूलभूतः | विष्णुर्मूलभूतः | विष्णुर्मूलभूतः |
|---|---|---|---|
| कांतिः २ गौरी २ | दत्तः २ चैत्रः २ | दत्तः २ चैत्रः २ | दत्तः २ चैत्रः २ |
| सुधीः ३ हरः ३ | सोमः ३ मैत्रः ३ | सोमः ३ मैत्रः ३ | सोमः ३ मैत्रः ३ |
| बुधः ४ मैत्रः ४ | सुधीः ४ बुधः ४ | सुधीः ४ बुधः ४ | सुधीः ४ बुधः ४ |
| चैत्रः ५ शिवः ५ | श्यामा ५ रतिः ५ | श्यामा ५ नर्मदा ५ | श्यामा ५ शिवः ५ |
| गणः ६ भूपः ६ | शिवः ६ गौरी ६ | शिवः ६ कामा ६ | कांतिः ६ हरः ६ |
| मृडः ७ अच्युतः ७ | | रमा ७ कविः ७ | |
| रतिः ८ कामः ८ | | | अत्र कांतिहरयोर्न |
| अत्र रतिकामयोरष्ट | अत्र गौरीशिवयोः | अत्र रमाकव्योर्न | विवाहः एकतो नि- |
| मयोर्विवाहः पितृ- | षष्ठयोर्विवाहः मातृ | विवाहः मंडूकप्लु- | वृत्तावपि अन्यतो |
| द्वारकत्वात् | द्वारकत्वात् | त्या सापिंड्यानुवृत्तेः | अनुवृत्तेः |

निवृत्तमप्येकस्तदन्यतोप्यनुवर्तते ॥ दिङ्मात्रेणोदाहृतात्र सेयं सापिंड्यपद्धतिः ६॥" कूटस्थात्पंचम्योः कन्ययोः संततौ मातृद्वारकत्वात्सापिंड्यनिवृत्तिः ॥ पंचम्योः-कन्ययोर्यौ पुत्रौ तयोः संततौ पितृद्वारकत्वात्सापिंड्यमनुवर्तत इतीदं मंडूकप्लुति-सापिंड्यं पंचम्याः कन्यायाः पुत्रस्य षष्ठस्य कूटस्थात् पंचमादिः सपिंडो न भवति ॥ तथापि द्वितीयसंततिपंक्तौ पंचमषष्ठादेः पितृद्वारकत्वादिना सापिंड्यसत्त्वादेकतो निवृत्तावप्यन्यतो निवृत्त्या पंचमषष्ठादिना पंचम्याः कन्यायाः संततिर्न विवाह्या ॥ एवं कूटस्थमारभ्याष्टमादेः कूटस्थमारभ्य द्वितीयादेश्चैकतोनिवृत्तिपरतोनुवृत्त्योः सत्त्वमूह्यम् ॥ एवमाशौचविषयकसापिंड्येपि एकतो निवृत्त्यादिकं यथासंभवं सर्वमूह्यम्॥ एवं पितृद्वारकसापिंड्यं सप्तमादूर्ध्वं निवर्तते मातृद्वारकं तु पंचमादूर्ध्वमिति मुख्यकल्पेन वर्जनीयानां कन्यानां संख्या चेत्थं संपद्यते ॥ पितृकुले षोडशाधिकद्विसाहस्री ( २०१६ ) मातृकुले पंचोत्तरशतम् ( १०५ ) कुलद्वयमेलनेनैकविंशत्युत्तरशताधिकसहस्रद्वयसंख्या (२१२१) कन्या वर्ज्याः संपद्यंते॥ अत्र गणनाप्रकारस्तत्र मूलश्लोकास्तद्व्याख्या च कौस्तुभे स्पष्टा बालानां दुर्बोधतया नेहोच्यते ॥ तथा च मुख्यकल्पेन कुलद्वये एतावत्यो वर्जनीया एव ॥ न त्वनुकल्पानुसरणेन सप्तमात्पंचमादर्वाग्विवाहः कार्यः ॥ "पंचमे सप्तमे चैव येषां वैवाहिकी क्रिया ॥ क्रियापरा अपि हि ते पतिताः शूद्रतां गताः ॥ सप्तमात्पंचमाद्धीमान्यः कन्यामुद्वहेद्द्विजः ॥ गुरुतल्पी स विज्ञेयः सगोत्रां चैवमुद्वहन् ॥" इत्यादिस्मृतिभ्यः ॥ यानि तु "चतुर्थीमुद्वहेत्कन्यां चतुर्थः पंचमो वरः ॥ तृतीयां वा चतुर्थीं वा पक्षयोरुभयोरपि ॥" इत्यादिवचनानि तेषु कानिचिन्निर्मूलानि कानिचिद्दत्तकसापत्न्यादिसंबंधविषयतया विप्राणां क्षत्रियादिषु सापिंड्यविषयतया वा नेयानि

इति निर्णयसिंधुमतम् ॥ कौस्तुभे तु "उद्वहेत्सप्तमादूर्ध्वं तदभावे तु सप्तमीं ॥ पंचमी तदभावे तु पितृपक्षेप्ययं विधिः ॥ सप्तमीं च तथा षष्ठीं पंचमीं च तथैव च ॥ एवमुद्वाहयेत्कन्यां न दोषः शाकटायनः ॥ तृतीयां वा चतुर्थीं वा पक्षयोरुभयोरपि ॥ विवाहयेन्मनुः प्राह पाराशर्यो यमोंगिराः ॥ यस्तु देशानुरूपेण कुल मार्गेण चोद्वहेत् ॥ नित्यं स व्यवहार्यः स्याद्वेदाच्चैतत्प्रतीयते" इत्यादिवचनानां चतुर्विंशतिमतषट्त्रिंशन्मतादिषूपलभ्यमानत्वात् सापिंड्यसंकोचेन विवाहस्य बहुदेशेषु दर्शनाच्च ॥ येषां कुले देशे चानुकल्पत्वेन सापिंड्यसंकोचः परंपरया समागतस्तेषां सापिंड्यसंकोचेन विवाहो न दोषाय ॥ स्वकुलदेशविरुद्धेन सापिंड्यसंकोचेन विवाहे दोषो भवत्येव ॥ जनपदधर्मा ग्रामधर्माश्च तान्विवाहे प्रतीयात् ॥ "येनास्य पितरो याता येन याताः पितामहाः ॥ तेन यायात्सतां मार्गं तेन गच्छन्न दुष्यति" ॥ इत्यादिवाक्यैः स्वकुलदेशाचाराविरुद्धस्यैव शास्त्रस्य विवाहेनुसर्तव्यत्वात् ॥ एवं मातुलकन्यापरिणयनेपि ॥ तृप्तां जहुर्मातुलस्येव योषाभागस्ते पैतृष्वसेयीवपामिवेति मंत्रलिंगैः ॥ "मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च ॥ समानप्रवरां चैव त्यक्त्वा चांद्रायणं चरेत्" ॥ इत्यादिस्मृतीनां बाधाद्येषां कुले मातुलकन्यापरिणयः परंपराप्राप्तस्तैः स कार्यः "गोत्रान्मातुः सपिंडाच्च विवाहो गोवधस्तथा" इति मातुलकन्याविवाहस्य कलिवर्ज्यत्ववचनमपि येषां कुले देशे मातुलकन्याविवाहो नास्ति तत्परम् ॥ मातुलकन्यापरिणयनस्यानेकश्रुतिस्मृतिसिद्धत्वात् ॥ अत एव मातुलकन्योद्वाहिनां श्राद्धे निमंत्रणनिषेधोपि स्वकुलाचारादिविरोधेन तदुद्वाहिपरः॥ उक्तविधसापिंड्यसंकोचेन विवाहं कुर्वतां शिष्टैः श्राद्धादौ भोजनाद्याचारादित्यादिवद्दूषणपादितम् ॥ परं तु सापिंड्यसंकोचस्वीकारेपि कतिथी कन्या कतिथेन पुरुषेण विवाह्या कतिथेन न विवाह्येति व्यवस्था नोपपादिता ॥ सापिंड्यदीपिकाकारादयोर्वाचीनास्तु "चतुर्थीमुद्वहेत्कन्यां चतुर्थः पंचमो वरः ॥ पाराशरमते षष्ठीं पंचमो न तु पंचमीम्" ॥ इत्यादिवचनानां समूलत्वं निश्चित्य अशक्तैः संकटे समाश्रयणीयस्य सापिंड्यसंकोचस्य व्यवस्थामूचुः ॥ तथाहि ॥ चतुर्थी कन्या पितृपक्षे मातृपक्षे च चतुर्थेन पंचमेन वा पुंसा विवाह्या ॥ द्वितीयतृतीयषष्ठाद्यैश्चतुर्थी नोद्वाह्या ॥ पाराशरमते पंचमः षष्ठीमुद्वहेत् ॥ द्वितीयतृतीयचतुर्थादिः षष्ठीं नोद्वहेत्पञ्चमः पञ्चमीं नोद्वहेत् ॥ "मातृतः पितृतश्चापि षष्ठः षष्ठीं समुद्वहेत्" इति वचनांतरात् षष्ठेनापि षष्ठी विवाह्या ॥ पंचमषष्ठभिन्नैः षष्ठी न विवाह्येति पर्यवसन्नम् ॥ तथा पितृपक्षे सप्तमी मातृपक्षे पंचमी च तृतीयाद्यैः सर्वैः परिणेया ॥ "पितृपक्षाच्च सप्तमीं मातृपक्षात्तु पंचमीम्" इति व्यासवचनात् ॥ "उद्वहेत्सप्तमादूर्ध्वं तदभावे तु सप्तमीम् ॥ पंचमीं तदभावे तु पितृपक्षेप्ययं विधिः" इति चतुर्विंशतिमतोक्तेश्च ॥ पितृपक्षेपि

पंचमी तृतीयाद्यैः परिणेया ॥ तत्रापि मातृपक्षेपितृपक्षेपि पंचमेन पंचमी नोद्वाह्या ॥ "पंचमो न तु पंचमीम्" इति सर्वत्र निषेधात् ॥ "तृतीयां वा चतुर्थीं वा पक्षयोरुभयोरपि" इति वचनात्तु तृतीया विवाह्या प्राप्नोति तत्र व्यवस्थोच्यते ॥ मातृपक्षे तावत्तृतीया मातुलकन्या मातृष्वसृकन्या वा संभवति ॥ पितृपक्षे तु तृतीया पितृव्यकन्या पितृष्वसृकन्या वा ॥ तत्र पितृव्यकन्या सगोत्रत्वान्त्याज्या ॥ "पैतृष्वसेयीं भगिनीं स्वस्रीयां मातुरेव च॥ एतास्तिस्रस्तु भार्यार्थे नोपयच्छेत बुद्धिमान्" ॥ इति मनूक्तेः पितृष्वसृमातृष्वसृकन्ये अपि त्याज्ये ॥ पितृष्वसृकन्यां मातुर्भगिनीं मातृष्वसारं मातुः स्वस्रीयां मातृष्वसृकन्यामेतास्तिस्रो नोद्वहेदिति तदर्थात् ॥ मातुलकन्यैव तृतीया पूर्वोक्तरीत्या कुलपरंपरागतत्वे परिणेया ॥ एवं च तृतीयापि तृतीयेनैव मातुलकन्यैव परिणेया न चतुर्थादिना केनापि ॥ केचित्संकटे पितृष्वसृकन्यापरिणयनमाहुः ॥ तत्र देशकुलाचाराद्व्यवस्था ज्ञातव्या ॥ अत्रायं सापिंड्यदीपिकादिसिद्धार्थसंग्रहः तृतीया मातुलकन्यैवोद्वाह्या चतुर्थी चतुर्थपंचमाभ्यामेव ॥ पंचमी पंचमभिन्नैस्तृतीयाद्यैः सप्तमांतैः ॥ षष्ठी पंचमषष्ठाभ्यामेव सप्तमी तृतीयाद्यैः सप्तमांतैरिति ॥ अयं सापिंड्यसंकोचेन विवाहः संमटेष्वशक्तेन कार्यः ॥ कन्यांतरलाभे शक्तैर्न कार्यः ॥ गुरुतल्पादिदोषस्मृतेः ॥ सापिंड्यसंकोचवाक्यानामशक्तविषयत्वस्य स्पष्टत्वात् ॥ "प्रभुः प्रथमकल्पस्य योनुकल्पेन वर्तते ॥ स नाप्नोति फलं चेह" इति शक्तैरनुकल्पस्वीकारे दोषोक्तेः ॥ दत्तकसापिंड्यं दत्तकनिर्णये प्रागेवोक्तम् ॥ अथ सापत्नमातृकुले सापिंड्यप्रकारं सुमंतुराह ॥ पितृपत्न्यः सर्वा मातरः तद्भ्रातरो मातुलाः तद्भगिन्यो मातृष्वसारः तदुहितरश्च भगिन्यः तदपत्यानि भागिनेयानि अन्यथा संकरकारिणः स्युरिति ॥ अत्र लक्षणया सापत्नमातृकुले चतुःपुरुषसापिंड्यं विवाहनिषेधाय विधीयत इति केचित् ॥ अपरे तु विवाहमात्रविषयत्वे मानाभावादाशौचादिविषयकत्वस्यापि संभवात् यावद्वाचनिकं प्रमाणमिति न्यायेन परिगणितेष्वेव सापिंड्यमिति वदंति ॥ तथा च सुमंतुवाक्ये वाक्यभेदाश्रयणेनैवं वाक्यार्थाः पर्यवस्यंति ॥ पितृपत्न्यः सर्वा मातर इति प्रथमवाक्ये सापत्नमातरि मुख्यमातृवत् संमाननं तद्धवे मातृवधप्रायश्चित्तं तद्गमने मातृगमनप्रायश्चित्तादिकं चातिदिश्यते ॥ नात्रातिक्रांतविषये दशाहाशौचातिदेशः ॥ त्रिरात्रविधिना बाधात् ॥ तद्भ्रातरो मातुला इत्यत्र मातुलत्वप्रयुक्तमाशौचादिकं मातुलस्य स्वभगिनीसपत्न्याः कन्योद्वाहनिषेधश्च ॥ अत्र मातुलत्वातिदेशेपि न तत्पुत्रादिषु मातुलपुत्रत्वाद्यतिदेशः ॥ तेन बंधुत्रयत्वप्रयुक्तमाशौचं न मातुलकन्यादौ विवाहविधिनिषेधावपि न ॥ एवं मातुलकन्यादौ पितुर्भगिनीत्वातिदेशाभावेन तत्पुत्रं प्रत्यपि

पितृष्वसृत्वाद्यतिदेशो न भवति ॥ तद्भगिन्यो मातृष्वसार इत्यत्राशौचं विवाहनिषेधश्च ॥ मातृष्वसृपुत्रे बंधुत्रयवत्त्वं च न ॥ सापत्नमातृष्वसृकन्याविवाहनिषेधस्तु विरुद्धसंबंधत्वादेव वक्ष्यते॥ तदपत्यानि भगिन्य इत्यत्राशौचं संमाननादिकं च ॥ नात्र विवाहप्रसक्तिः सगोत्रत्वात् ॥ अत्र सापत्नमातुलसापत्नभ्रातृसापत्नमातृष्वसृसापत्नभगिनीनां स्वमातुलसोदरभ्रात्राद्यनंतरं तर्पणं महालयादावुद्देशोप्यस्मादेव वचनादावश्यक इति भाति ॥ तदपत्यानि भागिनेयानि इत्यत्राशौचं विवाहनिषेधश्च ॥ भागिनेयीत्वातिदेशेपि तत्कन्यासु भागिनेयी कन्यात्वातिदेशो न यावदुक्तं प्रमाणमिति न्यायादिति दिक् ॥ क्वचित्सापिंड्याभावेपि वचनादविवाहः ॥ अविरुद्धसंबंधामुपयच्छेत ॥ दंपत्योर्मिथः पितृमातृसाम्ये विरुद्धसंबंधः ॥ यथा भार्या स्वसुर्दुहिता पितृव्यपत्नी स्वसा चेति परिशिष्टोक्तेः ॥ बौधायनः ॥ "मातुः सपत्न्या भगिनीं तत्सुतां च विवर्जयेत् ॥ पितृव्यपत्नीभगिनीं तत्सुतां च विवर्जयेत्" केचित् "ज्येष्ठभ्राता पितुः समः" इत्युक्तेर्ज्येष्ठभ्रातृपत्न्या भगिनीमातृष्वसृतुल्यत्वान्न विवाह्येत्याहुः ॥ यवीयसीं स्वापेक्षया वयसा वपुषा च न्यूनामुद्वहेत् ॥ 'असमानार्षगोत्रजाम् ॥' आर्ष प्रवरः ॥ स्वसमाने आर्षगोत्रे यस्य तज्जा न भवति या ताम्॥ असमानगोत्रामसमानप्रवरां चोद्वहेदित्यर्थः ॥

## अथ संक्षेपतो गोत्रप्रवरनिर्णयः ।

तत्र गोत्रलक्षणम् ॥ विश्वामित्रो जमदग्निर्भरद्वाजोथ गौतमः ॥ अत्रिर्वसिष्ठः कश्यप इत्येते सप्तऋषयः ॥ सप्तानामृषीणामगस्त्याष्टमानां यदपत्यं तद्गोत्रमित्याचक्षते ॥ यद्यपि केवलभार्गवेष्वार्ष्टिषेणादिषु केवलांगिरसेषु हारीतादिषु च नैतल्लक्षणं भृग्वंगिरसोरष्टऋषिष्वनंतर्गतत्वात् ॥ तथाप्यत्र प्रवरैक्यादेवाविवाहः ॥ यद्यपि गोत्राणि अनंतानि "गोत्राणां तु सहस्राणि प्रयुतान्यर्बुदानि च" इत्युक्तेस्तथाप्यूनपंचाशदेव गोत्रभेदाः ॥ व्यावर्तकप्रवरभेदानां तावतामेव दर्शनात् ॥ प्रवरलक्षणं तु गोत्रवंशप्रवर्तकऋषीणां व्यावर्तका ऋषिविशेषाः प्रवरा इत्येव संक्षेपतो ज्ञेयम् ॥ समानगोत्रत्वं समानप्रवरत्वं च पृथक् पृथक् विवाहप्रतिबंधकम् ॥ तत्र प्रवरसाम्यं द्विविधम् ॥ एकप्रवरसाम्यं द्वित्रिप्रवरसाम्यं च ॥ तत्र भृग्वंगिरोगणेतरेषु एकप्रवरसाम्यमपि विवाहप्रतिबंधकम् ॥ केवलभृगुगणेषु केवलांगिरोगणेषु चैकप्रवरसाम्यं न विवाहबाधकम् ॥ किं तु त्रिप्रवरेषु द्विप्रवरसाम्यमेव पंचप्रवरेषु त्रिप्रवरसाम्यमेव च विवाहबाधकम् ॥ "पंचानां त्रिषु सामान्यादविवाहस्त्रिषु द्वयोः ॥ भृग्वंगिरोगणेष्वेवं शेषेष्वेकोपि वारयेत्" इत्यादिवचनात् ॥ जामदग्न्यभृगुगणेषु गौतमांगिरसेषु भरद्वाजांगिरसेषु चैकप्रवरसाम्येपि क्वचित् प्रवरसाम्याभावेपि च सगोत्रत्वादेवाविवाहः ॥

## अथ गोत्रगणना ।

"गोत्राणां प्रवराणां च गणना प्रोच्यतेऽधुना ॥ संक्षेपात्सुखबोधाय भगवत्प्रीतयेऽपि च" ॥ सप्त भृगवः ॥ सप्तदशांगिरसः । चत्वारोऽत्रयः । दश विश्वामित्राः । त्रयः कश्यपाः । चत्वारो वसिष्ठाः । चत्वारोगस्तयः । इत्येकोनपंचाशद्गणास्तथापि सर्वग्रंथमत संग्रहेणाधिकास्तत्रतत्र वक्ष्यन्ते तत्र सप्त भृगुगणाः । वत्साः विदाः एतौ जामदग्न्यौ ॥ आर्ष्टिषेणाः यस्काः मित्रयुवः वैन्याः शुनका एते च पंच केवलभृगवः एवं सप्त । तत्र वत्साः मार्कंडेयाः मांडूकेयाः इत्यादयः शतद्व्याधिका वत्सगोत्रभेदाः एतेषां पंच प्रवराः ॥ भार्गवच्यावनाप्रवानौर्वजामदग्न्येति ॥ भार्गवौर्वजामदग्न्येति त्रयो वा॥भार्गवच्यावनाप्रवानेति त्रयो वा ॥विदाः शैलाः अवटाः इत्यादयो विंशत्यधिका विदाः ॥ तेषां पंच प्रवराः भार्गवच्यावनाप्रवानौर्ववैदेति ॥ भार्गवौर्वजामदग्न्येति वा ॥ आर्ष्टिषेणाः नैर्ऋतयः याम्यायणाः इत्यादयो विंशत्यधिका आर्ष्टिषेणाः ॥ एषां भार्गवच्यावनाप्रवानार्ष्टिषेणानूपेति पंच ॥ भार्गवार्ष्टिषेणानूपेति त्रयो वा ॥ एतेषां त्रयाणां वत्सविदार्ष्टिषेणानां परस्परमविवाहः द्वित्रिप्रवरसाम्यात् ॥ आद्ययोर्जामदग्न्यत्वेन सगोत्रत्वाच्च ॥ यद्यपि त्रिप्रवरार्ष्टिषेणानां वत्सविदैः सह न द्विप्रवरसाम्यं नापि सगोत्रत्वं जामदग्न्यत्वाभावात् ॥ तथापि पंचप्रवरपक्षगतमपि त्रिप्रवरसाम्यं विवाहबाधकम् एवमग्रेपि ज्ञेयम् ॥ वात्स्यानां भार्गवच्यावनाप्रवानेति त्रयः ॥ वत्सपुरोधसोर्भार्गवच्यावनाप्रवानवत्सपौरोधसेति पंच ॥ वैजमथितयोर्भार्गवच्यावनाप्रवानवैजमथितेपि पंच ॥ एते त्रयः क्वचित् ॥ एतेषां परस्परं पूर्वोक्तैश्च त्रिभिर्न विवाहः त्रिप्रवरसाम्यात् ॥ यस्काः मौनाः मूकाः इत्यादयस्त्रिपंचाशदधिका यस्काः ॥ एषां भार्गववैतहव्यसावेतसेति त्रयः ॥ मित्रयुवः रौष्टयायनाः सापिंडिनाः इत्यादयस्त्रिंशदधिका मित्रयुवः ॥ तेषां भार्गववाध्यश्च दैवोदासेति त्रयः ॥ भार्गवच्यावनदैवोदासेति वा ॥ वाध्यश्चेत्येको वा ॥ वैन्याः पार्थाः बाष्कलाः श्येता इत्येते वैन्याः ॥ एषां भार्गववैन्यपार्थेति त्रयः ॥ शुनकाः गार्त्समदाः यज्ञपतयः इत्यादयः सप्तदशाधिकाः शुनकाः एषां शौनकेत्येकः । गार्त्समदेति वा ॥ भार्गवगार्त्समदेति द्वौ वा ॥ भार्गवशौनहोत्रगार्त्समदेति त्रयो वा। यस्कादीनां चतुर्णां स्वस्वगणं हित्वा परस्परं पूर्वैर्जामदग्न्यवत्सादिभिश्च सह विवाहो भवति ॥ एकप्रवरसाम्येपि द्वित्रिप्रवरसाम्याभावात् ॥ भृगुगणेषु एकप्रवरसाम्यस्य दूषकत्वाभावात् ॥ अजामदग्न्यत्वेनासगोत्रत्वात् ॥ मित्रायुवां पाक्षिकद्विप्रवरसाम्यात् त्रिप्रवरैर्वत्सादिभिः सह न विवाह इति केचित् ॥ तत्प्रवरपक्षग्राहिणामविवाहः ॥ पक्षांतरग्राहिणां मित्रयूनां विवाह एवेत्यन्ये ॥ क्वचिदंधिकं गणद्वयमुक्तम् ॥ वेदविश्वज्योतिषां भार्गववेदवैश्वज्योतिषेति त्रयः ॥ शाठरमाठराणां भार्गवशाठरमाठरेति त्रयः ॥ अनयोः परस्परं पूर्वैश्च सर्वैर्विवाहः ॥ इति भृगुगणाः ॥

अथांगिरसः ॥ ते त्रिविधाः गौतमा भरद्वाजाः केवलाश्चेति ॥ तत्र गौतमांगिरसो दश आयास्याः शारद्वताः कौमंडाः दीर्घतमसः करेणुपालयः वामदेवाः औशनसाः राहूगणाः सोमराजकाः बृहदुक्थाश्चेति ॥ १॥ तत्र आयास्याः श्रोणिवेधाः मूढरथा इत्यादयोष्टादशाधिका आयास्यास्तेषामांगिरसायास्यगौतमेति त्रयः ॥ शारद्वताः अभिजिता रौहिण्या इत्यादयः सप्तत्यधिकाः शारद्वतास्तेषामांगिरसगौतमशारद्वतेति त्रयः कौमंडाः मामंथरेषणाः मासुराक्षा इत्यादयो दशाधिकाः ॥ कौमंडास्तेषामांगिरसौतथ्यकाक्षीवतगौतमकौमंडेति पंच ॥ आंगिरसौ तथ्यगौतमौशिजकाक्षीवतेति वा ॥ आंगिरसायास्यौशिजगौतमकाक्षीवतेति वा ॥ आंगिरसौशिजकाक्षीवतेति त्रयो वा ॥ आंगिरसौतथ्यकाक्षीवतेति वा ॥ औतथ्यगौतमकौमंडेति वा ॥ अथ दीर्घतमसो गौतमास्तेषामांगिरसौतथ्यकाक्षीवतगौतमदैर्घतमसेति पंच ॥ आंगिरसौतथ्यदैर्घतमसेति त्रयो वा ॥ करेणुपालयः वास्तव्या श्वेतीया इत्यादयः सप्ताधिकाः करेणुपालयस्तेषामांगिरसगौतमकारेणुपालेति त्रयः वामदेवानामांगिरसवामदेव्यगौतमेति त्रयः ॥ आंगिरसवामदेव्यबार्हदुक्थ्येति वा ॥ औशनसाः दिश्याः प्रशस्ताः इत्यादिका नवाधिका औशनसास्तेषामांगिरसगौतमौशनसेति त्रयः ॥ रहूगणानामांगिरसराहूगणगौतमेति त्रयः ॥ सोमराजकानामांगिरससौमराज्यगौतमेति त्रयः ॥ बृहदुक्थानामांगिरसबार्हदुक्थगौतमेति त्रयः॥ १० ॥ क्वचिद्गणद्वयमधिकमुक्तम् ॥ उतथ्यानामांगिरसौतथ्यगौतमेति ॥ राघवानामांगिरसराघवगौतमेति ॥ गौतमानां सर्वेषामविवाहः ॥ सगोत्रत्वात्प्रायेण द्वित्रिप्रवरसाम्याच्च ॥

## अथ भरद्वाजाः ।

ते चत्वारः भरद्वाजाः गर्गाः ऋक्षाः कपयश्चेति भरद्वाजाः क्षाम्यायणाः देवाश्वा इत्यादयः षष्ट्युत्तरशताधिका भरद्वाजास्तेषामांगिरसबार्हस्पत्यभारद्वाजेति त्रयः ॥ गर्गाः सांभरायणाः सखीनयः इत्यादयः पंचाशदधिका गर्गास्तेषामांगिरसबार्हस्पत्यभारद्वाजशैन्यगार्ग्येति पंच ॥ आंगिरसशैन्यगार्ग्येति त्रयो वा ॥ अंत्ययोर्व्यत्ययो वा ॥ भारद्वाजगार्ग्यशैन्येति वा गर्गभेदानामांगिरसतैत्तिरकापिभुवेति ॥ ऋक्षाः रौक्षायणाः कपिला इत्यादयो नवाधिका ऋक्षास्तेषामांगिरसबार्हस्पत्यभारद्वाजवांदनमातवचसेति पंच ॥ आंगिरसवांदनमातवचसेति त्रयो वा ॥ कपयः स्वस्तितरयः दंडिन इत्यादयः पंचविंशत्यधिकाः कपयस्तेषामांगिरसामहय्यौरुक्षय्येति त्रयः ॥ आंगिरसामहीयवौरुक्षयसेत्याश्वलायनपाठः॥आत्मभुवामांगिरसभारद्वाजबार्हस्पत्यवरात्मभुवेति पंच ॥ अयं गणः क्वचित् ॥ भरद्वाजानां सर्वेषां परस्परमविवाहः ॥ सगोत्रत्वात् ॥ प्रायेण द्वित्रिप्रवरसाम्याच्च ॥ ऋक्षांतर्गतानां कपिलानां विश्वामित्रैरप्यविवाहः ॥ इति भारद्वाजांगिरसः ॥

## अथ केवलांगिरसः ।

ते च षट् हरिताः कुत्साः कण्वाः रथीतराः विष्णुवृद्धाः मुद्गलाश्चेति ॥ हरिताः सौभगाः नैय्यगवा इत्यादयो द्वात्रिंशदधिका हरितास्तेषामांगिरसांबरीषयौवनाश्वेति ॥ आद्यो मांधाता वा कुत्सानामांगिरसमांधात्रकौत्सेति त्रयः ॥ कण्वाः औपमर्कटाः बाष्कलायना इत्यादय एकविंशत्यधिकाः कण्वास्तेषामांगिरसाजमीढकण्वेति त्रयः ॥ आंगिरसघौरकाण्वेति वा ॥ रथीतराः हस्तिदाः नैतिरक्षय इत्यादयश्चतुर्दशाधिका रथीतरास्तेषामांगिरसवैरूपरथीतरेति त्रयः ॥ आंगिरसवैरूपपार्षदश्वेति वा अष्टादंष्ट्रवैरूपपार्षदश्वेति वा ॥ अंत्ययोर्व्यत्ययो वा ॥ विष्णुवृद्धाः शठाः मरणा इत्यादयः पंचविंशत्यधिका विष्णुवृद्धास्तेषामांगिरसपौरुकुत्स्यत्रासदस्यवेति त्रयः ॥ मुद्गलाः सात्यमुग्रियः हिरण्यस्तंबय इत्यादिका अष्टादशाधिकास्तेषामांगिरसभार्म्याश्वमौद्गल्येति त्रयः ॥ आद्यस्तार्क्ष्यो वा ॥ आंगिरसतार्क्ष्यमौद्गल्येति वा ॥ येषां षण्णां केवलांगिरसानां स्वस्वगणं हित्वा परस्परं पूर्वैश्च सर्वैर्विवाहो भवति ॥ अंगिरसोगस्त्याष्टमसप्तर्षिभिन्नत्वेन तदपत्यानां सगोत्रत्वाभावात् ॥ द्वित्रिप्रवरसाम्याभावाच्च हरितकुत्सयोस्तु न विवाहः पाक्षिकद्वित्रिप्रवरसाम्यात् ॥

## अथात्रयः ।

ते चत्वारः अत्रयः गविष्ठिराः वाद्धुतकाः मुद्गलाश्चेति ॥ अत्रयो भूरयः छांदय इत्यादयश्चतुर्नवत्यधिका अत्रयस्तेषामात्रेयार्चनानसश्यावाश्वेति त्रयः ॥ गविष्ठिराः दक्षयः भलंदना इत्यादयश्चतुर्विंशत्यधिका गविष्ठिरास्तेषामात्रेयार्चनानसगाविष्ठिरेति त्रयः ॥ आत्रेयगाविष्ठिरपौर्वातिथेति वा ॥ वाद्धुतकानामात्रेयार्चनानसवाद्धुतकेति त्रयः ॥ मुद्गलाः शालिसंधयः अर्णवा इत्यादयो दशावरा मुद्गलास्तेषामात्रेयार्चनानसपौर्वातिथेति त्रयः ॥ क्वचिदतिथयो वामरथ्याः सुमंगला बीजवापा धनंजयाश्चेति पंचगणा अधिकाः ॥ तत्राद्यचतुर्णामात्रेयार्चनानसातिथेति त्रयः ॥ आत्रेयार्चनानसगाविष्ठिरेति वा सुमंगलानामत्रिसुमंगलश्यावाश्वेति वा ॥ धनंजयानामात्रेयार्चनानसधानंजयेति ॥ वालेयाः कौन्द्रेयाः शौभ्रेयाः वामरथ्याः इत्यादयः अत्रेः पुत्रिकापुत्रास्तेषामात्रेयवामरथ्यपौत्रिकेति त्रयः ॥ अत्रीणां सर्वेषामविवाहः ॥ सगोत्रत्वात्सप्रवरत्वाच्च ॥ अत्रेः पुत्रिकापुत्राणां वामरथ्यादीनां च वासिष्ठविश्वामित्राभ्यामप्यविवाहः ॥ इत्यत्रयः ॥

## अथ च विश्वामित्राः ।

ते दश कुशिकाः लोहिताः रौक्षकाः कामकायनाः अजाः कताः धनंजयाः अघमर्षणाः पूरणाः इंद्रकौशिकाश्चेति कुशिकाः पर्णजंघाः वारक्या इत्यादयः सप्त-

यधिकाः कुशिकास्तेषां वैश्वामित्रदेवरातौदलेति त्रयः १ ॥ लोहिताः कुडक्या-श्चाक्रवर्णायना इत्यादयः पंचाधिका लोहिताः रोहिता इति केचित् ॥ तेषां वैश्वामित्राष्टकलौहितेति त्रयः॥ अंत्ययोर्व्यत्ययो वा वैश्वामित्रमाधुच्छंदसाष्टकेति वा ॥ विश्वामित्राष्टकेति द्वौ वा २ ॥ रौक्षकाणां वैश्वामित्रगाथिनरैवणेति त्रयः ॥ विश्वामित्ररौक्षकरैवणेति वा ॥ एते रैवणा वा ३ ॥ कामकायनाः देवश्रवसः देवतरसा इत्यादयः पंचावराः कामकायनाः ॥ श्रौमता वा ॥ तेषां वैश्वामित्रदेवश्रवसदैवतरसेति त्रयः ४ ॥ अजानां वैश्वामित्रमाधुच्छंदसाज्येति त्रयः ५ ॥ कताः औदुंबरयः शैशिरयः इत्यादयो विंशत्यधिकाः कतास्तेषां वैश्वामित्रकात्यात्कीलेति त्रयः ६ ॥ धनंजयाः पार्थिवाः बंधुलाः इत्यादयः सप्तावरा धनंजयास्तेषां वैश्वामित्रमाधुच्छंदसधानंजयेति त्रयः॥ वैश्वामित्रमाधुच्छंदसाघमर्षणेति वा ७ ॥ अघमर्षणानां वैश्वामित्राघमर्षणकौशिकेति त्रयः ८ ॥ पूरणानां वैश्वामित्रपूरणेति द्वौ वैश्वामित्रदेवरातपौरणेति वा ९ ॥ इंद्रकौशिकानां वैश्वामित्रेंद्रकौशिकेति द्वौ १० ॥ क्वचिदन्येप्येकादशोक्ताः आश्मरथ्याः १ ॥ साद्दुलाः २ ॥ गाथिनाः ३ ॥ वैणवाः ४ ॥ हिरण्यरेतसः ५ ॥ सुवर्णरेतसः ६ ॥ कपोतरेतसः ७ ॥ शालंकायनाः ८ ॥ घृतकौशिकाः ९ ॥ कथकाः १० ॥ रौहिणा इति ११ ॥ आश्मरथ्यानां वैश्वामित्राश्मरथ्यवाधुलेति त्रयः १ ॥ साद्दुलानां वैश्वामित्रसाद्दुलमाद्दुलेति त्रयः २ ॥ गाथिनानां वैश्वामित्रगाथिनरैवणेति त्रयः ३ ॥ वैणुवेति क्वचित्पाठः ॥ एत एव रेणव इति उदवेणव इति चोच्यंते ३ ॥ वैणवानां वैश्वामित्रगाथिनवैणवेति ४ ॥ हिरण्यरेतसां वैश्वामित्रहैरण्यरेतसेति द्वौ ५ ॥ सुवर्णरेतसां वैश्वामित्रसौवर्णरेतसेति द्वौ ६ ॥ कपोतरेतसां वैश्वामित्रकपोतरेतसेति द्वौ ७ ॥ शालंकायनानां वैश्वामित्रशालंकायनकौशिकेति त्रयः ॥ एत एव कौशिका इति जह्नव इति चोच्यंते ८ ॥ घृतकौशिकानां वैश्वामित्रघृतकौशिकेति द्वौ ९ ॥ कथकानां वैश्वामित्रकाथकेति १० ॥ रौहिणानां वैश्वामित्रमाधुच्छंदसरौहिणेति त्रयः ११ ॥ विश्वामित्रगणानां सर्वेषां परस्परमविवाहः सगोत्रत्वात्सप्रवरत्वाच्च ॥ कुशिकानां देवरातप्रवरसाम्येन देवराताद्भेदानिर्णयाद्वक्ष्यमाणदेवरातवदेव जामदग्न्यैरप्यविवाह इति भाति ॥ धनंजयानां विश्वामित्रैरत्रिभिश्चाविवाहः ॥ कतानां भरद्वाजैर्विश्वामित्रैश्चाविवाहः द्विगोत्रत्वात् ॥ इति विश्वामित्राः ॥

## अथ कश्यपाः ।

ते त्रयः निध्रुवाः रेभाः शंडिलाश्चेति ॥ तत्र निध्रुवाः कश्यपाः अष्टांगिरसः इत्यादयश्चत्वारिंशदधिकशतावरा निध्रुवास्तेषां काश्यपावत्सारनैध्रुवेति त्रयः ॥ निर्णयसिंधौ तु निध्रुवगणोत्तरं कश्यपगणमुक्त्वा कश्यपानां काश्यपावत्सारासितेति

प्रवरत्रयमुक्तम् ॥ अत्र शिष्टाचारोपि दृश्यते १ ॥ रेभाणां काश्यपावत्सारररैभ्येति त्रयः २ ॥ शांडिलाः कोहलाः उदमेधा इत्यादयः षष्ट्यवराः शांडिलास्तेषां काश्यपावत्सारशांडिल्येति त्रयः अंत्यरथाने देवलो वा असितो वा ३ ॥ काश्यपासितदेवलेति वा ॥ अंत्ययोर्व्यत्ययो वा देवलासितेति द्वौ वा ३॥ एषां कश्यपानां परस्परमविवाहः सगोत्रत्वात्सप्रवरत्वाच्च ॥

## अथ वसिष्ठाः ।

ते चत्वारः वसिष्ठाः १ ॥ कुंडिनाः २ ॥ उपमन्यवः ३ ॥ पराशराश्च ४ ॥ वसिष्ठा वैतालकवयः रकय इत्यादयः षष्ट्यधिकाः वसिष्ठास्तेषां वासिष्ठेंद्रप्रमदाभरद्वस्विति त्रयः ॥ वासिष्ठेत्येको वा १॥ कुंडिनाः लोहितायनाः गुग्गुलयः इत्यादयः पंचविंशत्यवराः कुण्डिनास्तेषां वासिष्ठमैत्रावरुणकौंडिन्येति त्रयः २॥ उपमन्यवः औष्टलयः मांडलेखय इत्यादयः सप्तत्यवराः उपमन्यवस्तेषां वासिष्ठेंद्रप्रमदाभरद्वस्विति त्रयः ॥ आभरद्वसव्येति पाठांतरम् ॥ वासिष्ठाभरद्वस्विंद्रप्रमदेति वा ॥ आद्ययोर्व्यत्ययो वा ३ ॥ पराशराः कांडूशयाः वाजय इत्यादयः सप्तचत्वारिंशदवराः पराशरास्तेषां वासिष्ठशाक्त्यपाराशर्येति त्रयः ४ ॥ एषां वसिष्ठानां परस्परमविवाहः ॥ इति वसिष्ठाः ॥

## अथागस्त्याः ।

ते दश इध्मवाहाः १ ॥ सांभवाहाः २ ॥ सोमवाहाः ३ ॥ यज्ञवाहाः ४ ॥ दर्भवाहाः ५ ॥ सारवाहाः ६ ॥ अगस्तयः ७ ॥ पूर्णमासाः ८ ॥ हिमोदकाः ९ ॥ पाणिकाश्चेति १० ॥ इध्मवाहाः विशालाद्याः स्फालायनाः इत्यादयः पंचाशदधिका इध्मवाहास्तेषामागस्त्यदार्ढ्यच्युतेध्मवाहेति त्रयः आगस्त्येत्येको वा १ ॥ सांभवाहानामागस्त्यदाढर्यच्युतसांभवाहेति त्रयः २ ॥ सोमवाहानां सोमवाहोत्यः आद्यौ पूर्वोक्तावेव ३ ॥ एवं यज्ञवाहानां यज्ञवाहोत्यः ४ ॥ दर्भवाहानां दर्भवाहोत्यः ५ ॥ सारवाहानां सारवाहोत्यः ६ ॥ अगस्तीनामागस्त्यमाहेंद्रमायोभुवेति ७ ॥ पूर्णमासानामागस्त्यपौर्णमासपारणेति त्रयः ८ ॥ हिमोदकानामागस्त्यहैमवर्चिहैमोदकेति त्रयः ९ ॥ पाणिकानामागस्त्यपैनायकपाणिकेति त्रयः १० ॥ अगस्तीनां सर्वेषामविवाहः ॥ सगोत्रत्वात्सप्रवरत्वाच्च ॥ इत्यगस्तयः ॥

## अथ द्विगोत्राः ।

तत्र भारद्वाजाच्छंगात् वैश्वामित्रस्य शैशिरेः क्षेत्रे जातः शौंगशैशिरिर्नाम ऋषिः तस्य गोत्रलक्षणाक्रांतत्वाद्गोत्रत्वं तद्गोत्राणामांगिरसबार्हस्पत्यभारद्वाजशौंगशैशिरेति पंच ॥ आंगिरसबार्हस्पत्यभारद्वाजकात्यात्कीलेति वा ॥ आंगिरसका-

त्यात्कीलेति त्रयो वा ॥ आद्यो भारद्वाजो वा ॥ एषां सर्वभरद्वाजैः सर्वैर्विश्वामित्रैश्चाविवाहः ॥ संकृतयः पूतिमाषास्तंडय इत्यादयोष्टाविंशत्यवराः संकृतयस्तेषामांगिरसगौरिवीति सांकृत्येति त्रयः ॥ शात्तयगौरिवीति सांकृत्येति वा ॥ अंत्ययोर्व्यत्ययो वा ॥ एषां स्वगणस्थैः पूतिमाषादिभिः सर्ववसिष्ठगणैश्चाहर्वसिष्ठसंज्ञकवक्ष्यमाणलौगाक्षिभिश्चाविवाहः केवलांगिरोगणैस्तु विवाहो भवत्येव ॥ आंगिरसत्वेपि सगोत्रत्वाभावात् ॥ द्वित्रिप्रवरसाम्याभावाच्च ॥ केचिद्भारद्वाजांगिरसत्वमाश्रित्य भारद्वाजशौंगशैशिरैः सहाविवाहमाहुस्तन्न ॥ भारद्वाजत्वे दृढप्रमाणाभावात् ॥ प्रयोगपारिजाते काश्यपैः सहैषामविवाह इत्युक्तं तत्र हेतुश्चिंत्य इति कौस्तुभे ॥ लौगाक्षयः दार्भायणाः इत्यादयोष्टत्रिंशदधिका लौगाक्षयस्तेषां काश्यपावत्सारवासिष्ठेति त्रयः ॥ काश्यपावत्सारासितेति वा ॥ एते अहर्वसिष्ठाः॥ नक्तंकाश्यपाः दिनकर्मणि वासिष्ठत्वप्रयुक्तकार्यभाजः ॥ रात्रिकर्मणि काश्यपत्वप्रयुक्तकार्यभाज इत्यर्थः ॥ एतेषां सर्वैः काश्यपैः सर्वैश्च वसिष्ठैः संकृतिभिश्चाविवाहः ॥ अथ स्मृत्यर्थसाराद्युक्ता द्विगोत्राः ॥ देवरातानां वैश्वामित्रदेवरातौदलेति त्रयः ॥ एतेषां सर्वैर्जामदग्न्यैर्विश्वामित्रैश्चाविवाहः ॥ धनंजयानां वैश्वामित्रमाधुच्छंदसधानंजयेति त्रयः ॥ एषां सर्वैर्विश्वामित्रैरत्रिभिश्चाविवाहः ॥ अयं विश्वामित्रगणे प्रागुक्तः ॥ जातूकर्ण्यानां वासिष्ठात्रेयजातूकर्ण्येति ॥ एषां वसिष्ठैरत्रिभिश्चाविवाहः ॥ अयं वसिष्ठगणे सिंधावुक्तः ॥ पूर्वमत्रिगणेषूक्तानां वामरथ्यादीनामत्रिपुत्रिकापुत्राणां च वसिष्ठात्रिभ्यामविवाहः ॥ अत्रिविश्वामित्राभ्यामिति केचित् ॥ पूर्वं भरद्वाजगणस्थऋक्षांतरगणत्वेनोक्तानां कपिलानामांगिरसबार्हस्पत्यभारद्वाजवांदनमातवचसेति पंचप्रवराणां विश्वामित्रभरद्वाजाभ्यामविवाहः ॥ पूर्वं विश्वामित्रेषूक्तानां कतानां वैश्वामित्रकात्यात्कीलेति त्रिप्रवराणां विश्वामित्रभरद्वाजाभ्यामविवाहः ॥ अनेनैव न्यायेन परगोत्रोत्पन्नदत्तकादीनामिदानींतनानामपि द्विगोत्रत्वात् जनकप्रतिग्रहीतृपित्रोर्द्वयोरपि सगोत्रैः सह अविवाहो ज्ञेयः ॥ नात्र पुरुषसंख्या ॥ तेन शतपुरुषोत्तरमपि द्विगोत्रत्वं नापैति ॥ क्षत्रियवैश्यौ तु पुरोहितगोत्रप्रवराविति सर्वसिद्धांतः ॥ अथ स्वगोत्राज्ञाने उपनयने य आचार्यस्तद्गोत्रप्रवरैरेव कर्माणि विवाहाविवाहौ चेति ॥ आचार्यगोत्राज्ञाने तु ॥ "दत्त्वामानं तु कस्मैचित्तद्गोत्रप्रवरो भवेत् ॥"

## अथ मातृगोत्रवर्जननिर्णयः ।

तत्र मातृगोत्रपदेन मातामहगोत्रमेव वर्ज्यम् ॥ तच्च गांधर्वादिविवाहोढापुत्राणां सर्वेषां वर्ज्यम् ॥ ब्राह्मविवाहोढापुत्राणां तु सर्वेषां मातामहगोत्रं न वर्ज्यम् ॥ किं तु माध्यंदिनानामेव ॥ मातृगोत्रं माध्यंदिनीयानामिति सत्याषाढवचनात् ॥ तथैव सर्वत्र शिष्टाचाराच्च ॥

## अथ सगोत्रादिविवाहादौ प्रायश्चित्तम् ।

तत्राज्ञानतः सगोत्रसप्रवरविवाहे कन्यां त्यक्त्वा चांद्रायणं प्रायश्चित्तं कार्यम् ॥ ज्ञानतो द्विगुणम् ॥ एवं कन्याया एतदर्धम् ॥ एवं सपिंडाया विवाहेपि त्यागश्च ब्राह्मण्याः संभोगधर्मकार्ययोरेव ॥ 'मातृवत्परिपालयेत्' इत्यन्नादिना पालनोक्तेः ॥ यस्तु सगोत्रादिकां विवाह्योपगच्छति तस्याज्ञाने विवाहप्रयुक्तचांद्रायणं सगोत्रागमनप्रयुक्तं चांद्रायणद्वयाधिकं ज्ञानतस्तु अधिकं कल्प्यमिति केचित् ॥ अन्ये तु गुरुतल्पव्रताच्छध्येदिति गुरुतल्पसाम्योक्तेः षडब्दं प्रायश्चित्तम् ॥ अज्ञानतस्त्र्यब्दं चांद्रायणत्रयं वेत्याहुः ॥ अज्ञानतः सगोत्रादिषूत्पन्नानां जनकप्रायश्चित्तोत्तरं काश्यपगोत्रेण व्यवहारः कार्यो न तु त्यागः ॥ ज्ञानतस्तु सगोत्राद्युत्पन्नानांचांडालत्वमेव ॥ "आरूढपतितापत्यं ब्राह्मण्यां यश्च शूद्रजः ॥ सगोत्रोढासुतश्चैव चांडालास्त्रय ईरिताः" इति यमस्मृतेः ॥

## अथान्येपि विवाहे निषेधाः ।

"प्रत्युद्वाहो नैव कार्यो नैकस्मै दुहितृद्वयम् ॥ न चैकजन्ययोः पुंसोरेकजन्ये तु कन्यके ॥" अत्रापवादः सोदरयोः सोदरकन्यके वत्सरादिकालव्यवधाने महानद्यादिव्यवधाने वा देये ॥ पूर्वकन्याया दत्तायाः मृतौ तस्यैव वरस्य द्वितीया कन्या देया ॥ प्रत्युद्वाहो दारिद्र्यादिसंकटे कार्यः सोदराणां तुल्यसंस्कारो वर्षमध्ये निषिद्धः ॥ गृहनिर्माणविवाहौ वर्षांतर्न कार्यौ ॥ गृहप्रवेशस्य निषेधाभावाद्गृहप्रवेशोत्तरं विवाहः कार्यः ॥ सोदरयोः पुत्रयोः कन्यापुत्रयोर्वा कन्ययोर्वा विवाहौ षण्मासाभ्यंतरे विशेषतो निषिद्धौ ॥ पुरुषत्रयात्मककुले विवाहान्मौंजीबंधः षण्मासे निषिद्धः ॥ षण्मासे शुभकार्यत्रयं न कार्यम् ॥ अत्र शुभकार्यपदेन मौंजीविवाहावेव ॥ तेन गर्भाधाननामकर्मादिसंस्काराणां न त्रित्वनिषेधः ॥ न वा गर्भाधानादिना चतुष्ट्वादिसंपादनं नाग्निकार्यत्रयं भवेदित्यनेनैकवाक्यतालाघवादिति भाति ॥ भिन्नोदराणामग्निकार्यत्रयं न दोषायेति कश्चित् ॥ केचिन्न कुर्यान्मंगलत्रयमित्यस्य भिन्नार्थत्वं स्वीकृत्य यत्किंचिच्छुभकार्याणामपि त्रित्वं न शुभमित्याहुः ॥ पुरुषोद्वाहात् स्त्र्युद्वाहः षण्मासाभ्यंतरे निषिद्धः ॥ ज्येष्ठमंगलाल्लघुमंगलं न कार्यम् ॥ बहिर्मंडपे विहितं ज्येष्ठमंगलम् ॥ तद्भिन्नलघुगर्भाधानादिकस्य प्राप्तकालस्य न निषेधः ॥ एवं शांत्यादेरपि नैमित्तिकस्य प्राप्तकालस्य न निषेधः ॥ अतिपन्नस्य त्वयं निषेधः ॥ एवं व्रतोद्यापनादीनां वास्तुप्रवेशादीनां च लघुत्वादेव विवाहाद्युत्तरं निषेधः ॥ इदं निषेधचतुष्टयं त्रिपुरुषात्मककुले षण्मासाभ्यंतर एव ॥ एवं मुंडनद्वयनिषेधं व्रतबंधाच्चौलनिषेधं च केचिदाहुः ॥ अथैषामपवादाः ॥ सोदराणामपि समानसंस्कारौ विवाहौ च संकटे अब्दभेदात्कार्यौ ॥ चतुर्दिनव्य-

वधानादेकदिनव्यवधानाद्वा कार्यौ अतिसंकटे एकदिने कर्तृभेदेन मंडपभेदेन वा कार्यौ ॥ द्वाभ्यां कर्तृभ्यां एकस्मिन्नपि लग्ने एकस्मिन्नपि गृहे भिन्नोदरयोर्विवाहः कार्यः ॥ एवं पूर्वोक्तनिषेधचतुष्टयेपि वर्षभेदे दोषाभावः ॥ यमलयोरेककाले एकमंडपे वा समानसंस्काराणां न दोषः ॥ एवं मातृभेदेपि षण्मासाभ्यंतरे समानसंस्कारे दोषो न ॥ मातृभेदे एकजातकन्ययोरेकदिने एकमंडपेपि वेदीभेदेन विवाहो न दोषायेति केचित् ॥

## अथ मंडनान्मुंडननिषेधः ।

पुरुषत्रयात्मककुले मंगलकार्योत्तरं षण्मासाभ्यंतरे मुंडनयुक्तं कर्म न कार्यम् ॥ अत्र सर्वत्र पुरुषत्रयगणनाप्रकारः प्रतिकूलविचारे स्पष्टीकरिष्यते ॥

## अथ मुंडनोदाहरणम् ।

मुंडनकर्म तु चौलं नामसंस्कारादिकमाधानादिकमभ्युदयार्थमैच्छिकसर्वप्रायश्चित्तादिकं क्षौरप्रापकतीर्थयात्रादिकं चोह्यम् ॥ व्रतबंधस्तु कात्यायनमते मंगलरूपत्वाद्विवाहाद्युत्तरं कार्यः ॥ अन्येषां मते मुंडनरूपत्वान्न कार्यः ॥ पित्रोरंत्यक्रियादिप्राप्तमुंडनमाकस्मिकप्राप्तप्रायश्चित्तमुंडनमासन्नमरणेन सर्वप्रायश्चित्तीयमुंडनं च कर्तव्यमेव ॥ नित्यत्वाद्दर्शपूर्णमासचातुर्मास्यादिमुंडनेपि न दोषः ॥ न च 'मुंडनं चौलमित्युक्तम्' 'व्रतोद्वाहौ तु मंगलम्' इति वचसा मंडनमुंडनयोः परिगणनादाधानादीनां न दोष इति वाच्यम् ॥ वाक्यस्योदाहरणार्थत्वात् ॥ अन्यथा व्रतोद्वाहान्नचौलकमित्येव वक्तव्ये 'मंडनान्न तु मुंडनम् ॥' इति सामान्येन वचनरचनानर्थक्यापातात् ॥ तस्माद्गर्भाधानादिलघुमंगलादुद्वाहादिज्येष्ठमंगलाच्चाधानादिमुंडनमपि वर्ज्यमिति भाति ॥ एवं सति कुले बहुकर्मोपरोधः स्यादिति चेत् ॥ विवाहव्रतचूडोत्तरमंगलेषु पिंडदानादौ मासाद्यल्पकालप्रतिबंधवत् ॥ पित्राद्यन्यमरणेऽल्पकालप्रतिकूलनिर्णयवच्च लघुमंगलोत्तरं मासाद्यल्पकालमुंडननिषेधकल्पनं युक्तिबलादाश्रयणीयमिति भाति ॥ अत्र विषये प्राचीननिबंधेषु विशेषो न दृश्यते तथापि धाष्टर्येन मयोक्तो विशेषो युक्तश्चेद्ग्राह्यः ॥ इति मंडनमुंडननिर्णयः ॥

## अथ प्रतिकूलविचारः ।

विवाहनिश्चयोत्तरं वरस्य कन्याया वा सगोत्रत्रिपुरुषात्मककुले कस्यचिन्मरणे प्रतिकूलदोषः ॥ विवाहनिश्चयश्च वैदिको लौकिको वा ग्राह्यः ॥ तत्र वैदिको वाग्दानाख्यविधिना कृतो मुख्यः ॥ लौकिको लग्नतिथिनिश्चयादिर्वरवध्वोः शुल्कभाषाबंधपूगीफलदानादिश्च ॥ सगोत्रत्रिपुरुषेत्युक्त्या मातामहकुलादिव्यावृत्तिः ॥ तथा च वरस्तत्पूर्वपत्नीवरमातापितरौ वरपितामहपितामह्यावनूढा पितृष्वसा चेति पूर्वत्रिपुरुषी ॥ वरस्तस्य भ्राता पत्नी पुत्रानूढकन्यासहितो वरस्यानूढा भ-

गिनी वरस्य स्नुषापुत्रौ अनूढा कन्या च पौत्रस्तद्भार्या चानूढा पौत्री चेति परत्रि-पुरुषी ॥ पितृव्यतत्पत्न्यौ पितृव्यपुत्रस्तत्पत्न्यावनूढा पितृव्यकन्या चेति संतानभेदे त्रिपुरुषी चेति सगोत्रत्रिपुरुषीपुरुषपरिगणना ॥ एतेषामन्यतममरणे प्रतिकूल-मिति पर्यवसितोर्थः ॥ अत्र भ्राता पुत्रपौत्रादिश्चानुपनीतोपि त्रिवर्षाधिकवया ग्राह्यः ॥ एवमनूढभगिन्यादेरपि त्रिवर्षाधिकत्वं युक्तं भाति ॥ एवं वधूकुलेष्यू-ह्यम् ॥ एवमेव मंडनमुंडनादावपि त्रिपुरुषगणनोह्या ॥ अत्र विशेषः ॥ पिता माता पितामहः पितामही पितृव्यः पूर्वपत्नी पूर्वस्त्रियाः पुत्रो भ्रातानूढा भगिनी चैतेषांमरणे विशेषतः प्रतिकूलदोषान्नैव कर्तव्यो विवाहः ॥ एतदन्यत्रिपुरुषसे-पिंडमरणे शांत्यादिना दोषं परिहृत्य विवाहः कार्यः ॥ संकटे तु पित्रादिमरणेपि कालप्रतीक्षाशांतिभ्यां दोषं निर्हृत्य विवाहः कार्यः ॥ तत्र व्यवस्था ॥ निश्चयोत्तरं मातापित्रोर्द्वयोरपि मरणे कालप्रतीक्षाशांतिभ्यामपि दोषशांत्यभावान्न कार्यो वि-वाहः ॥ मातापित्रोरेकैकमरणे तु शांत्यादिना विवाहः ॥ तत्र ॥ "पितुरब्दमि-हाशौचं तदर्धं मातुरेव च ॥ मासत्रयं तु भार्यायास्तदर्धं भ्रातृपुत्रयोः ॥ अन्येषां तु सपिंडानामाशौचं मासंसंमितम् ॥ तदंते शांतिकं कृत्वा ततो लग्नं विधीयते ॥ प्रतिकूले न कर्तव्यं लग्नं यावदृतुत्रयम् ॥ प्रतिकूले सपिंडस्य मासमेकं विवर्जये-त्" ॥ इत्यादिवाक्याश्रयेण व्यवस्थोच्यते ॥ अत्राशौचपदेन प्रतिकूलकृतं विवा-हानधिकारमात्रं कालप्रतीक्षार्थमुच्यते ॥ अतः पितृमरणे वर्षोत्तरं विनायक-शांतिं कृत्वा संकटे विवाहः कार्यः ॥ अतिसंकटे षण्मासोत्तरं विनायक-शांतिं श्रीपूजनादिशांतिं च कृत्वा विवाहः ॥ ततोप्यतिसंकटे मासोत्तरं शांतिद्वयांते विवाह इति संकटतारतम्येन पक्षत्रयम् ॥ मातुर्मरणे षण्मासांते विनायकशांत्या वि-वाहः ॥ अतिसंकटे मासांते शांतिद्वयं कृत्वोद्वाहः ॥ यत्तु ॥ "प्रमीतौ पितरौ यस्य देहस्तस्याशुचिर्भवेत् ॥ न दैवं नापि वा पित्र्यं यावत्पूर्णो न वत्सरः" इति पित्रो-र्मृतौ वर्षपर्यंतं सर्वशुभकर्मनिषेधवचनं तत्प्राग्वाङ्निश्चयात्पित्रोर्मृतौ संकटाभावे वा ज्ञेयम् ॥ भार्यामरणे मासत्रयांते मासांते वा श्रीपूजनादिशांतिः॥ भ्रातृमरणे सार्धमा-सांते मासान्ते वा विनायकशांतिः ॥ पुत्रमृतौ सार्धमासं मासं वा प्रतीक्ष्य श्रीपूजना-दिशांतिः ॥ पितृव्यमरणे मासांते विनायकशांतिः ॥ पितामह्या अनूढभगिन्याश्च मरणे मासांते श्रीपूजनादिशांतिः ॥ एतदन्यत्रिपुरुषसपिंडमरणे मासांते श्रीपूज-नादिशांतिः ॥ ततो विवाहः ॥ गुणवत्तरमातुर्मृतौ षण्मासेन मनःखेदानपगमे वर्षप्रतीक्षा ॥ एवं गुणवत्तरभार्यायाः षण्मासपर्यंतं प्रतीक्षा ॥

## अथ प्रतिकूलापवादः ।

ज्योतिःप्रकाशे तु ॥ अतिसंकटवशेन मात्रादिमरणे मासाधिकप्रतीक्षाया असं-भवे मासमध्येपि दशाहोत्तरं कंचित्कालं प्रतीक्ष्योक्तव्यवस्थया विनायकशांतिं

श्रीपूजनादिशांतिं च कृत्वा गां दत्त्वा पुनर्वाग्दानादि चरेदित्युक्तम् ॥ सर्वोप्ययमपवादः संकटेषु तारतम्येन बुधैर्योज्यः ॥ अल्पसंकटविषये महासंकटविषयकविधिकथने वक्तुः कर्तुश्च दोष एव ॥ दुर्भिक्षराष्ट्रभंगादिभये पित्रोर्मरणाशंकायां च न प्रतिकूलम् ॥ दीर्घरोगिदूरदेशस्थविरक्तानां कन्यायाः प्रौढत्वे च प्रतिकूलदोषो नेत्यपवादः ॥

## अथ श्रीपूजनादिशांतिः ।

श्रीपूजनादिशांतिश्च श्रिये जात इति श्रियम् ॥ इदं विष्णुरिति विष्णुम् ॥ गौरीर्मिमायेति गौरीम् ॥ त्र्यंबकमिति रुद्रम् ॥ परं मृत्योरिति यमं च संपूज्याष्टोत्तरशततिलाज्यं जुहुयात् ॥ भूः स्वाहा मृत्युर्नश्यतां स्नुषायै सुखं वर्धतां स्वाहेति ततो होमं समाप्याथ गोद्वयं दक्षिणा भवेदिति कौस्तुभे द्रष्टव्या ॥ इति प्रतिकूलविचारः ॥

## अथांत्यकर्माभावनिमित्तकमंगलप्रतिबंधनिर्णयः ।

"प्रेतकर्माण्यनिर्वृत्य चरेन्नाभ्युदयक्रियाम् ॥ आचतुर्थं ततः पुंसि पंचमे शुभदं भवेत् ॥" अत्र प्रेतकर्मपदेन सपिंडीकरणात्पूर्वभाविकर्माणि सपिंडीकरणं च सपिंडीकरणोत्तरं पार्वणविधिनोक्तानि मासिकानि चोच्यंते ॥ "सपिंडीकरणादर्वागपकृष्य कृतान्यपि ॥ पुनरप्यपकृष्यंते वृद्धयुत्तगनिषेधनात" इत्यनुमासिकानाप्यपकर्षोक्तेः ॥ अभ्युदयपदेन नांदीश्राद्धयुक्तं कर्ममात्रं ग्राह्यम् ॥ कैश्चिद्विवाहाद्येव ग्राह्यमित्युक्तम् अतुर्थमिति नांदीश्राद्धकर्तारं पुरुषमारभ्य जनकचतुःपुरुषी जन्यचतुःपुरुषी संतानोद्भवा च चतुःपुरुषी सगोत्रा गृह्यते ॥ तथा च नांदीश्राद्धकर्तुः पितृपितामहप्रपितामहाः पत्नीसहिताः कर्तुर्भार्यापुत्रपौत्रप्रपौत्रास्तद्भार्याश्च भ्राता तत्पुत्रपौत्रास्तद्भार्याः पितृव्यतत्पुत्रपौत्रास्तद्भार्याश्च प्रपितामहस्य पुत्रपौत्रप्रपौत्रास्तद्भार्याश्चैतेषां मृतानामनुमासिकांतप्रेतकर्माकरणे मंगलं न कार्यमित्यर्थः ॥ नांदीश्राद्धकर्तात्र मुख्य एव ग्राह्यो न तु मातुलादिर्गौणः ॥ मृतपितृकस्योपनयनादौ संस्कार्यमारभ्यैव चतुःपुरुषी गणना ॥ मातामहादेर्भिन्नगोत्रत्वेपि नांदीश्राद्धदेवतात्वात् प्रेतकर्माभावे मंगलं न भवति ॥ मातामह्यादेः स्वातंत्र्येण देवतात्वाभावाद्दशाहांत्यकर्माभावेपि मंगलप्रतिबंधो नास्ति ॥ इत्यंत्यकर्माभावनिमित्तकमंगलप्रतिबंधनिर्णयः ॥

## अथ चतुर्थीकर्ममध्ये दर्शादिनिर्णयः ।

अथ मौंजीविवाहयोर्नांदीश्राद्धमारभ्य मंडपोद्वासनपर्यंतं मध्ये दर्शादिनं यथा न पतेत्तथा कार्यम् ॥ दर्शान्यपित्रोः क्षयाहादिश्राद्धदिनं यदि ज्ञानादज्ञानाद्वा पतति तदा त्रिपुरुषसपिंडैर्विवाहादिमंगलसमाप्त्युत्तरं श्राद्धं कार्यम् ॥ एवं च दर्शा

न्यश्राद्धस्यैव स्वरूपतो विवाहमध्ये निषेधः न तु दर्शवच्छ्राद्धरहितस्यापि श्राद्धतिथिमात्रस्य ॥ 'वृत्ते विवाहे परतस्तु कुर्याच्छ्राद्धम्' ॥ इत्याद्युक्तेः ॥ एतेन संक्रांतिमन्वाद्यष्टकादिदिनानां श्राद्धदिनत्वादर्शवन्मध्ये पातो निषिद्ध इति शंका निरस्ता ॥ तेन षण्णवतिश्राद्धकर्तृभिः सपिंडैर्मध्यपतितमन्वादेः प्रायश्चित्तादिना संपत्तिः संपाद्या ॥ इति चतुर्थीकर्ममध्ये दर्शादिनिर्णयः ॥

## अथ विवाहादौ रजोदोषसूतकनिर्णयः ।

प्रारंभात्प्रागारंभोत्तरं वा मातुः पितृव्यादेः कर्त्रंतरस्य पत्न्या वा रजोदोषे यद्वक्तव्यं तद्व्रतबंधप्रकरणे विस्तरेणोक्तं तत एव ज्ञेयं रजोदोषजननाशौचादिसंभावनायां नांदीश्राद्धस्यापकृष्यानुष्ठाने दिनावधिः ॥ "एकविंशत्यहर्यज्ञे विवाहे दशवासराः ॥ त्रिषट्चौलोपनयने नांदीश्राद्धं विधीयते ॥ " दशदिनाद्यतिक्रमे पुनर्नांदीश्राद्धमित्यर्थात्सिद्धम् ॥ नांदीश्राद्धोत्तरं सूतकमृतकयोः प्राप्तौ न विवाहादिप्रतिबंधः ॥ " विवाहव्रतयज्ञेषु श्राद्धे होमेर्चने जपे ॥ आरब्धे सूतकं न स्यादनारब्धे तु सूतकम् ॥ प्रारंभो वरणं यज्ञे संकल्पो व्रतसत्रयोः ॥ नांदीमुखं विवाहादौ श्राद्धे पाकपरिक्रिया " इत्युक्तेः ॥ इदं सन्निहितमुहूर्तांतराभावादिसंकटे एव ज्ञेयम् ॥ संकटाभावे तु नांदीश्राद्धे जातेपि सूतकांते मुहूर्तांतरे एव मंगलम् ॥ सर्वोप्याशौचापवादोऽनन्यगतिकत्वे आर्त्तौ च ज्ञेय इति सिंधूक्तेः ॥ तेन व्रते संकल्पोत्तरमाशौचेपि विप्रद्वारैव पूजादि ॥ यज्ञादौ मधुपर्कविधिना वरणोत्तरमपि ऋत्विगंतरालाभादिकेनन्यगतौ संकटे एव च मधुपर्कविधिना वृतस्याशौचाभावः ॥ एवं जपहोमादावप्यूह्यम् श्राद्धे पाकपरिक्रिया पाकप्रोक्षणम् ॥ एतदप्यार्तिसत्त्वे ॥ महासंकटे प्रारंभात्प्रागपि सूतकप्राप्तौ कूष्मांडमंत्रैर्घृतहोमं कृत्वा पयस्विनीं गां दत्त्वा पंचगव्यं प्राश्य शुद्धश्चूडोपनयनोद्वाहप्रतिष्ठादिकमाचरेत् ॥ उपकल्पितबहुसंभारस्य सन्निहितलग्नांतराभावेन नाशाद्यापत्तावप्येवं शुद्धिः ॥ इदं जननाशौचमात्रविषयमिति मार्तंडादौ ॥

## अथ सूतक्यन्नभोजने दोषाभावविचारः ।

कूष्मांडहोमादिना शुद्धिपूर्वकं सूतकमृतकयोर्मध्ये आरब्धे विवाहादौ विप्राणां पूर्वसंकल्पितान्नभोजने दोषो न ॥ पाकपरिवेषणादिकमपि सूतकिभिः कार्यं होमादिविधिना शुद्धिसंपादनादिति कौस्तुभे स्थितम् ॥ नैतद्युक्तम् ॥ लोकविद्विष्टत्वादतः परगोत्रैरेवान्नदानं युक्तमिति भाति ॥ नांदीश्राद्धोत्तरं सूतकमृतकयोः प्राप्तौ पूर्वमन्नसंकल्पाभावेपि विवाहोत्तरकालसंकल्पितान्नभोजनं विप्रैः कार्यम् ॥ अत्रापि "परैरन्नं प्रदातव्यं भोक्तव्यं च द्विजोत्तमैः" इति सर्वसंमतं परैरसगोत्रैरिति

सिंधुमयूखादौ व्याख्यानात् ॥ पूर्वसंकल्पितान्नस्यापि भोजनसमये सूतकप्राप्तौ भोक्तृभिर्भुक्तशेषं त्यक्त्वा परगृहोदकैराचांततादि विधेयम् ॥ पाकशेषः सूतकिभिर्भोक्तव्यः ॥ " भुंजानेषु च विप्रेषु त्वंतरामृतसूतके ॥ अन्यगेहोदकाचांताः " इति स्मृतेः ॥ नांदीश्राद्धोत्तरं भोजनादन्यकाले सूतकप्राप्तौ सूतकिगृहे भोक्तव्यम्॥ भुंजानेषु सूतकप्राप्तौ भोक्तृभिः पात्रस्थमप्यन्नं त्याज्यमिति वाचनिक एव विशेषः ॥ नहि वचनस्यातिभार इति न्यायात् ॥ मम तु भुंजानेष्विति वाक्यमारब्धानारब्धसर्वकर्मस्वसंकल्पितान्नविषयामिति भाति ॥ इति विवाहादौ रजोदोषसूतकप्राप्तिनिर्णयः ॥

## अथ विवाहात्पूर्वं कन्यारजोदोषे प्रायश्चित्तम् ।

विवाहात्पूर्वं कन्याया रजोदर्शने मातृपितृभ्रातॄणां नरकपातः कन्यायाः वृषलीत्वं तद्ऋतुर्वृषलीपतित्वम् ॥ अत्र शुद्धिप्रकारः ॥ कन्यादाता ऋतुसंख्यया गोदानानि एकं वा गोदानं यथाशक्ति ब्राह्मणभोजनं वा कृत्वा कन्यादाने योग्यो भवेत् ॥ कन्या तूपवासत्रयांते गव्यपयःपानं कृत्वा विप्रकुमार्यै सरत्नभूषणं दत्त्वोद्वाहयोग्या भवति ॥ वरश्च कूष्मांडहोमपूर्वकं तामुद्वहन्न दोषी स्यादिति ॥ विवाहहोमकाले रजोदोषे तां स्नापयित्वा युंजानेति तैत्तिरीयमंत्रेण प्रायश्चित्तं हुत्वा होमतंत्रं समापयेत् ॥ यदा तु दात्रभावाद्रजोदर्शनं तदा कन्या वर्षत्रयं प्रतीक्ष्य स्वयं वरं वृणुयात् ॥ नात्र वरस्यापि दोषः ॥ इति कन्यारजोदोषनिर्णयः ॥

## अथ क्षयपक्षादिविचारः ।

पक्षमध्ये तिथिद्वयस्य क्षयेण यस्त्रयोदशादिनात्मकः पक्षः स क्षयपक्षः ॥ तदा बहुप्रजासंहारो राजसंहारो वा ॥ क्षयपक्षे चौलोपनयनोद्वाहादिवास्तुकर्मादि शुभं न कार्यम् ॥ क्षयमासाधिमासगुरुशुक्रास्तादौ विवाहनिषेधः प्रथमपरिच्छेदे ॥ एवं सिंहस्थगुरुनिषेधनिर्णयोपि प्रथमपरिच्छेदे द्रष्टव्यः ॥ क्षयसंवत्सरोपि निषिद्धः ॥ शीघ्रगत्या पूर्वराशिशेषमतिक्रम्य राश्यंतरसंचारोतिचारस्तं प्राप्तो गुरुः पुनः पूर्वराशिं वक्रगत्या यदि नायाति तदा स क्षयसंवत्सरः सर्वकर्मसु वर्ज्यः ॥ तत्र मेषवृषभवृश्चिककुंभमीनराशिषु न दोषः ॥ केचिद्गोदादक्षिणदेशे कोप्यतिचारादिगुरुदोषो नेत्याहुः ॥ इति क्षयपक्षादिविचारः ॥

## अथ वधूवरयोर्गुर्वादिबलविचारः ॥

" मुख्यं गुरुबलं वध्वा वरस्येष्टं रवेर्बलम् ॥ " द्विपंचसप्तनवैकादशस्थो गुरुः कन्यायाः शुभः जन्मतृतीयषष्ठदशमस्थानेषु पूजाहोमात्मकशांत्या शुभः॥ चतुर्थाष्टमद्वादशस्थानेषु दुष्टफलः ॥ कर्कधनुर्मीनगश्चतुर्थादिस्थानेपि न दुष्टः ॥ संकटे चतुर्थद्वादशस्थो द्विवारमष्टमस्त्रिवारं होमादिरूपपूजयार्चितः शुभः ॥ वरराशेस्त्रि-

पद्दशैकादशस्थाने रविः शुभः ॥ अन्यत्र ग्रहमखोक्तपूजया शुभः ॥ गुरुपूजाप्रकार उपनयनप्रकरणे उक्तः ॥

## अथ कन्याविवाहकालः ॥

जन्मतो गर्भतो वा पंचमवर्षप्रभृति अष्टमवर्षपर्यंतं कन्याविवाहे उचितः कालः षड्वर्षोत्तरं वर्षद्वयं प्रशस्ततरः ॥ " षडब्दमध्ये नोद्वाह्या कन्या वर्षद्वयं यतः ॥ सोमो भुंक्ते ततस्तद्वद्गंधर्वश्च ततोनलः" इत्युक्तेः ॥ नवमदशमयोर्मध्यमः ॥ एकादशवर्षेधमः ॥ द्वादशादौ प्रायश्चित्तावहः ॥

## अथ ब्राह्मादिविवाहभेदाः ॥

ब्राह्मो दैव आर्षः प्राजापत्य आसुरो गांधर्वो राक्षसः पैशाच इत्यष्टौ विवाहाः ॥ योग्यवरमाहूयालंकृत्य कन्यादानविधिना तस्मै दानं ब्राह्मो विवाहः १ यज्ञे ऋत्विक्कर्म कुर्वतेऽलंकृत्य कन्यार्पणं दैवः २ वरादेकं गोमिथुनं द्वे वा गृहीत्वा तस्मै कन्यार्पणमार्षः ३ इदं गोमिथुनग्रहणं न निंदितम् ॥ तस्य कुमारीपूजनार्थत्वेन कन्याविक्रयाभावात् ॥ त्वयैतयैव सह गृहधर्म आचरणीय एतस्या जीवनपर्यंतं विवाहोत्तरं चतुर्थाश्रमो वा न कार्य इत्याभाष्य कन्यादानं प्राजापत्यः ४ ज्ञातिभ्यो यथेच्छं धनं दत्त्वा विवाह आसुरः ५ वरवध्वोरिच्छयान्योन्यसंयोगो गांधर्वः ६ युद्धादिना बलाद्धरणं राक्षसः ७ चौर्येण कन्याहरणं पैशाचः ८ पूर्वचतुर्षु पूर्वः-पूर्वः श्रेष्ठः उत्तरेषूत्तरउत्तरो निंद्यः ॥ तत्र विप्रस्य ब्राह्मदैवौ प्रशस्तौ ॥ क्षत्रियस्य गांधर्वराक्षसौ ॥ आसुरो वैश्यस्य ॥ आर्षप्राजापत्यपैशाचाः सर्वेषाम् ॥ संकटे राक्षसभिन्नाः सप्त विप्रस्य ॥ ब्राह्मदैवेतरे षट् क्षत्रियस्य ॥ वैश्यशूद्रयोर्ब्राह्मदैवराक्षसभिन्नाः पंच ॥ सर्वेष्वपि विवाहेषु तत्तत्प्रकारैः कन्यापरिग्रहोत्तरं स्वस्वगृह्यरीत्या विवाहहोमादिविधिरावश्यकः ॥ दानविधिना दानं सर्वत्र न भवति ॥

## अथ सप्तपदीविधेः पूर्वं कन्यान्यत्र देया ॥

पैशाचादौ सप्तपदीविधेः पूर्वमन्यस्मै कन्या देया ॥ ब्राह्मादिष्वपि कन्यादानोत्तरमपि सप्तपदीविधेः पूर्वं वरस्य षंढत्वादिदोषज्ञाने वरमृतौ वा कन्यान्यस्मै देया ॥ ब्राह्मविवाहोढायां जातः पुत्रो दश पूर्वान् दश परान्पितॄंस्तारयते ॥ दैवोढापुत्रः सप्तसप्त ॥ प्राजापत्योढापुत्रः षट्षट् ॥ आर्षोढापुत्रस्त्रींस्त्रीन् ॥ आश्वलायनसूत्रे तु ब्राह्मादिषु द्वादश दशाष्टौ सप्त च पूर्वान्परांश्च पुत्रस्तारयत इत्युक्तम्॥ "अन्येषु दुर्विवाहेषु ब्रह्मधर्मद्विषः सुताः ॥ " वाग्दानोत्तरं वरस्य देशांतरगमने षण्मासं प्रतीक्ष्यान्यस्मै देया ॥ कन्यायाः शुल्कं प्रदाय गमने वर्षप्रतीक्षा ॥ यत्तु बलाद्विवाहे सगोत्रत्वक्लीवत्वादिवरदोषे वा कन्या सप्तपदीविध्युत्तरमपि अन्यस्मै देयेति तत्कलियुगे निषिद्धम् ॥

## अथ वाग्दानोत्तरं कन्यामदातुर्विवादः ॥

वाग्दानोत्तरं पातित्यादिदोषाभावेपि कन्यामदातुर्दंड उक्तः ॥ एवं कन्याया अपस्मारदोषमनुक्ता दातापि दंड्यः ॥ अधर्म्योद्वाहेषु द्विजैर्भोजनादौ कृते आसुरे एकरात्रमुपवासो गांधर्वे त्रिरात्रं राक्षसपैशाचयोश्चांद्रायणं प्रायश्चित्तम् ॥ इति विवाहभेदाः ॥

## अथ परिवेत्रादिनिर्णयविचारः ।

"दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते ॥" स कनिष्ठः परिवेत्ता ज्येष्ठः परिवित्तिः एवं ज्येष्ठायामनूढायां कनिष्ठकन्योद्वाहे ज्येष्ठा कन्या दिधिषुः कनिष्ठाग्रेदिधिषुः ॥ अत्र प्रायश्चित्तम् ॥ अज्ञानतः पित्रादिदत्तोद्वाहे भ्रात्रोः परिवेत्तृपरिवित्तिसंज्ञयोः कृच्छ्रद्वयं कन्यायाः कृच्छ्रं दातुरतिकृच्छ्रं याजकस्य चांद्रायणम् ॥ ज्ञानतः पित्राद्यदत्तोद्वाहे सर्वेषां वत्सरं कृच्छ्राचरणं कामतः पित्रादिदत्तोद्वाहे त्रैमासिकम् ॥ अज्ञानेनादत्तोद्वाहे चांद्रायणादि ॥ दिधिष्वादिपतेरतिकृच्छ्रकृच्छ्रौ ॥ अत्रापवादः ॥ सापत्ने दत्तके वा ज्येष्ठे कनिष्ठस्य दाराग्निहोत्रग्रहणे दोषो न ॥ सोदरेपि क्लीबे मूकबधिरवामनभग्नपादत्वादिदोषयुते देशांतरस्थे वेश्यासक्ते पतिते महारोगिण्यतिवृद्धे कृषिसक्ते धनवृद्धिराजसेवादिव्यापारासक्ते चौर्यादिसक्ते उन्मत्ते विवाहाग्निहोत्रेच्छानिवृत्ते च ज्येष्ठे कनिष्ठस्य दाराग्निहोत्रग्रहणे दोषो न ॥ देशांतरगतं ज्येष्ठमष्टौ द्वादश वा वर्षाणि कनिष्ठः प्रतीक्षेत् ॥ एवं कन्याया अपि ज्येष्ठाया भिन्नमातृजत्वे कनिष्ठाया विवाहे दोषो न ॥ एवं मूकत्वादिदोषयुतायां ज्येष्ठायामूह्यम् ॥ इति परिवेत्रादिनिर्णयः ॥

## अथ कन्यादातृक्रमः ।

पिता पितामहो भ्राता पितृकुलस्थः पितृव्यादिर्मातृकुलस्थो मातामहमातुलादिः सर्वाभावे जननी चेत्येवं पूर्वाभावे परः परः ॥ भ्रातृणामुपनीतानामेवाधिकारः ॥ अनुपनीतभ्रातुर्मात्रादेश्च सत्त्वे मात्रादेरेवाधिकारो न त्वनुपनीतभ्रातुः ॥

## सर्वाभावे कन्या वरश्च नांदीमुखाधिकारी ।

सर्वाभावे कन्या स्वयं वरं वृणुयात् ॥ कन्यास्वयंवरे मातुर्दातृत्वे च ताभ्यामेव नांदीश्राद्धं कार्यम् ॥ तत्र माता कन्या वा स्वयं प्रधानसंकल्पमात्रं कृत्वान्यद्ब्राह्मणद्वारा कारयेत् ॥ वरस्तु संस्कृतभ्रात्राद्यभावे स्वयमेव नांदीश्राद्धं कुर्यान्न माता ॥ उपनयनेन कर्माधिकारस्य जातत्वात् ॥ द्वितीयादिविवाहे वरः स्वयमेव नांदीश्राद्धं कुर्यात् ॥

## अथ परकीयकन्यादाने विशेषः ।

"आत्मीकृत्य सुवर्णेन परकीयां तु कन्यकाम् ॥ धर्मेणोद्वाहविधिना दानमसगोत्रेपि मुज्यते ॥" इति दातृनिर्णये वरवध्वोरपि नांदीकर्तृत्वनिर्णयः ॥

## अथ वधूवरयोर्मूलजातत्वादिगुणदोषनिर्णयः ।

मूलनक्षत्राद्यपादत्रयजातौ वधूवरौ स्वस्वश्वशुरं नाशयतः ॥ आश्लेषांत्यपादत्रयजातौ श्वश्रूं ज्येष्ठांत्यपादजातावन्योन्यज्येष्ठभ्रातरम् ॥ विशाखांत्यपादजातावन्योन्यकनिष्ठभ्रातरम् ॥ मघाप्रथमपादे मूलवत्फलं केचिदाहुः ॥ केचिदुपनयनस्य द्वितीयजन्मरूपत्वात्तेन च द्वितीयजन्मना पूर्वजन्मसंभवमूलादिदोषस्य निरस्तत्वाद्वरस्य श्वशुरघातित्वादिदोषो नेत्यपवादं संकटे वदंति श्वशुराद्यभावे वध्वा अपि न दोषः ॥ "नक्षवृक्षनदीनाम्नीं नांत्यपर्वतनामिकाम् ॥ न पर्त्यहिप्रेष्यनाम्नीं न विभीषणनामिकामुद्वहेत्" इति ॥ वराय पुंस्त्वं परीक्ष्य कन्या देया ॥ "यस्याप्सु प्लवते बीजं ह्रादि मूत्रं च फेनिलम्" इत्यादि पुंस्त्वपरीक्षा ॥ "कुलं च शीलं च वपुर्वयश्च विद्यां च वित्तं च सनाथतां च ॥ एतान्गुणान्सप्त परीक्ष्य देया कन्या बुधैः शेषमचिंतनीयम् ॥" ॥ इति वधूवरयोर्मूलजातत्वादिगुणदोषनिर्णयः ॥

## अथ विवाहे मासादिनिर्णयः ।

"माघफाल्गुनवैशाखज्येष्ठमासाः शुभप्रदाः ॥ मार्गशीर्षो मध्यमः स्यात्कचिदाषाढकार्त्तिकौ ॥" अत्र मिथुनेर्के आषाढो वृश्चिके कार्त्तिकश्च देशाचारानुरोधेन ग्राह्यौ न सर्वदेशे ॥ एवं मकरस्थपौषो मेषस्थचैत्रोपि ॥

## ज्येष्ठस्य ज्येष्ठमासि विचारः ।

ज्येष्ठयोर्वधूवरयोर्ज्येष्ठे मासि विवाहो न शुभः ॥ मासांतरे मध्यमः ॥ "न ज्येष्ठयोर्विवाहः स्याज्ज्येष्ठे मासि विशेषतः ॥ द्वौ ज्येष्ठौ मध्यमौ प्रोक्तावेकं ज्यैष्ठ्यं सुखावहम् ॥ ज्येष्ठत्रयं न कुर्वीत विवाहे सर्वसंमतम्" इत्युक्तेः ॥ तथा च ज्येष्ठमासो ज्येष्ठगर्भस्य मंगले मध्यमः ॥ जन्ममासजन्मनक्षत्रादिकं ज्येष्ठापत्यस्य निषिद्धम् ॥ सार्वकालमेके विवाहमिति त्वासुराद्यधर्मविवाहविषयम् ॥

## अथार्द्राप्रवेशविचारः ।

मयूखे आर्द्रादिदशनक्षत्रेषु सूर्याधिष्ठितेषु विवाहमौंज्यादिकं वसिष्ठादिभिर्निषिद्धमित्युक्तम् ॥ नैतत्कौस्तुभसिंध्वादिग्रंथे मार्तंडादिज्योतिर्ग्रंथेपीति बहवः शिष्टाः आर्द्रादिप्रवेशदोषं न मन्यंते ॥

## अथ तिथिनक्षत्रादिविचारः ।

अमावास्या निषिद्धा रिक्तांष्टमीषष्ठ्योल्पफलाः ॥ अन्यास्तिथयो बहुफलाः ॥ शुक्लपक्षः श्रेष्ठः कृष्णस्त्रयोदशीपर्यंतो मध्यमः ॥ सोमबुधगुरुशुक्रवाराः शुभाः ॥ अन्ये मध्यमाः ॥ रोहिणीमृगमघास्तिस्र उत्तराहस्तस्वातीमूलानुराधारेवत्यः सर्वसंमतनक्षत्राणि ॥ हरदत्तमते चित्राश्रवणधनिष्ठाश्विन्य इत्यधिकानि चत्वारि ॥ तत्रापि खलग्रहयुतं नक्षत्रं वर्ज्यम् ॥ चंद्रताराबलं कन्यावरयोरुभयोरपि ॥ अन्यतरस्य चंद्रबलाभावे रजतादिदानं कार्यम् ॥ " मेषः कन्या घटः सिंहो नक्रं युग्मं धनुर्वृषः ॥ मीनः सिंहो धनुः कुंभोजादीनां घातचंद्रमाः ॥ यात्रायां युद्धकार्येषु घातचंद्रं विवर्जयेत् ॥ विवाहे सर्वमांगल्ये चौलादौ व्रतबंधने ॥ घातचंद्रो नैव चिंत्यो यज्ञे सीमंतजातयोः ॥ मृत्युयोगे पारिघार्धे भद्रायां पातवैधृतौ ॥ विष्कंभादेर्दुष्टभागे तिथिवृद्धिक्षयेपि च ॥ यामार्धकुलिकादौ च गंडांते रविसंक्रमे ॥ केतूद्गमे भूमिकंपे विवाहाद्यं विवर्जयेत् ॥ " ग्रहणे पादादिग्रासे त्रिचतुःषडष्टदिवसाः प्रागर्धिता वर्ज्याः ॥ भूकंपे उल्कापाते च त्रिदिनं वज्रपाते चैकं दिनं वर्ज्यम् ॥ यावत्केतूद्गमस्तावदशुभः समयो भवेत् ॥ अस्यापवादः भूकंपादेर्न दोषोस्ति वृद्धिश्राद्धे कृते सति दिवाविवाहः प्रशस्तः ॥ रात्रावपि कन्यादानं हेमाद्यादिमते प्रशस्तं भवति ॥

## अथ मुहूर्तविचारः तत्र लग्ने ग्रहबलम् ।

त्रि ३ षष्ठा ६ ऽष्ट ८ स्वर्कस्त्रि३ जल ४ धन २ गोब्जः क्षितिसुतस्त्रि ३ षष्ठ ६ स्थौ ज्ञेज्यौ व्ययनिधन १२ । ८ वर्ज्यौ भृगुसुतः ॥ द्वितीयाब्धिष्वंकाभ्रतनुषु २ ४ । ५। ९ । १० । १ रिपु ६ त्र्य ३ ष्ट ८ सु शनिस्तमः केतुश्चाये ११ भवति सुखहेतुश्च सकलः ॥ "

## अथ लग्ने वर्ज्यग्रहाः ।

" रविर्लग्ने १ चंद्रस्तनु १ रिपु ६ मृति ८ स्थः क्षितिसुतोष्टलग्नाभ्रे ८। १ ।१० ज्ञेज्यौ निधन ८ उशनारुय ३ ष्ट ८ रिपु ६ षु ॥ शनिः शेषौ लग्ने १ तनुपतिरर्थार्य६ष्टम ८ गृहे विवाहे स्युः सर्वे मदनसदने ७ नैव शुभदाः ॥ शेषौ राहुकेतू ॥ अन्ये द्वादशगं १२ चंद्रं दृक्केशनवमांशपौ ॥ षष्ठाष्ट ६ । ८। गौ बुधं चाभ्रे १० वर्ज्यानाहुर्मनीषिणः ॥ मेषान्नक्रात्तुलात्कर्कात्त्रिर्गण्या नवमांशकाः ॥ शस्ता वृषनृयुकुकर्ककन्यातुलधनुर्झषाः ॥ "

## अथैकविंशतिमहादोषाः ।

"दुःपंचांग्यष्टमोसृक् सविधुखलतनुः षण्मृतींदुः सितोरौ संक्रांतिर्गंडदोषः सख-

लभादिनजौ चक्रचक्रार्धपातौ ॥ रंध्रं लग्नं कुवर्गोस्तगखल उदयास्ताशुचिः क्रूरवेधः कर्तर्येकार्गलांत्रिर्ग्रहणभकुलवौ दुःक्षणोत्पातभे च ॥ ”

## अथ संकटे गोधूलम् ।

“गोधूले पदजादिके शुभकरं पंचांगशुद्धौ रवेरर्धास्तात्परपूर्वतोर्धघटिकं तत्रेंदुमष्टारिगम् ॥ सोग्रांगं कुजमष्टमं गुरुयमाहःपातमर्कक्रमं जह्याद्विप्रमुखेति संकट इदं सद्यौवनाद्ये क्वचित् ॥”

## अथ यथोक्तचंद्रताराद्यभावे दानानि ।

“ चंद्रे च शंखं लवणं च तारे तिथौ विरुद्धे त्वथ तंडुलांश्च ॥ धान्यं च दद्यात्करणे च वारे योगे विरुद्धे कनकं च देयम् ॥ ” षड्वर्गशुद्ध्यादिविचारः कालसाधनादिप्रकारः कुलिकादिस्वरूपाणि च ज्योतिर्ग्रंथेभ्यो ज्ञातव्यानि विस्तरभयान्नेहोच्यंते ॥ इति मुहूर्तविचारसंक्षेपः ॥

## अथ मंडपादिमुहूर्ताः ॥

मंडपनिर्माणाद्यंगजातमंगिलो विवाहादेरुक्तनक्षत्रादौ कार्यम् ॥“ कंडनदलनयवारकमंडपमृद्वेदिवर्णकाद्यखिलम् ॥ तत्संबंधिगतागतमृक्षे वैवाहिके कुर्यात् ” इत्युक्तेः ॥ यवारकं चिकसा इति भाषायाम् ॥ एवं हरिद्रादि ॥ अंगेषु चंद्रबलं नापेक्ष्यम् ॥ विवाहांगं विवाहात्प्राक् तृतीयषष्ठनवमदिनेषु न कार्यम् ॥ तत्र मंडपः षोडशद्वादशदशाष्टान्यतमसंख्यहस्तश्चतुर्द्वारः कार्यः ॥ मंडपे चतुर्वरकरां पंचवधूकरां वा वेदीं चतुरस्रां सोपानयुतां प्राक्प्रवणां रंभास्तंभादिभिः सर्वतः सुशोभितां गृहनिर्गमाद्वामभागे कुर्यात् ॥ अथ कन्याया जन्मकालीनग्रहादियोगसूचितवैधव्यपरिहारोपायः ॥ तत्र मूर्तिदानम् ॥ कन्या देशकालौ संकीर्त्य वैधव्यहरं श्रीविष्णुप्रतिमादानं करिष्ये इति संकल्प्य पलतदर्धतदर्धान्यतमप्रमाणहेमनिर्मितां विष्णुप्रतिमां चतुर्भुजां सायुधां घृतेनाचार्येणाग्न्युत्तारणादिपूर्वकं षोडशोपचारैः पूजयेत् ॥ वस्त्रार्पणकाले पीतवस्त्रे पुष्पार्पणकाले कुमुदोत्पलमालां च दद्यात् ॥ पूजांते कन्या देवं प्रणम्य मंत्रेण दद्यात् ॥ “यन्मया प्राञ्चि जनुषि भ्रंत्या पतिसमागमम् ॥ विषोपविषशस्त्राद्यैर्हतो वापि विरक्तया ॥प्राप्यमाणं महाघोरं यशःसौख्यधनापहम् ॥ वैधव्याद्यतिदुःखौघं तन्नाशय सुखाप्तये ॥ बहुसौभाग्यवृद्धयै च महाविष्णोरिमां तनुम् ॥ सौवर्णीं निर्मितां शक्त्या तुभ्यं संप्रददे द्विज” इति ॥ ततो यथाशक्ति हेमदक्षिणां दत्त्वा अनघाद्याहमस्मीति त्रिर्वदेत् ॥ एवमस्त्विति विप्रोऽपि त्रिः ॥ ततो विप्रभोजनम् ॥

## अथ वैधव्यहरः कुंभविवाहः ।

विवाहकर्ता पित्रादिः कन्यावैधव्यहरं कुंभविवाहं करिष्ये इति संकल्प्य नांदीश्राद्धांतं कृत्वा महीद्यौरित्यादिना कुंभस्थापनांते तत्र वरुणप्रतिमायां वरुणं संपूज्य तत्र कलशमध्ये विष्णुप्रतिमायां विष्णुं षोडशोपचारैः संपूज्य प्रार्थयेत् ॥ "वरुणांगस्वरूपाय जीवनानां समाश्रय ॥ पतिं जीवय कन्यायाश्चिरं पुत्रसुखं कुरु॥ देहि विष्णो वरं देव कन्यां पालय दुःखतः" इति ॥ ततो विष्णुरूपिणे कुंभायेमां कन्यां श्रीरूपिणीं समर्पयामीति समर्प्य परित्वेत्यादिमंत्रैरधस्ताद्दुपरि च कुंभं कन्यां च मन्त्रावृत्त्या परिवेष्ट्य ततः कुम्भं निःसार्य जलाशये प्रभज्य शुद्धजलेन समुद्रज्येष्ठेत्यादिमन्त्रैः पंचपल्लवैः कन्यामभिषिच्य विप्रान् भोजयेदिति ॥ इति कुम्भविवाहः ॥

## अथ वरस्य मृतभार्यत्वपरिहारोपायः ।

तत्र परिवेत्तृत्वपापान्मृतभार्यत्वम् ॥ तत्पापपरिहाराय प्राजापत्यत्रयं चांद्रायणत्रयं कृत्वा असकृन्मृतभार्यत्वयोगे तदुभयत्रयमावृत्त्या कृत्वा मृतभार्यत्वनिरासनद्वारा श्रीपरमेश्वरप्रीत्यर्थमयुतसंख्यचर्वाज्यहोमं करिष्य इति संकल्प्याग्निस्थापनांतेऽन्वाधानम् ॥ दुर्गाग्निविष्णून् अष्टाधिकायुतसंख्याभिश्चर्वाज्याहुतिभिः शेषेण स्विष्टकृतमित्यादि ॥ प्रतिदैवतं तूष्णीं निरूप्य प्रोक्ष्य च त्यागकाले अष्टोत्तरायुतसंख्याहुतिपर्याप्तं चर्वाज्यद्रव्यं यथामन्त्रलिंगं दुर्गायै अग्नये विष्णवे च न ममेति त्यजेत् ॥ जातवेदसेत्यनुवाकस्य उपनिषद ऋषयः ॥ दुर्गाग्निविष्णवो देवताः ॥ त्रिष्टुप्छन्दः॥चर्वाज्यहोमे विनियोगः ॥ अनुवाकानुवृत्त्या प्रत्यृचं होमः॥ तत्र प्रथमं चतुरधिकपंचसहस्रसंख्यश्चरुहोमस्ततश्चतुरधिकपंचसहस्राज्यहोम इत्येवमयुतहोमः ॥ होमशेषं समाप्य दश विप्रान् भोजयेदिति ॥ अथ वा कस्य चिद्ब्राह्मणस्य विवाहं कुर्यात् ॥ अथ मृतपुत्रत्वदोषे ब्राह्मणोद्वाहनं हरिवंशश्रवणं महारुद्रजपश्चेति त्रीणि व्यस्तानि समस्तानि वा शक्त्यपेक्षया कुर्यात् ॥ रुद्रजपदशांशेनाज्याक्तदूर्वाहोमः॥ हरिवंशश्रवणविधिरन्येपि विधयो विस्तरेण प्रागुक्ताः ॥

## अथ कन्यादानप्रशंसा ।

यथाशक्ति भूषणालंकृतकन्याप्रदाताश्वमेधयाजीभयेषु प्राणदाता चेति त्रयः समपुण्याः ॥ "श्रुत्वा कन्याप्रदातारं पितरः सपितामहाः ॥ विमुक्ताः सर्वपापेभ्यो ब्रह्मलोकं व्रजंति ते ॥" इति कन्यादानप्रशंसा ॥

## अथ कन्यागृहे भोजननिषेधः स्त्रिया सह च ।

" विष्णुं जामातरं मत्वा तस्य कोपं न कारयेत् ॥ अप्रजायां तु कन्यायां ना-

श्रीयात्तस्य वै गृहे ॥" इति कन्यागृहे पित्रोर्भोजननिषेधः ॥ विवाहमध्ये स्त्रिया सह भोजनेपि न दोषः ॥ अन्यदा पत्न्या सह भोजने चांद्रायणं प्रायश्चित्तम् ॥

## अथ वाग्दानादिविचारः ।

विवाहनक्षत्रादियुते सुदिने वरस्य पित्रादिः कन्यागृहं गत्वा कन्यापूजनं करिष्ये ॥ तदंगत्वेन गणपतिपूजनं वरुणपूजनं च करिष्य इति संकल्पयेत् ॥ कन्यापिता तु करिष्यमाणकन्यादानांगभूतं वाग्दानं करिष्ये तदंगगणपतिपूजनं वरुणपूजनं च करिष्य इति संकल्पयेत् ॥ अवशिष्टः प्रयोगोन्यत्र ज्ञेयः ॥

## अथ पुत्रविवाहे संकल्पादि ।

अथ विवाहदिने तत्पूर्वदिने वा वध्वा हरिद्रातैलादिना मंगलस्नानं कारयित्वा तच्छेषहरिद्रादिना वरस्य मंगलस्नानं कारणीयमित्याचारः ॥ एवं वरस्य पित्रादिः पत्न्या संस्कार्येण च सह कृताभ्यंगस्नानोऽहतवासाः प्राङ्मुख उपविश्य स्वदक्षिणे पत्नीं तदक्षिणे संस्कार्यमुपवेश्य देशकालौ संकीर्त्य ममास्य पुत्रस्य दैवपित्र्यऋणापाकरणहेतुधर्मप्रजोत्पादनसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं विवाहाख्यं संस्कारकर्म करिष्ये ॥ तदंगत्वेन स्वस्तिवाचनं मातृकापूजनं नांदीश्राद्धं नंदिन्यादिमण्डल[illegible] स्थापनं च करिष्ये ॥ तदादौ निर्विघ्नतासिद्ध्यर्थं गणपतिपूजनं करिष्य इति पुत्रविवाहे संकल्पः ॥ कन्याविवाहे तु जातकर्मादिलोपे ममास्याः कन्यायाः जातकर्मनामकर्मसूर्यावलोकननिष्क्रमणोपवेशनान्नप्राशनचौलसंस्काराणां बुद्धिपूर्वकलोपजन्यप्रत्यवायपरिहारार्थं प्रतिसंस्कारमर्धकृच्छ्रं चूडायाः कृच्छ्रं तत्प्रत्याम्नायगोनिष्क्रयीभूतयथाशक्तिरजतदानेनाहमाचरिष्ये ॥ गर्भाधानसीमंतयोर्लोपे तयोरप्यूहः ॥ ततो ममास्याः कन्याया भर्त्रा सह धर्मप्रजोत्पादनगृह्यपरिग्रहधर्माचरणेष्वधिकारसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं विवाहाख्यं संस्कारं करिष्य इति विशेषः ॥ शेषं पूर्ववत ॥ भ्राता मम भ्रातुरिति भगिन्या इति वा ॥ पितृव्यादिः कर्ता मम भ्रातुः सुतस्य भ्रातृकन्याया इति वा संकल्पोहं कुर्यात् ॥ वरवध्वोः स्वयं कर्तृत्वे मम दैवपित्र्यऋणेत्यादि मम भर्त्रा सहेत्यादि च संकल्पः ॥ केचित्स्वस्तिवाचनकाले कन्यादानादिकाले वा प्रधानविवाहसंस्कारसंकल्पं न कुर्वंति स प्रमाद इति बहवः ॥ अन्ये तु कन्यादानविवाहहोमादिसंकल्प एव प्रधानसंकल्पस्तदतिरिक्तविवाहपदार्थाभावादित्याहुः ॥

## अथ नांदीश्राद्धे देवताभेदेन संकल्पाः ।

मातृकापूजांते मृतपितृमातृमातामहो वरवध्वोः पिता स्वपित्राद्युदेशकपार्वणत्रयुतं नांदीश्राद्धं कुर्यादित्यसंदिग्धम् ॥

## अथ जीवत्पित्रादीना नादीश्राद्धे ।

मातर्येव जीवंत्यां तत्पार्वणलोपः ॥ मातामहमात्रजीवने तत्पार्वणमात्रलोपः ॥ तथा चोभयत्र पार्वणद्वयेनैव नांदीश्राद्धसिद्धिः ॥मातृमातामहयोर्जीवने पितृपार्वणेनैव तत्सिद्धिःपितृप्रपितामहमृतौ पितामहजीवने च पितृप्रपितामहतत्पितॄनुद्दिश्य पितृपार्वणम्॥तथाच पितृप्रपितामहतत्पितरो नांदीमुखा इदं वः पाद्यमित्यादिप्रयोगः ॥ प्रपितामहमात्रजीवने पितृपितामहतात्पितामहा इत्युद्देशः ॥ पितृमृतौ पितामहप्रपितामहजीवने पितः पितामहस्य पितामहप्रपितामहौ च नांदीमुखा इत्युच्चारः ॥ एवं मातृमरणे पितामहीमात्रजीवने मातः पितुः पितामहीप्रपितामह्यौ च नांदीमुखा इत्युच्चारः॥ प्रपितामहीमात्रजीवने मातृपितामह्यौ पितुः प्रपितामही च नांदीमुखा इत्युच्चारः ॥ पितामहीप्रपितामह्योर्जीवने मातः पितामहस्य पितामहीप्रपितामह्यौ चेत्युच्चारः ॥ मुख्यमातृजीवने सापत्नमातृमरणेपि न मातृपार्वणम् ॥ एवं मुख्यपितामहीजीवने पितामह्याः सपत्नीमृतावपि तया सह न मातृपार्वणं किं तु पूर्वोक्त एवोच्चारः ॥ एवं प्रपितामहीसपत्नीविषयेपि ॥ एवं मुख्यमातामहीजीवने तत्सपत्न्यादिमरणेपि न मातामहादीनां सपत्नीकत्वेनोच्चारः किं तु केवलानामेव ॥ दर्शादौ मातृजीवने सापत्नमातुर्मृतौ केवलानामेव पित्रादीनामुद्देश इति सिद्धांतात् ॥ अथ मातामहमृतौ मातुः पितामहजीवने मातामहतत्पितामहप्रपितामहा इत्युच्चारः ॥ मातुः प्रपितामहमात्रजीवने मातामहमातृपितामहौ मातामहस्य प्रपितामहश्च नांदीमुखा इत्युच्चारः ॥ द्वयोर्जीवने मातामहमातुः पितामहस्य पितामहप्रपितामहौ च नांदीमुखा इत्युच्चारः ॥ अथ जीवत्पितृको मृतमातृमातामहश्च विवाहोपनयनजातकर्मादिषु पुत्रसंस्कारेषु मातृमातामहपार्वणद्वयमेव कुर्यात् ॥ मातर्यपि जीवत्यां मातामहपार्वणमेव ॥ मातामहजीवने मातृमरणे जीवत्पितृकः सुतसंस्कारे मातृपार्वणमेव देवरहितं कुर्यात् ॥ त्रिष्वपि जीवत्सु सुतसंस्कारे पितुः पित्रादीनुद्दिश्य पार्वणत्रयं कुर्यात् ॥ त्रिष्वपि जीवत्सु सुतसंस्कारे नांदीश्राद्धलोप एवेति पक्षांतरं ग्रंथारंभे उक्तम् ॥ द्वितीयविवाहसमावर्तनाधानादिषु स्वसंस्कारेषु नांदीश्राद्धं कुर्वन् जीवत्पितृकः पितुः पित्रादीनुद्दिश्य पार्वणत्रयं कुर्यात् ॥ पितुर्मातृपितामहीप्रपितामह्यः पितुः पितृपितामहप्रपितामहाः पितुर्मातामहमातुः पितामहमातुः प्रपितामहा नांदीमुखा इति तत्रोच्चारः॥ अत्र पितुर्मात्रादिजीवने तत्पार्वणलोपः॥मृतपितृकस्तु स्वपित्रादीनुद्दिश्येति त्वसंदिग्धम्॥ पितृपितामहयोर्जीवने पितामहस्य मात्रादिपार्वणत्रयोद्देशः॥त्रयाणां जीवने पितृपार्वणलोपः तत्र सुतसंस्कार इव स्वसंस्कारे मातृमातामहयोः पार्वणाभ्यामेव नांदीश्राद्धसिद्धिः ॥ पित्रादित्रयजीवने मातृमातामहयोश्च जीवने प्रपितामहस्य पित्रादिपार्वणत्रयोद्देशेन नांदीश्राद्धम् ॥ एवं प्रथमविवाहेपि कर्त्रंतराभावात् ॥ वर एव नांदी-

श्राद्धं कुर्वन् मृतपितृकः स्वपित्रादीनुद्दिश्य जीवत्पितृकस्तु पितुः पित्रादीनुद्दिश्य कुर्यात् ॥ जीवत्पितृपितामहस्तु पितामहस्य पित्रादिपार्वणत्रयोद्देशेन ॥ प्रपितामहस्यापि जीवने प्रपितामहस्य पित्रादिपार्वणत्रयोद्देशेन वा पितृपार्वणलोपेन वा नांदीश्राद्धम् ॥ अत्र सर्वत्र पितुः पितामहादेर्वा पित्रादिपार्वणोद्देशपक्षे स्वमातृमातामहयोर्मरणेपि न स्वमातृमातामहयोः पार्वणं किं तु पित्रादेर्मातृमातामहयोरेवेति ज्ञेयम् ॥ इति जीवत्पितृकनांदीश्राद्धप्रयोगः ॥

## अथ पित्रन्यकर्तृकनांदीश्राद्धप्रयोगः ।

यदा तु कन्याविवाहं पुत्रस्योपनयनं प्रथमविवाहं च पितृव्यमातुलादिः करोति तदा संस्कार्यस्य मृतपितृकत्वे अस्य संस्कार्यस्य पितृपितामहप्रपितामहा इत्यादि प्रयोगं कुर्यात् ॥ सोदरभ्रातुर्नोच्चारे विशेषः भ्रातुः पित्रादीनां संस्कार्यपित्रादीनां चैक्यात् ॥ सापत्नभ्राता तु संस्कार्यस्य मातृपितामहीप्रपितामह्य इत्याद्युच्चारयेत् ॥ संस्कार्यमातृजीवने तत्पार्वणलोपः ॥ संस्कार्यस्य जीवत्पितृकत्वे मातुलादिः कर्ता संस्कार्यपितुः मातृपितामहीप्रपितामह्यः संस्कार्यपितुः पितृपितामहप्रपितामहा इत्याद्युच्चार्य तत्पितुः पित्रादिपार्वणत्रयं कुर्यात् ॥ संस्कार्यस्य पितृपितामहयोर्जीवने मातुलादिः संस्कार्यस्य पितुर्मात्रादीन् मातामहादींश्चोद्दिश्य पार्वणद्वयं कुर्यात् ॥ पितुर्वर्गद्वयाद्यजीवने एकैकवर्गपार्वणम् ॥ पितुर्वर्गत्रयाद्यजीवने मातुलादिः पितामहस्य मात्रादिपार्वणत्रयोद्देशं कुर्यात् ॥ पितामहस्य मात्रादिजीवने तत्पार्वणलोपः पूर्ववत् ॥ पितृव्ये जीवत्पितृकसंस्कारकर्तरि नोच्चारे विशेषः ॥ संस्कार्यपितुः पित्रादीनां पितृव्यस्य पित्रादीनां चैक्यात् ॥ पितामहस्य संस्कर्तृत्वे संस्कार्यपितृमरणे संस्कार्यस्य पितः मम पितृपितामहौ च नांदीमुखाः संस्कार्यस्य मात्रादयो मातामहादयश्चेत्याद्युच्चारः ॥ संस्कार्यपितृजीवने पितामहः कर्ता स्वमातृपितृमातामहपार्वणानि ममेति पदरहितानि तत्सहितानि वोच्चारयेत् ॥ एवं प्रपितामहे कर्तर्यपि योज्यम् ॥ दातुमशक्नुवता कन्यादानाधिकारिणा त्वं कन्यादानं कुर्विति प्रार्थितो यः परकीयकन्यां दातुमिच्छति यश्च सुवर्णेनात्मीयां कृत्वा अनाथां ज्ञात्वा वाऽन्यकन्यां दातुमिच्छति सोपि संस्कार्यायाः कन्यायाः पित्रादीनुच्चारयेत् ॥ तस्याः पितृजीवने तदीयमात्रादीन् तस्या वर्गत्रयाद्यजीवने पितुः पित्रादीनिति यथासम्भवमूह्यम् ॥ इति पित्रन्यकर्तृकनांदीश्राद्धप्रयोगः ॥

## अथ दत्तककर्तृत्वे व्यवस्था ।

दत्तकन्याया विवाहं कुर्वन्प्रतिग्रहीता पिता स्वपित्रादीनुद्दिश्यैव कुर्यात् ॥ दत्तकस्तु पुत्रो यदि अधिकार्यतराभावाल्लब्धजनकपितृधनस्तदाजनकपित्रादीन् प्रतिग्रहीतृपित्रादींश्च पितरौ पितामहौ प्रपितामहौ च नांदीमुखा इत्येवमुच्चार्य

## अथ मधुपर्के विचारः ।

पंचविंशतिदर्भाणां वेण्यग्रग्रंथिसंयुतो लंबाग्रो विष्टरः संपाद्यः॥ "वरस्य या भवेच्छाखा तच्छाखा गृह्यचोदिता ॥ मधुपर्कः प्रदातव्यो ह्यन्यशाखेपि दातरि ॥" दधिमधुमिश्रं मधुपर्कः ॥ तत्र दध्यलाभे पयो जलं वा ॥ मध्वलाभे सर्पिर्गुडो वा प्रतिनिधिः ॥ गृहागतं स्नातकं वरं मधुपर्केणार्हयिष्य इति संकल्पः ॥ वरस्य द्वितीयोद्वाहे तु स्नातकमिति पदलोपः ॥ ततो यथागृह्यं मधुपर्कप्रयोगो ज्ञातव्यः॥ एवं गुरुः श्रेष्ठविप्रा राजा चेति गृहागताः ॥ यज्ञे वृता ऋत्विजश्च मधुपर्केण पूजनीयाः ॥ ऋत्विगादीनामपि अर्च्यशाखयैव मधुपर्को न तु दातृशाखया ॥ जयंतस्तु सर्वत्र यजमानशाखयैव मधुपर्क इत्याह ॥ अत्र गंधपुष्पधूपदीपपूजांते उपहारो माषविकारसहितो भोजनार्थं देयः ॥ एवं मधुपर्के तत्पूर्वं वा कृतभोजनायैव वरायोपोषितो दाता कन्यां दद्यात् ॥

## अथ लग्नघटीस्थापनम् ।

दशपलमिततास्रघटितं षडंगुलोन्नतं द्वादशांगुलविस्तृतं घटीयन्त्रं कुर्यादिति सिंधुः ॥ "द्वादशार्धपलोन्मानं चतुर्भिश्चतुरंगुलैः ॥ स्वर्णमाषैः कृतच्छिद्रं यावत्प्रस्थजलप्लुतम्" इति तु श्रीभागवते तृतीयस्कंधे उक्तम् ॥ अस्यार्थः॥ अशीतिगुंजात्मकः कर्षः अस्यैव सुवर्णसंज्ञा ॥ कर्षचतुष्टयं पलम् ॥ तथा च षट्पलताम्रविरचितं पात्रं विंशतिगुंजोन्मितसुवर्णनिर्मितचतुरंगुलदीर्घशलाकया मूले कृतच्छिद्रं कुर्यात् ॥ तेन छिद्रेण यावत्प्रस्थपरिमितं जलं प्रविशति तेन च प्रस्थजलपूरणेन तत्पात्रं जले मग्नं भवति तत्पात्रं घटीकालप्रमाणम् ॥ तत्र प्रस्थमानं तु षोडशपलात्मकम् ॥ "पलं सुवर्णाश्चत्वारः कुडवः प्रस्थमाढकम् ॥ द्रोणं च खारिका चेति पूर्वपूर्वचतुर्गुणम्" इत्युक्तेः ॥ ग्रंथांतरे चतुर्मुष्टिः कुडवश्चत्वारः कुडवाः प्रस्थ इति ॥ केचित्षष्टिसंख्याकगुरुवर्णोच्चारे पलसंज्ञः कालः षष्टिपलकाला नाडिकेत्याहुः ॥ एवं प्रमाणीकृतं घटीयंत्रं सूर्यमंडलस्यार्धोदयेर्धास्ते वा जलपूर्णे ताम्रपात्रे मृत्पात्रे वा क्षिपेत् ॥ तत्र मंत्रः ॥ "मुख्यं त्वमसि यंत्राणां ब्रह्मणा निर्मितं पुरा ॥ भवभावाय दंपत्योः कालसाधनकारणम्॥" अनेन मंत्रेण गणेशवरुणपूजनपूर्वकं घटीयंत्रं स्थापयेत् ॥ एवं स्थापिता घटी आग्नेययाम्यनैर्ऋतवायव्यदिग्गता न शुभा ॥ मध्यस्थितान्यदिग्गता च शुभा ॥ एवमाग्नेयादिपंचदिक्षु पूर्णा न शुभा ॥ इति घटिकाविचारः ॥

## अथांतःपटधारणविधिः ।

अथ ज्योतिर्विदादिष्टे शुभकाले हस्तांतराले तंदुलराशौ पूर्वापरौ कृत्वा पूर्वराशौ प्रत्यङ्मुखं वरमपरस्मिन्प्राङ्मुखीं कन्यामवस्थाप्य तयोर्मध्ये कुंकुमा-

दिकृतस्वस्तिकांकितमंतःपटमुदग्दशं धारयेयुः ॥ कन्यावरयोः पित्रादिज्योंतिर्विदं संपूज्य तद्दत्ताक्षताः फलयुताः कन्यावरयोरंजलौ दद्यात् ॥ कन्यावरौ साक्षतहस्तौ स्वस्तिकालोकनपरौ अमुकदेवतायै नम इति स्वस्वकुलदेवतां ध्यायंतौ तिष्ठेताम् ॥ ज्योतिर्विदा मंगलपद्याष्टकपाठांते स्वोक्तकाले "तदेवलग्नं" इति पठित्वा मुमुहूर्तमस्तु ॥ ॐ प्रतिष्ठेत्युक्ते अंतःपटमुत्तरतोपसारयेयुः ॥ ततः कन्यावरौ परस्परशिरसोरक्षतप्रक्षेपं परस्परेक्षणं च कुर्याताम् ॥ वरो वध्वा भ्रूमध्ये दर्भाग्रेण ॐ भूर्भवः स्वरिति परिमृज्य दर्भं निरस्यापः स्पृशेत् ॥ वैदिकैः पठ्यमानब्राह्मणखण्डवाक्यांते कन्यापूर्वकं ताभ्यामक्षतारोपणं प्रतिवाक्यं कार्यम् ॥

## अथ कन्यादानविधिः ।

ततः प्राङ्मुखं वरं प्रत्यङ्मुखीं कन्यां कृत्वा दाता दक्षिणे सपत्नीक उपविश्य वरदत्तालंकारादिरहितामहतवस्त्रां स्वदेयालंकारमात्रयुतां कनकयुक्तांजलिं वरपूजावशिष्टगंधलिप्तहस्तपादां कन्यामेवं दद्यात् ॥ कुशहस्तो देशकालौ संकीर्त्यामुकप्रवरामुकगोत्रोमुकशर्माहं मम समस्तपितॄणां निरतिशयानंदब्रह्मलोकावाप्त्यादिकन्यादानकल्पोक्तफलावाप्तये अनेन वरेणास्यां कन्यायामुत्पादयिष्यमाणसंतत्या द्वादशावरान्द्वादशपरान् पुरुषांश्च पवित्रीकर्तुमात्मनश्च श्रीलक्ष्मीनारायणप्रीतये ब्राह्मविवाहविधिना कन्यादानं करिष्य इति कुशाक्षतजलेन संकल्प्योत्थाय कन्यां संप्रगृह्य ॥ "कन्यां कनकसंपन्नां कनकाभरणैर्युताम् ॥ दास्यामि विष्णवे तुभ्यं ब्रह्मलोकजिगीषया ॥ विश्वंभरः सर्वभूतः साक्षिण्यः सर्वदेवताः ॥ इमां कन्यां प्रदास्यामि पितॄणां तारणाय च " इत्युक्त्वा कांस्यपात्रस्थकन्याञ्जलेरुपरि वरांजलिं निधाय दक्षिणस्थितपत्न्या संततां क्रियमाणां शुद्धोदकधारां सहिरण्ये वरहस्ते निक्षिपेत् ॥ कन्या तारयतु ॥ पुण्यं वर्धयतु ॥ शांतिः पुष्टिस्तुष्टिश्चास्तु ॥ पुण्याहं भवंतो ब्रुवन्तु ॥ इत्यादिवाक्यचतुष्टयांते अमुकप्रवरामुकगोत्रोमुकशर्माहं मम समस्तेत्यादिप्रीतये इत्यन्तमुक्त्वा ॥ अमुकप्रवरोपेतामुकगोत्रायामुकशर्मणः प्रपौत्रायामुकशर्मणः पौत्रायामुकशर्मणः पुत्रायामुकशर्मणे श्रीधररूपिणे वराय अमुकप्रवरामुकगोत्रामुकशर्मणः प्रपौत्रीम् अमुकशर्मणः पौत्रीममुकशर्मणः मम पुत्रीम् अमुकनाम्नीं कन्यां श्रीरूपिणीं प्रजापतिदैवत्यां प्रजोत्पादनार्थं तुभ्यमहं संप्रददे इति सहिरण्यहस्ते साक्षतजलं क्षिपेत् ॥ प्रजापतिः प्रीयतां कन्यां प्रतिगृह्णातु भवानिति वदेत् ॥ एवं त्रिवारं कन्या तारयत्वित्यादिना कन्यादानं कार्यम् ॥ वरः ॐ स्वस्तीत्युक्त्वा कन्यादक्षिणांसं स्पृष्ट्वा क इदं कस्मा अदात्० पृथिवी प्रतिगृह्णात्विति त्रिरुक्त्वा धर्मप्रजासिद्ध्यर्थं प्रतिगृह्णामीति वदेत् ॥ दाता "गौरीं कन्यामिमां विप्र यथाशक्तिविभूषिताम् ॥ गोत्राय शर्मणे तुभ्यं दत्तां विप्र

समाश्रय ॥ कन्ये ममाग्रतो भूयाः कन्ये मे देवि पार्श्वयोः ॥ कन्ये मे पृष्ठतो भूयास्त्वदानान्मोक्षमाप्नुयाम् ॥ मम वंशकुले जाता पालिता वत्सराष्टकम् ॥ तुभ्यं विप्र मया दत्ता पुत्रपौत्रप्रवर्धिनी ॥" धर्मे चार्थे च कामे च नातिचरितव्या त्वयेयम् ॥ वरो नातिचरामीति ॥ दातोपविश्य कन्यादानप्रतिष्ठासिद्ध्यर्थं इदं सुवर्णमग्निदैवत्यं दक्षिणात्वेन संप्रददे ॥ ॐ स्वस्तीति वरः ॥ ततो भोजनपात्रजलपात्रादिदानानि ॥

## अथ पितामहादिकर्तृत्वे कन्यादाने ऊहे विशेषः ।

पितामहो दानकर्ता चेत्पौत्रीमित्यतः पूर्वं ममेति वदेत् ॥ पुत्रीमित्यतः पूर्वं न वदेत् ॥ भ्रात्रादिः पुरुषत्रयकीर्तनमेव कुर्यात् ॥ क्वापि ममेति न वदेत् ॥ प्रपितामहः प्रपौत्रीमित्यत्र ममेति वदेत् ॥ मातुलादिरन्यो वा दाता स्वगोत्रं स्वविशेषणत्वेनोक्त्वामुकशर्मणः समस्तपितॄणामिति कन्यापितृनामषष्ठ्यंतमुक्त्वा कन्याविशेषणत्वेन तद्गोत्रादि वदेत् ॥ 'मम वंशकुले जाता' इत्यत्र ममेति स्थाने कन्यापितृनाम वदेत् ॥ दत्तककन्यादाने 'मम वंशकुले दत्ता' इति ऊहः ॥

## अथ कन्यादानांगत्वेन गवादिदाने मंत्राः ।

"यज्ञसाधनभूता या विश्वस्याघौघनाशिनी ॥ विश्वरूपधरो देवः प्रीयतामनया गवा ॥" इति गोः ॥ "हिरण्यगर्भसंभूतं सौवर्णं चांगुलीयकम् ॥ सर्वप्रदं प्रयच्छामि प्रीणातु कमलापतिः ॥" इत्यंगुलीयकस्य ॥ "क्षीरोदमथने पूर्वमुद्भूतं कुंडलद्वयम् ॥ श्रिया सह समुद्भूतं ददे श्रीः प्रीयतामिति" ॥ कुंडलयोः ॥ "कांचनं हस्तवलयं रूपकांतिसुखप्रदम् ॥ विभूषणं प्रदास्यामि विभूषयतु मे सदा" इति वलययोः ॥ "परापवादपैशून्यादभक्ष्यस्य च भक्षणात् ॥ उत्पन्नपापं दानेन ताम्रपात्रस्य न श्यतु ॥" इति ताम्रजलपात्रस्य ॥ "यानि पापानि काम्यानि काम्योत्थानि कृतानि च ॥ कांस्यपात्रप्रदानेन तानि नश्यंतु मे सदा ॥" इति भोजनार्थकांस्यपात्रस्य ॥ "अगम्यागमनं चैव परदाराभिमर्शनम् ॥ रौप्यपात्रप्रदानेन तानि नश्यंतु मे सदा ॥" इति जलार्थस्य भोजनार्थस्य च रौप्यपात्रस्य ॥ "पूरितं पूगपूगेन नागवल्लीदलान्वितम् ॥ पूर्णेन चूर्णपात्रेण कर्पूरपिष्टकेन च ॥ सपूगखंडनं दिव्यं गंधर्वाप्सरसां प्रियम् ॥ ददे देवनिरातंकं त्वत्प्रसादात्कुरुष्व माम्" इति तांबूलस्य ॥ एवं दासीमहिषीगजाश्वभूमिस्वर्णपात्रपुस्तकशय्यागृहरजतवृषभानां दानमंत्राः कौस्तुभे द्रष्टव्याः ॥

## अथ ऋग्वेदिनामनुष्ठानक्रमः ।

अंतःपटधारणादिकन्यादानांतं केचिदग्निप्रतिष्ठापनोत्तरं कुर्वंति ॥ केचित्पूर्वांगहोमोत्तरं केचिदाज्यसंस्कारोत्तरमित्यनेके पक्षास्तत्र स्वस्वगृह्यानुसारेणाचारानु-

सारेण च व्यवस्था ॥ ततो वधूवराभिषेकः ॥ ततः कंकणबंधनम् ॥ अथाक्षतारोपणम् ॥ वधूवराभ्यामन्योन्यतिलककरणं मालाबंधनम् ॥ अष्टपुत्रीकंचुकीमांगल्यतंत्वादिदानम् ॥ गणेशपूजा ॥ लड्डुकबंधनम् ॥ उत्तरीयवस्त्रांतग्रंथिसंयोजनम् ॥ लक्ष्म्यादिपूजा ॥ इति कन्यादानानुक्रमः ॥ प्रायो बह्वृचानामन्येषां च यथागृह्यं ज्ञेयः ॥

## अथ विवाहहोमः ।

वधूवरौ पूर्वोक्तलक्षणां वेदीं मंत्रघोषणारुह्य वरः स्वासन उपविश्य वधूं दक्षिणत उपवेश्य देशकालौ संकीर्त्य प्रतिगृहीतायामस्यां वध्वां भार्यत्वसिद्धये विवाहहोमं करिष्ये इति संकल्प्य यथागृह्यं विवाहहोमं कुर्यात् ॥ एतदादि विवाहाग्निं रक्षेत् ॥ रक्षितोग्निश्चतुर्थीकर्मपर्यंतं गृहप्रवेशनीयहोमात्पूर्वमनुगतश्चेद्विवाहहोमः पुनः कार्यः ॥ गृहप्रवेशनीयोत्तरमनुगते होमद्वयमपि पुनः कार्यम् ॥ केचित्तु द्वादशरात्रपर्यंतं वृत्युक्तायाश्चेत्याज्याहुतेः सार्वत्रिकत्वमाश्रित्यात्रापि अयाश्चेत्याहुतिमेवाहुः ॥

## अथ गृहप्रवेशनीयहोमः ।

स च वध्वा सह स्वगृहं गतस्य विहितस्तथापि शिष्टाः श्वशुरगृहे एव कुर्वंति ॥ तत्रार्धरात्रोत्तरं विवाहहोमे परेद्युः प्रातस्तिथ्यादि संकीर्त्य ममाग्नेर्गृह्याग्नित्वसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं गृहप्रवेशनीयाख्यं होमं करिष्य इति संकल्पः कार्यः ॥ अर्धरात्रात्पूर्वं विवाहहोमे तदैव होमोत्तरं पुनस्तिथ्यादि संकीर्त्य संकल्पपूर्वकं रात्रावपि गृहप्रवेशनीयहोमकरणे दोषो न ॥ यत्तु विवाहहोमगृहप्रवेशनीयहोमयोरेकतंत्रेणानुष्ठानं कुर्वंति तन्न युक्तम् ॥ विवाहाग्नेरेव गृहप्रवेशनीयहोमोत्तरं गृह्यत्वसिद्धिराश्वलायनतैत्तिरीयादीनां भवति ॥ तैत्तिरीयकात्यायनादीनां पुनराधाने प्रकारांतरमस्ति ॥ यदि रात्रौ षड्घटीमध्येग्न्युत्पत्तिस्तदा गृहप्रवेशनीयाभावेपि व्यतीपातादिसंभवेपि तदैवोपासनहोमारंभः ॥ तदुत्तरं चेत्परदिने सायमौपासनारम्भः ॥ स चेत्थम् ॥ सायंसंध्यामुपास्य विवाहाग्निं प्रज्वाल्य प्राणानायम्य देशकालौ संकीर्त्यास्मिन्विवाहाग्नौ यथोक्तकाले श्रीपरमेश्वरप्रीत्यर्थं यावज्जीवमुपासनं करिष्य इति संकल्प्य पुनर्देशकालौ संकीर्त्य श्रीपरमेश्वरप्रीत्यर्थं सायंप्रातरौपासनहोमौ करिष्ये ॥ तत्रेदानीं सायमौपासनहोमं करिष्ये ॥ प्रातस्तु पूर्वसंकल्पितप्रातरौपासनहोमं करिष्य इति संकल्प्य होमः कार्यः ॥ अथ त्रिरात्रं वधूवरौ ब्रह्मचारिणावलंकुर्वाणावधःशायिनावक्षारालवणाशिनौ तिष्ठेताम् ॥

## अथ चतुर्थदिवसे ऐरिणीदानम् ।

तच्च वधूपितृभ्यामुपोषिताभ्यामुपोषितायै वरमात्रे कार्यम् ॥ वरमातू रजोदोषे तस्याः शुद्धिप्रतीक्षाकरणासम्भवे मनसा पात्रमुद्दिश्येति रीत्या तां मनसोद्दिश्यैरिणीदानम् ॥

## अथ विवाहोत्तरं मात्रादे रजोदोषविधिः ।

वधूवरमात्रोर्विवाहोत्तरं देवकोत्थापनात् प्राक् रजोदोषे पूर्वोक्तां शांतिं कृत्वा शुद्ध्यंते संकटे शुद्धेः प्रागपि देवकोत्थापनं कार्यम् ॥ मातुलादेः कर्त्रंतरस्य पत्न्या रजसि मौंजीप्रकरणे उक्तम् ॥

## अथ विवाहोत्तरमाशौचे प्राप्ते ।

एवं विवाहोत्तरमाशौचपाते चतुर्थीकर्मपर्यंतं प्राप्तकर्मकरणे दातुर्वरस्य कन्यायाश्च नाशौचम् ॥ आशौचांते देवकोत्थापनम् ॥ असंभवे आशौचमध्य एव देवकोत्थापनं कृत्वा आशौचं कार्यम् ॥ विवाहात्पूर्वमाशौचरजोदोषयोस्तु प्रागुक्तम् ॥ चतुर्थीकर्महोमः कौस्तुभे उक्तः ॥ एनं केचित् ऋक्शाखिनो न कुर्वंति ॥

## अथ मण्डपोद्वासनादि ।

मण्डपोद्वासनदिननिर्णयो मंडपोद्वासनपर्यंतं कर्त्तव्याकर्तव्यनिर्णयश्चोपनयनप्रकरणे उक्तस्तत्रैव द्रष्टव्यः ॥

## अथ विवाहोत्तरं निषेधाः ।

" न स्नायादुत्सवेतीते मंगलं विनिवर्त्य च ॥ अनुव्रज्य सुहृद्बंधूनर्चयित्वेष्टदेवताम् ॥ स्नानं सचैलं तिलमिश्रकर्म प्रेतानुयानं कलशप्रदानम् ॥ अपूर्वतीर्थामरदर्शनं च विवर्जयेन्मंगलतोऽब्दमेकम् ॥ मासषट्कं विवाहादौ व्रतप्रारंभणेपि च ॥ जीर्णभांडादि न त्याज्यं गृहसंमार्जनं तथा ॥ ऊर्ध्वं विवाहात्पुत्रस्य तथा च व्रतबंधनात् ॥ आत्मनो मुंडनं नैव वर्षं वर्षार्धमेव च ॥ मासमन्यत्र संस्कारे त्रिमासं चौलकर्मणि ॥ पिंडदानं मृदा स्नानं न कुर्यात्तिलतर्पणम् ॥" अयं विवाहव्रतबंधचौलोत्तरं वर्षषण्मासत्रिमासेषु अन्यवृद्धिश्राद्धयुतमंगलोत्तरं च मासमेकं पिंडदानतिलतर्पणनिषेधस्त्रिपुरुषसपिंडानामेव ॥ एवं मुण्डननिषेधोपि ' व्रतोद्वाहौ तु मंगलम् ' इति पक्षे मौंज्युत्तरं मुंडननिषेधः ॥ व्रतबंधस्य मुंडनरूपत्वपक्षे तु न निषेधः ॥ 'आत्मनो मुंडनम्' इति कर्मांगतया प्राप्तं रागप्राप्तं च मुंडनं निषिध्यते ॥ अत्रापवादः ॥ "गंगायां भास्करक्षेत्रे मातापित्रोर्मृतेहनि ॥ आधाने सोमयागादौ दर्शादौ क्षौरमिष्यते॥ महालये गयाश्राद्धे पित्रोः प्रत्याब्दिके तथा ॥ सपिंड्यंते प्रेतकर्म श्राद्धषोडशकेष्वपि ॥ कृतोद्वाहादिकः कुर्यात् पिंडदानं च

तर्पणम् ॥ केचिद्भ्रातृपितृव्यादेराब्दिकेप्येवमूचिरे ॥" एवं पिंडपितृयज्ञे अष्टकान्वष्टकापूर्वेद्युःश्राद्धेषु न पिंडदाननिषेधः ॥ दर्शश्राद्धं त्वापिंडकमेव तेन बहूवृचानां व्यतिषंगो न ॥ इति मंडपोद्वासनोत्तरं कार्याकार्यनिर्णयः ॥

## अथ वधूप्रवेशः ।

विवाहात्षोडशदिनांतःसमदिनेषु पंचमसप्तमनवमदिनेषु च रात्रौ स्थिरलग्ने नूतनभिन्नगृहे वधूप्रवेशः शुभः ॥ प्रथमदिनेपि क्वचित् षष्ठदिने निषेधः प्रयोगरत्नोक्तो निर्मूलः ॥ षोडशदिनमध्ये पूर्वोक्तदिनेषु प्रवेशोक्तनक्षत्रतिथिवारगोचरस्थचंद्रबलाद्यभावेपि गुरुशुक्रास्तादावपि न दोषः ॥ "व्यतीपाते क्षयतिथौ ग्रहणे वैधृतौ तथा ॥ अमासंक्रांतिविष्ट्यादौ प्राप्तकालेपि नाचरेत् ॥" प्रथमनववधूप्रवेशे विवाहार्थगमने च प्रतिशुक्रास्तादिदोषो नास्ति ॥ द्विरागमने एव संमुखशुक्रदोषः ॥ षोडशदिनोत्तरं मासपर्यंतं विषमदिनेषु मासोत्तरं विषममासेषु वर्षोत्तरं विषमवर्षेषु वधूप्रवेशः शुभः ॥ समेष्वेतेषु वैधव्यादिदोषः ॥ पंचमवर्षोत्तरं समविषमविचारो नास्ति ॥ षोडशदिनोत्तरं वधूप्रवेशे नक्षत्राणि ॥ अश्विनीरोहिणीमृगपुष्यमघोत्तरात्रयहस्तचित्रास्वात्यनुराधामूलश्रवणधनिष्ठारेवत्यः शुभाः ॥ मासोत्तरं मार्गशीर्षमाघफाल्गुनवैशाखज्येष्ठमासाः शुभाः ॥ चतुर्थीनवमीचतुर्दशीपंचदशीभिन्नतिथयो रविभौमेतरवाराश्च शुभाः ॥ इति नववधूप्रवेशः ॥

## अथ द्विरागमनम् ।

तत्र माघफाल्गुनवैशाखाः शुक्लपक्षश्च शुभाः ॥ अश्विनीरोहिणीपुनर्वसुपुष्योत्तरात्रयानुराधाज्येष्ठाहस्तस्वातीचित्राश्रवणशततारकानक्षत्रेषु चंद्रबुधगुरुशुक्रवारे गुरुशुक्रास्तादिरहिते स्थिरलग्नादिशुभकाले द्वितीयवधूप्रवेशः शुभः ॥

## अथ द्विरागमे वर्ज्यानि ।

द्विरागमनेऽधिमासविष्णुशयनमासाः समवत्सराः प्रतिशुक्रादिदोषाश्च वर्ज्याः ॥ द्विरागमोपि यदि विवाहमारभ्य षोडशदिनमध्ये क्रियते तदा प्रतिशुक्रादिदोषोऽस्तादिदोषश्च नास्ति ॥ "द्विरागमे षोडशवासरांतरे एकादशाहे समवासरेषु ॥ न चात्र ऋक्षं न तिथिर्न योगो न वारशुद्ध्यादि विचारणीयम् ॥" केवलांगिरसकेवलभृगुभरद्वाजवसिष्ठकश्यपात्रिवत्सगोत्राणां प्रतिशुक्रदोषो न ॥ रेवत्यश्विनीभरणीकृत्तिकाद्यचरणेषु चंद्रे सति शुक्रस्यांधत्वात्प्रतिशुक्रदोषो न ॥ दुर्भिक्षे देशविप्लवे विवाहे तीर्थगमने एकनगरग्रामयोश्च प्रतिशुक्रदोषो न ॥ इति द्विरागमः ॥

## अथ वध्वाः प्रथमाब्दे निवासः ।

"उद्वाहात्प्रथमे शुचौ यदि वसेद्भर्तुर्गृहे कन्यका हन्यात्तज्जननीं क्षये निजतनुं

ज्येष्ठे पतिज्येष्ठकम् ॥ पौषे च श्वशुरं पतिं च माघे चैत्रे स्वपित्रालये तिष्ठंती पितरं निहंति न भयं तेषामभावे भवेत् ॥" इति वध्वाः प्रथमाब्दे निवासविचारः ॥

## अथ पुनर्विवाहः ।

दुष्टलग्ने यथोक्तग्रहतारादिभावेऽन्यत्रापि दुष्टयोगाद्यशुभकाले कूष्मांडीघृतहोमादियथोक्तविधिं विना सूतकादौ च विवाहे जाते तयोरेव दंपत्योः सुमुहूर्ते पुनर्विवाहः कर्तव्यः ॥

## अथ पुनर्विवाहनिमित्तानि ।

"सुरापी व्याधिता धूर्ता वन्ध्यार्थघ्न्यप्रियंवदा ॥ स्त्रीप्रसूश्चाधिवेत्तव्या पुरुषद्वेषिणी तथा" ॥ अधिवेदनं भार्यांतरकरणम् ॥ "अप्रजां दशमे वर्षे स्त्रीप्रजां द्वादशे त्यजेत् ॥ मृतप्रजां पंचदशे सद्यस्त्वप्रियवादिनीम् ॥" अत्राप्रियवादो व्यभिचारः ॥ प्रतिकूलभाषणरूपस्य तस्य प्रायः कलौ सार्वत्रिकत्वात् ॥ आज्ञासंपादिनीं दक्षां वीरसूं प्रियवादिनीम् ॥ पत्नीं त्यक्त्वा भोगार्थमन्योद्वाही पूर्वभार्याय स्वधनस्य तृतीयांशं दद्यात् ॥ निर्द्धनश्चेत्तां पोषयेत् ॥ मनुः "अधिविन्ना तु या नारी निर्गच्छेद्रोषिता गृहात् ॥ सा सद्यः सन्निरोद्धव्या त्याज्या वा कुलसन्निधौ ॥"

## अथाग्निशुश्रूषाधर्मादिचरणे ज्येष्ठकनिष्ठस्त्रीव्यवस्था ।

अग्निशुश्रूषादिधर्माचरणं ज्येष्ठया सह कार्यं न तु कनिष्ठया ॥ इदं ज्येष्ठाया आज्ञासंपादिनीत्वे ॥ यदि तु रोषादिशीलेन समनंतरोक्तमनुवाक्याज्ज्येष्ठा कुलसन्निधौ त्यागार्हा गृहांतरे निरोधार्हा वा तर्हि कनिष्ठयापि सह धर्मं चरेदन्यथा धर्मभ्रंशापातात् ॥ "तथा वीरसुता या स्यादाज्ञासंपादिनी च या ॥ दक्षा प्रियंवदा शुद्धा तामत्र विनियोजयेत्" इति माधवीये स्मृतेश्च ॥

## अथ द्वितीयविवाहेऽग्निविचारः ।

द्वितीयविवाहहोमः पूर्वविवाहसम्बन्धिगृह्याग्नावेव कार्यः ॥ तदसंभवे लौकिकाग्नौ कार्यः ॥ लौकिकाग्नौ करणपक्षे द्वितीयविवाहहोमादिनोत्पन्नाग्नेर्गृह्याग्नित्वाद्वयोर्गृह्याग्न्योः संसर्गः कार्यः ॥

## अथाग्निद्वयसंसर्गप्रयोगः ।

देशकालौ संकीर्त्य मम द्वाभ्यां भार्याभ्यां सह निष्पन्नगृह्याग्न्योस्ताभ्यां सहाधिकारसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं संसर्गं करिष्ये इति संकल्प्य स्वस्तिवाचनं कृत्वोदगपवर्गस्थंडिले कृत्वा दक्षिणे स्थंडिले ज्येष्ठाया गृह्याग्निमुत्तरे कनिष्ठाया गृह्याग्निं प्रतिष्ठाप्य प्रथमाग्नौ ज्येष्ठपत्न्यान्वारब्धेन्वाधानं कुर्यात् ॥ अग्निद्वयसंसर्गार्थं प्रथमाग्निहोमकर्मणि देवतापरिग्रहार्थमन्वाधानं करिष्ये ॥ चक्षुषी आज्येने-

त्यंते अग्निं नवभिराज्याहुतिभिः शेषेणेत्यादि 'अग्निमीळे' इति नवानां मधुच्छंदाग्निर्गायत्री ॥ अग्निद्वयसंसर्गार्थं प्रथमाग्नौ प्रधानाज्यहोमे वि० । 'अग्निमीळे' इत्यादिनवभिर्ऋग्भिः प्रत्यृचं स्रुवेण नवाज्याहुतीर्जुहुयात् ॥ अभय इदमिति सर्वत्र त्यागः ॥ होमशेषं समाप्य अयं ते योनिरिति मंत्रेण ज्येष्ठाग्निं समिधि समारोप्य प्रत्यवरोहेति मंत्रेण तं द्वितीयाग्नौ प्रत्यवरोह्य ध्यात्वा पत्नीद्वयान्वारब्धोन्वाधानं कुर्यात् ॥ अग्निद्वयसंसर्गार्थं प्रथमसंसृष्टद्वितीयाग्नौ विहितहोमे देवतापरिग्रहार्थमन्वाधानं करिष्ये ॥ आज्यभागांते अग्निं प्रधानं षड्वारमाज्येन शेषेणत्यादि ॥ प्रोक्षणीं कुशान् दर्वीस्रुवौ प्रणीताज्यपात्रे इध्मबर्हिषीत्यष्टौ पात्राणि ॥ स्रुचि चतुर्गृहीतमाज्यं गृहीत्वा पत्नीद्वयान्वारब्धो जुहुयात् ॥ अग्नावग्निरित्यस्य हिरण्यगर्भोग्निरृष्टी ॥ अग्निद्वयसंसर्गार्थं संसृष्टाग्नौ प्रधानाज्यहोमे० ॥ ॐ अग्नावग्निश्चरति प्रविष्टऋषीणां पुत्रो अधिराज एषः ॥ तस्मै जुहोमि हविषा घृतेन मा देवानां नो मुहद्भागधेयं स्वाहा ॥ अग्नय इदं० ॥ एवमग्रेपि ॥ आज्यस्य स्रुचि चतुर्ग्रहणं विनियोगस्त्यागश्च ॥ अग्निनाग्निर्मेधातिथिः काण्वोग्निर्गायत्री ॥ अग्निद्वयसं० ॥ अग्निनाग्निः समिध्यते० ॥ अस्तीदमिति तिसृणां विश्वामित्रोग्निरनुष्टुप् अन्त्ये त्रिष्टुभौ ॥ अस्तीदमधि० ॥ अरण्यो० ॥ उत्तानायाम० ॥ पाहिनो अग्न इत्यस्य भर्गः प्रगाथोग्निर्बृहती ॥ पाहिनो अग्न एकया० ॥ भिर्वसो स्वाहा ॥ होमशेषं समाप्याहिताग्नये गोयुग्मं दत्त्वा विप्रान् भोजयेत् ॥ इत्यग्निद्वयसंसर्गप्रयोगः ॥ "पत्न्योरेका यदि मृता दग्ध्वा तेनैव तां पुनः ॥ आदधीतान्यया सार्धमाधानविधिना गृही ॥" द्वितीयादिविवाहकालः "प्रमदामृतिवासरादितः पुनरुद्वाहविधिर्वरस्य च ॥ विषमे परिवत्सरे शुभो युगले चापि मृतिप्रदो भवेत् ॥" संकटे महारुद्राभिषेकं मृत्युंजयमन्त्रजपं वा कृत्वा विवाहः कार्य इति भाति ॥ "तृतीया मानुषी कन्या नोद्वाह्या म्रियते हि सा ॥ विधवा वा भवेत्तस्मात्तृतीयेर्कं समुद्वहेत् ॥

## अथार्कविवाहः ।

रविशन्योर्वारे हस्तर्क्षे वान्यत्र शुभदिने वा पुष्पफलयुतमर्कं गत्वा अर्ककन्यादातारमाचार्यं कृत्वा रक्तगंधादिभूषितो देशकालौ स्मृत्वा मम तृतीयमानुषीविवाहजन्यदोषपरिहारार्थं तृतीयमर्कविवाहं करिष्ये ॥ आचार्य वृत्वा नांदीश्राद्धांतं कुर्यात् ॥ दाता मधुपर्कयज्ञोपवीतवस्त्रगंधमाल्यादिभिर्वरं पूजयेत् ॥ अर्कस्य पुरतः स्थित्वा ॥ "त्रिलोकवासिन् सप्ताश्च च्छायया सहितो रवे ॥ तृतीयोद्वाहजं दोषं निवारय सुखं कुरु" इति प्रार्थ्य छायायुतं रविमर्कं ध्यात्वाब्लिंगैरभिषिच्य वस्त्रादिभिराकृष्णेनेति मन्त्रेण संपूज्य श्वेतवस्त्रेण सूत्रेण वा वेष्टय गुडौदनं निवेद्य ताबूलं दद्यात् ॥ "मम प्रीतिकरा येयं मया स्पृष्टा पुरातनी ॥ अर्कजा ब्रह्मणा सृष्टाद्यास्मान्संप्रति रक्षतु"

इत्यर्कं प्रदक्षिणीकृत्य ॥ "नमस्ते मंगले देवि नमः सवितुरात्मजे ॥ त्राहि मां कृपया देवि पत्नी त्वं म इहागता ॥ अर्क त्वं ब्रह्मणा सृष्टः सर्वप्राणिहिताय च ॥ वृक्षाणामधिभूतस्त्वं देवानां प्रीतिवर्द्धन ॥ तृतीयोद्वाहजं पापं मृत्युं चाशु विनाशय" इति च प्रदक्षिणीकुर्यात्॥ अन्तःपटधारणादिकन्यादानपर्यंतं विधिं कृत्वा कन्यादाता आदित्यस्य प्रपौत्रीं सवितुः पौत्रीमर्कस्य काश्यपगोत्रामर्ककन्यामामुकगोत्राय वराय तुभ्यं संप्रददे ॥ "अर्ककन्यामिमां विप्र यथाशक्ति विभूषिताम् ॥ गोत्राय शर्मणे तुभ्यं दत्तां विप्र समाश्रय ॥" दक्षिणां दत्त्वा गायत्र्या वेष्टितसूत्रेण बृहत्सामेति मन्त्रेणार्कवरयोः कंकणं बद्धार्कस्य चतुर्दिक्षु कुंभेषु विष्णुं नाममन्त्रेण षोडशोपचारैः संपूज्यार्कस्योत्तरेर्कपत्न्यान्वारब्धो वर अस्याः सम्यक् भार्यत्वसिद्ध्यर्थं पाणिग्रहहोमं करिष्ये ॥ आधारदेवते आज्येनेत्यंते बृहस्पतिमग्निम् अग्निं वायुं सूर्यं प्रजापतिं चाज्यद्रव्येण शेषेण स्विष्टकृतमाधारांतं कृत्वा ॥ संगोभिरित्यस्यांगिरसो बृहस्पतिस्त्रिष्टुप् ॥ आज्यहोमे विनियोगः ॥ संगोभिरांगिरसो० ॥ बृहस्पतय इदं० ॥ यस्मै त्वेति वामदेवोग्निस्त्रिष्टुप् ॥ यस्मै त्वाकामकामाय वयं सम्राज्यजामहे ॥ तमस्मभ्यं कामं दत्त्वाथेदं त्वं घृतं पिब स्वाहा ॥ अमय इदं० ॥ ततो व्यस्तसमस्तव्याहृतिभिर्हुत्वा होमशेषं समाप्य ॥ "मया कृतमिदं कर्म स्थावरेषु जरायुणा ॥ अर्कापत्यानि नो देहि तत्सर्वं क्षंतुमर्हसि" इति प्रार्थ्य शांतिसूक्तपाठांते गोयुग्ममाचार्याय दत्त्वा स्वधृतवस्त्राणि गुरवे दत्त्वान्यानि धारयेत् ॥ दश त्रयो वा विप्रा भोज्याः ॥ इत्यर्कविवाहः ॥

## अथाह्निकप्रारंभः ।

"श्रीमन्नाथांघ्रिकमलं दीनानाथदयार्णवम् ॥ स्मारंस्मारं कामपूरमाह्निकाचरणं ब्रुवे ॥ प्रथमोक्तो बह्वृचानां प्रकारः स तु याजुषैः ॥ ग्राह्यो यत्र स्वसूत्रोक्तो विशेषः स्यान्न बाधकः ॥ " ब्राह्मे मुहूर्ते उत्थाय श्रीविष्णुं स्मृत्वा गजेंद्रमोक्षादि पठित्वेष्टदेवतादि स्मरेत् ॥ " समुद्रवसने देवि पर्वतस्तनमंडिते ॥ विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे " इति भूमिं प्रार्थ्य गवादिमंगलानि पश्येत् ॥

## अथ मूत्रपुरीषोत्सर्गादिविधिः ।

तृणाद्यंतर्हितभूमौ शिरः प्रावृत्य यज्ञोपवीतं निवीतं पृष्टतः कर्णे वा कृत्वा घ्राणपिधानं कृत्वा दिवा संध्ययोरुदङ्मुखो रात्रौ दक्षिणामुखो मौन्यनुपानत्क आसीनो मूत्रपुरीषोत्सर्गं कुर्यात् ॥ यज्ञोपवीतस्य निवीतत्वं विनैव कर्णे धारणमनाचारः ॥ मार्गजलदेवालयनदीतीरादौ मलोत्सर्गो निषिद्धः ॥ "हस्तान्द्वादश संत्यज्य मूत्रं कुर्याज्जलाशयात् ॥ अवकाशे षोडश वा पुरीषे तु चतुर्गुणम् ॥ " प्रत्यर्कादिमेहने स्वशुक्रदर्शने च सूर्यं गां वा पश्येत् ॥ ततो गृहीतशिश्न उत्थाय शौचं कुर्यात् ॥

मूत्रोत्सर्गे शुद्धमृदं सकृल्लिंगे त्रिवारं वामकरे द्विवारमुभयोः करयोर्दत्त्वा तावद्वारं जलेन क्षालयेत् ॥ " मूत्रात्तु द्विगुणं शुक्रे मैथुने त्रिगुणं स्मृतम् ॥ " पुरीषे तु ॥ " एका लिंगे गुदे तिस्रस्तथा वामकरे दश ॥ उभयोः करयोः सप्त सप्त त्रिर्वापि पादयोः ॥ द्विगुणं ब्रह्मचर्ये स्याद्यतीनां च चतुर्गुणम् ॥ एवं मृद्भिर्जलैः शौचं तदर्धं निशि कीर्त्तितम् ॥ तदर्धमातुरे शूद्रस्त्रीबालानां तदर्धतः ॥ " उक्तसंख्यया गंधलेपक्षयाभावे यावता तत्क्षयस्तावच्छौचम् ॥ मृदाद्रांमलकमात्रा ॥ जलालाभेन शौचविलंबे सचैलं स्नानम् ॥ यथोक्तशौचाकरणे तु ॥ "गायत्र्यष्टशतं जप्त्वा प्राणायामत्रयं चरेत् ॥ " मूत्रे चत्वारो गंडूषा पुरीषे द्वादशाष्टौ वा भोजनांते षोडश कार्याः ॥

## अथाचमनविधिः ।

अप्रावृताशिरःकंठ उपविष्टः उपवीती प्राङ्मुख उदङ्मुखो वांगुष्ठमूलेन मुक्तांगुष्ठकनिष्ठहस्तेनानुष्णं फेनादिरहितं जलं हृदयं गतं त्रिः पिबेत् ॥ " केशवाद्यैस्त्रिभिः पीत्वैकेन दक्षकरं मृजेत्॥द्वाभ्यामोष्ठौ च संमृज्य एकेनोन्मार्जयेच्च तौ॥ जलमेकेन संमंत्र्यैकेन वामकरं मृजेत् ॥ एकेन दक्षिणं पादं वाममेकेन चैव हि ॥ संप्रोक्ष्यैकेन मूर्धानमूर्ध्वोष्ठं नासिकाद्वयम् ॥ नेत्रयुग्मं श्रोत्रयुग्मं दक्षिणोपक्रमं क्रमात्॥ नाभिं हृदयमूर्धानौ दक्षवामभुजौ स्पृशेत् ॥" केचित्"केशवाद्यैस्त्रिभिः पीत्वा द्वाभ्यां प्रक्षालयेत्करौ॥ गंडोष्ठौ मार्ज्ययेद्विर्द्विरेकैकं पाणिपादयोः " यद्वा ॥ " ओष्ठं मार्ज्योन्मृजेद्विर्द्विरेकैकं पाणिपादयोः " शेषं प्राग्वदित्याहुः ॥ तत्रोर्ध्वोष्ठस्यांगुल्यग्रैः स्पर्शः ॥ अंगुष्ठतर्जनीभ्यांनासिकयोः ॥ अंगुष्ठानामिकाभ्यां नेत्रयोः ॥ अंगुष्ठकनिष्ठिकाभ्यां कर्णयोर्नाभेश्च ॥ तलेन हृदयस्य पाणिना मूर्ध्नः अंगुल्यग्रैर्भुजयोः ॥ एतावदाचमनविधावशक्तस्त्रिः पीत्वा करं प्रक्षाल्य दक्षिणकर्णं स्पृशेत् ॥ कांस्यायःसीसत्रपुपित्तलपात्रैर्नाचामेत् ॥ श्रौताचमनं तु देव्यास्त्रयः पादा आपोहिष्ठेति नव पादाः सप्तव्याहृतयो देवीपादत्रयं द्वेधा विभक्तं देवीशिरश्चेति चतुर्विंशतिस्थानानि ॥ अथाचमननिमित्तानि ॥ कर्म कुर्वन्नधोवायुनिःसरणेऽश्रुपाते क्रोधे मार्जारस्पर्शे क्षुते वस्त्रपरिधाने रजकाद्यंत्यजदर्शने चाचामेत् ॥ स्नात्वा पीत्वा भुक्त्वा सुप्त्वा चाचामेत् ॥ विण्मूत्ररेतःशौचांत आचामेत् ॥ सर्वत्राचमनासंभवे दक्षिणकर्णस्पर्शः ॥ दंतलग्नान्नं मृदूपायेन निर्हरेत् ॥ रक्तनिर्गमे दोषोक्तेः ॥ दंतलग्नं च दंतवत् तस्यान्नस्य कालांतरे निर्गमे आचमनम् ॥ " वामहस्तस्थिते दर्भे दक्षिणेन न चाचमत् ॥ करद्वयस्थिते दर्भे आचामेत्सोमपो भवेत् ॥ न चोच्छिष्टं पवित्रं तद्धुक्ते पित्र्ये च संत्यजेत् ॥ " विण्मूत्रोत्सर्गे च त्यजेत् ॥

## अथ दंतधावनम् ।

कटकीक्षीरवृक्षापामार्गादिकाष्ठैः कार्यम् ॥ काष्ठालाभे श्राद्धोपवासादिनिषिद्धदिने च पर्णादिना प्रदेशिनीवर्ज्यांगुल्या वा द्वादशगंडूषैर्वा दंतान् शोधयेत् ॥

## अथ संक्षेपतः स्नानविधिः ।

नद्यादौ गत्वा शिखां बद्धा जानूर्ध्वजले तिष्ठन्नन्यथा तूपविश्याचम्य मम कायिकवाचिकमानसिकदोषनिरसनपूर्वकं सर्वकर्मसु शुद्धिसिद्ध्यर्थं प्रातःस्नानं करिष्ये इति संकल्प्य जलं गत्वा प्राङ्मुखः प्रवाहाभिमुखो वा त्रिरवगाह्यांगानि निमृज्य स्नात्वा द्विराचम्यापोहिष्ठेति मार्जनं कृत्वा 'इमं मे गंग इति त्रिर्जलमालोड्याघमर्षणे त्रिरावृत्तेन ऋतं च' इति सूक्तेन कात्यायनैर्दुपदेति ऋचा जले निमग्नतया कृत्वोत्थ्याचम्य जलतर्पणं कुर्यान्न वा तादित्थम् ॥ उपवीती ॥ ब्रह्मादयो ये देवास्तान्देवांस्तर्पयामि ॥ भूर्देवांस्तर्प ० ॥ भुवर्देवांस्तर्प० ॥ स्वर्देवांस्त ०॥ भूर्भुवःस्वर्देवांस्तर्पयामि ॥ निवीती ॥ कृष्णद्वैपायनादयो ये ऋषयस्तान् ऋषींस्तर्पयामि ॥ भूर्ऋषींस्तर्पयामि ॥ भुवर्ऋषींस्तर्पयामि ॥ स्वर्ऋषींस्तर्पयामि ॥ भूर्भुवःस्वर्ऋषींस्तर्पयामि ॥ प्राचीनावीती ॥ सोमः पितृमान्यमोंगिरसाग्निष्वात्ताः कव्यवाहनादयो ये पितरस्तान्पितॄंस्तर्पयामि ॥ भुवः पितॄंस्तर्पयामि ॥ स्वः पितॄंस्तर्पयामि ॥ भूर्भुवः स्वः पितॄंस्तर्पयामि ॥ एकनद्यां स्नाने अन्यां नदीं न स्मरेत् ॥ अत्र तैत्तिरीयादिभिस्तर्पणे ऋष्यादीनां नामांतराण्युक्तानि तानि संक्षेपविधौ तस्य तर्पणस्य कृताकृतत्वान्नोक्तानि ॥ अथ गृहे उष्णोदकेन स्नानं न तु शीतोदकेन ॥ तद्विधिश्च पात्रे शीतोदकं प्रक्षिप्य तदुपरि उष्णोदकेनापूर्य ॥ " शं नो देवी ० ॥ आपः पुनंतु ० ॥ द्रुपदादिव ० ॥ ऋतं च ० ॥ आपोहिष्ठेति पंचभिर्ऋग्भिरभिमंत्र्येमं मे " इत्यादिना तीर्थानि स्मरन् स्नायात् ॥ गृहस्नाने संकल्प आचमनमघमर्षणं तर्पणं च न ॥ अंते आचमनं मार्जनं च कार्यम् ॥

## अथ वस्त्रधारणविधिः ।

एवं स्नात्वा वस्त्रेण पाणिना वा जलापनयनमकृत्वा शुष्कं शुभ्रं कार्पासवस्त्रं परिधाय स्नानार्द्रवस्त्रमूर्ध्वंत उत्तारयेत् ॥ " विकच्छोनुत्तरीयश्च नग्नश्चावस्त्र एव च ॥ श्रौतस्मार्तैं नैव कुर्यात् ॥ " द्विगुणवस्त्रो दग्धवस्त्रस्यूतग्रथितवस्त्रः काषायवस्त्रादयो दिगंबरश्च नग्नाः ॥ निष्पीडितं वस्त्रं न स्कंधे क्षिपेत् ॥ चतुर्गुणीकृत्य वस्त्रं गृहेऽधोदशं नद्यामूर्ध्वदशं स्थले निष्पीडयेत् ॥ न तु त्रिगुणम् ॥ उत्तरीयं जीवत्पितृकजीवज्ज्येष्ठभ्रातृकैर्न धार्यम् ॥ प्रावारवस्त्रं तु सर्वैर्धार्यम् ॥ इति प्रातर्नित्यस्नानम् ॥

## अथ नैमित्तिकस्नानानि ।

मध्याह्नस्नानमपि नित्यमित्यन्ये ॥ चांडालसूतकिसूतिकोदक्याचितिकाष्ठशवचांडालच्छायादिस्पर्शे स्नानम् ॥ चांडालादिस्पर्शिनमारभ्य तत्स्पृष्टस्पृष्टेषु तृतीयपर्यंतं सचैलं स्नानम् ॥ चतुर्थस्याचमनमात्रम् ॥ तदूर्ध्वं प्रोक्षणम् ॥ द्वितीयादेर्दंडतृणाद्यंतरितस्पर्शे त्वाचमनमेव ॥ वस्त्रांतरितः साक्षात्स्पर्श एवेति तत्र चतुर्थस्यैवाचमनम् ॥ नैमित्तिकस्नानं रात्रावपि ॥ " मृते जन्मनि संक्रांतौ श्राद्धे जन्मदिने तथा ॥ अस्पृश्यस्पर्शने चैव न स्नायादुष्णवारिणा ॥ " नैमित्तिके जलतर्पणादिविधिर्न ॥ नित्यस्नानमकृत्वा भुक्तौ उपवासः ॥ ग्रहणसंक्रांत्यादिनैमित्तिकस्नानमकृत्वा भोजने पाने चाष्टसहस्रजपः ॥ शूद्रादिस्पर्शनिमित्ते उपवासः ॥ श्वकाकचांडालादिस्पर्शे स्नानमकृत्वा भुक्तौ पाने च त्रिरात्रम् ॥ रजकादिस्पर्शेतदर्धम् ॥ इति नैमित्तिकस्नानम् ॥

## अथ काम्यस्नानानि ।

दशव्यतीपातरथसप्तम्यादौ स्नानं कार्तिकस्नानमाघस्नानादिकं च काम्यम् ॥ इति जलावगाहादिरूपवारुणस्नानानि ॥

## अथ गौणस्नानानि ।

आपोहिष्ठादिभिर्मंत्रैः प्रोक्षणं मन्त्रस्नानम् ॥ गायत्र्या दशकृत्वो जलमभिमंत्र्य तेन सर्वांगप्रोक्षणं गायत्रम् ॥ भस्मना स्नानमाग्नेयम् ॥ आर्द्रवस्त्रेणांगमार्जनं कापिलम् ॥ विष्णुपादोदकविप्रपादोदकप्रोक्षणविष्णुध्यानादिभिश्च स्नानांतराणि ॥ गौणस्नानैर्जपसंध्यादौ शुद्धिर्न तु श्राद्धदेवार्चनादौ ॥ ब्रह्मयज्ञे विकल्पः ॥

## अथ तिलकविधिः ।

"प्रातः पुंड्रं मृदा कुर्याद्भुत्वा चैव तु भस्मना ॥ " मृदश्च गोपीचंदनतुलसीमूलसिंधुतीरजाह्नवीतीरवल्मीकादिस्थाः ॥ ललाटोदरहृदयकंठे दक्षिणपार्श्वबाहुकर्णदेशे वामपार्श्वबाहुकर्णदेशे पृष्ठे ककुदि चेति द्वादशस्थानेषु शुक्ले केशवादिनामभिः ॥ कृष्णपक्षे संकर्षणादिनामभिः ॥ शिरसि वासुदेवेति मृदा तिलको विधेयः ॥

## अथ भस्मत्रिपुंड्रः ॥

" श्राद्धे यज्ञे जपे होमे वैश्वदेवे सुरार्चने ॥ भस्मत्रिपुंड्रैः पूतात्मा मृत्युं जयति मानवः" भस्म गृहीत्वा अग्निरिति भस्म जलमिति भस्म स्थलमिति भस्म व्योमेति भस्म सर्वꣳह वा इदं भस्म ॥ मन एतानि चक्षूंषि भस्मानीति मंत्रेणाभिमंत्र्य

जलमिश्रितेन मध्यमांगुलित्रयगृहीतेन ललाटहृदयनाभिगलांसबाहुसंधिपृष्ठशिरः-स्थानेषु शिवमंत्रेण नारायणाष्टाक्षरेण वा गायत्र्या वा प्रणवेन वा त्रिपुंड्रान्कुर्यात्॥

## अथ संध्याकालः ॥

" उत्तमा तारकोपेता मध्यमा लुप्ततारका ॥ अधमा सूर्यसहिता प्रातःसंध्या त्रिधा मता ॥ उत्तमा सूर्यसहिता मध्यमा लुप्तभास्करा ॥ अधमा तारकोपेता सायंसंध्या त्रिधा मता ॥ अध्यर्धयामादासायं संध्या माध्याह्निकीष्यते ॥ " सर्वेषां संध्यात्रयं नद्यादौ बहिरेव प्रशस्तम् ॥ साग्निकस्य तु प्रादुष्करणाद्यनुरोधेन सायं-प्रातःसंध्ये गृहे कर्तव्ये ॥

## अथ संक्षेपतः संध्याप्रयोगो बह्वृचानाम् ।

दर्भद्वयकृते पवित्रे ग्रंथियुते ग्रंथिरहिते वा हस्तयोर्धृत्वा द्विराचम्य प्राणायामं कुर्यात् ॥ प्रणवस्य परब्रह्म ऋषिः परमात्मा देवता देवी गायत्री छंदः सप्तानां व्याहृती-नां विश्वामित्रजमदग्निभरद्वाजगौतमात्रिवसिष्ठकश्यपा ऋषयः अग्निवाय्वादित्यबृ-हस्पतिवरुणेंद्रविश्वेदेवा देवताः गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगत्यश्छंदांसि ॥ गायत्र्या विश्वामित्र ऋषिः सविता देवता गायत्रीछंदः ॥ गायत्रीशिरसः प्रजापति-ऋषिः ब्रह्माग्निवाय्वादित्या देवताः यजुश्छंदः ॥ प्राणायामे विनियोगः ॥ सर्वांगु-लीभिस्तर्जनीमध्यमाभिन्नाभिर्वा नासां धृत्वा दक्षिणेन वायुमाकृष्य रोधयेत् ॥ ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् ॐ तत्सवितुर्वरेण्यं० ॐ आपो ज्योतीरसोऽमृतं ब्रह्म भूर्भुवः स्वरोम् ॥ इति सप्रणवसप्तव्याहृतिगायत्री-शिरस्त्रिः पठित्वा वामनासया वायुं विसृजेदिति प्राणायामः सर्वशाखासाधारणः॥ ममोपात्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं प्रातःसंध्यामुपासिष्ये ॥ आपोहिष्ठे-ति ऋचस्यांबरीषः सिंधुद्वीप आपो गायत्री मार्जने विनियोगः ॥ आपोहिष्ठेति नवभिः पादैः सप्रणवैः कुशोदकेन मूर्ध्नि नवकृत्वो मार्जयेत् ॥ यस्य क्षयायेत्यधो मार्जयेत् ॥ नद्यादौ तीर्थस्थं ताम्रमृन्मयादिभूमिष्ठपात्रस्थं वा वामकरस्थं वा जलं दर्भादिनादाय मार्जनं सर्वत्र न तु धाराच्युतजलेन ॥ अथ मंत्राचमनम् ॥ सूर्य-श्चेति मंत्रस्य याज्ञवल्क्य उपनिषद् ऋषिः ॥ सूर्यमामन्युमन्युपतयो रात्रिश्च देव-ताः ॥ प्रकृतिश्छंदः आचमने विनियोगः ॥ सूर्यश्च मामन्युश्च मन्युपतयश्च मन्यु-कृतेभ्यः पापेभ्यो रक्षंताम् ॥ यद्राज्या पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामु-दरेण शिश्ना ॥ रात्रिस्तदवलुंपतु यत्किंच दुरितं मयि इदमहं माममृतयोनौ सूर्ये ज्योतिषि जुहोमि स्वाहेति जलं पिबेत् ॥ आचम्य ॥ आपोहिष्ठेति नवर्चस्यांबरीषः सिंधुद्वीप आपो गायत्री ॥ पञ्चमी वर्धमाना सप्तमी प्रतिष्ठा ॥ अंत्ये द्वे अनुष्टुभौ मार्जने विनियोगः ॥ " प्रणवेन व्याहृतिभिर्गायत्र्या प्रणवांतया ॥ आपोहिष्ठेति

सूक्तेन मार्जनं च चतुर्थकम् ॥ ऋगंतेर्धऋचांते वा पादांते वापि मार्जयेत् ॥ गायत्रीशिरसाचांते मार्जयित्वाघमर्षणम् ॥ " ऋतं चेति त्र्यृचस्य माधुच्छंदसोघमर्षणो भाववृत्तमनुष्टुप् ॥ अघमर्षणे विनियोगः ॥ दक्षिणहस्ते जलं कृत्वा ॥ ऋतं चेति ऋकत्रयं द्रुपदेति ऋचं वा जप्त्वा दक्षिणनासया पापपुरुषं निरस्य तज्जलं नावलोक्य वामभागे क्षितौ क्षिपेत् ॥ आचम्य गायत्र्या विश्वामित्रः सविता गायत्री ॥ श्रीसूर्यायार्घ्यदाने वि० ॥ प्रणवव्याहृतिपूर्वया गायत्र्या तिष्ठन्सूर्योन्मुखजलांजलिं त्रिः क्षिपेत् ॥ कालातिक्रमे प्रायश्चित्तार्थम् ॥ असावादित्यो ब्रह्मेति प्रदक्षिणं भ्रमन् जलं सिंचेत् ॥ अर्घ्यांजलौ तर्जन्यंगुष्ठयोगो न कार्यः ॥ इदमर्घ्यदानं प्रधानमित्येके ॥ अंगमित्यपरे ॥ अथ गायत्रीजपः ॥ प्राणायामं कृत्वा ॥ गायत्र्या विश्वामित्रः सविता गायत्री जपे वि०॥ तत्सवितुर्हृदया०॥ वरेण्यं शिरसे स्वाहा ॥ भर्गोदेवस्य शिखायै वषट्॥धीमहि कवचायहुम् ॥ धियो यो नः नेत्रत्रयाय वौषट् ॥ प्रचोदयात् अस्त्राय फट् ॥ इति षडंगन्यासः कार्यो न वा कार्यः ॥ न्यासविधेरवैदिकत्वादिति गृह्यपरिशिष्टेस्पष्टम् ॥ एतेनाक्षरन्यासपदन्यासपादन्यासादीनां मुद्रादिविधेः शापविमोचनादिविधेश्च तांत्रिकत्वेनाऽवैदिकत्वादनावश्यकत्वं वेदितव्यम् ॥ मन्त्रदेवतां ध्यायेत् ॥ केचिद्गायत्र्यादिध्यानं वदंति ॥ " आगच्छ वरदे देवि जपे मे सन्निधौ भव ॥ गायंतं त्रायसे यस्माद्गायत्री त्वं ततः स्मृता " इत्यावाह्य ॥ "यो देवः सवितास्माकं धियो धर्माधिगोचरे ॥ प्रेरयेत्तस्य तद्भर्गस्तद्वरेण्यमुपास्महे ॥ इति मन्त्रार्थं चिंतयन् मौनी प्रातः सूर्याभिमुखस्तिष्ठन्नामंडलदर्शनात्सप्रणवव्याहृतिकायाः गायत्र्या अष्टशतमष्टाविंशतिं दशकं वा जपेत् ॥ सायं वायव्याभिमुखः आनक्षत्रदर्शनादिति विशेषः ॥ अनध्यायेष्टाविंशतिं प्रदोषे दशैव जपेदिति कारिकायाम् ॥ रुद्राक्षविद्रुमादिमालाभिरंगुलीपर्वभिर्वा जपः ॥ अष्टशतं चतुःपंचाशत् सप्तविंशतिर्वा मालामणयः ॥ उत्तरन्यासं कृत्वोपस्थानम् ॥ जातवेदसे० ॥ तच्छंयो ० नमो ब्रह्मण इति मन्त्रैः सायं प्रातश्चोपतिष्ठेदिति परिशिष्टमतम् ॥ स्मृत्यंतरे मित्रस्य चर्षणीत्यादिमित्रदेवताकैः प्रातः ॥ इमं मे वरुणेत्यादिभिर्वरुणपदोपेतैः सायं सूर्योपस्थानमुक्तम्॥प्राच्यै दिशे नम इंद्राय नमः॥ आग्नेय्यै दिशे अग्नये नमः इत्यादिना दश दिग्वंदनांते संध्यायै नमः ॥ गायत्र्यै नमः ॥ सावित्र्यै नमः ॥ सरस्वत्यै नमः ॥ सर्वाभ्यो देवताभ्यो नमः ॥ इति नत्वा " उत्तमे शिखरे जाते भूम्यां पर्वतमूर्धनि ॥ ब्राह्मणैरभ्यनुज्ञाता गच्छ देवि यथासुखम् " इति विसृज्य भद्रं नो अपि वातय मन इति त्रिरुक्त्वा प्रदक्षिणं भ्रमन् " आसत्यलोकात्पातालादालोकालोकपर्वतात् ॥ ये सन्ति ब्राह्मणा देवास्तेभ्यो नित्यं नमोनमः " इति भूम्युपसंग्रहं नमस्कृत्य द्विराचामेदिति ॥

## अथ तैत्तिरीयाणां संध्या ।

संकल्पांतं पूर्ववत् गायत्रीं ध्यात्वा ॥ " आयातु वरदा देवी अक्षरं ब्रह्मसंमितम् ॥ गायत्री छन्दसां मातरिदं ब्रह्म जुषस्व मे ॥ सर्ववर्णे महादेवि संध्याविद्ये सरस्वति ॥ अजरे अमरे देवि सर्वदेवि नमोस्तु ते ॥ " ओजोसि सहोसि बलमसि भ्राजोसि देवानां धामनामासि विश्वमसि विश्वायुः सर्वमसि सर्वायुरभिभूरों गायत्रीमावाहयामि ॥ सावित्रीमावाहयामि ॥ सरस्वतीमावाह० ॥ छन्दऋषीनावा०॥ श्रियमा०॥ ह्रियमा०॥ इत्यावाह्य मार्जनं पूर्ववत् ॥ आपोवा इद ꣳ सर्वं विश्वा भूतान्यापः प्राणा वा आपः पशव आपोन्नमापोऽमृतमापः सम्राडापो विराडापः स्वराडापश्छंदां ꣳ स्यापो ज्योती ꣳ ष्यापो यजू ꣳ ष्यापः सत्यमापः सर्वा देवता आपो भूर्भुवः सुवराप आप ॐ इति जलमभिमंत्र्य॥ सूर्यश्चेति पूर्ववन्मंत्राचमनम् ॥ दधिक्राव्णो अकारिषमिति ऋचमुक्त्वा आपोहिष्ठेति तिसृभिः हिरण्यवर्णा इति पवमानः सुवर्चन इत्यनुवाकेन च ऋगंते मार्जनांतेऽघमर्षणं कृत्वा न कृत्वा वार्घ्यदानादिगायत्रीजपांतमावाहनं मन्त्रवर्ज्यं पूर्ववत् ॥ न्यासविधेरवैदिकत्वमुक्तमेव ॥ जपांते उपस्थानम् ॥ मित्रस्य चर्षणी० मित्रो जनान्० प्रसमित्र० यच्चिद्धिते० यत्किंचेदं० कितवासो यद्दि० ॥ इति षड्भिरुपस्थाय ॥ प्राच्यै दिशे याश्च देवता एतस्यां प्रतिवसंत्येताभ्यश्च नमोनम इत्यादिना अधरांताः षण्नत्वा अवांतरायै दिशे याश्च देवता इति च नत्वा नमो गंगायमुनयोर्मध्य इत्यादिना मुनिदेवान्नत्वा स ꣳ स्रवंतु दिश इति मन्त्रं पठित्वा गोत्राद्युच्चार्य पूर्ववद्भूम्युपसंग्रहं नत्वा पूर्ववत्संध्यां विसृजेदिति ॥

## अथ कात्यायनानां संध्याप्रयोगः ।

आचम्य भूः पुनातु ॥ भुवः पुनातु ॥ स्वः पुनातु ॥ भूर्भुवः स्वः पुनात्वित्यादिना पावनं कृत्वा ॥ ' अपवित्रः पवित्रोवा' इति विष्णुं स्मृत्वा ॥ आसनादिविधिं कृत्वा द्विराचम्य प्राणानायम्य पूर्ववत्संकल्प्य "गायत्रीं त्र्यक्षरां बालां साक्षसूत्रकमंडलुम् ॥ रक्तवस्त्रां चतुर्वक्त्रां हंसवाहनसंस्थिताम् ॥ ब्रह्माणीं ब्रह्मदैवत्यां ब्रह्मलोकनिवासिनीम् ॥ आवाहयाम्यहं देवीमायांतीं सूर्यमंडलात् ॥ आगच्छ वरदे देवि त्र्यक्षरे ब्रह्मवादिनी ॥ गायत्रीछंदसां मातर्ब्रह्मयोने नमोस्तु ते ॥ " इत्यावाह्य ॥ पूर्ववदापोहिष्ठेति त्र्यृचेन मार्जयेत् ॥ सूर्यश्चेति मंत्रस्य नारायण ऋषिः सूर्यो देवता अनुष्टुप् छंदः ॥ आचमनेवि० सूर्यश्चेति० जलं प्राश्याचम्य ॥ आपोहिष्ठेति नव ऋङ्मार्जनं कुर्यादिति केचिदाहुः ॥ वहवस्तु संकल्पाद्यंते सूर्यश्चेति मंत्राचमनं कृत्वापोहिष्ठेति तिसृभिः प्रतिपादमार्जनांतेऽघमर्षणं कार्यं न तु मार्जनद्वयमित्याहुः ॥ सुमित्र्या दुर्मित्र्या इति द्वयोः प्रजापतिर्ऋषिरापो देवता यजुश्छंदः ॥ आदानप्रक्षेपणे

वि० सुमित्र्या न आप ओषधयः संतु इति जलमादाय दुर्मित्र्यास्तस्मै संतु योस्मान्द्वेष्टि यं च वयं द्विष्म इति वामभुवि क्षिपेत् ॥ तत ऋतं चेति त्र्यृचेन द्रुपदेति त्रिरुक्तं ऋचा वावमर्षणं पूर्ववत् ॥ सायं प्रातश्च त्रिरर्घ्यदानं पुष्पयुतजलेन पूर्ववत् ॥ मध्याह्ने सकृद्गायत्र्या परित उक्षणम् ॥ अथोपस्थानम् ॥ उद्वयमुदुत्य-मिति द्वयोः प्रस्कण्वः सूर्योनुष्टुब्गायत्र्यौ ॥ चित्रं देवानामांगिरसः कुत्सः सूर्य-स्त्रिष्टुप् ॥ तच्चक्षुर्दध्यङ्ङाथर्वणः सूर्यः पुर उष्णिक् ॥ उपस्थाने वि०॥ उद्वयं तम-सस्परि० ॥ उदुत्यं जातवेदसं० चित्रं देवानां० तच्चक्षुर्देवहितमित्यूर्ध्वबाहुः सूर्य-मुदीक्षमाणो यथाशाखं पठेत् ॥ प्राणायामादि विधाय ॥ न्याससमुद्गतर्पणादिविधिः कृताकृतः ॥ तेजोसीति परमेष्ठी प्रजापतिराज्यं यजुः ॥ आवाहने विनियोगः ॥ तजोसि शुक्रमस्यमृतमसि धामनामासि प्रियं देवानामनाधृष्टं देवयजनमसि ॥ परोरजस इति विमलः परमात्मानुष्टुप् ॥ गायत्र्युपस्था० गायत्र्यस्येकपदीद्विपदी त्रिपदीश्चतुष्पद्यपदसि न हि पद्यसे नमस्ते तुरीयाय दर्शताय पदाय परो रजसे सावदोम् ॥ ततो गायत्रीजपांतं पूर्ववत् ॥ ततः शक्तेन विभ्राडित्यनुवाकेन पुरुष-सूक्तेन वा शिवसंकल्पेन वा मंडलब्राह्मणेन वोपस्थानं कार्यम् ॥ अत्र ऋक्शाखोक्त-वत् दिग्वंदनं केचित्कुर्वंति ॥ तत उत्तमे शिखरे० ॥ देवा गातु विदो गातुमिति मंत्राभ्यां विसर्जनम् ॥ भूम्युपसंग्रहं नमस्कारादि पूर्ववत् ॥ इति कात्यायनसंध्या ॥ " संध्यामुपासते ये वै निष्पापा ब्रह्मलोकगाः ॥ अन्यकर्मफलं नास्ति संध्याही-नोशुचिस्त्वतः ॥ जीवमानो भवेच्छूद्रो मृतः श्वा जायते ध्रुवम् ॥ " संध्यात्रये कालातिक्रमे प्रायश्चित्तार्थमेकमर्घ्यमधिकं दत्त्वा ॥ रात्रौ प्रहरपर्यंतं दिनोक्तकर्माणि कुर्यात् ॥ ब्रह्मयज्ञं सौरं च वर्जयेत् ॥ सर्वथा संध्यालोपे प्रतिसंध्यमेकोपवासोऽयु-तमष्टोत्तरसहस्रं वा गायत्रीजपः ॥ अत्यशक्तौ प्रतिसंध्यालोपे शतगायत्रीजपः द्व्यहं त्र्यहं लोपे तदावृत्तिः ततः परं कृच्छ्रादिकल्प्यम् ॥

## अथौपासनहोमे अधिकारिणः ।

स्वयं होमो मुख्यः ॥ अशक्तौ पत्नी पुत्रः कुमारी भ्राता शिष्यो भागिनेयो जा-माता ऋत्विग्वा ॥ पुत्रादिर्दंपत्योः संनिधाने एकतरसन्निधाने वा जुहुयात् ॥ त्यागं यजमानः पत्नी वा कुर्यात् ॥ तस्या असन्निधौ तदाज्ञया ऋत्विगादिरपि ॥ पत्न्या ऋतुप्रसवोन्मादादिदोषे तु तदाज्ञां विनापि ऋत्विगादिस्त्यागं कुर्यात् ॥ " स्वयं होमे फलं यत्स्यादन्यैर्होमे तदर्धकम् ॥ " पर्वणि तु स्वयमेव जुहुयात् ॥ तत्र प्रातः सूर्योदयात्प्राक् सायं सूर्यास्तात्प्राक् अग्नीनां गृह्याग्नेर्वा प्रादुष्करणं कृत्वा सूर्यो-दयास्तोत्तरं होमः कार्यः ॥ प्रादुष्करणकालातिक्रमे ॥ ॐ भूर्भुवः स्वः स्वाहेति मंत्रेण स्रुवाज्याहुतिरूपं सर्वप्रायश्चित्तमाज्यसंस्कारपूर्वकं कृत्वा होमः सूर्योदयोत्तरं

दशघटिकापर्यंतं प्रातर्होमकालो मुख्यः ॥ तत् आसायं गौणः ॥ सायं नवनाडिकापर्यंतं मुख्यः ॥ तत आप्रातर्गौणः ॥ मुख्यकालातिक्रमे कालातिक्रमनिमित्तप्रायश्चित्तपूर्वकममुकहोमं करिष्य इति संकल्प्याज्यं संस्कृत्य स्रुचि चतुर्गृहीतं गृहीत्वा सायंकाले दोषावस्तर्नमः स्वाहेति हुत्वा प्रातस्तु प्रातर्वस्तर्नमः स्वाहेति हुत्वा हौम्यं संस्कृत्य नित्यहोमः ॥ श्रौतहोमं कृत्वा स्मार्तहोमः ॥ केचित्स्मार्तहोमं पूर्वमाहुः ॥ आधाने पुनराधाने सायमुपक्रमो होमः ॥ सायंप्रातर्होमयोर्द्रव्यैक्यं कर्त्रैक्यं च ॥ प्रातर्यजमानः कर्ता चेत्कर्तृभेदो न दोषाय ॥

## अथाश्वलायनस्मार्तहोमः ।

आचम्य प्राणानायम्य देशकालौ संकीर्त्य श्रीपरमेश्वरप्रीत्यर्थं सायमौपासनहोमं प्रातरौपासनहोमं वाऽमुकद्रव्येण करिष्ये ॥ चत्वारि शृंगेति ध्यात्वा सोदकहस्तेन त्रिः परिसमुह्य परिस्तीर्य त्रिः पर्युक्ष्य होमद्रव्यं समिद्युतमुत्तरतः स्थितं दर्भेणावज्वाल्य प्रोक्ष्य त्रिः पर्याग्निं कृत्वाग्नेः पश्चिमतो दर्भे निधाय विश्वानिन इत्यभ्यर्च्य प्रजापतिं मनसा ध्यायन् समिधमग्नौ प्रक्षिप्य तथैव त्यक्त्वा समिधि दीप्तायां शततंडुलैरग्नये स्वाहेति सायं प्रथमाहुतिः सूर्याय स्वाहेति प्रातः प्रथमाहुतिः शताधिकतंडुलैः प्रजापतय इति मनसोच्चार्य होमत्यागाभ्यां द्वितीयाहुतिरुभयकाले ॥ परिस्तरणं विसृज्य परिसमूहनपर्युक्षणे कृत्वोपस्थानम् ॥ अग्न आयूंषीति तिसृणां शतं वैखानसा अग्निः पवमानो गायत्री ॥ अग्न्युपस्थाने वि० ॥ अग्ने त्वं न इति चतसृणां गौपायना लौपायना वा बन्धुः सुबंधुः श्रुतबन्धुर्विप्रबन्धुश्चाग्निर्द्विपदा विराट् ॥ अग्न्युपस्थाने वि० ॥ प्रजापते हिरण्यगर्भः प्रजापतिस्त्रिष्टुप् प्रजाप ॥ त्युपस्थाने० ॥ तंतु तन्वन्देवा अग्निर्जगती ॥ यद्वा देवा प्रजापतिर्जगती ॥ उपस्थाने वि० ॥ हिरण्यगर्भो हिरण्यगर्भः प्रजापतिस्त्रिष्टुप् ॥ प्रजापत्यु० ॥ इति वायव्यदेशे तिष्ठन्नुपस्थाय ॥ उपविश्य मानस्तोक इत्यादिना विभूतिधारणं क्वचिदुक्तम् ॥ विष्णुं स्मृत्वा अनेन होमकर्मणा परमेश्वरः प्रीयतामित्यर्पयेत् ॥ प्रातस्तु ॥ सूर्यो नो दिवः सूर्यश्चक्षुः सूर्यो गायत्री ॥ सूर्योप० ॥ उदुत्यं काण्वः प्रस्कण्वः सूर्यो गायत्री ॥ सूर्योप० ॥ चित्रं देवानामांगिरसः कुत्सः सूर्यस्त्रिष्टुप् ॥ सूर्योप० ॥ नमो मित्रस्य सौर्योभितपाः सूर्यो जगती ॥ सूर्यो० ॥ इति चतुर्भिः पूर्वोक्तैस्त्रिभिः प्राजापत्यैश्चोपस्थानम् ॥ केचित्प्रातस्तंतुं तन्वन्निति न पठंति ॥ पत्नी कुमारीकर्तृकहोमे ध्यानोपस्थानादौ मंत्रा वर्ज्याः ॥

## अथ हिरण्यकेशीयानाम् ।

पूर्वोक्तसंकल्पाद्यंते यथाह तद्वसव इति परिसमुह्य परिस्तीर्य ॥ अदितेऽनुमन्यस्वेति दक्षिणतः प्राचीनं पर्युक्षेत् ॥ अनुमतेनुमन्यस्वेति पश्चादुदीचीनम् ॥ सर-

स्वतेनुमन्यस्वेति उत्तरतः प्राचीनम् ॥ देवसवितः प्रसुवेति सर्वतः॥ तूष्णीं समिधमाधाय होमादिप्राग्वत् ॥ अदितेऽन्वमꣳस्थाः॥ अनुमतेऽन्वमꣳस्थाः सरस्वतेऽन्वमꣳस्थाः ॥ देवसवितः प्रासावीरिति पूर्ववत् परिषेचनम् ॥ उदुत्यं चित्रं देवानामिति प्रातरुपस्थानम् ॥ अग्निर्मूर्धादिव इति त्वामग्ने पुष्करादधीति द्वाभ्यां सायमुपस्थानम् ॥ आपस्तंबानां सायमग्नये स्वाहाग्नये स्विष्टकृते स्वाहेति द्वे आहुती प्रातस्तु सूर्याय स्वाहाग्नये स्विष्टकृते स्वाहेति विशेषः ॥ शेषं हिरण्यकेशीयवत् ॥

## अथ कात्यायनानाम् ।

सायमस्तमिते होमः ॥ प्रातः सूर्येऽनुदिते होमः ॥ तत्र प्रातरुपस्थानांतां संध्यां कृत्वा होमांते गायत्रीजपादिसंध्यासमापनम् ॥ तत्र पूर्ववत्संकल्पांते उपयमनात्कुशानादाय सव्ये कृत्वा दक्षिणकरेण तिस्रः समिधोग्नावाधाय मणिकोदकेन पर्युक्ष्याग्निमर्चयित्वाग्नये स्वाहा प्रजापतये स्वाहेति सायं दध्ना तंडुलैर्वा हुत्वा प्रातस्तथैव सूर्याय प्रजापतये च जुहुयात् ॥ समास्त्वेत्यनुवाकेन सायमुपस्थानं प्रातस्तु विभ्राडित्यनुवाकेन ॥ अत्र दधिहोमादौ संस्रावप्राशनमाहुः ॥ होमलोपेष्टोत्तरसहस्रगायंत्रीजपः ॥ मुख्यकालातिक्रमे अनादिष्ट होमः ॥ अथ होमद्रव्याणि ॥ व्रीहिश्यामाकयवानां तंडुलाः पयोदधिसर्पिर्यवव्रीहिगोधूमप्रियंगवः स्वरूपेणापि होम्याः ॥ तिलास्तु स्वरूपेणैव ॥ तंडुलादयः शतसंख्याहस्तेन होतव्याः ॥ दध्यादिद्रवद्रव्यं स्रुवेण ॥ सर्वत्रोत्तराहुतिः पूर्वतो भूयसी ॥ समिधश्चार्कपलाशखदिरापामार्गपिप्पलोदुंबरशमीदूर्वादर्भमया दश द्वादशांगुलाः सत्वचः वटप्लक्षबिल्वादिजा हेमाद्रौ ॥ होमाहुत्योः संसर्गे यत्र वेत्थेति मन्त्रेणाग्नये समिद्धोमः ॥

## अथ होमलोपे प्रायश्चित्तम् ।

नित्यहोमे त्वतिक्रांते आज्यं संस्कृत्य चतुर्गृहीत्वा मनोज्योतिर्जुषतामिति जुहुयात् ॥ द्वादशदिनपर्यंतं होमलोपे इदमेव प्रायश्चित्तम् ॥ ततः परमग्निनाशः ॥ एवं होमलोपप्रायश्चित्तं कृत्वातिक्रांतहोमार्थं द्रव्यं संस्कृत्य सायं प्रातः क्रमेण द्वेद्वे आहुती दिनगणनया जुहुयात् ॥ अग्निसूर्यप्रजापतीनुपतिष्ठेन्न वा जुहुयात् ॥ प्रायश्चित्तेन चारितार्थ्यात् ॥ सूतकादिना होमलोपेप्येवम् ॥ हिरण्यकेशीयानामप्येवम् ॥ आपस्तंबादीनां त्रिरात्रात्परमग्निनाशो भवतीति सूतकेपि स्वयं होमः कार्यः ॥ समारोपोत्तरं सूतकपाते प्रत्यवरोहासंभवेन त्रिरात्रं होमलोपे पुनराधानम् ॥ अथ समस्य होमः ॥ सायं प्रातर्होमौ समस्य करिष्ये ॥ पूर्ववत्सायंकालहोमांतं कृत्वा पर्युक्ष्य पुनर्द्रव्यं संस्कृत्य समिधं प्रक्षिप्य सूर्यप्रजापत्याहुतीर्दत्त्वा

हविष्पांतमित्युपतिष्ठेत् ॥ हविष्पांतमिति पंचर्चस्य वामदेवः सूर्यवैश्वानरौ त्रिष्टुप् ॥ नित्यवत्प्रजापत्युपस्थानम् ॥

## अथ पक्षहोमः ।

प्रतिपदि ॥ अद्य सायमारभ्य चतुर्दशीसायमवधिकान् पक्षहोमान् तन्त्रेण करिष्ये ॥ सायं तण्डुलान् पात्रद्वये वृद्धिक्षयानुसारेण चतुर्दशादिवारं गृहीत्वा होमकालेऽग्नये स्वाहेति सर्वान्पूर्वपात्रस्थानेकदैव हुत्वा द्वितीयपात्रस्थान् प्रजापतये तथैव जुहुयात्॥एवं द्वितीयायां प्रातरद्यावधि पर्वप्रातरवधिकान् पक्षहोमान् तन्त्रेण करिष्य इत्यादि सायंवत् ॥ विशेषस्तु प्रथमपात्रस्थान्सूर्याय स्वाहेति जुहुयात् ॥ द्वितीयपात्रस्थान्प्रजापतये हुत्वोभयत्र समिदेकोपस्थानादि सकृत् ॥ पक्षमध्ये आपत्प्राप्तौ तत्सायंकालाच्चतुर्दशीसायंपर्यंतान् शेषहोमान् सायं पक्षहोमवद्धुत्वा पर्वप्रातर्होमांतान् प्रातर्जुहुयात् ॥ सर्वथा पर्वसायंहोमः प्रतिपत्प्रातर्होमश्च पृथगेव ॥ इति पक्षहोमशेषहोमौ ॥ पक्षमध्ये आपन्निवृत्तावपकृष्टा होमाः पुनः कार्याः ॥ संततपक्षहोमत्रयेऽग्निनाशात्तृतीये पक्षे प्रतिदिनं होमः ॥ सर्वथापन्निवृत्त्यभावे यावज्जीवं पक्षहोमाः ॥

## अथ समारोपः ।

अयं ते योनिरित्यस्य विश्वामित्रोऽग्निरनुष्टुप् ॥ अग्निसमारोपे वि० ॥ अनेन मंत्रेण होमोत्तरमरणीमश्वत्थसमिधं वा प्रताप्याग्निसमारोहं तत्र भावयेत् ॥ होमादिकाले अरणीं निर्मथ्य प्रत्यवरोहेति मंत्रेण स्थंडिलेऽग्निं प्रतिष्ठापयेत ॥ समित्समारोपे श्रोत्रियागारादग्निं प्रतिष्ठाप्य प्रत्यवरोहेति मंत्रेण तां समिधमग्नावादध्यात् ॥ सूत्रांतरे आजुह्वान उद्बुध्यस्वेति मंत्राभ्यां प्रत्यवरोहणम्॥प्रत्यहं समारोपादिद्वादशदिनमेव ॥ पर्वणि सायंतनहोमकालपर्यंतं प्रत्यवरोहणाभावेऽग्निनाश इति केचित ॥ समारोपप्रत्यवरोहौ यजमानकर्तृकावेव ॥ तेन समारोपोत्तरं पर्वण्याशौचप्राप्तौ प्रत्यवरोहासंभवादग्निनाशः ॥ एतन्निदिनं होमलोपे विहितपुनराधानानामापस्तंबादीनामेव ॥ आश्वलायनानां तु द्वादशरात्रमध्ये पर्वणि प्रत्यवरोहाभावेपि नाग्निनाशः किंतु द्वादशरात्रोत्तरं होमलोप एवेत्यपरे ॥ आश्वलायनानां तु द्वादशदिनं होमलोप एवाग्निनाशः ॥ राजक्रांत्यादिसंकटे ऋत्विग्द्वारापि समारोपादि ॥ केचिदृत्विगाद्यभावेनानन्यगतिकत्वे आशौचपातात्पूर्वं पर्वहोमसहितानपि होमानपकृष्य कृत्वा न कृत्वा वा समारोपं कृत्वा सूतकांते प्रत्यवरोहः कार्यो नात्र पर्वोल्लंघनदोष इत्याहुः ॥

## अथ यजमानस्य प्रवासोपस्थितौ ।

समारोपोत्तरं दंपत्योः प्रवासे सीमानद्योरुल्लंघनकाले उभाभ्यामन्यतरेण वा समिदाद्यन्वारंभकार्यः ॥ अन्यथाग्निनाशः ॥ यजमानस्यैव प्रवासे कृत्यम् ॥

अभयं वोभयं मेस्त्विति अग्निमुपस्थाय प्रवासं गच्छेत् ॥ तत आगत्य गृहामाविभीतोपवः स्वस्त्येवोस्मासु च प्रजायध्वं मा च वो गोपतीरिषदिति मन्त्रेण स्वगृहं निरीक्ष्य ॥ गृहानहं सुमनसः प्रपद्ये वीरघ्नो वीरवतः सुवीरान् ॥ इरां वहंतो घृतमुक्षमाणास्तेष्वहं सुमनाः संविशानीति गृहं प्रविश्य शिवं शग्मं शंयोरिति पुनस्त्रिरनुवीक्ष्य नित्यहोमांते अभयं वोभयं मेस्त्वित्यग्निमुपातिष्ठेत् ॥ ज्येष्ठपुत्रशिरः पाणिभ्यां परिगृह्य अंगादंगात्संभवसीति मन्त्रं जपित्वा मूर्द्धानं त्रिर्जिघ्रेत् ॥ एवमितरपुत्राणाम् ॥ प्रत्तकन्यानां तूष्णीं जिघ्रेत् ॥ प्रवासादागतं प्रतिज्ञातमपि अप्रियं तद्दिने न वदेयुः ॥ प्रोषिते पत्यौ पत्नी स्मार्तहोमौ स्वयं कृत्वा दर्शपूर्णमासस्थालीपाकपिंडपितृयज्ञान्विप्रेण कारयेत् ॥ अनुगतप्रायश्चित्तादिपत्न्यां रजस्वलायामपि ऋत्विक्कुर्यात् ॥ पुनः संधानं तु पत्यौ प्रोषिते न भवेत् ॥ नैमित्तिकाजातेष्टिगृहदाहेष्टयोपि न भवंति ॥ प्रायश्चित्तेष्टेः पूर्णाहुतिः ॥ अथोपासनाग्न्यनुगमने गृह्याग्नेरनुगमनप्रायश्चित्तं करिष्य इति संकल्प्य आयतनस्थं भस्म दूरीकृत्योपलेपादि कृत्वाग्निं प्रतिष्ठाप्याज्यं संस्कृत्य अयाश्चेति मन्त्रेणैकामाज्याहुतिं सर्वप्रायश्चित्तं च हुत्वा दंपत्योरन्यतरेणादरहोमकालपर्यंतमुपोषितेन स्थातव्यम् ॥ एवं द्वादशरात्रपर्यंतम् ॥ केचिदुपवासमयाश्चेति होमं वा कुर्यात् न द्वयमित्याहुः ॥ एतद्वृत्तिकारमतम् ॥ केचित्तु यद्यग्न्यनुगमने होमकालद्वयातिक्रमस्तदा नष्टाग्निसंधानम् ॥ तत्र त्रिरात्रमग्निनाशे प्राणायामशतम् ॥ तत आविंशतिरात्रमेकदिनोपवासः ॥ तत आमासद्वयं त्रिरात्रोपवासः ॥ तत ऊर्ध्वं संवत्सरपर्यंतं प्राजापत्यकृच्छ्रम् ॥ ततः प्रतिवर्षं कृच्छ्रावृत्तिः ॥ एवं प्रायश्चित्तं कृत्वा आधानोक्तसम्भारान्निधाय नष्टस्य गृह्याग्नेः प्रायश्चित्तं करिष्य इति संकल्प्याग्नेत्याज्येन स्रुवाहुतिपत्न्युपवासादि पूर्ववत् लाजाहोमादिकं वा ॥ एवं द्वादशरात्रपर्यंतमग्न्युत्पत्तिरित्याहुः ॥ द्वादशदिनोत्तरं विच्छेदप्रायश्चित्तं होमादिद्रव्यदानं च कृत्वा विवाहहोमादिविधिना यथास्वस्वगृह्यं पुनः संधानम् ॥ अथान्वाहिताग्नेः प्राक् यागादनुगतौ अयाश्चेति पूर्ववदग्निमुत्पाद्य पुनरन्वाधानं कृत्वा भूर्भुवः स्वरित्युपस्थाय सर्वप्रायश्चित्तं हुत्वा स्थालीपाकं कुर्यात् ॥ अन्वाधानोत्तरं प्रयाणप्राप्तौ तुभ्यं ता अंगिरस्तम इत्याज्याहुतिमग्नये हुत्वा सर्वप्रायश्चित्तं हुत्वाग्निं समारोप्य गच्छेत् ॥ 'समारूढे समिन्नाशे पुनराधेयमिष्यते ॥' उपलेपादिकं कृत्वा नष्टाग्निप्रायश्चित्तं पुनराधेयं संकल्प्य आधानोक्तसंभारान्निधायाग्निं प्रतिष्ठाप्य अयाश्चेतिस्रुवाज्याहुतिं सर्वप्रायश्चित्तं च जुहुयादिति पुनराधेयम् ॥ स्वाग्निभ्रमेणान्याग्नौ स्वयं यजने स्वाग्नावन्ययजने वा पथिकृत्स्थालीपाकं करिष्ये इति संकल्प्य चरुः कार्योथ वा पथिकृत्स्थाने पूर्णाहुतिं होष्यामीति संकल्प्य स्रुचि द्वादशवारं चतुर्वारं वाज्यं गृहीत्वा अग्नये पथिकृते स्वाहेति जुहुया-

त् ॥ विवाहोत्तरमाधानोत्तरं वा पौर्णमास्यां स्थालीपाकारंभः ॥ प्रतिपदि यागोतिक्रांतश्चेदागामिपर्वपूर्वतिथिषु चतुर्थीनवमीचतुर्दशीद्वितीयापंचम्यष्टमीर्विहाय कार्यः ॥ नात्र कालातिक्रमप्रायश्चित्तम् ॥ अन्वाधानोत्तरं प्रतिपदीष्टयकरणे तृतीयादितिथिषु सर्वप्रायश्चित्तं हुत्वा पुनरन्वाधाय यागः ॥ द्वितीयपर्वप्राप्तौ अतीतेष्टिः पथिकृच्चरुपूर्वकं पर्वणि कार्या ॥ तत्राप्यतिक्रमे द्वितीयप्रतिपदि लुप्तेष्टेः पादकृच्छ्रं कृत्वा प्राप्तकालयागः ॥ द्वितीययागस्यापि आगामितिथिषु लोपे तत्पर्वणि पादकृच्छ्रपथिकृत्पूर्वकं द्वितीययागः ॥ तत्राप्यतिक्रमे तृतीयप्रतिपदि अर्धकृच्छ्रं यागद्वयस्य कृत्वा प्राप्तयागः ॥ तृतीययागस्योक्ततिथावर्धकृच्छ्रपथिकृत्पूर्वकं चतुर्थपर्वणि वाऽकरणे अग्निनाशात्पुनराधेयम् ॥ अत्र पुनराधेयस्वरूपं संभारनिधानपूर्वकमयाश्वेतिस्रुवाज्याहुतिरित्यन्वारूढसमिन्नाशस्थले उक्तमेव ॥ पुनराधानं तु विवाहहोमादिरूपं पुनराधेयाद्भिन्नम् ॥ आयतनाद्बहिः शम्यापरासात्पाक् वह्निपाते इदं त एकमित्यृचा तमायतने प्रक्षिप्य सर्वप्रायश्चित्तं जुहुयात् ॥

## अथ पर्वणि व्रतलोपेश्रुपाते च ।

पर्वणि व्रतलोपेग्नये व्रतपतये चरुः पूर्णाहुतिर्वा ॥ पर्वणि दंपत्योरन्यतराश्रुपातेग्नये व्रतभृते चरुः पूर्णाहुतिर्वा ॥ पवित्रनाशेग्नये पवित्रवते चरुः पूर्णाहुतिर्वा ॥ अन्वाधानेष्टिमध्ये चंद्रग्रहणेऽग्राह गौरिति चंद्रायाज्यं हुत्वा नवो नव इत्युपस्थायेध्माधानादियागः ॥ सूर्योपरागे उद्वयमिति सूर्यायाज्यं हुत्वा चित्रं देवानामित्युपस्थानम् ॥ अन्वाधानोत्तरं स्वग्ने रेतोविसर्गे इमं मे वरुण तत्त्वायामीति वरुणाय द्वे आज्याहुती रविपूजा ॥ पुनर्मामैति सौत्रमंत्रयोर्जपश्च ॥ बुद्ध्या रेतोविसर्गेग्निव्रतपतिचरुः ॥ अन्यदा स्वग्ने रेतोविसर्गे सूर्यनमस्कारत्रयम् ॥ इध्माधानोत्तरं हविर्दोषे दुष्टस्थाने आज्यं प्रतिनिधिं कृत्वा यागं समाप्य दुष्टं जले त्यक्त्वान्वाधानादिस्तद्देवताकः पुनर्यागः ॥ इध्माधानात्पूर्वं हविर्दोषे तद्देवताकं हविः पुनरुत्पाद्य यागः ॥ स्विष्टकृदर्थहविर्दोषे आज्येन स्विष्टकृतं कुर्यात् ॥ अंगहविर्दोषे तदाज्यं पुनरुत्पादयेत् ॥ हविर्दोषास्तु ॥ प्रच्युतनखकेशैः कीटैः रक्तास्थिविण्मूत्रश्लेष्माद्यैर्बीभत्सितैश्च मार्जारनकुलकाकैर्मुखजलबिंदुघर्मनासिकामलाश्रुकर्णमलैः सूतिकारजस्वलाचांडालादिदृष्टिभिश्च संसर्गाः ॥ देवताहविर्मंत्रादिविपर्यासे यद्वो देवा इति मरुद्भ्य आज्यहोमः ॥ कृत्स्नहविर्दाहे तद्धविरुत्पाद्य स एव यागो न तु पुनर्यागः ॥ पूर्वादिचतुर्दिक्षु चरूत्सेके अग्नये यमाय वरुणाय सोमायेति क्रमेण हुत्वा सर्वत उत्सेके चतुर्भ्योपि हुत्वा कोणेषूत्सेके व्याहृतीर्हुत्वा चरुमाप्यायस्वसंतेपयांसीति मंत्राभ्यामाज्येनाप्याययति ॥ अग्नौ मिंदाहुती च द्वे इति केचित् ॥ स्वगृह्याग्नेरन्यगृह्याग्निना संसर्गे उभौ यजमानौ युगपत्तमग्निं समारोप्योभौ प्रत्यव-

रोहणं कृत्वाऽग्नये विविचये चरुं कुर्याताम् ॥ शवाग्निना संसर्गेऽग्नये शुचये चरुः पचनाग्निना संसर्गे संवर्गायाग्नये चरुः सर्वत्र संसर्गे समारोपप्रत्यवरोहणोत्तरं चरुः स्वयमग्निप्रज्वलने उद्दीप्यस्व जातवेदो० मानोहि ५ सीर्जातवेदो गामश्वं पुरुषं जगत् ॥ अविभ्रदग्न आगहि श्रियामा परिपातयेति द्वाभ्यां द्वे समिधावग्नये जुहुयात् ॥ सर्वत्र विध्यपराधे सांगतार्थं सर्वप्रायश्चित्तम् ॥ गृहदाहेग्नये क्षामवते चरुः ॥ एवमन्यान्यपि प्रायश्चित्तानि बह्वृचब्राह्मणादिषूक्तानि ज्ञेयानि ॥ यत्र तु प्रायश्चित्तविशेषो नोक्तस्तत्र सर्वप्रायश्चित्तम् ॥ भूर्भुवःस्वरित्यनेनाज्याहुतेः सर्वप्रायश्चित्तसंज्ञा ॥

## अथाग्न्युपघातनिमित्तानि ।

श्वसूकररासभकाकसृगालमर्कटशूद्रांत्यजपतितकुणपसूतिकारजस्वलाभिः पुरीषमूत्ररेतोश्रुपूयश्लेष्मशोणितास्थिमांसादिभिरन्यैर्वा जुगुप्सितैरारोपितारणिस्पर्शेऽग्नेः स्पर्शे वाग्निनाशः ॥ तत्रारणिगते वह्नौ नष्टे पुनराधेयमग्नेः स्पर्शे पुनराधानं यद्वा पुनस्त्वादित्या रुद्रा वसवः समिंधतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः ॥ घृतेन त्वं तन्वँव्वर्धयस्व सत्याः संतु यजमानस्य कामाः स्वाहा ॥ आदित्यरुद्रवसुब्रह्मभ्य इदं न ममेति समिद्धोमः स्रुवेणाज्याहुतिर्वा ॥ अग्नौ जलोपघातेपीदमेव ॥ स्वस्य जीविनो मृतशब्दश्रवणेग्नये सुरभिमतेचरुः पूर्णाहुतिर्वा ॥ प्रधानाहुतीनां स्विष्टकृता संसर्गे सर्वप्रायश्चित्तम् ॥ पिंडपितृयज्ञेऽतिप्रणीतनाशे तत्राहोमपक्षे सर्वप्रायश्चित्तम् ॥ होमपक्षे पुनः प्रणयनमपि ॥ आपस्तंबानां प्रायश्चित्तान्ते प्रणयनमेव नित्यम् ॥ पिंडपितृयज्ञलोपे वैश्वानरश्चरुः सप्तहोत्राख्यमहाहविर्हातेत्यादिमंत्रैः पूर्णाहुतिर्वा ॥

## अथ श्रवणाकर्मलोपे ।

श्रवणाकर्मसर्पबल्याश्वयुज्याग्रयणप्रत्यवरोहणकर्मणामन्यतमलोपे प्राजापत्यकृच्छ्रम् ॥ अकृताग्रयणस्य नवान्नभक्षणेग्नये वैश्वानराय चरुः ॥ अष्टकालोपे उपवासः पूर्वेद्युः श्राद्धलोपेप्युपवासः ॥ उपवासप्रत्याम्नाय एकविप्रभोजनं वा ॥ अन्वष्टक्या लोपे एभिर्द्युभिः सुमना एभिरिंदुभिरिति ऋचः शतं जपः ॥ सवत्र चरुस्थाने पूर्णाहुतिः दर्शपूर्णमासानारंभे आलस्यादिना पूर्णाहुतिकरणे तु यागपर्याप्तं व्रीह्याज्यं देयमिति गृह्याग्निसागरे ॥ निषिद्धतिथ्यादौ स्वभार्यागमने अयाज्ययाजने लशुनादिगणिकान्नाद्यभोज्यभोजने निषिद्धप्रतिग्रहे पुनर्मामेत्विंद्रियम् इमेये धिष्णया स इति द्वाभ्यामाज्यहोमः समिद्धोमो वा जपो वा ॥ गृहोपरि कपोतोपवेशने देवाः कपोत इति पंचर्चसूक्तजपः पृत्सूचमाज्यहोमो वा पाकयज्ञतंत्रेण ॥ दुःस्वप्नदर्शने यो मे राजन्युज्योवेत्यृचा सूर्यो-

पस्थानम् ॥ आतुरत्वनाशाय यक्ष्मरोगनाशाय वा मुंचामित्वेति सूक्तेन प्रत्यृचं चरोर्होमः यक्ष्मनाशायेदं न ममेति पंचसु त्यागः ॥ षष्ठं स्विष्टकृदिति ॥ प्रोक्षणीप्रणीतास्थजलानां बिंदुपाते स्रावे वा आपोहिष्ठेतिऋचेन पुनः पूरणं ततं मे अपस्तदुतायेते इत्यृचाज्याहुतिः ॥ इध्माधानलोपे तस्याज्यभागोत्तरं स्मरणे विपर्यासप्रायश्चित्तं कृत्वेध्माधानं च कृत्वा प्रधानयागः ॥ प्रधानयागोत्तरं स्मरणेग्निसमिंधनरूपद्वारस्याभावाल्लोप एवेति प्रायश्चित्तेनैव सिद्धिः ॥ अन्यांगेष्वप्येवमूह्यम्॥

## अथाग्निनाशकानि ।

दंपत्योरन्यतरोग्निसमीपे उदयास्तमयकाले वसेत्॥ उभौ दंपती गृहसीमां ग्रामसीमां वा नदीं वोल्लंघ्य होमकाले बहिर्वसेतां तदा पुनराधानम् ॥ अग्नीनामजस्रहरणे शम्याप्रासात्प्रागुच्छ्वासेग्निनाशः ॥ कर्मार्थं हरणेग्नीनां नानुच्छ्वासादि चोद्यते ॥ आत्मसमारोपणपक्षेप्सु मज्जने मैथुने शूद्रादिस्पर्शनेग्निनाशः ॥ पत्न्यनेकत्वेप्येकस्यामपि होमकाले गृहसीम्नो बहिर्गतायामग्निनाशः ज्येष्ठायामग्निसमीपस्थायां कनिष्ठया सह यजमानप्रवासो न दोषाय ॥ दम्पती उभावपि ग्रामगृहयोः सीम्नो बहिर्गत्वा होमकालात्पूर्वमागतौ चेन्न दोषः ॥ यजमानेग्निसमीपस्थेपि होमकाले पत्न्या ग्रामांतरस्थितौ पुनराधानमाहुः ॥ प्रवासेन्यतरेण समारूढाग्नेरन्वारंभासत्त्वे नदीसीम्नोरुल्लंघने पुनराधानम् ॥ अग्निं विहाय यजमानस्य शतयोजनगमने वर्षपर्यंतं स्वयं होमाभावेग्निनाशः ॥ तत्र पुनराधानं पवित्रेष्टिर्वा ॥ "विनाग्निभिर्यदा पत्नी नदीमंबुधिगामिनीम्॥ अतिक्रमेत्तदाग्नीनां विनाशः स्यादिति श्रुतिः ॥" अग्निसमीपे पत्यौ पत्न्यंतरे वा पत्न्या नदीलंघने दोषो न ॥ पतिप्रवासे पत्न्या अग्निभिः सह सीमोल्लंघनेग्निनाशः ॥ एवं पत्युरपि पत्नीप्रवासे जलेन हेतुनाग्निरुपशांतश्चेत्पुनराधेयम् ॥ तदैव पुनराधेयमग्नावनुगते सति ॥ असमाधाय चेत्स्वामी सीमामुल्लंघ्य गच्छति ॥ " समारोपणं विना शम्यापरासादूर्ध्वमग्नीनां हरणे नाशः ॥" रजोदोषे समुत्पन्ने मूतके मृतकेपिवा ॥ प्रवसन्नग्निमान्विप्रः पुनराधानमर्हति ॥ बह्वीनामपि चैकस्यामुदक्यायां न तु व्रजेत् ॥ एकादशे चतुर्थेह्नि गंतुमिच्छेन्निमित्ततः ॥ न चाग्निहोमवेलायां प्रवसेन्न च पर्वणि ॥" होमद्वयात्यये दर्शपूर्णमासात्यये पुनराधेयमापस्तंबादिविषयम् ॥ " पचनाग्नौ पचेदन्नं सूतके मृतकेपि वा ॥ अपक्त्रा तु वसेद्रात्रिं पुनराधानमर्हति " इदं कात्यायनादिपरम् ॥ पत्नीप्रवासे पुनराधानमुक्तं तदेकभार्यस्य ॥ बहुभार्यस्य तु ज्येष्ठाप्रवास एव पुनराधानमिति केचित् ॥ एतेषु निमित्तेषु स्थितानग्नीनुत्सृज्यान्येषामाधानम् ॥ आरादुपकारकांगलोपे कर्मसमाप्तेः प्राक् प्रायश्चित्तं कृत्व तदंगं कुर्यात् ॥ कर्मसमाप्तौ प्रायश्चित्तमेव नांगावृत्तिः ॥ सन्निपत्योपकारकां-

गस्य द्रव्यसंस्काररूपस्य लोपे प्रधानात्प्राक् तत्कार्यम् ॥ प्रधानोत्तरं प्रायश्चित्तमेव नावृत्तिः ॥

## अथ पूर्वं भार्यामृतौ अग्निदाहविचारः ।

मृतायै पत्न्यै दाहायार्धाग्निं दत्त्वावशिष्टाग्नौ सायं प्रातर्होमस्थालीपाकाग्रयणानि कुर्यात् ॥ कौस्तुभे त्वर्धाग्निदानादिकमुक्त्वा विधुरस्यापूर्वाधानप्रकारस्तस्य विच्छेदे पुनराधानप्रकारश्चोक्तः॥ तत्राधानप्रकारोवशिष्टाग्नेः प्राक् होमान्नाशपरः॥ यद्वा श्रौताग्निषु भार्यायै अर्धाग्निदानं कृत्वा उत्सर्गेष्ट्या पूर्वाग्नीन्परित्यज्य पुनराधानं कृत्वाग्निहोत्रं कार्यमित्युक्तं तद्वदत्रापि उत्सर्गेष्ट्या पूर्वाग्नित्यागोत्तरमपूर्वाधानं कौस्तुभे उक्तमिति योज्यमिति भाति ॥ अरणिस्रुवादिपात्राणां लक्षणवृक्षादिविचारोन्यत्र ज्ञेयः ॥ एतेषां विधीनां संकल्पादिविस्तरयुक्ताः प्रयोगा गृह्याग्निसागरे ॥ प्रायश्चित्तादिविधयः प्रायः सर्वसूत्रेषु समाना एव ॥ क्वचित्क्वचित्स्वस्वसूत्रोक्ता विशेषा ऊह्याः ॥ विवाहहोमो गृहप्रवेशनीयहोमेन समानतंत्रोनुष्ठीयमानो बह्वृचानां पुनराधानमन्येषां विवाहहोमाद्भिन्नमेवेति विशेषः ॥

## अथ पराग्निपक्वनिषेधः ।

अथ कात्यायनोपयोगि किंचिदुच्यते ॥ " पराग्निपक्वं नाश्नीयाद्गुडगोरसमंतरा ॥ आहिताग्नेरयं धर्मो याज्ञिकानां तु संमतः ॥ इक्षुक्षीरविकाराश्च भ्राष्ट्रभृष्टयवा अपि ॥ पराग्निपक्वं न ज्ञेयं प्रवासे चाग्निहोत्रिणः ॥ यदन्नं वारिहीनं च पक्वं केवलपावके ॥ तदन्नं फलवद्ग्राह्यमन्नदोषो न विद्यते ॥ "

## अथ गृह्याग्नौ पाकविचारः ।

"प्रातर्होमं तु निर्वर्त्य समुद्धृत्य हुताशनात् ॥ शेषं महानसे कृत्वा तत्र पाकं समाचरेत् ॥ पूर्वेण योजयित्वा तं तस्मिन्होमो विधीयते ॥ अतोस्मिन्वैश्वदेवादि कर्म कुर्यादतंद्रितः ॥ " बह्वृचकारिकायाम् ॥ " नित्यपाकाय शालाग्नेरेकदेशस्य कार्यतः ॥ पाकार्थमुल्मुकं हृत्वा तत्र पक्त्वा महानसे ॥ वैश्वदेवोग्न्यगारेस्यात्पाकार्थोग्निश्च लौकिकः ॥ भूरिपाको भवेद्यत्र श्राद्धादावुत्सवेषु च ॥ कृते च वैश्वदेवेथ लौकिको नैव कार्यतः॥ दीपको धूपकश्चैव तापार्थं यश्च नीयते ॥ सर्वे ते लौकिका ज्ञेयास्तावन्मात्रापवर्गतः ॥ बहुधा विहृतोह्यग्निरावसथ्यात्कथंचन ॥ यावदेकोपतिष्ठेत तावदन्यो न मथ्यते ॥ वैश्वदेवात्तथा होमात्प्राग् ज्ञेयं नैव मंथनम् ॥ पचनाग्नावपक्त्राहः पुनराधानमर्हति ॥ आरोपितारणी चोभे एका वा यदि नश्यति ॥ तत्राग्न्याधेयमिच्छंति पुनराधेयमेव वा ॥ "

## अथारणिनाशे ।

"आधानारोपितारण्योः क्षये ग्राह्ये नवे पुनः ॥ तदलाभे यदोद्वायादत्र स्यात्पुनराहितिः ॥ शूद्रोदक्यांत्यजैश्चैव पतितामेध्यरासभैः ॥ अनारूढारणिस्पर्शे ते विहायान्ययोर्ग्रहः ॥ " आरूढारणिस्पर्शे पुनराधेयमुक्तम् ॥ " भवंतं नः समेत्यप्सु मज्जयेद् दूषितारणी ॥ एकारण्येव दुष्टा चेत्तामेवाप्सु निमज्जयेत् ॥ तत्रान्यारणिलाभात्प्रागुद्वाते पुनराहितिः ॥ " उद्वाते अग्नौ नष्टे ॥ " नष्टायामरणौ यावदग्निस्तिष्ठति वेश्मनि ॥ तावद्धोमादिकं कृत्वा तन्नाशे पुनराहरेत् ॥ " अत्रैकारणिनाशेन्यामेकां मन्त्रेणोपादायोभाभ्यां मंथनमिति केचित् ॥ अवशिष्टां तामेव च्छित्वा मंथनमित्यपरे॥एकस्याः दोषेप्यरणिद्वयं त्यक्त्वा नूतनद्वयोपादानमिति नारायणवृत्त्याशयः॥अयमरणिविचारः श्रौतस्मार्तसाधारणः सर्वशाखासाधारणश्च॥अग्निसमारोपे कार्तायैर्वैश्वदेवः पाकश्च लौकिकेग्नौ कार्य इत्याहुः॥ "यस्य वेदश्च वेदी च विच्छिद्येते त्रिपूरुषम्॥स वै दुर्ब्राह्मणो ज्ञेयः सर्वकर्मसु गर्हितः॥अग्निहोत्रं प्रकुर्वीत ज्ञानवाञ्छ्रद्धयान्वितः ॥ अग्निहोत्रात्परो धर्मो न भूतो न भविष्यति ॥ श्रौते कर्माणि नो शक्तो ज्ञानद्रव्याद्यभावतः ॥ स्मार्तं कुर्याद्यथाशक्त्यात्राप्याचारं लभेत्सदा ॥ कृतदारो न तिष्ठेत क्षणमप्यग्निना विना॥ तिष्ठेत चेद्द्विजो व्रात्यस्तथा च पतितो भवेत् ॥ न गृह्णीयाद्विवाहाग्निं गृहस्थ इति मन्यते ॥ अन्नं तस्य न भोक्तव्यं वृथा पाको हि स स्मृतः ॥ यो दद्यात्कांचनं मेरुं पृथिवीं च ससागराम् ॥ तत्सायंप्रातर्होमस्य तुल्यं भवति वा न वा ॥" इति होमप्रकरणम् ॥

## अथ नित्यदानम् ।

"एकस्मिन्नप्यतिक्रांते दिने दानविवर्जिते ॥ दस्युभिर्मुषितस्येव युक्तमाक्रंदितुं भृशम्" ॥ तस्माद्विभवानुसारेण धनधान्यादि देयमसंभवे पूगीफलादिकमपि प्रत्यहं देयम् ॥ ततो गोब्राह्मणादिमंगलदर्शनमित्यष्टधा विभक्तदिनस्य प्रथमभागकृत्यम् ॥ द्वितीयभागे वेदशास्त्राभ्यासः ॥" पठेदध्यापयेद्वेदान् जपेच्चैव विचारयेत् ॥ अवेक्षेत च शास्त्राणि धर्मादीनि द्विजोत्तमः ॥" देवार्चनमपि प्रातर्होमोत्तरं वा चतुर्थभागे ब्रह्मयज्ञोत्तरं वा कार्यम् ॥ " विधाय देवतापूजां प्रातर्होमादनंतरम् ॥ कुर्वीत देवतापूजां जपयज्ञादनंतरम् " इत्यादिद्विविधस्मृतेः ॥

## अथ पूज्यप्रतिमादिविचारः ।

तत्र विष्णुशिवब्रह्मसूर्यशक्तिविनायकादिष्वभिमतां देवतामर्चयेत् ॥ तत्रापि कलौ हरिहरयोः पूजा प्रशस्ता ॥ " न विष्ण्वाराधनात्पुण्यं विद्यते कर्म वैदिकम् ॥ तस्मादनादिमध्यांतं नित्यमाराधयेद्धरिम् ॥ अथ वा देवमीशानं भगवंतं

सनातनम् ॥ प्रणवेनाथ वा रुद्रगायत्र्या त्र्यंबकेन वा ॥ तथोन्नमः शिवायेति मंत्रेणानेन वा यजेत् ॥" तत्रापि प्रतिमास्थंडिलादिभ्यः शालग्रामे बाणलिंगे च प्रशस्ता ॥ आवाहनादिकं विना सदा देवतासंनिधानात् ॥ श्रीमद्भागवते ॥ " उद्वासावाहने न स्तः स्थिरायामुद्धवार्चने ॥ अस्थिरायां विकल्पः स्यात् स्थंडिले तु भवेद्वयम् ॥ " तत्र संक्षेपतः पूजाप्रयोग उच्यते ॥ विशेष-विचारस्तु मूर्त्तिप्रतिष्ठाप्रसंगेन वक्ष्यते ॥ " देवार्चनं प्रकर्तव्यं त्रिकालेपि यथाक्रमम् ॥ अशक्तौ विस्तरात्प्रातर्मध्याह्ने चंदनादितः ॥ सायं नीराजनं कुर्यात्त्रिकाले तुलसीदलम् ॥ यथा संध्या तथा पूजा त्रिकाले मोक्षदा स्मृता" इति कमलाकरः ॥ तत्रोदयात्पूर्वं निर्माल्यमपसार्य यथाकाले पूजारंभः ॥ येभ्यो माता० एवापित्रे विश्वदेवाय० इति पठन् घंटानादं कृत्वाचम्य प्राणानायम्य देश-कालादिसंकीर्तनांते श्रीमहाविष्णुपूजां करिष्ये इति पंचायतनपक्षे श्रीरुद्रविनायकसूर्य-शक्तिपरिवृतश्रीमहाविष्णुपूजां करिष्य इति संकल्प्यासनादि विधाय सहस्रशीर्षेति षोडशर्चस्य सूक्तस्य नारायणः पुरुषोनुष्टुप् अन्त्या त्रिष्टुप् ॥ न्यासे पूजायां च विनियोगः ॥ ततः प्रथमामृचं वामे करे । द्वितीयां दक्षिणे न्यसेत् । तृतीयां वामे पादे । चतुर्थीं दक्षिणे पादे । पंचमीं वामे जानुनि । षष्ठीं दक्षिणे । सप्तमीं वामकटौ । अष्टमीं दक्षिणे । नवमीं नाभौ । दशमीं हृदि । एकादशीं कंठे । द्वादशीं वामबाहौ । त्रयोदशीं दक्षिणे । चतुर्दशीं मुखे । पंचदशीमक्ष्णोः । षोडशीं मूर्ध्नि ॥" एवं देहे च देवे च न्यासं कुर्याद्विधानतः ॥ अन्त्याभिः पंचभिर्ऋग्भिर्हृदयाद्यंगपंचके ॥ कलशं शंखघंटे च पाद्यार्घ्याचमनीयकम् ॥ संपूज्य प्रोक्ष्य चात्मानं पूजासंभारमेव च ॥ ध्यायेदभिमतां विष्णुमूर्त्तिं संपूजयेत्ततः॥" प्रथमया पुरुषसूक्तस्य ऋचावाहनम् ॥ शालग्रामादौ आवाहनाभावान्मंत्रपुष्पं ऋगंते श्रीमहाविष्णवे श्रीकृष्णायेत्येवमभिमतमूर्त्तिं चतुर्थ्योद्दिश्य सर्वोपचारार्पणम्॥ पंचायतने तु श्रीविष्णवे शिवविनायकसूर्यशक्तिभ्यश्चेत्येवं यथोपास्यमुच्चारः ॥ नैवे-द्यादौ पार्थक्याभावे यथांशत इति वदेत् ॥ द्वितीययासनं दद्यात् ॥ तृतीयया पाद्यम् ॥ चतुर्थ्यार्घ्यम् ॥ पंचम्याचमनम् ॥ षष्ठ्या स्नानम् ॥ संभवे पंचामृत-स्नानान्याप्यायस्वेत्यादिमंत्रैः ॥ चंदनोशीरकर्पूरकुंकुमागुरुवासितजलैः सुवर्णघ-र्मानुवाकमहापुरुषविद्यापुरुषसूक्तनीराजनसामभिरभिषेकः ॥ सप्तम्या वस्त्रम् ॥ अष्टम्या यज्ञोपवीतम् ॥ नवम्या गंधम् ॥ दशम्या पुष्पाणि ॥ एकादश्या धूपम् ॥ द्वादश्या दीपम् ॥ " स्नाने धूपे च दीपे च घंटादेर्नादमाचरेत् ॥" त्रयो-दश्या नैवेद्यम्॥संभवे फलतांबूलदक्षिणाः नीराजनश्च॥ चतुर्दश्या नमनम्॥ पंचद-श्या प्रदक्षिणाः ॥ षोडश्या विसर्जनं पुष्पांजलिर्वा ॥ "स्नाने वस्त्रे च नैवेद्ये दद्या-दाचमनं तथा॥ दत्त्वा षोडशभिर्ऋग्भिः षोडशान्नस्य चाहुतीः ॥ सूक्तेन प्रत्यृचं

पुष्पं दत्त्वा सूक्तेन संस्तुयात् ॥ " ततः पौराणैः प्राकृतैश्च स्तुत्वा ॥ "शिरोमत्पादयोः कृत्वा बाहुभ्यां च परस्परम्॥प्रपन्नं पाहि मामीश भीतं मृत्युग्रहार्णवात् ॥" इति वदन्नमेत् ॥ निर्माल्यं देवदत्तं भावयित्वा शिरसि धारयेत् ॥ शंखोदकं शिरसि धृत्वा देवतीर्थं पूजांते वैश्वदेवांते वा शिरसि धार्यं पेयं च॥ तत्र क्रमः ॥ "विप्रपादोदकं पीत्वा विष्णुपादोदकं पिबेत् ॥ शालग्रामशिलातोयमपीत्वा यस्तु मस्तके ॥ प्रक्षेपणं च कुरुते ब्रह्महा स निगद्यते ॥ पात्रांतरेण वै ग्राह्यं न करेण कदाचन" इति कमलाकरः ॥ क्षालनेन एकस्यैव वस्त्रस्य प्रतिदिने दाने दोषो न॥ एवं सुर्णादिभूषणानामपि ॥ सुवर्णमययज्ञोपवीतेप्येवमाचारः ॥ एवं पूजायाः फलं स्कांदे ॥ " कामासक्तोथ वा क्रुद्धः शालग्रामशिलार्चनात् . ॥ भक्त्या वा यदि वाऽभक्त्या कलौ मुक्तिमवाप्नुयात् ॥ कथां यः कुरुते विष्णोः शालग्रामशिलाग्रतः ॥ वैवस्वतभयं नास्ति तथा च कलिकालजम् ॥ प्रायश्चित्तं हि पापानां कलौ पादोदकं हरेः ॥ धृते शिरसि पीते च सर्वास्तुष्यंति देवताः ॥ विष्णुमूर्ध्नि स्थितं पुष्पं शिरसा न वहेन्नरः ॥ " बौधायनोक्तो हरिहरयोः पूजाविधिः पराशरमाधवे ॥ मया तु शिवपूजाविधिः शिवरात्रिप्रकरणे द्वितीयपरिच्छेदे उक्तः इति नेहोच्यते ॥

## अथ पूजालोपे दोषः ।

कौर्मे ॥" यो मोहादथ वालस्यादकृत्वा देवतार्चनम् ॥ भुंक्ते स याति नरकं सूकरेष्वभिजायते ॥ " एवं देवं संपूज्य मातापितृप्रमुखान् गुरून्पूजयेत् ॥ " यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ " इति श्रुतेरिति माधवः ॥

## अथतृतीयेऽह्नो भागे जीविकाविचारः।

तृतीयभागे पोष्यवर्गार्थं धनार्जनम् ॥ यजनाध्ययनदानयाजनाध्यापनप्रतिग्रहाः षट् विप्रकर्माणि ॥ " षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका ॥ याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः ॥ " श्रीभागवते–"प्रतिग्रहं मन्यमानस्तपस्तेजोयशोनुदम् ॥ अन्याभ्यामेव जीवेत शिलैर्वा दोषदृक्तयोः " इति ॥ तथा–'वार्ता विचित्रा शालीनयायावरशिलोञ्छनम् ॥' विचित्रा वार्ता कृष्यादि ॥ शालीनमयाचितम् ॥ यायावरं प्रत्यहं धान्ययाच्ञा ॥ काणिशोपादानं कणोपादानं च शिलोञ्छनम् ॥ अत्रोत्तरोत्तरा प्रशस्ता॥ शिलोञ्छनं कलौ निषिद्धम् ॥ "कुसूलकुंभीधान्यो वा त्र्याहिकोश्वस्तनोपि वा ॥ " कुटुंबपोषणे द्वादशाहपर्याप्तधान्यः कुसूलधान्यः ॥ षडहपर्याप्तधान्यः कुंभीधान्यः ॥ न कुर्यात्कृषिवाणिज्यं सेवावृत्तिं तथैव च॥ ब्राह्मण्याद्धीयते तेन तस्मात्तानि विवर्जयेत्॥"इत्युक्तेर्वार्तावृत्ति-

त्तिरापद्विषया ॥ " पुत्रमांसं वरं भोक्तुं न तु राजप्रतिग्रहः " इति वाक्यमधर्म-वर्त्तिराजप्रतिग्रहविषयम् ॥

## अथापद्वृत्तिः पक्वान्नाभिक्षा च ।

वृद्धौ च मातापितरौ साध्वी भार्या सुतः शिशुश्चायाज्ययाजनशूद्रप्रतिग्रहादि-नापि पोषणीया इत्यप्यापदि ॥ शाकपयोदधिपुष्पजलकुशभूमयः कुलटाषंढपतितभिन्नान्नीचादप्ययाचितप्राप्ता ग्राह्याः ॥ " ब्रह्मचारी यतिश्चैव विद्यार्थी गुरुपोषकः ॥ अध्वगः क्षीणवृत्तिश्च षट् पक्वान्नस्य भिक्षुकाः ॥ " शूद्रस्य द्विजशुश्रूषावृत्तिः ॥ आपदि कृष्यादिः ॥ चतुर्थभागे मध्याह्नस्नानम् ॥ प्रातर्गोमयस्नानं मध्याह्ने मृत्तिकास्नानमनयोर्विधिः प्रायश्चित्ते उक्तः । शेषविधिः प्रातःस्नानवत्॥ ब्रह्मयज्ञांगतर्पणात्प्राक् वस्त्रं न निष्पीड्यमिति विशेषः॥ततो धृतपुंड्रो मध्याह्नसंध्यां कुर्यात् ॥

## अथ ऋग्वेदिनां मध्याह्नसंध्या ।

"अध्यर्धयामादासायं संध्या माध्याह्निकीष्यते" तत्र विशेषः ॥ सूर्यश्चेति स्थाने आपः पुनंत्विति मन्त्राचमनम् ॥ आपः पुनंत्वित्यस्य नारायणयाज्ञवल्क्य आपः पृथिवी ब्रह्मणस्पतिरष्टौ मन्त्राचमने विनियोगः॥ ॐ " आपः पुनंतु पृथिवीं पृथिवी पूता पूनातु माम् ॥ पुनंतु ब्रह्मणस्पतिर्ब्रह्मपूता पुनातु माम् ॥ यदुच्छिष्टमभोज्यं यद्वा दुश्चरितं मम॥ सर्वं पुनंतु मामापोसतां च प्रतिग्रह ॅस्वाहा" इति पिबेत्॥ अघमर्षणांते तिष्ठन्॥ हंसः शुचिषदित्यस्य गौतमः सूर्यो जगती ॥सूर्यार्घ्यदाने विनियोगः॥ ॐहंसः शुचिष०एकार्घ्यम्॥अर्घ्यान्ते उपस्थानम्॥ऊर्ध्ववाहुः॥ उदुत्यमिति त्रयोदशर्चस्य काण्वः प्रस्कण्वः सूर्यो गायत्री॥अन्त्याश्चतस्रोनुष्टुभः॥ सूर्योपस्थाने०॥ केचित् चित्रं देवानामिति षड्भिरप्युपतिष्ठंते शेषमुपस्थानवर्ज्यं प्रातःसंध्यावत् ॥ रात्रौ मध्याह्नसंध्यायामाकृष्णेनेत्यर्घ्यदानम् ॥ गायत्र्या प्रायश्चित्तार्थं द्वितीयं दत्त्वा हविष्पांतमिति पंचचोपस्थानम् ॥

## अथ तैत्तिरीयाणाम् ।

आपः पुनंत्वित्यपः पीत्वा दधिक्राव्णेति पूर्ववत्कृत्वा सूर्यायैकमर्घ्यं गायत्र्या दत्त्वोर्ध्ववाहुस्तिष्ठन्नुपतिष्ठेत् ॥ उद्वयं० १ उदुत्यं जातवेदसं० १ चित्रं देवाना० १ तच्चक्षुर्देवहितं पुरस्तात् १ य उदगान्महतो० ॥ ततो जपादि उपस्थानवर्ज्यं प्राग्वत् ॥

## अथ कातीयानाम् ।

आपः पुनंत्विति प्राग्वत्॥ गायत्र्यैकार्घ्यम् ॥ उद्वयमित्यादि चतुर्भिरुपस्थानम् ॥ जपांतेऽशक्तस्य पूर्वोक्तैर्विभ्राडित्यनुवाकादिभिरुपस्थानं शेषं प्राग्वत् ॥

## अथ ब्रह्मयज्ञः ।

स च प्रातर्होमोत्तरं वा मध्याह्नसंध्योत्तरं वा वैश्वदेवांते वा सकृदेव कार्यः ॥ भट्टोजिदीक्षितीये तु प्रातराहुतेरनंतरकालः शाखांतरविषयः ॥ आश्वलायनैस्तु मध्याह्नसंध्योत्तरमेवानुष्ठेय इत्युक्तम् ॥

## अथ बह्वृचां ब्रह्मयज्ञप्रयोगः ।

शुष्कं वासस्तदभावे आर्द्रं त्रिर्विधुन्वन्परिधायाचम्य प्राणानायम्य श्रीपरमेश्वरप्रीत्यर्थं ब्रह्मयज्ञं करिष्ये ॥ तदंगतया देवऋष्याचार्यतर्पणं करिष्ये ॥ मृतपितृकैः पितृतर्पणं च करिष्ये ॥ इति संकल्प्य दर्भेषु दर्भपाणिः प्राङ्मुख एवोपविश्य वामजंघोपरि मूलदेशे दक्षिणपादं निधायाथ वा वामपादांगुष्ठोपरि दक्षिणपादांगुष्ठं निधायैवोपस्थं कृत्वा दक्षिणजानुस्थे वामे करे उत्ताने प्रागग्रांगुलौ प्रागग्रे द्वे पवित्रे धृत्वा दक्षिणकरेण तथैव संपुटीकृत्य द्यावापृथिव्योः संधिमीक्षमाणो निमीलिताक्षो वौंकारव्याहृतीः सकृदुच्चार्य गायत्रीं पच्छोर्धर्चशः सर्वामनवानामिति त्रिर्जपेत् ॥ ततोग्निमीळ इंति सूक्तं पठित्वा संहिताब्राह्मणषडंगानि एकं समाप्यापरमित्यध्यायं सूत्रमृचं वा यथाशक्ति क्रमशः पठेत् ॥ मन्त्रब्राह्मणादीनि भागशः सर्वाणि यथाशक्ति प्रतिदिनं पठेदिति केचित् ॥ एवं चतुर्वेदाध्यायी क्रमशश्चतुर्वेदान् भागशः सर्वानेव वा ऋग्वेदपूर्वकान् पठेत् ॥ एकैकशाखाध्यायी तु स्वशाखामेव ॥ शाखाध्ययनाभावे सूक्तमृचं वा पठित्वैकं यजुः साम चोपनिषदश्चेतिहासपुराणादींश्च पठेत् ॥ पुरुषसूक्तमुक्त्वा नमो ब्रह्मणे नमो अस्त्वग्नय इत्यृचं त्रिः पठेत् ॥ नात्र ऋष्यादिस्मरणम् ॥ विद्युदसीत्यादेराद्यंते पाठस्तैत्तिरीयविषयः ॥ उपविश्य पाठाशक्तास्तिष्ठन्व्रजन् शयानो वा पठेदित्याश्वलायनः ॥ अनध्यायेष्वल्पं पठेत् ॥

## अथ तर्पणम् ।

तत्र सव्येन देवतीर्थेन दर्भाग्रैर्देवतर्पणम् ॥ तद्यथा ॥ साक्षतजलैर्देवर्षितर्पणम् ॥ सतिलजलैराचार्यपितृतर्पणम् ॥ प्रजापतिस्तृप्यतु ॥ ब्रह्मातृ० ॥ वेदास्तृप्यंतु ॥ देवास्तृ० ॥ ऋषयस्तृ० ॥ सर्वाणि छंदांसि० ॐकारस्तृ० वषट्कारस्तृ० व्याहृतयस्तृ० सावित्री० यज्ञास्तृ० द्यावापृथिवी तृप्यताम् ॥ अन्तरिक्षं० अहोरात्राणि तृप्यंतु० सांख्यास्तृ० सिद्धास्तृ० समुद्रास्तृ० नद्यस्तृ० गिरयस्तृ० क्षेत्रौषधिवनस्पतिगंधर्वाप्सरसस्तृ० नागास्तृ० वयांसि० गावस्तृ० साध्यास्तृ० विप्रास्तृ० यक्षास्तृ० रक्षांसि० भूतानि० एवमन्तानि तृप्यंतु० ॥ २९ ॥ अथ ऋषयः ॥ निवीती ॥ कनिष्ठिकामूलेन दर्भमध्यैः ॥ शतर्चिनस्तृ० माध्यमास्तृ० गृत्समदस्तृ० विश्वामित्रस्तृ० वामदेवस्तृ० अत्रिस्तृ० भरद्वाजस्तृ० वसिष्ठस्तृ० प्रगाथास्तृ० पावमा-

न्यस्तृ० क्षुद्रसूक्तास्तृ० महासूक्तास्तृ० ॥ १२ ॥ एकत्वद्वित्ववहुत्वेषु तृप्यतु तृप्यतां तृप्यंत्विति यथायथं वदेत् ॥ अथ प्राचीनावीती ॥ पितृतीर्थेन द्विगुणीकृतदर्भ-मूलाग्रैः ॥ सुमंतुजैमिनिवैशंपायनपैलसूत्रभाष्यभारतमहाभारतधर्माचार्यास्तृप्यंतु ॥ जानंतिवाहविगार्ग्यगौतमशाकल्यबाभ्रव्यमांडव्यमांडूकेयास्तृप्यंतु ॥ गर्गीवाचक्नवी तृ० वडवाप्रातीथेयी० सुलभामैत्रेयी० कहोळं तर्प० कौषीतकं० महाकौषीतकं० पैंग्यं० महापैंग्यं० सुयज्ञं० सांख्यायनं० ऐतरेयं० महैतरेयं० शाकलं० वाष्कलं० सुजातवक्त्रं० औदवाहिं० महौदवाहिं० सौजामिं० शौनकं० आश्वलायनं० ये चान्ये आचार्यास्ते सर्वे तृप्यंतु ॥ २३ ॥ ततो मृतपितृकः पितृत्रयीं मातृत्रयीं सपत्नीकमा-तामहत्रयीं पत्न्याद्येकोद्दिष्टगणांश्च महालयप्रकरणोक्तान्मृतांस्तर्पयेत् ॥ " संबंधं प्रथमं ब्रूयान्नामगोत्रमनन्तरम् ॥ पश्चाद्रूपं विजानीयात्क्रम एष सनातनः " ॥ एकैकमंजलिं देवेभ्यो द्वौ द्वौ ऋषिभ्यस्त्रींस्त्रीन्पितृभ्य इति संख्याविशेषः ॥ आश्व-लायनानां वैकल्पिकः तत्सूत्रे संख्याऽनुक्तेः ॥ येषां सूत्रे संख्योक्तिस्तेषां नित्य इति माधवः ॥ मातृत्रयीमिन्नस्त्रीभ्य एकांजलिः ॥ एतावद्भिस्तृततर्पणाशक्तौ ॥ " आब्रह्मस्तंबपर्यंतंदेवर्षिपितृमानवाः ॥ तृप्यंतु पितरः सर्वे मातृमातामहा-दयः ॥ अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम् ॥ आब्रह्मभुवनाल्लोकादिदम-स्तु तिलोदकम् " इति त्रिस्त्रिर्दद्यात् ॥ ततो " ये केचास्मत्कुले जाता अपुत्रा गोत्रिणो मृताः ॥ ते गृह्णंतु मया दत्तं वस्त्रनिष्पीडनोदकम् " इति परिधानवस्त्रं भूमौ निष्पीड्य दद्यात् ॥ अत्र बह्वृचानां प्राचीनावीती ॥ अन्येषां निवीती ॥ इदं गृहे निषिद्धम् ॥ ब्रह्मयज्ञो ग्रामाद्बहिरुदकसमीपे विहितः ॥ ग्रामे मनसा-धीयीत ॥ सव्यान्वारब्धदक्षिणेन वा अंजलिना वा तर्पणम् ॥ " तर्पणं बर्हि-षाच्छन्ने स्थले कार्यं तु नो जले ॥ पात्राद्वा जलमादाय शुभे पात्रांतरे क्षिपेत् ॥ जलपूर्णेथवा गर्ते न स्थले तु विवर्हिषि ॥ हेमरौप्यताम्रकांस्यमये पात्रे न मृन्मये ॥ यत्राशुचिस्थलं तत्र तर्पणं स्यान्नदीजले ॥ अनामिकाधृतं हेम तर्जन्यां रौप्यमेव च ॥ कनिष्ठिकाधृतं खड्गं तेन पूतो भवेन्नरः ॥ अंगुल्यग्रे तीर्थं दैवं स्वल्पांगुल्योर्मूले कायम् ॥ मध्येंगुष्ठांगुल्योः पित्र्यं मूले त्वंगुष्ठस्य ब्राह्मम् ॥ " उद्धृतजलेन पितृतर्पणे तिलान्संमिश्रयेज्जले ॥ अनुद्धृतजलेन तर्पणे वामहस्ते तिला ग्राह्याः ॥ तिलतर्पणं गृहे निषिद्धम् ॥ रविभृगुवारे सप्तम्यीनंदासु कृत्तिकामघाभरणीषु मन्वादौ युगा-दौ च ॥ पिंडदानं मृदा स्नानं न कुर्यात्तिलतर्पणम् ॥ पित्रोः श्राद्धदिने नित्यतर्पणे तिला निषिद्धाः ॥ पर्वादिने निषिद्धतिथिवारादिष्वपि तिलतर्पणम् ॥ " विकिरे पिंडदाने च तर्पणे स्नानकर्मणि ॥ आचांतः सन्प्रकुर्वीत दर्भसंत्याजनं बुधः " दर्भ-त्यागमंत्रस्तु ॥ " येषां पिता न च भ्राता न पुत्रो नान्यगोत्रिणः ॥ ते सर्वे तृप्तिमायांतु मयोत्सृष्टैः कुशैस्तथा " इति ॥

## अथ हिरण्यकेशीयानाम् ।

संकल्पादित्रिर्गायत्रीजपांतं प्राग्वत् ॥ तत इषेत्वोर्जेत्यध्यायमनुवाकं वा यथाशक्ति पठित्वा ऋचं सामषडंगेतिहासपुराणादीनि पठित्वा नमो ब्रह्मण इत्येतया त्रिः परिदधाति ॥ अथ तर्पणम् ॥ तच्च तैत्तिरीयाणां ब्रह्मयज्ञांगं न भवति ॥ तेन ब्रह्मयज्ञोत्तरं व्यवहितकालेपि ब्रह्मयज्ञात्प्रागपि भवति ॥ एवं काण्वमाध्यंदिनानापि ॥ अतो देवर्ष्याचार्यपितृतृप्तिद्वारा श्रीपरमेश्वर० देवर्ष्याचार्यपितृतर्पणं करिष्ये इति पृथगेव संकल्पः॥ पूर्ववदेकैकांजलिना देवतर्पणम्॥ ब्रह्माणं तर्पयामि ॥ प्रजापतिं त० बृहस्पतिं त०अग्निं त० वायुं त०सूर्यं त० चन्द्रमसं त०नक्षत्राणि० इन्द्र ५ राजानं० यम ५ राजानं० वरुण ५ राजानं० सोम ५राजानं० वैश्रवण ५ राजानं० वसून्० रुद्रान्० आदित्यान्० विश्वान्देवान्० साध्यान्० ऋभून्० भृगून्० मरुतः० अथर्वणः० अंगिरसस्तर्पयामीति ॥ निवीती उदङ्मुखः ॥ विश्वामित्रं० जदमग्निं० भरद्वाजं० गौतमं० अत्रिं० वसिष्ठं० कश्यपं० अरुंधतीं० अगस्त्यं० कृष्णद्वैपायनं० जातूकर्ण्यं० तरुक्षं० तृणबिंदुं० वर्मिणं० वरूथिनं० वाजिनं० वाजिश्रवसं० सत्यश्रवसं० सुश्रवसं० सुतश्रवसं० सोमशुष्मायणं० सत्त्ववंतं० बृहदुक्थ्यं त० वामदेवं० वाजिरत्नं० हर्यज्वायनं० उदमयं० गौतमं० ऋणंजयं० ऋतंजयं० कृतंजयं० धनंजयं० बभ्रुं० त्र्यरुणं० त्रिवर्षं० त्रिधातुं० शिबिंतुं० पराशरं० विष्णुं० रुद्रं० स्कंदं० काशीश्वरं० ज्वरं० धर्मं० अर्थं० कामं० क्रोधं० वसिष्ठं० इंद्रं० त्वष्टारं० कर्तारं० धर्तारं० धातारं० मृत्युं० सवितारं० सावित्रीं० ऋग्वेदं० यजुर्वेदं० सामवेदं० अथर्ववेदं० इतिहासपुराणं० ६१ इति द्वौ द्वावंजली ॥ प्राचीनावीती दक्षिणामुखः ॥ वैशंपायनं त० पिलिंगुं त० तित्तिरिं त० उखं त० आत्रेयं पदकारं० कौंडिन्यं वृत्तिकारं० सूत्रकारान्० सत्याषाढं० प्रवचनकर्तॄन्० आचार्यान्० ऋषीन्० वानप्रस्थान्० ऊर्ध्वरेतसः० एकपत्नीस्तर्पयामीति त्रींस्त्रीनंजलीनिति विशेषः ॥ शेषं पितृतर्पणादि सर्वं प्रागुक्तमेव ॥

## अथापस्तंबादीनाम् ।

ब्रह्मादयो ये देवास्तां० सर्वान्देवां० सर्वान्देवगणान्० ॥ सर्वा देवपत्नीः० ॥ सर्वान्पुत्रां० सर्वान्पौत्रां० भूर्देवां० भुवर्देवां० सुवर्देवां० भूर्भुवःसुवर्देवां० कृष्णद्वैपायनादयो ये ऋषयः ॥ तानृषीं० सर्वानृषीं० सर्वानृषिगणान्० सर्वा ऋषिपत्नीः० सर्वानृषिपुत्रां० सर्वानृषिपौत्रां० । ६ भूर्ऋषीं० ४१० एवं सोमः पितृमान्यमोंगिरस्वानग्निष्वात्ताः० ॥ तान्पितॄनित्यादयो दश पितृपर्याया ऊह्याः ॥ एवमन्येषामप्यूह्यम् ॥

## अथ कात्यायनानाम् ।

प्राङ्मुख आचम्य पवित्रे धृत्वा प्राणानायम्य श्रीपरमे०र्थं ब्रह्मयज्ञेन यक्ष्ये ॥ दर्भानंजलौ धृत्वा दक्षिणजानौ कृत्वा सूत्रांतराद्गायत्रीं त्रिरुच्चार्य ॥ इषेत्वेत्यादि आरभ्य संहितां ब्राह्मणं च पूर्वोक्तरीत्या पठेत् ॥ अंते उपनिषदितिहासपुराणादि पठित्वा अंते ॐ स्वस्तीति वदेत् सूत्रांतरोक्तत्वात् ॥ नमो ब्रह्मण इति त्रिः पठंति केचित् ॥ अथ तर्पणम् ॥ एतच्च प्रातःसंध्योत्तरं वा मध्याह्ने ब्रह्मयज्ञोत्तरं वा सकृदेव कार्यम् ॥ ब्रह्मयज्ञस्य वैकल्पिकं कालत्रयमुक्तम् ॥ तत्र देवर्षिपितृतर्पणं करिष्ये इति संकल्प्यादौ पूर्वोक्तधर्मेण देवतर्पणम् ॥ भूमौ ताम्रादिपात्रे वा दर्भानास्तीर्य ॥ विश्वेदेवास आगतेति देवानावाह्य विश्वेदेवाः शृणुतेममितिजपित्वा त्रीन्प्रागग्रान्दर्भान्धृत्वा देवतीर्थेन ॥ ॐ ब्रह्मातृप्यताम् ॥ विष्णुस्तृप्यताम् ॥ रुद्र० प्रजापति० देवास्तृ० छंदा०सि० वेदा० ऋषयः० पुराणाचार्या०गंधर्वा० इतराचार्या० संवत्सरः सावयव० ॥ देव्यस्तृप्यंताम् ॥ अप्सरस० देवानुगा० नागा० सागरा० पर्वता० सरित० मनुष्या० यक्षा० रक्षांसि० पिशाचा० सुपर्णा० भूतानि० पशव० वनस्पतय० ओषधय० भूतग्रामचतुर्विधस्तृप्यतामिति ॥ सर्वत्र सप्रणवं प्रथमांतं नामोच्चार्य तर्पयेत २९ सप्तऋषय इति मंत्रेणर्षीनावाह्य निवीती द्विर्द्विः ॥ सनकस्तृप्यतु ॥ सनंदन० सनातन० कपिलस्तृ० आसुरि० वोढुस्तृ० पंचशिख० अपसव्यम् ॥ उशंतस्त्वेति पितॄनावाह्यायंतु नः पितर इति जपित्वा पितृतीर्थेन त्रिस्त्रिः ॥ कव्यवाडनलस्तृप्यताम् ॥ सोम० यम० अर्यमा० अग्निष्वात्ताः पितरस्तृप्यंताम् ॥ सोमपाः पितरः० बर्हिषदः० यमाय नमः तर्पयामि ॥ धर्मराजाय० मृत्यवे० अंतकाय० वैवस्वताय० कालाय० सर्वभूतक्षयाय० औदुंबराय० दध्नाय० नीलाय० परमेष्ठिने० वृकोदराय० चित्राय० चित्रगुप्ताय० २१ यमतर्पणं वैकल्पिकं सूत्रे एके इत्युक्तेः ॥ जीवत्पितृकस्य मणिबंधपर्यंतमपसव्यं सर्वत्र ॥ ततो मृतपितृकः ॥ पित्रादित्रयीं मात्रादित्रयीं च तर्पयित्वा ॥ उदीरतामिति नवभिर्ऋग्भिस्तर्पणं जलस्थाने अंजलिना धारां निषिंचेत् ॥ उदीरतां० १ अंगिरसोनः पितरो०२ आयंतु नः० ३ऊर्जवहंतीरमृतं० ४ पितृभ्यः स्वधा नमः ५ ये चेह० ६ मधुवाता इति तिस्र इति ९ प्रत्यृचं प्रत्येकं कुर्यात्तृप्यध्वमिति च त्रिः सिंचेत् ॥ ततो नमो वः पितर इत्यष्टौ यजूंषि पठित्वा मातामहादीनेकोद्दिष्टगणांश्च तर्पयेत् ॥ देवा गातु विद इति विसर्जयेत् ॥ स्नानवस्त्रनिष्पीडनोदकदानादि प्राग्वत् ॥ प्रातर्होमोत्तरं देवतार्चनं न कृतं चेच्चतुर्थभागे ब्रह्मयज्ञोत्तरं कार्यम् ॥ १ ॥

## अथ पंचमभागकृत्यम् ।

"वैश्वदेवः प्रकर्तव्यः पंचसूनापनुत्तये ॥ कंडणीपेषणीचुल्लीजलकुंभोपमार्जनी इतिपंचहिंसास्थानानि पंचसूनाः ॥ वैश्वदेवस्य प्रातरेव प्रारंभो न त्वग्निहोत्रादिवत्सायं तेन प्रातः सायं वैश्वदेवेत्यादिरेव संकल्पः ॥ पंचमहायज्ञा अहरहः कर्तव्याः ते च ब्रह्मयज्ञदेवयज्ञभूतयज्ञपितृयज्ञमनुष्ययज्ञाख्याः ॥ तत्र ब्रह्मयज्ञ उक्तः ॥ बह्वृचादीनां वैश्वदेवो देवयज्ञादियज्ञत्रयरूपः ॥ मनुष्ययज्ञस्तु मनुष्येभ्योन्नदानम् ॥ "गृहपक्वहविष्यान्नैस्तैलक्षारादिवर्जितैः ॥ जुहुयात्सर्पिषाभ्यक्तैर्गृह्येग्नौ लौकिकेपि वा ॥ यस्मिन्नग्नौ पचेदन्नं तस्मिन्होमो विधीयते " ॥ वैश्वदेवांतर्गतपितृयज्ञेनैव नित्यश्राद्धसिद्धेर्न नित्यश्राद्धार्थविप्रभोजनम् ॥ अनेनैव दर्शश्राद्धस्यापि सिद्धया दर्शश्राद्धमप्यशक्तैः संवत्सरमध्ये सकृदेव कार्यमिति भट्टोजीये ॥ सूतके पंचमहायज्ञानां लोप इत्युक्तम् ॥ स चायं वैश्वदेव आत्मसंस्कारार्थोन्नसंस्कारार्थश्च ॥ तेनाविभक्तानां पाकैक्ये पृथग्वैश्वदेवो न ॥ विभक्तानां तु पाकैक्येपि हविष्यांतरेण पृथगेव ॥ अविभक्तानां पाकभेदे पृथक् वैश्वदेवः कृताकृत इति भट्टोजीये ॥ पाकासंभवे एकादश्यादौ तंडुलैर्वा पयोदधिघृतफलोदकादिभिर्वा कार्यः ॥ "हस्तेनान्नादिभिः कुर्यादद्भिरंजलिना जले ॥ कोद्रवं चणकं माषं मसूरं च कुलित्थकम् ॥ क्षारं च लवणं सर्वं वैश्वदेवे विवर्जयेत् ॥" प्रवसता गृहे पुत्रर्त्विगादिद्वारा वैश्वदेवः कारयितव्यः ॥ गृहे कर्त्रंतराभावे प्रवासे स्वयं कार्यः वैश्वदेवो बह्वृचैस्तैत्तिरीयेश्च दिवारात्रौ चेति द्विवारं कार्यः ॥ अशक्तैस्त्वेककाले एव द्विरावृत्त्या सह वा कार्यः ॥ बह्वृचतैत्तिरीययोर्लौकिकाग्नौ पाको वैश्वदेवश्चेति प्रायेणाचारः ॥

## अथ प्रातः सायं वैश्वदेवस्य सहकरणपक्षे तंत्रप्रयोगः ।

तत्र वैष्णवैर्भगवते षोडशोपचारेषु दीपांतानुपचारान्समर्प्य सर्वान्नात्पुरुषाहारपर्याप्तं नैवेद्यं समर्प्य शेषान्नेन वैश्वदेवः कार्यः ॥ वैष्णवभिन्नैस्तु वैश्वदेवांते तच्छेषेण नैवेद्यः कार्यः ॥ "विष्णोर्निवेदितान्नेन यष्टव्यं देवतांतरम् ॥ पितृभ्यश्चापि तदेयं तदानंत्याय कल्पते" इत्यादिवचनानां वैष्णवविषयकत्वस्य निबंधकारैरुक्तत्वात् ॥

## अथ वैष्णवस्वरूपम् ।

अत्र वैष्णवा नारायणाष्टाक्षरादिवैष्णवमंत्रदीक्षोपदेशजपवंतो मुख्याः ॥ 'उपदेशः कलौ युगे' इति स्मृत्योपदेशमात्रस्यापि दीक्षासमफलत्वात् ॥ गौणाश्च पारंपर्यागतारुणोदयविद्धैकादश्यनुपवासशुक्लकृष्णैकादश्युपवासादि यत्किंचिद्धर्ममात्रपरा मंत्रोपदेशादिरहिताः ॥ ननु "पांचरात्राद्यागमोक्तदीक्षां प्राप्तो हि वैष्णवः"

इत्युक्तेः किंचिद्धर्ममात्रानुष्ठानेन कथं वैष्णवत्वमिति चेत् ॥ गायत्र्यध्ययनादिक्षत्रियवैश्यसाधारणधर्मवतां याजनाध्यापनप्रतिग्रहरूपासाधारणधर्मशून्यानां पित्रादिपरंपरया वैश्यादिवृत्तिपराणामप्यव्यभिचरितैकगोत्रत्वादि यत्किंचिद्ब्राह्मणधर्ममात्रेण यथा ब्राह्मणत्वं तदुचितसूतकाद्याचारश्च तथा कलियुगे किंचिद्धर्मेणापि वैष्णवत्वं तदुचिताचारश्च युज्यते ॥ क्षत्रियाणां हि पुरोहितभेदेन गोत्रभेदस्तेन यदुवंशेषु परस्परं विवाहो नैवं ब्राह्मणेष्विति स्पष्टम् ॥ एवं श्राद्धेपि नैवेद्यं समर्प्य पितृभ्योन्ननिवेदनं ज्ञेयम् ॥

## अथ ऋग्वेदिवैश्वदेवप्रयोगः ।

ममात्मान्नसंस्कारपंचसूनाजनितदोषपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं प्रातर्वैश्वदेवं सायं वैश्वदेवं च सह तंत्रेण करिष्ये ॥ कुंडे स्थंडिलादौ वा पचनाग्निं व्याहृतिभिः पावकनामानं प्रतिष्ठाप्य ॥ चत्वारिशृंगेति ध्यात्वा परिसमुह्य पर्युक्ष्य विश्वानिन इत्यर्चनादि विधाय घृताक्तमन्नमग्नावधिश्रित्य प्रोक्ष्योद्वास्याग्नेः पश्चान्निधाय त्रिधा विभज्य प्रथमं भागं देवेभ्यो जुहुयात् ॥ तद्यथा हृदि सव्यं करं निधायोत्तानहस्तेन सूर्याय स्वाहा सूर्यायेदं न मम ॥ प्रजापतये० सोमाय वनस्पतये० अग्नीषोमाभ्यां० इंद्राग्निभ्यां० द्यावापृथिवीभ्यां० धन्वंतरये० इंद्राय० विश्वेभ्यो देवेभ्यः० ब्रह्मणे० इति दश प्रातर्वैश्वदेवाहुतयः ॥ अथ सायं वैश्वदेवीयाः ॥ अग्नये स्वाहेति हुत्वा प्रजापतय इत्यादिपुनर्नव जुहुयात् ॥ एवं विंशत्याहुतीर्हुत्वा प्रायश्चित्तार्थं व्यस्तसमस्तव्याहृतिभिर्हुत्वा न हुत्वा वा परिसमूहनयर्युक्षणे कुर्यात् ॥ ॐ चम इत्युपतिष्ठेत् ॥ इति देवयज्ञः ॥

## अथ बलिहरणाख्यो भूतयज्ञः ।

द्वितीयभागादृहीत्वा शुद्धायां भूमौ सूर्याय स्वाहा ॥ सूर्यायेदं न ममेत्येवं दशाहुतीः प्राक् संस्था निरंतरा हुत्वा मध्येंतरालं त्यक्त्वा ॥ अद्भ्यः स्वाहा ओषधिवनस्पतिभ्यः० गृहाय० गृहदेवताभ्यः० वास्तुदेव इति प्राक्संस्था हुत्वा ॥ अद्य आहुतेः पश्चात् इंद्राय० तदुत्तरे इंद्रपुरुषेभ्यः अंतरालस्य दक्षिणे यमाय० तदुत्तरे यमपुरुषेभ्यः ब्रह्मण आहुतेः प्राक् ॥ वरुणायः० तदुत्तरे वरुणपुरुषेभ्यः० अन्तरालस्योत्तरे सोमाय० तदुत्तरे सोमपुरुषेभ्यः० अन्तराले ब्रह्मणे ब्रह्मपुरुषेभ्यः० विश्वेभ्यो देवेभ्यः० सर्वेभ्यो भूतेभ्यः० दिवाचारिभ्यः सोमपुरुषोत्तरे रक्षोभ्यः० एवमेव सूर्यस्थाने प्रथममग्नये हुत्वा प्रजापतय इत्यादि पूर्ववत् ॥ सायं वैश्वदेवसंबंधि द्वितीयबलिहरणं कुर्यात् ॥ तत्र दिवाचारिभ्य इत्यस्य स्थाने नक्तंचारिभ्यः स्वाहेति जुहुयादितिविशेषः ॥ इति भूतयज्ञः ॥ प्राचीनावीती तृतीयभागादादाय स्वधा पितृभ्यः इति यमबलेर्दक्षिणतो दत्त्वा पितृभ्य इदं न ममेति त्यक्त्वा द्वितीयबलेर्दक्षिणतः द्वितीयपितृयज्ञमेवं

कुर्यात् ॥ इति पितृयज्ञः ॥ अपरे चक्राकारं बलिमाहुः "बलावनुद्धृतेनाद्यान्नोद्धरेच्च स्वयं बलिम्॥" "ततो गृहांगणे भूमावप आसिच्य॥" "ऐंद्रवारुणवायव्यां याम्यां नैर्ऋतिकाश्च ये॥ ते काकाः प्रतिगृह्णंतु भूम्यां पिंडं मयोज्झितम्" इति पितृयज्ञशेषेण दत्त्वा "वैवस्वतकुले जातौ द्वौ श्यामशबलौ शुनौ ॥ ताभ्यां पिंडो मया दत्तो रक्षेतां पथि मां सदा॥" 'ये भूताः प्रचरंति०' इति द्वयं भूतयज्ञशेषेण दद्यात् ॥ ये भूता इति मंत्रे तंत्रेण वैश्वदेवप्रयोगे दिवा नक्तं बलिमिति पाठः॥ अह्नि रात्रौ च पृथक् प्रयोगे दिवा बलिमिच्छंतो नक्तं बलिमिच्छन्त इति विभागेन पाठः ॥ प्रक्षालितपाणिपाद आचम्य गृहं प्रविश्य शांता पृथिवीत्यादि जपित्वा विष्णुं स्मृत्वा कर्मार्पयेत ॥

## अथ मनुष्ययज्ञः ।

अतिथिभोजनपर्याप्तं वा षोडशग्रासमितं वा ग्रासचतुष्टयं वा ग्रासमितं वान्नं सनकादिमनुष्येभ्यो हंत इदं न ममेति दद्यात् ॥ बहुषु भिक्षुकेष्वागतेष्वशक्तेन त्रिभ्यो ग्रासत्रयं देयम् ॥ अथ तैत्तिरीयाणाम् ॥ श्राद्धदिने भिन्नपाकेन्नादौ वैश्वदेव देवयज्ञादिचतुष्टयं च भवति ॥ अपरे आदौ वैश्वदेवांते पंचमहायज्ञा इत्याहुः ॥ "याजुषाः सामगाः पूर्वं मध्ये कुर्वंत्यथर्वणाः ॥ बह्वृचाः श्राद्धशेषेण तत्राप्यादौ तु साग्निकाः ॥ " स्वर्गपुष्ट्यर्थमात्मसंस्कारार्थं प्रातः सायं वैश्वदेवौ तंत्रेण करिष्ये ॥ औपासनाग्निं पचनाग्निं वा प्रतिष्ठापितमौपासनहोमवत् परिसमुह्य परिषिच्यान्नमग्नावधिश्रित्य प्रोक्ष्योद्वास्याभिघार्याग्निं संपूज्याऽन्नं त्रेधा विभज्य हस्तेन जुहुयात् ॥ अग्नये स्वाहा ॥ विश्वेभ्यो देवेभ्यः० ध्रुवाय भूमाय० ध्रुवक्षितये० अच्युतक्षितये० अग्नये स्विष्टकृते० परिसमुह्य पर्युक्ष्याग्नेः पश्चादेकत्रैव देशे व्यंजनाकारश्चकाकारो वा बलिः ॥ तत्र देवताः ॥ धर्माय स्वाहा ॥ धर्मायेदं० अधर्माय० अद्भ्यः० ओषधिवनस्पतिभ्यः० रक्षोदेवजनेभ्यः० गृह्याभ्यः० अवसानेभ्यः० अवसानपतिभ्यः० सर्वभूतेभ्यः० कामाय० अंतरिक्षाय० यदेजति जगति यच्च चेष्टति नाम्नो भागो यन्नाम्ने स्वाहा ॥ नाम्न इदं० केचिद्धायव इदमिति त्यागमाहुः ॥ पृथिव्यै स्वाहा ॥ अंतरिक्षाय० दिवे० सूर्याय० चंद्रमसे० नक्षत्रेभ्य० इंद्राय० बृहस्पतये० प्रजापतये० ब्रह्मणे० सर्वान्त्सकृत्परिषिच्य ॥ पृथक् पृथक् परिषेचनपक्षे ॥ "द्वावेकं द्वे च चत्वारि प्रत्येकं त्रीणि चैव हि ॥ पृथिव्यादिदशस्वेकमत ऊर्ध्वं पृथक् क्रमात्" इति ज्ञेयम् ॥ प्राचीनावीती तदक्षिणतः स्वधा पितृभ्यः स्वाहा एतदुत्तरत उपवीती नमो रुद्राय पशुपतये स्वाहा ॥ पितृरुद्रबली पृथक् परिषिंचेत् ॥ इति वैश्वदेवः ॥

## अथ देवयज्ञादिचतुष्टयम् ।

देवयज्ञेन यक्ष्ये इति संकल्प्याग्निं परिषिच्य देवेभ्यः स्वाहेत्यग्नौ हुत्वोत्तरपरिषेकः ॥ प्राचीनावीती पितृयज्ञेन यक्ष्ये दक्षिणतो भूमौ पितृभ्यः स्वधास्तु इति

दत्त्वा त्यक्त्वा परिषिच्य ॥ यज्ञोपवीती अपः स्पृष्ट्वा ॥ भूतयज्ञेन यक्ष्ये ॥ भूतेभ्यो नम इति भूमौ दत्त्वा ॥ परिषिच्य ॥ निवीती मनुष्ययज्ञेन यक्ष्ये ॥ उक्तप्रमाणमन्नं मनुष्येभ्यो हंत इति दद्यात् ॥ सर्वयज्ञेष्वाद्यंतयोः क्रमेण विद्युदसि वृष्टिरसीति मंत्रयोः पाठः प्रायेणैषाम् ॥ बलिशिष्टमन्नं ये भूताः प्रचरंतीति गृहांगणे गत्वाकाशे उत्क्षिपेत् ॥ ततो यथाचारं श्ववायसादिबलिः ॥

## अथ कातीयानाम्।

तत्र साग्निकानामेकपाकेनैव श्राद्धदिने आदौ वैश्वदेवः ॥ अन्येषामते ॥ आवसथ्योल्मुकं महानसे कृत्वा तत्र पाकं विधाय महानसस्थांगारान् गृह्याग्नौ निधाय पाकादन्नं घृताक्तमादाय पूर्ववदात्मार्थं वैश्वदेवाख्यं कर्म करिष्य इति संकल्पः ॥ अथवा देवभूतपितृमनुष्यान् वैश्वदेवान्नेन यक्ष्ये ॥ गृह्याग्निं मणिकोदकेन पर्युक्ष्य हस्तेनाग्नौ जुहुयात ॥ ब्रह्मणे स्वाहा ॥ इदं ब्रह्मणे न मम ॥ एवमग्नेपि प्रजापतये० गृह्याभ्य० कश्यपाय० अनुमतये० ॥ इति देवयज्ञः ॥ ततो मणिकसमीपे बलित्रयमुदक्संस्थम् ॥ पर्जन्याय नमः स्वाहा ॥ इदं पर्जन्याय न मम॥ अद्यो न० पृथिव्यै न० अथ द्वार्यशाखयोः प्राक्संस्थं बलिद्वयम् ॥ धात्रे० विधात्रे० उदकेन चतुरस्रं कृत्वा ॥ तत्र पूर्वे वायवे० दक्षिणे वायवे० पश्चिमे वायवे० उत्तरे वायवे० प्रागादिषु वायुबलेः प्रागुदग्वा ॥ प्राच्यै दिशे० दक्षिणस्यै दि० प्रतीच्यै दिशे०॥ उदीच्यै दि० मध्ये प्राक्संस्थम्॥ ब्रह्मणे० अंतरिक्षाय० सूर्याय० एषामुत्तरे विश्वेभ्यो देवेभ्यो० विश्वेभ्यो भूतेभ्यो० अनयोरुत्तरे ॥ उपसे० भूतानां च पतये० ॥ इति भूतयज्ञः ॥ प्राचीनावीती ब्रह्मादिबलित्रयस्य दक्षिणे पितृतीर्थेन पितृभ्यः स्वधा नम इदं पितृभ्यो न ममेति दद्यात्॥ इति पितृयज्ञः॥ पात्रं प्रक्षाल्य सव्येन ब्रह्मादिबलितो वायव्यां यक्ष्मैतत्ते निर्णेजनमिति तज्जलं निनयेत ॥ पूर्ववन्मनुष्ययज्ञः ॥ निरग्निकस्तु लौकिकाग्निमाहृत्य पृष्टोदिवीति प्रतिष्ठाप्य तत्सवितु० ताꣳसवितु० विश्वानिदेव० इति त्रिभिः सावित्रैः प्रज्वाल्य तत्र नित्योपासनहोमं कृत्वा पाकं पचेद्वैश्वदेवं च कुर्यादिति गदाधरः ॥ तत्राप्यशक्तौ बह्वृचाद्युक्तरीत्या पचनाग्निं प्रतिष्ठाप्य ध्यात्वा संपूज्य तत्र पूर्वोक्तरीत्या वैश्वदेवस्तत्र अग्नये स्विष्टकृते स्वाहेति पंचाहुतीनामुत्तरं होमः ॥ सर्वत्र निरग्नेरिति विशेषः शेषं प्राग्वत ॥ कात्यायनानां दिवैवैको वैश्वदेवो न द्वितीयो रात्रौ ॥ सामगाथर्वणैरपि स्वगृह्योक्तरीत्या पंचमहायज्ञाः कार्याः ॥ स्वगृह्यानुपलंभे बह्वृचोक्तरीत्योपनयनादिसंस्काराः पंचमहायज्ञादयश्च कार्याः ॥ "शाखांतरमतं सम्यगनालोच्य स्वधाष्टर्चतः ॥ शाखांतराह्निकं प्रोक्तं ज्ञात्वा शोध्यं स्वशाखिभिः ॥"

## अथ फलादिभक्षणेपि पंचमहायज्ञादिकरणे दोषो न ।

"इक्षूनपः फलं मूलं तांबूलं पय औषधम् ॥ भक्षयित्वापि कर्तव्याः स्नानदानादिकाः क्रियाः ॥" पंचमहायज्ञेष्वन्यतमस्य लोपे उपवासः प्रायश्चित्तम् ॥ धनिकस्यातुरस्य च प्रतियज्ञं कृच्छ्रार्धम् ॥ अन्ये त्वेकाहं लोपे मनस्वत्याद्युतिद्वर्यहं त्र्यहं लोपे तिसृभिस्तंतुमतीभिर्होमो वारुणीनां चतसृणां जपो द्वादशाहं लोपे तंतुमतीस्थालीपाको वारुणीभिराज्यहोमश्चेत्याहुः ॥

## अथ सर्वसाधारणो भोजनादिविधिः ।

हैमे राजते पात्रे आम्रादिपत्रे वा भोजनं शस्तम् एक एव तु भुंजीत कांस्यपात्रे नान्योच्छिष्टे ॥" तांबूलाभ्यंजनं चैव कांस्यपात्रे च भोजनम् ॥ यतिश्च ब्रह्मचारी च विधवा च विवर्जयेत् ॥" पलाशपर्णेषु यत्यादेः प्रशस्तम् ॥ गृहिणस्तु चांद्रायणम् ॥ इदं वल्लीपलाशविषयमिति स्मृत्यर्थसारे ॥ कदलीकुटजमधुजंबूपनसाम्रचंपकोदुंबरपत्राणि शस्तानि ॥ अर्काश्वत्थवटादिपत्राणि निषिद्धानि ॥ चतुरस्रमंडले प्रक्षालितपात्रं निधाय पंचमहायज्ञावशिष्टं घृतादियुतं परिविष्टमन्नमस्माकं नित्यमस्त्वेतदिति वदन्नत्वा ग्रंथिरहितपवित्रयुतदक्षिणपाणिः पादाभ्यां पादेन वा भुवं स्पृशन् व्याहृतिभिर्गायत्र्या चाभिमंत्र्य सत्यंत्वर्तेन परिषिंचामीति दिवा ऋतं त्वा सत्येन परिषिंचामीति रात्रौ परिषेचनं कृत्वा ॥" अन्तश्चरति भूतेषु गुहायां विश्वतो मुखः॥त्वं यज्ञस्त्वं वषट्कारस्त्वं विष्णुः पुरुषः परः॥" पात्राद्दक्षिणे भूमौ॥ भूपतये नमः॥भुवनपतये०भूतानां पतये० इतित्रीन्बलीन्दद्यात्॥यद्वा चित्राय०चित्रगुप्ताय० यमाय० यमधर्माय० सर्वभ्यो भूतेभ्य० इति वा व्यस्तसमस्तव्याहृतिभिर्वा चत्वारः धर्मराजाय चित्रगुप्तायेति द्वौ वा भूपत्यादित्रययुतावेताविति पंच वा देयाः ॥ हस्तपादमुखार्द्रः ॥ आपोशनार्थं जलमादायान्नं ब्रह्मरसो विष्णुः० 'अहं वैश्वानरो भूत्वा' इत्यर्धं ध्यात्वा वामकरेण पात्रं धृत्वामृतोपस्तरणमसीत्यपः प्राश्य ॥ मौनी ॐ प्राणाय स्वाहा ॥ ॐ अपानाय स्वाहा ॥ ॐ व्यानाय स्वाहा ॥ ॐ उदानाय स्वाहा ॥ ॐ समानाय स्वाहा ॥ इति सघृताः सक्षीरा वा पंचाहुतीः सर्वाणुलिभिः सर्वं ग्रासं ग्रसन् मुखे जुहुयात् ब्रह्मणे स्वाहेति षष्ठी क्वचित् ॥ प्राणाहुतिपर्यंतं पात्रालंभो मौनं च नियतमग्रे ऐच्छिकं द्वयम् ॥ भोजनं प्राङ्मुखं प्रत्यङ्मुखं वा शस्तम् ॥ दक्षिणामुखं यशःफलं काम्यम् ॥ उदङ्मुखं मध्यमम् ॥ विदिङ्मुखं निषिद्धम् ॥ कृत्स्नं ग्रासं ग्रसन् द्वात्रिंशदादिनियतग्रासमनियतग्रासं वा भुक्त्वामृतापिधानमसीति गंडूषार्धं पीत्वार्धं भूमौ निनीय पवित्रं त्यक्त्वा मुखहस्तोच्छिष्टं सम्यक् प्रक्षालयेत्॥ तर्जन्या मुखं न शोधयेत ॥ किंचिद्गंडूषोत्तरं हस्तप्रक्षालनं षोडशगं डूषाते द्विराचामेत् ॥ भोजनगृहे च नाचामेत् ॥ अनाचांतो मूत्रपुरीषौ न कुर्यात् ॥

## अथ भोजने विधिनिषेधाः ।

उत्तरापोशनमकृत्वोत्थाने स्नात्वा शुद्धिः हस्तौ संमृज्य प्रक्षाव्यांगुष्ठेन नेत्रयोर्निषिंच्येष्टदेवतां स्मरेत् ॥ नांजलिना पिबेत् ॥ पालाशं दग्धमयोवद्धं च पीठं वर्जयेत्॥न शिशुभिः सह भुंजीत ॥ भार्यया च सह विवाहवर्ज्यं न भुंजीत॥बालवृद्धेभ्योन्नमदत्त्वा न भुंजीत ॥ न प्रौढपादो नासनारूढपादो न प्रसारितपादो न विदिक्तुंडो न दुष्टैकपंक्तौ न शून्याग्निपाकगृहे न देवालये भुंजीत ॥ न संध्ययोर्न महानिशायां न यज्ञोपवीतहीनो न वामहस्तेन न शूद्रशेषं भुंजीत ॥ आदौ मधुरं मध्ये लवणाम्लमंते तिक्तादि ॥ पूर्वं द्रवं मध्ये कठिनमंते द्रवम् ॥ अष्टौ ग्रासा यतेः षोडश द्वात्रिंशद्वा गृहिणो वनस्थस्य षोडश यथेष्टं ब्रह्मचारिणः॥"सर्वं सशेषमश्नीयान्निःशेषं घृतपायसम् ॥" क्षीरं दधि मधु भुंजीत ॥ दिवा रात्रौ चेति द्विवारमेव नांतराभोजनम् ॥" अर्कपर्वद्वये रात्रौ चतुर्दश्यष्टमी दिवा॥ एकादश्यामहोरात्रं भुक्त्वा चांद्रायणं चरेत् ॥ यस्तु पाणितले भुंक्ते यश्च फूत्कारसंयुतम् ॥ प्रसृतांगुलिभिर्यश्च तस्य गोमांसवच्च तत् ॥ नाजीर्णे भोजनं कुर्यात्कुर्यान्नाति बुभुक्षितः ॥ नार्द्रवासा नार्द्रशिरा न पादारोपिते करे ॥ ग्रासशेषं च नाश्नीयात्पीतशेषं पिबेन्न च ॥ शाकमूलफलादीनि दंतच्छेदैर्न भक्षयेत् ॥ नोच्छिष्टो घृतमाद्यान्न पदा भाजनं स्पृशेत् ॥ पिबतो यत्पतेत्तोयं भाजने मुखनिःसृतम् ॥ अभोज्यं तत् ॥" पीतावशिष्टतोयपाने चांद्रायणम् ॥ हस्तनखस्पृष्टजलपाने वामहस्तोद्धृतजलपाने च सुरापानसमम्॥ एकपंक्त्युपविष्टानां विप्राणां भुंजानानामेकस्मिन्नप्युत्थिते आचांते वाऽन्यैर्न भोज्यम् ॥ अत्रोत्थितस्य भोक्तुश्च दोषः गुरोर्न दोषः ॥"लवणं व्यंजनं चैव घृतं तैलं तथैव च ॥ लेह्यं पेयं च विविधं हस्तदत्तं न भक्षयेत् ॥" ताम्रे गव्यं कांस्ये नारीकेलेक्षुरसौ सगुडं दधि सगुडमार्द्रकं च मद्यसमम् ॥ सैंधवसामुद्रभिन्नप्रत्यक्षलवणभक्षणं मृद्भक्षणं च गोमांससमम् ॥" उदक्यामपि चांडालं श्वानं कुक्कुटमेव च ॥ भुंजानो यदि पश्येत्तु तदन्नं तु परित्यजेत् ॥" भुंजानस्य गुदस्रावे उपवासः पंचगव्यं च आपोशनोत्तरं प्राणाहुतेः प्राक् तत्स्रावे स्नानं षट् प्राणायामाः भुंजानस्याशौचप्राप्तौ ग्रासं त्यक्त्वा स्नानम् ॥ ग्रासाशने उपवासः सर्वाशने त्रिरात्रम् ॥ विष्ठादिस्पर्शे स्नानं प्राणायामत्रयं च ॥ चांडालपतितोदक्या वाक्यं श्रुत्वा भोजने एकोपवासः ॥ स्नात्वा शतगायत्रीजपो वा ॥ कलहघरट्टोलूखलमुसलानां यावच्छब्दस्तावदभोजनम् ॥" अप्येकपंक्त्यां नाश्नीयाद्ब्राह्मणैः स्वजनैरपि ॥ कोपि जानाति किं कस्य प्रच्छन्नं पातकं भवेत् ॥ ततोग्निना भस्मना च स्तंभेन सलिलेन च ॥ द्वारेणैव च मार्गेण पंक्तिभेदं चरेद्बुधः ॥" केशपिपीलिकामक्षिकाभिः सह पक्वमन्नं त्यजेदेव ॥ पाकोत्तरं केशपिपीलिकादिकीटकमक्षिकासंसृष्टे गवाघ्राते

वान्ने ॥"सलिलं भस्म मृद्वापि प्रक्षेप्तव्यं विशुद्धये ॥" इति विज्ञानेश्वरः ॥ शूद्रान्नं शूद्रदत्तब्राह्मणान्नं रात्रिपर्युषितं रजस्वलाचांडालपतितादिदृष्टं काकादिपक्ष्युच्छिष्टमभोज्यम् ॥ स्नेहपक्वं मंडकादि च पर्युषितं ग्राह्यम् ॥

## अथ वर्ज्यक्षीराणि ।

अवत्साया गोरनिर्दशानां गोमहिष्यजानां गर्भिण्या एककालांतरितदोहाया यमलसूस्रवत्स्तन्योरजवर्जद्विस्तनीनामुष्ट्रीवडवयोरारण्यकमृगादेरवेश्च क्षीराणि वर्ज्यानि ॥ शिग्रुं हिंगुवर्ज्यं रक्तं वृक्षनिर्यासं पुरीषस्थानोत्पन्नतंडुलीयकादिकं देवाद्युद्देशं विना कृतं संयावपायसापूपशष्कुलीकृसरं वर्जयेत् ॥ शणकुसुंभालाबुवार्ताककोविदारवटादिफलानि मातुलिंगं च वर्ज्यम् ॥ पलांडुलशुनगृंजनभक्षणे चांद्रायणम् ॥ भुंजानेषु परस्परस्पर्शे अन्नत्यागः ॥ पात्रस्थान्नभक्षणे स्नात्वाष्टोत्तरशतगायत्रीजपः अधिकभोजने सहस्रम् ॥ भुंजानस्याशुचिना विप्रेण स्पर्शेन्नत्यागः ॥ भुक्तोच्छिष्टस्पर्शे सवर्णे स्नानं जपो वा ॥ असवर्णे तूपवासः ॥ भुक्तोच्छिष्टस्य श्वशूद्रादिस्पर्शे उपोष्य पंचगव्यम् ॥ रजकादिस्पर्शे त्रिरात्रम् ॥ परिवेषणं कुर्वन्नुच्छिष्टस्पर्शे पयोदधिघृतादिलघुद्रव्यमत्यजन्नाचांतः शुचिः ॥ भक्ष्याद्यन्नस्य त्याग एव वस्त्रे विकल्पः ॥ परिवेषणादिकाले रजोदृष्टौ तत्स्पृष्टान्नत्यागः ॥ भोजनांत उच्छिष्टशेषान्नं"रौरवे पूयनिलये पद्मार्बुदनिवासिनाम् ॥ प्राणिनां सर्वभूतानामक्षय्यमुपतिष्ठतु" इति दद्यात् ॥" आचांतोप्यशुचिस्तावद्यावत्पात्रमनुद्धतम्॥उद्धृतेप्यशुचिस्तावद्यावन्नोन्मृज्यते मही ॥ पर्णस्याग्रं च मूलं च शिरां चैव विशेषतः ॥ चूर्णपर्णं वर्जयित्वा तांबूलं खादयेद्बुधः ॥ अनिधाय मुखे पूर्णं पूगं वै भक्षयेन्न च" ॥ इति पंचमभागकृत्यम् ॥ अथ षष्ठभागादिकृत्यविचारः ॥ "इतिहासपुराणाद्यैः षष्ठसप्तमकौ नयेत् ॥ अष्टमे लोकयात्रा तु बहिः संध्या ततः पुनः ॥"

## अथ सायंसंध्या ।

सायंसंध्या प्रातःसंध्यावत् ॥ अग्निश्च मामन्युश्च० यदह्नापापमकार्ष० अहस्तदवलुंपतु० सत्ये ज्योतिषि जुहोमि स्वाहेति मन्त्राचमने विशेषः ॥ पश्चिमाभिमुखस्तिष्ठन् अर्घ्यं दद्यात् ॥ ऊर्ध्वजानुरुपविश्य प्रत्यङ्मुख एव गायत्रीं जपेत् ॥ सायंहोमस्तूक्त एव सायंवैश्वदेवे पुनः पाकः अतिथिं संपूज्य घटीत्रयानंतरं सार्धयामात्प्राग् भुक्त्वा शयीत ॥ भोजनकाले दीपनाशे पात्रमालभ्य सूर्यं स्मृत्वा पुनर्दीपं दृष्ट्वा पात्रस्थं भुंजीत नान्यत् ॥ श्राद्धतत्पूर्वदिने पातधृतिसंक्रांत्यादिषु न निशि भोजनम् ॥" चतुर्थप्रथमौ यामौ विद्याभ्यासैर्नयेन्निशि ॥ प्रहरद्वयशायी तु ब्रह्मभूयाय कल्पते॥" प्राक् प्रत्यग्दक्षिणस्यां शिरः कृत्वा शयीत न कदाचिदुदक्शिराः॥ रात्रिसूक्तं जपित्वा सुखशायिनः स्मृत्वा विष्णुं नत्वा स्वप्यात् ॥"अगस्तिर्माधवश्चैव

मुचुकुंदो महामुनिः ॥ कपिलो मुनिरास्तीकः पंचैते सुखशायिनः ॥ न संध्यायां न धान्ये न गोगेहे न देवविप्रगुरूणामुपरि नोच्छिष्टो न दिवा न नग्नः शयीत ॥ निद्राकाले तांबूलं मुखात्स्त्रियं शयनाद्भालात्तिलकं शिरसः पुष्पं च त्यजेत् ॥ गर्भाधानप्रकरणोक्तकाले सार्धयामोत्तरं दीपे सत्यसति वा निवीतं यज्ञोपवीतं कंठादौ कृत्वा पत्नीं गच्छेत् ॥" अष्टम्यां च चतुर्दश्यां दिवा पर्वणि मैथुनम् ॥ कृत्वा सचैलं स्नात्वा तु वारुणीभिश्च मार्जयेत् ॥" पुनर्मामैत्विति जपश्चोक्त एव ॥

## अथ सर्वत्र विष्णूच्चारणं प्रायश्चितम् ।

एवं स्नानभोजनादिके बहुविधविधिनिषेधाकुले आह्निककर्मणि न्यूनाधिकदोषविधिनिषेधातिक्रमदोषपरिहारार्थं प्रायश्चित्ताज्ञाने तत्सांगतार्थं प्रायश्चित्तसांगतार्थं च श्रीविष्णुनामोच्चारणादिकं कार्यम् ॥"प्रायश्चित्तान्यशेषाणि तपःकर्मात्मकानि च॥ यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ॥ न्यूनं संपूर्णतां याति सद्यो वंदे तमच्युतम् ॥ नाम्नोस्ति यावती शक्तिः पापनिर्हरणे हरेः ॥ तावत्कर्तुं न शक्नोति पातकं पातकी जनः ॥" लौकिकं वैदिकं कर्मेश्वरेर्पणीयम् ॥" यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ॥ यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणम्" इत्युक्तेः ॥ युगपत्सर्वकर्मार्पणे मंत्रः ॥ " कामतोकामतो वापि यत्करोमि शुभाशुभम्॥तत्सर्वं त्वयि संन्यस्तं त्वत्प्रयुक्तः करोम्यहम्॥ अपारमाह्निकं कर्म गहनं बहुभेदयुक् ॥ निःशेषमक्षमो वक्तुं यथामत्यवदल्लघु ॥ अनंतोपाध्यायजनिः काशीनाथाभिधः सुधीः ॥ तुष्यतां तेन भगवाञ्छ्रीनाथो विट्ठलः प्रभुः ॥" इत्यनंतोपाध्यायसूनुकाशीनाथोपाध्यायविरचिते धर्मसिंधुसारे तृतीयपरिच्छेदे आह्निकाचारप्रकरणं समाप्तम् ॥

## अथ काम्यनैमित्तिकविचारः ।

"अवश्यं प्रत्यहं कृत्यमुक्ता तच्छेष उच्यते ॥ काम्यं नैमित्तिकं चापि प्रायः सिंधुक्रमादथ ॥

## अथाधानविचारः ।

तत्राधाननक्षत्रादिकालविचारः प्रथमपरिच्छेदे उक्तः ॥ आवसथ्याधानं तु दारकाले दायविभागकाले वा ॥ "अग्निर्वैवाहिको येन न गृहीतः प्रमादिना ॥ पित्र्युपरते तेन ग्रहीतव्यः प्रयत्नतः ॥" गृह्याग्निहीनस्यान्नमभोज्यम् ॥ पितरि ज्येष्ठभ्रातरि वा साग्निके कनिष्ठादेरविभक्तस्य निरग्निकत्वदोषो न ॥ एवं ज्ञानाध्ययनादिनिष्ठस्यापि न दोषः ॥ गृहस्थस्याप्यध्ययनोक्तेः स्मार्ताधानमपि ज्येष्ठे भ्रातरि अकृताधाने सति न कार्यमिति निर्णयसिंध्वादौ गाग्र्योक्तिः ॥ अत्रैवं निर्ण-

यो भाति ॥ यत्र ज्येष्ठेन दायाद्यपक्षमवलंब्य विवाहकाले यावज्जीवमौपासनं करिष्ये इत्येवं संकल्पपूर्वकं विवाहाग्निर्न गृहीतस्तद्विषयोयं कनिष्ठस्य निषेधः ॥ येन ज्येष्ठेन विवाहकाले तथा संकल्पपूर्वकमग्निः परिगृहीतः स पश्चात्परिचरणाभावे नाविद्यमानाग्निकोप्युच्छिन्नाग्निरेव न त्वकृताधान इति तत्र कनिष्ठस्याधाने दोषो नेति ॥ अत्राधिकारिणोपि भ्रातुरनुज्ञया कनिष्ठस्याधानं भवति विवाहस्त्वनुज्ञयापि न ॥ एवं पितुरनुज्ञयाप्याधानम् ॥ "संन्यस्ते छिन्नहस्तादौ यद्वा षंढादिदूषणे ॥ जनके सोदरे ज्येष्ठे कुर्यादेवेतरः क्रियाम्" इत्यादिविशेषः विवाहप्रकरणे परिवेत्तृप्रसंगे उक्तः ॥

## अथ शूद्रादिसंस्कारविचारः ।

गर्भाधानपुंसवनानवलोभनसीमंतोन्नयनजातकर्मनामकर्मनिष्क्रमणान्नप्राशनचौलोपनयनमहानाम्न्यादिव्रतचतुष्टयसमावर्तनविवाहा इति षोडश संस्कारा द्विजानाम् ॥ जातकर्मनामकर्मनिष्क्रमणान्नप्राशनचूडाविवाहा इति षट् द्विजस्त्रीणाम् ॥ तत्र विवाहः समंत्रकोऽन्ये मंत्ररहिताः ॥ गर्भाधानसीमंतौ स्त्रीपुरुषसाधारणौ चूडांता नव विवाहश्चेति दशामंत्रकाः शूद्राणामिति बहुसंमतम् ॥ शूद्रकमलाकरे शूद्राणां पंचमहायज्ञा अप्युक्ताः॥ केचिदवैदिकमंत्रेणोपनयनमप्याहुः ॥ ब्राह्मे तु॥ "विवाहमात्रं संस्कारं शूद्रोपि लभतां सदा" इत्युक्तम् ॥ अत्र सदसच्छूद्रगोचरत्वेन वा परंपराप्राप्तप्रकारेण वा व्यवस्था ॥

## अथ शूद्रधर्मविचारः ।

अस्य द्विजसेवा वृत्तिः ॥ आपदि वाणिज्याशिल्पादि॥ शूद्रेण लवणादि विक्रेयम् । मद्यं मांसं च न ॥ "कपिलाक्षीरपानेन ब्राह्मणीगमनेन च ॥ वेदाक्षरविचारेण शूद्रश्चांडालतां व्रजेत् ॥ शूद्रो वर्णश्चतुर्थोपि वर्णत्वाद्धर्ममर्हति ॥ वेदमंत्र वधास्वाहावषट्कारादिभिर्विना ॥" स्त्रीशूद्रधर्मेषु व्रतादिषु सर्वत्र विप्रेण मंत्रः पठनीयः ॥ सोपि पौराण एव ॥ भारतपुराणयोः श्रवणे स्त्रीशूद्रयोरधिकारो न त्वध्ययने ॥ 'श्रावयेच्चतुरो वर्णान् कृत्वा ब्राह्मणमग्रतः ॥' शूद्रस्य पंचयज्ञश्राद्धादिकर्माणि कातीयसूत्रानुसारेणेति मयूखे ॥ आगमोक्ता विष्णुशिवादिमंत्रा नमोंताः प्रणवरहिताः ॥ पुराणादिश्रवणनिदिध्यासनादि कृत्वा ब्रह्मज्ञानमपि स्त्रीशूद्रैः संपाद्यम् ॥ उपनिषच्छ्रवणे तु नाधिकार "इति शूद्रस्य तदनादरश्रवणात" इत्यधिकरणे॥ शूद्रस्य सर्वश्राद्धान्यामेनैव ॥ केचित्सर्वप्रजानां काश्यपत्वात्सर्वशूद्राणां काश्यपगोत्रं तच्च श्राद्ध एव कीर्तनीयं नान्यत्रेत्याहुः ॥ एवं शांतिकादावधिकारो विप्रद्वारैव ॥ यदि विप्रः शूद्रदक्षिणामादाय वैदिकमंत्रैस्तदीयहोमाभिषेकादि करोति तदा तत्र शूद्रस्तत्पुण्यफलभाक् विप्रस्तु महाप्रत्यवायीति माधवः ॥ अहिंसासत्यास्तेयशौचेंद्रिय-

निग्रहदानशमदमक्षमादयः शूद्रादिसर्वसाधारणा धर्माः परपदप्रापकाः ॥ स्वस्तिवाचनादिशूद्रकर्मणां प्रयोगास्तु शूद्रकमलाकरे ज्ञेयाः ॥

## अथ वापीकूपाद्युत्सर्गादिकालः ।

गृहग्रामयोराग्नेयदक्षिणनैर्ऋत्यवायव्येषु मध्ये च दुष्टफलः कूपः शेषदिक्षु शुभः ॥ वापीकूपतडागाद्युत्सर्ग उत्तरायणे माघादिमासषट्कस्य शुक्लपक्षेषु प्रशस्तः ॥ जलक्षयसंभावनायां कार्तिकमार्गशीर्षयोरपि ॥ "न कालनियमस्तत्र सलिलं कारणं परम्" इत्युक्तेः ॥ चतुर्षु विष्णुशयनमासेषु शुक्रास्तादौ च वर्ज्यम् ॥ अश्विनीरोहिणीमृगपुष्यमघाऽुत्तरामूलश्रवणादित्रयहस्तज्येष्ठानुराधारेवतीषु द्वितीयातृतीयापंचमीसप्तमीदशम्येकादशीत्रयोदशीतिथिषु बुधगुरुशुक्रसोमवारेषु जलोत्सर्गः शुभः ॥ उत्सर्गाभावे जलं न ग्राह्यम् ॥ "वापीकूपतडागादौ यज्जलं स्यादसंस्कृतम् ॥ न स्प्रष्टव्यं न पेयं च पीत्वा चांद्रायणं चरेत्" ॥ उत्सर्गप्रयोगोन्यतो ज्ञेयः ॥

## अथ वृक्षादिरोपणकालः ।

अश्विनीरोहिणीमृगपुष्यमघोत्तरात्रयहस्तचित्राविशाखानुराधामूलशततारकारेवतीषु सत्तिथिवारेषु वृक्षलतारोपः शस्तः ॥ "आश्लेषायां सोमवारः सोमो लग्ने बलान्वितः ॥ योगेस्मिन् रोपयेदिक्षुकदलीक्रमुकादिकान् ॥ नारिकेलान्वपेद्भूमावश्विन्यां लग्नगे रवौ ॥ नागवल्लीं गुरौ लग्ने चंद्रे स्वांशस्थिते सति ॥"

## अथ मूर्तिप्रतिष्ठाकालः ।

"प्रतिष्ठा सर्वदेवानां वैशाखज्येष्ठफाल्गुने ॥ चैत्रे तु स्याद्विकल्पेन माघे विष्ण्वन्यमूर्तिषु ॥ सौम्यायने शुभा प्रोक्ता निंदिता दक्षिणायने ॥ मातृभैरववाराहनरसिंहत्रिविक्रमाः ॥ दक्षिणेप्ययने स्थाप्या देव्यश्चेत्यूचिरे परे ॥ विष्णोः शस्ताश्चैत्रमासाश्विनश्रावणका अपि ॥ माघफाल्गुनवैशाखज्येष्ठाषाढसहःसु च ॥ श्रावणे च नभस्ये च लिंगस्थापनमुत्तमम् ॥ देव्या माघेश्विने मासेप्युत्तमा सर्वकामदा ॥" अश्विनीरोहिण्युत्तरात्रयमृगपुनर्वसुपुष्यहस्तचित्रास्वात्यनुराधाश्रवणत्रयरेवतीषु शनिभौमान्यवासरे दर्शरिक्तान्यतिथौ सर्वदेवप्रतिष्ठा शुभा ॥ श्रवणे कृत्तिकादिविशाखांतेषु च द्वादश्यां च विष्णोः प्रशस्ता ॥ चतुर्थी गणेशस्योक्ता नवमी मूलभं च देव्याः ॥ तथा स्वस्वनक्षत्राणि सर्वेषाम् ॥ यथार्द्रा शिवस्य, हस्तः सूर्यस्येत्यादि ॥ "हीत्यर्थहीना कर्तारं मंत्रहीना तु ऋत्विजम् ॥ स्त्रियं लक्षणहीना तु न प्रतिष्ठासमो रिपुः ॥"

## अथ प्रतिष्ठाधिकारिणः ।

"ब्रह्मा तु ब्राह्मणैः स्थाप्यो गायत्रीसहितः प्रभुः ॥ सर्ववर्णैस्तथा विष्णुः प्रतिष्ठाप्यः सुखार्थिभिः ॥" मातृभैरवाद्याः सर्वैः शिवलिंगं यतिनापि ॥ पुराणप्रसिद्धजीर्णलिंगं स्त्रीशूद्रैरपि पूज्यम् ॥ नूतनस्थापितं लिंगं स्त्रीशूद्रो वापि न स्पृशेत् ॥ शिवादिप्रतिष्ठायां स्त्रीशूद्रादेर्नाधिकारः ॥ "शूद्रो वानुपनीतो वा स्त्रियो वा पतितोपि वा ॥ केशवं वा शिवं वापि स्पृष्ट्वा नरकमश्नुते ॥" स्थिरप्रतिमाः प्राङ्मुखीरुदङ्मुखो यजेत ॥ चलप्रतिमास्तु प्राङ्मुखः ॥

## अथ प्रतिमाविचारः ।

"सौवर्णी राजती ताम्री मृन्मयी प्रतिमा भवेत् ॥ पाषाणधातुयुक्ता वा कांस्यपित्तलयोरपि ॥ अंगुष्ठपर्वमानात्सा वितस्तिं यावदेव तु ॥ गृहेषु प्रतिमा कार्या नाधिका शस्यते बुधैः ॥" मृद्दारुलाक्षागोमेदमधूच्छिष्टेन चेति केचित् ॥ श्रीमद्भागवते ॥ "शैली दारुमयी लौही लेप्या लेख्या च सैकती ॥ मनोमयी मणिमयी प्रतिमाष्टविधा स्मृता ॥" लौही सौवर्णी ॥ दारु मधूकवृक्षस्यैव ॥ सप्तांगुलाधिका द्वादशांगुलपर्यंता गृहे प्रतिमेति देवीपुराणे ॥ "अर्चकस्य तपोयोगादर्चनस्यातिशायनात् ॥ आभिरूप्याच्च बिंबानां देवः सान्निध्यमृच्छति ॥ प्रतिमापट्टयंत्राणां नित्यंस्नानं न कारयेत् ॥ कारयेत्पर्वदिवसे यदा च मलधारणम् ॥" पार्थिवलिंगपूजादिविचारो द्वितीयपरिच्छेदे उक्तः ॥

## अथ पंचसूत्रीनिर्णयः ।

लिंगोच्चता लिंगविस्तारो लिंगस्थौल्यं पीठविस्तारः प्रनालिकामानं चेति पंचसूत्राणि ॥ तत्र लिंगमस्तकविस्तारं लिंगोच्चतातुल्यं कृत्वा तद्द्विगुणसूत्रवेष्टनार्हं लिंगस्थौल्यं कृत्वा लिंगात्सर्वतो लिंगसमविस्तारं पीठं वर्तुलं कुर्यात् ॥ पीठोच्चता लिंगोच्चताद्विगुणा ॥ पीठाद्बहिः पीठोत्तरभागे लिंगसमदीर्घा मूले दैर्घ्यसमविस्तारा ॥ अग्रे तदर्धविस्तारा प्रनालिका ॥ लिंगोच्चत्वत्रिगुणा पीठोच्चतेति केचित् ॥ अथ पीठमध्यभागे लिंगाद्द्विगुणं स्थूलं पीठोच्चतातृतीयांशेन कंठं कुर्यात् ॥ कण्ठस्योर्ध्वाधोभागयोः समं वप्रद्वयं कृत्वा पीठोपरि लिंगविस्तारषष्ठांशेन मेखलां कृत्वा तदंतःसंलग्नं तत्समं खातं कुर्यात् ॥ प्रनालिकायामपि विस्तारतृतीयांशेन खातपीठवन्मेखला च कार्येति ॥

## अथ शालग्रामादिपूज्यसंख्या ।

"गृहे लिंगद्वयं नार्च्यं शालग्रामद्वयं तथा ॥ द्वे चक्रे द्वारकायास्तु नार्चेत्सूर्यद्वयं तथा ॥ शक्तित्रयं त्रिविघ्नेशं द्वौ शंखौ नार्चयेत्सुधीः ॥" अन्यत्र तु" चक्रांक-

मिथुनं पूज्यं नैकं चक्रांकमर्चयेत्" इत्युक्तं तेन विकल्पः ॥" नार्चयेच्च तथा मत्स्य-कूर्मादिदशकं गृहे ॥ अग्निदग्धाश्च भग्नाश्च न पूज्याः प्रतिमा गृहे ॥ भग्ना वा स्फुटिता वापि शालग्रामशिला शुभा ॥ शालग्रामाः समाः पूज्याः समेषु द्वितयं न हि ॥ विषमा नैव पूज्यंते विषमेष्वेक एव हि ॥" ससुवर्णशालग्रामदाने पृथ्वी-दानफलम् ॥ शतशालग्रामपूजनेऽनन्तफलम् ॥ अविभक्तानामपि भ्रातॄणां देवता-र्चनमग्निहोत्रं संध्या ब्रह्मयज्ञश्च पृथगेव ॥ स्त्री शूद्रो वा स्पर्शसहितं शालग्रामचक्रां-कितबाणलिंगानि नार्चयेत् ॥" शूद्रो वानुपनीतो वा सधवा विधवांगना ॥ दूरादे-वास्पृशन्पूजां प्रकुर्याच्छिवकृष्णयोः ॥" शालग्रामबाणयोरेव स्पर्शननिषेधो न तु प्रतिमादौ ॥ सर्ववर्णैस्तु संपूज्याः प्रतिमाः सर्वदेवताः ॥ लिंगान्यपि तु पूज्यानि मणिभिः कल्पितानि च॥" इत्युक्तेः ॥" शालग्रामशिला क्रीता मध्यमा याचिता-धमा ॥ उक्तलक्षणसंपन्ना पारंपर्यक्रमागता ॥ उत्तमा सा तु विज्ञेया गुरुदत्ता तु तत्समा ॥ तत्राप्यामलकी तुल्या पूज्या सूक्ष्मैव या भवेत् ॥ यथायथा शिला सूक्ष्मा तथा स्यात्तु महत्फलम् ॥ यवमात्रं तु गर्तः स्याद्यवार्धं लिंगमुच्यते ॥ शिवनाभिरिति ख्यातस्त्रिषु लोकेषु दुर्लभः ॥ शालग्रामशिलायास्तु प्रतिष्ठा नैव विद्यते ॥ महापूजां तु कृत्वादौ पूजयेत्तां ततो बुधः ॥ बाणलिंगानि राजेंद्र ख्यातानि भुवनत्रये ॥ न प्रतिष्ठा न संस्कारस्तेषामावाहनं तथा॥"वासुदेवसंकर्षण-प्रद्युम्नानिरुद्धा विप्राद्यैः क्रमेण पूज्याः ॥ तल्लक्षणं तु ॥ पंचचक्रो वासुदेवः षड्भि-श्चक्रैः प्रद्युम्नः सप्तभिः संकर्षण एकादशभिरनिरुद्ध इति ॥" प्रणवोच्चारणाच्चैव शाल-ग्रामशिलार्चनात् ॥ ब्राह्मणीगमनाच्चैव शूद्रश्चाडालतां व्रजेत् ॥"

## शूद्रस्य विप्रद्वारा शालग्रामपूजा ।

"दीक्षायुक्तैस्तथा शूद्रैर्मद्यपानविवर्जितैः ॥ कर्तव्यं ब्राह्मणद्वारा शालग्रामशिला-र्चनम् ॥ विष्णुप्रीतिकरं नित्यं तुलसीकाष्ठचंदनम् ॥ कार्तिके केतकीपुष्पं येन दत्तं हरेः कलौ ॥ दीपदानं च देवर्षे तारितं तेन वै कुलम् ॥" शालग्रामसंबंधितोयव-च्चक्रांकशिलातोयस्यापि पानविधानात्सापि शालग्रामसन्निधौ पूज्या ॥ "अग्राह्यं शिवनिर्माल्यं पत्रं पुष्पं फलं जलम् ॥ शालग्रामस्य संस्पर्शात्सर्वं याति पवित्र-ताम् ॥ मध्यमानामिकामध्ये पुष्पं संगृह्य पूजयेत् ॥ अंगुष्ठतर्जन्यग्राभ्यां निर्मा-ल्यमपनोदयेत् ॥ विना भस्मत्रिपुंड्रेण विना रुद्राक्षमालया ॥ पूजितोपि महादेवो न स्यात्तस्य फलप्रदः ॥ विना मंत्रं न बिभृयाद्रुद्राक्षान्भुवि मानवः ॥ पंचामृतं पंच-गव्यं स्नानकाले प्रयोजयेत् ॥ रुद्राक्षस्य प्रतिष्ठायां मन्त्रं पंचाक्षरं तथा ॥ त्र्यंबका-दिकमंत्रं च तथा तत्र प्रयोजयेत् ॥ अष्टोत्तरशतं कुर्याच्चतुःपंचाशदेव तु ॥ सप्तविं-शतिमाना वा माला हीना न युज्यते ॥ सप्तविंशतिरुद्राक्षमालया देहसंस्थया ॥ यः करोति नरः पुण्यं सर्वं कोटिगुणं भवेत् ॥"

## अथ रुद्राक्षतुलस्यादिसर्वजपमालाना संस्कारः ।

कुशोदकसहितैः पंचगव्यैर्मालां प्रक्षाल्य ॥ ॐ ह्रीं अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः ॥ कं खं गं घं ङं ॥ चं छं जं झं ञं ॥ टं ठं डं ढं णं ॥ तं थं दं धं नं ॥ पं फं बं भं मं ॥ यं रं लं वं शं षं सं हं क्षं इत्येतानि पञ्चाशन्मातृकाक्षराणि अश्वत्थपत्रस्थापितमालायां विन्यस्य ॥ ॐ सद्यो जातं० वामदेवाय० अघोरेभ्यो० तत्पुरुषाय० ईशानः सर्वविद्याना० इति पंचमंत्रान् जपित्वा ॥ सद्योजातेति मन्त्रेण मालां पंचगव्येन प्रोक्ष्य सितजलेन प्रक्षाल्य वामदेवेति चन्दनेनाघृष्याघोरेति मालां धूपयित्वा तत्पुरुषेति चन्दनकस्तूर्यादिना लेपयित्वेशान इति मन्त्रेण प्रतिमणिं शतवारं दशवारं वाभिमन्त्र्याघोर इति मन्त्रेण मेरुं शतवारमभिमन्त्रयेत् ॥ तत एतैरेव पञ्चभिर्मन्त्रैर्मालां पञ्चोपचारैः पूजयेदिति बोपदेवः ॥

## अथ रुद्राक्षधारणसंख्याः ।

" रुद्राक्षान्कण्ठदेशे दशन३२परिमितान्मस्तके विंशती द्वे ४० षट् ६ षट् ६ कर्णप्रदेशे करयुगलकृते द्वादश १२ द्वादशैव १२ ॥ बाह्वोरिंदोः कलाभि१६ र्नयनयुगकृते एक१मेकं १ शिखायां वक्षस्यष्टाधिकं यः कलयति शतकं स स्वयं नीलकण्ठः ॥ " रुद्राक्षदानाद्रुद्रपदप्राप्तिः ॥

## अथ शिवे अभ्यंगस्नानादिमानम् ।

"पञ्चविंशत्पलं लिंगेष्वभ्यंगं कारयेदथ॥स्नापयेत्तिलतैलैश्च करयन्त्रोद्भवैः शिवम्॥ स्नानं पलशतं ज्ञेयमभ्यंगः पंचविंशतिः ॥ पलानां द्विसहस्रेण महास्नानं जलेन तत् ॥ पयोदधिघृतक्षौद्रशर्कराद्यैस्ततः क्रमात् ॥ शिवस्य सर्पिषा स्नानं प्रोक्तं पलशतेन वै ॥ तावता मधुना चैव दध्ना च पयसापि च ॥ पलसार्धसहस्रेण रसेनैवेक्षवेण च ॥ भक्त्या चोष्णोदकैः शीतोदकैः संस्नापयेच्छिवम् ॥ श्रीविष्णुं क्षीरदध्याद्यैः क्रमाद्दशगुणोत्तरैः ॥ स्नापयेत्किं चिदुष्णैश्च क्षीराद्यैः पञ्चभिः समैः ॥

## अथ श्रीविष्णवादिपंचायतनानि ।

"विष्णुर्मध्ये शिवेभास्यसूर्यार्या ईशदिक्क्रमात् ॥ शंभौ मध्ये विष्णुसूर्यगजास्यार्यास्तथाक्रमात् ॥ १ ॥ रवौ मध्यगते रुद्रगणेशाच्युतशक्तयः॥ मध्ये देवीविष्णुशिवगणेशरवयः क्रमात् ॥ २ ॥ मध्ये गणपतिर्विष्णुशिवसूर्यांबिकास्तथा ॥ ॥ ईशानादिक्रमेणैव पंचायतनपंचकम् ॥ ३ ॥"

## अथ केशवादिचतुर्विंशतिमूर्तयः ।

अथ केशवादिचतुर्विंशतिमूर्तिनिर्णायकबोपदेवश्लोकः सिंधौ व्याख्यातः॥ तस्यायं संग्रहः॥ "केशवादेश्चतुर्बाहोर्दक्षिणोर्ध्वकरक्रमात्॥ शंखचक्रगदापद्मायुधैः केशव उ-

च्यते ॥१॥ नारायणः पद्मगदाचक्रशंखायुधैः क्रमात् ॥ माधवश्चक्रशंखाभ्यां पद्मेन गदया भवेत् ॥ २ ॥ गोविंदो गदया पद्मशंखचक्रैः क्रमाद्भवेत् ॥ विष्णुः पद्मेन शंखेन चक्रेण गदया क्रमात् ॥ ३ ॥ शंखपद्मगदाचक्रैर्मधुसूदन ईरितः ॥ त्रिविक्रमो गदाचक्रशंखपद्मैरनुक्रमात् ॥४॥ वामनः शंखचक्राभ्यां पद्मेन गदयापि च ॥ चक्रेण गदया शङ्खपद्माभ्यां श्रीधरः स्मृतः ॥ ५ ॥ हृषीकेशः स्मृतश्चक्रपद्मशंखगदायुधैः ॥ पद्मनाभः पद्मचक्रगदाशङ्खैः क्रमात्स्मृतः ॥ ६ ॥ दामोदरः शङ्खगदाचक्रपद्मैरुदीर्यते ॥ संकर्षणः शङ्खपद्मचक्रायुधगदायुधैः ॥ ७ ॥ वासुदेवश्चक्रगदापद्मशङ्खाख्यलक्षणैः ॥ प्रद्युम्नः स्याच्छङ्खगदापद्मचक्रैः क्रमाद्धृतैः॥८॥अनिरुद्धो गदाशङ्खपद्मचक्रैरनुक्रमात् ॥ पद्मशङ्खगदाचक्रायुधैः स्यात्पुरुषोत्तमः ॥ ९ ॥ अधोक्षजो गदाशङ्खचक्रपद्मैः करस्थितैः ॥ नरसिंहः पद्मगदाशङ्खचक्रायुधैर्भवेत् ॥१०॥ अच्युतः पद्मचक्राभ्यां शङ्खेन गदया क्रमात् ॥ जनार्दनश्चक्रशङ्खगदापद्माढ्यबाहुभिः ॥ ११ ॥ उपेंद्रो गदया चक्रपद्मशङ्खान्वितैः करैः ॥ चक्रपद्मगदाशङ्खैः करस्थैः स्यात्क्रमाद्धरिः ॥ १२ ॥ श्रीकृष्णाख्यो गदापद्मचक्रशङ्खैर्मतो विभुः॥ इति प्रोक्ताः केशवादिचतुर्विंशतिमूर्तयः ॥ १३ ॥"

## अथ सिंध्वनुसारेण देवमूर्तिप्रतिष्ठाप्रयोगः ।

यजमानो द्वादशादिहस्तं मण्डपं कृत्वाग्नेये पूर्वतो वा हस्तमात्रं कुण्डं स्थंडिलं वा कृत्वा मध्ये वेदीं तदुपरि सर्वतोभद्रं ग्रहचिकीर्षायां पूर्वत ईशान्यां वा ग्रहवेदीं प्रासादसंस्कारे मंडपसंस्कारे वा चिकीर्षिते नैर्ऋते वास्तुपीठं कृत्वा ॥ अस्यां मूर्तौ लिंगे वा देवतासान्निध्यार्थं दीर्घायुर्लक्ष्मीसर्वकामसमृद्धचक्षय्यसुखकामोऽमुकदेवमूर्तिप्रतिष्ठां करिष्ये इति संकल्प्य स्वस्तिवाचनादिनांदीश्राद्धांते आचार्यं वृत्वाष्टौ चतुरो वा ऋत्विजो वृत्वा पूजयेत् ॥ आचार्यो यदत्रेति सर्षपान् विकीर्यापोहिष्ठेति कुशोदकैर्भूमिं प्रोक्ष्य देवा आयांतु यातुधाना अपयांतु विष्णो देवयजनं रक्षस्वेति भूमौ प्रादेशं कृत्वा ॥ मण्डपप्रतिष्ठां तद्विधिस्तु मूर्तिप्रतिष्ठाग्रंथादवगंतव्यस्तदनुसारेण कृत्वा न कृत्वा वा" यदत्र संस्थितं भूतं स्थानमाश्रित्य तिष्ठति ॥ स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु॥" अपक्रामंतु० मूर्तिं पंचगव्यहिरण्ययवदूर्वाश्वत्थपलाशपर्णान्युदकुंभे प्रक्षिप्य ताभिरद्भिरापोहिष्ठेति तिसृभिर्हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्विंद्रः॥ अग्निं या गर्भं दधिरे विरूपास्ता न आपः श ँ स्योना भवन्तु ॥१॥ यासा ँ राजा वरुणो याति मध्ये सत्यानृते अवपश्यं जनानाम्॥ मधुश्चुतः शुचयो याः पावकास्ता०॥२॥यासां देवा दिवि कृण्वंति भक्षं या अन्तरिक्षे बहुधा भवंति ॥ याः पृथिवीं पयसोंदन्ति शुक्रास्तान०॥३॥शिवेन मा चक्षुषा पश्यतापः शिवया तनुवोपस्पृश त्वचं मे सर्वा ँ अग्ने ँ रप्सु षदो

द्रुवेवो मयि वर्चो बलमोजो निधत्त ॥४॥ पवमानः सुवर्जनः पवित्रेण विचर्षणिः॥ यः पोता स पुनातु मा ॥ पुनंतु मा देवजनाः पुनंतु मनवो धिया ॥ पुनंतु विश्व आयवः जातवेदः पवित्रवत् ॥ पवित्रेण पुनाहि मा शुक्रेण देव दीद्यत् ॥१॥ अग्ने क्रत्वाक्रतू ५ रनु यत्ते पवित्रमर्चिषि ॥ अग्ने विततमंतरा ॥ ब्रह्म तेन पुनीमहे ॥ उभाभ्यां देवसवितः ॥ पवित्रेण सवेन च ॥ इदं ब्रह्म पुनीमहे ॥ वैश्वदेवी पुनती देव्यागात् यस्यै बह्वीस्तनुवो वीतपृष्ठाः ॥ तया मदन्तः सधमाद्येषु वय ५ स्याम पतयो रयीणाम् ॥ २ ॥ वैश्वानरो रश्मिभिर्मा पुनातु ॥ वातः प्राणेनेषि रोमयो भूः ॥ द्यावापृथिवी पयसा पयोभिः ॥ ऋतावरी यज्ञिये मा पुनीताम् ॥ बृहद्भिः सवितस्तृभिः ॥ वर्षिष्ठैर्देवयन्मभिः॥ अग्ने दक्षैः पुनाहि मा ॥ येन देवा अपुनत ॥ यनापो दिव्यंकशः ॥ तेन दिव्येन ब्रह्मणा ॥ ३ ॥ इदं ब्रह्म पुनीमहे॥ यः पावमानीरध्येति ॥ ऋषिभिः संभृत ५ रसम् ॥ सर्व ५ सपूतमश्नाति ॥ स्वदितं मातरिश्वना ॥ पावमानीर्यो अध्येति ॥ ऋषिभिः संभृत ५ रसम् ॥ तस्मै सरस्वतीदुहे ॥ क्षीर ५ सर्पिर्मधूदकम् ॥ पावमानीः स्वस्त्ययनीः ॥ ४ ॥ सुदुघाहि पयस्वतीः ॥ ऋषिभिः संभृतो रसः ॥ ब्राह्मणेष्वमृत ५ हितम् ॥ पावमानीर्दिशंतु नः ॥ इमं लोकमथो अमुम् ॥ कामान्त्समर्धयंतु नः ॥ देवीर्देवैः समाभृताः ॥ पावमानीः स्वस्त्ययनीः ॥ सुदुघाहि घृतश्चुतः ॥ ऋषिभिः संभृतो रसः ॥ ५ ॥ ब्राह्मणेष्वमृत ५ हितम् ॥ येन देवाः पवित्रेण ॥ आत्मानं पुनते सदा ॥ तेन सहस्रधारेण ॥ पावमान्यः पुनंतु मा प्राजापत्यं पवित्रम् ॥ शतोद्याम ५ हिरण्मयम् ॥ तेन ब्रह्मविदो वयम् ॥ पूतं ब्रह्म पुनीमहे ॥ इन्द्रः सुनीती सह मा पुनातु॥ सोमः स्वस्त्या वरुणः समीच्या ॥ यमो राजा प्रमृणाभिः पुनातु मा ॥ जातवेद मोर्जयंत्या पुनातु सः ॥ ६ ॥ इत्यनुवाकेनचाभिषिच्य ॥ व्याहृतिभिरिदं विष्णुरिति च फलयवदूर्वाः समर्प्य रक्षोहणमिति देवहस्ते कंकणं बद्धा वाससाच्छाद्य ॥ अवतेहेळो उदुत्तममिति जलेधिवासयेत ॥ अथ चलप्रतिष्ठायामग्निं प्रतिष्ठाप्य ध्यात्वा ग्रहादितद्विधिपक्षे ग्रहान् वासुदेवताश्च प्रतिष्ठाप्यान्वाधाय ॥ चक्षुषी आज्येनेत्यंते ग्रहादिहोमपक्षे ग्रहानधिदेवतादींश्च समिच्चर्वाज्येन वास्तुपीठदेवताश्चान्वाधाने उद्दिश्य ॥ इदं पृथिवीं शर्वम् अग्निम् अग्निमूर्तिं पशुपतिं यमं यजमानमूर्त्तिम् ॥ उग्रं निर्ऋतिं सूर्यमूर्तिं रुद्रं वरुणं जलमूर्तिं भवं वायुं वायुमूर्तिम् ईशानं कुबेरं सोममूर्तिं महादेवम् ईशानम् आकाशं भीमम् एताः लोकपालमूर्तिमूर्तिपतिदेवताः ॥ पलाशोदुंबराश्वत्थशम्यपामार्गसमिद्भिराज्याहुतिभिस्तिलाहुतिश्च प्रतिदैवतं प्रतिद्रव्यमष्टाष्टसंख्याकाभिः स्थाप्य देवतामुकां पलाशोदुम्बराश्वत्थशम्यपामार्गसर्षपैश्चर्वाज्यैः प्रतिद्रव्यमष्टोत्तरसहस्रमष्टोत्तरशतमष्टाविंशतिसंख्यया वा ॥ ओं भूर्यजुर्भिरित्यनुवाकेन विश्वान्देवांस्तिलाज्याभ्यां दशदशाहुतिभिः ॥ एवं द्वि-

तीये पर्याये एता एव देवतास्तत्तत्संख्याकैस्तैरेव द्रव्यैरेवं तृतीये पर्याये एता एव देवतास्तत्तत्संख्याकैस्तैरेव द्रव्यैर्ब्रह्मादिमंडलदेवतास्तिलाज्याहुतिभिः प्रतिदेवतं दशदशसंख्याकाभिः शेषेण स्विष्टकृतमित्यादि ॥ शूर्पे प्रधानदेवतार्थं तूष्णीं चतुरो मुष्टीन्निरूप्य होमपर्याप्तं गृहीत्वा तथैव प्रोक्ष्य गोक्षीरे नीवारचरुं श्रपयेदाज्यभागांते यजमान इदमुपकल्पितमन्वाधानोक्तद्रव्यजातमन्वाधानोक्ताहुतिसंख्यापर्याप्तमन्वाधानोक्ताभ्यो यक्ष्यमाणाभ्यो देवताभ्योस्तु न ममेति त्यागं कुर्यात् ॥ गृहसिद्धान्नादिना ग्रहादिहोमंविधाय लोकपालमूर्तिमूर्तिपतिभ्यः समित्पंचकं तिलाज्ये च जुहुयात् ॥ प्रतिद्रव्यहोमांते देवं पादनाभिशिरसि स्पृशेत् ॥ आज्यहोमे चोत्तरतः सजलकुंभे संपातान्नयेत् ॥ तेषां मंत्राः ॥ इंद्रायेंदो इतींद्रस्य स्योनेति पृथिवीमूर्त्तेः ॥ अघोरेभ्य इति तत्पतेः शर्वस्य ॥ अग्न आयाहीत्यग्नेः ॥ अग्निंदूतमित्यग्निमूर्त्तेः ॥ नमः शर्वाय च पशुपतये चेति पशुपतेः ॥ यमाय सोममिति यमस्य ॥ असिहि वीरेति यजमानमूर्तेः ॥ स्तुहि श्रुतमिति तत्पतेरुग्रस्य ॥ असुन्वंतमिति निर्ऋतेः ॥ आकृष्णेनेति सूर्यमूर्तेः ॥ यो रुद्रो अग्नाविति तत्पतेरुद्रस्य इमं मे वरुणेति वरुणस्य ॥ शन्नो देवीति जलमूर्तेः नमो भवाय चेति भवस्य ॥ आनो नियुद्भिः० वायोः ॥ वात आवातु वायुमूर्तेः ॥ तमीशानं० ॥ ईशानस्य ॥ आप्यायस्व० कुबेरस्य ॥ वयं सोम० सोममूर्तेः ॥ तत्पुरुषाय० महादेवस्य ॥ अभित्वा देव० ईशानस्य ॥ आदिप्रत्नस्य० आकाशस्य ॥ नम उग्राय चेति भीमस्य ॥ ततः स्थाप्यदेवमंत्रेण समित्पंचकपायसचरुतिलाज्यहोमः ॥ प्रतिद्रव्यहोमांते देवे पादनाभिशिरःस्पर्शः ॥ देवमंत्रश्च तांत्रिको मूलमंत्रो देवगायत्री वा वैदिको वा ग्राह्यः ॥ अग्निर्यजुर्भिः ॥ सवितास्तोमैः ॥ इंद्र उक्थामदैः ॥ मित्रावरुणावाशिषा ॥ अंगिरसो धिष्णियैरग्निभिः ॥ मरुतः सहोहविर्धानाभ्याम् ॥ आपः प्रोक्षणीभिः ॥ ओषधयो बर्हिषा ॥ अदितिर्वेद्या ॥ सोमो दीक्षया ॥ त्वष्टेध्मेन ॥ विष्णुर्यज्ञेन ॥ वसव आज्येन ॥ आदित्या दक्षिणाभिः॥विश्वेदेवा ऊर्जा ॥ पूषा स्वगाकारेण ॥ बृहस्पतिः पुरोधसा ॥ प्रजापतिरुद्गीथेन ॥ अंतरिक्षं पवित्रेण ॥ वायुः पात्रैः ॥ अह ४ श्रद्धया स्वाहेत्यनुवाकेन तिलाज्ययोर्दशदशाहुतयः ॥ ततो देवस्य पादौ स्पृशेत् ॥ संपातजलेन देवमभिषिंचेत् ॥ एवमेव द्वितीयपर्यायेण हुत्वा देवस्य नाभिं स्पृशेत् ॥ एवं तृतीयपर्यायेण हुत्वा शिरः स्पृशेत् ॥ प्रतिपर्यायं संपाताभिषेकः ॥ एकपर्याये आहुतिसंख्या ॥ पलाशसमिधः १९२ औदुंबर १९२ अश्वत्थ १९२ शमी १९२ अपामार्ग १९२ आज्यं १९२ तिलाः १९२ स्थाप्यदेवस्याष्टाविंशतिपक्षे ॥ समित्पंचकं १४० चर्वाज्यतिलाः ८४ अनुवाक २० मिलिताः १५८८ पर्यायत्रये ४७६४ एवं हुत्वार्चां शोधयेत् ॥ देवं नत्वा ॥ "स्वागतं देवदेवेश विश्वरूप नमोस्तुते ॥ शुद्धेपि त्वद-

धिष्ठाने शुद्धिं कुर्मः सहस्व ताम्" इति प्रार्थ्य ॥ उत्तिष्ठ ब्रह्मणस्पत इति सर्विगुत्थाप्याभ्युत्तारण कार्यम् ॥ अग्निः सप्तिमिति सूक्तमग्निपदहीनं पठित्वा तत्सहितं पुनः पठेत् ॥ एवमष्टशतमष्टाविंशतिवारं वा पठन् जलं पातयेत् ॥ ततोर्चा द्वादशवारं मृदा जलेन च प्रक्षाल्य मंत्रैः पचगव्यं कृत्वा ॥ पयः पृथिव्यां पय ओषधीषु पयो दिव्यंतरिक्षे पयोधाः ॥ पयस्वतीः प्रदिशः संतु मह्यम् ॥ आवो राजानमिति च संस्नाप्य आप्यायस्वेति पञ्चमन्त्रैः पञ्चामृतेन संस्नाप्य लिंगं चेन्नमस्ते रुद्र इत्यष्टाभिः संस्नाप्य घृताभ्यंगमुद्वर्तनमुष्णोदकेन क्षालनं च कृत्वा गंधं दत्त्वा संपातोदकैरभिषिच्य सपल्लवैश्चतुर्भिः कुंभैः क्रमेणापोहिष्ठा० यो वः शिवतमो० तस्मा० आकलशेषु० इति संस्नाप्य समुद्रज्येष्ठेति चतसृभिराकलशेष्विति च मिलितचतुःकुंभैः संस्नाप्य ॥ औदुम्बरादिपीठर्चामुपवेश्य परितोष्टदिक्षु सजलकुंभेषु गन्धपुष्पदूर्वाः क्षिप्त्वाश्वकुंभे सप्तमृदः ॥ द्वितीये पुष्करपर्णशमीविकंकताश्मन्तकत्वचः पल्लवांश्च ॥ तृतीये सप्तधान्यानि ॥ चतुर्थे पञ्चरत्नानि ॥ पंचमे फलपुष्पाणि ॥ षष्ठे कुशदूर्वागोरोचनाः सप्तमे संपातोदकम् ॥ अष्टमे सर्वौषधीः क्षिप्त्वा क्रमेणापोहिष्ठेति त्रिभिः हिरण्यवर्णाः शुचय इति चतुर्भिः पवमानानुवाकेन चाभिषिच्य एककुंभे शमीपलाशवटखदिरबिल्वाश्वत्थविकंकतपनसाम्रशिरीषोदुंबराणां पल्लवान् कषायांश्च क्षिप्त्वाश्वत्थेव इत्यभिषिच्य पंचरत्नोदकेन हिरण्यवर्णाः शुचय इति संस्नाप्य वाससी दत्त्वोपरि वितानं बध्नंति केचित् ॥ यज्ञोपवीतगंधपुष्पधूपदीपान्दत्त्वा ॥ हिरण्यगर्भः० १ य आत्मदा० २ यः प्राणतो० ३ यस्येमे० ४ येन द्यौ० ५ यं क्रंदसी० ६ आपो हयत्० ७ यश्चिदापो० ८ इत्यष्टौ पीठदीपान्दत्त्वा सुवर्णशलाकया तैजसपात्रस्थं मधुघृतं च गृहीत्वा चित्रं देवाना० तेजोसि शुक्रमस्यमृतमसि धामनामासि ॥ प्रियं देवानामनाधृष्टं देवयजनम् इति मन्त्राभ्याम् ॥ ॐ " नमो भगवते तुभ्यं शिवाय हरये नमः ॥ हिरण्यरेतसे विष्णो विश्वरूपाय ते नमः" इति च दक्षिणसव्ये देवनेत्रे मन्त्रावृत्त्या लिखेत् ॥ अंजंति त्वेत्यंजनेनाङ्क्त्वा ॥ देवस्य त्वा सवितुः प्रसवे० इंद्रस्येंद्रियेणानज्मीति मध्वाज्यशर्कराभिरंक्त्वा अंजनेन पुनरंजयेत् ॥ तत आदर्शभक्ष्यादि दर्शयेत् ॥ अत्र कर्ता चार्याय गामृत्विग्भ्यो दक्षिणां दद्यात् ॥ आचार्यः प्रत्यूचमादौ प्रणवं वदन्पुरुषसूक्तेन स्तुत्वा वंशपात्रस्थपंचवर्णौदनेन देवं नीराजयित्वा रुद्राय चतुष्पथादौ दद्यात् ॥ मन्त्रस्तु ॥ "ॐ नमो रुद्राय सर्वभूताधिपतये दीप्तशूलधरायोमादयिताय विश्वाधिपतये रुद्राय वै नमो नमः ॥ शिवमगर्हितं कर्मास्तु स्वाहा ॥" इति ॥ अश्वत्थपर्णे भूतेभ्यो नम इति ॥ अथाचार्यः सर्वतोभद्रदेवता आवाहयेत् ॥ मध्ये ब्रह्माणम् ॥ पूर्वादिदिक्षु इंद्रादिलोकपालान् ॥ ईशानेंद्राद्यंतरालेषु ॥ वसून् १ रुद्रान् २ आदित्यान् ३ अश्विनौ ४ विश्वान्देवान् ५ पितॄन् ६ नागान् ७ स्कंदवृषौ ८ ब्रह्मेशानाद्यंत-

रालेषु दक्षम् १ विष्णुम् २ दुर्गाम् ३ स्वधाकारम् ४ मृत्युरोगान् ५ ॥ समुद्रान्सरितः ६ मरुतः ७ गणपतिं ८ मध्ये पृथिवीं मेरुं संस्थाप्य देवं चावाह्य प्रागादिदिक्षु ॥ वज्रं शक्तिं दंडं खड्गं पाशम् अंकुशं गदां शूलम् ॥ तद्बाह्ये गौतमं भरद्वाजं विश्वामित्रं कश्यपं जमदग्निं वसिष्ठमत्रिमरुंधतीं च ॥ तद्बाह्ये नवग्रहान् ॥ तद्बाह्ये ऐंद्रीं कौमारीं ब्राह्मीं वाराहीं चामुंडां वैष्णवीं माहेश्वरीं वैनायकीम् ॥ एता नामभिरावाह्य संपूज्य प्रतिमायां देवं तन्मंत्रेणावाह्य मंडलमध्ये प्रतिमां सुप्रतिष्ठितो भवेति निवेश्य संपूज्य वह्नौ मंडलदेवतानां नामभिस्तिलाज्येन दशदशाहुतीर्हुत्वा पुष्पांजलिं समर्प्य नमो महदिति देवं नत्वा मंडलादुत्तरतः स्वस्तिके मंचकं तदुपरि शय्यां कृत्वोत्तिष्ठेति देवमुत्थाप्य मंगलघोषैः शय्यायां देवमुपवेश्य ॥ पुरुषसूक्तोत्तरमहान्यासनारायणाभ्यां स्तुत्वा देवे न्यासं कुर्यात् ॥ तथाहि ॥ पुरुषात्मने नमः ॥ प्राणात्मने० प्रकृतितत्त्वाय० बुद्धितत्त्वाय० अहंकारतत्त्वाय० मनस्तत्त्वाय० इति सर्वांगेषु ॥ प्रकृतितत्त्वाय० बुद्धितत्त्वाय० हृदि शब्दतत्त्वाय० शिरसि ॥ स्पर्शतत्त्वाय० त्वचि ॥ रूपतत्त्वाय० हृदि ॥ एवं हृद्येव रसगंधश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थपृथिव्यप्तेजोवाय्वाकाशसत्त्वरजस्तमोदेहतत्त्वानि विन्यसेत् ॥ ततः पुरुषसूक्ताद्यम् ऋग्द्वयं करयोः ॥ तदुत्तरद्वयं जानुनोः ॥ तदुत्तरद्वयं कट्योः ॥ ततः तिस्रो नाभिहृत्कंठेषु ततो द्वयं बाह्वोः ॥ ततो द्वयं नासयोः ॥ ततो द्वयमक्ष्णोः ॥ अंत्यां शिरसि ॥ ततः सुखशायी भवेति शय्यायां देवं स्वापयित्वा ॥ मण्डलशय्ययोरंतरा न गंतव्यमिति प्रेषं दत्त्वा स्विष्टकृदादिहोमशेषं समाप्य मंडलदेवताभ्यो नामभिश्चरुणा बलीन्दद्यात् ॥ नीवाश्चरुशेषेण दिग्बलिम् ॥ ततो धामंत इति पूर्णाहुतिं जुहुयात् ॥ इत्यधिवासनम् ॥

## अथ स्थिरार्चायां क्रमो विशेषश्च ।

संकल्पादिजलाधिवासांतं कृत्वा देवं नत्वा " स्वागतं देवदेवेश ॥ " इत्यादि प्रार्थनोत्थापनाग्न्युत्तारणादिनेत्रोन्मीलनांतं पूर्ववत्॥तत्र स्थिरे शिवलिंगे स्वर्णसूच्या गंधेन ॥ ॐ नमो भगवते रुद्राय हिरण्यरेतसे पराय परमात्मने विश्वरूपायोमाप्रियाय नम इत्यङ्कृत्वा अंजनादिनांजयेदिति नेत्रोन्मीलने लिंगे विशेषः ॥ ततः सूक्तस्तुत्यादिमंडलदेवतास्थापनांतम् ॥ ततो मंडले मूर्तिनिवेशस्ततः शय्यायां देवतारोहणं ततः स्तुतिः पूर्वोक्तन्यासाः ततः शय्यायां देवशयनम् ॥ ततोग्निस्थापनादि । पूर्वोक्तान्वाधाने विष्णौ नारायणं षोडशाज्याहुतिभिः शिवश्चेत् यातइषुः द्रापेसहस्राणीत्यनुवाकस्थऋग्भी रुद्रमाज्येनेति प्रधानोत्तरमूह इति विशेषः ॥ लोकपालमूर्तिमूर्तिपतिहोमांतं पूर्ववत् ॥ स्थाप्यदेवताहोमे नैवारश्चरुर्नास्ति सप्तैव हवींषि ॥ ततश्च विष्णोः स्थिरार्चायां पूर्वोक्तसमित्तिलाज्यहोमोत्तरं

पुरुषसूक्तेन प्रत्यृचमाज्यं हुत्वा इदं विष्णुरिति पादौ स्पृष्ट्वा पुनस्ता एव हुत्वा ॥ अतो देवेति शिरः स्पृष्ट्वा पुनस्ता एव हुत्वा पुरुषसूक्तेन सर्वांगं स्पृशेत् ॥ स्थिरं लिंगं चेत्सामिदाज्यतिलहोमांते यात इषुरित्यनुवाकांतेन द्रापे इति सहस्राणीत्यनुवाकाभ्यां च प्रत्यृचमाज्यं हुत्वा सर्वो वै रुद्र इति मूलं स्पृशेत् ॥ पुनस्ता एव हुत्वा कद्रुद्रायेति मध्यं पुनस्ता एव हुत्वा नमो हिरण्यबाहव इत्यग्रं स्पृशेत् पुनस्ता एव हुत्वा सर्वरुद्रेण सर्वांगं स्पृशेत ॥ इत्यधिवासने विशेषः ॥ परेद्युः पीठिकां स्नापयित्वा महीमूष्त्वित्यावाह्य ॥ अदितिर्द्यौरिति स्तुत्वा ह्रीं नम इति संपूज्य तेनैव पूर्णाहुतिं हुत्वा ॥ उत्तिष्ठ ब्रह्मणस्पत इति देवमुत्थाप्य पुष्पांजलिं दत्त्वा पुरुषसूक्तेन स्तुत्वा ॥ उदुत्यमित्युत्थाप्य कनिक्रददिति सूक्तेन विष्णुं सद्यो जातामिति पंचानुवाकैर्लिंगं गृहं प्रवेश्य पीठिकायामिंद्रादिनामभिरष्टरत्नानि क्षिप्त्वा सप्तधान्यरौप्यमनःशिलाः क्षिप्त्वा पायसेन संलिप्य प्रणवेनांगन्यासं कृत्वा सुवर्णशलाकामंतरितां कृत्वा सुलग्ने प्रतितिष्ठ परमेश्वरेत्युक्त्वाऽतो देवेति विष्णुं रुद्रेण लिंगं च स्थापयेत् ॥ ततश्चरुहोमप्राणप्रतिष्ठादि इति ॥ ततः स्थिरार्चायामधिवासने परेद्युःकृत्ये च विशेषोन्यत्सर्वमुक्तवक्ष्यमाणचलार्चावदेव ॥ अथ चलप्रतिष्ठायामधिवासनांते परेद्युरेकाहपक्षे सद्यो वा उत्तिष्ठ ब्रह्म इति देवमुत्थाप्य पुरुषसूक्तोत्तरनारायणाभ्यां स्तुयात् ॥

## अथ प्रायःस्थिरचलार्चयोः साधारणप्रयोगः ।

प्रतिष्ठांगं परेद्युर्होमं करिष्य इति संकल्प्य चक्षुषी आज्येनेत्यंते स्थाप्यदेवं तन्मंत्रेण घृतपक्वव्रीहिचरुणा दशाहुतिभिरग्निं सोमं धन्वंतरिं कुहूमनुमतिं प्रजापतिं परमेष्ठिनं ब्रह्माणमग्निं सोमम् अग्निमन्नादमग्निमन्नपतिं प्रजापतिं विश्वान्देवान् सर्वान्देवानग्निं स्विष्टकृतम् ॥ पूजांगहोमे विष्णुश्चेत्संकर्षणादिद्वादशदेवताः शार्ङ्गिणं श्रियं सरस्वतीं विष्णुं कृसरेणैकैकयाहुत्या विष्णुं षड्वारं कृसरेण ॥ शिवश्चेद्रुद्रं शर्वमीशानं पशुपतिं रुद्रमुग्रं भीमं महांतं कृसरेणैकैकया० भवस्य देवस्य पत्नीमित्याद्यष्टौ गुडौदनेनैकैकया भवस्य देवस्य सुतमित्यादि ८ हरिद्रौदनेन एकै० रुद्रं सप्तदशवारं शिवं शंकरं सहमानं शितिकंठं कपर्दिनं ताम्रमरुणमपगुरमाणं हिरण्यबाहुं सर्पिंजरं बभ्लुशं हिरण्यमेताः कृसरेणैकैकया० ॥ शेषेण स्विष्टकृतमित्यादि ॥ शूर्पे तूष्णीं स्थाप्यदेवतायै चतुर्मुष्टीनग्न्यादिषोडशदेवताभ्यो नाम्ना चतुश्चतुर्मुष्टीन्निरूप्य तथैव प्रोक्ष्य सघृतजले श्रपयित्वा सुच्यावदानधर्मेण स्थाप्यदेवमंत्रेण दशाहुतीर्हुत्वा नामभिर्जुहुयात् ॥ अग्नये स्वाहा ॥ सोमाय० धन्वंतरये० कुह्वै० अनुमत्यै० प्रजापतये० परमेष्ठिने० ब्रह्मणे० अग्नये० सोमाय० अग्नयेन्नादाय० अग्नयेन्नपतये० प्रजापतये० विश्वेभ्यो देवेभ्यः० सर्वेभ्यो देवेभ्यः० भूर्भुवः स्वरग्नये स्विष्टकृते स्वाहा ॥ १६ ॥ इति ॥

सप्त ते अग्ने समिधः सप्तजिह्वाः सप्तऋषयः सप्तधामप्रियाणि ॥ सप्तहोत्राः सप्तधात्वा यजंति सप्तयोनीरापृणस्वाघृतेन ॥ पुनस्त्वादित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथयज्ञैः ॥ घृतेन त्वं तन्वं वर्धयस्व सत्याः संतु यजमानस्य कामा इति मंत्राभ्यां पूर्णाहुतिं कृत्वाचार्यो या ओषधीरिति पुष्पफलसर्वौषधीः समर्प्य संपातोदकं ताम्रपात्रे आदाय देवमंत्रेण शतवारमभिमंत्र्य तेन देवशिरसि सिंचेत् ॥ तत उत्तिष्ठ ब्रह्मण० इति देवमुत्थाप्य विश्वतश्चक्षरित्युपतिष्ठेत् ॥ एते उत्थापनोपस्थाने चलार्चायामेव ॥ देवं ध्यात्वा जपेत् ब्रह्मणे नमः विष्णवे नमः रुद्राय नमः इंद्रादीनष्टौ० ८ वसुभ्यो० रुद्रेभ्यो० आदित्येभ्यो० अश्विभ्यां० मरुद्भ्यो० कुबेराय० गंगादिमहानदीभ्यो० अग्नीषोमाभ्यां० इंद्राग्निभ्यां० द्यावापृथिवीभ्यां० धन्वंतरये० सर्वेशाय० विश्वेभ्यो देवेभ्यो० ब्रह्मण इति ॥ ततः संपातोदकेन यजमानाभिषेकः ॥ देवं ध्यात्वा प्रतितिष्ठ परमेश्वरेति पुष्पांजलिं दत्त्वा सच्चिदानंदं ब्रह्मैव भक्तानुग्रहाय गृहीतविग्रहं स्वायुधाढ्यं निजवाहनाद्युपेतं निजहृत्कमलेवस्थितं सर्वलोकसाक्षिणमणीयांसं परमेष्ठयासि परमां श्रियं गमयेति मंत्रेण पुष्पांजलावागतं विभाव्यार्चायां विन्यस्य प्राणप्रतिष्ठां कुर्यात् ॥ यथा ॥ अस्य श्रीप्राणप्रतिष्ठामंत्रस्य ॥ ब्रह्मविष्णुरुद्रा ऋषयः ॥ ऋग्यजुःसामानि च्छंदांसि ॥ क्रियामयवपुः प्राणाख्या देवता ॥ आं बीजं क्रौं शक्तिः ॥ प्राणप्रतिष्ठायां विनियोगः ॥ ब्रह्मविष्णुरुद्रऋषिभ्यो नमः शिरसि ॥ ऋग्यजुःसामच्छंदोभ्यो० मुखे ॥ प्राणाख्यदेवतायै० हृदि ॥ आं बीजाय नमः गुह्ये ॥ क्रौं शक्त्यै० पादयोः ॥ ॐ झं ञं टं ठं डं ढं णं उं श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मने ईं शिरसे स्वाहा ॥ ॐ टं ठं डं ढं णं उं श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मने ऊं शिखायै वषट् ॥ ॐ तं थं दं धं नं ऐं वाक्पाणिपादपायूपस्थात्मने ऐं कवचाय हुं ॥ ॐ पं फं बं भं मं ओं वचनादानविहरणोत्सर्गानंदात्मने औं नेत्रत्रयाय वौषट् ॥ ॐ यं रं लं वं शं षं सं हं क्षं अं मनोबुद्ध्यहंकारचित्तात्मने अः अस्त्राय फट् ॥ एवमात्मनि देवे च कृत्वा देवं स्पृष्ट्वा जपेत् ॥ ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हं सः देवस्य प्राणा इह प्राणाः ॥ ॐ आं ह्रीं हं सः देवस्य जीव इह स्थितः ॥ ॐ आं ह्रीं० हं सः देवस्य सर्वेंद्रियाणि ॥ ॐ आं ह्रीं० हं सः देवस्य वाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणा इहागत्य स्वस्तये सुखेन सुचिरं तिष्ठंतु स्वाहा ॥ अर्चाहृद्यंगुष्ठं दत्त्वा जपेत् ॥ "अस्यै प्राणाः प्रतिष्ठंतु अस्यै प्राणाश्चरंतु च ॥ अस्यै देवत्वमर्चायै मा महेति च कश्च न ॥" प्रणवेन संनिरुध्य सजीवं ध्यात्वा ध्रुवाद्यौरिति त्र्यृचं जपित्वा कर्णे गायत्रीं देवमंत्रं च जपित्वा पुरुषसूक्तेनोपस्थाय पादनाभिशिरः स्पृष्ट्वा ॥ इहैवैधीति त्रिर्जपेत् ॥ ततः कर्ता "स्वागतं देवदेवेश मद्भाग्यात्त्वमिहागतः ॥ प्राकृतं त्वमदृष्ट्वा मां बालवत्परिपालय ॥ धर्मार्थकामसिद्ध्यर्थं स्थिरो भव शिवाय नः ॥ सान्निध्यं तु तदा देव स्वार्चायां परिक-

ल्पय ॥ यावच्चंद्रावनीसूर्यास्तिष्ठंत्यप्रतिघातिनः ॥ तावत्त्वयात्र देवेश स्थेयं भक्तानुकंपया ॥ भगवन्देवदेवेश त्वं पिता सर्वदेहिनाम् ॥ येन रूपेण भगवंस्त्वया व्याप्तं चराचरम् ॥ तेन रूपेण देवेश स्वार्चायां सन्निधौ भव" इति नमेत् ॥ अथाचार्यः कर्ता वा लिंगमर्चां वा भूः पुरुषमावाहयामि ॥ भुवः पुरुषमावाह० ॥ स्वः पुरुष० ॥ भूर्भुवस्वः पुरुष० ॥ इत्यावाह्य प्रणवेनासनं दत्त्वा दूर्वाश्यामाकविष्णुक्रांतापद्मभिश्रं पाद्यम् ॥ ॐ इमा आपः शिवतमाः पूताः पूततमा मेध्या मेध्यतमा अमृता अमृतरसाः ॥ पाद्यास्ता जुषतां प्रतिगृह्यतां प्रतिगृह्णातु भगवान् महाविष्णुर्विष्णवे नम इति पाद्यं भगवान् महादेवो रुद्राय नम इति लिंगे ॥ एवं देवतांतरेषूह्यम् ॥ इमा आपः शिवतमा० आचमनीयास्ताजुषतां प्रतिगृह्य० इत्याचमनम् ॥ इमा आ०अर्घ्यास्ता० इत्यर्घ्यं० पञ्चामृतस्नानम् ॥ देवं मंत्रैः संस्नाप्य ददं विष्णुरिति विष्णो नमो अस्तु नीलग्रीवायेति लिंगे कंकणं विसृज्य वस्त्रं यज्ञोपवीतं च दत्त्वा ॥ " इमे गंधाः शुभा दिव्याः सर्वगन्धैरलंकृताः ॥ पूता ब्रह्म पवित्रेण पूताः सूर्यस्य रश्मिभिः " ॥ पूता इत्यादिपूर्ववदिति गन्धम् ॥ "इमे माल्याः शुभा दिव्याः सर्वमाल्यैरलंकृताः ॥" पूता इत्यादि इति मालाः ॥ इमे पुष्पा इति पुष्पाणि ॥ वनस्पतिरसोद्भूतो० धूपोयं प्रतिगृह्यताम्॥ "प्रतिगृह्णातु भगवानित्यादि ॥ ज्योतिः शुक्रं च तेजश्च देवानां सततं प्रियम् ॥ भास्करः सर्वभूतानां दीपो० ताम् ॥" प्रतिगृह्णातु भगवानिति दीपं दत्त्वा ॥ विष्णौ संकर्षणादिद्वादशनामभिः पुष्पाणि समर्प्य तैरेव तर्पणं कृत्वा पायसगुडौदनचित्रौदनानि पवित्रं ते विततमिति निवेद्य संकर्षणादिनामभिर्द्वादशगृहासिद्धान्नकृसराहुतीर्हुत्वा कृसरेणैव शार्ङ्गिणे० श्रियै० सरस्वत्यै० विष्णवे० इति हुत्वा ॥ विष्णोर्नुकं० तदस्य प्रियम्० प्रतद्विष्णु० परोमात्रया० विचक्रमे० त्रिर्देवः पृथिवीं० इतिषण्मंत्रैर्जुहुयात् ॥ लिंगे तु दीपांतं कृत्वा भवाय देवाय० शर्वाय ईशानाय देवाय० पशुपतये दे० रुद्राय देवाय० उग्राय दे० भीमाय दे० महते देवाय नम इति पुष्पाणि दत्त्वा तैरेव तर्पणं कृत्वा पवित्रं ते इति पायसं गुडौदनं च निवेद्य भवाय देवाय स्वाहेत्याद्यष्टाभिः कृसरं जुहुयात् ॥ तिलमिश्रौदनः कृसरः ॥ भवस्य देवस्य पत्न्यै स्वाहेत्याद्यष्टभिर्गुडौदनं हुत्वा ॥ भवस्य देवस्य सुताय स्वाहेत्याद्यष्टभिर्हरिद्रौदनं हुत्वा त्र्यंबकं० ॥ मानोमहांत०॥ मानस्तोके० आरात्ते० विकिरिद्र० सहस्राणि सहस्र० इति द्वादश ऋचः ॥ एतैः कृसरं हुत्वा ॥ शिवाय० शंकराय० सहमानाय० शितिकंठाय० कपर्दिने० ताम्राय० अरुणाय० अपगुरमाणाय० हिरण्यबाहवे० शष्पिंजराय० बभ्लुशाय० हिरण्यायेति द्वादशनामभिर्जुहुयात् स्विष्टकृदादिहोमशेषं समाप्य पूर्वोक्तसर्वहविर्भिर्विष्णवे लिंगाय वा बलिं दद्यात् ॥ मंत्रस्तु "त्वामेकमाद्यं पुरुषं पुरातनं नारायणं विश्वसृजं यजामहे ॥ त्वमेव यज्ञो विहिते

विधेयस्त्वमात्मनात्मन्प्रतिगृह्णीष्व हव्यम्" ॥ लिंगे तु नारायणपदे रुद्रं शिवमिति वदेत् ॥ अश्वत्थपर्णे भूर्भुवः स्वरोमिति हुतशेषं निधाय प्रदक्षिणीकृत्य ॥ विश्वभुजे सर्वभुजे आत्मने परमात्मने नम इति नत्वाचार्याय द्वादश तिस्र एकां वा गां दत्त्वा ऋत्विग्भ्यो दक्षिणां दत्त्वा शतं द्वादश वा विप्रान्भोजयेदिति ॥ प्रासादे नूतने जलाशयोक्तप्रतिष्ठाविधिः कार्यः ॥ तत्र गोरुत्तारणपात्रीप्रक्षेपादि न कुर्यात् ॥ वारुणहोमस्थाने वास्तुहोमः ॥ इति स्थिरार्चाचलार्चयोः प्रतिष्ठाप्रयोगः ॥

## अथातोपि संक्षिप्त एकाध्वरविधानेन चलप्रतिष्ठाप्रयोगः।

संकल्पादिनांदीश्राद्धांतं प्राग्वत् ॥ एकमाचार्यं वृणुयात् ॥ आचार्योमुकदेवप्रतिष्ठाकर्म करिष्ये इत्यादिसर्षपविकिरणांते सर्वतोभद्रमंडले प्राग्वन्नामभिर्ब्रह्मादिमंडलदेवता आवाह्य संपूज्य यथागृह्यमग्निं प्रतिष्ठाप्यान्वादध्यात् ॥ आज्यभागांते स्थाप्यदेवतां सहस्रमष्टोत्तरशतं वा समिदाज्यचरुतिलद्रव्यैर्ब्रह्मादिमण्डलदेवताः प्रत्येकं दशदश तिलाज्याहुतिभिः शेषेणेत्यादि ॥ तूष्णीं निर्वापप्रोक्षणे आज्यभागांते तडागनदीतीरगोष्ठचत्वरपर्वतगजाश्वह्रदवल्मीकसंगमेति दशमृद्भिरष्टवारं देवं संस्नाप्य पञ्चगव्यैः क्रमेण स्थापयित्वा दूर्वासिद्धार्थपल्लवोपेतैरष्टकलशैरापोहिष्ठादिमन्त्रैरभिषिच्याग्न्युत्तारणं कुर्यात् ॥ सर्वतोभद्रपीठे देवमुपवेश्य नाम्ना वस्त्रगन्धधूपादि दत्त्वाष्टदिक्षु पल्लवादियुतोदकुंभानष्टौ दीपांश्च संस्थाप्य प्राग्वन्नेत्रोन्मीलनं चित्रान्नेन बलिं दत्त्वा पुरुषसूक्तेन स्तुत्वोक्तद्रव्यचतुष्टयं स्थाप्यदेवमंत्रेण हुत्वा एकैकद्रव्यहोमांते देवं स्पृशेत् । आज्यहोमे कुंभे संपातान् क्षिपेत् ॥ मंडलदेवताभ्यो हुत्वा होमशेषं समाप्य पूर्णाहुतिं कुर्यात् ॥ ततः पूर्वोक्तरीत्या सूक्तन्यासावाहनप्राणप्रतिष्ठांतं कृत्वा इहैवैधीति त्र्यृचं पुरुषसूक्तं च जपित्वा मूलमंत्रादिनावाहनादिपंचामृतस्नानांते संपातोदकैरिमा आपः शिवतमा इत्यादिनाभिषेकः॥ वस्त्रादिनैवेद्यांतं प्राग्वत् ॥ तांबूलफलदक्षिणानीराजननमस्कारप्रदक्षिणादि विधाय ॥ पुष्पांजलिं दत्त्वा साचार्यः कर्ता देवं नत्वा क्षमाप्याचार्यदक्षिणां तेऽष्टकुंभोदकैर्यजमानाभिषेकः ॥ विष्णुं स्मृत्वा कर्मेश्वरेर्पयेदिति संक्षेपः ॥

## अथ पुनरर्चानिमित्तानि पुनः प्रतिष्ठा।

मद्यचांडालस्पृष्टा वह्निदग्धा विप्ररक्तदूषिता शवपापिस्पृष्टा च प्रतिमा पुनः संस्कार्या ॥ खंडिते स्फुटिते स्थानभ्रंशे पूजनाभावेश्वगर्दभादिस्पर्शे पतितरजस्वलाचौरैः स्पर्शे च पुनः प्रतिष्ठा॥खंडितां भग्नां विधिनोद्धृत्यान्यां संस्थाप्यार्चाया भंगचौर्यादौ तद्दिने उपवासः ॥ ताम्रादिधातुमूर्तीनां चोरचांडालादिस्पर्शे ताम्रादिधातूक्तशुद्धिं कृत्वा पुनः प्रतिष्ठा ॥ पूर्वं प्रतिष्ठितस्याबुद्धिपूर्वकमेकरात्रमेकमासं द्विमासं वार्चनादिविच्छेदे शूद्ररजस्वलाद्युपस्पर्शने वा जलाधिवासं कृत्वा कलशेन स्नपयेत् ॥

ततः पंचगव्येन स्नपयित्वाऽष्टसहस्रमष्टशतमष्टाविंशतिसंख्यं वा कलशैः शुद्धोदकेन पुरुषसूक्तेन स्नपयेत् ॥ गंधपुष्पादिना पूजयित्वा गुडौदनं निवेदयेदिति शुद्धिः ॥ बुद्धिपूर्वं पूजनविच्छेदे शूद्रस्पर्शादौ च पुनः प्रतिष्ठयैव शुद्धिः ॥ अन्ये तु ॥ "एकाहपूजाविहतौ कुर्याद्द्विगुणमर्चनम् ॥ द्विरात्रे तु महापूजां संप्रोक्षणमतः परम् ॥" मासादूर्ध्वं पूजाविहतौ पुनः प्रतिष्ठा प्रोक्षणविधिर्वा कार्य इत्याहुः ॥ पुनःप्रतिष्ठादि मलमासशुक्रास्तादावपि कार्यम् ॥

## अथ देवालयादिभंगे विचारः ।

देवालयवापीकूपतडागभेदने आरामसेतुसभाभंगे इदं विष्णुर्मानस्तोके विष्णोः कर्माणि पादोस्येति चतस्र आज्याहुतीर्हुत्वा ब्राह्मणान् भोजयेदिति ॥ अथ प्रोक्षणविधिः ॥ देवमुद्रास्य पंचवारं मृज्जलैः प्रक्षाल्य पंचगव्यैः स्नापयित्वा कुशोदकैर्विशोध्य मूलेनाष्टोत्तरशतवारं प्रोक्ष्य मूलेन मूर्धादिपीठांतं संस्पृश्य तत्त्वन्यासलिपिन्यासमंत्रन्यासपूर्वकं प्राणप्रतिष्ठां कृत्वा महापूजां कुर्यात् ॥ 'पूजाहीनादिषु ह्येष संप्रोक्षणविधिः स्मृतः ॥'

## अथ जीर्णोद्धारविधिः ।

स च लिंगादौ भग्ने दग्धे वा कार्यः ॥ अयं चानादिसिद्धप्रतिष्ठितलिंगादौ भंगादिदोषेपि न कार्यः ॥ तत्र तु महाभिषेकः कार्यः ॥ कर्तामुकदेवस्य जीर्णोद्धारं करिष्ये इत्युक्त्वा नांदीश्राद्धांतं कृत्वाचार्यं वृत्वा पीठे मण्डलदेवता आवाह्य लिंगे ॐ व्यापकेश्वरहृदयाय नमः॥ ॐ व्यापकेश्वरशिरसे स्वाहेत्यादिषडंगं कृत्वा देवतांतरे मूलमंत्रेण षडंगं कृत्वार्चयेत् ॥ अघोरेति मन्त्रमष्टोत्तरशतं जपित्वाग्निं प्रतिष्ठाप्य ॥ अघोरेण घृताक्तसर्षपैः सहस्रं हुत्वेंद्रादिभ्यो नाम्ना बालिं दत्त्वा जीर्णं देवं प्रणवेन संपूज्य साज्यतिलैर्मंडलदेवताहोमं कृत्वा प्रार्थयेत् ॥ " जीर्णभग्नमिदं चैव सर्वदोषावहं नृणाम् ॥ अस्योद्धारे कृते शांतिः शास्त्रेस्मिन्कथिता त्वया ॥ जीर्णोद्धारविधानं च नृपराष्ट्रहितावहम् ॥ तदधस्तिष्ठतां देव प्रहरामि तवाज्ञया ॥" क्षीराज्यमधुदूर्वासमिद्भिर्देवमंत्रेणाष्टोत्तरशतं हुत्वा तिलैः सहस्रं हुत्वा पायसेन शतं हुत्वा लिंगं प्रार्थयेत्॥ "लिंगरूपं समागत्य येनेदं समधिष्ठितम् ॥ यायास्त्वं संमितं स्थानं संत्यज्यैव शिवाज्ञया ॥ १ ॥ अत्र स्थाने च या विद्या सर्वविद्येश्वरैर्युता ॥ शिवेन सह संतिष्ठ " इति मंत्रितजलेनाभिषिच्य विसर्जयेत् ॥ अस्त्रमंत्रितेन खनित्रेण खात्वा लिंगमादाय वामदेवमंत्रेण नद्यादौ क्षिपेत् ॥ मूर्तिं प्रणवेन क्षिपेत् ॥ दारुजं मधुनाभ्यज्याघोरेण दहेत् ॥ हेमादिमयं योग्यं कृत्वा तत्रैव स्थापयेत् ॥ ततः शांत्यर्थमघोरेण घृतक्षीरमध्वक्तैस्तिलैः सहस्रं हुत्वा प्रार्थयेत् ॥ "भगवन्भूतभव्येश लोकनाथ जगत्पते ॥ जीर्णलिंगसमुद्धारः कृतस्ते चाज्ञया

मया ॥ अग्निना दारुजं दग्धं क्षिप्तं शैलादिकं जले ॥ प्रायश्चित्ताय देवेश अघोरास्त्रेण तर्पितम् ॥ ज्ञानतोज्ञानतो वापि यथोक्तं न कृतं यदि ॥ तत्सर्वं पूर्णमेवास्तु त्वत्प्रसादान्महेश्वर ॥" ॥ अथ यजमानः प्रार्थयेत ॥ "गोविप्रशिल्पिभूपानामाचार्यस्य च यज्वनः ॥ शांतिर्भवतु देवेश अच्छिद्रं जायतामिदम् ॥" मूर्तौ तु विशेषः ॥ "त्वत्प्रसादेन निर्विघ्नं देहं निर्मापयत्यसौ ॥ वासं कुरु सुरश्रेष्ठ तावत्त्वं चाल्पके गृहे ॥ वस क्लेशं सहित्वेह मूर्त्तिं वै तव पूर्ववत् ॥ यावत्कारयते भक्तकुरु तस्य च वांछितम् ॥" ततो नवां मूर्तिं लिंगं वा कृत्वोक्तविधिना प्रतिष्ठाकालानपेक्षया मासादर्वाक्स्थापयेत् ॥ इति जीर्णोद्धारः ॥

## अथ प्रतिमाभंगादिशांतिः ।

प्रतिमाशिवलिंगप्रासादकलशादिभंगे स्वामिनो मरणं भवेत् ॥ तत्र शांतिः ॥ "कुंडं कृत्वा विधानेन ततो होमं समाचरेत् ॥ चरुं च यमदैवत्यं साधयित्वा विधानतः ॥ दधिक्षौद्रघृताक्तानामश्वत्थसमिधां ततः ॥ जुहुयादष्टशतं प्राज्ञ इमा रुद्रेति मंत्रवित् ॥ माषैर्मुद्गैस्तिलैश्चैव घृतेन मधुनापि च ॥ एभिः पंचसहस्राणि शक्तिबीजेन होमयेत् ॥" शक्तिबीजं ह्रीं बीजम् ॥"भूमिं धेनुमनड्वाहं स्वर्णं धान्यं सदक्षिणम् ॥ दत्त्वाथ पंचगव्येन स्नायादेवालये द्विजः ॥ बलिं दद्याद्यमायाथ कृसरैः पायसैस्तथा ॥ ईशानाय बलिं दत्त्वा कृतकृत्यो भवेन्नरः" ॥ अत्र मूलं कमलाकरे ॥

## अथ पुष्पे ग्राह्याग्राह्यविधिः ।

"अपर्युषितनिश्छिद्रैः प्रोक्षितैर्जंतुवर्जितैः ॥ आत्मारामोद्भवैर्मुख्यैर्भक्त्या संपूजयेत्सुरान् ॥ त्यजेत्कीटावपन्नानि शीर्णपर्युषितानि च ॥ स्वयं पतितपुष्पाणि मलाद्युपहतानि च ॥ मुकुलैर्नार्चयेद्देवमपक्वैः कृमियुक्फलैः ॥ पुष्पाभावे पत्रपूजा पत्रालाभे फलैरपि ॥ निवेदयेत्फलालाभे तृणगुल्मौषधीरपि ॥ समित्पुष्पकुशादीनि ब्राह्मणः स्वयमाहरेत् ॥ शूद्रानीतैः क्रयक्रीतैः कर्म कुर्वन्पतत्यधः ॥"लक्षपुष्पार्चनं क्रयक्रीतैरपि ॥ केचित्तु "धर्मार्जितधनक्रीतैर्यः कुर्यात्केशवार्चनम् ॥ न पर्युषितदोषोस्ति मालाकारगृहेषु च" इत्याद्युक्तेर्मालाकारानीतैः क्रयक्रीतैरपि पुष्पपत्रैः पूजयंति ॥ नित्यपूजार्थं परोपवनादेरपि पुष्पादिग्रहे चौर्यदोषो न ॥ पूजार्थं पुष्पादि न याचेत ॥ "समित्पुष्पकुशादीनि वहंतं नाभिवादयेत् ॥ तद्धारी चैव नान्यान्हि निर्माल्यं तद्भवेत्तयोः ॥" देवोपरि धृतं वामहस्तेधोवस्त्रे च धृतं जलेंतः क्षालितं च पुष्पं निर्माल्यम् ॥ "वर्ज्यं पर्युषितं पुष्पं वर्ज्ये पर्युषितं जलम् ॥ न वर्ज्यं तुलसीपत्रं न वर्ज्यं तीर्थजं जलम् ॥ अहरं तिष्ठते जाती करवीरमहर्निशम् ॥ नैव पर्युषितं पद्मं तुलसीबिल्वपत्रकम् ॥ कुंदं च दमनं चैवागस्त्यं च कलिका तथा ॥"

बिल्वादेरपर्युषितत्वदिनसंख्या ॥ बिल्वः ३० अपामार्गः ३ जाती १ तुलसी ६ मशी ७ शतावरी ११ केतकी ४ भृंगराजः ९ दूर्वा ८ मंदारः १ पद्मं १ नागकेसरः २ दर्भाः ३० अगस्त्यः ३ तिलः १ तगरः ६ पलाशः ६ कल्हारं ११ मल्लिका ४ चंपकः ९ करवीरं ८ कुंभी १ दमनः १ मरुवकः २ एतेषामेतदिनोत्तरं पर्युषितत्वम् ॥ तुलसीग्रहणकालः ॥ "वैधृतौ च व्यतीपाते भौमभार्गवभानुषु ॥ पर्वद्वये च संक्रांतौ द्वादश्यां सूतकद्वये॥ तुलसीं ये विचिन्वंति ते छिंदंति हरेः शिरः॥ नैव च्छिन्द्याद्रवौ दूर्वां तुलसीं निशि संध्ययोः ॥ धात्रीपत्रं कार्तिके च पुण्यार्थी यतिमान्नरः॥द्वादश्यां च दिवा स्वापस्तुलस्यवचयस्तथा॥ विष्णोश्चैव दिवा स्नानं वर्जनीयं सदा बुधैः॥ "अत्रदिवानिषेधाद्रात्रौ स्नानादिषोडशोपचारैः पूजा कार्या॥ दिवा तु गंधादिपुष्पांजल्यंता एवोपचारा इति कमलाकरास्त्रिके ॥ विष्णोर्द्वादश्यां निर्माल्यापनयमपि न कार्यमिति तंत्रांतरे स्मर्यते ॥ एतदपवादः पुरुषार्थचिंतामणौ नारदीये ॥ "पंचामृतेन संस्नाप्य एकादश्यां जनार्दनम् ॥ द्वादश्यां पयसास्नाप्य हरिसायुज्यमश्नुते" इति ॥ "देवार्थे तुलसीछेदो होमार्थे समिधां तथा ॥ इंदुक्षये न दुष्येत गवार्थं तु तृणस्य च॥"तुलसीग्रहणमंत्रः॥ "तुलस्यमृतजन्मासि सदा त्वं केशवप्रिये ॥ केशवार्थं विचिन्वामि वरदा भव शोभने ॥" जातिमल्लिकाकरवीराशोकोत्पलचंपकबकुलबिल्वशमीकुशा एतानि सर्वदेवानां विहितानि ॥ अथ विहितप्रतिषिद्धत्वाद्विकल्पितानि ॥ पाटला शमीपत्रं च दुर्गायाः ॥ कुन्दपलाशबकुलदूर्वाः शिवस्य ॥ कुमुदतगरे सूर्यस्य ॥ तुलसीभृंगराजतमालपत्राणि शिवदुर्गयोः ॥ अगस्ती माधवी लता लोध्रपुष्पं विष्णुशिवयोः ॥ धत्तूरमंदारौ विष्णुसूर्ययोः ॥ इति विकल्पितानि ॥ अथ विष्णोः प्रियाणि ॥ मालतीजातीकेतकीमल्लिकाशोकचंपकपुन्नागबकुलोत्पलकुंदकरवीरपाटलातगरपुष्पाणि ॥ अन्यानि च सुरभीणि विष्णोः प्रियाणि ॥ अपामार्गभृंगराजखदिरशमीदूर्वाकुशदमनकबिल्वतुलसीपत्राण्युत्तरोत्तराधिकप्रियाणि ॥ तुलसी सर्वाधिका ॥ जातिपुष्पसहस्रेण मालार्पणे कल्पकोटिसहस्रं विष्णुपुरे वासः ॥ आम्रमंजर्या पूजने गोकोटिदानफलम् ॥ ॥ अथ शिवस्य ॥ " चतुर्णां पुष्पजातीनां गन्धमाघ्राति शंकरः ॥ अर्कस्य करवीरस्य बिल्वस्य बकुलस्य च ॥ " दशगुणवर्णदानफलं श्वेतार्कपुष्पम् ॥ ततः सहस्रगुणं बकुलं पुष्पम् ॥ एवं धत्तूरशमीपुष्पद्रोणपुष्पनीलोत्पलानामुत्तरोत्तराणां सहस्रगुणत्वम् ॥ " मणिमुक्ताप्रवालैस्तु रत्नैरप्यर्चनं कृतम् ॥ न गृह्णामि विना देवि बिल्वपत्रैर्वरानने ॥ सर्वकामप्रदं बिल्वं दारिद्र्यस्य विनाशनम् ॥ " नीलोत्पलसहस्रेण मालार्पणे कल्पकोटिसहस्रं शिवपुरे वासः ॥ धत्तूरैर्बृहतीपुष्पैश्च पूजने गोलक्षफलम् पाटलामन्दारापामार्गजातीचंपकोशीरतगरनागकेसरपून्नागजपामल्लिकासहकारकुसुम्भपुष्पाणि शिवप्रियाणि॥" धत्तूराणि कदंबानि रात्रौ देयानि

शंकरे ॥" मदनरत्ने ॥ केतकानि कदंबानीति पाठः ॥ "अभावे पुष्पपत्राणामन्नाद्येनापि पूजयेत् ॥ शालितंदुलगोधूमयवैर्वापि समर्चयेत् ॥" अथ निषिद्धानि ॥ बन्धूककुन्दातिमुक्तकेतकीकपित्थबकुलशिरीषनिंबानि ॥ पुष्पपत्रादिकं स्वाभिमुखमुत्तानमर्पयेत् ॥ "पत्रं पुष्पं फलं चैव यथोत्पन्नं तथार्पयेत् " इति वचनात् । बिल्वपत्रं तु स्वाभिमुखाग्रं न्युब्जमर्पयेत् ॥ पक्वाम्रफलस्य शिवार्पणे वर्षायुतं शिवपुरे वासः॥ "सव्यं व्रजेत्ततो "सव्यं प्रणालीं नैव लंघयेत्" इत्यादिस्थिरलिंगेप्रदक्षिणाप्रकारः ॥ चरे तु सव्येनैव ॥ देव्या अपि बकुलकुन्दादिसहितान्येतान्येव प्रियाणि ॥ धान्यानां सर्वपत्रैश्च पुष्पैर्देवीं प्रपूजयेत् ॥ दूर्वाकुन्दैः सिंधुवारैर्वन्यूकागस्तिसंभवैः ॥ बिल्वपत्रैः पूजने राजसूयफलं करवीरस्रजाग्निष्टोमस्य ॥ बकुलस्रजा वाजपेयस्य ॥ द्रोणस्रजा राजसूयस्येति ॥ एवं सूर्यविघ्नेशादेरपि प्रायो विष्णुवज्ज्ञेयानि ॥

## अथ शिवनिर्माल्यग्रहणविचारः ।

"अग्राह्यं शिवनैवेद्यं पत्रं पुष्पं फलं जलम् ॥ शालग्रामशिलासंगात्सर्वं याति पवित्रताम् ॥" शैवसौरनैवेद्यभक्षणे चांद्रायणम्॥ अभ्यासे द्विगुणं मत्याभ्यासे सांतपनम्॥ अन्यनिर्माल्येष्यनापद्येवम् ॥ इदं च ज्योतिर्लिंगस्वयंभूलिंगसिद्धप्रतिष्ठापितलिंगातिरिक्तस्थावरलिंगविषयम्॥ ज्योतिर्लिंगादौ तु पूजकेन दत्तं फलतीर्थादिकं भक्त्या शुद्ध्यर्थं ग्राह्यं न लोभेन पंचायतनस्थितलिंगेषु चरेषु प्रतिमासु चान्नादेरपि स्वयंग्रहणेपि न दोषः ॥ ज्योतिर्लिंगाद्यन्यस्थिरलिंगेषु तीर्थोदकचन्दनमात्रं श्रद्धावद्भिः शिवोपासकैरेव ग्राह्यम् ॥ ज्योतिर्लिंगादौ पूजकदत्तमन्नमपि भक्ष्यमिति केचित् ॥

## अथ नक्षत्रसंज्ञा ।

ध्रुत्तरा रोहिणी ध्रुवम् ॥ मघा भरणी पूर्वात्रयं क्रूरम् ॥ श्रवणत्रयपुनर्वसुस्वात्यश्चरम् ॥ अश्विनीहस्तपुष्यं क्षिप्रम् ॥ अनुराधारेवतीमृगचित्रं मृदु ॥ कृत्तिकाविशाखे मिश्रम् ॥ मूलाश्लेषाज्येष्ठार्द्रास्तीक्ष्णम्॥ इति नक्षत्रसंज्ञाः॥ "यत्र नोक्ता तिथिस्तत्र ग्राह्या रिक्तामसां विना ॥ वारोपि यत्र न प्रोक्तस्तत्रार्कार्किकुजान्विना ॥"

## अथ कृषिमुहूर्तादि ।

चरमृदुक्षिप्रध्रुवमूलविशाखामघासु सकुजेष्टशुभवारे भूकर्षणं हितम् ॥ सूर्यत्यक्तनक्षत्राद्यष्टनवाष्टस्वशुभं शुभमशुभं शुभमिति हलचक्रम् ॥ अत्रैव नक्षत्रे शनिभौमभिन्नवारे बीजवापः सस्यारोपणं च धान्यच्छेदश्च॥ क्षीरवृक्षजन्यः खलमध्ये स्तंभः ॥ धान्यानां मर्दनं ज्येष्ठामूलमघाश्रवणरेवतीरोहिण्यनुराधाफाल्गुनीद्वये शुभम्॥ धान्यसंग्रहः क्षिप्रध्रुवचरमृदुमूलेषु ज्ञगुरुशुक्रेषु चरभिन्नलग्ने शुभः॥

## अथ धान्यमंत्रः ।

ॐ धनदाय सर्वलोकहिताय देहि मे धान्यं स्वाहेति मंत्रं लिखित्वा धान्यागारे क्षिपेत् तेन धान्यवृद्धिः ॥ "बुधमंदादिने नैव धनधान्यव्ययः शुभः ॥ अद्यान्नवान्नं सद्वार मृदुक्षिप्रचरे दिवा ॥"

## अथ वस्त्रादिविचारः ।

"वस्त्रभूषणविधिर्ध्रुवाश्विनीहस्तपंचकपुनर्वसुद्वये ॥ पौष्णवासवभयोश्च सत्तिथौ मंदभौमशशिवासरान्विना ॥ अनुक्तेपीष्टदं वस्त्रं विप्राज्ञोत्सवलब्धिषु ॥ ध्रुवपुष्यादितौ योषिद्धत्ते या वस्त्रभूषणे ॥ न प्राप्नोति पतिप्रीतिं स्राति वारणभे च या ॥ पादुकासनशय्यादेर्भोगः सत्तिथिवासरे ॥ ध्रुवक्षिप्रमृदुश्रोत्रभरणीषु पुनर्वसौ ॥ चेन्नव्यवस्त्रं मध्यांशे दग्धं स्फुटितपंकितम् ॥ तत्त्यजेच्छांतिकं कुर्यात्त्यजेदेवांत्यभागयोः ॥ विज्ञेयमेतच्छय्यायामास्तृतौ पादुकास्वपि ॥ सूचीकर्मानुराधाश्विचित्रामृगपुनर्वसौ ॥ वस्त्रं क्षाल्यं धारणोक्ते काले बुधदिनं विना ॥ भोजनं भाजने रौप्यस्वर्णकांस्यादिनिर्मिते ॥ कुर्यादमृतयोगेषु चरक्षिप्रमृदुध्रुवैः ॥ स्याद्भूषणानां घटनं चरक्षिप्रमृदुध्रुवैः ॥ शुभवारे रत्नवतां मिश्रभेपि रवौ कुजे ॥" इति वस्त्रादिविचारः ॥

## अथ शस्त्रघटनधारणे ।

"शस्त्राणां घटनं क्रूरमिश्राश्विमृगतीक्ष्णभे ॥ शस्त्रं धार्यं ध्रुवक्षिप्रमृदुज्येष्ठाविशाखके ॥"

## अथ सेवाकरणम् ।

"सेवा कार्या क्षिप्रमैत्रध्रुवैर्ज्ञेज्यार्कभार्गवे ॥ मंदेपि चेत्सेवकर्क्षं स्वामिभान्न द्वितीयकम् ॥"

## अथ वाहनारोहः ।

"हस्तषट्कध्रुवश्रोत्ररेवतीपुष्यभे शुभम् ॥ पुनर्वसौ च शिबिकागजाश्वादिषु राहणम् ॥"

## अथ राजदर्शनं नृत्यं च ।

"राज्ञां विलोकनं क्षिप्रश्रुतिद्वयमृदुध्रुवे॥नृत्यारंभः पुष्यध्रुवे मृगज्येष्ठाधनिष्ठयोः॥"

## अथ हट्टरचना क्रयविक्रयश्च ।

"अनुराधाशतभिषग्घस्ते स्याच्छुभवासरे ॥ विपणिः स्यान्मृदुक्षिप्रध्रुवैरिक्ताकुजान्विना ॥ क्रयः कार्योश्विनीस्वातीश्रवश्चित्राशतांत्यभे ॥ विक्रयो भरणीपूर्वात्रयाश्लेषासु मिश्रभे ॥"

## अथ सेतुबंधः पशुक्रिया च ।

"सेतुबंधो ध्रुवे स्वात्यां जीवार्कशनिवासरे ॥ नानापशुक्रियाहस्तपुष्यार्द्रामृगमिश्रभे ॥ पुनर्वसौ धनिष्ठाश्विपूर्वाज्येष्ठाशतांत्यभे ॥ त्यक्त्वार्कभौमेंदुशनीज्श्रुतिचित्राध्रुवाणि च ॥ अमारिक्ताष्टमीश्चापि पशुक्रयमुखाः शुभाः ॥"

## अथ धनस्य ग्रहणादिविचारः ।

"द्रव्यं लघुचरैर्योज्यं वृद्ध्यर्थं चरलग्नके ॥ ऋणं भौमे न गृह्णीयाद्वृद्धियोगेर्कसंक्रमे ॥ धनिष्ठापंचके हस्ते त्रिपुष्करद्विपुष्करे ॥ भौमादिषु ऋणच्छेदं कुर्याच्च धनसंग्रहम् ॥ बुधे धनं न प्रदेयं संग्रहस्तु बुधे शुभः ॥ शन्यर्कारैस्त्रिपादर्क्षे भद्रातिथ्या त्रिपुष्करः ॥ मृगचित्राधनिष्ठासु तात्तिथ्याद्विद्विपुष्करः ॥ शुभाशुभेषु त्रिगुणं द्विगुणं च फलं क्रमात् ॥"

## अथ नष्टलाभे ।

"मिश्रक्रूरेषु तीक्ष्णेषु स्वात्यां द्रव्यं न लभ्यते ॥ दत्तं प्रयुक्तं निक्षिप्तं नष्टं चेत्याह नारदः ॥ अंधं मंदं च चिबिटं सुलोचनमिति क्रमात् ॥ गणनीयं रोहिणीभादंधे नष्टं लभेद्भुतम् ॥ मंदे यत्नाल्लभेतैव चिबिटस्वर्क्षयोर्न हि ॥ अन्विष्यं पूर्वतोंधेषु मंदसंज्ञेषु दक्षिणे ॥ प्रतीच्यां चिबिटाख्येषु सुलोचन उदग्दिशि ॥"

## अथ राजाभिषेकः ।

"राजाभिषेकः श्रवणे ध्रुवर्क्षे ज्येष्ठामृदुक्षिप्र उदग्रवौ स्यात् ॥ त्यक्त्वारारिक्ताधिकचैत्ररात्रीश्चंद्रेज्यशुक्राभ्युदये शुभाय ॥"

## अथ कूपादिखनने ।

"जलाशयानां खननं मघापुष्यध्रुवे मृगे ॥ पूर्वाषाढानुराधांत्यधनिष्ठाशतहस्तभे ॥ जलराशिगते चंद्रे लग्नस्थे च बुधे गुरौ ॥"

## अथ क्षौरविचारः ।

"क्षौरं चौलोक्तनक्षत्रवारादिषु शुभं जगुः ॥ पञ्चमे पञ्चमे राज्ञां दिनेऽन्येषां यदृच्छया ॥ श्मश्रुकर्म भवेन्नैव नवमे दिवसे क्वचित् ॥ क्षौरं भूतेरतं दर्शं वर्जयेच्च जिजीविषुः ॥ क्षौरं न कुर्युरभ्यक्तभुक्तस्नातविभूषिताः ॥ प्रयाणसमरारंभे न रात्रौ न च संध्ययोः ॥ श्राद्धाहे प्रतिपद्रिक्ताव्रताह्नि च न वैधृतौ ॥ प्रशस्तं जन्मनक्षत्रं सर्वकर्मसु कीर्तितम् ॥ क्षौरं प्रयाणभैषज्यविवादेषु न शोभनम् ॥ षष्ठ्यमापूर्णिमापातचतुर्दश्यष्टमी तथा ॥ आसु सन्निहितं पापं तैलेषु स्त्रीभगे क्षुरे ॥ राजकार्य-

१ पशुगमनपशुक्रयादिकमित्यर्थः ।

नियुक्तानां नराणां भूपजीविनाम् ॥ श्मश्रुलोमनखच्छेदे नास्ति कालविशोधनम् ॥ क्षौरं नैमित्तिकं कार्यं निषेधे सत्यपि ध्रुवम् ॥ यज्ञे मृतौ बन्धमोक्षे नृपविप्राज्ञयापि च ॥ प्राग्वयस्कैः सपितृकैर्न कार्यं मुंडनं सदा ॥ मुंडनस्य निषेधोपि कर्तनं तु विधीयते ॥ उदङ्मुखः प्राङ्मुखो वा वपनं कारयेत्सुधीः ॥ केशश्मश्रुलोमनखाप्युदक्संस्थानि वापयेत् ॥ आनतोंहिच्छत्रः पाटलिपुत्रोदितिर्दितिः श्रीशः ॥ क्षौरे स्मरणादेषां दोषा नश्यंति निःशेषाः ॥

## अथ रोगोत्पत्तौ नक्षत्रफलं रोगशांतिर्दिनावधिश्च ।

अश्विन्यां रोगोत्पत्तावेकाहं नवदिनानि वा पंचविंशतिदिनानि वा पीडा ॥ १ ॥ भरण्यामेकादशैकविंशतिर्वा मासं वा मृत्युर्वा ॥ २ ॥ कृत्तिकायां दशनवैकविंशतिर्वा ॥ ३ ॥ रोहिण्यां दश वा नव वा सप्त वा त्रीणि वाहानि ॥ ४॥ मृगे पंच नव वा त्रिंशद्वा ॥ ५ ॥ आर्द्रायां मृत्युर्वा दशाहं वा मासं वा ॥ ६ ॥ पुनर्वसौ सप्त नव वा मृत्युर्वा ॥ ७ ॥ पुष्ये सप्त वा मृत्युर्वा ॥ ८ ॥ आश्लेषायां मृत्युर्विंशतिस्त्रिंशद्वा नव वा दिनानि पीडा ॥ ९ ॥ मघायां मृत्युर्वा सार्धमासं वा मासं वा विंशतिदिनानि वा पीडा ॥ १० ॥ पूर्वाफाल्गुन्यां मृत्युर्वाब्दं मासं वा पीडा पंचदश वा षष्टिर्वा दिनानि ॥ ११ ॥ उत्तरायां सप्तविंशतिः पंचदश सप्त वा दिनानि ॥ १२ ॥ हस्ते मृत्युरष्टौ वा नव वा सप्त वा पंचदश वाहानि ॥ १३ ॥ चित्रायां पक्षमष्टौ वा दश वैकादश वाहानि ॥ १४ ॥ स्वात्यां मृत्युर्वैकद्वित्रिचतुःपंचमासैर्वा दश दिनैर्वा रोगनाशः ॥ १५ ॥ विशाखायां मासं वा पक्षं वाष्टदिनं विंशतिदिनानि वा पीडा ॥ १६ ॥ अनुराधायां दशरात्रमष्टाविंशतिरात्रं वा ॥ १७ ॥ ज्येष्ठायां मृत्युर्वा पक्षं वा मासं वैकविंशतिरात्रं वा पीडा ॥ १८ ॥ मूले मृत्युः पक्षं नवरात्रं विंशतिरात्रं वा पीडा ॥ १९ ॥ पूर्वाषाढायां मृत्युर्वा द्वित्रिषडादिमासैर्विंशतिदिनैः पक्षेण वा रोगनाशः ॥ २० ॥ उत्तराषाढायां सार्धमासं विंशतिरात्रं वा मासं वा ॥ २१ ॥ श्रवणे पंचविंशतिर्दश वैकादश वा षष्टिर्वाहानि ॥ २२ ॥ धनिष्ठायां दशरात्रं पक्षं मासं त्रयोदशरात्रं वा ॥ २३ ॥ शततारकायां द्वादशाष्ट वैकादश वा ॥ २४ ॥ पूर्वाभाद्रपदायां मृत्युर्वा द्वित्र्यादिमासं वा दशरात्रं वा ॥ २५ ॥ उत्तराभाद्रपदायां सार्धमासं पक्षं सप्ताहं दशाहं वा ॥ २६ ॥ रेवत्यां ज्वराद्युत्पत्तौ दशाहमष्टाविंशतिरात्रं वा पीडा ॥ २७ ॥ जन्मनक्षत्रे जन्मराशावष्टमचंद्रे च रोगोत्पत्तौ मृत्युः ॥ अर्कादिवारे क्रमेण मघाद्वादश्यौ विशाखैकादश्यौ पंचम्यार्द्रे तृतीयोत्तराषाढे शततारषष्ठ्यौ अष्टम्यश्विन्यौ पूर्वाषाढानवम्यौ चेति त्रयाणां योगे मृत्युः ॥ एवमर्कादावनुराधाभरण्यौ आर्द्रोत्तराषाढे मघाशततारे विशाखाश्विन्यौ ज्येष्ठामृगौ श्रवणाश्लेषे पूर्वाभाद्रपदाहस्तौ चेन्मृत्युयोगः ॥ अत्रोक्तास्तिथि-

वारनक्षत्रशांतयो विस्तृताः कार्याः ॥ येषु नक्षत्रेषु मरणमुक्तं तत्र शांतिरावश्यकी अन्यत्र कृताकृता ॥

## अथ सर्वनक्षत्रसाधारणः शांतिप्रयोगः ।

देशकालौ संकीर्त्य ममोत्पन्नव्याधेर्जीवच्छरीराविरोधेन समूलनाशार्थममुकनक्षत्रशांतिं करिष्ये इति संकल्प्य गणेशपूजादि ॥ आचार्यं वृत्वा कुम्भोपरि पूर्णपात्रे द्वादशदले नक्षत्रदेवताप्रतिमां सौवर्णीं संपूज्य द्वादशदलेषु संकर्षणादिद्वादशमूर्तीर्द्वादशादित्यान्वा संपूज्य दूर्वासमित्तिलक्षीराज्यैर्गायत्र्या तत्तद्देवतायै अष्टोत्तरशतं हुत्वा मरणादिपीडाधिक्योक्तौ सहस्रं हुत्वा दध्योदनबलिं दत्त्वाचार्याय गां प्रतिमां च दद्यादिति संक्षेपः ॥ शांतिमयूखादौ नक्षत्रभेदेन हविर्मन्त्रबलिधूपादिभेदस्तिथिवारदेवतामन्त्रादिभेद इत्यादिविस्तारो द्रष्टव्यः ॥ कर्मविपाके ॥ जातवेदस इत्यृचोऽयुतं लक्षं वा जपो रुद्रे नमकानुवाकैः सहस्रकलशस्नानं वा विष्णौ सहस्रावृतपुरुषसूक्तेन सहस्रघटस्नानं वा ज्वरनाशकम् ॥ यद्वा श्रीभागवतस्थज्वरस्तोत्रजपः ॥

## अथ सर्वरोगनाशकानि ।

रोगानुसारेण लघुरुद्रमहारुद्रातिरुद्राणां जपोभिषेको वा ॥ विष्णुसहस्रनामस्तोत्रस्य शतं सहस्रमयुतं वा जपः ॥ सौरजपः॥ सूर्यनमस्कारार्घ्यदानानि 'मुंचामित्वा' इति सूक्तजपोऽच्युतानंतगोविंदेति नामत्रयजपो मृत्युंजयजपश्चरोगानुसारेणेति सर्वरोगहराणि ॥

## अथौषधभक्षणे नक्षत्राणि ।

"ज्येष्ठामूलश्रुतिस्वातीमृदुक्षिप्रपुनर्वसौ॥गुरुशुक्रेंदुवारेषु शस्तं भेषजभक्षणम्॥"

## अथ रोगमुक्तस्नानविचारः ।

"रिक्तायां चरलग्ने मिश्रक्षिप्रेंद्रमूलपूर्वासु ॥ चित्राभरणीश्रवणत्रयभे रविकुजबुधार्कजे स्नायात् ॥ वैधृतौ च व्यतीपाते भद्रायां संक्रमे तथा ॥ रोगमुक्तस्नानमन्त्रचन्द्रताराबलं न वा ॥"

## अथाभ्यंगः ।

"भद्रासंक्रमपातवैधृतिसितेज्यार्कारषष्ठ्यादिषु श्राद्धाहे प्रतिपद्वये परिहरेद्धेतुं विनाभ्यंजनम् ॥ मांगल्यं विजयोत्सवोद्वदनं दीपावलीहेतवोभ्यंगस्याथ बुधांबुपक्षपितृभाभ्यंगात्पातिघ्न्यंगना ॥ "अथापवादः" ॥ सार्षपं गन्धतैलं च यत्तैलं पुष्पवासितम् ॥ द्रव्यांतरयुतं तैलं पक्वतैलं न दुष्यति ॥ किंचिद्घृतयुक्तं वा विप्रपादरजोन्वितम् ॥ नित्याभ्यंगे च नो दुष्टं तैलं निंद्येऽहि सर्वदा ॥ रवौ पुष्पं

गुरौ दूर्वा भौमवारे च मृत्तिकाम् ॥ भार्गवे गोमयं क्षिप्त्वा तैलस्नानं सुखावहम् ॥ ”

## अथ वास्तुप्रकरणम् ।

“वैशाखे फाल्गुने पौषे श्रावणे मार्गशीर्षके ॥ गृहारंभप्रवेशौ स्तः स्तंभोच्छ्रायश्च शस्यते ॥ ज्येष्ठकार्तिकमाघांश्च शुभदान्प्राह नारदः ॥ तृणगेहं सर्वमासे पौषे मुख्यगृहं न हि ॥ हस्तत्रयध्रुवमृदुधनिष्ठाद्वयपुष्यभे ॥ रिक्ता अर्ककुजौ त्यक्ता गृहं कुर्याद्विशेदपि ॥ शिलान्यासं च खातं च श्रुत्यश्विक्रूरमित्रभैः ॥ आश्लेषामूलपुष्यार्कमृगांत्यध्रुवभैरपि ॥ केंद्राष्टमे पापहीने वेश्मकृत्यं स्थिरोदये ॥ धनिष्ठापंचके वर्ज्यः स्तम्भोच्छ्रायः सदा बुधैः ॥ नेष्टानि सप्त सूर्यर्क्षादिष्टान्येकादशाष्टमात् ॥ दश शिष्टानि नेष्टानि चक्रे स्युर्वृषवास्तुनि ॥ यद्वा तुर्यात्पंचदशात्रयोविंशतिसंख्यकात् ॥ वेदाब्धिपंचमेष्टानि गृहारंभप्रवेशयोः ॥ स्नानपाकस्वापवस्त्रभुजीनां पशुकोशयोः ॥ देवानां च गृहान्कुर्यात्पूर्वादौ मुख्यवेश्मनः ॥ उदग्दिशं ध्रुवमुखाज्ज्ञात्वा प्राचीं प्रसाधयेत् ॥ कोणाध्वभ्रमकूपद्वाःपंकस्तंभद्रमामरैः ॥ विद्धा दुष्टा द्वार्न दोषो गृहोच्चद्विगुणांतरे ॥ सूत्रं भित्तिशिलान्यासं स्तंभस्यारोपणं तथा ॥ आग्नेयीं दिशमारभ्य कुर्यादित्याह कश्यपः ॥ अन्यवेश्मस्थितं दारु नान्यवेश्मनि योजयेत् ॥ नूतने नूतनं काष्ठं जीर्णे जीर्णं प्रशस्यते ॥ द्वात्रिंशाधिकहस्ते च तृणागारे चतुर्मुखे ॥ न तत्र चिंतयेद्धीमान्गुणानायव्ययादिकान् ॥”

## अथ गृहप्रवेशविचारः ।

“वास्तुपूजाविधिः कार्यः पूर्वमेव प्रवेशतः ॥ मैत्रध्रुवक्षिप्रचरमूलभैर्धनपुत्रकृत् ॥” वास्तुशांतिप्रयोगोन्यतो ज्ञेयः ॥ “वास्तुशांतिर्दिवैवोक्ता प्रवेशस्तु निशि क्वचित् ॥ गृहप्रवेशः प्रारंभोदितमासादिकैः शुभः ॥ क्वचिन्माघोर्जशुक्रेषु कैश्चिदुक्तो मृदुध्रुवे ॥ श्रेष्ठः क्षिप्रैश्चरैर्मध्यो निंद्यस्तीक्ष्णोग्रमिश्रभैः ॥ त्रिषडाये खलैः सद्भिः षडष्टव्ययवर्जितैः ॥ शुद्धेंदुरंध्रे च तनौ विजनुर्लग्नभाष्टमे ॥ ऋक्षाणि पंच सूर्यर्क्षान्नेष्टान्यष्टचतुर्दशात् ॥ शेषभानि शुभान्येवं प्रवेशे घटचक्रकम् ” ॥ इति वास्तुप्रकरणम् ॥

## अथ धनाद्यर्थगमनम् ।

“श्रुतिद्वयाश्विपुष्यांत्यानुराधामृगहस्तभे ॥ पुनर्वसौ गोचरेष्टप्रदवारे व्रजेन्नरः ॥ अभिजिद्गमे श्रेष्ठं दक्षिणाशां विना क्षणः ॥ मघाचित्रात्रयाश्लेषाभरण्यार्द्राः सकृत्तिकाः ॥ पूर्वाभाद्रा च नेष्टाः स्युः प्रयाणे जन्मभं तथा ॥ त्यजेद्रिक्तां पर्वषष्ठचष्टमीद्वादशिकास्तिथीः ॥ कृत्तिकाभरणीपूर्वामघानां घटिकाः क्रमात् ॥ एकविंशतिसप्ताथ षोडशैकादश त्यजेत् ॥ ज्येष्ठाश्लेषाविशाखासु स्वात्यां चापि चतुर्दश ॥ भृगोर्मते संकटेपि सर्वां स्वातीं मघां त्यजेत् ॥ भरण्याः पूर्वमर्धं च चित्राश्लेषांतकोत्त

रम् ॥ वारशूलः सोमशनी ॥च्यामीज्यस्तु दक्षिणे ॥ रविशुक्रौ प्रतीच्यां स्यादुदीच्यां बुधमंगलौ ॥ पूर्वादिदिक्षु मेषाद्याः क्रमात्त्रिश्चंद्रराशयः ॥ संमुखो दक्षिणोव्जः सन्पृष्टे वामेतिनिंदितः ॥ दिशि यत्रोदेति शुक्रस्तां दिशं न व्रजेन्नरः ॥ न व्रजेत्संमुखे ज्ञेपि शुभं पृष्ठोपि वामतः॥ रेवतीमेषगे चंद्रे शुक्रांध्यात्संमुखं व्रजेत्॥ प्रयाणे शुभाः केंद्र १ । ४ । ७ । १० । कोणेषु ९ । ५ । शस्ताः खलारुया ३ य ११ । षट् ६ खे १० ष्वनिष्टः शनिः १० खे ॥ कविः सप्तमे ७ ग्लौः षडष्टांत्यलग्ने ६ । ८।१२ । १ विलग्नेश्वरोप्यस्तषष्ठाष्टनांत्ये ६ । ८ । १२ । १ ॥ केंद्रे वक्री वक्रिवर्गो लग्ने वारश्च वक्रिणः ॥ कुंभः कुंभनवांशश्च लग्ने त्याज्यः प्रयत्नतः ॥ मीनलग्ने तदंशे वा यातुर्मार्गोतिदुःखदः ॥ शत्रुलग्नभतः षष्ठं तत्पतिर्वा मृतिप्रदः॥ शत्रुक्षेत्र तदंशे वा तद्दृष्टे गमनं न सत् ॥ लग्नेस्तंगतराशिश्च जन्मराशिश्च नो शुभः ॥ शशीवर्गोत्तमे लग्ने वर्गोत्तमयुते जयः ॥ शुक्रादितिथिवारर्क्षयोगोश्वैरष्टभिस्त्रिभिः ॥ त्रिस्थस्तष्टोवशिष्टश्चेत्सर्वांकः सार्वकामिकः ॥ त्रिषु क्रमाद्भवेच्छून्यं दुःखदारिद्र्यमृत्युदम् ॥ यद्येकस्मिन्नेव दिने पुराद्गच्छेत्पुरांतरम् ॥ प्रावेशिकी कालशुद्धिस्तदा ज्ञेया न यात्रिकी ॥ प्रवेशान्निर्गमो नेष्टः प्रवेशो निर्गमादपि॥ जिष्णोः कदापि नवमे धिष्ण्ये वारे तिथौ तथा ॥ याम्यादिग्गमनं शय्यावितानं छादनं गृहे ॥ न कुंभमीनगे चंद्रे तृणकाष्ठस्य संग्रहः ॥ तर्पताग्निसुहृद्विप्रभार्यादिस्तृप्तिमान् व्रजेत् ॥ स्वकीयां परकीयां वा स्त्रियं पुरुषमेव वा ॥ ताडयित्वा तु यो गच्छेद्ब्राह्मणानवमान्य च ॥ व्याधितः क्षुधितो वापि तदंतं तस्य जीवितम् ॥ क्रोधं क्षौरं तथा वांतिं तैलाभ्यंगाश्रुमोचनम् ॥ मद्यं मांसं गुंडं तैलं सितान्यतिलकं तथा ॥ श्वेताभिन्नं च वसनं प्रयाणे परिवर्जयेत् ॥ क्षौरं पंचदिनं दुग्धं त्रिदिनं सप्तरात्रकम् ॥ मैथुनं चापरं तैलं मद्याज्यं तद्दिने त्यजेत् ॥ रुग्आर्तवं बीजदानांतं तथा कुशकुनांस्त्यजेत् ॥" मुमुहूर्ते स्वयं गमनासंभवे प्रस्थानं कार्यम् ॥

## अथ प्रस्थानविचारः ।

प्रस्थानं नामाभीष्टवस्तुचालनम् ॥ "यज्ञोपवीतकं शस्त्रं मधु च स्थापयेत्फलम् ॥ विप्रादिक्रमतः सर्वं स्वर्णधान्यांबरादिकम् ॥ राजा दशाहं पंचाहमन्यो न प्रस्थितो वसेत् ॥" स्वयं गमनाद्वस्तुस्थापनाख्यप्रस्थानेर्धफलम् ॥ प्रस्थानदेशावधिः ॥ " गेहाद्गेहांतरं गर्गः सीम्नः सीमांतरं भृगुः ॥ बाणक्षेपं भरद्वाजो वसिष्ठो नगराद्बहिः ॥ प्रस्थानेपि कृते नेयान्महादोषान्विते दिने ॥ " प्रस्थानदिनेपि क्रोधादिकं वर्जयेत् ॥ शकुनापशकुनप्रपंचोन्यत्र ॥ इति यात्राप्रकरणम् ॥

## अथ गोचरप्रकरणम् ।

"जन्मराशेः क्रूरचंद्रास्त्रिषड्दशमगाः शुभाः ॥ सप्ताद्यगश्चापि चंद्रः शुक्ले द्वि-

वपंचसु ॥ बुधोव्यंत्यसमे २ । ४ । ६ । ८ । १० जीवो द्विपंचनवसप्तसु ॥ जन्मादिपंचसु तथा नवाष्टद्वादशे भृगुः ॥ एकादशे सर्वखेटाः शुभाः स्युरिति संग्रहः ॥ जन्मसंपद्विपक्षेमं प्रत्यरिः साधिका वधः ॥ मैत्रातिमैत्राः स्युस्तारास्त्रिरावृत्त्या स्वजन्मभात् ॥ क्रमतः सूर्यादिबलं नृपदर्शनसर्वकार्ययुद्धेषु ॥ शास्त्रकरग्रहयात्रादीक्षासूद्वं विशेषेण ॥" अनिष्टसूर्यादीनां दानानि द्वितीयपरिच्छेदांते ॥

## अथ पल्लीसरटयोः फलम् ।

"दक्षांगोदरनाभिहृत्सु पतिता पल्ली वरांगे हनुं मुक्का नुः शुभदास्त्रियाः फलमिदं वामेतरव्यत्ययात् ॥ इत्याहुः सरटप्ररोहणफलं पातेन्यथैके वृथा पल्ल्यारोहणकेपि वस्त्रसहितं स्नात्वा चरेच्छांतिकम् ॥"

## अथ पल्लीसरटशांतिः ।

तयोः स्पर्शमात्रे स्नानं कृत्वा पंचगव्यं प्राश्याज्यमवलोक्याशुभनाशार्थं शुभवृद्ध्यर्थं वा शांतिः कार्या ॥ पल्ल्याः सरटस्य वा हेम्ना प्रतिमां कृत्वा रक्तवस्त्रेण संवेष्ट्य संपूज्य कलशे रुद्रं संपूज्य मृत्युंजयमंत्रेण खादिरसमिद्भिरष्टोत्तरशतं तिलैर्व्याहृतिभिरष्टोत्तरं सहस्रं शतं वा हुत्वा स्विष्टकृदाद्यभिषेकांते स्वर्णवस्त्रतिलदानम् ॥

## अथ कपोतप्रवेशमधुवल्मीकोत्पत्तिपिंगलास्वरकाकवैकृत-ग्राम्यारण्यादिमृगपक्षिविकारे शांतिः ।

देवाः कपोत इति पंचर्चस्य सूक्तस्य सहस्रं शतं वा जपं कृत्वा समिदाज्यचरुभिः प्रत्येकमष्टोत्तरशतं 'यत इंद्र भयामहे स्वस्तिदा विशस्पतिं' इति मंत्रैर्हुत्वा व्याहृतिभिरष्टोत्तरशतं तिलहोमं कुर्यात् ॥ अथ वा पंचविप्रैः क्रमेण देवाः कपोत इति सूक्तं सुदेवो असीत्यृचं कनिक्रददिति शाकुंतसूक्तं 'नमो ब्रह्मणे नमो' इति मंत्रं च सहस्रादिसंख्यया जप्त्वोपनिषदश्च पठित्वा व्याहृतिभिस्तिलहोमं कुर्यात् ॥

## अथ काकस्पर्शमैथुनदर्शनादिशांतिः ।

संकल्पाद्यग्निप्रतिष्ठापनांते कुंभे सौवर्णमिंद्रं लोकपालांश्च संपूज्याग्नौ चरुं श्रपयित्वा पलाशसमिच्चर्वाज्यव्रीहिभिः प्रत्येकमष्टोत्तरं सहस्रं शतं वा यत इंद्रेति मंत्रेण हुत्वा लोकपालेभ्यस्तैरेव द्रव्यैः दशकृत्वः सकृद्वा हुत्वा लोकपालबलिं कुंभाग्रे वायसेभ्यो बलिमैंद्रवारुणेति मंत्रेण दत्वा यजमानोभिषेकांते शतं दश वा विप्रान्भोजयेत् ॥

## अथ घरट्टादिभेदनादिके ।

• घरट्टोलूखलमुसलदृषदासनमंचकादेरकस्मात्स्फोटने घृताक्तमधुयुताश्वत्थसमिधः प्रजापतये हुत्वा गायत्र्याष्टोत्तरसहस्रेणाभिमंत्रयेत् ॥

## अथ नानाविधदिव्यभौमांतरिक्षोत्पातेषु शांतिः ।

संकल्पादि कृत्वा कुंभे इंद्ररुद्रौ संपूज्य यत इंद्र स्वस्तिदा विशस्पतिः ॥ अघोरेभ्योथेति मंत्रैः समिदाज्यचरुव्रीहितिलान्प्रतिद्रव्यमष्टोत्तरशतं हुत्वा व्याहृतिभिः कोटिहोमं लक्षहोममयुतहोमं तत्पादहोमं वा तिलैर्वित्तानुसारेण निमित्तानुसारेण च सप्तरात्रं त्रिरात्रमेकरात्रं वा कृत्वा सूर्यगणेशक्षेत्रपालदुर्गामंत्राणां जपं कृत्वा पायसादिना ब्राह्मणभोजनं कार्यम् ॥ यद्वा चंडीसप्तशतीजपः ॥ अथ वा रुद्रैर्जपोभिषेको वा ॥ अश्वत्थप्रदक्षिणा शिवपूजा गोविप्रपूजादि वेति नानोत्पातसामान्यशांतयः ॥

## अथ गायत्रीपुरश्चरणप्रयोगः ।

देशकालौ संकीर्त्य करिष्यमाणगायत्रीपुरश्चरणेधिकारसिद्ध्यर्थं कृच्छ्रत्रयममुकप्रत्याम्नायेनाहमाचरिष्ये इति संकल्प्य होमादिप्रत्याम्नायविधिना कृच्छ्राण्यनुष्ठायामुकशर्मणो मम गायत्रीपुरश्चरणेऽनेन कृच्छ्रत्रयानुष्ठानेनाधिकारसिद्धिरस्त्विति विप्रान्वदेत् ॥ विप्रा अधिकारसिद्धिरस्त्विति ब्रूयुः ॥ ततः करिष्यमाणपुरश्चरणांगत्वेन विहितं गायत्रीजपादि करिष्य इति संकल्प्य स्वयं विप्रद्वारा वा तत् कुर्यात् ॥ तद्यथा ॥ सप्रणवव्याहृतिकगायत्र्या अयुतं जपित्वा आपोहिष्ठेति सूक्तम् एतोन्विंद्रमिति चतस्रः ऋतं चेति सूक्तं स्वस्ति न इत्याद्याः स्वस्तिमतीः स्वादिष्ठयेत्याद्याः पावमानीश्च सर्वाः प्रत्येकं दशवारं स्वयमन्यद्वारा वा जपं कृत्वा तत्सवितुरित्यस्याचार्यमृषिं विश्वामित्रं तर्पयामि ॥ गायत्रीछंदस्त० सवितारं देवतां० इति तर्पणं कृत्वा रुद्रं नमस्कृत्य कद्रुद्रायेत्यादीनि रुद्रसूक्तानि जपेत् ॥ ततो दिनांतरे देशकालौ संकीर्त्य मम सकलपापक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं चतुर्विंशतिलक्षात्मकगायत्रीपुरश्चरणं स्वयं विप्रद्वारा वा करिष्ये तदंगत्वेन स्वस्तिवाचनं मातृकापूजनं नांदीश्राद्धं विप्रद्वारा जपे जपकर्तृवरणं च करिष्ये इति संकल्पः ॥ संकल्पस्यापि ऋत्विक्कर्तृकत्वेमुकशर्मणो यजमानस्य सकलपापक्षयेत्यादियजमानानुज्ञया करिष्ये ॥ एवं पूर्वत्रापि संकल्प ऊह्यः ॥ नांदीश्राद्धांते सविता प्रीयतामिति ॥ गायत्रीपुरश्चरणे जपकर्तारं त्वां वृणे इति विप्रमेकैकं वृणुयात् ॥ वस्त्रादिभिः पूजयेत् ॥ अथ नित्यकर्म एकैको विप्रः स्वयं वा कुशाद्यासनोपविष्टः पवित्रपाणिराचम्य प्राणानायम्य देवताः प्रार्थयेत् ॥ "सूर्यः सोमो यमः कालः संध्ये भूतान्यहः क्षपा ॥ पवमानो दिक्पतिर्भूराकाशं खेचरामराः ॥ ब्रह्मशासनमास्थाय कल्पध्वमिह संनिधिम्" इति ॥ ततो देशकालौ संकीर्त्य प्रत्याहिकजपं संकल्प्य ॥ गुरवे नमः ॥ गणपतये० ॥ दुर्गायै० ॥ मातृभ्यो न० ॥ इति नत्वा त्रिः प्राणानायम्य ॥ तत्सवितुरितिगायत्र्या विश्वामित्र ऋषिः ॥ सविता देवता ॥ गायत्री छन्दः ॥ जपे

वि० ॥ विश्वामित्रऋषये नमः शिरसि ॥ गायत्रीछन्दसे नमो मुखे ॥ सवितृदेवतायै नमो हृदि इति न्यस्य ॥ तत्सवितुरंगुष्ठाभ्यां ० ॥ वरेण्यं तर्जनीभ्यां० ॥ भर्गोदेवस्य मध्यमा० ॥ धीमह्यनामिका० ॥ धियो यो नः कनिष्ठिकाभ्यां ० ॥ प्रचोदयात् करतलकरपृष्ठाभ्यां नमः ॥ इति करन्यासं कृत्वैवं हृदयादिषडंगन्यासं कुर्यात् ॥ पूर्वोक्तरीत्या संस्कृतां जपमालां पात्रे निधाय संप्रोक्ष्य ॥ "ॐ महामाये महामाले सर्वशक्तिस्वरूपिणि ॥ चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मां सिद्धिदा भव" इति प्रार्थ्य ॥ "ॐ अविघ्नं कुरु माले त्वम्" इति तामादाय मन्त्रदेवतां सवितारं ध्यायन् हृदये मालां धारयन्मंत्रार्थं स्मरन्मध्यंदिनावधि जपेत् ॥ अतित्वरायां मार्धत्रयप्रहरावधि ॥ जपांते पुनः प्रणवमुक्त्वा ॥ "त्वं माले सर्वदेवानां प्रीतिदा शुभदा भव ॥ शिवं कुरुष्व मे भद्रे यशो वीर्यं च सर्वदा ॥" इति मालां शिरसि निधाय ॥ त्रिः प्राणानायम्य ॥ न्यासत्रयं कृत्वा ॥ जपमीश्वरार्पणं कुर्यात ॥ प्रत्यहं समानसंख्य एव जपो न तु न्यूनाधिकः ॥ एवं पुरश्चरणजपममाप्तौ होमः ॥ पुरश्चरणसांगतासिद्ध्यर्थं होमविधिं करिष्ये इति संकल्प्याग्निं प्रतिष्ठाप्य पीठे सूर्यादिनवग्रहपूजनादिकलशस्थापनांतेन्वाधात् ॥ त्रक्षुवा आज्येनन्यंते गृहपीठदेवतान्वाधानम् ॥ अर्कादिसमिच्चर्वाज्याहुतिभिः कृत्वा प्रधानदेवतां सवितारं चतुर्विंशतिसहस्रातिलाहुतिभिस्त्रिसहस्रसंख्याकाभिः पायसाहुतिभिस्तन्मिश्रातिलाहुतिभिर्दूर्वाहुतिभिः क्षीरद्रुमसमिदाहुतिभिश्च शेषेण स्विष्टकृदित्यादिचरुपायसतिलैः सहाज्यस्य पर्यग्निकरणादि ॥ आज्यभागांते इदं हवनीयद्रव्यमन्वाधानोक्तदेवताभ्योस्तु न ममेति यजमानस्त्यागं कुर्यात् ॥ होमे सप्रणवा व्याहृतिर्गहिता स्वाहांता गायत्री ॥ दूर्वात्रयस्यैकाहुतिः दूर्वासमिधां दधिमध्वाज्योजनम् ॥ स्विष्टकृदादिबलिदानांते समुद्रज्येष्ठा इत्यादिभिर्यजमानाभिषेकः प्रतिलक्षं तु सुवर्णनिष्कत्रयं तदर्धं वा शक्त्या वा दक्षिणा ॥ होमांते जले देवं सवितारं संपूज्य होमसंख्या दशांशेन २४०० गायत्र्यंते सवितारं तर्पयामीत्युक्त्वा तर्पणं कार्यम् ॥ तर्पणदशांशेन २४० गायत्र्यंते आत्मानमभिषिंचामि नम इति स्वमूर्ध्न्यभिषेकः ॥ होमतर्पणाभिषेकाणां मध्ये यदेव न संभवति तत्स्थाने तत्तद्दशगुणो जपः कार्यः ॥ अभिषेकसंख्या दशांशेनाधिकं वा विप्रभोजनम ॥ पुरश्चरणं पूर्णमास्त्विति विप्रान्वाचयित्वेश्वरार्पणं कार्यम् ॥ प्रत्यहं यज्जाग्रत इति शिवसंकल्पमंत्रस्य त्रिः पाठः ॥ कर्ता ब्राह्मणैः सह हविष्याशी सत्यवादी अप्रतिग्रहायी परगृहीतभूप्रदेशानतिचारी च भवेत् ॥ इत्यनन्तदेवीयानुसारेण चतुर्विंशतिलक्षपुरश्चरणप्रयोगः ॥ऋग्विधाने तु ॥ "मध्याह्ने मितभुङ् मौनी त्रिः स्नानार्चनतत्परः ॥ लक्षत्रयं जपेद्धीमान्" इति त्रिलक्षं पुरश्चरणमुक्तम् ॥ जपशतांशस्त्रिसहस्रं होमः 'कलौ चतुर्गुणं प्रोक्तम्' इति पक्षे द्वादशलक्षजपो द्वादशसहस्रहोम

इत्याद्यूह्यम्॥ विष्णुशयनमासेषु पुरश्चरणं न कार्यम्॥तीर्थादौ शीघ्रं सिद्धिः॥बिल्ववृक्षाश्रयेण जपे एकाहात्सिद्धिरिति सर्वमन्त्रप्रक्रिया॥इति गायत्रीपुरश्चरणं ज्ञेयम् ॥

## अथ पूर्तकमलाकरेऽश्वत्थोपनयनम् ।

तच्च वर्णैः क्रमेण वृक्षस्थापनादष्टमैकादशे द्वादशवर्षे उपनयनोक्तमुहूर्त्ते पूर्वाह्णे कार्यम् ॥ शूद्रस्थापिताश्वत्थे पौराणिकमंत्रैरारामप्रतिष्ठामात्रं कार्यं नोपनयनम् ॥

## अथ प्रयोगः ।

कर्त्ता देशकालौ संकीर्त्य सर्वपापक्षयकुलकोटिसमुद्धरणपूर्वकविष्णुसायुज्यप्राप्तिकामोश्वत्थोपनयनं करिष्ये इति संकल्प्य नांदीश्राद्धांते आचार्यं वृणुयात् ॥ आचार्यः पंचामृतैः शुद्धोदकैः सर्वौषधिजलैश्चाश्वत्थमभिषिच्य पिष्टातकेनालंकृत्य तत्पूर्वे स्थंडिलेग्निं प्रतिष्ठाप्यान्वाधानेग्निं वायुं सूर्यं त्रिरग्निं पवमानं प्रजापतिं द्विरौषधीर्वनस्पतिं पिप्पलं प्रजापतिं च पलाशसमिच्चर्वाज्यैः प्रत्येकंमेकैकमाहुत्या शेषेणेत्यादि॥ अष्टचत्वारिंशन्मुष्टीनां तूष्णीं निर्वापप्रोक्षणे ॥ श्रपणाद्याज्यभागांते ॥ युवं वस्त्राणीत्यश्वत्थं वस्त्रयुग्मेनावेष्ट्य यज्ञोपवीतमिति यज्ञोपवीतं दत्त्वा प्रावेपामेतिमेखलां त्रिरावेष्टयाजिनं दंडं च तूष्णीं दत्त्वा ॥ अश्वत्थेव इत्यृचा गंधपुष्पैः संपूज्य देवस्य त्वेति मंत्रांते हस्तं गृह्णाम्यश्वत्थेति स्पृष्ट्वा सप्रणवव्याहृतिकां गायत्रीं त्रिर्जपित्वा ॥ अश्वत्थेवो निषदनमिति सूक्तेन व्याहृतिभिश्चाश्वत्थं स्थापयामीति स्वर्णशलाकया स्पृष्ट्वाज्यपलाशसमिच्चरुभिः प्रत्येकं द्वादशमंत्रैर्द्वादशाहुतीर्जुहुयात्॥ मंत्रास्तु भूः स्वा० अग्नय इदं० भुवः स्वा० वायव० स्वः स्वा० सूर्याय० भूर्भुवः स्वः स्वा० प्रजापतय० अग्न आयूंषि० अग्निर्ऋषिः० अग्ने पवस्वेति *त्रिभिरग्नये पवमानायेदं० प्रजापते नत्व० प्रजापतय० ओषधयः संवदंते० अश्वत्थे वो० ओषधीभ्य इदं० वनस्पते शत० वनस्पतय इ० द्वासुपर्णा० पिप्पलायेदं० समस्तव्याहृतिभिः प्रजापतय इदं स्विष्टकृदादिहोमशेषं समाप्याश्वत्थेव इति गंधपुष्पधूपदीपनैवेद्यफलतांबूलाद्यैः संपूज्याश्वत्थं स्पृष्ट्वाचार्याय गामन्येभ्यो दक्षिणां दत्त्वाश्वत्थवस्त्रादिकमाचार्याय दत्त्वाष्टौ विप्रान्भोजयेदिति॥अपुत्रेण पुंसा स्त्रिया वा वटप्लक्षाश्वादेः पुत्रत्वेन प्रतिग्रहः कार्यः ॥ देशकालौ संकीर्त्य मम महापापक्षयकुलत्रयसमुद्धरणप्रजापतिपुरगमननिरयस्थपितृद्धरणमधुधारातृप्तिसिद्ध्यर्थं तत्पुत्रत्वसिद्ध्यर्थममुकवृक्षं प्रतिग्रहीष्ये इति संकल्प्योपवासं कृत्वा रात्रावष्टौ विप्रानाहूय चन्द्रं संपूज्य जागरं भूशयनं वा कृत्वा प्रातर्वृक्षं संपूज्य तच्छायायां विप्रान्संभोज्य ॥ पुण्याहं वाचयित्वा प्रार्थयेत् ॥ " अपुत्रो भगवन्तोत्र पुत्रप्रतिकृतिं तरुम् ॥ ग्रहीष्यामि ममानुज्ञां कर्तुमर्हथ सत्तमाः ॥ " ताम्रपात्रे पंचसौवर्णफलानि बीजपंचरत्नयुतान्यधिवास्य लोकपालबलीन्दद्यात् ॥ परेद्युस्तिलाज्यचरुभिरष्टशतं वनस्पतिमन्त्रेण हुत्वा ॥ जातकर्मादिविवाहांतसंस्कारान्कृत्वाभिषिक्तः

कर्त्ता पुष्पांजलिमादाय प्रार्थयेत्॥"ये शाखिनः शिखरिणां शिरसां विभूषा येनंदनादिषु वनेषु कृतप्रतिष्ठाः॥ये कामदाः सुरनरोरगकिन्नराणां ते मे नतस्यदुरितार्तिहरा भवन्तु ॥ एते द्विजा विधिवदत्र हुतो हुताशः पश्यत्यसौ च हिमदीधितिरंतरस्थः ॥ त्वं वृक्ष पुत्रपरिकल्पनया वृतोसि कार्यं सदैव भवता मम पुत्रकार्यम् ॥ " अंगादंगादिति स्पृष्ट्वा विप्रेभ्यो दक्षिणां दत्त्वा विसृजेत्॥इति वटादितरुपुत्रविधिः॥

## अथ सकलकर्मसाधारणपरिभाषा ।

"सर्वेषु पाकयज्ञेषु भवेद्ब्रह्मा कृताकृतः ॥ पात्रासादनमिच्छात आज्यादिश्रपणादि च ॥ स्रुवादिमार्जनं चेध्मरज्जुप्रहरणं तथा ॥ पूर्णपात्रं भवेन्नित्यमाज्यस्योत्पवने तथा ॥ व्रीहीणामवघातश्च तण्डुलेषु कृताकृतः ॥ द्रवीभूतघृतस्यापि विलापनविधिस्तथा ॥ " प्रतिपदोक्ताज्यहोमे परिस्तरणं विकल्पितम् ॥ अनादिष्टाज्यहोमे तु नित्यम् ॥ आज्यभागसहिततद्रहितकर्मणोस्तंत्रप्रयोगे आज्यभागाननुष्ठानमेव युक्तम् ॥ सर्वत्राज्यभागयोर्विकल्पितत्वात् ॥ अनेकपाकयज्ञानामेककालानुष्ठाने समानतंत्रता ॥ तेन स्विष्टकृताद्येकमेव ॥ यत्र द्रव्यं नोक्तं तत्राज्यं ग्राह्यम् ॥ "मंत्रांते कर्म कर्तव्यं मंत्रस्य करणत्वतः ॥ कर्मावृत्तौ तु मंत्रस्याप्यावृत्तिर्गृह्यकर्मणि ॥ " समंत्रकहोमे तूष्णीं निर्वापः ॥ नाम्ना होम नाम्नैव निर्वापादि ॥ यत्र मंत्रेण नाम्ना वा होमो नोक्तस्तत्र नाम्नैव होमः ॥ समन्त्रकहोमे सहैवानेकदैवत्यचरुपाकेपि न विभागो नाभिमर्शश्च ॥ अनुक्तौ दक्षिणः करः दिशामनुक्तौ प्राच्युदीशान्यः ॥ तिष्ठन्नासीन इत्याद्यनुक्तावासीनतैव ॥ अनादेशे स्वयं कर्ता ॥ अविज्ञातस्वरो मन्त्रः सौत्र एकश्रुतिर्भवेत् ॥ "होमेषु मंत्रं स्वाहांतं प्रणवाद्यं च कारयेत् ॥ विप्रादीनां द्विदर्भं स्यात्पवित्रं ग्रथितं न वा ॥ " आहुतिप्रमाणम् ॥ "कर्षप्रमाणमाज्यादिलाजामुष्टिमिता मताः ॥ अन्नं ग्राससमं ग्राह्यं कन्दानामष्टमोंशकः ॥ तिलसक्तुकणादीनां मृगीमुद्राप्रमाणतः ॥ ताम्रपात्रेण पिहिते ताम्रपात्रादिके शुभे ॥ अग्निप्रणयनं कार्यं मृन्मये राजतादिके ॥ उत्तमः श्रोत्रियागारान्मध्यमः स्वगृहादितः ॥" नाप्रोक्षितमिंधनमग्नावादध्यात् ॥ 'सदोपवीतिना भाव्यं सदा बद्धशिखेन च॥'सदेति कर्मागता पुरुषार्थता च ॥ तेन कर्मकाले शिखाबंधनाद्यभावे प्रायश्चित्तद्वयमन्यदैकमेव ॥ दशविधा दर्भा उक्ताः ॥ वटप्लक्षबिल्ववैकंकतचन्दनदेवदारुसरलवृक्षजा अपि क्वचित्समिधः ॥ "प्रभुः प्रथमकल्पस्य योनुकल्पेन वर्तते ॥ स नाप्नोति फलं तस्य परत्रापि श्रुतिः स्मृतिः ॥ बह्वल्पं वा स्वगृह्योक्तं यस्य यत्कर्म चोदितम् ॥ तस्य तावति शास्त्रार्थे कृते सर्वः कृते भवेत् ॥ " अथ कर्मविशेषेग्निनामानि ॥ "अग्निस्तु मरुतो नाम गर्भाधानें विधीयते ॥ पवमानः पुंसवने सीमन्ते मंगलाभिधः ॥ प्रबलो जातसंस्कारे पार्थिवो नामकर्मणि ॥ अन्नाशने शुचिः प्रोक्तः सभ्यः स्याच्चौलकर्मणि ॥" व्रतादेशे

समुद्भवः गोदानादौ सूर्यः विवाहे योजकः ॥ आवसथ्ये द्विजनामा ॥ प्रायश्चित्ते विटः ॥ पाकयज्ञेषु पावकः ॥पित्र्ये कव्यवाहनः॥ दैवे हव्यवाहनः॥ शांतिके वरदः प्रोक्तः पौष्टिके बलवर्धनः ॥ मृतदाहे क्रव्यादः ॥ "ज्ञात्वैवमग्निनामानि गृह्यकर्म समारभेत् ॥ पलाशेन जुहूः कार्या खदिरेण स्रुवः स्रुचः ॥" तदभावे यथालाभं यज्ञियवृक्षजाः ॥ तदभावे पलाशमध्यपर्णैर्वा पिप्पलपर्णैर्वा होमः॥ एवं चमसादयोपि खदिरादियज्ञियवृक्षजाः ॥ "काम्ये प्रतिनिधिर्नास्ति नित्ये नैमित्तिके हि सः ॥ काम्येप्युपक्रमादूर्ध्वमन्ये प्रतिनिधिं विदुः ॥ न स्यात्प्रतिनिधिर्मंत्रकर्मदेवाग्निकर्तृषु ॥ न देशारणिकालेषु त्रिषु प्रतिनिधिर्मतः ॥ नातिप्रतिनिधातव्यं निषिद्धं वस्तु कुत्रचित् ॥ स्वकालादुत्तरो गौणः कालः सर्वस्य कर्मणः ॥ तर्पणेष्वासने श्राद्धे भुक्तौ मूत्रपुरीषयोः ॥ षट्सु निर्माल्यका दर्भा दर्व्याद्या अभिचारके॥ मंत्रोपि यश्च शूद्रार्थे ब्राह्मणः प्रेतभोजने ॥" अथ कर्माङ्गदेवताः ॥ विवाहस्याग्निर्देवता ॥ तेन विवाहांगभूतस्वस्तिवाचनाद्यंते कर्माङ्गदेवताग्निः प्रीयतामिति वदेत् ॥ औपासनेग्निसूर्यप्रजापतयः ॥ स्थालीपाकेग्निः ॥ गर्भाधाने ब्रह्मा ॥ पुंसवने प्रजापतिः ॥ सीमन्ते धाता ॥ जातकर्मणि मृत्युः ॥ नामकर्मनिष्क्रमणान्नप्राशनेषु सविता ॥ चौले केशिनः ॥ उपनयने इन्द्रेंद्राः श्रद्धा मेधाः॥ अंते सुश्रवाः ॥ पुनरुपनयनेग्निः ॥ समावर्तनस्येंद्रः ॥ उपाकर्मणि व्रतेषु च सविता वास्तुहोमे वास्तोष्पतिरंते प्रजापतिः ॥ आग्रयणे आग्रयणदेवताः ॥ सर्पबलेः सर्पाः ॥ तडागादीनां वरुणः ॥ ग्रहयज्ञे आदित्यादिनवग्रहाः ॥ कूष्मांडहोमे चांद्रायणे अग्न्याधाने चाग्न्यादयः ॥ अग्निष्टोमस्याग्निः ॥ अन्येष्विष्टकर्मसु प्रजापतिरिति ॥ अथ कलियुगे कार्याकार्यविवेकः "गीता गंगा तथा विष्णुः कपिलाश्वत्थसेवनम्॥ एकादशीव्रतं चैव सप्तमं न कलौ युगे ॥ विष्णुं शिवं वा भजतां गुरोः पित्रोश्च सेविनाम्॥ गोवैष्णवमहाशैवतुलसीसेविनामपि ॥ न स्यात्कलिकृतो दोषः काश्यां निवसतामपि॥ कलौ गुरूणां भजनमीशभक्त्यधिकं स्मृतम् ॥ जपादौ यत्र या संख्या कलौ सा स्याच्चतुर्गुणा ॥ कलौ दानं महाश्रेष्ठं शिवविष्ण्वोश्च कीर्तनम् ॥ कृते यद्दशभिर्वर्षैस्त्रेतायां हायनेन तु ॥ द्वापरे तत्तु मासेन अहोरात्रेण तत्कलौ" ॥ प्रथमस्कंधे ॥ 'कुशलान्याशु सिद्ध्यंति नेतराणि कृतानि यत्' इति कलौ पुण्यकर्मणां संकल्पेपि सिद्धिः ॥ पापानां त्वाचरणादेवेत्युक्तम् ॥ 'स्मृत्यंतरविरोधे तु कलौ पाराशरी स्मृतिः ॥' "ध्यायन्कृते यजन्यज्ञैस्त्रेतायां द्वापरेर्चयन् ॥ यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवम् ॥" इति हेमाद्रौ व्यासवचनम् ॥ अत्र कृतयुगाद्यधिकरणकध्यानादिफलार्थं कल्यधिकरणकं कीर्तनं विधीयत इति वाक्यार्थः ॥ कौस्तुभकर्तृपितामहैर्भक्तिनिर्णये विस्तरेण निरूपितः ॥ हेमाद्रौ ॥ "कलिं सभाजयंत्यार्या गुणज्ञाः सारभागिनः ॥ यत्र संकीर्तनेनैव सर्वः स्वार्थोभिलभ्यते ॥" इति श्रीभागवतवच-

नमुदाहृत्य संकीर्तनेन हरिसंकीर्तनेत्यर्थ इति हेमाद्रावेव व्याख्यातम् ॥ "कृष्णवर्णं त्विषा कृष्णं सांगोपांगास्त्रपार्षदम् ॥ यज्ञैः संकीर्तनप्रायैर्यजंतीह सुमेधसः ॥" यज्ञादिस्वस्वाचारमाचरद्भिरपि कलिषु संकीर्तननिष्ठैर्भाव्यमित्याशय इति कौस्तुभे॥ अनेन चतुर्वर्गफलं नारायणाश्रयणमात्रेण भवतीति सिद्धम् ॥"या वै साधनसंपत्तिः पुरुषार्थचतुष्टये ॥ तया विना तदाप्नोति नरो नारायणाश्रयः ॥" इति भारतोक्तेः ॥ श्रीभागवतेपि ॥"धर्मार्थकाममोक्षाख्यं य इच्छेच्छ्रेय आत्मनः ॥ एकं ह्येव हरेस्तत्र कारणं पादसेवनम् ॥" इति ॥ अत्रैकपदावधारणादिपदैरन्यसाधनानपेक्षत्वं भक्तियोगस्योच्यते ॥ ज्ञानयोगादेश्च हरिपदसेवनसापेक्षत्वं ध्वन्यते ॥ तथा च स्पष्टमेकादशादौ ॥"तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः॥ न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह ॥ यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत् ॥ योगेन दानधर्मेण श्रेयोभिरितरैरपि ॥ सर्वं मद्भक्तियोगेन मद्भक्तो लभतेंजसा ॥ स्वर्गापवर्गं मद्धाम कथंचिद्यदि वांछति ॥ इति ॥ श्रेयःस्रुतिं भक्तिमुदस्यते विभो क्लिश्यंति ये केवलबोधलब्धये ॥ तेषामसौ क्लेशल एव शिष्यते नान्यद्यथा स्थूलतुषावघातिनाम् ॥" इत्यादिपरसहस्रवचनानि ॥ ज्ञानयोगस्य भगवदाराधनं तत्प्रसादं च विनैव सिद्धिरिति क्वापि केनाप्यनुक्तेश्च ॥ सर्वापेक्षा च यज्ञादिश्रुतेरश्ववदित्यधिकरणे ज्ञानोत्पत्तौ यज्ञादिसर्वसाधनापेक्षोक्तेश्च ॥ किं च भक्तियोगे दुराचारिणोपि दृढवैराग्यरहितस्याप्यधिकारो गम्यते ॥ "अपि चेत्सुदुराचारो भजते मामनन्यभाक् ॥ साधुरेव स मंतव्यः सम्यग्व्यवसितो हि सः ॥ क्षिप्रं भवति धर्मात्मा शश्वच्छांतिं निगच्छति ॥ कौंतेय प्रतिजानीहि न मे भक्तः प्रणश्यति ॥ न निर्विण्णो नातिसक्तो भक्तियोगोस्य सिद्धिदः॥"इत्यादिवचनेभ्यः ॥ नैवं दुराचारिणापि दृढवैराग्यादिसाधनचतुष्टयसंपत्त्यभावेपि वेदांतश्रवणाद्यनुष्ठितौ ज्ञानोत्पत्तिर्भवतीति क्वाप्युपलभ्यते ॥ न च यथोक्ताधिकारसंपत्तिं विनानुष्ठितं साधनं किमपि फलाय कल्पते ॥ तस्मात्सर्वथा सर्वैः कलौ श्रीहरिपादसेवनादिभक्तियोगाश्रयणमेव कर्तव्यमिति सिद्धम् ॥

## अथ कलौ निषिद्धानि ।

"समुद्रयात्रास्वीकारः कमंडलुविधारणम् ॥ द्विजानामसवर्णासु कन्यासूपयमस्तथा ॥ देवराद्यैः सुतोत्पत्तिर्मधुपर्के पशोर्वधः ॥ मांसदानं तथा श्राद्धे वानप्रस्थाश्रमस्तथा ॥ दत्ताक्षतायाः कन्यायाः पुनर्दानं परस्य च ॥ दीर्घकालं ब्रह्मचर्यं नरमेधाश्वमेधकौ ॥ महाप्रस्थानगमनं गोमेधश्च तथा मखः ॥ इमान्धर्मान् कलियुगे वर्ज्यानाहुर्मनीषिणः ॥ मद्यं वर्ज्यं महापापे मरणांतविशोधनम् ॥ सौत्रामण्यादियज्ञेपि सुरापात्रग्रहस्तथा ॥ मद्यभक्षादिवामाद्यागमस्य तु न मानता ॥ मीमांसाद्वितये सर्वैशिष्टैश्च तदनादरात् ॥ औरसो दत्तकश्चैतौ पुत्रौ कलियुगे मृतौ ॥ अन्यान्दशविधान्पुत्रान्क्रीताद्यान्वर्जयेत्कलौ ॥" कौस्तुभे तु स्वयं दत्त-

स्तृतीयोपि कलौ विहित इति नवैव कलौ निषिद्धा इत्युक्तम् ॥ कलियुगे ब्रह्महत्रादेरेवाव्यवहार्यत्वादिरूपं पातित्यम् ॥ तत्संसर्गिणस्तु नरकहेतुदोषसत्त्वेपि पातित्यं नास्ति ॥ 'संसर्गदोषः पापेषु इति' कलिवर्ज्येषु वचनात् ॥ "कृते संभाष्य पतति त्रेतायां स्पर्शनेन तु ॥ द्वापरे त्वन्नमादाय कलौ पतति कर्मणा॥" इति वचनाच्च ॥ ब्रह्महननादिकर्मणैव पातित्यं न संसर्गमात्रेणेति तदर्थात् ॥ इदं च लोकेष्वबहिष्कृतपातकिषु लोकविद्विष्टत्वेनापरिहार्यसंसर्गे पातित्याभावपरम् ॥ न हि लोकेष्वबहिष्कृतानां प्रच्छन्नाभक्ष्यभक्षणापेयपानागम्यागमनादिपातकवतां तज्ज्ञानवतातिशिष्टेनापि संभाषणादिसंसर्गो नरकहेतुरपि परिहर्तुं शक्यते ॥ लोकविद्वेषापातात् ॥ लोकबहिष्कृतपापिनां संसर्गस्तु पातित्यहेतुरेव ॥ तथैव शिष्टाचारादिति मे भाति ॥ अत एव " त्यजेद्देशं कृतयुगे त्रेतायां ग्राममुत्सृजेत् ॥ द्वापरे कुलमेकं तु कर्तारं तु कलौ युगे ॥" इति वाक्ये कर्तृत्यागो विधीयते ॥ त्यागो हि संसर्गपरिहार एव ॥ किं चानेन वाक्येन यत्र कुलादौ ब्रह्महत्यादिपातकी निष्पद्यते तत्कुलादिकं द्वापरादावेव बहिष्कार्यं न तु कलौ कुलादेर्बहिष्कारः ॥ किं तु कर्तुरेव कलौ बहिष्कार इति प्रतिपाद्यते ॥ न चैतद्वाक्यविरोधिवाक्यांतरं पतितसगोत्रसपिंडादीनां कर्मानर्हत्वासंव्यवहार्यत्वप्रतिपादकं क्वापि ग्रंथे उपलभ्यते ॥ यत्तु निर्णयसिंधौ घटस्फोटप्रकरणे गृहेषु स्वैरमापद्येरन्निति वसिष्ठवचनसामर्थ्यात् पात्रनिनयनात्प्राक् पतितज्ञातीनां धर्मकार्येष्वधिकारो नास्तीत्यपरार्कव्याख्यानमुपन्यस्तम् ॥ तन्न सर्वपतितविषयम् ॥ किं तु घटस्फोटार्हप्रायश्चित्तानिच्छुपतितविषयम् ॥ अन्यथा पात्रनिनयनात्प्रागिति न वदेत् ॥ प्रायश्चित्तात्प्रागित्येव वदेत्॥ 'कर्तारं तु कलौ युगे' इत्यादि प्रत्यक्षवचनेन विरोधेर्थापत्तिमूलकस्य सर्वपतितविषयककुलबहिष्कारवर्णनस्य पुरुषव्याख्यानरूपस्याप्रामाण्यापाताच्चेति भातीति संक्षेपः ॥ न चैवं घटस्फोटविधिर्व्यर्थ इति वाच्यम् ॥ तस्य पारलौकिकदोषपरिहारार्थत्वात् ॥ लोकबहिष्कृतपातकविषये संभाषणादिसंसर्गस्य पातित्यहेतुत्वाभावेपि परत्र नरकजनकदोषहेतुत्ववत्पतितेन सहैककुलत्वसंसर्गस्यापीह पातित्यादिदोषहेतुत्वाभावेपि पारत्रिकदोषहेतुत्वात्॥ अत्र च घटस्फोटविधेरेवार्थापत्तिविधयामानत्वात् ॥ तथा च पारत्रिकदोषपरिहारार्थं घटस्फोटविधिरिति न तद्विधिबलेन पतितमात्रस्य कुले बहिष्कार इति भातीति संक्षेपः ॥ सत्राख्ययज्ञः कलौ वर्ज्यः ॥ ब्रह्महत्यादिमहापातकेषु प्रायश्चित्तेन नरकनिवृत्तिर्न भवति किं त्विहलोके व्यवहार्यतामात्रं कलौ भवति ॥ स्वर्णस्तेयादिषु तु प्रायश्चित्तेन नरकनिवृत्तिर्व्यवहार्यता च ॥ केचित्तु रहस्यकृतेषु महापापेषु रहस्यप्रायश्चित्तं कलौ नोपदेष्टव्यमित्याहुः ॥ विप्रादिस्त्रीसंभोगेन भ्रष्टानां शूद्रादीनां प्रायश्चित्तेपि संसर्गो निषिद्धः ॥ यज्ञे पशुमारणं शूद्रहस्तेन कार्यं न तु विप्रेण स्वयं कार्यमित्यर्थः ॥ सोमविक्रयश्च विप्राणां कलौ वर्ज्यः ॥ "ज्येष्ठादिसर्वभ्रातॄणां समभागः कलौ स्मृतः ॥ आतता-

यिद्विजानां नो धर्मयुद्धेपि हिंसनम्॥" अब्धौ नौयातुर्द्विजस्य प्रायश्चित्तेपि संसर्गो न ॥ "गवार्थे ब्राह्मणार्थे च प्राणत्यागः कलौ न हि॥द्विजानां गोपशूद्रादौ भोज्यान्नत्वं कलौ न हि ॥ शिष्यस्य गुरुपत्नीषु न चिरं वासशीलता ॥ आपदि क्षत्रवैश्यादिवृत्तिं विप्रः कलौ त्यजेत् ॥ कलौ द्विजो न हि भवेदश्वस्तनिकजीविकः॥ द्वादशाब्दं गुरौ वासं मुखाग्निध्मनक्रियाम् ॥ यतेर्भिक्षां सर्ववर्णे कलौ त्रीणि विवर्जयेत् ॥ नवोदकनिषेधं च दक्षिणां गुरुवांछिताम् ॥ वृद्धरुग्णादिमरणं जलाग्निपतनादिभिः ॥ गोतृप्तिमात्रे भूमिष्ठे पयस्याचमनक्रियाम् ॥ पितृवादे साक्षिदंडं कलौ पंच विवर्जयेत् ॥ घृतदुग्धादिभिः पक्वमन्नं शूद्रात्कलौ त्यजेत् ॥ भिक्षामटन्यती रात्रौ न वसेद्गृहिणां गृहे ॥ विधूमे सन्नमुसले काले भिक्षां कलौ त्यजेत् ॥ चत्वार्यब्दसहस्राणि चत्वार्यब्दशतानि च ॥ कलेर्यदा गमिष्यंति तदा त्रेतापरिग्रहः॥ संन्यासश्च न कर्तव्यो ब्राह्मणेन विजानता ॥" त्रेतापरिग्रहः सर्वाधानम् ॥ "अर्धाधानं स्मृतं श्रौतस्मार्ताग्न्योस्तु पृथक्कृतिः ॥ सर्वाधानं तयोरैक्यकृतिः पूर्वयुगाश्रया ॥" अस्यापवादः ॥ "यावद्वर्णविभागोस्ति यावद्वेदः प्रवर्तते ॥ संन्यासं चाग्निहोत्रं च तावत्कुर्यात्कलौ युगे ॥" इति ॥"शपथाः शकुनाः स्वप्नाः सामुद्रिकमुपश्रुतिः ॥ देवपूजोपहारादेः संकल्पः कार्यसिद्धये ॥ प्रश्नोत्तरं कालविदां संभवंति कलौ क्वचित्॥" इति कलौ कार्याकार्यनिर्णयः ॥

## अथ स्वप्नविचारः ।

स्वप्नो द्विविधः ॥ इष्टफलोनिष्टफलश्चेति ॥ तत्र सामान्यत इष्टफलो यथा ॥ "नदीसमुद्रतरणमाकाशगमनं तथा ॥ गृहनक्षत्रमार्तंडचंद्रमंडलदर्शनम् ॥ हर्म्यस्यारोहणं चैव प्रासादशिरसोपि वा॥ स्वप्ने च मदिरापानं वसामांसस्य भक्षणम्॥ कृमिविष्ठानुलेपश्च रुधिरेणाभिषेचनम् ॥ भोजनं दधिभक्तस्य श्वेतवस्त्रानुलेपनम्॥ रत्नान्याभरणादीनि स्वप्ने दृष्ट्वा प्रसिध्यति ॥ देवताविप्रपृथ्वीशान्प्रशस्ताभरणांगनाः॥ वृषेभपर्वतक्षीरिफलिवृक्षाधिरोहणम् ॥ दर्पणामिषमाल्यानिं शुक्लपुष्पांबराश्रितान् ॥ द्रष्टुः स्वप्नेर्थलाभः स्याद्व्याधिमोक्षश्च जायते ॥ "

## अथानिष्टफलः ।

"दुष्टं किंशुकवल्मीकपारिभद्राधिरोहणम् ॥ तैलकार्पासपिण्याकलोहप्राप्तिर्विपत्तये ॥ विवाहकरणं स्वप्ने रक्तस्रग्वस्त्रधारणम् ॥ स्रोतसाहरणं नेष्टं पक्वमांसस्य भोजनम् ॥ आदित्यस्याथ चंद्रस्य निष्प्रभस्यावलोकनम् ॥ नक्षत्रादेश्च पातश्च स्वप्ने मरणशोककृत् ॥ " अशोककरवीरपलाशानां पुष्पितानां स्वप्ने दर्शने शोकः॥ नौकारोहणे प्रवासः रक्तवस्त्रगंधधारिण्या स्त्रियालिंगने मृत्युः॥ घृततैलादिनाभ्यंगे व्याधिः ॥ केशदन्तपाते धननाशः पुत्रशोको वा ॥ खरोष्ट्रमहिषै-

र्याने तद्युक्तरथारोहणे वा मृत्युः॥ कर्णनासाकरादिच्छेदे पंकमज्जने तैलाभ्यंगे विषभक्षणे प्रेतालिंगने नलदमालिनो दिगंबरस्य याने कृष्णपुरुषदर्शने च मृत्युः ॥

## अथ जागृतावनिष्टानि ।

"अरुंधतीं ध्रुवं चैव नभोमंदाकिनीं तथा ॥ स्वनासाग्रं च चंद्रांकमायुर्हीनो न पश्यति ॥ पांसुपंकादिषु न्यस्तं चरणं खंडितं यदि ॥ स्नानांबुलिप्तगात्रस्य यस्यास्यं प्राक् प्रशुष्यति ॥ गात्रेष्वार्द्रेषु सर्वेषु सूर्यादिद्वयदर्शनम् ॥ स्वर्णप्रतीतिर्वृक्षेषु स्वपदानामदर्शनम् ॥ पिहिते कर्णयुगले यस्य घोषानुपश्रुतिः ॥ अदर्शनं स्वशिरसः प्रतिबिंबे जलादिषु ॥ छिद्रप्रतीतिश्छायायां स चिरं नैव जीवति ॥ "

## अथ विशेषत इष्टफलाः स्वप्नाः ।

"यस्तु पश्यति वै स्वप्ने राजानं कुंजरं हयम् ॥ सुवर्णं वृषभं गां वा कुटुम्बं तस्य वर्धते ॥ " वृषं वृक्षं वारुह्य तत्रस्थस्य जागरे धनाप्तिः ॥ श्वेतसर्पेण दक्षिणभुजदंशे दशदिने सहस्रधनलाभः ॥जलस्थस्य वृश्चिकोरगग्राहे जयपुत्रधनानि ॥ प्रासादशैलारोहणे समुद्रतरणे राज्यम् ॥ तडागमध्ये पद्मपत्रेषु घृतपायसभोजने राज्यम् ॥ बलाकाकुक्कुटीक्रौंचीदर्शने भार्याप्राप्तिः ॥ निगडैर्बंधे बहुपाशबन्धे वा पुत्रधनादि ॥ " आसने शयने याने शरीरे वाहने गृहे ॥ ज्वलमाने विबुध्येत तस्य श्रीः सर्वतोमुखी ॥ " सूर्यचन्द्रमंडलदर्शने रोगिणो रोगनाशोऽन्यस्य धनम् ॥ सुरारुधिरयोः पाने विप्रस्य विद्या शद्रादेर्धनम्॥शुक्लांवरगन्धधारिण्या सुभगस्त्रियालिंगने संपत्तिः ॥ छत्रपादुकोपानत्खड्गलाभे धनम् ॥ वृषभयुक्तरथारोहणे धनम् ॥ दधिलाभे वेदाप्तिः ॥ दधिपयःपाने घृतलाभे च यशः॥ घृतभक्षणे क्लेशः ॥ आत्रैवेष्टने राज्यम् ॥ मनुष्यस्य चरणमांसभक्षणे शतं लाभः ॥ वाहुभक्षणे सहस्रम् ॥ शीर्षमांसभक्षणे राज्यं वा सहस्रधनं वा ॥ सफेनक्षीरपाने सोमपानम् ॥ गोधूमदर्शने धनलाभः ॥ यवदर्शने यज्ञः ॥ गौरसर्षपदर्शने लाभः ॥ " नागपत्रं लभेत्स्वप्ने कर्पूरागमनं तथा॥चन्दनं पांडुरं पुष्पं तस्य श्रीः सर्वतोमुखी ॥ सर्वाणि शुक्लान्यतिशोभनानि कार्पासभस्मौदनतक्रवर्ज्यम् ॥ सर्वाणि कृष्णान्यतिनिंदितानि गोहस्तिदेवद्विजवाजिवर्ज्यम् ॥ स्वप्नस्तु प्रथमे यामे वत्सरांते फलप्रदः ॥ " द्वितीयेष्टमासैः ॥ तृतीये त्रिमासांते ॥ चतुर्थे यामे मासांते ॥ अरुणोदये दशाहांते ॥ सूर्योदये सद्यः फलम ॥

## अथ दुःस्वप्नदर्शने कृत्यम् ।

यो मे राजन्निऋत्या सूर्योपस्थाने दुःस्वप्ननाशः ॥ अधःस्वप्नस्येति जपाद्वा ॥ क्वचिदर्शवच्छ्राद्धेन दुःस्वप्ननाशः ॥ चण्डीसप्तशतीपाठेन वा ॥ यद्वा श्रीविष्णुसहस्रनामस्तोत्रजपः कार्यः ॥ अथवा श्रीभारतस्थस्य श्रीमद्भागवतस्थस्य वा गजेंद्रमोक्षस्य श्रवणं पाठो वा ॥ इति दुःस्वप्ननाशकविधिः ॥

इत्थं गर्भाधानादुद्वाहांताः समस्तसंस्काराः ॥
सपरिकरा निर्णीता अस्मिंस्तार्तीयपूर्वार्धे ॥ १ ॥
तत आह्निक आचारस्तत आधानादिकाः प्रकीर्णार्थाः ॥
शांतिकपौष्टिकमुख्या नित्या नैमित्तिकाश्चोक्ताः ॥ २ ॥
पूर्वपरिच्छेदकयोः कालः सामान्यतो विशेषाच्च ॥
निर्णीतः सहकृत्यैस्तिथिमासाद्येषु विध्युक्तैः ॥ ३ ॥
नानापापे प्रायश्चित्तं व्यवहारविस्तरश्चापि ॥
उपदानमहादानादिविधिश्चोक्तो मयूखादौ ॥ ४ ॥
श्राद्धविधिः सांगोप्याशौचे निर्णीतिरंत्यसंस्कारः ॥
तार्तीयीकस्योत्तरखंडेग्रे संप्रवक्ष्यंते ॥ ५ ॥
मूलभूतानि पद्यानि विकृतानि क्वचित्क्वचित् ॥
निर्विकाराण्यपि नवान्यप्युक्तान्यत्र कानिचित् ॥ ६ ॥
मीमांसाधर्मशास्त्रज्ञाः सुधियोनलसा बुधाः ॥
कृतकार्याः प्राङ्निबंधैस्तदर्थं नायमुद्यमः ॥ ७ ॥
ये पुनर्मदमतयोलसा अज्ञाश्च निर्णयम् ॥
धर्मं वेदितुमिच्छंति रचितस्तदपेक्षया ॥ ८ ॥
निबंधोयं धर्मसिंधुसारनामा सुबोधनः ॥
अमुना प्रीयतां श्रीमद्विट्ठलो भक्तवत्सलः ॥ ९ ॥
प्रेम्णा सद्भिर्ग्रंथः सेव्यः शब्दार्थतः सदोषोपि ॥
संशोध्य वापि हरिणा सुदाममुनिसतुषपृथुकमुष्टिरिव ॥ १० ॥
श्रीकाश्युपाध्यायवरो महात्मा बभूव विद्वद्द्विजसार्वभौमः ॥
तस्मादुपाध्यायकुलावतंसो यज्ञेश्वरोनन्त इमावभूताम् ॥ ११ ॥
यज्ञेश्वरो यज्ञविधानदक्षो दैवज्ञवेदांगसुशास्त्रशिक्षः ॥
भक्तोत्तमोनन्तगुणैकधामानंताह्वयोनंतकलावतारः ॥ १२ ॥
एषोत्यजज्जन्मभुवं स्वकीयां तां कौंकणाख्यां सुविरक्तिशाली ॥
श्रीपांडुरंगे वसतिं विधाय भीमातटे मुक्तिमगात्सुभक्त्या ॥ १३ ॥
तस्यानन्ताभिधानस्योपाध्यायस्य सुतः कृती ॥
काशीनाथाभिधोधर्मसिंधुसारं समातनोत् ॥ १४ ॥

इति श्रीमत्काश्युपाध्यायसूरिसूनुयज्ञेश्वरोपाध्यायानुजानंतोपाध्यायसूरिसुतकाशीनाथोपाध्यायविरचिते धर्मसिंधुसारे तृतीयपरिच्छेदे पूर्वार्द्धं समाप्तम् ॥

अथ

# तृतीयपरिच्छेदोत्तरार्धम् ।

श्रीगणेशाय नमः ॥ श्रीगुरुभ्यो नमः ॥
श्रीरुक्मिणीपांडुरंगं प्रणम्य पितरौ गुरून् ॥
तृतीयच्छेदोत्तरार्द्धं तनोमि श्रीशतुष्टये ॥ १ ॥
श्रीनाथः करुणासिंधुरिंदिरा शंकरः सती ॥
विघ्नेशो भास्करेंद्राद्या विघ्नान् घ्नंतु सदैव मे ॥ २ ॥

## अथ जीवत्पितृकेण वर्ज्यम् ।

तत्र तावच्छ्राद्धादिनिर्णयं वक्तुमधिकारनिर्णयाय जीवत्पितृकाधिकारो विविच्यते "पादुके चोत्तरीयं च तर्जन्यां रूप्यधारणम् ॥ न जीवत्पितृकः कुर्याज्ज्येष्ठे भ्रातरि जीवति ॥" अत्र पादुके काष्ठमय्यौ ॥ उत्तरीयं सग्रंथिपरिमंडलं वस्त्रमेकद्व्यंगुलादिविस्तृतं सूत्रकृतं परिमंडलरूपं वा उत्तरीयस्थानापन्नं स्मृत्युक्तं तृतीययज्ञोपवीतं वा जीवत्पितृकेण जीवज्ज्येष्ठभ्रातृकेण च न धार्यमिति तात्पर्यम् ॥ प्रावरणरूपं द्वितीयवस्त्रं तु जीवत्पितृकादिभिः सर्वैर्धार्यम् ॥ 'एकवस्त्रो न भुंजीत न कुर्याद्देवतार्चनम्' इत्यादिना सर्वकर्मस्वेकवस्त्रत्वनिषेधात् ॥

## आधानं विवाहः सोमश्च ।

पितरि पितामहे ज्येष्ठभ्रातरि चाकृताधाने जीवति पुत्रपौत्रकनिष्ठभ्रातृभिराधानं न कार्यम् ॥ ज्येष्ठभ्रातर्यकृतविवाहे कनिष्ठेन विवाहो न कार्यः अत्र विशेषः पूर्वार्द्धे उक्तः ॥ एवं पित्रादिषु अकृतसोमयागेषु जीवत्सु पुत्रादेः सोमेनाधिकारः ॥ एवं पूर्णमासेष्टौ दर्शेष्टावग्निहोत्रहोमे च पित्राद्यैरनारब्धे पुत्रादेर्नाधिकारः ॥

## अथ संन्यासविचारः ।

एवं संन्यासेपि कनिष्ठस्य सोदरस्यैव दोषो न भिन्नोदरस्य भ्रातुः ॥ पित्रादेराज्ञायां पुत्रादेर्न दोष इति केचित् ॥ अधिकारिणि पितरि सत्याज्ञायामपि दोषः ॥ पातित्यजात्यंधत्वादिदोषैरनधिकारिण्याज्ञया न दोषः ॥ पातित्यादावाज्ञां विनापि न दोष इत्यपरे ॥ तथा जीवत्पितृकस्य पितृकृत्येषु दर्शादि श्राद्धतर्पणपैतृकदानेषु नाधिकारः ॥ अत्र विशेषः ॥ स्वापत्यसंस्कारस्वद्वितीयविवाहादिनिमित्तकनांदीश्राद्धे चातुर्मास्यांतर्गतपितृयज्ञे सोमांगतृतीयसवनस्थपितृयज्ञे जीवत्पितुरधिकारः ॥ पिंडपितृयज्ञे होमांतः पिंडपितृयज्ञोनारंभो वा पिंडपितृयज्ञस्येति

पक्षद्वयम् ॥ पितुः पुत्राद्युद्देशेन पिंडदानमिति तृतीयः पक्षः क्वचित् ॥ एवमष्टकादिविकृतिष्वपि पक्षत्रयम् ॥

## अथ प्रसंगतो गयादिश्राद्धम् ।

"गयां प्रसंगतो गत्वा मातुः श्राद्धं सुतश्चरेत् ॥" जीवत्पिता मातुःश्राद्धमुद्दिश्य गयां न गच्छेत ॥ महानदीषु सर्वासु तीर्थे च प्राप्ते जीवत्पितृकः पितुः पितृमात्राद्युद्देशेन श्राद्धं कुर्यात् ॥ नवम्यामन्वष्टकाश्राद्धं क्षयाहे मातुः प्रत्यब्दश्राद्धं च सपिंडकमेव जीवत्पितृकः कुर्यात् ॥ तथा संन्यस्ते ताते पतिते च ताते जीवत्यपि सति दर्शश्राद्धमहालयसंक्रांतिग्रहणादिश्राद्धानि सर्वाणि पितुः पित्राद्युद्देशेन जीवत्पितृकेण कार्याणि ॥ एतानि च सांकल्पिकविधिना पिंडरहितानि कार्याणि ॥ अन्वष्टक्यादाविव पिंडदाने विशेषवचनाभावात् ॥

## अथ दौहित्रप्रतिपच्छ्राद्धम् ।

आश्विनशुक्लप्रतिपदि दौहित्रो जीवत्पितृकः सपिंडकं मातामहश्राद्धं कुर्यात् ॥

## अथपितृव्यमातामहादिवार्षिकं कार्यम् ।

तथा भ्रातृपुत्रोऽपुत्रस्य पितृव्यस्य प्रत्यब्दश्राद्धं सपिंडं कुर्यात ॥ एवं कनिष्ठभ्रातापुत्रज्येष्ठभ्रातुः प्रत्यब्दम् तथा सपत्नीपुत्रः सापत्नमातुः श्राद्धम् ॥ एवं दौहित्रोऽपुत्रस्य मातामहस्य प्रत्यब्दम् ॥ इत्थं च पितृव्यादिश्राद्धचतुष्टये जीवत्पितृकस्याप्यधिकारः ॥ पितृव्यभ्रात्रादीनामपुत्राणां पत्नीसत्त्वे सैवाधिकारिणी न तु भ्रातृपुत्रादेः श्राद्धाधिकारः ॥ एवं पतिरेव पुत्राभावे भार्याश्राद्धं कुर्यात् ॥ सपत्नीपुत्रसत्त्वे तु स एव कुर्यान्न भर्त्ता ॥ दौहित्रभातृपुत्रयोः सत्त्वे मृतस्य विभक्तत्वे दौहित्र एव ॥ अविभक्तत्वे भ्रातृपुत्रः ॥ केचित् भ्रातृतत्पुत्रयोः सत्त्वे भ्रात्रैव श्राद्धं कार्यमित्याहुः ॥ तथा जीवत्पितृकस्य पितृपितामहादिमनुष्यपितृतर्पणनिषेधेऽप्यग्निष्वात्तादिदेवपितृतर्पणनिषेधाभावात्स्नानांगपितृतर्पणे ब्रह्मयज्ञांगभूतदेवरूपिपितृतर्पणे चाधिकारोऽस्त्येव ॥ एवं यदीयश्राद्धेऽधिकारस्तदीयश्राद्धांगतर्पणेष्वधिकारः ॥

## अथ भीष्मतर्पणं कार्यम् ।

"जीवत्पितापि कुर्वीत तर्पणं यमभीष्मयोः ॥" श्राद्धांगतर्पणभिन्नतर्पणं जीवत्पितृकेण तिलैर्न कार्यम् ॥ श्राद्धप्रयोगमध्ये वामजानुन्यग्भावो नीवीग्रन्थश्च न कार्यः ॥ नद्यादौ स्नात्वा तर्पणांते समन्त्रकं वस्त्रनिष्पीडनं विहितं तन्न कार्यम् ॥ तथा ॥ "खड्गमौक्तिकहस्तेन कर्तव्यं पितृतर्पणम् ॥" इति विहितं खड्गधारणं न कार्यम् ॥ " अपसव्यं द्विजाग्र्याणां पित्र्ये कर्मणि कीर्त्तितम् ॥ आप्रकोष्ठात्तु कर्तव्यमेतत्पितरि जीवति ॥"

## अथ पितरि जीवति महालयादावुच्चारे विशेषः ।

जिवति संन्यस्तादिरूपे पितरि मृतमातृमातामहकोपि पुत्रः पितुः पितृपितामहप्रपितामहानां पितुर्मातृपितामहीप्रपितामहीनां पितुर्मातामहमातृपितामहमातृप्रपितामहानामिति पार्वणत्रयमेकोद्दिष्टगणं च स्वमातरं पितुः पत्न्या इति स्वपितृव्यं पितुर्भ्रातुरिति स्वमातामहं च पितुः श्वशुरस्येत्येवमादिना पितृसंबन्धपुरस्कारेणैवोद्दिश्य महालयश्राद्धं कुर्यात् ॥ एवं दर्शादिष्वूह्यम् ॥ पितुः संन्यासाभावेपि तीर्थश्राद्धं जीवत्पितुरेवमेव एवं वृद्धिश्राद्धेष्वूह्यम् ॥ ब्रह्मयज्ञांते नित्यं पितृतर्पणमपि संन्यस्तादिरूपजीवत्पितृकेणैवमेव कार्यमित्याहुः ॥

## अथ मातुर्वार्षिकादावुच्चारः ।

यदा तु मातुर्वार्षिकमपुत्रमातामहवार्षिकमपुत्रपितृव्यवार्षिकं वा क्रियते तदा क्रमेण मातृपितामहीप्रपितामहीनां मातामहमातृपितामहमातृप्रपितामहानां पितृव्यपितामहप्रपितामहानामित्येवोद्देशः ॥ यदा च पित्रादिभिः स्वाशक्त्यादिना नियोजितः पित्रादिकरणीयं श्राद्धं स्वयं पित्रादेः प्रतिनिधीभूय करोति तदा पितुरमुकशर्मणो यजमानस्य पितृपितामहप्रपितामहानामित्येवं यथाश्राद्धमुद्देशः ॥

## अथ ज्येष्ठाधिकारविचारः ।

सर्वत्र पितृकृये भ्रातृष्वविभक्तेषु ज्येष्ठस्यैवाधिकारः विभक्तेषु पृथक्पृथक्सापत्नभ्रातरि ज्येष्ठे सत्यपि कनिष्ठ एव स्वमातृवार्षिकान्वष्टक्यादि कुर्यात ॥

## अथ पितृपितामहयोर्जीवने ।

जीवत्पितृपितामहकस्य संन्यस्तपितृपितामहकस्य च पितामहस्य पित्राद्युद्देशेन वृद्धिश्राद्धं तीर्थश्राद्धं दर्शादिश्राद्धं वा भवति ॥ पित्रादिषु त्रिषु जीवत्सु सत्सु संन्यस्तेषु च न किमपि श्राद्धं कार्यम् ॥ केचित्तु पित्रादित्रयात्परेभ्यः श्राद्धं देयमाहुः ॥

## अथ व्युत्क्रममृतौ ।

मृते पितरि पितामहजीवने पित्रे पितामहात्पराभ्यां च श्राद्धं देयम् ॥ एवं पितृपितामहमरणे प्रपितामहजीवनेष्वूह्यम् ॥

## अथ गृह्याग्निमतो विशेषः ।

यस्तु गृह्याग्निश्रौताग्निमान् जीवन्मातृपितृकः पितुः पित्रादिभ्यः पिंडदानमिति तृतीयपक्षाश्रयेणारब्धपिंडपितृयज्ञाष्टकान्वष्टकाश्राद्धेऽन्वष्टक्यायां च पितुः पित्रादिमात्रादिमातामहादिभ्यः पिंडादिकं ददान आसीदनंतरं च माता मृता सोन्वष्टक्यायां च स्वमात्रादिभ्यः पितुः पित्रादिभ्यश्च दद्यात् ॥ यदा च पिंडपितृयज्ञान्व-

ष्टकाद्यनारंभपक्षो जीवत्पितृकस्य तदापि संन्यस्तादिपितृकस्य दर्शादिश्राद्धं पितुः पित्राद्युद्देशेन व्यतिषङ्गभिन्नप्रयोगेण सांकल्पिकेन भवत्येव ॥

## अथ जीवत्पितृकवैश्वदेवे विशेषः ।

पितुरविभक्तैः पुत्रैः पृथग्वैश्वदेवो न कार्यः 'पितृपाकोपजीवी स्याद्भ्रातृपाकोपजीवकः ॥' इत्युक्तेः ॥ अत एव गृह्याग्नौ पाकवैश्वदेवकरणपक्षेपि साग्निके पितरि साग्निकैरप्यविभक्तैः पुत्रैः पृथग्वैश्वदेवो न कार्यः ॥ येषां पाकाभावेमेलौकिकत्वं मतं तैः पाकमात्रमग्निसंस्कारार्थं कार्यमिति भाति ॥ विभक्तैस्तु पृथग्वैश्वदेवः कार्यः॥तत्र वैश्वदेवस्य देवयज्ञभूतयज्ञपितृयज्ञात्मकत्वाज्जीवत्पितृकैरपि पंचमहायज्ञांतर्गतः पितृयज्ञः कार्यः वैश्वदेवाद्भिन्नाः पंचमहायज्ञास्तैत्तिरीयाणां तैरपि विभक्तैर्जीवत्पितृकैः पितृयज्ञः कार्यः ॥ तस्य देवरूपिपितृदेवताकत्वेन पितृपितामहादिमनुष्यरूपिपितृदेवकत्वाभावात् ॥

## अथ मुंडननिषेधविचारः ।

"मुंडनं पिंडदानं च प्रेतकर्म च सर्वशः ॥ न जीवत्पितृकः कुर्याद्दुर्विर्णापतिरेव च ॥" अत्र मुंडनं क्षुरेण शिरसोवपनं तेन कर्तनं सिध्यति ॥ सर्वं प्रेतकर्म प्रेतदहनवहनसपिंडीकरणांतौर्ध्वदेहिकादिकमित्यर्थः ॥ मुंडनं रागप्राप्तमेव निषिध्यते ॥ तेन चौलोपनयनादिषु आधानदर्शपौर्णमासज्योतिष्टोमादिषु नित्यं प्राप्तं तीर्थप्रायश्चित्तमातृमरणादौ नैमित्तिकप्राप्तं च भवत्येव ॥ केचित्काम्यनागबल्यादिषु काम्यमपि भवतीत्याहुः ॥ "गंगायां भास्करक्षेत्रे मातापित्रोर्गुरोर्मृतौ ॥ आधाने सोमपाने च वपनं सप्तसु स्मृतम् ॥" गुरोरिति दत्तकस्य पूर्वापरापत्रोरित्यर्थः ॥ वाक्यांतरे तीर्थमात्रे क्षौरोक्तेर्गंगाभास्करक्षेत्रग्रहणं जीवत्पितृकस्य तत्र विशेषतः क्षौरविधानार्थम् ॥ जीवत्पितृकस्य पिंडदाननिषेधः नांदीश्राद्धतीर्थश्राद्धयोः संन्यस्तादिपितृकस्य दर्शमहालयादिश्राद्धेषु च पिंडरहितसांकल्पिकश्राद्धबोधनार्थः ॥ महापितृयज्ञे सोमयागे मातृमातामहादेर्वार्षिकश्राद्धेषु गयायामन्वष्टक्यादौ च पिंडदानं भवत्येवेत्युक्तम् ॥

## अथ गर्भिणीपतिनापि वार्षिके पिंडदानम् ।

'पिंडदानं प्रकुर्वीत मातापित्रोः क्षयाहनि' इति श्राद्धविधिना पिंडदाने सिद्धे पुनः पिंडविधिः पित्रोर्वार्षिकं गर्भिणीपतित्वनिषिद्धकालादिप्रयुक्तनिषेधबाधनार्थम् ॥ तेन "विवाहव्रतचूडासु वर्षमर्धं तदर्धकम् ॥ पिंडदानं मृदा स्नानं न कुर्यात्तिलतर्पणम्" इति निषेधस्यापि बाधः॥ क्षयाहग्रहणं सपिंडीकरणमासिकेष्वपि पिंडदानोपलक्षणपरम् ॥

## अथ प्रेतकर्मप्रतिप्रसवः ।

जीवत्पितृकः स्वमातुरपुत्रसापत्नमातुः स्वपुत्रसपत्नीपुत्ररहितभार्यायाः अपुत्रपितृव्यस्यापुत्रमातामहमातामह्योश्च दाहादिप्रेतकर्माणि कुर्यात ॥ अत्रापुत्रपदेन मुख्यगौणपुत्रपौत्रप्रपौत्राभावो विवक्षितः ॥

## अथ अनुपनीतस्य पित्रोरंत्यकर्माणि ।

मातुरौर्ध्वदेहिकमनुपनीतोपि जीवत्पितृकः कुर्यात ॥ तत्र विशेषः ॥ ऊनत्रिवर्षश्चूडारहितश्चेद्दाहमात्रं समंत्रकं कृत्वान्यदन्येन कारयेत् ॥ यदा तु कृतचूडः पूर्णत्रिवर्षो वा तदा सर्वं समंत्रकं प्रेतकर्म कुर्यात् ॥ ब्रह्मचारी तु पित्रोर्मातामहस्य चांत्यकर्म कुर्यान्नान्यस्य ॥

## अथ भर्त्रादिकर्तृसंपाते ।

भर्तृदौहित्रयोः सत्त्वे भर्तैव पत्न्या दाहादि कुर्यात ॥ मुंडनं तु भर्तुर्न ॥ एवमपुत्रस्य पत्नीदौहित्रयोः सत्त्वे पत्न्येव पत्युः कुर्यात ॥ तत्र दाहमात्रं समंत्रकं कृत्वान्यत्संकल्पमात्रं स्वयं विधाय ब्राह्मणद्वारा कारयेत् भर्तृसपत्नीपुत्रयोः सत्त्वे सापत्नपुत्र एव कुर्यान्न भर्ता ॥ सपत्नीपुत्रदौहित्रयोः सत्त्वे सपत्नीपुत्र एव ॥ अपुत्रयोर्विधवाविधुरयोर्भ्रातृपुत्रदौहित्रयोः सत्त्वे दौहित्र एवाधिकारीति बहवः ॥ विधवाया भर्तुर्भ्रातृपुत्र एव विधुरस्य स्वभ्रातृपुत्र एवेति जीवत्पितृकनिर्णये भट्टाः ॥ अपुत्रस्य पत्नीभ्रातृपुत्रयोः सत्त्वे पत्न्येव ॥

## अथ पुत्रासन्निधौ पौत्रस्याधिकारः ।

एवं पुत्रासन्निधौ पौत्रादेः पितामहपितामह्याद्यौर्ध्वदेहिकाद्यधिकारः ॥ इत्थं पित्र्यकर्ममुंडनप्रेतकर्माद्यधिकारानधिकारौ जीवत्पितृकस्य प्रपंचितौ ॥ अत्र विषयभेदाद्भालबोधार्थत्वाच्च पुनरुक्तिर्नातिदोषाय ॥

## अथ तिलांजलिदानम् ।

सपिंडानां सगोत्रसपिंडमरणे सकृत्सकृत्तिलांजलिदानं विहितं तज्जीवत्पितृकेणापि कार्यम् ॥ एवं मातामहाचार्यादिभ्योपि ॥ इति जीवत्पितृकनिर्णयः ॥

## अथ श्राद्धाद्यधिकारिनिर्णयः ।

तत्र सांवत्सरिकादिश्राद्धेषु दाहाद्यौर्ध्वदेहिकक्रियायां चौरसः पुत्रो मुख्योधिकारी ॥ औरसपुत्राणां बहुत्वे ज्येष्ठ एवाधिकारी ज्येष्ठस्याभावेऽसंनिधाने वा पातित्यादिनाधिकाराभावे वा ज्येष्ठानुजः ॥ यत्तु ज्येष्ठासन्निधौ सर्वतः कनिष्ठोधिकारी न तु मध्यमा इति तन्निर्मूलम् ॥ तत्र पुत्राणां विभक्तत्वे कनिष्ठेभ्यो धनं गृहीत्वा ज्येष्ठेनैव सपिंडीकरणांता क्रिया कार्या ॥ सांवत्सरिकादिकं तु पृथक्

पृथक् ॥ अविभक्तत्वे तु सांवत्सरिकादिकमप्येकेनैव कार्यम् ॥ एकेन कृतेपि सर्वेषां फलभागित्वात्सर्वैः पुत्रैर्ब्रह्मचर्यपरान्नवर्जनादयो नियमाः कार्याः पुत्राणामेकदेशस्थित्यभावे देशांतरे गृहांतरे वा स्थितैस्तैरविभक्तैरपि पृथगेव वार्षिकादिकं कार्यम् ॥ तत्र यदा ज्येष्ठासंनिधौ कनिष्ठो दाहादिकं करोति तदा षोडशश्राद्धांतमेव कुर्यान्न सपिंडीकरणम् ॥ वर्षपर्यंतं ज्येष्ठप्रतीक्षां कुर्यात् ॥ तन्मध्ये ज्ञाते ज्येष्ठेनैव कार्यम् ॥ नो चेद्वर्षान्ते कनिष्ठेनापि कार्यम् ॥ वर्षात्प्राक् पुत्रभिन्नेन कृतमपि मासिकानुमासिकसपिंडीकरणं पुत्रेण पुनः कार्यम् ॥ एवं कनिष्ठेन कृतमपि ज्येष्ठपुत्रेण पुनः कार्यम् ॥ विशेषस्त्वग्रे वक्ष्यते ॥ कनिष्ठस्य साग्निकत्वे सपिंडीकरणमपि द्वादशेह्नि कनिष्ठेन कार्यम् ॥

## अथौरसाभावे विचारः ।

औरसपुत्राभावे पुत्रिकासुतक्षेत्रजादयो द्वादशविधाः पुत्रा उक्तास्तथापि कलौ तेषां पुत्राणां निषेधादौरसपुत्राभावे दत्तक एवाधिकारी ॥ मातापितृभ्यामन्यतरेण वा विधिपूर्वं दत्तः प्रतिगृहीतृसवर्णो दत्तकः भार्यानुमत्या पत्युः पुत्रदातृत्वं तदप्यापदि ॥ अत्यंतापदि तु भार्यानुमत्यभावेपि पत्न्याः पत्यनुमत्यैव ॥ अत्र विशेषविचारः प्रागुक्तः ॥ दत्तकाभावे पौत्रः ॥ पौत्राभावे प्रपौत्रः ॥ अन्येत्वौरसाभावे पौत्रः ॥ तदभावे प्रपौत्रः ॥ प्रपौत्राभावे दत्तक इत्याहुः ॥ उपनीतपौत्रसत्त्वेप्यनुपनीतौरसपुत्रस्यैवाधिकारः ॥ स च कृतचूडस्यैववर्षाधिकवयसः ॥ पूर्णत्रिवर्षस्य त्वकृतचूडस्यापि ॥ अनुपनीतेनापि मन्त्रपाठपूर्वकमेव पित्रोरौर्ध्वदेहिकं सांवत्सरिकादिकं श्राद्धं च कार्यम् ॥ अशक्तौ त्वग्निदानमात्रं समन्त्रकमनुपनीतेन कार्यम् ॥ अन्यत्त्वन्यद्वारा॥ एवं श्राद्धेपि दर्शमहालयादौ संकल्पमात्रं कार्यम् ॥ अन्यदितरेण ॥ केचित्तूनत्रिवर्षेण चूडारहितेनापि दाहमात्रं समंत्रकं कार्यम् ॥ शेषमन्येनेत्याहुः ॥ दत्तकस्तूपनीत एवाधिकारी ॥ दत्तकाभावे प्रपौत्राभावे च भर्तुः पत्नी पत्न्या भर्ता च दाहाद्यौर्ध्वदेहिकं सांवत्सरिकश्राद्धादिकं च कुर्यात् ॥ भर्तुरपि सपत्नीपुत्रसत्त्वेऽधिकारो न ॥ "विदध्यादौरसः पुत्रो जनन्या और्ध्वदेहिकम्" ॥ तदभावे सपत्नीज इत्युक्तेः भार्ययापि समंत्रकमेवौर्ध्वदेहिकादिकं कार्यम् ॥ अशक्तौ त्वग्निदानमात्रं समंत्रकं कृत्वा शेषमन्येन कार्यम् ॥ श्राद्धे संकल्पमात्रं कृत्वा शेषमन्येन ॥ यद्यप्यविभक्तस्य संसृष्टस्य वा भ्रातुरेव धनग्रहाधिकारस्तथापि क्रियाधिकारः पत्न्या एव ॥ विभक्तासंसृष्टे तु भ्रातरि धनाधिकारोपि पत्न्या एव ॥ पत्न्यभावे विभक्तासंसृष्टस्य कन्या पिंडदा धनहारिणी च ॥ तत्रापि विवाहितैव पिंडदा धनहरा त्वनूढापि ॥ दुहितुरभावे दौहित्रो धनहारी पिंडदश्च ॥ दौहित्राभावे भ्राता ॥ भ्रातुरभावे भ्रातृ-

पुत्रः ॥ अविभक्तस्य संसृष्टस्य च पत्न्यभावे भ्राता ॥ संसृष्टो नाम पूर्वं विभक्तो भूत्वा पुनः स्वधनं भ्रातृधनैरेकीकृत्यैकपाकाद्युपजीवनः ॥ तत्र सोदरासोदरसमवाये सोदर एव ॥ तत्रापि ज्येष्ठकनिष्ठयोः सत्त्वे कनिष्ठ एव ॥ कनिष्ठभ्रातुरभावे ज्येष्ठभ्रातैव ॥ कनिष्ठबहुत्वे मृतानंतरस्तदभावे तदनंतरादयः ॥ एवं ज्येष्ठबहुत्वे मृतानंतरक्रमेणैव सोदरभ्रातुरभावे सापत्नभ्राता ॥ अत्रापि ज्येष्ठत्वादिविचारः पूर्ववदेव ॥ केचित्तु दुहितृदौहित्रयोर्धनहारित्वेपि विभक्तासंसृष्टस्य दाहादिकं भ्रात्रैव कार्यम् ॥ सगोत्रसद्भावे भिन्नगोत्रस्य तदनधिकारादित्याहुः ॥ भ्रातुरभावे भ्रातृपुत्रः ॥ तत्रापि सोदरभ्रातृपुत्रो मुख्यः ॥ तदभावे सापत्नभ्रातृपुत्रः ॥ तदभावे पिता पितुरभावे माता मातुरभावे स्नुषा ॥ तदभावे भगिनी ॥ तत्रानुजाग्रजसोदरासोदराणां समवाये भ्रातृवत् ॥ भगिन्यभावे भगिनीपुत्रः समवाये तद्वदेव ॥ तदभावे पितृव्यतत्पुत्रादयः सपिंडाः ॥ तदभावे सोदकाः ॥ तदभावे गोत्रजाः ॥ तदभावे मातामहमातुलतत्पुत्रादयो मातृसपिंडा अनुक्रमेण ॥ मातृसपिंडाभावे स्वपितृष्वसृमातृष्वसृपुत्राः ॥ तदभावे पितुः पितृष्वसृमातृष्वसृमातुलपुत्ररूपाः पितृबंधवः ॥ एवं मातुः पितृष्वस्रादिपुत्ररूपमातृबंधवः पितृबंधूनामभावेधिकारिणः ॥ तदभावे शिष्यः ॥ शिष्याभावे जामाता श्वशुरस्य ॥ श्वशुरो जामातुः ॥ तदभावे सखा तदभावे विप्रस्य कश्चिद्धनहारी ॥ विप्रभिन्नस्य राज्ञा धनं गृहीत्वा तेन धनेनान्यद्वारा कारणीयम् ॥ अथवा विप्राद्यैर्मरणोन्मुखैर्धर्मपुत्रः कार्यः ॥

## अथ स्त्रीणां दाहाद्यधिकारिणः ।

अनूढाया स्त्रियाः पिता तदभावे भ्रातादिः ॥ ऊढायास्तु पुत्राभावे सपत्नीपुत्रः ॥ तदभावे पौत्रप्रपौत्राः ॥ तदभावे पतिः ॥ तदभावे दुहिता ॥ तदभावे दौहित्रः ॥ तदभावे पत्युर्भ्राता ॥ तदभावे पत्युर्भ्रातृपुत्रः ॥ तदभावे स्नुषा ॥ तदभावे पिता ॥ पितुरभावे भ्राता ॥ तदभावे भ्रातृपुत्रादयः पूर्वोक्ताः ॥ अत्र सर्वत्र पुत्रभिन्नानां पुत्रासंनिधानात्पुत्राभावाद्वा कर्तृत्वमिति स्थितम् ॥

## अथ पुत्रभिन्नानां कृत्यविचारः ।

तत्र यदि पुत्रासंनिधानात्कर्तृत्वं तदा पुत्रभिन्नैर्दाहमारभ्य सपिंडीकरणात्प्राचीनकर्मैव कार्यम् ॥ न तु पुत्रभिन्नैः सपिंडीकरणं कार्यम् ॥ पुत्राभावे त्वन्यैः सपिंडीकरणमपि कार्यम् ॥ तत्रापि सपिंडादिभिर्नृपांतैर्दाहमारभ्य दशाहक्रियाः कार्या एव ॥ ता एव पूर्वा इत्युच्यंते ॥ तत एकादशाहमारभ्य सपिंडीकरणांता मध्यमसंज्ञास्तासु सपिंडादीनां कृताकृतत्वम् ॥ तदूर्ध्वा अनुमासिकसांवत्सरिकाद्यास्ता उत्तराख्याः सपिंडादिभिर्न कार्या एव ॥ इदं च तदीयवृत्त्यादिस्थावर-

धनस्य चरधनस्य वा ग्रहणाभावे ॥ दत्तन्यतरधनग्रहणे तु सपिंडादिभिरपि मध्यमोत्तराख्या अपि क्रियाः कार्या एव ॥ राज्ञा तु मृतधनसत्त्वे तद्धनद्वारा तत्सजातीयवर्णहस्तेन सर्वा अपि क्रियाः कारणीया एव ॥ धनाभावे तु पूर्वाता एवावश्यं कारणीया नान्याः ॥ सपिंडादिनृपांतभिन्नानां तु मृतस्य धनाभावेपि स्वधनेनैव सपिंडीकरणांतक्रियाकरणमावश्यकम् ॥

## अथ धनहारेण प्रेतकार्याकरणे ।

मृतस्य धनं गृहीत्वा प्रेतकार्याकरणे नृपांतानां तद्दर्शवधप्रायश्चित्तम् ॥ पुत्राद्यैर्भ्रातृसंतत्यंतैर्दौहित्रैश्च तत्पुत्रैश्च त्रिविधा अपि क्रिया धनग्रहणसत्त्वे तदसत्त्वे वापि कार्या एव ॥ तत्र स्त्रीणामुत्तराः क्रिया मृताहन्येव ॥ न तु दर्शादौ ॥ भर्तृश्राद्धेनैव निर्वाहस्मृतेः ॥ पूर्वमध्यमाख्यास्तु पृथगेव स्त्रीणाम् ॥ केचित्पुत्रपत्योरभावे स्त्रीणां दौहित्रादिभिः सपिंडीकरणरहिता एवोत्तराः क्रियाः कार्याः ॥ सपिंडीकरणं तु तासां न कार्यम् ॥ सपिंडीकरणाभावेपि एकोद्दिष्टविधिना वार्षिकादिकं कार्यमित्याहुः ॥ "ब्राह्मणस्त्वन्यवर्णानां न कुर्यात्कर्म पैतृकम् ॥ कामाल्लोभाद्भयान्मोहात्कृत्वा तज्जातितां व्रजेत् ॥ "शूद्रेणापि ब्राह्मणस्य न कार्यं पैतृकं क्वचित् ॥

## अथ दत्तके जनकपितुः सन्तत्यभावे विचारः ।

दत्तकस्तु जनकपितुः पुत्राद्यभावे जनकपितुः श्राद्धं कुर्याद्धनं च गृह्णीयात् ॥ जनकपालकयोरुभयोः पित्रोः सन्तत्यभावे दत्तको :जनकपालकयोरुभयोरपि धनं हरेत् ॥ श्राद्धं च प्रतिवार्षिकमुभयोः कुर्यात् ॥ दर्शमहालयादौ तु द्वयोः पित्राद्योः श्राद्धं देयम् ॥ तत्र द्वयोः पित्राद्योः पृथक् पिंडदानं पित्रादिद्वयद्वयोद्देशेनैकैको वा पिंडः ॥

## अथ दत्तकसन्ततेः पितृजनकश्राद्धविचारः ।

एवं दत्तकस्य पुत्रोपि दत्तकजनकस्य पुत्राद्यभावे स्वपितरं पितामहद्वयं प्रपितामहद्वयं चोच्चार्य दर्शादिकं कुर्यात् ॥तथैव धनं हरेत् ॥ एवं दत्तकपौत्रोपि तज्जनककुले प्रपितामहस्य पुत्राद्यभावे पितरं पितामहं चैकमुच्चार्य प्रपितामहद्वयमुच्चार्य दर्शादिश्राद्धं कुर्यात् ॥ प्रपितामहस्य धनं च हरेत् ॥ यद्येषां स्वासु भार्यास्वपत्यं न स्यादिकथं हरेयुः पिंडं चैभ्यस्त्रिपुरुषं दद्युरित्यादेरेकपिंडे द्वावनुकीर्तयेद्गृहीतारं चोत्पादयितारं चात्तृतीयात्पुरुषादित्यादेश्च लौगाक्ष्यादिस्मृतिवचनात् ॥

## अथोभयोः सन्ततिसत्त्वे विचारः ।

यदि जनकपालकयोरुभयोरपि पुत्रादिसन्ततिसत्त्वं तर्हि दत्तक उभयोरप्यौर्ध्वदैहिकं वार्षिकादिकं च न कुर्यात् ॥ पालकपितुरौरसपुत्रादिभक्तेन दत्तकेन दर्श-

महालयादिश्राद्धमात्रं पालकपित्रादिपार्वणोद्देशेन कार्यम् ॥ अविभक्तस्य तु तदौरसकृतदर्शादिनैव दत्तकस्य दर्शादिसिद्धिरिति भाति ॥

## अथ ब्रह्मचारिणः श्राद्धादिविचारः ।

ब्रह्मचारिणो मासिकाब्दिकादिश्राद्धं मातापितृभिः कार्यम् ॥ ब्रह्मचारिणा तु मातृपितृमातामहोपाध्यायाचार्यभिन्नानां शवनिर्हरणं दाहाद्यौर्ध्वदैहिकं च न कार्यम् ॥ अन्याधिकार्यभावे मातृपितृमातामहाचार्याणां दाहादिकं ब्रह्मचारिणा कार्यम् ॥ तत्र दशाहःकर्मकरणे दशाहमाशौचम् ॥ दाहमात्रकरणे एकाहम् ॥ तदाप्यस्य नित्यकर्मलोपो नास्ति ॥ अशुचित्वेप्याशौचिनामन्नं तेन न भोक्तव्यं तैः सह न वस्तव्यं तदुभयकरणे प्रायश्चित्तपुनरुपनयने वक्ष्येते ॥ अन्येषां दाहादौ कृच्छ्रत्रयं पुनरुपनयनं च ॥ धर्मार्थं केनचित्कस्यचित्सवर्णस्य दाहादिश्राद्धादिकरणे संपत्त्यादिफलम्

## अथ शूद्रस्य श्राद्धमंत्रादिविचारः ।

अयं सर्वोपि श्राद्धविधिः शूद्राणाममंत्रकः कार्यः ॥ अत्र केचिद्वैदिकमंत्रपाठ एव शूद्राणां वर्ज्यः पौराणमंत्रास्तु पठनीया इत्याहुः ॥ पौराणमंत्रा अपि शूद्रेण स्वयं न पठनीयाः किंतु विप्रद्वारा पठनीयाः ॥ वेदमंत्रास्तु न विप्रद्वारापीति सिंधुः ॥ एवं द्विजस्त्रियोपि व्रतोद्यापनादाविव संकल्पमात्रं स्वयं कृत्वा वैदिकमंत्रादिप्रयुक्तं सर्वं श्राद्धं विप्रद्वारा कारयेयुरिति पारिजातकारमतम् ॥ शूद्रस्य सदामश्राद्धमेव ॥ पित्रे नमः पितामहाय नम इत्येवमादिना नमोन्तनाममंत्रेण निमंत्रणपाद्यासनगंधपुष्पादिना विप्रान्संपूज्यामं निवेद्य सक्तुना पिंडदानादि कृत्वा दक्षिणादानादिना श्राद्धं समाप्य सजातीयान्गृहसिद्धपक्वान्नेन भोजयेत् ॥

## अथ सच्छूद्रविषये विचारः ।

यत्तु सिंधौ नाममंत्रेणावाहनाग्नौकरणकाश्यपगोत्रोच्चारपूर्वकपिंडदानादिकं तर्पणादिकं पाकेन पिंडदानादिकं चोक्तं तत्सच्छूद्रविषयम् ॥ सप्तपुरुषं त्रिपुरुषं वा परंपरया स्नानवैश्वदेवतर्पणादिकं शूद्रकमलाकरादिग्रंथसंगृहीतं धर्मं नियमेनाचरन्सच्छूद्र उच्यते ॥

## अथ हीनजातीयानाम् ।

एवं किरातयवनादिहीनजातीयानां विप्रेभ्य आमदानदक्षिणादानपूर्वकं स्वस्वजातीयभोजनात्मकमेव श्राद्धम् ॥

## अथ संकटे विप्रद्वारा श्राद्धम् ।

"राजकार्ये नियुक्तस्य बंधनग्रहवर्त्तिनः ॥ व्यसनेषु च सर्वेषु श्राद्धं विप्रेण कारयेत् ॥" अत्र प्रथमं जीवत्पितृकनिर्णय उक्तस्तत्र प्रसंगात्किंचिदधिकारविचा-

रोप्युक्तः ॥ इदानीं तु सर्वोप्यधिकारक्रमविचारः सविस्तर उक्त इति तेनात्र पुनरुक्तिर्बालबोधनार्थत्वान्न दोषाय ॥ ॥ इतिश्रीमदनंतोपाध्यायसूनुविरचिते धर्मसिंधुसारे श्राद्धाधिकारदाहाद्यधिकारनिर्णयः ॥

## अथ श्राद्धशब्दार्थः ।

पित्रादीन्मृतानुद्दिश्य विहिते काले देशे पक्कान्नामान्नहिरण्यान्यतमद्रव्यस्य विधिना दानं श्राद्धम् ॥ तत्राग्नौकरणं पिंडदानं ब्राह्मणभोजनं च प्रधानम् ॥ तदुक्तम् ॥ "होमश्च पिंडदानं च तथा ब्राह्मणभोजनम् ॥ श्राद्धशब्दाभिधेयं स्यादेकस्मिन्नौपचारिकम् ॥" इति ॥ क्वचिद्वचनादशक्त्या वा पिंडदानाद्यकरणे ब्राह्मणभोजनादिमात्रमपि श्राद्धपदार्थः संपद्यत इति चतुर्थपदार्थः ॥ तथा च वचनांतरम् ॥ "यजुषां पिंडदानं तु बह्वृचानां द्विजार्चनम् ॥ श्राद्धशब्दाभिधेयं स्यादुभयं सामवेदिनाम् ॥ " अश्रद्धया पितरो न सन्तीति मत्वा श्राद्धमकुर्वाणस्य रक्तं पितरः पिबन्ति ॥

## अथ श्राद्धभेदाः ।

तत्र श्राद्धं चतुर्विधम् ॥ पार्वणश्राद्धमेकोद्दिष्टश्राद्धं नांदीश्राद्धं सपिंडीकरणश्राद्धं चेतिभेदात् ॥

## अथ पार्वणलक्षणं तद्भेदाश्च ।

पित्रादित्रयोद्देशेन विहितं पिंडत्रययुतं पार्वणम् ॥ तच्चैकपार्वणकद्विपार्वणकत्रिपार्वणकमिति त्रिविधम् ॥ तत्र पित्रादिमृततिथौ क्रियमाणं प्रतिसांवत्सरिकमेकपार्वणकम् ॥ आमावास्यादिषण्णवतिश्राद्धानित्यश्राद्धानि महालयान्वष्टक्यभिन्नानि द्विपार्वणकानि ॥ एतेषु सपत्नीकपित्रादित्रयसपत्नीकमातामहादित्रययोरेवोद्देशात् ॥ अन्वष्टकाश्राद्धं त्रिपार्वणकम् ॥ पित्रादित्रयमात्रादित्रयसपत्नीकमातामहादित्रयाणामुद्देशात् ॥ महालयादिश्राद्धं तीर्थश्राद्धं च पार्वणैकोद्दिष्टरूपम् ॥ पित्रादिपार्वणत्रयस्य पत्न्याद्येकोद्दिष्टगणस्य चोद्देशात् ॥ केचिदेतद्वयं मातामहमातामह्योः पार्वणभेदेन पार्वणचतुष्टययुतं कुर्वंति ॥ केषांचित्सूत्रे दर्शोपि त्रिपार्वणकश्चतुष्पार्वणको वेति हेमाद्रौ ॥

## अथैकोद्दिष्टलक्षणं भेदाश्च ।

एकोद्देशेन क्रियमाणमेकपिंडयुतमेकोद्दिष्टम् ॥ तदपि त्रिविधं नवसंज्ञं नवमिश्रसंज्ञं पुराणसंज्ञं चेति ॥ मृतस्य प्रथमदिनमारभ्य दशाहांतं विहितानि नवसंज्ञानि ॥ एकादशाहादिन्यूनाब्दांतानि नवमिश्राणि ॥ एतानि विश्वेदेवहीनानि ॥ ततः पराणि कनिष्ठभ्रातृवार्षिकशस्त्रहतचतुर्दशीश्राद्धादीनि पुराणसंज्ञानि ॥ केचित्सपिंडयुत्तरं क्रियमाणानां पार्वणानामपि पुराणसंज्ञामाहुः ॥

## अथ नांदीश्राद्धम् ।

पुत्रजन्मविवाहादौ क्रियमाणं वृद्धिश्राद्धं नांदीश्राद्धम् ॥ इदं पूर्वार्द्धे विस्तरेण प्रपंचितम् ॥ एतदेव गर्भाधानपुंसवनसीमंतेष्वाधाने सोमे च क्रियमाणं कर्मांगमिष्टिश्राद्धमिति चोच्यते ॥ अत्र ऋतुदक्षौ विश्वेदेवाः ॥ अन्यकर्मसु वृद्धिसंज्ञम् ॥ तत्र सत्यवसू विश्वेदेवा इति नामभेदो देवभेदश्चान्यत्समानम् ॥ एतच्च पार्वणत्रययुतत्वात्पार्वणभेदांतर्गतमपि दर्शादितो बहुधर्मभेदात्पृथगुद्दिष्टम् ॥ मृतस्य द्वादशाहादिकाले पिंडार्धसंयोजनादिरूपं सपिंडीकरणम् ॥ एतदपि पार्वणैकोद्दिष्टविकाररूपम् अत्र विशेषो वक्ष्यते ॥ एवं च पार्वणमेकोद्दिष्टमिति द्विविधमेव श्राद्धम् ॥ एतत्पुनस्त्रिविधम् ॥

## अथ नैमित्तिकादिभेदाः ।

नित्यं नैमित्तिकं काम्यं चेति ॥ नियतनिमित्ते विहितं नित्यं यथा दर्शादि ॥ प्रत्यहं विहितमपि श्राद्धं नित्यसंज्ञम् ॥ पार्वणद्वययुतं विश्वेदेवहीनमुक्तम् ॥ अनियतनिमित्ते विहितं नैमित्तिकम् ॥ यथा सूर्यचंद्रग्रहणादौ ॥ एतदपि षड्दैवतम् ॥ फलकामनोपाधिकं काम्यम् ॥ यथा पंचम्यादितिथौ कृत्तिकादिनक्षत्रे च ॥

## अथ श्राद्धदेशाः ।

दक्षिणाप्रवणे गोमयोपलिप्ते कृमिकेशास्थिश्लेष्मादिवर्जिते कृत्रिमभूमिवर्जिते रजस्वलादर्शनादिवर्जिते श्राद्धं कार्यम्॥ कुरुक्षेत्रप्रभासपुष्करप्रयागकाशीगंगायमुनानर्मदादितीरनैमिषगंगाद्वारगयाशीर्षाक्षय्यवटादिषु श्राद्धं महाफलम् ॥ "शमीपत्रप्रमाणेन पिंडं दद्याद्गयाशिरे ॥ उद्धरेत्सप्तगोत्राणि कुलमेकोत्तरं शतम् ॥"

## अथ सप्तगोत्राणि कुलमेकोत्तरं शतं च ।

"पिता माता च भार्या च भगिनी दुहिता तथा ॥ पितृमातृष्वसा चैव सप्त गोत्राणि वै विदुः ॥" एषां गोत्राणां पुरुषाः क्रमेण चतुर्विंशतिर्विंशतिषोडशद्वादशैकादशदशाष्टावित्येकोत्तरशतसंख्यास्तेषामुद्धार इत्यर्थः ॥ तत्र पितृकुले द्वादश पूर्वा द्वादश परा इति चतुर्विंशतिरेवमग्रेपि ॥ "तुलसीकाननच्छाया शालग्रामस्य संनिधिः ॥ चक्रांकितस्य सांनिध्यमेषु यत्क्रियते नरैः ॥ स्नानं दानं तपः श्राद्धं सर्वमक्षयतां व्रजेत् ॥" गोगजाश्वादिदुष्टप्रदेशे म्लेच्छदेशे च श्राद्धं न कार्यम् ॥ परकीयगृहादौ श्राद्धकरणे तद्भूमिस्वामिपितरो भागं हरंति ॥ तेन गृहस्वामिने मूल्यं दत्त्वा कार्यम् ॥ स्वाम्यनुज्ञया वा कार्यम् ॥ "वनानि गिरयो नद्यास्तीराण्यायतनानि च ॥ देवखाताश्च गर्ताश्च न स्वाम्यं तेषु कस्यचित् ॥ नैकवासा न च द्वीपे नांतरिक्षे कदाचन ॥ श्रुतिस्मृत्युदितं कर्म न कुर्यादशुचिः क्वचित् ॥"

## अथ श्राद्धकालाः ।

ते च प्रायेणामासंक्रांतियुगादिमन्वादिमहालयादयः ॥ पूर्वपरिच्छेद उक्ता एव केचित्तूच्यंते ॥ महातीर्थप्राप्तिर्व्यतीपातो मृताहो ग्रहणद्वयं श्राद्धं प्रति रुचिः श्रोत्रियादिब्राह्मणसंपत्तिरर्धोदयकपिलाषष्ठ्याद्यलभ्ययोगा ग्रहपीडा दुःस्वप्नदर्शनं नवान्नप्राप्तिर्नवोदकप्राप्तिर्गृहप्रच्छादनादिनिमित्तं च श्राद्धकालाः ॥

## अथ पद्मकयोगलक्षणम् ।

"यदा विष्टिर्व्यतीपातो भानुवारस्तथैव च ॥ पद्मको नाम योगोयमयनादेश्चतुर्गुणः ॥" सर्वमासानां कृष्णपक्षेषु श्राद्धमुक्तम् ॥ अत्र प्रत्यहं पंचम्या दिवा यदहः संपत्तिर्वेति त्रयः पक्षाः ॥ एकदिनपक्षे दर्श एव ॥ नारायणवृत्तौ तु दर्शश्राद्धेनैव पक्षश्राद्धसिद्धिरुक्ता ॥

## अथ दर्शश्राद्धानुकल्पाः ।

सर्वमासेषु दर्शश्राद्धाशक्तौ कन्याकुंभवृषस्थेर्के सति दर्शत्रये एकत्र दर्शे वा श्राद्धम् ॥ साग्निकस्य त्वशक्तस्य पिंडपितृयज्ञमात्रेण दर्शसिद्धिः ॥ निरग्निकस्य ब्राह्मणभोजनमात्रेण धान्यादिद्रव्यदानेन वा दर्शसिद्धिः ॥ कृष्णपक्षेषु महालयापरपक्षस्य श्रेष्ठत्वम् ॥ तत्रापि पंचदशाद्यादिपक्षा अन्योपि बहुविस्तरो द्वितीयपरिच्छेदे उक्तः ॥ अत्र विशेषांतरं कालतत्त्वविवेचने ॥ पंचदशाद्व्यापिमहालयप्रयोगारंभोत्तरमाशौचपाते कृतमहालयानां वैफल्यम् ॥ तेन शुद्ध्यंते कस्यांचित्तिथौ सकृन्महालयमात्रमनुष्ठेयम् ॥ एवं पंचम्यादिपक्षेपि प्रतिबंधांतरे प्रतिनिधिद्वारा शेषमहालयानुष्ठानम् ॥

## अथ पितृव्यज्येष्ठभ्रात्रादिमहालयप्रकारः ।

पितृव्यज्येष्ठभ्रात्रादीनामपुत्राणां महालयापरपक्षे तत्तन्मृततिथौ तदेकपार्वणकमहालयश्राद्धं जीवत्पितृकेणापि कार्यमिति ॥ द्वादशपौर्णमास्यसंभवे माघीश्रावणीप्रोष्ठपद्यो नित्याः ॥

## अथ काम्यश्राद्धकालाः ।

कस्मिंश्चित्कृष्णपक्षे प्रतिपदादिपंचदशातिथिषु कृत्तिकादिभरण्यंतनक्षत्रेषु विष्कंभादियोगेषु सूर्यादिवारेषु बवादिकरणेषु च श्राद्धे फलविशेषोक्तेरेते तिथ्यादयः काम्यश्राद्धकाला ज्ञेयाः ॥ इति सामान्यकालः ॥

## अथापराह्णादिविशेषनिर्णयः ।

दिनस्य पंचविंशभागात्त्रिमुहूर्तकास्तत्राद्यो भागः प्रातःसंज्ञः ॥ द्वितीयः संगवः ॥ तृतीयो मध्याह्नः ॥ चतुर्थोपराह्णः ॥ पंचमो भागः सायाह्नः ॥ दिनस्य पंचदशो

भागो मुहूर्तः ॥ तत्र सप्तमो गांधर्वोष्टमो मुहूर्तः कुतुपः नवमो रौहिणः ॥ तत्र दर्शादिश्राद्धानां निर्णयः पूर्वपरिच्छेदयोः प्रायेणोक्तः ॥ विशेषस्तूच्यते ॥ साग्निकानां कात्यायनादीनामन्वाधानपिंडपितृयज्ञदर्शश्राद्धानामेकदिनकर्तव्यत्वनियमात्रेधाविभक्तदिनतृतीयभागरूपापराह्णव्यापिन्यामामायां दर्शश्राद्धं कर्तव्यम् ॥

## अथ प्रतिसांवत्सरिकमासिकादितिथिनिर्णय उच्यते ।

तत्रैकोद्दिष्टं मध्याह्ने सप्तमाष्टमनवममुहूर्तरूपे कार्यम् ॥ तत्रापि कुतुपरौहिणसंज्ञकावष्टमनवममुहूर्तौ मुख्यः कालः ॥ तत्र पूर्वत्रैव परत्रैव वा दिने मध्याह्नव्याप्तौ सैव तिथिर्ग्राह्या ॥ दिनद्वये मध्याह्नव्याप्तौ मध्याह्नस्पर्शे वा पूर्वत्रैव दिनद्वये साम्येनैकदेशव्याप्तौ पूर्वा ॥ खर्वदर्पाद्यैर्व्यवस्थेत्यन्ये ॥ वैषम्येणैकदेशव्याप्तावाधिक्येन निर्णयः ॥

## अथ पार्वणे तिथिः ।

पार्वणे त्वपराह्णव्यापिनी ग्राह्या ॥ पूर्वत्रैव परत्रैव वापराह्णव्याप्तौ सैव ग्राह्या ॥ दिनद्वये तद्व्याप्तौ तदस्पर्शे वांशतः समव्याप्तौ वा पूर्वा ॥ विषमव्याप्तौ त्वधिका ग्राह्या ॥ माधवाचार्यास्तु दिनद्वये पूर्णापराह्णव्याप्तावंशतः समव्याप्तौ चोत्तरतिथेः क्षये पूर्वा वृद्धौ परा ॥ उत्तरतिथेः क्षयवृद्ध्यभावेपि परेत्याहुः ॥ अयं क्षयाहनिर्णयः प्रत्याब्दिके मासिके सकृन्महालये च ज्ञेयः ॥ श्राद्धे भरण्यादिनक्षत्रं व्यतीपातादियोगश्चापराह्णव्यापीत्युक्तं द्वितीये ॥ केचिच्छुक्लपक्षे उदयव्यापि नक्षत्रं कृष्णपक्षेस्तमयव्यापि ॥ योगस्तु कुतुपादिव्यापीत्याहुः ॥ एतच्च पार्वणश्राद्धं कुतुपादिमुहूर्तपंचके कार्यं न सायाह्ने न रात्रौ न प्रातःसंगवयोः पिण्डपितृयज्ञदिने सायाह्नेपि पार्वणमनुज्ञायते ॥ यदा विघ्नवशादिने दर्शमासिकसांवत्सरिकश्राद्धं न कृतं तदा रात्रावपि प्रथमप्रहरपर्यंतं कार्यम् ॥ मृताहातिक्रमे चांडालत्वादिदोषोक्तेः ॥

## अथ ग्रहणदिने वार्षिकादिप्राप्तौ ।

ग्रहणदिने दर्शमासिकप्रतिवार्षिकादिश्राद्धप्राप्तौ तद्दिन एवान्नेनामेन वा हेम्ना वा कुर्यान्नोत्तरदिने ॥

## अथ मलमासे प्रथमवार्षिकम् ।

प्रथमाब्दिकं त्रयोदशे मलमासे कार्यमित्युक्तम् ॥ तेन यत्र द्वादशमासिकं शुद्धमास भवति तत्र त्रयोदशेधिक एव प्रथमाब्दिकं कार्यम् ॥ यदा त्वधिकमध्ये द्वादशमासिकं तदा द्वादशमासिकस्य द्विरावृत्तिं कृत्वा चतुर्दशे शुद्धे मासे प्रथमाब्दिकम् ॥ एवं द्वितीयादिमासिकस्यापि मलमासे प्राप्तस्य द्विरावृत्तिर्ज्ञेया ॥ द्वितीया-

द्याब्दिकं तु शुद्धमास एव ॥ एवं महालयोपि शुद्ध एव ॥ नाधिके मासे किंचिदपि ॥ मलमासमृतानां तु यदा स एव मलमासो भवति । तदाधिक एव सांवत्सरिकं न शुद्धे॥दर्शदिने वार्षिकप्राप्तौ पूर्वं वार्षिकं कृत्वा ततः पिंडपितृयज्ञं पाकांतरेण दर्श-श्राद्धं च कुर्यात् ॥ परेत्वादौ पिंडपितृयज्ञस्ततो वार्षिकं ततो दर्श इति क्रममाहुः॥ एवं मासिकादिष्वपि ज्ञेयम् ॥

## अथ आत्रिवर्षं श्राद्धभोजनं न ।

"सपिंडीकरणादूर्ध्वं यावदब्दत्रयं भवेत् ॥ तावदेव न भोक्तव्यं तदीये श्राद्धमात्रके ॥ प्रथमाब्देस्थ्यादिभोजी द्वितीये मांसभक्षकः ॥ तृतीये रक्तभोजी स्याच्छुद्धं श्राद्धं चतुर्थकम् ॥" इत्यास्तां प्रासंगिकं प्रकृतमनुसरामः ॥

## अथ आमहेमश्राद्धकालः।

पार्वणमपि हेमश्राद्धमामश्राद्धं च द्वेधा विभक्तदिनपूर्वभाग एव कार्यम् ॥ सर्वं च श्राद्धं तत्तन्निर्णीतकाले ॥ तत्तत्तिथ्यभावेपि कर्तव्यं साकल्यवचनादिना शास्त्रतस्तत्र तत्तत्तिथिसत्त्वादिति कालतत्त्वविवेचने ॥

## अथ वृद्धिश्राद्धकालः।

वृद्धिश्राद्धं प्रातःसङ्गवयोः कार्यम् ॥ मध्याह्नो गौणः ॥ अपराह्णसायाह्नरात्रयो-र्निषिद्धाः॥रात्रौ विवाहे प्रातर्वृद्धिश्राद्धं न कृतं तदा रात्रावपि कार्यमिति कश्चित् ॥ ग्रहणनिमित्तकं पार्वणश्राद्धं पुत्रजन्मनिमित्तकं जातकर्मांगं वृद्धिश्राद्धं च रात्रावपि कार्यम् ॥ इति कालनिर्णयः ॥

## अथ पितृणामन्नप्राप्तिप्रकारः ।

पुत्रादिभिः पितृमात्राद्युद्देशेन श्राद्धे क्रियमाणे नामगोत्रे मंत्राश्च तत्तदन्नं तान्पितॄन्प्रापयति॥ तत्र पित्रादीनां देवरूपत्वे तदन्नममृतरूपं भूत्वा तत्रोपतिष्ठते गंधर्वत्वे भोग्यरूपेण पशुत्वे तृणरूपेण सर्पत्वे वायुरूपेण यक्षत्वे पानरूपेण दानवादित्वे मांसत्वेन प्रेतत्वे रुधिरत्वेन मनुष्यत्वेन्नादिरूपेणेति॥ ग्रंथांतरे॥ "तस्य ते पितरः श्रुत्वा श्राद्धकालमुपस्थितम् ॥ अन्योन्यं मनसा ध्यात्वा संपतंति मनोजवाः ॥ तैर्ब्राह्मणैः सहाश्नंति पितरो वायुरूपिणः ॥" अतएव श्रीरामेण श्राद्धे क्रियमाणे सीता विप्रेषु दशरथादीन्ददर्शेति कथा श्रूयते ॥ "प्रावृष्यंते यमः प्रेतान्पितॄंश्चाथ यमालयात् ॥ विसर्जयति भूलोकं कृत्वा शून्यं स्वकं पुरम् ॥ ते पुत्रादेः प्रकांक्षंति पायसं मधुसंयुतम् ॥ कन्यागते सवितरि पितरो यांति वै सुतान् ॥ अमावास्यादिने प्राप्ते गृहद्वारं समाश्रिताः ॥ श्राद्धाभावे स्वभवनं शापं दत्त्वा व्रजंति ते ॥ अतो मूलैः फलैर्वापि तथाप्युदकतर्पणैः ॥ पितृतृप्तिं प्रकुर्वीत नैव

श्राद्धं विवर्जयेत् ॥" किंच श्राद्धेन ब्रह्मादिस्तंबपर्यंतं सकलभूततृप्तिः श्रूयते ॥ तत्र पिशाचादिरूपाणां विकिरादिभिस्तृप्तिर्वृक्षादिरूपाणां स्नानवस्त्रोदकादिना केषांचिदुच्छिष्टपिंडादिनेति ॥ अतो ब्रह्मीभूतपितृकेणापि श्राद्धं कार्यम् ॥ तत्र पितृपितामहप्रपितामहादिरूपमेकैकं पार्वणं वसुरुद्रादित्यादिभेदेन ध्येयम् ॥ एकोद्दिष्टं वसुरूपेणेति सर्वत्र ॥ केचित्तु पितृपितामहादयः प्रद्युम्नसंकर्षणवासुदेवात्मना ध्येयाः कर्त्रानिरुद्धात्मनेत्याहुः ॥ एवं वरुणप्रजापत्यग्निरूपेण क्वचित् ॥ क्वचिन्मासऋतुवत्सररूपेणेति ॥ तत्र यथाचारं समुच्चयेन विकल्पेन वा ध्यानमिति व्यवस्था ॥ "पित्रादिपार्वणं यत्र तत्र मातामहादयः ॥ सर्वत्रैव हि कर्तव्या नाब्दिके मासिकेषु न ॥ मासिकेषु त्वाब्दिके च त्रिदैवत्यं प्रकीर्तितम् ॥ वृद्धौ तीर्थेन्वष्टकासु गयायां च महालये ॥ त्रिपार्वणकमत्रेष्टं शेषं षाट्पौरुषं विदुः ॥" सपत्नीकं पित्रादित्रयं सपत्नीकं मातामहादित्रयमिति षाट्पौरुषत्वम् ॥ "क्षयाहं वर्जयित्वैकं स्त्रीणां नास्ति पृथक्क्रिया ॥ अन्वष्टकासु वृद्धौ च गयायां च क्षयेहनि ॥" अत्र मातुः पृथक्श्राद्धमन्यत्र पतिना सह ॥

## अथ विश्वेदेवाः ।

यत्र विशेषो नोच्यते तत्र सर्वत्र पार्वणश्राद्धे पुरूरवार्द्रवसंज्ञका विश्वेदेवाः ॥ काम्यश्राद्धे महालये च धूरिलोचनसंज्ञकाः ॥ नैमित्तिकेऽष्टकाख्याष्टमीश्राद्धे च कामकालसंज्ञकाः ॥ एकोद्दिष्टं सपिंडीकरणं वा नैमित्तिकसंज्ञम् ॥ नांदीश्राद्धे सत्यवसुसंज्ञकाः ॥ तत्रापि गर्भाधानपुंसवनसीमंतोन्नयनेति संस्कारत्रयांगमन्याधानसोमयागांगं च नांदीश्राद्धमिष्टिश्राद्धसंज्ञकं कर्मांगश्राद्धसंज्ञकं च ॥ तत्र क्रतुदक्षसंज्ञका विश्वेदेवाः ॥ पार्वणद्वयाद्ययोर्जीवनान्मातृपार्वणकमेव क्रियमाणं नांदीश्राद्धे देवरहितं कार्यम् ॥ एवं पार्वणत्रयस्य भिन्नत्वेनानुष्ठीयमाने नांदीश्राद्धेपि मातृपार्वणं देवहीनम् ॥ नांदीश्राद्धे हि दिनत्रये क्रमेण पार्वणत्रयं कार्यमेकस्मिन्दिने पृथक्पृथक् पार्वणत्रयं सह तंत्रेण वा पार्वणत्रयमिति त्रयः पक्षाः ॥ नित्यश्राद्धं देवरहितं कार्यम् ॥ एवं सपिंडीकरणात्प्राक्तनान्येकोद्दिष्टश्राद्धान्यपि देवहीनानि ॥ इति श्राद्धे देवतानिर्णयः ॥

## अथ श्राद्धे ब्राह्मणाः ।

तत्र ॥ "जातकर्मादिसंस्कारैः संस्कृतः सत्यवाक् शुचिः ॥ वेदाध्ययनसंपन्नः षट्सु कर्मस्ववस्थितः ॥ पुरुषत्रयविख्यातः स वै ब्राह्मण उच्यते" ॥ इति ब्राह्मणसामान्यलक्षणम् ॥ तत्रोत्तममध्यमाधमभेदेन त्रिविधा ब्राह्मणाः ॥

## अथ तत्रोत्तमाः ।

"वेदाध्ययनसंपन्ना वेदांगाध्यायिनोपि च ॥ ये वैयाकरणा ये च मीमांसाध्ययने रताः ॥ पौराणिकश्च वेदांती धर्मशास्त्ररतोपि च ॥ एतेषामपि ये पुत्रा ब्रह्मवेत्ता तथैव च ॥ वेदार्थज्ञः कर्मनिष्ठस्तपोनिष्ठश्च योगिनः ॥ पितृमातृपरश्चैव स्वधर्मनिरतस्तथा ॥ शिशुरप्यग्निहोत्री च सोमादिश्रौतकर्मवित् ॥ शिवभक्तो विष्णुभक्तो भार्यायामृतुकालगः ॥ गुरुभक्तो ज्ञाननिष्ठः सोमयाजी च सत्यवाक् ॥ सुशीलस्नातकयतिब्रह्मचारिण उत्तमाः ॥ एते सर्वे सपत्नीका युवत्वादिगुणान्विताः ॥ सापिंड्ययोनिशिष्यत्वादिसंबंधैश्च वर्जिताः ॥ कुष्ठापस्मारादिदोषैर्हीनाश्चेदुत्तमाः स्मृताः ॥" तत्र दशाहादिसूतकादिप्रयोजकसापिंड्यसगोत्रसोदकत्वरूपः संबन्धः सापिंड्यपदाभिधेयः ॥ योनिसंबन्धो मातुलत्वश्वशुरत्वश्यालकत्वादिः आदिना गुरुसहाध्यायित्वमित्रत्वादयः ॥ तथा च सपत्नीकत्वादिगुणयुक्ता उक्तसंबंधहीना अपस्मारांधत्वादिदोषहीना वेदाध्यायित्वादिसप्तविंशतिप्रकारा विप्रा उत्तमा इति सिद्धम् ॥ तत्र विशेषः ॥ "यद्येकं भोजयेच्छ्राद्धे छंदोगं तत्र भोजयेत् ॥ ऋचो यजूंषि सामानि त्रितयं तत्र विद्यते ॥ ऋग्वेदिनं च पित्र्यर्थे याजुषं च पितामहे ॥ प्रपितामहे सामगं च भोजयेच्छ्राद्धकर्मणि ॥ " 'भोजयेच्छ्राद्धयज्ञेषु सामगं प्रपितामहे' इति पाठांतरम् ॥ " अथर्ववेदिनं वैश्वदेवे पित्र्ये च भोजयेत् ॥ " एतेन "स्वशाखीयद्विजाभावे द्विजानन्यान्त्रिमंत्रयेत् इति" निरस्तम् ॥ केचिद्यथा कन्या तथा हविरिति नियमाद्यैः सह योनिसंबन्धस्त एव परशाखीयाः श्राद्धार्हा इत्याहुस्तन्निर्मूलम् ॥ केचिच्छ्राद्धकर्तृसगोत्रप्रवरा वर्ज्याः ॥ " पितृपुत्रौ भ्रातरौ द्वौ निरग्नि गुर्विणीपतिम् ॥ सगोत्रप्रवरं चैव वर्जयेच्छ्राद्धकर्मणि ॥ " इति वचनादित्याहुः ॥ " विना मांसेन मधुना विना दक्षिणयाशिषा ॥ परिपूर्णं भवेच्छ्राद्धं यतिषु श्राद्धभोजिषु" इति यतिप्रशंसा ॥

## अथ मध्यमा विप्राः ।

मातामहो मातुलो भागिनेयो दौहित्रो जामाता गुरुः शिष्यो याज्यः श्वशुर ऋत्विक् शालकःपितृष्वसृपुत्रो मातृष्वसृपुत्रो मातुलपुत्रोतिथिः सगोत्रो मित्रमित्येते मध्यमाः॥ दौहित्रजामातृस्वस्रीयादीनां विद्यादिगुणवतां श्राद्धे निमन्त्रणाभावे दोषः॥ गुणहीनत्वे तु न दोषः ॥ " षड्भ्यस्तु पुरुषेभ्योर्वाक् श्राद्धार्हा नैव गोत्रिणः ॥ षड्भ्यस्तु परतो भोज्या अलाभे गोत्रजा अपि ॥ " अत्र विशेषः ॥ ऋत्विजः सपिंडाः संबन्धिनः शिष्याश्च वैश्वदेवस्थाने नियोज्या न तु पित्र्ये ॥ एवमन्येपि विगुणा

विप्रा देवस्थाने योज्याः ॥ " पिता पितामहो भ्राता पुत्रो वाथ सपिंडकाः ॥ न परस्परमर्घ्याः स्युर्न श्राद्धे ऋत्विजस्तथा ॥ वैश्वदेवे नियोक्तव्या यद्येते गुणवत्तराः॥"

## अथ वर्ज्या विप्राः ।

क्षयश्वासमूत्रकृच्छ्रभगंदरादिमहारोगी हीनांगोधिकांगः ॥ काणो बधिरो मूकः शत्रुः कितवो भृतकाध्यापको मित्रद्रोही पिशुनः ॥ कुनखी कृष्णदंतः क्लीबो मातापितृगुरुत्यागी चोरो नास्तिकः ॥ पापकर्मा विहितकर्मत्यागी नक्षत्रोपजीवी वैद्यो राजभृत्यो गायको लेखकः कुसीदजीवी वेदविक्रयी कवित्वजीवी देवार्चनजीवी नटो गृहदाही समुद्रगामी शस्त्रकर्ता सोमविक्रयी पक्षिपोषकःपरिवेत्ता दिधिषूपतिः कुमाराध्यापकः पुत्रात्मात्तविद्यो द्रव्यप्राप्त्यर्थं वेदघोषकारी ग्रामयाजी केशपशुविक्रयी शिल्पी पित्रा विवादकारी शूद्रयाजको जटी श्मश्रुहीनो निर्दयी रजस्वलापतिर्गर्भिणीपतिः कुब्जो वामनो रक्तनेत्रो वाणिज्योपजीवी छिन्नोष्ठश्छिन्नलिंगो मद्गुमान् ज्वरितो देवलको विधुरो निरग्निः शूद्रगुरुः शूद्रशिष्यो दांभिको गोविक्रयी रसविक्रयी वेदनिंदको वृक्षरोपकः कदर्यः सदायाचकः कृषिजीवी साधुनिंदितो मेषमहिषयोः पोषकः कपिलकेशो विस्मृतवेदो निष्ठुरवागित्यादयो विप्राः इव्यकव्ययोर्वर्ज्याः ॥ "धर्मार्थमुदरार्थं वौषधकारी विगर्हितः ॥ देवार्चनपरो नित्यं वित्तार्थी वत्सरत्रयम् ॥ असौ देवलको नाम देवस्वग्राहकोपि च ॥ वर्जनीयः स विज्ञेयः सर्वकर्मसु सर्वदा ॥" इदं मनुष्यस्थापितदेवताविषयमिति भाति ॥ "दाराग्निहोत्रसंयोगं कुरुते योग्रजे स्थिते ॥ परिवेत्ता स विज्ञेयः परिविंत्तिस्तु अग्रजः ॥ " अग्रजानुज्ञादौ न दोष इत्युक्तम् ॥ "ज्येष्ठायां यद्यनूढायां कन्यायामूह्यतेनुजा ॥ सा चाग्रेदिधिषूर्ज्ञेया पूर्वा तु दिधिषूर्मता ॥ प्रतिमाविक्रयं यो वै करोति पतितस्तु सः ॥ जीवनार्थं परास्थीनि नीयते पतितः स च ॥" गाननृत्यादिकमुदरार्थं निषिद्धं न तु भगवदर्थम् ॥ अत्र विप्राणां ग्राह्यत्वोक्त्यैव तद्भिन्नानां वर्ज्यत्वे सिद्धे पुनर्वर्ज्यपरिगणनं वर्ज्यभिन्नानां निर्गुणानामपि ग्राह्यत्वार्थम् ॥ विद्याशीलादिगुणवत्त्वे कुष्ठित्वकाणत्वादिशारीरदोषाणां न दूषकत्वम् ॥ गयायां तु निर्गुणा अपि त एव भोज्याः ॥ "न विचार्यं कुलं शीलं विद्यां च तप एव च ॥ पूजितैस्तैस्तु संतुष्टा देवाः सपितृगुह्यकाः" इत्युक्तेः॥ "ब्राह्मणान्न परीक्षेत तीर्थं क्षेत्रनिवासिनः॥" यत्तु ॥ "न ब्राह्मणं परीक्षेत दैवे कर्मणि धर्मवित् ॥ पित्र्ये कर्मणि तु प्राप्ते परीक्षेत प्रयत्नतः ॥" इति तदसंभवपरम् ॥ "गायत्रीसारमात्रोपि वरं विप्रः सुयंत्रितः ॥ नायंत्रितश्चतुर्वेदी सर्वाशी सर्वविक्रयी॥" इति हेमाद्रौ व्यासः ॥ "श्राद्धे काणादयो भोज्या मिश्रिता वेदपारगैः ॥" विप्रा निमंत्रणात्पूर्वमेव परीक्षणीया न तु निमंत्रणोत्तरम् ॥ इति ब्राह्मणविचारः ॥

## अथ श्राद्धार्हद्रव्याणि ।

तत्र दर्भाः ॥ दर्भग्रहणे कालो मंत्रो दर्भभेदाश्च द्वितीयपरिच्छेदे उक्ताः विशेषस्तूच्यते ॥ कुशा मुख्याः कुशाभावे काशदूर्वोशीरतृणादयः ॥ तत्र काशैर्दूर्वाभिर्वा कृतपवित्रहस्तो नाचामेत् ॥ "द्वाभ्यामनामिकाभ्यां तु धार्ये दर्भपवित्रके ॥ एकानामिकया वापि द्वयोर्मध्ये तु पर्वणोः ॥ साग्रौ विगर्भौ तु कुशौ कार्यं ताभ्यां पवित्रकम् ॥ द्वाभ्यां तत्स्याच्चतुर्भिर्वा ग्रंथियुक्तं न वा भवेत् ॥ स्नाने दाने जपे होमे स्वाध्याये पितृकर्मणि ॥ सपवित्रौ सदर्भौ वा करौ कुर्वीत नान्यथा ॥ ब्रह्मग्रंथिपवित्राभ्यो नाचामेच्च बुधः सदा ॥" केचिद्ग्रंथितपवित्राभावे साग्रदर्भौ द्वौ दक्षिणे करे वामे तु त्रीन्द्वौ वा बिभृयादित्याहुः ॥ आसने द्वौ दर्भौ ॥ पितृकर्मणि समूला द्विगुणा दर्भाः ॥ दैवे साग्रा ऋजवः ॥ पित्र्येपि सपिंडीकरणपर्यंतमृजुदर्भास्तदूर्ध्वं द्विगुणा भुम्ना इति ॥ "ये च पिंडाश्रिता दर्भा यैः कृतं पितृतर्पणम् ॥ मलमूत्रोत्सर्गधृता मलमूत्राद्यमेध्यगाः ॥ मार्गे चितौ यज्ञभूमौ स्थिता ये स्तरणासने ॥ ब्रह्मयज्ञे च ये दर्भास्त्यागार्हा सर्व एव ते ॥ अन्यानि च पवित्राणि कुशदूर्वात्मकानि च ॥ हेमात्मकपवित्रस्य कलां नार्हंति षोडशीम् ॥" पंचगुंजमाषमानेन षोडशमाषं हेममयं पवित्रकमित्याहुः ॥

## अथ हविः ।

व्रीहियवतिलमाषगोधूमश्यामाकप्रियंगुमुद्गसर्षपाः श्राद्धे प्रशस्ताः ॥ चणको विकल्पितः ॥ यावनालोपि विकल्पितः ॥ "इष्टापूर्ते मृताहे च दर्शवृद्धयष्टकासु च ॥ पात्रेभ्यस्त्वेषु कालेषु देयं नैव कुभोजनम् ॥ अगोधूमं च यच्छ्राद्धं माषमुद्गविवर्जितम् ॥ तैलपक्केन रहितं कृतमप्यकृतं भवेत् ॥ राजमाषाश्च निष्पावा अपि शस्ताः सतीनकाः ॥" राजमाषा महाराष्ट्र-भाषया चवळीति प्रसिद्धाः ॥ निष्पावाः पावटे इति सतीनकाः वाटाणे इति ॥ कदलीफलमाम्रफलं मूरणः पनसः त्रिविधं कर्कटीफलं कोशातकी दोडका इति प्रसिद्धा कुस्तुम्बुरु वैकल्पिकं पटोलं बदरमामलकं खर्जूरीफलं चिंचार्द्रकं शुंठी मूलकं द्राक्षालवंगैलापत्रकाणि जीरकं हिंगुदाडिमफलमिक्षुः शर्करा गुडः कर्पूरः सैंधवसामुद्रे लवणे पूगीफलं तांबूलपत्रमिति श्राद्धे प्रोक्तानि हवींषि गव्ये दधिदुग्धे ॥ घृतं गव्यं माहिषं च केचिन्माहिषं तक्रं सद्यःकृतमनुद्धृतनवनीतं ग्राह्यमाहुः ॥ केचिन्माहिषीक्षीरं शर्करादियुतं ग्राह्यमाहुः॥ मथितं निर्जलं दधि सर्वं निषिद्धम् ॥ जंबीरफलं विहितप्रतिषिद्धत्वाद्विकल्पितम्॥ अक्षोटः अक्रोड इति प्रसिद्धः ॥ शृंगाटकः शिंगाडे इति प्रसिद्धः॥ चिर्भटं खर्बुजामिति प्रसिद्धम् ॥ शीतकंदली राताळीति

प्रसिद्धम् ॥ एते श्राद्धे विहिताः ॥ आम्रातकः आंबाडा इति प्रसिद्धस्तंदुलीयो माठ इति प्रसिद्धः ॥ एतौ द्वौ विहितप्रतिषिद्धौ ॥ केचिद्राजमाषं कृष्णेतरमुद्गं कृष्णनिष्पावं च निषिद्धमाहुः ॥ "कथंचिद्यदि विप्रेभ्यो न दत्तं भोजने मधु ॥ पिंडास्तु नैव दातव्याः कदाचिन्मधुना विना ॥ अक्षता गोपशुश्चैव श्राद्धे मांसं तथा मधु ॥ देवराच्च सुतोत्पत्तिः कलौ पंच विवर्जयेत् ॥" इति वचनद्वयान्मधुनि ऐच्छिकविकल्पः ॥ केचित् " यथाचारं प्रदेयं तु मधुमांसादिकं तथा ॥ " इति वचनादेशाचारानुसारेण व्यवस्थितविकल्पमाहुः ॥ मांसं श्राद्धेषु नैव देयं कलिवर्ज्यत्वात् ॥ " न दद्यादामिषं श्राद्धे न चाद्याद्धर्मतत्त्ववित् " इत्यादि श्रीभागवतवचनाच्च ॥ अन्यानि मुंजातचव्यकसेरुकालेयाद्रिद्रव्याणि बहूनि महानिबंधेषूक्तानि तान्यप्रसिद्धत्वाच्छ्राद्धेवश्यापेक्षोपयोगयोरभावाच्च नेहोच्यंते ॥

## अथ वर्ज्यानि ।

यद्यपि विहितोक्तत्वैव तद्भिन्नानामग्राह्यत्वं प्राप्तं तथापि विशेषदोषप्रदर्शनायाप्राप्तनिषेधज्ञापनाय च तानि संगृह्यंते ॥ उत्कोचादिना प्राप्तं पतितांत्यजादेः प्राप्तमन्यायार्जितं कन्याविक्रयादिलब्धं धनं निंद्यम् ॥ पित्रर्थं मे देहीतियाचनार्जितमपि निषिद्धम् ॥ आढकीकुलित्थमसूरकोद्रवराजसर्षपा निषिद्धाः ॥ लांकेतिप्रसिद्धमर्कटाश्च वर्ज्याः शिग्रुकूष्मांडोभयविधालाबुकरमर्दार्द्रमरीचपिंडमूलककुसुंभशणवंशांकुराः दशविधा लशुनादिपलांडुभेदाः कृत्रिमलवणानि रक्तबिल्वं श्वेतं कृष्णं वृंताकं गाजरापरपर्यायं गृंजनं भोकरसंज्ञः श्लेष्मातको रक्तनिर्यासाश्च वर्ज्याः ॥ "सामुद्रसैंधवे भक्ष्ये प्रत्यक्षं लवणे बुधैः ॥ विडालोच्छिष्टमात्रातं श्राद्धे द्रव्यं विवर्जयेत् ॥ करीरफलपुष्पाणि विडंगमरिचानि च ॥ बीजपूरं पटोलं च श्राद्धे दत्त्वा पतत्यधः ॥ कृष्णधान्यानि सर्वाणि वर्जयेच्छ्राद्धकर्मणि ॥ न वर्जयेत्तिलांश्चैव मुद्गमाषांस्तथैव च ॥ दातुर्यद्यत्प्रियं तत्तदेयं निंद्यं न चेद्धि तत् ॥ अजाविमहषीक्षीरं तद्विकारांश्च वर्जयेत् ॥ वालुकाकीटपाषाणैः केशैर्यच्चाप्युपद्रुतम् ॥ वस्त्रेण वीजितं चान्नं वर्जयेच्छ्राद्धकर्मणि ॥ अमेध्यैर्जंगमैः स्पृष्टं शुष्कं पर्युषितं च यत् ॥ द्विःपक्वं परिदग्धं च सिद्धभक्षांश्च वर्जयेत् ॥ " यत्सकृत्पाकेन भक्षणार्हमपि हिंगुजीरकादिसंस्कारार्थं पुनः पच्यते तद्द्विःपक्वं वर्ज्यम् ॥ यत्तु द्विःपाकेनैव भक्षणार्हं तन्न निषिद्धमिति सिंधुः ॥ यदन्नैकदेशः केनचित्पूर्वमास्वादितस्तदन्नं श्राद्धे वर्ज्यम् ॥ मारीषं राजगिरेति प्रसिद्धं शाकं धान्यं च वर्ज्यम् ॥ वटप्लक्षोदुम्बरकपित्थनीपमातुलिंगफलानि न भक्षयेत् ॥ 'क्षीरं च लवणैर्मिश्रं ताम्रे गव्यं सुरासमम् ॥' अस्यापवादः ॥ " पयोनुद्धृतसारं च पयसा संयुतं दधि ॥ घृतं चैतानि गव्यानि नैव दुष्टानि ताम्रके ॥" पिप्पलीवर्तुलमरीवादेः प्रत्यक्षस्य निषेधो न त्वन्यमिश्रितस्य ॥ नारीकेलं विहितप्रतिषिद्धम् ॥ यच्च पौतिकशाकादिकं जीर्णतकं

संधिन्यादिक्षीरमनिर्दशायाः क्षीरं मृग्यादिक्षीरं फेनिलतक्रादिकं हस्तदत्तस्नेहलवणादिकं च नित्यभोजने निषिद्धं तत्सर्वं श्राद्धेपि वर्ज्येत् ॥

## अथ मक्षिकादिदूषिते व्यवस्था ।

माधवीये ॥ मृतैर्मक्षिकाकृमिजन्तुभिः केशरोमनखादिभिश्च दूषितं सति संभवे वर्जयेत् ॥ असंभवे तु केशादिकमुद्धृत्य संप्रोक्ष्य हिरण्यस्पर्शं कृत्वा भुंजीत ॥ श्वमार्जारमूषकादिभिरालीढादिकं त्वापद्यपि वर्ज्यमित्युक्तम् ॥ यत्तु मण्डकवटकसक्तुपायसापूपकृसरादीनां स्नेहसिद्धानां पर्युषितत्वदोषो नास्तीति वचनं तन्नित्यभोजनपरं न तु श्राद्धपरमिति शिष्टाः यदग्निपक्वं सदेकरात्रिद्विरात्राद्यंतरितं तत्पर्युषितमुच्यते ॥

## अथ कदर्यादिद्रव्यनिषेधः ।

कदर्यादीनामन्नं नित्यभोजने श्राद्धकर्मणि च न ग्राह्यम् ॥ ते च कदर्याश्चोरो नटो वीणोपजीवी वार्धुषिकोभिशस्तो गणिका चिकित्सकः क्रुद्धः पुंश्चली मत्तः क्रूरः शत्रुः पतितो दांभिकः पतिपुत्ररहिता स्त्री स्वर्णकारः स्त्रीजितो ग्रामयाजको घातुकः कर्मारस्तंतुवायः कृतघ्नो वस्त्रक्षालनोपजीवी दारोपजीवी सोमविक्रयी चित्रकर्मा गायक इत्यादयस्त्रैवर्णिका अप्यग्राह्यान्नाः ॥ "आत्मानं धर्मकृत्यं च पुत्रदारांश्च पीडयेत् ॥ लोभाद्यः पितरौ भृत्यान्स कदर्य इति स्मृतः ॥ द्वावेवाश्रमिणौ भोज्यौ ब्रह्मचारी गृही तथा ॥ वानप्रस्थो यती लिंगी न भोज्यान्नाः प्रकीर्तिताः ॥ षण्मासं यो द्विजो भुंक्ते शूद्रस्यान्नं विगर्हितम् ॥ स तु जीवन्भवेच्छूद्रो मृतः श्वा चाभिजायते" अन्यानि च द्रव्याणि निबन्धेषु बहूनि निषिद्धानि तानि विहितोक्त्यर्थसिद्धत्वादप्रसिद्धत्वाच्च नोक्तानि ॥

## अथ जलेषु वर्ज्यावर्ज्यम् ।

"दुर्गंधि फेनिलं क्षारं पंकिलं पल्वलोदकम् ॥ न भवेद्यत्र गोतृप्तिर्नक्तं यच्चाप्युपाहृतम् ॥ न ग्राह्यं तज्जलं श्राद्धे यच्चाभोज्यनिपानजम् ॥ स्नानमाचमनं दानं देवतापितृतर्पणम् ॥ शूद्रोदकैर्न कुर्वीत तथा मेघाद्विनिःसृतैः ॥ नाहरेदुदकं रात्रौ तुलसीं गोमयं मृदम् ॥" तुलसीबिल्वनाह्नवीजलभिन्नं पर्युषितं जलं पुष्पं च त्यजेत् ॥ "दौहित्रः कुतपः कालशाकः कृष्णाजिनंतथा ॥ रौप्यदर्भास्तिला गावः खड्गपात्रं पितृप्रियम् ॥" आरण्याः कृष्णतिला मुख्याः ॥ तदभावे ग्राम्या गौराः कृष्णाश्च ॥ छागसांनिध्यं श्राद्धेतिप्रशस्तम् ॥ कुक्कुटविड्वराहकाकमार्जारशूद्रषंढरजस्वलासांनिध्यमतिनिंद्यम् ॥ चांडालरजस्वलाखंजाश्वित्रिन्यूनांगातिरिक्तांगादिभिर्वीक्षितमन्नं न भोज्यम् ॥ आपदि मृद्रस्महिरण्योदकस्पर्शाद्भोज्यम् ॥ पावमानीतरत्समंदीमंत्रैर्गायत्र्यादिभिश्च दर्भजलप्रोक्षणे दुष्टान्नशुद्धिः ॥ "पादुकोपानहौ

छत्रं रक्तचित्रांबरं तथा ॥ रक्तपुष्पं च मार्जारं श्राद्धभूमौ विवर्जयेत् ॥" घंटानादोश्वधत्तूरशंखशुक्तिसांनिध्यं च वर्ज्यम् ॥

## अथ श्राद्धदिनकृत्यम् ।

गोमयादिभिर्भूमिभांडशुद्धिः ॥ देवताब्रह्मचारियतिशिशूनां पिंडदानपर्यंतमन्नं न देयम् ॥ अतिशिशवस्तु गृहांतरे भोजनीयाः ॥ 'तिलानवकिरेत्तत्र सर्वतो बंधयेदजान् ॥' पाकः श्राद्धकर्त्रा स्वयमेव कार्यः ॥ "तदभावे शुद्धपत्न्या तदभावे तु बांधवैः ॥ सगोत्रैर्वा सपिंडैर्वा मित्रैर्वा सुगुणान्वितैः ॥ पुंश्चलीं च तथा वंध्यां विधवां चान्यगोत्रजाम् ॥ वर्जयेच्छ्राद्धपाकार्थममातृपितृवंशजाम् ॥ न पाकं कारयेत्पुत्रीं गर्भिणीं चापि दुर्मुखीम् ॥ पाकभांडानि सौवर्णरौप्यताम्रोद्भवानि च ॥ कांस्यानि मृन्मयं तूक्तं नव्यमेव मनीषिभिः ॥ पैत्तलं रंगजातं च विहितं न च निंदितम् ॥ न कदाचित्पचेदन्नमयःस्थालीषु पैतृकम् ॥" फलशाकादिच्छेदनार्थभिन्नानामायसानां शास्त्राणां भांडानां च दर्शनमपि पाकादिस्थाने निषिद्धम् ॥ 'पक्कान्नस्थापनार्थं तु शस्यंते दारुजान्यपि ॥'

## अथ गृह्याग्नौ पाकप्रकारः ।

"गृह्याग्नौ तु पचेदन्नं श्राद्धीयं लौकिकेपि वा ॥ यस्मिन्नग्नौ पचेदन्नं तस्मिन्होमो विधीयते ॥" तत्र गृह्याग्नौ पाके विशेषः ॥ प्रातर्होमं कृत्वा तदेकदेशं महानसे कृत्वा पाकं कुर्यात् ॥ पाकांते पाकाग्न्येकदेशं गृह्याग्नौ संयोज्य गृह्येनौकरणवैश्वदेवादि कार्यम् ॥ अत्रैवं व्यवस्था ॥ कात्यायनादीनां गृह्याग्नौ पाकः ॥ आश्वलायनानां तु नैत्यके पचनाग्नौ ॥ अग्नौकरणं त्वाश्वलायनानां व्यतिषंगेण श्राद्धे गृह्याग्निपक्वचरुणा गृह्ये एव ॥ व्यतिषंगाभावे पाणिहोमः ॥ अन्यशाखीयस्य गृह्याग्नावग्नौकरणं विधुरस्योच्छिन्नाग्निकस्य च पृष्टोदिविधानादिनाग्निसंपादनम् ॥ तच्च पूर्वार्द्धे उक्तम् ॥

## अथ भोजनपात्राणि ।

भोजनपात्राणि तु हेमरौप्यकांस्यजानि वा पलाशकमलकदलीमधूकपत्रनिर्मितानि वा ॥

## अथ निमन्त्रणादि श्राद्धाहे भुक्तान्नपरिणामपर्यंतं कर्तुर्विप्राणां च नियमाः ।

स्त्रीसङ्गपुनर्भोजनानृतभाषणाध्यापनद्यूतायासभारोद्वहनहिंसादानप्रतिग्रहचौर्याध्वगमनदिवास्वापकलहादिवर्जनं कर्तृभोक्तृभयधर्माः ॥ स्त्रीसङ्गश्च श्राद्धदिने तत्पूर्वदिने च ऋतुकालेऽपि वर्ज्यः ॥ तांबूलक्षुरकर्माभ्यंगदन्तधावनवर्जनं कर्तृ-

धर्माः ॥ भोक्तृविप्राणां तैलाभ्यंगे उद्वर्तने क्षौरे च विकल्पः ॥ कर्तुर्भोक्तुश्च मुख्य-वारुणस्नानेनैवाधिकारो न तु गौणस्नानेन॥"श्राद्धकृच्छुक्लवासा स्यान्मौनी च विजितेंद्रियः ॥ उपवासं परान्नं च औषधं च विवर्जयेत् ॥ " अवस्त्रत्वं मलवद्वस्त्रत्वं कौपीनवत्त्वं कच्छहीनत्वमनुत्तरीयत्वं काषायवस्त्रत्वमार्द्रवस्त्रत्वं द्विगुणवस्त्रत्वं रक्तवस्त्रत्वं दग्धवस्त्रत्वं स्यूतवस्त्रत्वमित्येकादशविधनग्नत्वं कर्तृभोक्तृभ्यां वर्ज्यम् ॥ कर्तुर्ललाटे ऊर्ध्वपुण्ड्रादेर्विकल्पः ॥ भोक्तुस्तु भवत्येव ॥ चन्दनतिलकस्तु पिंडदानात्प्राक्कर्तुर्वर्ज्यः ॥ भोक्तुस्तु भोजनकालात्प्राग्वर्ज्यः ॥ सदर्भहस्तेन तिलको न कार्यः ॥ करणे आचमनदर्भत्यागश्च ॥ कर्त्रा निमंत्रितविप्रत्यागो न कार्यः ॥ प्रमादेन त्यागे यत्नेन विप्रः प्रसादनीयः ॥ बुद्धिपूर्वकत्यागे सति चांद्रायणं प्रायश्चित्तम् ॥ " आमंत्रितस्तु यो विप्रो भोक्तुमन्यत्र गच्छति ॥ नरकाणां शतं गत्वा चांडालेष्वभिजायते ॥ आमंत्रितस्तु यः श्राद्धे विलम्बं कुरुते द्विजः ॥ देवद्रोही पितृद्रोही पच्यते नरकेषु सः ॥ " स्त्रीसङ्गः पुनर्भोजनं च श्राद्धपूर्वं रात्रावपि कर्तृभोक्तृभ्यां वर्ज्यम् ॥ " दशकृत्वः पिबेदापो गायत्र्या श्राद्धभुग्द्विजः ॥ सायं संध्यामुपासीत जपेच्च जुहुयादपि ॥ सूतके च प्रवासे च अशक्तौ श्राद्धभोजने ॥ औपासनादिकं होमं न कुर्यात्किंतु कारयेत् ॥ निमन्त्रितस्तु न श्राद्धे कुर्याद्भार्यादिताडनम्" ॥ अपराह्णाख्यमुहूर्तत्रये वनस्पतिच्छेदं दधिमंथनं सर्वैर्न कार्यम् ॥ यदा कर्तुरशक्त्या तत्पुत्रशिष्यादिः प्रतिनिधिः श्राद्धं करोति तदा यजमानप्रतिनिधिभ्यामुभाभ्यां पूर्वोक्ताः सर्वे कर्तृनियमाः कार्याः ॥ "मुक्तकच्छा तु या नारी मुक्तकेशी तथैव च ॥ हसते वदतेऽत्यंतं निराशाः पितरो गताः ॥ सवर्णप्रेषयेदान्नं द्विजानां तु निमंत्रणे ॥ अभोज्यं ब्राह्मणस्यान्नं वृषलेन निमंत्रितम् ॥ तथैव वृषलस्यान्नं ब्राह्मणेन निमंत्रितम् ॥ "वृषलः शूद्रः ॥

## अथ श्राद्धे ब्राह्मणसंख्या ।

वैश्वदेवे समाः पित्र्ये विषमाः ॥ तेन द्वौ वैश्वदेवे त्रयः पितृपार्वणे इति पंच विप्राः ॥ अथवा चत्वारो दैवे पितृपार्वणे तु पित्रादीनामेकैकस्य त्रयस्त्रय इति त्रयोदश विप्राः ॥ यद्वा पित्रादेरेकैकस्य पंचेत्येकोनविंशतिः ॥ किं वा एकैकस्य सप्तेति पंचविंशतिः ॥ एवं दर्शादौ पार्वणाधिक्ये विप्राधिक्यमूह्यम् ॥ तथा च वैश्वदेवे द्वौ चतुरो वोपवेश्य पित्रादिष्वेकैकस्य स्थाने एकं त्रीन्पंच सप्त नव वोपवेशयेदिति निष्कर्षः ॥ "सत्क्रियां देशकालौ च द्रव्यब्राह्मणसंपदम् ॥ शौचं च विस्तरो हंति" इति पक्षे अशक्तौ वा दैवे एकः ॥ पितृपार्वणे चैक इति द्वौ विप्रौ ॥ तदुक्तं श्रीभागवते ॥ "द्वौ दैवे पितृकार्ये त्रीनेकैकमुभयत्र वा ॥ भोजयेत्सुसमृद्धोऽपि श्राद्धे कुर्यान्न विस्तरम् ॥ देशकालोचितश्रद्धाद्रव्यपात्रार्हणानि च ॥ सम्यग्भवंति नैतानि विस्तरात्स्वजनार्पणात् ॥" इति ॥ एतेन द्वौ दैवे एकः पित्र्ये

इति विप्रत्रयपक्षो निर्मूलो वेदितव्यः ॥ "द्वौ दैवेऽथर्वणौ विप्रौ प्राङ्मुखावुपवेशयेत् ॥ पित्र्ये तूदङ्मुखांस्त्रींश्च ऋग्यजुःसामवेदिनः ॥" अत्यशक्तौ पार्वणद्वये एको विप्रः ॥ यदैक एकविप्रस्तदा विश्वेदेवस्थाने शिवलिंगं शालग्रामं वा संस्थाप्य सर्वं श्राद्धं समाचरेत् ॥ "दैवान्नं तत्क्षिपेदग्नौ दद्याद्वा ब्रह्मचारिणे ॥" स्थानत्रये एको विप्र इति पक्षः ॥ सपिंडीकरणादन्यत्रेदं वृत्तिकारमतम् ॥ अत्राप्येकैक इति पक्षः स्मृत्यर्थसारादिमतो वक्ष्यते ॥ सपिंडीकरणे तु पार्वणत्रय एव विप्राः ॥ वृद्धिश्राद्धे तु दैवे द्वौ द्वावेवमष्टौ निकृष्टपक्षे ॥ संपदि दैवे चत्वारः ॥ प्रतिपार्वणं चत्वार इति षोडशेत्येवं दैवे पित्र्ये च समा विप्रा इति विशेषः ॥ "सर्वथा ब्राह्मणालाभे कृत्वा दर्भमयान् बटून् ॥ प्रैषानुप्रेष्यसंयुक्तं सर्वश्राद्धं प्रकल्पयेत् ॥" अत्र विप्रानुकूल्यरूपदृष्टप्रयोजनाभावेप्यदृष्टार्थं दक्षिणा देया ॥ एवं यतेः श्राद्धोपवेशनेऽपि सा च दक्षिणा कालांतरेऽन्यस्मै प्रतिपादनीया ॥ "अथवाऽभ्यर्चितं लिंगं शालग्राममथापि वा ॥ संस्थाप्य देवपित्रर्थं पीठे श्राद्धं चरेन्नरः ॥ पितरस्तस्य तिष्ठंति कल्पकोटिशतं दिवि ॥ निमंत्रणं तु विप्राणां पूर्वेद्युः सद्य एव वा ॥ कुर्याद्विप्रांश्च नियमाच्छ्रावयेत्पैतृकान्बुधः ॥ अक्रोधनैः शौचपरैः सततं ब्रह्मचारिभिः ॥ भवितव्यं भवद्भिश्च मया च श्राद्धकारिणा ॥" इति ॥

## अथ सामान्यतः श्राद्धपरिभाषा ।

"निपात्य दक्षिणं जानुं देवान्परिचरेत्सदा ॥ पितॄणां परिचर्या तु वामजानुनिपातनात् ॥ प्रदक्षिणं तु देवानां पितॄणामप्रदक्षिणम् ॥ पितॄणां द्विगुणा भुग्ना दर्भा दैवे ऋजुत्वगाः ॥ दैवे तूदङ्मुखः कर्ता पित्र्ये स्याद्दक्षिणामुखः ॥" संकल्पे क्षणदाने पाद्ये आसने आवाहनेऽर्घ्यदाने गंधाद्याच्छादनांतपंचोपचारेऽन्नदाने पिंडदानेंऽजनदानाभ्यंजनयोरक्षय्ये स्वधावाचने च संबंधगोत्रनामोच्चारणमावश्यकमन्यत्र कृताकृतम् ॥ संबंधगोत्रनामरूपाणीति ॥ संबंधनामगोत्ररूपाणीति वोच्चारणे क्रमः ॥ तत्र "सकारेण तु वक्तव्यं गोत्रं सर्वत्र धीमता ॥" इति वाक्यात्काश्यपसगोत्रस्य काश्यपगोत्रस्येति वोच्चारः ॥ केचिच्छाखाभेदाद्व्यवस्थामाहुः॥ "गोत्रस्य त्वपरिज्ञाने काश्यपं गोत्रमुच्यते ॥ शर्मांतं विप्रनामोक्तं वर्मांतं क्षत्रियस्य तु ॥ गुप्तांतं चैव वैश्यस्य दासांतं शूद्रजन्मनः ॥" पित्रादिनामाज्ञाने तु तातपितामहप्रपितामहेत्येवं ब्रूयान्न नामोच्चारयेदित्याश्वलायनः ॥ शाखांतरे तु पितुर्नाम्नः स्थाने पृथिवीषदिति पितामहस्यांतरिक्षसदिति प्रपितामहस्य दिविषदिति नामोच्चार्यम् ॥ स्त्रीणां दांतं नाम सावित्रीदेत्येवमुच्चार्यम् ॥ केचिद्देवीशब्दांतमाहुः ॥ अन्ये देवीदापदयोः समुच्चयमूचुः "विभक्तिभिस्तु यत्किंचिद्दीयते पितृकर्मणि ॥ तत्सर्वं सफलं ज्ञेयं विपरीतं निरर्थकम् ॥ षष्ठीविभक्त्या संकल्पः क्षणश्चाक्षय्यकर्म च ॥ षष्ठ्या वा स्याच्चतुर्थ्या वासनदानं द्विजातये ॥ द्वितीययावाहनं स्याद्विभक्तिस्तु

चतुर्थिका॥ अन्नदाने पिंडपूजा स्वधा स्वस्तीतिवाचने॥ पिंडदाने तु संबुद्धिर्येंचत्वेत्यादितः पुरा ॥ ततः परं चतुर्थी चेत्युभयं सर्वसंमतम् ॥ शेषाणि सर्वकर्माणि संबुद्ध्यंते यथायथम् ॥ इदं ते वा इदं वो वा प्रयुज्यैव समाचरेत् ॥ सव्येन दैवं कर्म स्यादपसव्येन पैतृकम् ॥ विप्रप्रदक्षिणा विप्रस्वागतं चार्घ्यदानकम् ॥ सूक्तस्तोत्रजपोन्नस्य पात्रेषु परिवेषणम् ॥आह्वानमंत्रस्याघ्राणं तथा च स्वस्तिवाचनम्॥ तांबूलदानमारभ्य समाप्तेरिति पैतृकम् ॥ प्रदक्षिणाद्येतदुक्तं सव्येनैव समाचरेत्॥ देवार्चा दक्षिणादिः स्यात्पादजान्वंसमूर्द्धसु ॥ शिरोंसजानुपादेषु वामांगादिषु पैतृके ॥" अक्षय्यासनार्घ्यवर्ज्यं स्वधाकारेण पितृभ्यः सर्वदानम् ॥ देवेभ्यः स्वाहापदेन ॥ दैवतीर्थेन देवं तत्पितृतीर्थेन पैतृकम् ॥ अथाचमनानि श्राद्धारम्भे द्विराचमनं विप्रपादक्षालनांते स्वपादक्षालनपूर्वकं द्विराचमनम् ॥ देवार्चनांते पित्रर्चनान्ते चैकैकमाचमनमाघ्राणांते एकं विकिरदानांते द्विरेकं वा श्राद्धांते स्वपादप्रक्षालनपूर्वकं द्विराचमनमिति ॥ अन्ये भस्ममर्यादांते करशुद्ध्यंते उच्छिष्टचालनांते चाप्येकैकमाहुः ॥ अथ भोक्तुः पादशौचांते द्विराचमनं पाणिहोमांते एकं भोजनांते द्विरिति ॥

## अथ दर्भाः ।

'आचांतः प्राक्कुशांस्त्यक्त्वा पाणावन्यांश्च धारयेत् ॥' तथा च ॥ "श्राद्धारंभे धृतान्दर्भान्पाद्यांते च विसर्जयेत् ॥" ततो देवार्चनांते पित्रर्चनांते पिंडशेषाघ्राणांते विकिरदानांते श्राद्धांते च पूर्वधृतदर्भांस्त्यजेत् ॥ श्राद्धसागरादिप्रयोगे तु पित्रर्चनांते दर्भत्यागो न दृश्यते ॥ तेन क्वचिदाचमनेऽपि दर्भत्यागो नेति भाति ॥

## अथोहविचारः ।

यत्र बहुवचनांतः पितृशब्दस्तत्र पितृशब्दस्य सर्वपितृवाचित्वादूहो न ॥ यथार्घ्यपात्रे पितॄनिमान्प्रीणयेत्यत्र मात्रादिश्राद्धे मातॄरिति न वदेत् ॥ तत्रापि शुंधनमंत्रेषु शुंधंतां पितरः शुंधंतां पितामहा इत्यादि शुंधंतां मातर इत्यादि चोह एव ॥ बहुवचनं तु नोह्यते प्रथममंत्रे एव पूज्यत्वार्थकत्वात् ॥ ऋचं नोहेदिति निषेधाद्दङ्मंत्रेषु नोहः ॥ पिंडदाने येचत्वामत्रानु तेभ्यश्चेत्यत्र मातृश्राद्धे याश्चत्वामत्रानु ताभ्यश्चेति न वदेत् ॥ स्त्रीणां स्त्रियः पुरुषाश्चानुगा इति 'पुमान् स्त्रिया' इति पुँल्लिङ्गशेषादिति वृत्तिकृत् ॥ अन्ये तु याश्चेत्याद्यूहमाहुः ॥ मात्रादिद्वित्वे पिंडदाने एतद्वामस्मन्मातरौ यज्ञदाश्रीदे ये च युवामत्रान्वित्येकं पिंडं दत्त्वास्मन्मातृभ्यां० अयं पिं० इत्यादि ॥ अभ्यंजनेस्मन्मातरौ० ॥ अभ्यंजाथा अञ्जने अञ्जाथाम एवं पितामहीप्रपितामहीद्वित्वेप्यूहः ॥ अथ बहुत्वे एतद्वोस्मन्मातरो यज्ञदे श्रीदे रुद्रदे यथानामगोत्रा ये च युष्मानत्रान्वित्येकंपिंडदानादि ॥ अभ्यञ्जनेभ्यङ्ध्वं अंजने

अङ्ध्वमित्यादि ॥ एकनामत्वे एकमेव नाम द्विवचनांतं बहुवचनांतं वा वदेत् ॥ एवमर्घ्यदानकालेप्यस्मन्मातरावित्याद्यूहेन संबोध्येदं वामर्घ्यमिदं वोर्घ्यमित्यूहो बोद्धव्यः ॥ तथा चायंतु नः पितरः सो० ॥ तिलोसिसोमदेवत्यो० ॥ उशंतस्त्वा० ॥ पिंडानुमंत्रणदशादानोपस्थानप्रवाहणप्राशनादिमंत्रेषु बहुवचनांतपितृपदयुक्तत्वादिहेतोर्नोह इति प्रसिद्धम् ॥ "नाप्रोक्षितं स्पृशेद्धस्तु न वदेन्मानुषीं गिरम् ॥ न चोद्वीक्षेत भुंजानं न चैवाश्नूणि पातयेत् ॥ दैवे पित्र्ये च सर्वत्र जपहोमादिकर्मसु ॥ मौनं कुर्यात्प्रयत्नेन सकलं फलमाप्नुयात् ॥ यदि मौनस्य लोपः स्याज्जपहोमार्चनादिषु ॥ व्याहरेद्वैष्णवं मंत्रं स्मरेद्वा विष्णुमव्ययम् ॥ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ॥ न्यूनं संपूर्णतां याति सद्यो वंदे तमच्युतम् ॥ आदिमध्यावसानेषु श्राद्धस्येदमुदाहरेत् ॥

## अथ संक्षेपत आश्वलायनादीनां प्रयोगक्रमः ।

सव्येनापसव्येन वा देशकालौ संकीर्त्यापसव्येन तत्तच्छ्राद्धार्हपितॄणां षष्ठ्या विभक्त्यैतेषाममुकश्राद्धं सदैवं सपिंडं पार्वणविधिनैकोद्दिष्टेन वान्नेनामेन वा हिरण्येन वा श्वः सद्यो वा करिष्य इति संकल्पो यथासंभवं कार्यः ॥ सर्वत्र कुरुष्वेत्यादि यत्रोचितं ब्राह्मणैः प्रतिवचनं देयमेव ॥ ततो दैवधर्मेण विप्रस्य दक्षिणजानुं स्पृष्ट्वाऽमुकपितृणाममुकश्राद्धेमुकविश्वेदेवार्थं त्वया क्षणः करणीय इति क्षणं दद्यात् ॥ ओंतथेति विप्रो वदेत् ॥ कर्ता प्राप्नोतु भवानिति ॥ विप्रः प्राप्नवानीति ॥ एवं पैतृधर्मेण वामजानुस्पर्शेनामुकश्राद्धेऽमुकस्य स्थाने त्वया क्षण इति पूर्ववत् ॥ त्रयस्थाने एकविप्रत्वे पितृपितामहप्रपितामहानां स्थाने इत्यादि ॥ अक्रोधनैरित्यादि प्रार्थना ॥ अत्र सर्वत्र देवपूर्वत्वम् ॥ क्वचित्पितृपूर्वकत्वं वक्ष्यते ॥ इदं संकल्पक्षणदानादि पूर्वेद्युः सद्यो वा कार्यम् ॥ ततः कुतुपे स्नातः स्नातान्धौतपादान्विप्रान् संनिधापयेत्॥ततः सव्येन तिलोदकयवोदके आचारात्कार्ये ॥ततः सव्येन शुद्ध्यर्थं प्रायश्चित्तार्थं सूक्तजपः ॥ प्रदक्षिणा च ॥ समस्तसंपदिति नमस्कारः ॥ अपसव्येनाचारादधिकारवाचनम् ॥तत आचमनप्राणायामौ सव्येन कृत्वाऽपसव्येन द्वितीयसंकल्पः ॥ केचित्सद्यःकरणपक्षे द्वितीयसंकल्पं नेच्छंति ॥ ततस्तिष्ठन्सव्येनैव दैवे पित्र्ये च भवतां स्वागतमिति प्रतिविप्रं प्रश्नः पूर्ववद्वितीयं क्षणदानम् ॥ अत्र बह्वृचानां गृह्याग्निमतां दर्शश्राद्धान्वष्टकापूर्वेद्युःश्राद्धेषु पिंडपितृयज्ञव्यतिषंगेण श्राद्धप्रयोगो नान्येषां नापि श्राद्धांतरेषु ॥ स च द्वितीयक्षणदानांतं श्राद्धतंत्रं कृत्वा परिसमूहनादीध्माधानांते पिंडपितृयज्ञतंत्रांते पादक्षालनादि भस्ममर्यादांतमभावभौकरणं कृत्वा परिवेषणादिसंपन्नवचनांते पिंडदानादि पात्रोत्सर्गपर्यंतं कृत्वा विकिरादि श्राद्धशेषं समापनीयमित्येवंरूपः ॥ एवं हिरण्यकेशीयादीनामपि प्रथमसं-

कल्पोत्तरमग्न्युपसमाधानान्वाधानाद्याज्यसंस्कारांते पाद्यादिषट्कांते तत्तन्मंत्रोहयुतः ॥ सविस्तरोग्नौकरणहोमो ज्ञेयः ॥

## अथ पाद्यम् ।

अंगणे श्राद्धदेशे द्वारे वा चतुरस्रं द्विहस्तं प्रादेशमात्रं वोदक्प्लवं देवमंडलं कृत्वा ततो दक्षिणे षडंगुलं त्यक्त्वा दक्षिणाप्लवं चतुर्हस्तं वितस्तिमात्रं वा पितृमंडलं वर्तुलं सव्यापसव्यप्रादक्षिण्याप्रादक्षिण्यादिदैवपैतृधर्मेण गोमूत्रगोमयाभ्यां कार्यम् ॥ यथायथं दर्भयवतिलगंधपुष्पैस्तदर्चनम् ॥ मंडलसमीपे पीठे उपविष्टस्यैव प्राङ्मुखस्य विप्रस्य पादयोरुदङ्मुखः प्रत्यङ्मुखो वा कर्ताऽमुकसंज्ञका विश्वेदेवा इदं वः पाद्यं स्वाहा नम इति यवगंधपुष्पयुतजलमंजलिना प्रक्षिप्य शंनोदेवीरिति शुद्धोदकेन पादावुपर्येव प्रक्षालयेत् ॥ नाधोभागे नापि सग्रंथिकपवित्रकरेण ॥ पितृमंडले उदङ्मुखस्योपविष्टस्य पादयोर्दक्षिणामुखस्तिलगंधादिजलमंजलिना पितृतीर्थेन पितरमुकनामरूपगोत्रेदं ते पाद्यं स्वधा नम इति त्रयस्याने एकविप्रत्वे पितृपितामहप्रपितामहा इदं वः पाद्यमिति बहुवचनांतेन प्रक्षिप्य शन्नोदेवीरित्यादि पूर्ववत् ॥ एवमग्रेपि पित्रादित्रये ब्राह्मणत्रयपक्षे इदं ते इत्येकविप्रपक्षे इदं व इतिवचनोहो ज्ञेयः ॥ एवं मातामहादिपार्वणेपि बोध्यम् ॥ अत्र पाद्यात्पूर्वं पादार्घ्यः पाद्योत्तरं च गंधपुष्पाक्षतैः पादादिमूर्धांतमर्चनपूर्वकं दैवे एष वः पादार्घ्य इति दत्त्वा पित्र्येऽपि तिलैः मूर्धाद्यर्चनपूर्वकं पादार्घ्यदानमुक्तं तत्कात्यायनादीनामेवाचारात्तेषामेव ॥ बह्वृचानां तु नैष आचारः ॥ ततः पाद्यशेषं गंधयवतिलादिसव्यापसव्याभ्यां मंडलयोस्त्यक्त्वा स्वपादक्षालनं पवित्रत्यागं च कृत्वान्यपवित्रे धृत्वा देवमंडलोत्तरे स्वयं विप्राश्च द्विराचम्य श्राद्धदेशे गच्छेयुः ॥ पादक्षालनोदकाचमनोदकयोः संसर्गो न कार्यः ॥ अपसव्येनामुकश्राद्धसिद्धिरस्त्विति वदेत्तैः प्रत्युक्तः ॥ निरंगुष्ठं विप्रदक्षिणहस्तं धृत्वा सव्यापसव्याभ्यां भूर्भुवः स्वः समाध्वमिति सदर्भेषु पीठेष्वविलंबेनोपवेशयेत् ॥ तत्र दैवे प्राङ्मुखो विप्रः पित्र्ये तूदङ्मुखाः संभवे दक्षिणान्यदिङ्मुखः ॥

## अथासनादि ।

हैमं राजतं ताम्रं वा दुकूलं कंबलं वा दारुजं तृणमयं पर्णमयं वासनं प्रशस्तम् ॥ दारुजेषु श्रीपर्णीजंबूकदंबाम्रबकुलशमीश्लेष्मातकशालवृक्षजन्यान्यासनानि प्रशस्तानि "अयःशंकुमयं पीठं प्रदेयं नोपवेशने ॥ अग्निदग्धान्यासनानि भग्नानि च विवर्जयेत् ॥" प्राक्संस्था दक्षिणसंस्था भोक्तृपंक्तिस्तु पैतृके ॥ तत्र देवासने प्राग्ग्रौ द्वौ दर्भौ ॥ पित्र्ये दक्षिणाग्रैकैकं दर्भं स्थापयेत् ॥ "घृतैस्तिलादितैलैर्वा स्थापयेच्च प्रतिद्विजम् ॥ दीपं सव्यापसव्याभ्यां दीपमेकं तु सव्यतः ॥" ब्राह्मणा-

श्वेतःप्रभृत्या श्राद्धसमाप्तेर्मौनिनः पवित्रहस्ता उच्छिष्टोच्छिष्टस्पर्शं वर्जयंतो वर्तेरन् ॥ अत्र यथालक्षणोऽतिथिरागतश्चेत्सव्येन विप्रपंक्तौ विष्णूद्देशेन पूजयेत् ॥ सव्येनापवित्रः पवित्रोवेति मंत्रं पठित्वा ॥ वैष्णव्यै नमः काश्यप्यै नमः क्षमायै० इति भूमिं नत्वा 'मेदिनी लोकमाता त्वम्' इत्यादिश्लोकैः स्तुत्वा च ॥"श्राद्धभूमिं गयां ध्यात्वा ध्यात्वा देवं गदाधरम् ॥" प्राचीनावीति ॥ तद्विष्णोः परमं पदं० ॥ तद्विप्रासो० ॥ गायत्रीं च जपित्वा सव्येन प्राणायामतिथ्यादिकीर्तनांतेऽपसव्येनामुकपितृणामुपक्रांतममुकश्राद्धं करिष्ये इति संकल्प्यादौ मध्येन्ते च देवताभ्यः पितृभ्यश्च० ॥अमूर्तानां च०॥ चतुर्भिश्च० ॥ यस्य स्मृत्येति च त्रिः पठेत् ॥ अथ दक्षिणे वामे वा कुक्षौ तिलैः सह कुशत्रयं परिहितवस्त्रांचलबद्धं कृत्वा कटिसंलग्नवस्त्रबहिर्भागेन संवेष्ट्य रक्षणाख्यो नीवीबंधो 'निहन्मि सर्वं यदमेध्यवद्धवेत्' इति श्लोकमंत्रेण कार्यः॥ "सर्वतश्चापसव्येनापहतेत्यप्रदक्षिणम्॥ तिलान्क्षिप्तोदीरतेति सव्येन प्रोक्षणं स्मृतम् ॥ तिला रक्षंतु मंत्रेण द्वारे कुशतिलान् क्षिपेत् ॥ तरत्समंदीसूक्तेन पावमानीभिरेव च ॥ अभिमंत्र्य जलं तेन पाकादिप्रोक्षयेत्सुधीः ॥" यद्वा ॥ तद्विष्णोरिति मंत्रेण गायत्र्या वाऽभिमंत्रितम् ॥ "यद्देवा इति मंत्राणां त्रयेणैवान्यशाखिनः ॥ वाचयेत्पाकपूतत्वं पुष्पाद्यं सर्वमुक्षयेत् ॥ नाप्रोक्षितं स्पृशेच्छ्राद्धकालेत्येतज्जपेत्ततः ॥ पदार्थयोग्यतां वाचयित्वा देवार्चनं चरेत् ॥" तत्र प्रत्युपचारं दैवे पित्र्ये चाद्यंतयोरपो दद्यात् ॥ देवद्विजसन्निधावुदङ्मुख उपविश्य तद्दक्षिणकरमुत्तानं वामकरेण धृत्वा दक्षिणेन सयवं दर्भद्वयममुकेषां विश्वेषां देवानां भूर्भुवः स्वरिदमासनं स्वाहेति हस्ते जलमासिच्य दक्षिणभागे आसने क्षिपेन्न हस्ते दर्भदानम् ॥ "आसनेष्वासनं दद्यान्न तु पाणौ कदाचन ॥ पितृकर्मणि वामे च दैवे दद्यात्तु दक्षिणे ॥" विप्रो धर्मोसि विशिराजाप्रतिष्ठित इति मंत्रेण गृहीत्वा स्वासनमिति वदेत् ॥ कर्तासनं स्पृशन्नपो दत्त्वास्यतामिति ॥ विप्रः धर्मोसीति वदेत् ॥ आपो दत्त्वा दैवे क्षणः क्रियतामिति निरंशुष्ठंकरं गृह्णीयात् ॥ ॐ तथेत्यादि प्राग्वत् ॥ इदं तृतीयनिमंत्रणम् ॥

## अथार्घ्यकल्पना ।

तत्र पात्राणि हैमं रौप्यं ताम्रमयं वा दारुजं वा पलाशादिपर्णमयं वा कांस्यं वा शंखशुक्तिजं वा खड्गपात्रं वाऽर्घ्यपात्रं प्रशस्तम् ॥ अत्र विप्रैकत्वं द्वित्वचतुष्टयत्वादावपि दैवेऽर्घ्यपात्रद्वयमेव ॥यत्तु दैवे द्वे अर्घ्यपात्रे पित्रे त्रीण्युभयत्रैकैकं वेत्येकपात्रपक्षांतरं तदशक्तपरम् ॥ एवं पात्रद्वयं प्रोक्षितायां भुवि प्रागग्रकुशेषु न्युब्जमुत्तानं वासाद्य प्रोक्ष्य न्युब्जपक्षे उत्तानीकृत्य तयोर्द्विकुशे द्वे द्वे पवित्रे निधाय शन्नोदेवीरिति मंत्रावृत्त्याऽप आसिच्य यवोसीति मंत्रेणावृत्त्या यवानोप्य तूष्णीं गंधपुष्पाणि क्षिपेत् ॥ केचिद्गंधद्वारां० ॥ ओषधीः प्रतिमोदध्वमित्यृग्भ्यां गंधपु-

ष्पाणि क्षिपंति ॥ देवार्घ्यपात्रे संपन्ने इत्युक्त्वा सुसंपन्ने इति प्रत्युक्तो वामकरं विप्रदक्षिणजानुनि न्यस्यामुकविश्वान्देवान् भवत्स्वावाहयिष्ये इति पृष्ट्वावाहयेत्यनुज्ञातो विश्वेदेवा स आगतेत्यृचा प्रतिविप्रं दक्षिणपादादियुग्मं क्रमेण जान्वंसमूर्धांतं यवान्विकिरेत् ॥ विश्वेदेवाः शृणुतेत्यृचोपस्थाय भूमावशिष्टान् यवान्विकिरेत ॥ हिरण्यकेशीयादयस्त्वर्घ्यदानगंधादिपूजोत्तरमग्नौकरणकाले ये देवास इत्यायंतु नः पितर इति मंत्राभ्यामग्निदक्षिणतो देवपित्रावाहनं कुर्वीति ॥ कातीयैस्त्वर्घ्यपात्रासादनात्प्रागेव देवपित्रावाहनं कार्यम् ॥ तथैव कात्यायनसूत्रात ॥ "ततोर्घ्यपात्रसंपत्तिं वाचयित्वा द्विजोत्तमान् ॥ तदग्रे चार्घ्यपात्रे तु स्वाहार्घ्यमिति विन्यसेत् ॥ अपो दत्त्वा विप्रहस्ते दद्यादर्घ्यपवित्रके ॥ या दिव्या इति मंत्रेण हस्तेष्वर्घ्यं विनिक्षिपेत् ॥ विश्वेदेवास इदं वोऽर्घ्यं स्वाहा इतीरयन् ॥" प्रतिविप्रं या दिव्येत्यावृत्तिः ॥ केचित्तु या दिव्या इत्यनेन दत्तार्घ्यानुमंत्रणमाहुः ॥ मयूखे कातीयप्रयोगे विप्रहस्तेऽर्घ्यपवित्रदानांते आवाहनवदंगेष्वर्चनं कृत्वाऽर्घ्यदानमित्युक्तम् ॥ एकविप्रत्वे एकस्यैव हस्ते द्विरर्घ्यदानम् ॥ विप्रचतुष्टयपक्षे एकैकं पात्रं विभज्य द्वयोर्द्वयोर्दानम् ॥ कूर्चस्तु तत्तत्पात्रस्थ एव ॥ क्वचित्क्षीरदधिघृततिलतंदुलसर्षपकुशाग्रपुष्पेति द्रव्याष्टकमर्घ्यपात्रे प्रक्षिप्यमित्युक्तम् ॥ "आद्यंतयोरपो यच्छन् गंधाद्यैरर्चनं चरेत् ॥" अमुकविश्वेदेवा अयं वो गंधः स्वाहा नम इति करेणैव विप्रहस्तेष्वेवं द्विर्द्विर्दानम् ॥ एवं सर्वत्र दैवे स्वाहा नम इत्यंतमुच्चार्योपचारदानम् ॥ "चंदनागरुकर्पूरकुंकुमादि प्रदापयेत् ॥ गंधद्वारेति वै गंधमायने ते च पुष्पकम् ॥ धूरसीत्यमुना धूपमुद्दीप्यस्वेति दीपकम् ॥ युवं वस्त्राणि मंत्रेण वस्त्रं दद्यात्प्रयत्नतः ॥ आसने स्वासनं ब्रूयादर्घ्यंस्वर्घ्यं द्विजोत्तमः ॥ सुगंधश्च सुपुष्पाणि सुमाल्यानि सुधूपकः ॥ सुज्योतिश्चैव दीपश्च स्वाच्छादनमिति क्रमः ॥" कर्ता स्कंधधृतोत्तरीयाविगतपवित्रकरो विप्रहस्तदत्तगंधैर्विप्रभालाद्यंगेषु लिंपेत् ॥ विप्रभाले वर्तुलपुंड्रं त्रिपुण्ड्रं वा न कुर्यात् ॥ अत्र विप्राणां कस्तूरी विकल्पिता ॥ आयने ते इति वौषधीः ॥ प्रतिमोदध्वमिति वा गंधदानबद्धहस्तेष्वेवेदं वः पुष्पमिति पुष्पदानं कार्यम् ॥ तत्र विहितपुष्पाणि ॥ "आगस्त्यं भृंगराजं च तुलसी कमलं तथा ॥ चंपकं तिलपुष्पं च दूर्वाश्च पितृवल्लभाः ॥ विहिता प्रतिषिद्धा च तुलसी पिंडपूजने ॥ सुकुमारैः किसलयैर्यवदूर्वाकुरैरपि ॥ जलोद्भवैश्च कुसुमैर्मल्लिकाचूतपुष्पकैः ॥ अतिमुक्तश्च तगरैः संपूज्याः पितरः सदा ॥ जातीपुष्पैर्विप्रपूजां कुर्यात्पिंडार्चनं तु न"॥

## अथ वर्ज्यपुष्पाणि ।

"करवीरं च धत्तूरं बिल्वपत्रं च केतकी ॥ बकुलं कुंदपुष्पं च किंशुकं च कुरं-

टिका ॥ सर्वाणि रक्तपुष्पाणि वर्जयेच्छ्राद्धकर्मणि ॥ जलोद्भवानि देयानि रक्तान्यपि विशेषतः ॥"

## अथ धूपः ।

"धूपस्तु गुग्गुलुर्देयस्तथा चंदनसारजः॥ अगरुश्च सकर्पूरो घृतमध्वादिसंयुतः ॥ ये तु प्राण्यंगजा धूपा हस्तवाताहताश्च ये ॥ न ते श्राद्धे नियोक्तव्या ये च के चोग्रगंधयः ॥ घृतं न केवलं दद्याद्दुष्टं वा तृणगुग्गुलम् ॥" पाददेशेऽयं वो धूप इति दानम् ॥

## अथ दीपः ।

"घृतेन दीपो दातव्यस्तिलतैलेन वा पुनः ॥ " वसामेदाददीपो वर्ज्यः ॥ इदं वो ज्योतिरिति वायं वो दीपप्रकाश इति वा मुखसमीपे दीपः ॥ कौशेयं कार्पासं वा वस्त्रं विहितम् ॥ कृष्णं मलिनमुपभुक्तं छिद्रितं निर्दशं रजकधौतं च निषिद्धम् ॥ "यज्ञोपवीतं दातव्यं वस्त्राभावे विजानता ॥ निष्क्रयो वा यथाशक्ति वस्त्रालाभे प्रदीयते ॥ पितॄन् सत्कृत्य वासोभिर्दद्याद्यज्ञोपवीतकम् ॥ यज्ञोपवीतदानेन विना श्राद्धं तु निष्फलम् ॥" यज्ञोपवीतं यतिस्त्रीशूद्रश्राद्धेष्वपि देयम् ॥ अथान्यान्यपि देयानि ॥ धातुमयानि धूपदीपपात्राणि "कमंडलुं ताम्रमयं काष्ठजं वाऽपि मृन्मयम् ॥ नारीकेलमयं वापि श्राद्धे दद्यात्प्रयत्नतः ॥" छत्रोपानदासनशयनदर्पणचामरव्यजनपादुकाकेशप्रसाधनीपटवासादिसुगंधचूर्णागारधानिकायष्टिकंबलांजनशलाकाश्च देयाः ॥ "अलंकाराश्च दातव्या यथाशक्ति हिरण्मयाः॥केयूरहारकटकमुद्रिकाकुंडलादयः ॥ स्त्रीभ्यो योषिदलंकारा देयाः श्राद्धेषु योषिताम् ॥ मंजीरमेखलादामकर्णिकाकंकणादयः॥ सौवर्णं राजतं कांस्यं दद्याद्भोजनभाजनम् ॥ कर्पूरादेश्च भांडानि तांबूलायतनं तथा ॥" स्वयमन्येन वा बंदीकृतानां केनाप्युपायेन मोचने पितॄणां ब्रह्मपदम् ॥ इत्थं चोक्तवचनादाच्छादनदानांते पृथग्यज्ञोपवीतं दत्त्वा शक्तिसत्त्वे छत्रालंकारादिकं दत्त्वा तत्काले स्पर्शायोग्यानां संकल्पं कृत्वा पूजनं पूर्णमस्तु संकल्पसिद्धिरस्त्वित्युक्त्वा प्रत्युक्तो "मंत्रहीनं क्रियाहीनं संपद्धीनं द्विजोत्तमाः ॥ श्राद्धं संपूर्णतां यातु प्रसादाद्भवतां मम ॥" यस्य स्मृत्या० देवताभ्य० इति जपेत् ॥ एवमासनादिसर्वपूजाकांडं दैवं समाप्य पैतृकमासनप्रभृतिपूजाकांडमारभेदिति कांडानुसमयक्रम एव माधवसंमतः॥ कात्यायस्त्वासनादिक्षणावाहनार्घ्यपर्यंतं पाद्यांतप्रयोगवत्पदार्थानुसमयक्रमेणैव दैवे पित्र्ये च कृत्वा गंधादिपूजामेव कांडानुसमयेन कुर्वीति ॥ एकं पदार्थं दैवपित्र्यादिषु सर्वत्रानुष्ठाय तेनैव क्रमेण द्वितीयादिपदार्था अनुष्ठेया इत्ययं पदार्थानुसमयः ॥ एकत्रैव सर्वपदार्थान् समाप्यान्यत्र सर्वपदार्थानुष्ठानमिति कांडानुसमयः ॥ अथान्यपवित्रे धृत्वा

पित्रर्चनं संकल्प्यासनाद्याच्छादनांतपूजा वैश्वदेवोक्तरीत्यैव पितृधर्मेण कार्या ॥ विशेषस्तूच्यते ॥ द्विगुणभुग्नं कुशत्रयं विप्रवामे क्षिपेत् ॥ पार्वणस्थाने विप्रत्रयपक्षे पितुर्यथानामगोत्रस्येदमासनमित्यादिपृथगुच्चारः ॥ एकविप्रत्वे पितृपितामहप्रपितामहानामिदमासनमित्युच्चारः एवमग्रिमोपचारेष्वप्यूह्यम् ॥ शेषं प्राग्वत ॥ ततस्तृतीयनिमंत्रणमपि प्राग्वद्धस्तधारणपूर्वकं कार्यम् ॥

## अथार्घ्यासादनम् ।

द्विजाग्रे दक्षिणाग्रांस्त्रींस्त्रीन्दर्भानास्तीर्य तेष्वाग्नेयीसंस्थानि प्रतिपार्वणं पात्राणि त्रीणित्रीण्येवासाद्य पितृपात्रपश्चिमे मातामहादिपार्वणस्य प्रतिपार्वणमेकविप्रत्वे नवविप्रत्वादिपक्षेपि त्रीण्येव पात्राणि ॥ एकविप्रत्वे तद्धस्ते एवार्घ्यत्रयम् ॥ नवविप्रत्वादिपक्षे एकैकं पात्रं विभज्य त्रिषु त्रिषुदेयम् ॥ प्रतिपात्रोपरि दक्षिणाग्रा द्विगुणाः साग्रा निरग्रा वा त्रयस्त्रयः कुशाः ॥ पितृतीर्थेन पात्रेषु जलमापूर्य शन्नो देवीरिति सर्वपात्रेषु सकृदनुमंत्रणमाश्वलायनानाम् ॥ तद्भिन्नैः कातीयादिभिः शन्नो देवीरिति मंत्रेण प्रतिपात्रं मंत्रावृत्त्या जलमापूर्य ॥ हिरण्यकेशीयास्तु शं नो देवीरिति मंत्रं नेच्छंति ॥ सर्वमते ॥ तिलोसीति मंत्रावृत्त्या प्रतिपात्रं तिलावापः ॥ अत्र पितृशब्दस्यानूह इत्युक्तं गंधादिप्रक्षेपः प्राग्वत् ॥ ततः पित्रर्घ्यपात्रं संपन्नं पितामहार्घ्यपात्रं संपन्नमित्यादि ॥ यथालिंगं संपत्तिं वाचयित्वापो दत्त्वा दक्षिणामुखस्तिष्ठन् सव्यं करं कुशतिलयुतं विप्रवामजानुनि न्यस्य पितृपितामहादीन्द्वितीयान्तानुच्चार्य भवत्स्वावाहयिष्ये इति पंक्तिमूर्धन्यमेकं विप्रं पृच्छेत ॥ सर्वत्र पंक्तिमूर्धन्यं प्रत्येव प्रश्नः ॥ आवाहयेत्यनुज्ञात उशंतस्त्वेति मंत्रावृत्त्याऽमुकममुकनामगोत्ररूपमावाहयामीति प्रतिविप्रं मूर्धादिपादांतमंसादियुग्मांगेषु तिलविकिरणेनावाह्य ॥ सर्वविप्रावाहनांते आयंतु नः पितर इति सकृदुपतिष्ठेत ॥ अत्र कातीयैर्नमो वः पितर इत्यादि इह संतः स्याम इत्यंतेनार्चनमुक्तम् ॥ आवाहने सव्यापसव्ययोर्विकल्पः ॥ हस्तशिष्टतिलान्विप्राग्रे भूमौ विकीर्य पित्रर्घ्यपात्रसंपत्तिरस्त्वित्युक्ता प्रत्युक्तः सव्यं कृत्वाऽपो दत्त्वाधःस्थदर्भैः सहार्घ्यपात्रमेकैकं पाणिभ्यामुद्धृत्य विप्राग्रे स्वधार्घ्या इति मंत्रावृत्त्या स्थापयेत् ॥ एकविप्रत्वे एकाग्रे एव पात्रत्रयं मंत्रावृत्त्या नवविप्रत्वे पितृविप्रत्रयमुख्याग्रे पात्रन्यासो मंत्रेण ॥ एवं पितामहादिषु मुख्याग्रे एव ॥ एवं च त्रिरेव स्वधार्घ्या इति मंत्रोच्चारः प्रतिपार्वणे ॥ अथर्ववेदिनां प्रपितामहादिपित्र्यंतं प्रातिलोम्येन सर्वप्रयोगः ॥ ततः संत्वर्घ्या इति प्रत्युक्तोऽपो दत्त्वा पात्रस्थं पवित्रं विप्रहस्तेषु दत्त्वा प्रथमपात्रोदकं सशेषं खड्गपात्रे पात्रांतरे वा गृहीत्वा पितरिदं ते अर्घ्यं पितामहेदं ते अर्घ्यमित्यादि यथालिंगं प्रत्येकमर्घ्यं देयम् ॥ पित्रादित्रयाणामेकविप्रत्वे त्रिभिः पात्रे एकस्यैव

हस्तेऽर्घ्यं देयम् ॥ षण्णामेकविप्रत्वे षट्पात्राण्येकहस्ते ॥ पितुः स्थाने विप्रत्रयादि-पक्षे एकार्घ्यं विभज्य तेषु देयम् ॥ अर्घ्यांते जलदानं पितरिदं ते अर्घ्यमित्यर्घ्य-मन्त्रश्च प्रतिविप्रमावर्तते एवं पितामहादिविप्रेष्वपि एवमर्घ्यं दत्त्वा विप्रहस्तात्स्रवंती-रपो या दिव्या इति मन्त्रेण प्रतिविप्रमनुमंत्रयेदिति बह्वृचः ॥ अन्यशाखिनां तु या दिव्या इति मंत्रेणार्घ्यदानम् ॥ अर्घ्यदानांते प्रतिविप्रमपोदानं तथा चैक विप्रत्वेनुमन्त्रणमपोदानं चांते सकृदेव विप्रभेदे त्वावर्तते ॥ अर्घ्यदाने नामगोत्रा-द्युच्चारो न क्रियते ॥ श्राद्धसागरकारैस्तु कार्य इति युक्तं भातीत्युक्तम् ॥ अथ शेषजलयुतप्रथमार्घ्यपात्रे पात्रद्वयस्थशेषोदकमेकीकृत्य तेन जलेन मुखांजनं कार्यम्॥ आयुःकामेन नेत्रसेचनं कार्यम् ॥ संस्रवान्समवनीयेत्याद्याश्वलायनसूत्रात्॥ केचि-द्विप्रहस्तगलितांबुसंस्रावस्तस्यैकीकरणमाहुः ॥ दर्शादौ मातामहपात्रोदके तत्पा-त्रद्वयोदकं समवनीयमातामहपात्रोदकं पितृपात्रस्थसंस्रावे संनयेत् ॥ मातृपार्व-णभेदे मातामहपात्रसमवनीतोदकं मातृपात्रस्थसमवनीतोदके तदुदकं पितृ-पात्रस्थैकीकृतोदक इति ॥ तत्संस्रावपात्रं दैविकविप्रादुत्तरतोरन्निमात्रे प्रोक्षिते दर्भेषु न्युब्जं सकूर्चं पितृभ्यः स्थानमसीत्यासादयेत् ॥ यद्वा प्रथमपात्रमुत्तानं संस्रावोदकसहितं मंत्रेणासाद्य तृतीयपात्रेण सकूर्चपवित्रं तदाच्छादयेत् ॥ पक्ष-द्वयेऽपि गंधादिनाभ्यर्च्यासमाप्तेर्न चालयेन्न च स्पृशेत् ॥ कार्तीयास्तु शुंधंतामिति भूमिं प्रोक्ष्य पितृषदनमसीति कुशानास्तीर्य पितृभ्यः स्थानमसीति प्रथमं न्युब्जं कृत्वा गंधादिदीपांतैरर्चंति ॥

## अथ प्राचीनावीती ।

आद्यंतयोरपो यच्छन् गंधाद्यैः पूजनं चरेत् ॥ अमुकशर्मन्यथानामगोत्राय ते गंधः स्वधा नम इति ॥ एकविप्रत्वे शर्माणोऽयं वो गंध इत्यादिना त्रिस्त्रिगंधदानं शेषं प्राग्वत् ॥ केचिदमी ते गंधा इति बहुत्वं गंधे प्राहुः ॥ अर्घ्यदानभिन्ने सर्वत्र स्वधा नम इत्यंते दानम् ॥ अत्र पित्र्यविप्रपूजने गंधादेः पदार्थानुसमयः ॥ कां-डानुसमयो वा ॥ संपूर्णवाचनादि प्राग्वत् कृत्वा चतुष्कोणं वर्तुलं च यथाक्रमं वारिणा गोमयभस्मादिना वा मंडलानि सव्यापसव्याभ्यां कुर्यात् ॥ तत्र नैर्ऋ-तीमारभ्येशानीपर्यंतं दैवे ईशानीतो नैर्ऋतिपर्यंतं पित्र्ये च प्रादक्षिण्याप्रादक्षि-ण्याभ्यां कार्याणि तत्र पूर्वोक्तपात्राण्यासादयेत् ॥ "नायसान्यपि पात्राणि पत्तला-नि न तु क्वचित् ॥ न च सीसमयानीह शस्यंते त्रपुजान्यपि ॥" कांस्यपात्रं विकल्पितम् ॥ पर्णपात्रेषु पलाशमधूकोदुंबरकुटकक्षजानि शस्तानि ॥ कदली-चूतपनसजंबूचंपकमध्यमानि ॥ एवं पात्राण्यासाद्य पितृपूर्वकं परितो भस्ममर्या-दां पितृपूर्वकं विप्राणां करशुद्धिं च सव्यापसव्याभ्यां कुर्यात् ॥ तत्र पिशंग

इति रक्षाण इति मंत्रद्वयं केचिदाहुः ॥ आचम्य करशुद्धिजलं पादक्षालनमंडले क्षिपेत् ॥

## अथाग्नौकरणम् ।

तत्राश्वलायनानां गृह्याग्निमतां व्यतिषंगेण श्राद्धप्रयोगे गृह्याग्निपक्वचरुणा गृह्याग्नावेव कार्यम् ॥ व्यतिषंगाभावे पाणिहोमः ॥ श्रौताग्निमतां दर्शे व्यतिषंगाभावात्पाणिहोम एव ॥ पूर्वेद्युरन्वष्टक्ययोर्दक्षिणाग्नौ श्रपणं होमश्च ॥ निरग्निकानां तु सर्वत्र पाणिहोम एव ॥ आपस्तंबादीनां श्रौताग्निमतां सर्वाधानिनां दक्षिणाग्नौ अर्धाधानिनां गृह्याग्निमात्रवतां च गृह्याग्नावेव प्रवासस्थानां निरग्निकानां च ॥ अयाश्चाग्ने मनोज्योतिरुद्बुध्य व्याहृतिहोमेनोत्पादिते लौकिकाग्नौ हुत्वाऽग्नेरुत्सर्गः न त्वेषां क्वापि पाणिहोमः ॥ पाकस्तु सर्वत्रापचनाग्नावेव ॥ कातीयानां गृह्याग्निमतां गृह्याग्निविहृतपचनाग्नौ पाकाऽग्नौ करणं तु गृह्याग्नावेव ॥ श्रौताग्निमतां सर्वाधानपक्षे दक्षिणाग्नावर्धाधानपक्षे औपासनाग्नाविति काशिकायामुक्तम् ॥ कातीयानामर्धाधानपक्ष एव युक्त इति भाति ॥ निरग्नीनां कातीयानामपसव्यादिना पित्र्यादिद्विजहस्त एवाग्नौकरणम् ॥ तत्र पक्षद्वयम् ॥ देवद्विजकर एव सव्येन होमः ॥ यद्वाऽपसव्येन पित्र्यद्विजपंक्तौ प्रथमद्विजकरे इति ॥ बहृवृचानां तु पित्र्यद्विजकरेष्वेव प्रतिविप्रं होमः ॥ वाजसनेयिनां त्वेकहोम एवेति श्राद्धकाशिकायां कातीयसूत्रवृत्तौ ॥ केचित्तु पृष्टोदिविधानानाग्निमुत्पाद्याग्नावेव जुह्वति ॥ सामगादीनां साग्नीनामग्नावग्नेरसन्निधाने दैवकरे पित्र्यकरे वा ॥ निरग्नीनां तु देवद्विजकर एव ॥ मृतभार्यस्यापत्नीकस्य प्रथमदेवद्विजकर एव होमो न पित्र्ये इति सर्वसाधारणम् ॥

## अथ होमप्रकारः ।

बहृवृचानां व्यतिषंगपक्षेऽग्नावग्नौकरणं करिष्ये इति पृष्ट्वा क्रियतामित्यनुज्ञातो गृह्यपक्वं चरुमुद्धृत्य द्विधा विभज्यापसव्येनोत्तरभागादवदानसंपदामेक्षणेऽवदाय सोमाय पितृमते स्वधा नमः सोमाय पितृमत इदं न ममेति होमत्यागौ कृत्वा दक्षिणभागात्पुनस्तथैवावदायाग्नये कव्यवाहनाय स्वधा नम इति होमत्यागौ कुर्यात् ॥ सव्येनापसव्येन वा मेक्षणमग्नावनुप्रहरेत् ॥ यद्वा सव्येन स्वाहांतोक्तमंत्रेणाहुतिद्वयं सोमाग्न्योर्व्यत्यासेनादाय जुहुयादिति ॥ कातीयानां तु गृह्ये श्रपणमकृत्वैव पचनाग्निपक्वमन्नमादाय घृताक्तं कृत्वा पूर्ववत्प्रश्नानुज्ञानंतरं स्मार्ताग्नमिं परिस्तीर्य तिस्रः समिध आधाय सव्येनाग्नये कव्यवाहनाय स्वाहा सोमाय पितृमते स्वाहेति मेक्षणेनाहुतिद्वयं जुहुयादपसव्येन वा पाणिहोमेपीत्थमेव प्रकार ऊह्यो विशेषस्तूक्तः ॥ आपस्तंबानामाज्यभागांते उदग्भ्रियतामग्नौ च क्रियतामिति

प्रश्ने काममुद्ध्रियतामित्यनुज्ञानम् ॥ हिरण्यकेशीयानामुद्धरिष्याम्यग्नौ करिष्यामीति प्रश्नः ॥ यन्मे मातेत्यादिमन्त्रैः सप्तान्नाहुतयः षडाज्याहुतय इति त्रयोदशाहुतयः ॥ मंत्रास्तु विस्तरभयान्नोक्ताः ॥ हिरण्यकेशीयानामाज्यभागांते सोमाय पितृमते इत्यादिषोडशमंत्रैः षोडशाज्याहुतयः षोडशान्नाहुतयश्च प्रतिपार्वणं बोध्याः ॥ मन्त्रेषु पित्रादिपदोह आज्यान्नपदयोरूहश्च तद्ग्रंथेष्वेव ज्ञेयोतिविस्तृतत्वान्नोच्यते ॥

## अथ पाणिहोमप्रकारः ।

तत्र विप्रपाणावग्नौकरणं करिष्ये इति प्रश्नः॥क्रियतामित्यनुज्ञा ॥ करिष्ये इति प्रश्ने कुरुष्वेत्यनुज्ञा न भवतीति सर्वत्राश्वलायनमतम् ॥ कातीयादीनां तु भवत्येव ॥ आश्वलायनसूत्रवृत्तौ तु पाणिहोमे कथमपि प्रश्नः प्रतिवचनं च न कार्यमित्युक्तम् ॥ सदर्भं पित्र्यविप्रपाणिं सव्येन परिसमुह्य पर्युक्ष्य मेक्षणेन करेण वा पूर्ववदाहुतिद्वयं सोमायेत्यादिमन्त्राभ्यां प्राचीनावीतीयेव जुहुयात् ॥ तत्र करेण होमपक्षे वामहस्तेन दर्भेण दक्षिणकरे उपस्तीर्य दक्षिणेन द्विरवदाय वामेनाभिघार्य चतुरवत्तित्वादि संपाद्यम्॥बह्वृचानां सर्वपित्र्यकरेषु होमः ॥ एकोद्दिष्टविप्रकरे होमः कृताकृतः॥ होमांते सव्येन परिसमूहनोक्षणे पाणिहोमे मेक्षणानुग्रहरणं न ॥ केचित्पाणिहोमे परिसमूहनादिकं मेक्षणं च नेच्छंति ॥ विप्राश्च पाणिहुतान्नं कर्त्रा देवपूर्वं सव्येनैवामासुपक्वमितिमन्त्राभिघारिते स्वस्वपात्रे संस्थाप्य भोजनस्थानदन्यत्राचम्य यथास्थानमुपविशेयुः ॥

## अथ हुतशेषविचारः ।

अग्नौकरणशेषं पिंडार्थमवस्थाप्य पित्र्यपात्रेष्वेव सर्वान्नपरिवेषणान्ते परिवेषणीयम् ॥ केचिदग्नौकरणशेषपरिवेषणोत्तरं सर्वान्नपरिवेषणमाहुः ॥ अग्नौकरणशेषं देवपात्रेषु न देयम् ॥ कातीयानां तु साग्नीनामग्नौ होमे देवपूर्वं सर्वपात्रेषु शेषदानम् ॥ निरग्नेर्दैवविप्रकरे होमे पितृपात्रेष्वेव पित्र्यकरे होमे देवादिसर्वपात्रेषु हुतशेषदानमिति काशिका ॥ " अन्नं पाणौ हुतं यच्च यच्चान्यत्परिवेषितम् ॥ एकीकृत्यैव भोक्तव्यं पृथग् भक्षो न विद्यते ॥" बौधायनानां तु पाणिहुतेन्ने भक्षितेऽन्यान्नपरिवेषणमुक्तम् ॥

## अथ परिवेषणप्रकारः ।

अथ पूर्वोक्तवद्देवपूर्वं घृताभिघारितपात्रेषु पूर्वोक्तहविष्यान्नपरिवेषणं स्वयं पत्नी वान्यो वा कुर्यात् ॥" नापवित्रेण नैकेन हस्तेन च विना कुशम् ॥ नायसेनापि पात्रेण श्राद्धेषु परिवेषयेत ॥" व्यंजनादिकं पर्णाद्यन्तर्हितहस्तैर्देयम् ॥" दर्व्या

देयं घृतं चान्नं समस्तव्यंजनानि च ॥ उदकं चैव पक्कान्नं नो दर्व्या तु कदाचन । हस्तदत्तं तु नाश्नीयाल्लवणं व्यंजनादिकम् ॥ अपक्वं तैलपक्वं च हस्तेनैव प्रदीयते ॥ " घृतादिपात्राणि भूमौ स्थापयेन्न भोजनपात्रे ॥ ओदने परमान्ने च पात्रमासाद्य तत्र घृतपूरणे रुधिरतुल्यता ॥" पंक्तौ विषमदातुश्च निष्कृतिर्नैव विद्यते ॥ सर्वदा च तिला ग्राह्या पितृकृत्ये विशेषतः ॥ भोज्यपात्रे तिलान्दृष्ट्वा निराशाः पितरो गताः ॥ " हिंगुशुंठीपिप्पलीमरीचकानि शाकादिसंस्कारार्थान्येव न तु साक्षाद्भक्षयेत् ॥ परिवेषणकाल एव तत्सर्वप्रकारमन्नं पिंडार्थं पिंडपात्रे परिवेषणीयमिति सागरे ॥

## अथान्ननिवेदनम् ।

अथोपवीती दैवे पात्रे परितः कुशयवान्विकीर्य पित्र्ये तु तिलान्विकीर्यान्नं गायत्र्या प्रोक्ष्य तूष्णीं परिषिच्य दक्षिणहस्त उपरि वामोधो दैवे पित्र्ये तु विपरीत इत्येवं स्वस्तिकाकारकराभ्यां पात्रमालभेत् ॥ तत्र मन्त्रः ॥ पृथ्वी ते पात्रं द्यौरपिधानं ब्राह्मणस्त्वामुखेऽमृतं जुहोमि ब्राह्मणानां त्वा विद्यावतां प्राणापानयोर्जुहोम्यक्षितमसि मामैषां क्षेष्ठाअमुत्रामुष्मिँल्लोके इति अयं मन्त्र आपस्तम्बकात्यायनादिभिर्नानाविधः पठितो यथासंप्रदायं वाच्यः ॥ इत्यभिमंत्र्य अतोदेवेति वा इदं विष्णुरिति वा ऋचमुक्त्वा विष्णो हव्यं रक्षस्वेति पित्र्ये तु कव्यं रक्षस्वेति न्युब्जेन करेण न्युब्जं द्विजांगुष्ठमनखमन्ने निवेश्य प्रदक्षिणं भ्रामयेत् ॥ पित्र्ये त्वप्रदक्षिणम् ॥ अत्र कातीयानामपहता इति यवानां दैवे तिलानां पित्र्ये पात्रपरितो विकिरणमुक्तम् ॥ ततो वामकरेण पात्रं स्पृशन्नमुके विश्वेदेवा देवता इदमन्नं हव्यमयं ब्राह्मण आहवनीयार्थे इयं भूर्गया अयं भोक्ता गदाधर इदमन्नं ब्रह्म ॥ इदं सौवर्णं पात्रमक्षय्यवटच्छायेयम् ॥ अमुकदेवेभ्य इदमन्नं सोपस्करममृतरूपं परिविष्टं परिवेक्ष्यमाणं चातृप्तेः स्वाहा हव्यं नमो न मम ॥ ॐ तत्सदिति सयवदर्भजलं दक्षिणकरेण पात्रवामभागे भूमौ क्षिपेत् ॥ एवं दैविकविप्रांतरेपि ॥ ततो ये देवास इत्युपस्थानम् ॥ ततः पित्र्यधर्मेण पितृपात्रालंभांगुष्ठनिवेशनाद्यंते वामेन पात्रमालभ्य पिता देवता एकविप्रत्वे पित्रादयो यथानामगोत्रा देवता इदमन्नं कव्यमित्यादि०इदं राजतं पात्रमक्षय्यवटच्छायेयम् अस्मत्पित्रेऽमुकनामगोत्ररूपाय त्रयस्थाने विप्रैक्येऽस्मत्पितृपितामहप्रपितामहेभ्योमुकगोत्रनामरूपेभ्यः इदमन्नं सोपस्करममृतरूपं परिविष्टं परिवेक्ष्यमाणं चातृप्तेः स्वधा कव्यं नमो न मम ॐ तत्सदिति तिलकुशजलं पितृतीर्थेन वामकराधोनीतेन दक्षिणकरेण पात्रदक्षिणे भूमौ क्षिपेत् ॥ एवमन्यत्रापि यथादैवतमूहः ॥ पितृस्थानेनेकविप्रत्वे त्रिषु विप्रेषु पित्रे इत्यादिनैकवचनांतेन त्यागः ॥ एवमग्रेपि त्रिषुत्रिषूह्यम् ॥

ततो येचेहेति सकृदुपस्थानम् ॥ अतिथिश्चेदेवधर्मेण स्वेष्टदेवतायै इदमन्नमित्यादि येदेवास इत्यादि अपसव्यं देवताभ्यः पितृभ्य० सव्या० अमूर्त्तानां० ब्रह्मार्पणं० हरिर्दाता० चतुर्भिश्च० ॐ तत्सद्ब्रह्मार्पणमस्तु ॥ येषामुद्दिष्टं तेषामक्षय्या प्रीतिरस्तु ॥ इति तिलोदकमुत्सृजेत् ॥ सव्यम् एकोविष्णु० "अन्नहीनं क्रियाहीनं मन्त्रहीनं च यद्भवेत् ॥ तत्सर्वमच्छिद्रं जायताम् " इत्युक्त्वा विप्रैर्जायतां सर्वमच्छिद्रमित्युक्तेनेन पितृयज्ञेन पितृरूपी जनार्दनवासुदेवः प्रीयतामिति तिलकुशजलमुत्सृजेदित्याचारः ॥ केचिद्ब्रह्मार्पणमित्यादिसंकल्पोत्सर्गे सव्यमेको विष्णुरित्यादावपसव्यं कुर्वंति तत्र ब्रह्मार्पणमित्येको विष्णुरित्यनयोः संकल्पयोर्विभागे सव्यापसव्यविभागे च प्रत्यक्षवचनानुरलंभाद्यथाचारं कार्यम् ॥ अकृते संकल्पेन्नं विप्रा न स्पृशेयुः ॥ ईशानविष्णुः ० गयायै० गदाधराय नमः ॥ पुण्डरीकाक्षा० इति नत्वा पितृपूर्वं विप्रकरेषु जले दत्ते विप्रास्तेनान्नं प्रोक्ष्य त्रिर्गायत्र्याभिमंत्रयेयुः ॥ कर्ता सव्येन पितृपूर्वमापोशनार्थमुदकं दत्त्वा सव्याहृतिकां गायत्रीं त्रिः सकृद्धोक्ता मधुवाता इति ऋचं सकृदुक्त्वा मधु मध्विति त्रिरुक्त्वोत्तत्सद्यथासुखं जुषध्वमिति वदेत् ॥ विप्राश्च बलिदानवर्ज्यं नित्यवदापोशनं कृत्वा कर्त्रा श्रद्धायां प्राणे निविष्टोमृतं जुहोमि शिवोमाविशाप्रदाहाय प्राणाय स्वाहेत्यादिपंचमंत्रेषूच्यमानेषु पंच प्राणाहुतीः कृत्वा ब्रह्मणि म आत्मामृतत्वायेत्युच्यमाने षष्ठीं कुर्युः ॥

## अथ भोजनकालधर्माः ।

ततो मौनिनो मुखशब्दं चापल्यं वर्जयंतः सशेषं भुंजीरन् ॥ दधिक्षीरघृतपायसानि तु निःशेषम् ॥ "आपोशनकरे विप्रे संकल्पाच्छिद्रभाषणात् ॥ निराशाः पितरो यांति० ॥" आपोशनं दक्षिणभागे कार्यं न तु वामभागे ॥ पुनरापूर्यापोशनं सुरापानसमम् ॥ "आपोशनमकृत्वान्नं मर्दयेन्नैव कर्हिचित्॥" विप्रैर्बलिदानं न कार्यम् ॥ केचिदाज्येन कुर्वंति तत्र पायसाज्यमाषान्नैर्बलिदाननिषेधात् ॥ विप्राश्च वामकरेणान्नं न स्पृशेयुर्न पदा भाजनं स्पृशेयुः ॥ संपादितमेव वस्तु करादिना याचेयुर्नासंपादितम् ॥ अन्नगुणदोषान्न कीर्तयेयुः ॥ कर्ता चानिषिद्धान्नं भोक्तुः पितुश्चात्मनश्च प्रियं प्रयच्छन् तत्तदन्नमाधुर्यादिगुणकीर्तनेन प्रशंसयन् ददामीत्यवदन्याचितं यच्छन्भुंजानानपश्यन्हविर्गुणानपृच्छन्दैन्याश्रुपातक्रोधादिकमकुर्वञ्छनैः पाययञ्छनैर्भोजयेत ॥ "उच्छिष्टाः पितरो यांति पृच्छतो लवणादिकम् ॥"

## अथाभिश्रवणसूक्तानि ।

अथ सव्येनैव सव्याहृतीं गायत्रीं त्रिरुक्त्वा पौरुषं सूक्तं कृणुष्वपाजो रक्षोहणमित्याद्या रक्षोघ्नीः पितृलिंगकानिंद्रेशसोमसूक्तपावमानीसूक्तान्यप्रतिरथसंज्ञभाशुः-

शिशानसूक्तम् ॥ विष्णुब्रह्मरुद्रार्कस्तोत्रादिकं भोक्तृविप्राञ्श्रावयेत् ॥ असंभवे गायत्रीजपं कुर्यात् ॥ "वीणावंशध्वनिं चापि विप्रेभ्यः सन्निवेदयेत् ॥ मंडलब्राह्मणं पाठ्यं नाचिकेतत्रयं तथा ॥ त्रिमधु त्रिसुपर्णं च पावमानयजूंषि च ॥ आशुः-शिशानसूक्तं च अग्नये कव्यवाहनम् ॥ प्रौढपादो बहिःकक्षो बहिर्जानुकरोपि वा ॥ अंगुष्ठेन विनाश्नाति मुखशब्देन वा पुनः ॥ पीतावशिष्टतोयानि पुनरुद्धृत्य वा पिबेत् ॥ खादितार्धं पुनः खादेन्मोदकादिफलादिकम् ॥ मुखेन वाथमेदन्नं निष्ठीवेद्भाजनेपि च ॥ इत्थमश्नन्द्विजः श्राद्धं हत्वा गच्छत्यधोगतिम् ॥ श्राद्धपंक्तौ तु भुंजानो ब्राह्मणो ब्राह्मणं स्पृशेत् ॥ तदन्नमत्यजन्भुक्त्वा गायत्र्यष्टशतं जपेत् ॥" पात्रे विप्रांतरोच्छिष्टसंसर्गे तन्निरस्य हस्तं प्रक्षाल्य भुक्त्वा स्नात्वा द्विशतं जपेत् ॥ उच्छिष्टभोजने सहस्रं जपेत् ॥ "भुंजानेषु तु विप्रेषु प्रमादात्स्रवते गुदम् ॥ पादकृच्छ्रं ततः कृत्वा अन्यं विप्रं नियोजयेत् ॥"

## अथ विप्रवमने ।

तत्र पित्रादिविप्रवमने लौकिकाग्निस्थापनचरुनिर्वापाज्यभागांते नामगोत्रपूर्वकमग्नौ पितॄनावाह्य वैश्वदेविकवमने देवानावाह्य संपूज्यान्नत्यागं कृत्वा प्राणाय स्वाहेत्यादि मंत्रैर्द्वात्रिंशदाहुतीर्जुहुयात् पुनः श्राद्धं वा कुर्यादिति पक्षद्वयम् ॥ पक्षद्वयेपींद्राय सोमेति सूक्तजपो नित्यः॥ अनयोः पक्षयोर्व्यवस्थोच्यते॥ वैश्वदेविकविप्रवमने होम एव न पुनः श्राद्धम् ॥ पित्र्यविप्रेष्वपि पिंडदानोत्तरं वांतौ होम एव न पुनः श्राद्धम् ॥ पिंडदानात्प्राक् पित्र्यविप्रवांतौ तद्दिने उपवासं कृत्वा परेद्युः पुनः श्राद्धं कार्यम् ॥ इदं सपिंडीकरणमहैकोद्दिष्टमासिकाब्दिकप्रत्याब्दिकश्राद्धेष्वेव ॥ दर्शादौ तु वमने तद्दिन एवामेन श्राद्धं कार्यम् ॥ एवमष्टकान्वष्टकापूर्वेद्यःश्राद्धेष्वपि ॥ तत्रामश्राद्धे साग्नेर्बह्वृचस्य व्यतिषंगादियथोक्तप्रयोगासंभवात्सांकल्पिकविधिना दर्शान्वष्टकापूर्वेद्युःश्राद्धान्यामेन कार्याणि तत्तल्लोपप्रायश्चित्तं वा निबंधोक्तं कर्तव्यमिति भाति ॥ वृद्धिश्राद्धे पिंडरहितसंक्रात्यादिश्राद्धे नित्यश्राद्धे च वमने आवृत्तिरेव ॥ तीर्थश्राद्धं दर्शवदामेनैव ॥ महालयश्राद्धे पार्वणस्थानीयविप्रवमने पुनरावृत्तिः ॥ एकोद्दिष्टस्थानीयविप्रवमने होम एवेति भाति ॥ वैश्वदेविकविप्रवमने सर्वश्राद्धेषु होम एवेत्युक्तमेव ॥ होमपक्षे आवृत्तिपक्षे च सर्वत्र सूक्तजपो नित्य इत्यप्युक्तम् ॥

## अथ भोजनांते कृत्यम् ।

भोजनांते प्राचीनावीती तृप्तास्थेति विप्रान्पृष्ट्वा तृप्ताः स्म इति प्रत्युक्तो गायत्रीं मधुवाता इति ऋचमक्षन्नमीति च श्रावयित्वाथ वाऽक्षन्नमित्येतदंते तृप्तिप्रश्नं कृत्वा श्राद्धं संपन्नमिति पृष्ट्वा सुसंपन्नमित्युक्तः परिवेषणकाले अनुद्धरणेधुना पिंडार्थं

सर्वान्नादुद्धृत्य विकिरार्थं चोद्धृत्य "अन्नशेषैश्च किं कार्यमिति पृच्छेत स द्विजान् ॥ ते इष्टैः सह भोक्तव्यमिति प्रत्युक्तिपूर्वकम् ॥ प्रदद्युः सकलं तस्मै स्वीकुर्युर्वा यथारुचि ॥" कातीयैस्तु तृप्तान् ज्ञात्वा वक्ष्यमाणप्रकारेण विकिरं दैवे पित्र्ये च दत्त्वा विप्रेभ्यः पितृपूर्वकं सकृदपो दत्त्वा गायत्रीं मधुमतीश्च श्रावयित्वा तृप्तिप्रश्नः संपत्तिप्रश्नश्च कार्यः ॥ एवं शाखांतरेप्युत्तरापोशनात्पूर्वमेव विकिरदानम् ॥

## अथ बह्वृचानां पिंडदानांते विकिरः ।

बह्वृचानां तु पिंडांत एव विकिरः ॥ हिरण्यकेशीयैरावांते उक्तः ॥ तत उच्छिष्टभाग्भ्योन्नं दीयतामित्युक्ता विप्राः पात्रस्थं भुक्तशेषं दैविकं दक्षिणे पैतृकं वामे बहिः कृत्य पितृपूर्वं दत्तमुत्तरापोशनममृतापिधानमसीति कुर्युः ॥ पिंडदानं त्वाचांतेष्वनाचांतेषु वा विप्रेषु कार्यम् ॥ विप्राश्च मुखप्रक्षालनपूर्वकहस्तप्रक्षालनादिशरावादौ कुर्युर्न कांस्यताम्रपात्रयोः शुद्धोदकेनाचम्य कया न इति ऋचं जपेयुः ॥

## अथ पिंडदानम् ।

तच्चार्चनोत्तरमग्नौकरणोत्तरं भोजनोत्तरं विकिरोत्तरं स्वधावाचनोत्तरं विप्रविसर्जनोत्तरमिति षट् पक्षाः स्मृत्युक्ताः ॥ तेषां शाखाभेदेन व्यवस्थेति सिंधुः ॥ तत्राश्वलायनानां भुक्तवत्स्वनाचांतेष्वाचांतेषु वा विप्रेषु पिंडदानं ततो विकिरः ॥ आपस्तंबहिरण्यकेशीयादीनां विप्रविसर्जनांते पिंडदानम् ॥ कातीयानां विकिरोत्तरमाचांतेष्वनाचांतेषु वा ॥ तत्राग्निहोमेग्निसमीपे पाणिहोमे विप्रसमीपे बह्वृचानां पिंडदानम् ॥ अन्येषां प्रायो विप्रसमीप एव ॥ तत्र द्विजोच्छिष्टादुत्तरतो व्याममात्रेऽरत्निमात्रे वा पिंडदानं संकल्प्य बह्वृचानामेककरेणान्येषां कराभ्यां घृतेन स्फ्येन खादिरकाष्ठेन दर्भमूलेन वापहतासुरा इति मंत्रं प्रतिलेखं पठन्नाग्नेय्यग्रं प्रत्यगपवर्गं पार्वणसंख्यया रेखामेकां द्वित्र्यादिकां वोल्लिख्य प्रत्येकमभ्युक्षेत् ॥ पिंडसंकल्परेखाकरणे च सव्यापसव्ययोर्विकल्पः ॥ अत्र कातीयैर्ये रूपाणीति मंत्रेणाग्नौकरणाग्नेरुल्मुकं रेखादक्षिणतो निधेयम् ॥ रेखासु सकृदाच्छिन्नं बर्हिर्दक्षिणाग्रमास्तीर्य शुंधंतां पितरः शुंधंतां पितामहा इत्यादिमंत्रैस्तिलोदकं बर्हिष्यासिंचेत् ॥ अत्र कातीयानां पितरममुकनामगोत्रावनेनिक्ष्वेत्यादिमंत्राः ॥ अन्येषां मार्जयंतां पितरः सोम्यास इत्यादयो मंत्राः ॥ अग्नौकरणशेषयुतसर्वान्नेन मधुसर्पिस्तिलमिश्रेण पिंडान्पत्न्या कारयित्वा रेखायां परांचीनपाणिना पितृतीर्थेन पित्रादिभ्यः पिंडान्दद्यात् ॥ एतत्तेऽस्मत्पितर्यथानामगोत्ररूप ये च त्वामत्रानुपित्रेऽमुकनामगोत्ररूपायायं पिंडः स्वधा नमस्तेभ्यश्च गयायां श्रीरुद्रपदे दत्त-

मस्त्वित्यादिमंत्रैरुहेन ॥ अत्र केषांचित्पिंडपात्रावनेजनं पात्रन्युब्जीकरणं च ॥ केचित्पिंडेषु माषान्नं वर्जयंति ॥ ततो लेपभाक्तृप्तये हस्तलेपं पिंडदर्भमूलेषु निमृज्यात्र पितरो मादयध्वं यथाभागमावृषायध्वमिति पिंडान्तसकृदनुमंत्र्य सव्यपार्श्वेनोदङ्मुखावृत्य यथाशक्ति प्राणान्नियम्य पर्यावृत्यामीमदंतपितर इति तथैवानुमंत्र्य सव्येन पिंडशेषमाघ्राय चम्यान्यपवित्रे धृत्वापसव्येन शुंधंतामित्यादि यथासूत्रं जलनिनयनं पूर्ववत्कुर्यात् ॥ अत्र भुक्तशेषानाभावे द्रव्यांतरेण पिंडदानं कार्यम् ॥ कपित्थबिल्वकुक्कुटांडामलकबदराणां मध्ये शक्तितोन्यूनप्रमाणाः पिंडाः ॥ केचित्पार्वणपिंडत्रये यथोत्तरं प्रमाणाधिक्यमाहुः ॥ तथा हस्तलेपाभावेपि दर्भेषु हस्तं निमृज्यादेवेति मेधातिथिः ॥ एकोद्दिष्टश्राद्धेषु दर्भलेपो नेति सुमंतुः ॥ अत्र नीवीं विस्रस्याभ्यंजनादीति केचित् ॥ पिंडपूजनांते उपस्थानात्प्राङ् नीवीविस्रंस इति श्राद्धसागरे ॥

## अथाभ्यंजनादि ।

अथास्मत्पितरमुकनामगोत्ररूपाभ्यंक्ष्वेति यथालिंगं मंत्रावृत्त्या पिंडेषु तैलं घृतं वाभ्यंजनं दर्भैर्दत्त्वा तथैवांक्ष्वेति कज्जलं दद्यात् ॥ आपस्तंबानामादावंजनं ततोभ्यंजनम् ॥ एतद्वः पितरो वास इति मंत्रं प्रतिपिंडं पठन् वासो वा दशां वा त्रिगुणसूत्रं वा प्रतिपिंडे दद्यादिति हेमाद्रिः ॥ सकृन्मन्त्रं पठन्सकृदेव दद्यादित्यन्ये ॥ कातीयैस्तु मन्त्रेण प्रतिपिंडं नामगोत्राद्युच्चार्य त्रिगुणं सूत्रं देयम् ॥ ततः कशिपूपबर्हणे निवेद्यास्मत्पितृभ्य इति चतुर्थ्यांक्षतगंधपुष्पधूपदीपसर्वप्रकारकनैवेद्यतांबूलदक्षिणादिभिः पिंडे पूजां सव्येनापसव्येन वा कुर्यात् ॥ " यत्किंचित्पच्यते भक्ष्यं भोज्यमन्नमगर्हितम् ॥ अनिवेद्य न भोक्तव्यं पिंडमूले कथंचन ॥ " ततो नमो वः पितर इष इत्यादिमन्त्रैः पिंडानुपस्थायोत्तानहस्तेन परेतन इति मंत्रेण सकृदुक्तेन युगपत्प्रवाहयेत् ॥ ततो दक्षिणाग्निहोमपक्षेऽग्नेतमद्याश्वमित्यग्निसमीपमागत्य यदन्तरिक्षमिति मंत्रेण गार्हपत्योपस्थानम् ॥ औपासने होमपक्षे गार्हपत्यपदरहिततन्मंत्रेणोपस्थानमिदं बह्वृचानामेव ॥ पाणिहोमे तु तेषामपि नास्त्येव ॥

## अथ पत्न्यै पिंडदानम् ।

वीरं मे दत्तपितर इति मंत्रेण मध्यममेकपिंडं पार्वणद्वये मध्यमपिंडद्वयमन्वष्टक्यादौ मध्यमपिंडत्रयमादाय पत्न्यै दद्यात् ॥ पत्नी आधत्तं पितर इति मन्त्रेण सकृत्पठितेनैव पिंडमेकमनेकं वा प्राशयेत् ॥ आपस्तंबस्त्वपांत्वौषधीनां रसं प्राशयामि भूतकृतं गर्भं धत्स्वेति मध्यमपिंडं पत्न्यै प्रयच्छति ॥ प्राशनमन्त्रः स एव ॥ यथेह पुरुषो असदिति पाठमात्रं भिद्यते ॥ इत्थमेव कातीयानाम् ॥ इदं

भार्यायाः पिंडप्राशनं प्रजाकामस्य एव ॥ केचिन्नित्यमाहुः ॥ भार्यानेकत्वे पिंडं विभज्य प्रतिपत्निमंत्रेण प्राशयेत् ॥ पार्वणद्वये पिंडद्वयं द्वाभ्यां देयम् ॥ पत्नीबहुत्वे गुणतो वयसा च योग्यायै पिंडो देयः ॥ बह्वीनां योग्यत्वे एकस्मिन्दर्शे एकस्या अन्यस्मिन्नपरस्या इति ॥

## अथ गर्भिण्यादेः प्राशननिषेधः ।

"पत्नी रुग्णान्यदेशस्था गुर्विणी सूतिकापि वा ॥ तदा तं जीर्णवृषभश्छागो वा भोक्तुमर्हति ॥" इतरौ जले क्षिपेत् ॥ "पुत्रादिकामनाभावे क्षिपेदग्नौ जलेपि वा ॥ पिंडांस्तु गोजविप्रेभ्यो वायसेभ्यः प्रदापयेत् ॥ तीर्थश्राद्धे सदा पिंडान्क्षिपेत्तीर्थे समाहितः ॥"

## अथ पिंडोपघाते ।

"श्वसृगालखरैः स्पृष्टः पिंडो भिन्नः प्रमादतः ॥ मार्जारमूषकैः स्पृष्टश्चांडालपतितादिभिः ॥ प्राजापत्यं चरेत्स्नात्वा पुनः पिंडान् यथाविधि ॥" पाकांतरेण तेन पाकेन वा पिंडदानमात्रं पुनः कार्यम् ॥ न सर्वश्राद्धावृत्तिरिति सर्वसंमतम् ॥ काकस्पर्शे तु न दोषः ॥

## अथ पिंडनिषेधनिमित्तानि ।

"विवाहव्रतचूडासु वर्षमर्धं तदर्धकम् ॥ संस्कारेषु तथान्येषु वृद्धिमात्रे च मासकम् ॥ पिंडदानं मृदा स्नानं न कुर्यात्तिलतर्पणम् ॥" श्राद्धांगतर्पणं नित्यतर्पणं च तिलैर्न कार्यमित्यर्थः ॥ महालये गयायां पित्रोः प्रत्यब्दे यस्य कस्यापि मृतस्य सपिंडीषोडशमासिकांतेषु प्रेतकृत्येषु कृतमंगलोपि पिंडान्दद्यात् ॥ केचिद् भ्रात्रादि वार्षिकेष्याहुः ॥ जीवत्पितृकत्वगर्भिणीपतित्वप्रयुक्तः पिंडदाननिषेधः प्रतिप्रसवश्च प्रागेवोक्तः ॥ "पिंडयज्ञे च यज्ञे च सपिंड्यां दद्युरेव च" तथा विकृतान्वष्टकादौ यत्र पुनः पिंडदानविधिर्यत्र वा पूर्वेद्युः श्राद्धादौ पिंडं पितृयज्ञविकृतित्वं तत्रापि न पिंडदाननिषेध इति सिन्धुः ॥ तेनाष्टकाश्राद्धेपि न निषेध इति भाति ॥ अयं च मंगलोत्तरं पिंडदानतिलतर्पणनिषेधस्त्रिपुरुषसापिंडानामिति भाति ॥

## अथ विकिरदानप्रकारः ।

अथ पिंडोद्वासनांते विकिरो देयः ॥ उपवीती दैविकद्विजसन्निधौ सदर्भभुवि ॥ असोमपाश्च ये देवा इति मन्त्रेण सजलयवमन्नं विकिरेत् ॥ प्राचीनावीती पित्र्यद्विजसन्निधौ सदर्भभुवि ॥ ये अग्निदग्धा ये अनग्निदग्धेत्यृचा सतिलमन्नं विकीर्य "अग्निदग्धाश्च ये जीवा येप्यदग्धाः कुले मम ॥ भूमौ दत्तेन तृप्यंतु तृप्ता यांतु परां गतिम्" इति कातीयसौत्रमंत्रेण सतिलजलेनाप्लावयेत् ॥ पिंडवद्विकिरोपि सार्ववर्णिकान्नस्यैव ॥ केचिदसोमपा इति दैवे विकिरं दत्त्वा संस्कृतप्रमीतायेति

पौराणमंत्रेण दत्त्वा पित्रे दत्त्वा ये अग्निदग्धा इत्यृचा पृथगुच्छिष्टपिंडं कुशोपरि दद्यादित्याहुः ॥ हस्तौ प्रक्षाल्य द्विराचम्यान्यपवित्रे धृत्वा हरिं स्मरेत् ॥ विकिरं पृथगेव निष्कास्य काकेभ्य उत्सृजेदिति काशिका ॥ देवद्विजहस्ते शिवा आपः संत्वित्यादिभिरपो गन्धपुष्पयवान्दत्त्वा भूमौ तेषु त्यक्तेष्वन्येक्षता आशीरर्थं देयाः ॥ एवं पित्र्यहस्तेष्वपसव्येनापो गन्धपुष्पतिलदानादि कृत्वा सव्येनामुकगोत्रशर्माहमभिवादयामि ॥ अस्मद्गोत्रं वर्धतामित्यादि ॥ केचिदत्र पित्र्यहस्ते गन्धतिलादिदानं सव्येनाहुः ॥ कातीयास्तु हस्तेक्षतदानांते क्षय्योदकं दत्त्वा ॥ अघोराः पितरः संत्वित्युक्त्वाभिवादनं दातारो नोभिवर्धतामित्यादिकमाहुः ॥

## अथ पात्रचालनम् ।

एवमाशिषो गृहीत्वाक्षतान्मूर्धनि धृत्वा स्वयं शिष्यादिभिर्वा भोजनपात्राणि चालयित्वाचामेत् ॥ अनुपनीतो नारी चासजातिश्च न चालयेत् ॥ सव्येन दैवे पित्र्ये च स्वस्तिवाचनम् ॥ देवेभ्यः स्वस्तीति ब्रूत पितृभ्योमुकनामगोत्रादिभ्यः स्वस्तीति ब्रूतेति ॥ ततः सव्यापसव्याभ्यां तत्तदुच्चारपूर्वकमक्षय्योदकदानम् ॥ ततो न्युब्जपात्रमुत्तानं कृत्वा ततः परं सर्वमुपवीत्येव कुर्यात् ॥ द्विजेभ्यः सकर्पूरतांबूलादि दत्त्वा पितृपूर्वकं नामगोत्राद्युच्चार्य दक्षिणां दद्यात् ॥ अमुकशर्माहममुकनामगोत्रपित्रादिस्थानोपविष्टाय विप्राय रजतदक्षिणां प्रतिपादयामीत्यादि ॥ दैवे सुवर्णम् ॥ अशक्तावुभयत्र यज्ञोपवीतं दक्षिणा ॥

## अथ स्वस्तिवाचनविसर्जनादि ।

दक्षिणाः संत्वित्युक्त्वा स्वधां वाचयिष्ये इति पृष्ट्वा ॥ वाच्यतामित्युक्ते पितृपितामहेत्याद्युच्चार्य स्वधोच्यतामित्युक्तास्तु स्वधेतितैरुक्ते पिंडसमीपे जलं निषिच्य स्वधासंपद्यतामिति संपत्तिं वाचयेत् ॥ कातीये सूत्रे दातारो नोभिवर्धतामित्याशिषोर्थं स्वधावाचनं न्युब्जपात्रोत्तानीकरणं दक्षिणादानं चेति क्रमः ॥ ततो देवादि प्रीतिं वाचयित्वा पिंडस्थानेक्षतादि क्षिप्त्वा सव्येनैव वाजे वाजे इति मन्त्रेणोत्तिष्ठन्तु पितरो विश्वेदेवैः सहेति युगपद्भेण पितृपूर्वं विप्रान् स्पृशन् विसृजेत् ॥ आयंतुनोजग्मयेति प्रदक्षिणीकृत्य ततो दातारोनोभिवर्धतामित्यादि वरयाचनम् ॥ येषां विसर्जनांते पिंडदानं तेषामाचांतेषु सौमनस्यदक्षिणादिकाक्षय्यस्वधावाचनांते दातारो नोभिवर्धतामित्यादि ततः पिंडदानादीति क्रमः ॥ हिरण्यकेशीयानां पिंडदानादिप्रयोगो विस्तृतत्वान्नोक्तः ॥ विप्रैर्वरे दत्ते स्वादुषं सदः० ब्राह्मणासः पितरः हवि मंत्रं पठेत् ॥ विप्रा इहैवस्तमायुः प्रजामिति वदेयुः ॥ आशीर्भिर्नंदितो विप्रान्नादाभ्यंगादिना संतोष्य नत्वाद्य मे सफलं जन्म० मन्त्रहीनं० यस्य स्मृत्येत्यादि विष्णुस्मरणपूर्वकं कर्मार्पयित्वा विप्रान्क्षमापयेत् ॥

## अथ श्राद्धभोजनशेषादिविचारः ।

"अष्टौपदान्यनुव्रज्य दक्षिणीकृत्य चाग्रतः ॥ दीपहस्तेन निर्वाप्य पवित्रत्यागपूर्वकम् ॥" पादशुद्धिर्द्विराचामेदुच्छिष्टोद्वासनं ततः ॥ बह्वृचो वैश्वदेवं तु यथाविधि चरेत्ततः ॥ततस्तु वैश्वदेवांते सभृत्यसुतबांधवः॥भुंजीतातिथिसंयुक्तः सर्वं पितृनिषेवितम् ॥" श्राद्धशेषान्नं शिष्याय ज्ञातिभ्यश्च देयम् ॥ न शूद्राय ॥ "द्विजभुक्तावशिष्टं तु शुचिभूमौ निखानयेत्॥"अत्र पर्वादौ निषिद्धं माषाद्यपि भोक्तव्यं वैधत्वेन निषेधाप्रवृत्तेरिति केचित् ॥ अनिषिद्धभोजनेनापि श्राद्धशेषभोजनविधिसिद्धिरित्यन्ये ॥ श्राद्धशेषभोजनाकरणे दोषः ॥ श्राद्धदिने उपवासनिषेधाच्छ्राद्धशेषाभावे पाकांतरेण भोजनम् ॥ एकादश्यादाववघ्राणम् ॥ यत्र तूपवासो नावश्यकस्तत्रैकभुक्तम् ॥ श्राद्धशेषं दिवैव भोक्तव्यं न रात्रौ तेन नक्तव्रतेवघ्राणमेव ॥

## अथ श्राद्धशेषभोजने कृच्छ्रम् ।

"श्राद्धावशिष्टभोक्तारस्ते वै निरयगामिनः॥ सगोत्राणां सकुल्यानां ज्ञातीनां च न दोषकृत् ॥" ब्रह्मचारियतिविधवानां नित्यं निषिद्धम् ॥ ज्ञातिगोत्रसंबंधिभिन्नगृहे श्राद्धशेषभोजने प्राजापत्यं प्रायश्चित्तम् ॥ यतीनां वपनं लक्षप्रणवजपश्च ॥ गुरोर्योगिनो वा श्राद्धशेषं गृहिणो न दोषाय ॥ "न शूद्रं भोजयेत्तस्मिन् गृहे यत्नेन तद्दिने ॥ श्राद्धशेषं न शूद्रेभ्यः प्रदद्यादखिलेष्वपि ॥" इति श्रीमदनंतोपाध्यायसूनुकाशीनाथोपाध्यायविरचिते धर्मसिंधुसारे पार्वणश्राद्धप्रक्रिया ॥

## अथ श्राद्धदिने वैश्वदेवनिर्णयः ।

तत्र तावच्छ्रौताग्निमतां बह्वृचानां श्राद्धात्पूर्वं पृथक्पाकेन वैश्वदेवः ॥ स्मार्ताग्निमतां निरग्निकानां च बह्वृचानां श्राद्धांत एव श्राद्धशेषेण पृथक्पाकेन वा ॥ कातीयानां तु स्मार्तश्रौताग्निमतां श्राद्धीयपाकेन पूर्वमेव ॥ निरग्निकानामंते श्राद्धशेषेण पृथक्पाकेन वा ॥ तैत्तिरीयाणां तु साग्निकानां सर्वत्रादौ वैश्वदेवः ॥ पंचमहायज्ञास्त्वंते ॥ अन्येषामादावंते वेति विकल्पः ॥ तैत्तिरीयाणामेव वैश्वदेवात्पंचयज्ञा भिन्नाः ॥ सर्वशाखिनां वृद्धिश्राद्धे पाकेन क्रियमाणे पूर्वमेव वैश्वदेवः ॥ बह्वृचानामंते वा पूर्वं वा ॥ आमादिना वृद्धिश्राद्धे सर्वेषां पूर्वमन्ते वेति भाति ॥ नित्यश्राद्धे पूर्वमेव ॥ एकादशाद्येकोद्दिष्टेषु साग्निरनग्निश्च सर्वोपि श्राद्धशेषं द्विजाधीनं कृत्वा पाकांतरेणैव वैश्वदेवादि कुर्यात् ॥

## अथ नित्यश्राद्धम् ।

वार्षिकादिश्राद्धदिने श्राद्धात्पश्चात्तेनैव पाकेन पाकांतरेण वा नित्यश्राद्धं कार्यम् ॥ नित्यश्राद्धीयसर्वदेवतानां प्रथमश्राद्धे प्रवेशे प्रसंगसिद्धिरेव ॥ तथा च दर्शादिषु महालयान्वष्टकादिषु नित्यश्राद्धलोप एव ॥ एतच्च देवहीनं दर्शवत्षड्दै-

वतं द्वावेकं वा विप्रं निमंत्र्य देशकालान्ननियमहीनम् ॥ पुनर्भोजनब्रह्मचर्यादिकर्तृभोक्तृनियमरहितं यादृशतादृशेनैवानिषिद्धान्नेन दिवैव रात्रौ प्रहरपर्यंतं वा कार्यम् ॥ स्वस्याशक्तौ पुत्रादिना ॥ सूतके दर्शादिवल्लोपः ॥ वृद्धश्रुत्तरं मंडपोत्थानावधिसपिंडैर्न कार्यम् ॥ नित्यवैश्वदेवांतर्गतपितृयज्ञोत्तरं मनुष्ययज्ञात्प्रागेव भाति ॥ तत्र दर्शवत् षट्पितॄन् देवहीनानुच्चार्य नित्यश्राद्धं करिष्ये इति शिष्यादिश्चैद्यजमानस्य पितृपितामहेत्याद्युच्चार्य संकल्पयेत् ॥ पितृगामिदमासनमित्यासनं नित्यश्राद्धे क्षणः क्रियतामिति क्षणः ॥ पूर्वोच्चारिताः पितरः अयं वो गंध इत्येवं गंधादिभिर्विप्रमभ्यर्च्य वर्तुले चतुरस्रे वा मंडले पात्रेन्नं परिविष्य पृथ्वीते पात्रमित्यादि ब्रह्मार्पणांतं दर्शवत् ॥ भोजनांते दक्षिणां दत्त्वा न वा दत्त्वा नमस्कारेण विसर्जयेत् ॥ विप्रस्यान्नादेर्वाऽभावे यथाशक्त्यन्नमुद्धृत्य षोढा विभज्यास्मत्पितृपितामहेत्यादि चतुर्थ्यंतं षड्देवता उच्चार्येदमन्नं स्वधा न ममेति त्यजेत् ॥ तदन्नं विप्राय गोभ्यो वा देयं जलादौ वा त्याज्यं अन्नत्यागस्यापि लोपे आर्चन्नत्र मरुत इति ऋचो दशवारं जपेत् ॥ इति नित्यश्राद्धविधिः ॥

## अथ श्राद्धानुकल्पाः ।

अनेकविप्रालाभे देवस्थाने शालग्रामादिकं स्थापयित्वैकविप्रे पित्रादित्रयं मातामहादिसहितदेवतात्रयं चावाह्य सर्वं श्राद्धं कार्यमित्युक्तम् ॥ सर्वथा विप्रालाभे दर्भबटुश्राद्धमित्याद्यप्युक्तम् ॥

## अथामश्राद्धम् ।

तत्र केनचित्संकटेन पाकासंभवे जातकर्मणि च ग्रहणनिमित्तकश्राद्धं चामश्राद्धं कार्यम् ॥ सपिंडकश्राद्धं मासिकं प्रतिवार्षिकं महालयाष्टकान्वष्टकादिश्राद्धं चामेन न कार्यम् ॥ शूद्रस्य तु दशाहपिंडादिश्राद्धमात्रमामेन न कदापि पाकेन ॥ तत्र पितॄनुद्दिश्यामुकश्राद्धं सदैवं सपिंडमामेन हविषा करिष्ये इति संकल्पः ॥ अन्यः प्रयोगः पूर्वोक्त एव ॥ पाकप्रोक्षणस्थाने आमप्रोक्षणम् ॥ आवाहने उशंतस्त्वेति मन्त्रे हविषे अत्तवे इत्यत्र हविषे स्वीकर्तवे इत्यूहः ॥ भस्ममर्यादांतं प्राग्वत् ॥ विप्रहस्तेषु तण्डुलैरग्नौकरणम् ॥ अन्नाच्चतुर्गुणं द्विगुणं समं वा तत्तदामं पात्रेषु संस्थाप्य पाणिहोमशेषं पिंडार्थं संस्थाप्य पात्रेषु दत्त्वा पृथ्वी ते पात्रमित्यादि० ॥ इदमामं हव्यं कव्यमित्यादीदमाममित्यादि यथाधर्मं मध्वित्यंतं प्राकृतम् ॥ यथासुखं जुषध्वमित्यस्यापोशनप्राणाहुतितृप्तिप्रश्नानां लोपः ॥ संपन्नवाचनांतेन्नशेषप्रश्नलोपः ॥ सर्वमते तण्डुलैः सक्तुभिर्वा पिंडदानम् ॥ केचिद्धविष्यसिद्धान्नेन पायसेन वा पिंडानाहुः ॥ एवं विप्रसमीपे पिंडदानांते नमो वः पितर इषे इत्यत्रोपस्थानमन्त्र इषेस्थाने आमद्रव्यायेत्यूहः ॥ पिंडोद्वासनांते पिंडजाती-

यद्द्रव्येण विकिरदानम् ॥ आमश्राद्धे स्वस्तीति ब्रूतेति वर्ज्यम्॥ वाजेवाजे इति मन्त्रे तृप्तायातेति स्थाने तर्प्स्यथ यातेत्यूहः ॥ ततः प्राग्वच्छेषं समापयेत् ॥ आमश्राद्धं द्विजैः पूर्वाह्णे कार्यम् ॥ शूद्रैरपराह्ण एव ॥

## अथ हिरण्यश्राद्धप्रकारः ।

आमान्नाभावे हिरण्यश्राद्धमप्येवमेव संकल्पादौ सर्वत्र हिरण्यपदमामपदस्थाने योज्यम् ॥ आमवद्धेमप्रोक्षणम् ॥ अत्तव इत्यादि मन्त्रत्रयोहः प्राग्वदेव ॥ तंडुलादिभिर्हस्तेनौकरणं हिरण्यमन्नादष्टगुणं चतुर्गुणं द्विगुणं समं वा देयम् ॥ हिरण्यश्राद्धेपि दक्षिणास्त्येव ॥ श्राद्धीयमामं हेम वा द्विजदत्तं यथेष्टं विनियोज्यम् ॥ शूद्रदत्तं तु भोजनादन्यत्र विनियोज्यम् ॥ श्राद्धीयामेन पञ्चयज्ञाः श्राद्धं च न कार्यम् ॥ हेमश्राद्धे आमश्राद्धं च पिंडदानविकल्पात्सांकल्पिकविधिनाप्येतद्द्वयम् ॥ सांकल्पिके च समंत्रकावाहनार्घ्यौकरणपिंडदानविकिराक्षय्यस्वधावाचनप्रश्ना इत्येतत्सप्तकं वर्ज्यम् ॥ तत्रामुकश्राद्धमामेन हविषा हिरण्येन वा सांकल्पिकविधिना करिष्य इति संकल्पः ॥ शूद्रगृहेन्यदीयमपि क्षीराद्यपि न भक्ष्यम् ॥ किमुत तदीयमामादि तद्गृहे पक्वान्नं न भोक्ष्यामिति ॥ तस्माच्छूद्रालब्धं द्विजगृहे पक्वा भक्ष्यम् ॥ ॥ इत्यामश्राद्धहेमश्राद्धविधिः ॥

## अथ पक्वान्नद्रव्यकसांकल्पिकश्राद्धविधिः ।

तत्र येषु संक्रांतियुगमन्वादिषु वृद्धयुत्तरकालिकदर्शादिषु वा पिंडदानं निषिद्धं तत्र सर्वत्र सांकल्पिकविधिः ॥ यश्च पिंडदानादिवद्विस्तृतं श्राद्धमनुष्ठातुमशक्तः सोपि सांकल्पिकं कुर्यात् ॥ तद्यथा ॥ अमुकं श्राद्धं सांकल्पिकविधिनान्नेन हविषा करिष्ये इति संकल्प्य तृतीयक्षणदानांतं पूर्ववत्कृत्वार्घ्यदानं समंत्रकावाहनं च वर्जयेत् ॥ देवानावाहयामीति पितॄनावाहयामीत्येवावाह्य गंधादिपूजनादिभस्ममर्यादांतेमौकरणं वर्जयित्वा परिवेषणादिसंपन्नवचनांते उत्तरापोशनं विकिरपिंडदानवर्ज्यमक्षय्यवचनांतं कृत्वा स्वधां वाचयिष्ये स्वधोच्यतामिति वाक्यरहितं सर्वं पूर्ववत्समापयेत् ॥ ॥ इति सांकल्पिकप्रयोगः ॥

## अथान्येप्यनुकल्पाः ।

तत्र द्विजाद्यभावे दर्भबटुविधानेन पिंडदानमात्रमुक्तमथवा द्रव्यविप्रयोरभावे पक्वान्नस्य पैतृकसूक्तेन होमः कार्यः ॥" यद्वा श्राद्धदिने प्राप्ते भवेन्निरशनः पुमान् ॥ किंचिद्वाद्यादशक्तो वा उदकुंभादिकं द्विजे ॥ तृणानि वा गवे दद्यात् पिंडान्वाप्यथ निर्वपेत् ॥ तिलदर्भैः पितॄन्वापि तर्पयेत्स्नानपूर्वकम् ॥" अथवा तृणभारं दद्याद्वान्यं वा तिलान्स्वल्पां दक्षिणां वा द्विजाय दद्यात् ॥ अथवा संकल्पादि सर्वश्राद्धप्रयोगं पठेत् ॥ सर्वाभावे वनं गत्वोर्ध्ववाहुः स्वकक्षं दर्शयन्निदं पठेत् ॥ "नमेस्ति वित्तं न

धनं न चान्यच्छाद्धोपयोगि स्वपितृन्नतोस्मि ॥ तृप्यंतु भक्त्या पितरो मयैतौ भुजौ कृतौ वर्त्मनि मारुतस्य" ॥ इति प्रभासखंडेन्येपि मंत्रा उक्ताः ॥ इत्यनुकल्पाः ॥

## अथ श्राद्धभोजने प्रायश्चित्तानि ।

दर्शश्राद्धे षट् प्राणायामाः ॥ महालयादिश्राद्धेषु त्रिवर्षोर्ध्वप्रतिवार्षिकेषु च षट् प्राणायामाः ॥ गायत्र्या दशकृत्वोभिमंत्रितस्य जलस्य पानं वा ॥ एवमन्येष्वप्यनुक्तप्रायश्चित्तश्राद्धेषूक्तजलपानमेव ॥ वृद्धिश्राद्धे प्राणायामत्रयम् ॥ जातकर्मादि चूडांतसंस्कारांगवृद्धिश्राद्धे सांतपनकृच्छ्रं जातकर्मांगश्राद्धे चांद्रायणं वा ॥ अन्यसंस्कारांगश्राद्धे उपवासः ॥ सीमंतसंस्कारे तत्संस्कारांगश्राद्धे च चांद्रायणम् ॥ आपदि दशाहांतर्नवसंज्ञकश्राद्धेषु एकादशाहे च श्राद्धभोजने प्राजापत्यकृच्छ्रम् ॥ द्वादशाहिकसपिंडीश्राद्धे ऊनमासे च पादोनकृच्छ्रः ॥ द्वितीयमासिकत्रैपाक्षिकोनषाण्मासिकोनाब्दिकेष्वर्धकृच्छ्रः ॥ अन्यमासिकेषु प्रथमाब्दिके वर्षांतसपिंडनश्राद्धे च पादकृच्छ्रः ॥ उपवासो वा ॥ गुरवे द्रव्यं दातुं श्राद्धभोजने सर्वत्रोक्तार्धम् ॥ जपशीले तदर्धमनापद्यूनमासांतेषु चांद्रायणं प्राजापत्यं च ॥ द्विमासाद्युक्तचतुर्षु पादोनकृच्छ्रः ॥ त्रिमासादिषु पूर्वोक्तेष्वर्धकृच्छ्रः ॥ प्रथमाब्दिके पादोनकृच्छ्रः ॥ द्वितीयतृतीयाब्दिके एकोपवासः ॥ क्षत्रियश्राद्धे एतद्द्विगुणम् ॥ वैश्यश्राद्धे त्रिगुणम् ॥ शूद्रश्राद्धे सर्वत्र चतुर्गुणम् ॥ चांडालविषजलसर्पपश्वादिहतपतितक्लीवादिनश्राद्धे चांद्रायणम् ॥ एकादशाहांतं पराकश्चांद्रं च ॥ द्वादशाहादौ पराकः ॥ द्विमासादिचतुर्ष्वंतिकृच्छ्रः ॥ अन्यमासिकेषु कृच्छ्रः ॥ आब्दिके पादः ॥ अभ्यासे सर्वत्र सर्वं द्विगुणम् ॥ आमहेमश्राद्धे सांकल्पिके च तत्तदुक्तप्रायश्चित्तार्धम् ॥ यतिश्च ब्रह्मचारी च पूर्वोक्तप्रायश्चित्तं कृत्वोपवासत्रयं प्राणायामशतं घृतप्राशनं चाब्दिकं चरेत् ॥ अनापदि द्विगुणं चरेत् ॥ दर्शादौ गृहिवदेव ॥ ब्रह्मचारिणश्चौलसंस्कारे भोजने कृच्छ्रः ॥ सीमंते चांद्रम् ॥ अन्येषु पवासः ॥ एकादशाहश्राद्धभोजने चांद्रं पुनः संस्कारश्चेति हेमाद्रिः ॥

## अथ क्षयाहश्राद्धे विशेषः ।

तत्र यस्य पित्रादेर्मरणं यन्मासे यत्पक्षे यत्तिथौ तद्दिनं तस्य मृताहस्तत्र पित्रादित्रिदैवत्यं वार्षिकश्राद्धं पुरूरवार्द्रवदेवसहितं कार्यम् ॥ न चात्र सपत्नीकत्वं पित्रादीनाम् ॥ नाप्यत्र मातामहादित्रयम् ॥ अत्र तिथिद्वैधे निर्णयो रात्रावपि कार्यत्वं ग्रहणदिने तत्प्राप्तौ निर्णयो मलमासादिनिर्णयो दर्शदिने तत्प्राप्तौ निर्णयः शुद्धिश्राद्धनिर्णयश्च श्राद्धकालनिर्णयप्रसंगेन पूर्वोक्तोनुसंधेयः "पारणे मरणे चैव तिथिस्तात्कालिकी मता" इति वचनात् ॥ मरणकालिकतिथेरपराह्णादिव्याप्त्याब्दिकश्राद्धनिर्णयो ज्ञेयः ॥ पित्रोः प्रथमाद्याब्दिकश्राद्धं विभक्तैर्भ्रातृभिः पृथक्कार्यम् ॥ अविभक्तत्वे ज्येष्ठेनैव ॥ मातृमृताहे मात्रादित्रिदैवत्यं श्राद्धम् ॥

## अथ मातापित्रोर्मृताहैक्ये सहगमने च ।

मातापित्रोर्मृताहैक्ये पूर्वं पितुः श्राद्धं कृत्वा स्नात्वा मातुः श्राद्धं कार्यम् ॥ एवमेकदिने पित्रोर्मरणेन मातुर्भर्त्रा सह दाहकरणेपि ज्ञेयम् ॥ सहगमने त्वेकमेव पाकं कृत्वा पितृमातृपार्वणद्वययुतं श्राद्धम् ॥ षट् पिंडा अर्घ्याश्च विश्वेदेवास्तु न भिन्नाः ॥ सहगमने सुवासिनीमरणे च विप्रपंक्तौ सुवासिनीमधिकां भोजयेत् ॥ सुवासिन्यै कुंकुमादिरूयलंकारान्दद्यात् ॥ सर्वत्र स्त्रीणां श्राद्धे वस्त्रयज्ञोपवीतगंधादिकमेव विप्रेभ्यो देयं न कुंकुमादि ॥

## अथ सापत्नमात्रादिश्राद्धे ।

एवं सापत्नमातुर्मातामहतत्पत्न्योर्मातुलस्य पितृव्यतत्पत्न्योर्भ्रातुः श्वश्रूश्वशुरयोर्गुरोः पितृष्वसुर्मातृष्वसुर्भार्यायाः भर्तुर्भगिन्यादेश्चैतेषामपुत्रत्वे पार्वणविधिनैव प्रतिवार्षिकं श्राद्धं कार्यम् ॥ केचित्पितृमातृमातामहमातामहीव्यतिरिक्तानां सर्वेषामेकोद्दिष्टविधानेनैवेत्याहुः ॥ अत्र देशाचारानुसारेण व्यवस्था ॥ पित्रादिवार्षिकादिने पितृव्यादिवार्षिकप्राप्तौ स्वयं पित्रादिश्राद्धं कार्यम् ॥ पितृव्यादिश्राद्धं तु पुत्रशिष्यादिद्वारा कार्यं दिनांतरे वा स्वयं कार्यम् ॥ "संन्यासिनोप्याब्दिकादि पुत्रः कुर्यात्सपार्वणम् ॥ " प्रथमे वर्षे वर्षांतसपिंडनपक्षे मृताहात्पूर्वदिने सपिंडनमब्दपूर्तिश्राद्धं च कृत्वा परेद्युर्वार्षिकं कार्यम् ॥

## अथ क्षयाहाज्ञाने निर्णयः ।

यस्य मृतस्य देशांतरमरणादिना मासो न ज्ञायते तिथिर्न ज्ञायते तस्य तन्मासे दर्शे शुक्लैकादश्यां कृष्णैकादश्यां वा प्रतिवार्षिकश्राद्धम् ॥ मृततिथिर्ज्ञाता मासो न ज्ञातस्तदा मार्गशीर्षे माघे वा भाद्रे वाऽषाढे वा तत्तिथौ वार्षिकम् ॥ तिथिमासयोरज्ञाने यद्दिने देशांतरं प्रस्थितस्तन्मासदिवसौ ग्राह्यौ ॥ प्रस्थानादिनादेरज्ञाने मृतवार्ताश्रवणतिथिमासौ ॥ प्रस्थानवार्ताश्रवणयोर्मासज्ञाने तिथेरज्ञाने तन्मासे दर्शादौ ॥ प्रस्थानादिमासविस्मरणे तिथिस्मरणे मार्गशीर्षादिषूक्तचतुर्षु तत्तिथौ वार्षिकम् ॥ मरणतच्छ्रवणप्रस्थानानां दिनमासयोरज्ञाने माघस्य मार्गशीर्षस्य वा दर्शे श्राद्धं द्वादशादिवर्षप्रतीक्षोत्तरं प्रतिकृतिदाहे दाहदिने वार्षिकादि ॥

## अथ श्राद्धविघ्ने निर्णयः ।

निमंत्रणोत्तरं विप्रस्य सूतके मृतके वा प्राप्ते आशौचं न ॥ निमन्त्रणं च द्वितीयक्षणरूपं समंत्रकं ग्राह्यं न लौकिकमिति भाति ॥ कर्तुस्तु पाकपरिक्रियोत्तरमाशौचाभावः ॥ पाकपरिक्रिया च समंत्रकं पाकप्रोक्षणमित्याहुः ॥ कर्तुर्गृहे भोजनारंभोत्तरं जनने मरणे वा भोजनशेषं त्यक्त्वा परकीयजलेनाचामेत् ॥ मम तु

प्रतिभाति सर्वस्याप्याशौचापवादस्यानन्यगतिविषयत्वात्संकटाभावे पाकपरिक्रियोत्तरमपि कर्तुराशौचे तदंते श्राद्धम् ॥ भोक्तुस्तु भोजनारंभात्प्रागाशौचज्ञानेऽन्यो निमन्त्रणीयः ॥ भोजनारंभोत्तरमाशौचे तु कर्त्रा तथैव श्राद्धं समापनीयम् ॥ भोक्ता तु भोजनांते आशौचप्रकरणे वक्ष्यमाणं प्रायश्चित्तं कार्यम् ॥ संकटे तु पूर्वोक्तमिति युक्तं चेद्ग्राह्यम् ॥ अथ सिंधौ पाकोत्तरमाशौचाभाववचनस्य कर्तृमात्रपरत्वाद्भोक्तुः प्रायश्चित्तमाशौचं चोक्तं तद्यथा ॥ ब्राह्मणस्याशौचे श्राद्धे सकृत्कामतोन्नभोजने सांतपनकृच्छ्रम् ॥ अभ्यासे मासं कृच्छ्रं चरेत् ॥ अज्ञानाद्विप्रादीनां जाताशौचानामन्नभक्षणे एकाहं त्र्यहं पंचाहं सप्ताहं क्रमेणाभोजनमंते पञ्चगव्यप्राशनं च अभ्यासे द्विगुणम् ॥ आशौचं तु ब्राह्मणादीनामाशौचे यः सकृदेवान्नमश्नाति तस्य तावदाशौचं यावत्तेषामाशौचं तदन्ते प्रायश्चित्तं कुर्यादिति विष्णूक्तं ज्ञेयम् ॥ श्राद्धकालेन्यकाले चैतत्सममेवेति ज्ञेयम् ॥ दातृभोक्तृभ्यामुभाभ्यामाशौचं न ज्ञातं चेन्न दोषः ॥

## अथाशौचे मासिकाब्दिकपाते ।

आशौचमध्ये श्राद्धदिनपाते आशौचांते एकादशाहे कार्यम् ॥ एकादशाहो मलमासे चेन्मलेपि कार्यम् ॥ तत्रातिक्रमे शुद्धमासे ॥ एतन्मासिके प्रतिवार्षिके च ज्ञेयम् ॥ दर्शादीनां तु पञ्चमहायज्ञादिवल्लोप एव नाशौचांते कर्तव्यत्वं नापि प्रायश्चित्तम् ॥ आशौचं विना दर्शादीनां लोपेप्युपवासादिरूपं प्रायश्चित्तमेव न कालांतरेनुष्ठानम् ॥ एकादशाहेऽसंभवेमावास्यायां कृष्णशुक्लैकादश्योर्वार्षिकम् ॥ "मासिकं चोदकुंभं च यद्यदन्तरितं भवेत् ॥ तत्तदुत्तरसातंत्र्यादनुष्ठेयं प्रचक्षते ॥" केचिदाब्दिकमप्यंतरितं दर्शादिकालासंभवेग्रिममासे तत्तिथौ कार्यमित्याहुः ॥

## अथ व्याध्यादिविघ्ने ।

आशौचोत्तरं व्याध्यादिविघ्ने विस्मृतौ चैवमेव ॥ केचिद्व्याध्यादिविघ्ने पुत्रादिना तद्दिन एवान्येनाब्दिकमाहुः ॥

## अथ भार्यारजोदोषे ।

तत्र दर्शयुगादिमन्वाद्यष्टकान्वष्टकादिश्राद्धानि पाकृकर्त्रंतरसत्त्वेऽन्येन तद्दिने कार्याण्यन्यथामादिद्रव्येण कालादर्शो दर्शश्राद्धं पंचमेहनीति पक्षांतरमाहुः ॥ सकृन्महालयस्तु दर्शे भार्यारजसि मुख्यकालातिक्रमभिया तत्रैव कार्यः ॥ एवमाश्विनशुक्लपंचम्यंतकालेप्यूह्यम् ॥ अष्टम्यादौ सकृन्महालयो भार्यारजोदोषे न कार्यः ॥ कालांतरसत्त्वादित्यादि महालयप्रकरणोक्तमनुसंधेयम् ॥ प्रत्याब्दिकं मासिकं च रजोदोषेपि तद्दिन एव कार्यमित्येकः पक्षः ॥ पंचमेहनि कार्यमित्यपरः ॥ पक्षद्वयेपि ग्रंथसंमतिः शिष्टाचारसंमतिश्च ॥ भार्यांतरसत्त्वे तद्दिन एवेति सर्वसंमतम् ॥

तद्दिने करणपक्षे श्राद्धकाले रजस्वलादर्शनादिकं वर्ज्यम् ॥ तेन तादृशगृहासंभवे स्वसापिंडस्य पाककर्तुरसंभवे च पंचमेहनीति पक्षः श्रेयान् ॥ अपुत्रा स्त्री रजोदोषे भर्तुराब्दिकादिकं पंचमेहनि कुर्यान्न त्वन्यद्वारा तद्दिने ॥

## अथ पतिमुद्दिश्याग्निप्रवेशे ।

तत्र सहगमनमेव विप्राणाम् ॥ क्षत्रियादेस्तु सहगमनमनुगमनं च ॥ एकचित्यारोहणं दंपत्योः सहैव मंत्रवदाहः सहगमनम् ॥ भर्तुः समंत्रकदाहोत्तरं पृथक् चितावग्निप्रवेशोनुगमनम् ॥ तत्रोभयत्रापि तिथ्यैक्ये एकदिन एव तंत्रेण पाकादि कृत्वा दर्शवत्षट्पिंडषडर्घ्यविप्रभेदयुतं पितृपार्वणमातृपार्वणविशिष्टं श्राद्धं कार्यम् ॥ विश्वेदेवास्तु न भिन्नाभिन्ना वा ॥ तिथिभेदेपि श्राद्धदिनैक्ये एवंमेव ॥ तिथिभेदाच्छ्राद्धदिनभेदे तु वार्षिकादि पृथगेव कार्यम् ॥ केचित्तु सहगमने तिथिभेदेपि भर्तुः क्षयाहश्राद्धदिन एव पत्न्याः श्राद्धं न तु दिनांतर इत्याहुस्तदल्पकालव्यवधाने योज्यम् ॥ न तु द्वित्र्यादितिथिव्यवधाने ॥

## अथ श्राद्धसंपाते निर्णयः ।

तत्र पित्रोर्मृताहैक्ये पूर्वं पितुः श्राद्धं ततः पाकभेदेन मातुरित्युक्तम् ॥ गृहदाहादिना सपिंडानां युगपन्मरणे संबन्धसामीप्यक्रमेण श्राद्धानि पाकभेदेन पृथक् कुर्यात्॥ पृथक्पाकेन भिन्नश्राद्धाशक्तौ तन्त्रेण श्रपणं कृत्वा श्राद्धं कुर्यात्पृथक्पृथक् ॥ क्रमेणैकदिने मरणे मरणक्रमेण ॥ तत्रैकदिने एकस्त्रयाणां श्राद्धानि न कुर्यात् ॥ वार्षिकश्राद्धत्रयप्राप्तौ श्राद्धद्वयं स्वयं कुर्यात् ॥ तृतीयादि भ्रात्रादिना कारयेद्दिनांतरे वा कुर्यात् ॥ पित्रोः सपिण्डस्य च संपाते तूक्तम् ॥ " श्राद्धं कृत्वा तु तस्यैव पुनः श्राद्धं न तद्दिने ॥ नैमित्तिकं तु कर्तव्यं निमित्तोत्पत्त्यनुक्रमात् ॥" तथा षण्णवतिश्राद्धेषु समानदेवताकत्वे तन्त्रेण श्राद्धानि ॥ अधिकदेवताकत्वे पृथक् श्राद्धानि ॥ वार्षिकमासिकोदकुंभश्राद्धेषु नित्यश्राद्धं दर्शादिश्राद्धं च देवतानां भेदात्पृथक्कार्यम् ॥ महालये तीर्थश्राद्धे दर्शादिषण्णवतिषु च नित्यश्राद्धस्य प्रसंगसिद्धिः ॥ मासिकेनोदकुंभश्राद्धस्य प्रसंगसिद्धिः ॥ तत्र प्रसङ्गसिद्धिस्थले दर्शादिकं प्रासंगिकश्राद्धमेव संकल्पपूर्वकं सांगमनुष्ठेयम् ॥ प्रसंगसिद्धं तु नित्यादिकं न संकल्पादावुच्चार्यमिति लोपापरपर्याय एव प्रसंगसिद्धिपदेनोच्यते ॥ तत्र सिद्धौ तु प्रकारद्वयं भाति ॥ दर्शव्यतीपातश्राद्धयोस्तन्त्रानुष्ठाने षट् पुरुषानुद्दिश्य दर्शश्राद्धं व्यतीपातश्राद्धं च तन्त्रेण करिष्ये इति संकल्प्य दर्शपातश्राद्धयोर्देवार्थं क्षणः करणीय इति दैवे निमंत्र्य दर्शपातश्राद्धयोः पित्राद्यर्थे क्षणः करणीय इति वर्गद्वयार्थं विप्रद्वयादिकं निमंत्र्यैकमेव श्राद्धं कार्यमित्येकः प्रकारः ॥ अथवा पूर्ववत्संकल्प्य दैवे तन्त्रेणैकमेव विप्रं निमंत्र्य षोडशमासि-

कतंत्रवत् दर्शश्राद्धे क्षणः करणीय इति दर्शविप्रनिमन्त्रणानंतरं व्यतीपातश्राद्धे क्षण इति विप्रांतरं निमंत्र्य विप्रचतुष्टयादियुतं पातश्राद्धे पिंडाभावात् षडर्घ्य पिंडयुतं श्राद्धमेकेनैव पाकेन कार्यमित्यपरः प्रकारः॥ एवं त्रिचतुरादिश्राद्धानां तंत्रेषुह्यम्॥ अत्र पक्षद्वये विचार्य युक्ततरपक्षः सद्भिरनुष्ठेयः॥ मयूखे तु सपिंडकेन दर्शश्राद्धे नापिंडकस्य व्यतीपातादिश्राद्धस्यैकदेवताकस्य प्रसंगसिद्धिरेव ॥ न तन्त्रसिद्धिस्तन्त्रोदाहरणं तु पातसंक्रांत्यादिरित्युक्तम्॥ यत्त्वन्वष्टक्येन पितृमातृवार्षिकमासिकयोः प्रसंगसिद्धिरित्युक्तम् तन्महालयेन वार्षिकादिसिद्ध्यापत्त्या बहुग्रन्थविरुद्धम् ॥ यत्र च दर्शवार्षिकश्राद्धादौ देवताभेदाच्छ्राद्धभेदस्तत्र निमित्तानि यतश्चात्र पूर्वानुष्ठानकारणमिति वाक्यात् ॥ पूर्वं वार्षिकं ततो दर्शः ॥ यत्सर्वान्प्रत्येकरूप्येणैकदा न प्राप्नोति तदनियतनिमित्तकं वार्षिकं मासिकं वा पूर्वं कार्यमिति वाक्यार्थः ॥ वार्षिकमासिकादीनां संपाते पितृपूर्वकत्वं सम्बन्धसामीप्यादिकं चानुपदमेवोक्तम् ॥ दर्शमहालयोः संपाते पूर्वं महालयस्ततो दर्शः ॥ दर्शे वार्षिकमहालययोः प्राप्तौ पूर्वं वार्षिकं ततो महालयस्ततो दर्श इति त्रयं पाकभेदेन विस्तरो महालयप्रकरणे॥ तथा काम्यतंत्रेण नित्यस्य तंत्रं श्राद्धस्य सिध्यति ॥

## अथापिण्डकश्राद्धपरिगणनम् ।

अथ संक्रांत्ययनद्वयविषुवद्वययुगादिमन्वादिभाद्रकृष्णत्रयोदशीश्रोत्रियागमनप्रयुक्तमघाभरणीमघायुतत्रयोदशीवैधृतिव्यतीपातोपरागपुत्रोत्पत्तिनिमित्तकालभ्ययोगनिमित्तकश्राद्धानि प्रोष्ठपदीभिन्नसर्वपौर्णमासीश्राद्धानि चैतानि श्राद्धानि पिंडरहितानि सांकल्पविधिना कार्याणि ॥ एतेषु दर्शवत्षट्पुरुषोद्देशः ॥ तेनैषामेककालसंपाते तन्त्रेण सिद्धिः ॥ नित्यश्राद्धस्य प्रसंगसिद्धिः॥ उपरागश्राद्धस्य भिन्नकालत्वे पृथगनुष्ठानम् ॥ उपरागश्राद्धेन संक्रांतिदर्शादिश्राद्धानां प्रसंगसिद्धिरिति प्रथमपरिच्छेदे मतांतरमुक्तम् ॥ पुत्रोत्पत्तिनिमित्तकश्राद्धस्य नवदेवताकत्वात्पृथगनुष्ठानम् ॥ तच्च हेम्नैव कार्यम् ॥ नत्वामेन नाप्यन्नेनेति ॥ इति श्राद्धसंपाते निर्णयः॥

## अथ तिलतर्पणम् ।

तच्च यच्छ्राद्धे यावंतः पितरस्तर्पितास्तावत्पितृगणोद्देशेन तच्छ्राद्धांगत्वेन तिलैस्तर्पणं कार्यम् ॥ तत्र कालनियमः ॥ पूर्वं तिलोदकं दर्शे प्रत्यब्दे तु परेहनीत्यादि तदयं निष्कर्षः ॥ दर्शश्राद्धे श्राद्धात्पूर्वं श्राद्धांगं तिलतर्पणम् ॥ तत्र विप्रनिमंत्रणोत्तरं पाकारंभोत्तरं वा ब्रह्मयज्ञकरणे ब्रह्मयज्ञांगनित्यतर्पणेनैव दर्शांगतिलतर्पणस्य सिद्धिः ॥ ततः पूर्वं वैश्वदेवोत्तरं वा ब्रह्मयज्ञकरणे श्राद्धीयषट्पुरुषोद्देशेन श्राद्धांगतर्पणं कृत्वा श्राद्धारंभः कार्यः ॥ प्रत्याब्दिकं सर्वपितृतर्पणं तु ब्रह्मयज्ञकाले कार्यम् ॥ एवं युगादिमन्वादिसंक्रांतिपौर्णमासीवैधृतिव्यतीपातश्राद्धेषु दर्शवत्पूर्व-

मेव ॥ तीर्थश्राद्धे सर्वापित्र्युद्देशेन पूर्वम् ॥ वार्षिकश्राद्धे परेद्युरेव श्राद्धीयदेवतात्रयोद्देशेन ॥ वार्षिकश्राद्धदिने नित्यतर्पणं तिलैर्न कार्यम् ॥ सकृन्महालये सर्वपित्र्युद्देशेन परेद्युरेव ॥ अन्येषु महालयपक्षेष्वष्टकान्वष्टकापूर्वेद्युःश्राद्धेषु माघ्यावर्षार्धोदयगजच्छायाषष्ठीभरणीमघाश्राद्धेषु हिरण्यश्राद्धे चातुर्व्रज्यतर्पणं श्राद्धीयदेवतोद्देशेन ॥ श्राद्धसंपाते तु यदि तत्प्रसंगसिद्धिस्तदा तदीयमेव तर्पणम् ॥ तंत्रत्वे तु पूर्वतर्पणवतां पश्चात्तर्पणवतां च श्राद्धानां समसंख्यत्वे आदावंते वा तर्पणम् ॥ विषमसंख्यत्वे बह्वनुरोधेन ॥ संक्रांतिषु ग्रहणे पित्रोः श्राद्धे दर्शे व्यतीपाते पितृव्यादिश्राद्धे महालये च निषिद्धेपि दिने श्राद्धांगतिलतर्पणं कार्यमिति केचित् ॥ अन्ये तु सर्वश्राद्धांगतर्पणे कोपि तिथ्यादिनिषेधो नेत्याहुः ॥

## अथ श्राद्धांगतर्पणनिषेधः ।

"वृद्धिश्राद्धे सपिंड्यां च प्रेतश्राद्धेनुमासिके ॥ संवत्सरविमोके च न कुर्यात्तिलतर्पणम् ॥" तत्र तर्पणप्रकारः ॥ परेहनि तर्पणे स्नात्वा तर्पणं कृत्वा नित्यस्नानं प्रातःसंध्यां च कुर्यात् ॥ यद्वा नित्यस्नानप्रातःसंध्योत्तरं श्राद्धांगतर्पणं सम्बन्धनामगोत्ररूपाणि द्वितीयांतान्युच्चार्य स्वधानमस्तर्पयामीति बह्वृचैर्दक्षिणहस्तेनान्यैरञ्जलिना त्रिस्त्रिस्तर्पयेत् ॥ प्रत्यंजलिमंत्रावृत्तिः ॥ एवं नित्यतर्पणेपि ज्ञेयम् ॥

## अथ ब्रह्मयज्ञांगे नित्यतर्पणे तिलयुक्ततर्पणनिषेधकालः ।

रविभौमभृगुवारेषु प्रतिपत्षष्ठ्येकादशीसप्तमीत्रयोदशीषु भरणीकृत्तिकामघासु निशि संध्यासु गृहे जन्मनक्षत्रे शुभकार्यदिनेऽन्यदीये शोभनयुतगृहे मन्वादिषु युगादिषु गजच्छायायामयनद्वये च तिलतर्पणं मृदा स्नानं पिंडदानं च न कार्यम्॥ केचिदयनद्वये युगादिमन्वादिषु तिलतर्पणं न दोषायेत्याहुः ॥ विवाहव्रतचूडासु वर्षमर्धं तदर्धकमन्यत्र संस्कारे मासं मासार्धं वा तिलतर्पणादिकं महालयगयाक्षयाहश्राद्धं विना न कार्यमित्युक्तम् ॥ अत्र निषिद्धदिने तिलाभावे वा हेमरौप्ययुतहस्तेन दर्भयुतहस्तेन वा नित्यतर्पणं कार्यम् ॥

## अथ तिथ्यादिनिषेधापवादः ।

"तीर्थे तिथिविशेषे च गयायां प्रेतपक्षके ॥ निषिद्धेपि दिने कुर्यात्तर्पणं तिलमिश्रितम् ॥" इति ॥ तिथिविशेषोष्टकादिरिति मयूखे ॥ अत्र कातीयानां केषांचिद्वार्षिकादौ परेहनि भरण्यादौ विसर्जनांते च श्राद्धांगतर्पणाचारो न दृश्यते तत्र मलं मृग्यम् ॥ क्षयाहश्राद्धदिने नित्यतर्पणे तिलग्रहणं तु बहुग्रंथविरुद्धम् ॥

## अथ नादीश्राद्धसंकल्पादि ।

अथ नांदीश्राद्धे यद्वक्तव्यं तत्पूर्वार्धे प्रपंचितम् ॥ एतच्चोपनयनादिमहत्कर्मसु पूर्वेद्युः कार्यं जातकर्माद्यल्पकर्मसु तदहरेव ॥ तत्र देशकालौ संकीर्त्य सत्यवसुसंज्ञका विश्वेदेवा नांदीमुखा मातृपितामहीप्रपितामह्यो नांदीमुख्यः पितृपितामहप्रपितामहा नांदी० ॥ मातामहमातुः० पत्नीसहिता नांदी० एतानुद्दिश्य पार्वणविधानेन सपिंडं नांदीश्राद्धं करिष्ये इति संकल्पः ॥ अर्घ्यकाले नवैव पात्राण्यासाद्य तेषु द्वौ द्वौ कुशौ निधाय यवोसि सोमदैवत्य इति पूर्वोक्तोहेन यवानोप्योशंतस्त्वेति द्वयोर्द्वयोरावाह्यामुकविश्वेदेवाः प्रीयंतां नांदीमुखा मातरः प्रीयंतां नांदीमुखाः पितामह्यः प्रीयंतामित्यादिना यथालिंगं पात्राणि पुरतो न्यसेत् ॥ नांदीमुखा मातर इदं वोर्घ्यमित्यादिना यथालिंगं द्वाभ्यामर्घ्यपात्रं विभज्य देयम् ॥ द्विर्द्विर्गंधदानम् ॥ चतुर्थ्यंतानुद्दिश्य स्वाहा हव्यं न ममेत्यादि देववदन्नदानम् ॥ पिंडदानकाले नांदीमुखाभ्यो मातृभ्यः स्वाहा नांदीमुखाभ्यः पितामहीभ्यः स्वाहेत्येवं प्रत्येकं द्वौद्वावित्यष्टादशपिंडान् दद्यात् ॥ अत्रानुमंत्रणं कृताकृतम् ॥ एवं सर्वं पित्र्यमपि सव्यादिना दैवधर्मेणैव कार्यमित्यादि सर्वं पूर्वार्धतो ज्ञेयं तत्रानुक्तो विशेष एवात्रोक्तः ॥

## अथ विभक्ताविभक्तनिर्णयः ।

तत्र श्राद्धाधिकारिनिर्णयः जीवत्पितृकनिर्णये च प्रायेणोक्तम् ॥ विशेषस्तूच्यते ॥ विभक्तधनानां भ्रात्रादीनां सर्वे धर्माः पृथगेव ॥ सपिंड्यंतप्रेतकर्मषोडशमासिकानि चैकस्यैवेत्यादि तु प्रागुक्तम् ॥ अविभक्तानां तु धननिरपेक्षाणि स्नानसंध्याब्रह्मयज्ञमंत्रजपोपवासपारायणादीनि नित्यनैमित्तिककाम्यानि पृथगेव ॥ अग्निसाध्यश्रौतस्मार्तनित्यकर्माणि पृथगेव ॥ "पितृपाकोपजीवी स्याद् भ्रातृपाकोपजीविकः ॥" इति पक्षांतरं कात्यायनादिपरम् ॥ पंचमहायज्ञमध्ये देवभूतपितृमनुष्ययज्ञा ज्येष्ठस्यैव ॥ पाकभेदे आश्वलायनानां वैश्वदेवभेदो विकल्पेन ॥ ज्येष्ठेनाकृते वैश्वदेवे कनिष्ठस्य पाकसिद्धौ तेन तूष्णीं किंचिदन्नमग्नौ क्षिप्त्वा विप्राय दत्त्वा भोक्तव्यमिति केचित् ॥ देवपूजा तु पृथगेकत्र वा ॥ प्रतिवार्षिकदर्शसंक्रांतिग्रहणादिश्राद्धानि ज्येष्ठस्यैव ॥ तीर्थश्राद्धाद्यपि युगपत्सर्वेषामविभक्तानां प्राप्तावेकस्यैव भेदेन प्राप्तौ भिन्नम् ॥ एवं गयाश्राद्धेपि योज्यम् ॥ काम्यदानहोमादौ द्रव्यसाध्ये भ्रात्राद्यनुमत्याधिकारः ॥ मघात्रयोदशीश्राद्धं पृथगेवेत्युक्तम् ॥

## अथ तीर्थश्राद्धम् ।

तत्र गंगादितीर्थप्राप्तावर्घ्यावाहनद्विजांगुष्ठनिवेशनतृप्तिप्रश्नविकिरविसर्जनादिगंधवर्ज्यं सकृन्महालयवत्सर्वपितृगणोद्देशेन धुरिलोचनसंज्ञकविश्वेदेवसहितं तीर्थश्राद्धं

कुर्यात् ॥ अमौकरणं कृताकृतम् ॥ करणपक्षे तीर्थजलसमीपे श्राद्धं चेत्तदा प्राकृतमन्त्रयुतं तीर्थजले कार्यम् ॥ अन्यथा हस्तादौ ॥ पिंडानां तीर्थे प्रक्षेप एव प्रतिपत्तिः ॥ अत्र तीर्थवासिन एव विप्रा विगुणा अपि मुख्याः ॥ तदभावेन्ये ॥ अत्र श्राद्धीये देशेन्नादिद्रव्ये च काकश्वादिभिर्दष्टेपि न दोषः ॥ तीर्थश्राद्धांगतर्पणं दर्शवत्पूर्वं कार्यम् ॥ देशकालौ संकीर्त्य सर्वपितृगणमुच्चार्य एतेषाममुकतीर्थप्राप्तिनिमित्तकं तीर्थश्राद्धं सपिंडं सदैवं सद्यः करिष्ये इति संकल्पः ॥ धूरिलोचनविश्वेदेवादि सर्वं सकृन्महालयवत् ॥ तीर्थयात्रायां साग्नेः सपत्नीकस्यैवाधिकारः ॥ निरग्निकस्य त्वपत्नीकस्यापि ॥ स्त्रियाः स्नानदानतीर्थयात्रानामस्मरणादिकं पुत्राद्यनुमत्यैव ॥ सधवाया यात्रादिकं पत्या सहैव ॥

## अथ तीर्थयात्राविधिः ।

"तीर्थयात्रां चिकीर्षुः प्राग्विधायोपोषणं गृहे ॥ पारणाहे घृतश्राद्धं वृद्धिधर्मयुतं चरेत् ॥" तथा षड्दैवतं नवदैवतं द्वादशदैवतं वा बहुसर्पिर्युतेनान्नेन श्राद्धं कुर्यात् ॥ निवेदनकाले इदं घृतं सान्नं दत्तं दास्यमानं चेत्यादि वदेत् ॥ गणेशं विप्रान्साधूंश्च शक्त्या संपूज्य यात्रासंकल्पं कृत्वा श्राद्धशेषेण पारणां कृत्वा व्रजेदिति केचित् ॥ अन्ये तु श्राद्धांते यात्रासंकल्पं कृत्वा श्राद्धशेषं घृतमात्रमादाय ग्रामांतरं क्रोशन्यूनं गत्वा तत्र श्राद्धशेषघृतसहितान्नांतरेण पारणामित्याहुः ॥ श्रीपरमेश्वरप्रीतिकामः पितृमुक्तिकामोवाऽमुकप्रायश्चित्तार्थं वाऽमुकतीर्थयात्रां करिष्य इति यात्रासंकल्प ऊह्यः ॥ उपवासात्पूर्वं मुंडनं कार्यमिति केचित् ॥ अन्ये तु प्रायश्चित्तार्थयात्रायामेव मुंडनमित्याहुः ॥ एवं गयोद्देश्यकयात्रायामपि मुंडनविकल्पः ॥ "उद्यतस्तु गयां गंतुं श्राद्धं कृत्वा घृतादिकम् ॥ विधाय कार्पटीवेषं ग्रामं कृत्वा प्रदक्षिणम् ॥ ततः प्रतिदिनं गच्छेत्प्रतिग्रहविवर्जितः ॥ यश्चान्यं कारयेच्छक्त्या तीर्थयात्रां नरेश्वरः ॥ स्वकीयद्रव्ययानाभ्यां तस्य पुण्यं चतुर्गुणम् ॥" यात्रामध्ये आशौचे रजोदोषे वा शुद्धिपर्यंतं स्थित्वा तदन्ते गच्छेत् ॥ विषममार्गे तु न दोषः ॥ संकल्पितयात्रामध्ये तीर्थांतरप्राप्तौ श्राद्धादिकं कार्यमेव ॥ वाणिज्याद्यर्थं गतेनापि मुंडनोपवासादिकं कार्यम् ॥ कार्यांतरप्रसंगेन तीर्थगमनेऽर्ध फलम् ॥ वाणिज्यार्थं गमने पादफलम् ॥ मार्गे द्विर्भोजनादिकरणे छत्रोपानहसेवने च पादोनम् ॥ यानमारुह्य गमनेर्धम् ॥ अनुषंगेण तीर्थप्राप्तौ तीर्थस्नानात्स्नानजं फलं न तीर्थयात्राफलम् ॥ " मार्गेतरा नदीप्राप्तौ स्नानादि परपारतः ॥ अर्वागेव सरस्वत्या एष मार्गगतो विधिः ॥ "

## अथ तीर्थसामीप्यप्राप्तौ विधिः ।

"यानानि तु परित्यज्य भाव्यं पादचरैर्नरैः ॥ भक्त्या च विलुठेत्तत्र कुर्याद्वेषं च कार्पटम् ॥" तीर्थप्राप्तिपूर्वदिने तीर्थप्राप्तिदिने वोपवासः कार्यः ॥ तीर्थे मुसल-

स्नानंकृत्वोदङ्मुखः प्राङ्मुखो वा केशश्मश्रुनखलोमान्युदक्संस्थानि वापयेत् ॥ ततः समं त्रकं स्नानम् ॥ तत्र प्रणवेन जलमालोडय तीर्थमवगाह्य ॥ ॐ "नमोस्तु देव देवाय शितिकंठाय दण्डिने ॥ रुद्राय चापहस्ताय चक्रिणे वेधसे नमः ॥ सरस्वती च सावित्री वेदमाता गरीयसी ॥ सन्निधात्री भवत्वत्र तीर्थपापप्रणाशिनी॥" इति मंत्रेण स्नायात् ॥ शेषः स्नानविधिर्नित्यवत् ॥ ततस्तर्पणादितीर्थश्राद्धम् ॥ श्राद्धोत्तरदिने ततो गमनं न श्राद्धदिने ॥ " मुंडनं चोपवासश्च सर्वतीर्थेष्वयं विधिः ॥ वर्जयित्वा कुरुक्षेत्रं विशालं विरजं गयाम् ॥ " सर्वतीर्थेष्विति प्रसिद्धमहातीर्थेष्वित्यर्थः ॥ दशमासोत्तरं पुनस्तीर्थप्राप्तौ मुंडनादितीर्थविधिः ॥

## अथ प्रयागे वेणीदानम् ।

प्रयागे तु योजनत्रयादागतस्य दशमासादर्वागपि ॥ प्रयागे जीवत्पितृकगुर्विणीपतिकृतचूडबालानामपि सभर्तृकस्त्रीणामपि प्रथमयात्रायां वपनम् ॥ केचित्सभर्तृकस्त्रीणां 'सर्वान्केशान्समुद्धृत्य च्छेदयेदंगुलद्वयम्' इत्याहुः॥ तत्र वेणीदानविधिर्द्वितीयपरिच्छेदे उक्तः ॥ यतिभिस्तु तीर्थेष्वृतुसंधिष्वेव कक्षोपस्थवर्जं वपनं कार्यम् ॥ तीर्थप्राप्तावविलंबेन स्नानपितृतर्पणश्राद्धादि कुर्यात् ॥ न पर्वादिकालं विचारयेत् ॥ आकस्मिकमहातीर्थप्राप्तौ द्वित्रिदिनादिवासासंभवे भुक्तेनापि रात्रावपि सूतकिनापि ग्रहणपर्वणीव स्नानं हिरण्यादिना तीर्थश्राद्धं च कार्यम् ॥ एवं मलमासेपि योज्यम् ॥

## अथ परार्थस्नानम् ।

"मातरं पितरं जायां भ्रातरं सुहृदं गुरुम् ॥ तीर्थे स्नायाद्यमुद्दिश्य सोष्टमांशं लभेन्नरः ॥ यद्वा प्रतिकृतिं दर्भमयीं सत्तीर्थवारिषु ॥ मज्जयेच्च यमुद्दिश्य सोष्टमांशं फलं लभेत् ॥" पक्वान्नेन तीर्थश्राद्धे तैनैव पिंडाः ॥ हिरण्यादिना कृते पिंडद्रव्याणि ॥ सकुसंयावपायसपिण्याकगुडान्यतमानि ॥ पिंडानां तीर्थे प्रक्षेप एव ॥ नान्या प्रतिपत्तिः ॥ एतच्चापुत्रया विधवया कार्यम् ॥ "सपुत्रया न कर्तव्यं भर्तुः श्राद्धं कदाचन" इति स्मृतेः ॥ अनुपनीतेनापि कार्यम् ॥ यतिना तु न कर्तव्यम् ॥ "दंडं प्रदर्शयेद्विक्षुर्गयां गत्वा न पिंडदः ॥ दंडस्पर्शाद्विष्णुपदे पितृभिः सह मुच्यते ॥" एवं कूपवटादिष्वपि दंडप्रदर्शनमेव ॥ तीर्थे वृत्तिदौर्बल्येन प्रतिग्रहे दशमांशदानेन शुद्धिः ॥

## अथाशौचप्रकरणम् ।

"श्रीविट्ठलं रुक्मिणीं च पितरौ दीनवत्सलौ ॥ ध्यात्वेष्टसिद्धये नत्वा वक्ष्येथाशौचनिर्णयम् ॥ १ ॥"

## तत्रादौ गर्भनाशजननाद्याशौचम् ।

"आचतुर्थाद्भवेत्स्रावः पातः पंचमषष्ठयोः ॥ अत ऊर्ध्वं प्रसूतिः स्यात्तत्राशौचं विविच्यते ॥" तत्र गर्भस्रावे आद्यमासत्रये मातुस्त्रिरात्रं चतुर्थमासे चतूरात्रमस्पृश्यत्वरूपमाशौचम् ॥ पित्रादिसपिंडानां स्रावमात्रे स्नानाच्छुद्धिः ॥ पंचमषष्ठमासयोर्गर्भपाते गर्भिण्या मासमसंख्यं क्रमेण पंचषड्दिनान्यस्पृश्यत्वलक्षणमाशौचम् ॥ पित्रादिसपिंडानां तु त्रिदिनं जननाशौचं मृताशौचं तु नास्ति ॥ इदं स्रावपाताशौचं सर्ववर्णसाधारणम् ॥ गर्भिण्याः सप्तममासप्रभृतिप्रसवे मातुः पित्रादिसपिंडानां च संपूर्णं जननाशौचम् ॥ तच्च विप्रे दशाहम् ॥ क्षत्रिये द्वादशाहम् ॥ वैश्ये पंचदशाहं शूद्रे मासः संकरजातीनां शूद्रवत् ॥ विज्ञानेश्वरस्तु नैषामाशौचं किंतु स्नानमात्रमित्याह ॥ सर्ववर्णेषु दशाहं वा ॥ जननाशौचे गर्भिण्या दशाहमस्पृश्यत्वम् ॥ कर्मानधिकारस्तु कन्योत्पत्तौ मासं पुत्रोत्पत्तौ विंशतिरात्रम् ॥ इदं स्वस्वाशौचोत्तरमिति विभस्त्रियाः क्रमेण चत्वारिंशद्त्रिंशद्दिनान्यनधिकारः ॥ पितुः सापत्नमातुश्च कन्यायाः पुत्रस्य वोत्पत्तौ सचैलस्नानात्प्रागस्पृश्यत्वं पित्रादिसपिंडानां जननाशौचे कर्मानधिकारमात्रम् ॥ कर्माद्यातिरिक्तकाले स्पर्शे दोषो न जातकर्मणि दाने च नालच्छेदनात्पूर्वं पितुरधिकारः ॥ एवं पंचमषष्ठदशमादिनेषु दाने जन्मदादिपूजने चाधिकारः ॥ तत्र विप्राणां प्रतिग्रहेपि दोषो न ॥ कूटस्थमारभ्य सप्तमपुरुषपर्यंताः सपिंडाः ॥ ततः सप्तसमानोदकाः ॥ ततः सप्तैकविंशतिपर्यंताः सगोत्राः ॥ तत्र सपिंडानां दशाहमित्युक्तम् ॥ सोदकानां त्रिरात्रं सगोत्राणामेकरात्रमिति नागोजीभट्टीये ॥ अन्ये तु सगोत्राणां नाशौचमित्याहुः ॥ अयं सपिंडसोदकाद्याशौचविभागो जनने मरणे च समानः ॥ मरणे त्वाशौचविच्छेदेपि स्नानमात्रं यावदेककुलत्वज्ञानं तावद्भवत्येवेति विशेषः ॥ अत्रेदं बोध्यम् ॥ कूटस्थादारभ्य संततिभेदे एकसन्ततौ कश्चिदष्टमोपरसंततौ च कश्चित्सप्तमस्तयोश्चैकतः सांपिंड्यानुवृत्तिः परतो निवृत्तिरित्युक्तम् ॥ तत्राष्टमेन निवृत्तसापिंड्यकेन सप्तमादीनां परसंततिस्थानां जनने मरणे त्रिदिनमाशौचं कार्यम् ॥ सप्तमेन त्वनुवृत्तसापिंड्यकेनाष्टमादीनां जनने मरणे वा दशाहमेव कार्यम् ॥ एवं सोदकत्रिरात्रादौ कन्याविषयकत्रिपुरुषसापिंड्ये चोह्यम् ॥ तत्राष्टमस्य मृतपितृकत्वेपि जीवत्पितृकत्वे च त्रिदिनमेव ॥ त्र्यंबकीये भट्टोजीये नागोजीये चाशौचप्रकरणेन्यत्र च पित्रादिजीवनाजीवनकृतविशेषादर्शनादिति केचित् ॥ अपरे तु निर्णयसिंधौ सापिंड्यप्रकरणे आदशमाद्धर्मविच्छित्तिरित्यादिसुमंतुवाक्यस्य शूलपाणिकृतव्याख्याने एकपिंडदानक्रियान्वयित्वरूपसापिंड्यलक्षणमनुसृत्य जीवत्पित्रादित्रिकस्य प्रपितामहात्परे त्रयः पिंडभाजस्तदूर्ध्वं त्रयो नवपुरुषपर्यंता लेप-

भाजः श्राद्धकर्ता च दशम इति दशमादूर्ध्वं सापिंड्यनिवृत्तिः ॥ पितृपितामहजीवने नवपुरुषपर्यंतं पितृजीवनेष्टपुरुषपर्यंतं सापिंड्यमिति प्रतिपादनाद्दृष्टमादेः पित्रादिजीवनदशायां दशाहमाशौचं पित्रादिमरणोत्तरमेव त्रिदिनमिति वदंति ॥ अत्र मम द्वितीयपक्ष एव युक्तो भाति ॥ पितृगेहे कन्याप्रसूतौ पित्रोस्तद्गृहवर्त्तिभ्रातॄणां चैकाहः ॥ पितृगृहवर्तिपितृव्यादीनां सर्वेषां पितृसपिंडानामेकाह इति स्मृत्यर्थसारे ॥ एवं भ्रात्रादिगृहे भगिन्यादिप्रसवेपि तेषामेकाहः ॥ माधवस्तु पितृगृहे कन्यायाः प्रसूतौ पित्रोस्त्रिरात्रम् ॥ तद्गृहवर्त्तिभ्रातॄणामेकाह इत्याह ॥ कन्यायाः पतिगृहे प्रसवे पित्रादीनां नाशौचम् ॥ मृतजाते शिशौ सपिंडानां संपूर्णमेव जननाशौचं मृताशौचं नास्ति ॥ जननोत्तरं नालच्छेदनात्पूर्वं शिशुमरणे पित्रादिसपिंडानां त्रिदिनं जननाशौचम् ॥ मातुस्तु दशाहमेव ॥ मृताशौचं तु नास्ति ॥ नालच्छेदनोत्तरं दशाहाभ्यंतरे शिशुमरणे सपिंडादीनां संपूर्णमेव जननाशौचम् ॥ मरणाशौचं तु नास्ति ॥

## अथ मृताशौचम् ।

तत्र मृताशौचवतामस्पृश्यत्वं कर्मानधिकारश्च ॥ दशाहानंतरं नामकरणात्प्राक् शिशुमरणे सपिंडानां स्नानमात्रम् ॥ मातापित्रोस्तु पुत्रमृतौ त्रिरात्रं कन्यामृतौ चैकाहः ॥ सापत्नमातुः सर्वत्र पितृवत् ॥ नाम्नः पूर्वं खननमेव नित्यं नामकरणानंतरं चूडाकरणपर्यंतं तदभावे वर्षत्रयपूर्तिपर्यंतं दाहखननयोर्विकल्पः ॥ नामकरणोत्तरं दंतोत्पत्तेः प्राक् पुत्रमरणे दाहे सपिंडानामेकाहः ॥ खनने तु स्नानाच्छुद्धिः ॥ मातापित्रोरुभयत्रापि त्रिरात्रम् ॥ कन्यामृतौ तु त्रिपुरुषसपिंडानामुभयत्र स्नानाच्छुद्धिः ॥ मातापित्रोः कन्यामृतौ दंतोत्पत्तिपर्यंतमुभयत्रैकाहः ॥ अत्र नामकरणं द्वादशदिनोपलक्षणम् ॥ दंतजननं सप्तममासोपलक्षणम् ॥ तेन द्वादशदिनमारभ्य षण्मासपर्यंतमेकाहादि फलितम् ॥ सप्तममासप्रभृतिचूडाकरणपर्यंतं तदभावे तृतीयवर्षपूर्तिपर्यंतं दाहे खनने वा सपिंडानामेकाहः ॥ केचित्खनने एकाहो दाहे त्रिरात्रमित्याहुः ॥ मातापित्रोरुभयत्र त्रिरात्रम् ॥ एतत्पुत्रमृतौ ॥ कन्यामृतौ तु वर्षत्रयपर्यंतं सपिंडानां स्नानाच्छुद्धिः ॥ मातापित्रोः सप्तममासप्रभृति कन्यामृतौ त्रिरात्रम् ॥ विज्ञानेश्वरस्त्वेकादशदिनमारभ्य यावदुपनयनं पुत्रमृतौ कन्यामृतौ तु यावद्विवाहं मातापित्रोस्त्रिरात्रमेवेत्याह ॥ प्रथमवर्षादौ कृतचूडस्य पुत्रस्य मरणे पित्रादीनां सर्वेषां त्रिदिनं नियतं दाहश्च नियतः ॥ त्रिवर्षोर्ध्वं कृतचूडस्याकृतचूडस्य वा मरणे प्रागुपनयनात्पित्रादिसर्वसपिंडानां त्रिदिनं दाहो नियतः ॥ सोदकानां त्वनुपनीतमरणेनूढकन्यामरणे च नाशौचं किंतु स्नानमात्रम् ॥ अनुपनीतभ्रातृमरणे भगिन्या नाशौचम् ॥ ऊनद्वि-

वर्षस्य खननं मुख्यम् ॥ अनुगमनं वैकल्पिकम् ॥ पूर्णद्विवर्षस्य दाहो मुख्यः ॥ अनुगमनं नित्यम् ॥ अत्र दाहोदकदानादि तूष्णीमेव ॥ कृतचूडाय पूर्णत्रिवर्षाय च भूमौ पिंडदानम् ॥ दंतजननपर्यंतं तत्तुल्यवयस्केभ्यो द्वितीयादिने तदुद्देशेन दुग्धदानम् ॥ त्रिवर्षांतं चौलांतं वा पायसदानम् ॥ तदूर्ध्वमुपनयनपर्यंतमाशौचांते सवयोभ्यस्तदुद्देशेन भोजनादिदानम् ॥ स्त्रीशूद्रयोस्तु कृतचूडयोरप्युदकदानादि वैकल्पिकम् ॥ शूद्रस्य त्रिवर्षपर्यंतमेतदेवाशौचम् ॥ अस्योपनयनस्थाने विवाहः ॥ तथा च त्रिवर्षोर्ध्वं विवाहपर्यंतं तदभावे षोडशवर्षपर्यंतं वा शूद्रस्य मरणे त्रिदिनम् ॥ तदूर्ध्वं जात्याशौचम् ॥ कन्याया वर्षत्रयानंतरं वाग्दानात्प्राङ्मरणे त्रिपुरुषसपिंडानामेकाहः ॥ मातापित्रोस्त्रिरात्रम् ॥ दाहादि तूष्णीम् ॥ वाग्दानोत्तरं विवाहात्प्राक्कन्यामरणे पितृसपिंडानां भर्तृसपिंडानां च त्रिदिनम् ॥ अत्रोभयकुलेपि साप्तपुरुषं सापिंड्यम् ॥ दाहादि तूष्णीमेव ॥ जननेनुपनीतस्य मरणे चातिक्रांताशौचं नास्ति ॥ पितुरपत्यजननश्रवणे देशांतरे कालांतरे स्नानं भवत्येव ॥ अनुपनीतमरणेऽतिक्रांतेपि स्नानं भवत्येवेति स्मृत्यर्थसारः ॥ अनुपनीतस्यानूढकन्यायाश्च मातापितृमरणे एव दशाहाशौचम् ॥ अन्यमरणे तु न किमपि ॥ उपनयनोत्तरं मरणे सपिंडानां दशाहम् ॥ सोदकानां त्रिरात्रम् ॥ सगोत्राणामेकाहं स्नानाच्छुद्धिर्वेत्यादिविशेषः प्रागुक्तोत्रानुसन्धेयः ॥

## अथ विवाहितकन्यामरणे ।

स्त्रीशूद्रयोर्विवाहोत्तरं मरणे दशाहः ॥ शूद्रस्य विवाहाभावे षोडशवर्षोत्तरमित्युक्तम् ॥ विवाहोत्तरं कन्यायाः पितृगृहे मरणे मातापित्रोः सापत्नमातुः सापत्नभ्रातुः सोदरभ्रातुश्च त्रिरात्रम् ॥ पितृव्यादीनां तद्गृहवर्तिनामेकाहः ॥ तद्गृहवर्तिनामपि सपिंडानामेकाह इति केचित् ॥ ग्रामांतरमृतौ पित्रोः पक्षिणीति केचित् ॥ ऊढायाः कन्यायाः पतिगृहे मरणे पित्रोः सापत्नमातुश्च त्रिरात्रं भ्रातुः पक्षिणी ॥ पितृव्यादीनामेकाह इति केचित् ॥

## अथ पित्रोर्मृतौ कन्यायाः ।

मातापित्रोर्मरणे सापत्नमातुर्मृतौ चोढकन्यायास्त्रिरात्रं दशाहांतः ॥ दशाहोर्ध्वं कालांतरे वत्सरांतरेपि पक्षिणी ॥ भ्रातुरुपनीतस्य विवाहितभगिन्याश्च परस्परगृहमरणे परस्परस्य त्रिरात्रम् ॥ गृहांतरमृतौ परस्परस्य पक्षिणी ॥ ग्रामांतरे त्वेकाहः ॥ अत्यन्तनिर्गुणत्वे एकग्रामेपि स्नानम् ॥ एवं सापत्नभ्रातृभगिन्योरपि ॥ भगिनीमृतौ भगिन्या अप्येवमेवेति भाति ॥ ऊढकन्यायाः पितामहपितृव्यादिमरणे स्नानमेव ॥

## अथ मातुलादेः ।

मातुलमरणे भगिनीपुत्रस्य भगिनीकन्यायाश्च पक्षिणी ॥ उपकारकमातुलमरणे स्वगृहे मातुलमरणे च त्रिरात्रम्॥ अनुपनीतमातुलमरणे ग्रामांतरे मातुलमरणे चैकरात्रम् ॥ एवं सापत्नमातुलमरणेपि ॥ मातुलानीमरणे भर्तृभगिन्यपत्यस्य स्त्रीपुंसरूपस्य पक्षिणी ॥ सापत्नमातुलानीमरणे तु नाशौचम् ॥ उपनीतभागिनेयमरणे मातुलस्य मातुलभगिन्याश्च त्रिरात्रम् ॥ एवं सापत्नभागिनेये मृतेपि॥ अनुपनीतभागिनेयमरणे मातुलस्य मातुलभगिन्याश्च पक्षिणी ॥ एवं सापत्नभागिनेये मृतेपि ॥ अनुपनीतपदेनावशिष्टोपनयनमात्रः कृतचूडश्चूडाया अभावे त्रिवर्षोर्ध्ववयस्को वा ग्राह्य इति भाति ॥ एवमग्रेष्यनुपनीतपदस्यार्थो बोध्यः ॥ भागिनेयोमरणे तु स्नानमात्रमिति भाति ॥ मातामहमरणे दुहित्रपत्यस्य पुत्ररूपस्य कन्यारूपस्य वा त्रिरात्रम् ॥ ग्रामांतरे पक्षिणी ॥ मातामह्यां मृतायां दौहित्रस्य दौहित्र्याश्च पक्षिणी ॥ अत्र सर्वत्र पुरुषस्योपनीतस्यैव स्त्रियाश्च विवाहितायाः एव मातापित्रातिरिक्ताशौचेधिकार इत्युक्तम् ॥ अत्र मातुलमातुलानीमातामहादिमृतौ स्वपत्यस्याशौचोक्तिस्वम्बकीयानुसारेणान्यत्र तु नैवं स्पष्टमुपलभ्यते ॥ उपनीतदौहित्रमरणे मातामहस्य मातामह्याश्च त्रिरात्रम् ॥ अनुपनीतदौहित्रे मृते मातामहस्य मातामह्याश्च पक्षिणी ॥ दौहित्रीमरणे तु नाशौचमिति भाति ॥ श्वश्रूश्वशुरयोर्मरणे जामातुः सन्निधौ त्रिरात्रम् ॥ असन्निधौ तु पक्षिणी ॥ उपकारकयोर्मरणे स्वसान्निध्यावपि त्रिरात्रमेव ॥ ग्रामांतरे त्वेकरात्रम् ॥ भार्यामरणेन निवृत्तसम्बन्धयोः श्वश्रूश्वशुरयोरनुपकारकयोर्मृते तु पक्षिण्येकाहो वेति भाति ॥ जामातरि मृते श्वश्रूश्वशुरयोरेकरात्रं स्नानाच्छुद्धिर्वा ॥ स्वगृहे जामातृमरणे त्रिरात्रम् ॥ उपनीते शालके मृते भगिनीभर्तुरेकाहः ॥ अनुपनीतशालके मृते तु स्नानम् ॥ ग्रामांतरे मृतेपि स्नानम् ॥ भार्यामरणेन निवृत्तसंबंधे शालके स्नानमिति नागोजीभट्टीये॥ शालकसुतमरणे स्नानम् ॥ कश्चिच्छालिकायां मृतायां शालकवदेकाहादिकमाह ॥ मातुः स्वसरि मृतायां स्वस्रपत्ययोः कन्यापुत्रयोः पक्षिणी ॥ एवं सापत्नमातुः स्वस्रमरणेपि ॥ पितुः स्वसरि मृतायां भ्रात्रपत्ययोः कन्यापुत्रयोः पक्षिणी ॥ पितुः सापत्नस्वस्रमरणे तु स्नानमात्रम् ॥ भ्रात्रपत्यमरणे तु पितृष्वसुः स्नानम् ॥ स्वगृहे पितृष्वसृमातृष्वसृमरणे त्र्यहम् ॥

## अथ बंधुत्रयाशौचविचारः ।

उपनीतबंधुत्रयमरणे पक्षिणी ॥ अनुपनीतस्य गुणहीनस्य वा बंधुत्रयस्य मरणे एकाहः ॥ स्वगृहे मरणे तु त्रिरात्रम् ॥ अत्र बंधुत्रयपदेनात्मबंधुत्रयं पितृबंधुत्रयं मातृबंधुत्रयमिति नव बंधवो ग्राह्याः॥ते यथा॥ "आत्मपितृष्वसुः पुत्रा आत्ममातृ-

ष्वसुः सुताः ॥ आत्ममातुलपुत्राश्च विज्ञेया आत्मबांधवाः ॥ पितुः पितृष्वसुः पुत्राः पितुर्मातृष्वसुः सुताः ॥ पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबांधवाः ॥ मातुः पितृष्वसुः पुत्रा मातुर्मातृष्वसुः सुताः ॥ मातुर्मातुलपुत्राश्च विज्ञेया मातृबांधवाः ॥" इति ॥ पितृष्वस्रादिकन्यानां तु विवाहितानां मरणे तद्बंधुवर्गस्त्वेकेनेति वचनबलादेकाहोऽनूढानां तु मरणे स्नानमात्रमिति निर्णयसिंध्वाशयः ॥ नागोजीभट्टास्तु बंधुत्रयवाक्ये पुत्रपदं कन्योपलक्षकमित्याहुः ॥ तन्मते पितृष्वस्रादिकन्यानामूढानां मरणे पक्षिणी ॥ अनूढानामेकाह इत्यादि ॥ पितृष्वस्रादिकन्याभिस्तु बंधुत्रयमरणे स्नानमात्रं कार्यमिति सिंध्वाशयेन सिध्यति ॥ भट्टमते तु पुत्रपदवत्तद्वाक्यस्थात्मपदस्यापि कन्यापरत्वापत्त्या कन्याभिरपि बंधुत्रयाशौचं कार्यमित्यापतति ॥ तत्र च बहुशिष्टाचारविगानमिति सिंध्वाशयो युक्तो भाति ॥ अत्रेदं तत्त्वम् ॥ देवदत्तीयबंधुनवकमध्ये आत्मबंधुत्रये संबंधसाम्यात्परस्परमाशौचम् ॥ अवशिष्टबंधुषट्के तु बंधुषट्कमरणे देवदत्तस्याशौचं देवदत्तस्य मरणे तु बंधुषट्कस्य नाशौच संबंधाभावादिति सुधीभिरूह्यम् ॥

## अथ दत्तकादेः ।

दत्तकस्य मरणे पूर्वापरपित्रोस्त्रिरात्रं सपिंडानामेकाहमाशौचम् ॥ नीलकंठीये दत्तकनिर्णये तूपनीतदत्तकमरणादौ पालकपित्रादिसपिंडानां दशाहादिकमेवाशौचमित्युक्तम् ॥ दत्तकेनापिपूर्वापरपित्रोर्मृतौ त्रिरात्रम् ॥ पूर्वापरसपिंडानां मरणे एकाहः ॥ पित्रोरौर्ध्वदेहिककरणे तु कर्मांगं दशाहमेव ॥ दत्तकस्य पुत्रपौत्रादेर्जनने मरणे वा पूर्वापरसपिंडानामेकाहः ॥ एवं पूर्वापरसपिंडमरणादावपि दत्तकपुत्रपौत्रादेरेकाहः ॥ इदं सपिंडसमानोदकभिन्ने दत्तीकृते ज्ञेयम् ॥ सगोत्रसपिंडे सोदके च दत्तीकृते यथाक्रमं दशाहं त्रिरात्रं च यथाप्राप्तं भवत्येव ॥

## अथाचार्यादिमरणे ।

आचार्ये मृते त्रिरात्रम् ॥ ग्रामांतरे मृते पक्षिणी ॥ उपनीय वेदाध्यापक आचार्यः ॥ स्मार्तकर्मनिर्वाहकोप्याचार्यः ॥ आचार्यभार्यासुतयोर्मरणे एकाहः ॥ मंत्रोपदेशकगुरुमरणे त्रिरात्रम् ॥ ग्रामांतरे पक्षिणी ॥ शास्त्राध्यापको व्याकरणज्योतिःशास्त्राद्यंगाध्यापकश्चानूचानसंज्ञकस्तन्मरणे एकाहः ॥ सकलवेदाध्यापकगुरुमरणे पक्षिणी ॥ वेदैकदेशाध्यापक उपाध्यायस्तन्मरणे एकाहः ॥ शिष्यस्योपनीयाध्यापितस्य मृतौ त्रिरात्रम् ॥ निवृत्ताध्ययनस्य मृतौ पक्षिणी ॥ परोपनीतस्य बहुकालमध्यापितस्य मरणे एकाहः ॥ सहाध्यायिमृतौ पक्षिणी ॥ ऋत्विजि अनिवृत्तर्त्विक्कर्मणि मृते त्रिरात्रम् ॥ ग्रामांतरे पक्षिणी ॥ कर्मनिवृत्तौ ग्रामांतरे एकाहः ॥ एकग्रामे पक्षिणी ॥ एवं याज्यमरणेपि ॥ सार्थवेदाध्यायी श्रौतस्मार्तकर्मनिष्ठ च

श्रोत्रियस्तयोर्मरणे मैत्रीगृहानंतर्यादिसंबंधे त्रिरात्रम् ॥ एकतरसंबंधे पक्षिणी ॥ संबंधाभावे एकाहः ॥ सवर्णमित्रमरणे एकाहः ॥ यतिमरणे सर्वसपिंडानां स्नानमात्रम् ॥ स्वगृहे उदासीनासपिंडमरणे एकाहः ॥ स्वाधिष्ठितस्वगृहेऽसपिंडमरणे त्र्यहम् ॥ आशौचप्रयोजकसंबंधिनि स्वगृहमृते त्रिरात्रम् ॥ ग्रामाधिपदेशाधिपादेर्मृतौ सज्योतिः ॥ दिवामरणे रात्रौ स्नानाच्छुद्धिः रात्रिमरणे दिवाशुद्धिरिति सज्योतिःपदार्थः ॥ पक्षिणीपदार्थस्तु दिवामरणे स दिवसः सा रात्रिर्द्वितीयादिवसनक्षत्रदर्शनपर्यंतमिति ॥ आगामिवर्तमानाहर्युक्तायां निशि पक्षिणीत्यनेन आगामिवर्तमानाहर्द्वययुता मध्यगता रात्रिः ॥ रात्रिमरणे सा रात्रिस्तदुत्तरमहोरात्रिश्चेति पक्षिणी ॥ केचित्तु रात्रिमरणेपि मरणदिनाद्वितीयादिनस्थनक्षत्रदर्शनपर्यंतमेव पक्षिणीपदार्थ इत्याहुः ॥ एवमतिक्रांतविषये दिवारात्रौ वा मरणज्ञानानुसारेण पक्षिणीव्यवस्था योज्या ॥ आचार्यमातुलादीनां त्रिरात्राद्याशौचमन्यस्मिन्नंत्यकर्मकर्तरि ज्ञेयम् ॥ शिष्यादीनामंत्यकर्मकर्तृत्वे तु दशाहाद्येव ॥

## अथ ग्रामे शवस्थितौ विचारः ।

ग्राममध्ये यावच्छवस्तिष्ठति तावद्ग्रामस्याशौचम् ॥ नगरे तु नैव ॥ ग्रामनगरलक्षणान्यन्यत्र ॥ गृहे गवादिपशुमृतौ यावच्छवः तिष्ठेत्तावदाशौचम् ॥ द्विजगृहे शुनो मृतौ गृहस्य दशरात्रमाशौचम् ॥ शूद्रमरणे मासम् ॥ पतितमृतौ मासद्वयम् ॥ म्लेच्छादिमृतौ मासचतुष्टयम् ॥ दासानां गृहजातक्रीतऋणमोक्षितलब्धत्वादिप्रकाराणां स्वामिमरणे स्वजातीयाशौचम् ॥ युद्धे शस्त्रघातेन सद्योमृते स्नानमात्रं नाशौचमंत्यकर्मापि दशाहादिकं सद्य एव कर्तव्यम् ॥ युद्धेक्षतेन कालांतरे मरणे एकाहः ॥ त्र्यहादूर्ध्वं युद्धक्षतेन मरणे पराङ्मुखहते युद्धे कपटेन हते च त्रिरात्रम् ॥ युद्धक्षतेन सप्तरात्रादूर्ध्वं मृतौ दशाह इत्याहुः ॥ शिष्टास्तु युद्धेहतस्य सद्यः शौचादिकं लोकविद्विष्टत्वान्न वदंति ॥ प्रयागादौ काम्यमरणे स्नानमात्रम् ॥ प्रायश्चित्तार्थमग्न्यादिमरणे एकाहः ॥ महारोगपीडाक्षमाणां जलादिप्रवेशे त्रिरात्रम् अत्रापि न शिष्टाचारसंमतिः॥एवं कारागृहे मृतस्यैकरात्रमपि ॥

## अथातिक्रांताशौचम् ।

तत्र जननाशौचेतिक्रांताशौचं नास्ति ॥ पितुः स्नानमात्रं तत्रापि भवति ॥ मृताशौचेप्यनुपनीतमरणादिनिमित्तेषु त्रिरात्रैकरात्रेषु मातुलादिपरगोत्रीयमरणनिमित्तकेषु पक्षिणी त्रिरात्रादिषु चातिक्रांताशौचं नास्ति ॥ तत्रोढकन्यायाः पित्रोर्मरणे त्रिरात्रेऽतिक्रांतेपि दशाहांतरुत्थहं तदूर्ध्वं वत्सरांतरेपि पक्षिणीत्युक्तम् ॥ एवं सोदकादिविषयत्रिरात्रादिष्वतिक्रांताशौचं न स्नानमात्रं त्वत्रापि कालांतरेपि भवत्येव किंतु दशाहादिमृताशौचविषयमेवातिक्रांताशौचं कर्तव्यम् ॥ तत्र दशाहाद्याशौ-

चानां त्रिरात्रादीनां च तत्तदाशौचमध्ये ज्ञानेऽवशिष्टदिनैः शुद्धिः पुत्रादेरपि शेषदिनैरेव शुद्धिः ॥ अंत्यकर्मापि शेषदिनैरेव समापनीयम् ॥ एवमस्थिपर्णशरसंस्कारोपि शेषेणैव॥ एवं सोदकत्रिरात्रेपि शेषेण शुद्धिः ॥ त्रिरात्राद्युत्तरं तु दशाहान्न्यूनाशौचानां दशाहमध्ये ज्ञातेपि नातिक्रांताशौचं किंतु स्नानमात्रम् ॥ मातापित्रोर्मरणे दूरदेशेपि वत्सरांतरेपि श्रवणे पुत्रस्य श्रवणप्रभृति दशाहादिपूर्णमेवाशौचम् ॥ दंपत्योः परस्परं देशांतरे कालांतरेपि पूर्णं दशाहमेव ॥ सपत्नीनां परस्परं देशकालविशेषानपेक्षं दशाहमेव ॥ सापत्नमातुर्मरणे पुत्रस्य दशाहोर्ध्वं देशकालानपेक्षं त्रिरात्रम् ॥ औरसपुत्रमृतौ मातापित्रोर्वत्सरांतरेपि त्रिरात्रम् ॥ दशाहोर्ध्वमेकदेशे सपिण्डमरणे ज्ञाते मासत्रयपर्यंतं त्रिरात्रम् ॥षण्मासपर्यंतं पक्षिणी ॥ नवमासपर्यंतमेकरात्रम् ॥ ततो वर्षपर्यंतं सज्योतिः स्नानमात्रं वा माधवमते पक्षत्रयपर्यंतं त्रिरात्रम् ॥ षण्मासपर्यंतं पक्षिणी ॥ वर्षपर्यंतमेकरात्रम् ॥ वर्षोर्ध्वं स्नानमात्रमिति ॥ अत्रापदनापद्विषयत्वेन व्यवस्था ॥ अथ देशांतरे सपिंडमरणे दशाहोर्ध्वं ज्ञाते पक्षत्रयपर्यंतं त्रिरात्रम् ॥ षण्मासपर्यंतं पक्षिणी ॥ नवमासपर्यंतमेकाहः ॥ वर्षपर्यंतं सज्योतिरिति माधवमतम् ॥ विज्ञानेश्वरस्तु देशांतरे सपिंडमरणे दशाहोर्ध्वं ज्ञाते स्नानमात्रमित्याह ॥ अत्र माधवमतमेव युक्तम् ॥ अतिक्रांताशौचं वयोवस्थानिमित्तकाशौचं च सर्ववर्णसाधारणम् ॥

## अथ देशांतरलक्षणानि ।

देशांतरं तु विप्रस्य विंशतियोजनात्परम् ॥ क्षत्रियादेः क्रमेण चतुर्विंशत्रिंशत्षष्टियोजनैः ॥ केचिद्विप्रस्य त्रिंशद्योजनोत्तरं देशांतरमाहुः ॥ भाषाभेदसहितमहागिरिणा भाषाभेदसहितमहानद्या वा व्यवधानमपि देशांतरम् ॥ यत्तु केचिद्भाषाभेदरहितमपि गिरिनदीव्यवधानं देशांतरमाहुः ॥ तद्योजनगतविंशत्यादिसंख्यायास्त्रिचतुरादिन्यूनत्वेपि देशांतरत्वसंपादकतया योज्यमिति भाति ॥ अन्यथा महानदीपरपूर्वतीरवासिनामेकयोजनमध्येपि देशांतरत्वापत्तेः ॥ अत्र सगोत्रविषयाशौचान्येव भार्यापतिपुत्रादिभिः सर्वैरनुष्ठेयानि ॥ यानि तु मातुलत्वभगिनीत्वादिप्रयुक्तानि भिन्नगोत्राशौचानि तेषु जायापतिपुत्रादिमध्ये यत्संबंधियत्तत्तैनैवानुष्ठेयं न सर्वैः ॥ रात्रौ जननमरणे रात्रौ मरणज्ञाने वा रात्रिंत्रिभागां कृत्वा प्रथमभागद्वये पूर्वदिनं तृतीयभागे उत्तरदिनमारभ्याशौचम् ॥ यद्वार्धरात्रात्प्राक् पूर्वदिनम् ॥ परतः परदिनम् ॥ अत्र देशाचारादिना व्यवस्था ॥

## अथाहिताग्नेर्विचारः ।

आहिताग्नेर्मंत्रवद्दाहदिनमारभ्य पुत्रादिभिराशौचं कार्यम् ॥ अत्राहिताग्निपदेन श्रौताग्नित्रयवान्ग्राह्यः ॥ तद्भिन्नो गृह्याग्निमानप्यनाहिताग्निपदेन ग्राह्यः ॥ आहि-

ताग्नेर्विदेशमरणे मंत्रवदाहात्पूर्वं पुत्रादीनामाशौचं संध्यादिनित्यकर्मलोपश्च नास्ति ॥ मंत्रवदाहमारभ्य तु पुत्रादिसपिंडानां दुहितृदौहित्रादिभिन्नगोत्राणां चाशौचं भवत्येव न त्वतिक्रांतनिमित्तक आशौचाभावस्तदृध्रासो वा ॥ अत एवाहिताग्नेः पर्णशरदाहेपि दशाहमेव देशांतरे कालांतरेपि सिध्यति ॥ अनाहिताग्नेर्मरणादिनादारभ्य पुत्रादिभिराशौचं कार्यम् ॥ अनाहिताग्नेर्देशांतरे मरणेऽतिक्रांताशौचं मरणश्रवणानन्तरमेव पूर्वोक्तव्यवस्थया कार्यम् ॥ अनाहिताग्नेरस्थिदाहपर्णशरदाहयोस्तु पूर्वमगृहीताशौचयोर्भार्यापुत्रयोर्दशाहमेव ॥ गृहीताशौचयोस्तु संस्कारकर्तृभिन्नयोर्दाहकाले त्रिरात्रम् ॥ सपत्न्योर्मिथश्चैवम् ॥ पत्नीसंस्कारे पत्युश्चैवम् ॥ एतद्भिन्नसपिंडानां तु पूर्वमगृहीताशौचानामनाहिताग्निसंस्कारकाले त्रिरात्रम् ॥ गृहीताशौचानां तु सपिण्डानां दाहकाले स्नानमात्रम् ॥ इदं सपिंडानां त्रिरात्रादिकं पुत्रादेर्दशाहादिकं च दशाहोर्ध्वं संस्कारकरणे ज्ञेयम् ॥ दशाहमध्ये संस्कारकरणे तु शेषदिनैरेव शुद्धिः कर्मसमाप्तिश्च ॥ आहिताग्नेरेव दशाहमध्येपि शरीरदाहेऽस्थिदाहे पर्णशरदाहे वा शेषेण न शुद्धिः समंत्रकदाहदिनस्यैव प्रथमदिनत्वादित्युक्तम् ॥ दशाहोर्ध्वं देशांतरमृतानाहिताग्निवार्ताश्रवणदिनात्कृतत्रिरात्राशौचानां सपिण्डानां चतुर्थादिदिनेषु संस्कारारंभे दाहकाले स्नानम् ॥ अगृहीताशौचानां त्रिदिनमेव ॥ भार्यापुत्रादेः श्रवणदिनादारभ्य दशाहम् ॥ द्वितीयादावन्यारंभे चतुर्थे दिने सपिंडशुद्धिः ॥ भार्यादेर्दशाहमेव श्रवणदिनादित्यूह्यम् ॥

## अथ देशांतरगतवार्ताप्रतीक्षाकालव्यवस्था ।

देशांतरगतस्य द्वादशवर्षादिप्रतीक्षोत्तरं पर्णशरदाहेष्येवमेव ॥ पुत्रादेः सपिंडानां च दशरात्रं त्रिरात्रादिकमूह्यम् ॥ प्रतीक्षा च यदारभ्य वार्ता न श्रूयते तदारभ्य पंचदशवर्षाणि मातापित्रोः ॥ अन्येषां पूर्वे वयसि विंशतिः ॥ मध्यमे पंचदश ॥ उत्तरे वयसि द्वादश ॥ प्रतीक्षायुक्त्यादिभिर्मरणनिश्चयासंभवे कार्या ॥

## अथाशौचसंपाते निर्णयः ।

दशाहमृताशौचे दशाहस्य ततो न्यूनस्य वा ॥ मृताशौचस्य संपाते पूर्वप्रवृत्ताशौचसमाप्त्या शुद्धिः ॥ १ ॥ दशाहजननाशौचे दशाहं न्यूनं वा जननाशौचं पतति चेत्पूर्वप्रवृत्तसमाप्त्या शुद्धिः ॥ २ ॥ दशाहमृताशौचे जननाशौचं दशाहं त्र्यहं वा संपतेत्तदा मृताशौचसमाप्त्या शुद्धिः ॥ ३ ॥ त्र्यहमृताशौचे त्र्यहं ततोन्यूनं वा मृताशौचं त्र्यहं जननाशौचं वा संपतेत्तदा पूर्वप्रवृत्तांते शुद्धिः ॥ ४ ॥ त्रिदिनजननाशौचे त्रिदिनजननाशौचसंपाते पूर्वांते शुद्धिः ॥ ५ ॥ पक्षिणीमृताशौचे पक्षिण्येकाहान्यतरमृतकपाते पूर्वांते शुद्धिः ॥ जननाशौचे न समेनाधिकेन वा मृताशौचं नापैति ॥ पक्षिण्यादिरूपमृतकेन त्रिदिनं दशाहं च जननाशौचं त्रिदि-

नमृताशौचेन दशाहं जाताशौचं च नापैतीति बहवः ॥ कश्चित्तु न्यूनेनापि मृतके नाधिकस्यापि जाताशौचस्य निवृत्तिरित्याह ॥ त्रिदिनमृताशौचेन दशाहं जाताशौचं मृतकं च न निवर्तते ॥ एवं पक्षिण्या त्रिदिनमेकाहेन पक्षिणी च नापैति ॥ त्रिदिनजाताशौचेन दशाहं जातशौचं न निवर्तते ॥ अत्रेदं बोध्यम् ॥ संपातो नामाशौचिनामेकाशौचित्वज्ञाने पराशौचित्वज्ञानम् ॥ तेन पूर्वाशौचमध्ये उत्पन्नमपि पराशौचं पूर्वाशौचांते ज्ञातं चेत्पूर्वेण न निवर्तते संपाताभावात् ॥ पूर्वत्वपरत्वे तूत्पत्तिकृते न ज्ञानकृते ॥ तेन पूर्वोत्पन्नस्य परोत्पन्नज्ञानोत्तरं ज्ञानेपि पूर्वोत्पन्नेन परोत्पन्नं तन्मध्ये ज्ञातं निवर्तत एव ॥ संपात एव ज्ञानकृतो न तु पूर्वत्वादिकमिति सिद्धांतादिति ॥ दशाहांत्यरात्रौ यदि निवृत्तियोग्यदशाहसंपातस्तदा दिनद्वयमधिकं कार्यम् ॥ दशमरात्रेश्चतुर्थयामे निवृत्तियोग्यदशाहांतरसंपाते दिनत्रयमधिकम् ॥ दशाहांत्यरात्रौ चतुर्थयामे वा निवृत्तियोग्यत्रिरात्राशौचपाते तु पूर्वेण शुद्धिर्नद्व्यहादिवृद्धिः॥ एवं त्र्यहाद्याशौचानां निवृत्तियोग्यानां परस्परं तृतीयरात्रौ तृतीयरात्रिशेषे वा संपाते पूर्वेण शुद्धिर्न द्व्यहादिवृद्धिः॥ वर्द्धितद्वित्रिदिने दशाहांतरपाते पूर्वेण द्विरात्रेण त्रिरात्रेण वा न निवृत्तिः ॥ वर्धितद्विरात्रेण पक्षिण्या निवृत्तिः वर्धितत्रिरात्रेणान्यत्रिरात्रस्य निवृत्तिः॥ यदा तु भागिनेयादिर्मातुलादेरंत्यकर्म करोति तदा तन्निमित्ते दशाहाद्याशौचे सति यदि सपिंडमरणनिमित्तं दशाहादिकं पतति तदा तस्य पूर्वेण शुद्धिर्न भवति ॥ कर्मांगाशौचस्यास्पृश्यतामात्रप्रयोजकत्वे न संध्यादिकर्मलोपाभावे न लघुत्वाल्लघुना गुरोर्निवृत्त्यभावात् ॥ एवं त्रिरात्रपातेपि जननत्रिरात्रस्य निवृत्तिः ॥ मृतकत्रिरात्रस्य नेत्यादिकमूह्यम् ॥ पुत्रस्य सपिंडाशौचेन मातापित्रोराशौचं नापैति॥ एवं भार्याया भर्त्राशौचं नापैति ॥ केचित्पत्युर्भार्याशौचमपि नापैतीत्याहुः ॥ मात्राशौचमध्ये पित्राशौचपाते पूर्वांते शुद्धिः ॥ स्मृत्यर्थसारादयस्तु पितुः संपूर्णमेवाशौचं कार्यमित्याहुः ॥ पित्राशौचे मातुर्मरणे पित्राशौचं समाप्य पक्षिणीमधिकां कुर्यात् ॥ इयं पक्षिणीवृद्धिर्दशमरात्रेरर्वाङ्मरणे तज्ज्ञाने वा भवति ॥ दशमरात्रौ तद्रात्रिचतुर्थयामे वा मातृमरणादौ तु द्विरात्रत्रिरात्रावेव न पक्षिणी ॥ मातुरनाहिताग्नेर्भर्तुर्मरणाद्वितीयादिदिनेषु सहगमनेऽपि नाधिका पक्षिणी ॥ भर्त्राशौचांते शुद्धिः॥ नवश्राद्धपिण्डादिकं युगपत्समापयेत् ॥ भर्त्राशौचोत्तरमन्वारोहणे त्रिरात्रम् ॥ एतत्त्रिरात्रं सपिंडानामेव ॥ पुत्रस्य तु मात्राशौचं संपूर्णमेवेति भाति ॥ सहगमने सपिंडानामपि पूर्णमेवाशौचम् ॥ त्रिरात्रं त्वनुगमनपरमिति गौडाः ॥ इदमेव युक्तम् ॥ इयं संपाते पूर्वेण शुद्धिः सूतिकाया अग्निदस्य च नास्ति ॥ यदा देशांतरमृतपितुर्वार्तां श्रुत्वा पुत्रैर्दशाहमाशौचं कृतं संस्कारस्त्वस्थ्यलाभादिहेत्वंतरवशान्न कृतो दशाहोत्तरं च संस्कार आरब्धस्तत्र संस्कारकर्तुः पुत्रस्य कर्मांगं दशाहमाशौचं तदाशौचमध्ये सपिंडमरणे पूर्वांते शुद्धिर्न मातुर्मरणेपि नाधिका पक्षिणी॥

किंतु सपिंडाशौचं मात्राशौचं च संपूर्णमेव कार्यम् ॥ अतिक्रांतकालाद्धर्तमानस्य बलवत्त्वात् ॥ एवं द्वादशवर्षादिप्रतीक्षोत्तरं पुत्रादिभिः क्रियमाणपित्रादिसंस्कारांगदशाहाशौचेऽन्यसपिंडादिमरणेपीति पूर्वशेषेण शुद्धेरपवादः सिंधावुक्तः ॥ जननाशौचे मृताशौचे वा मृतकसंपाते पिंडदानाद्यंत्यकर्मप्रतिबंधो नास्ति ॥ मृताशौचे जाताशौचे वा पुत्रजनने जातकर्मादिप्रतिबंधो नास्तीत्येके ॥ पूर्वाशौचांते जातकर्मेत्यन्ये ॥ मातुर्याधिका पक्षिणी तन्मध्ये पितुर्महैकोद्दिष्टश्राद्धं वृषोत्सर्गं शय्यादानादिकं च कुर्यात् ॥ अन्यसपिंडाशौचे त्वेकादशाहकृत्यं न कार्यमिति बहवः ॥ कार्यमिति कश्चित् ॥

## अथ शवस्पर्शानुगमनादिसंसर्गाशौचे ।

संसर्गाशौचे नित्यकर्मानधिकारो नास्ति ॥ किंत्वस्पृश्यत्वमात्रम् ॥ तदपि तदीयभार्यापुत्रादीनां नास्ति ॥ किंतु संसर्गकर्तुरेव ॥ एवं तद्गृहवर्तितत्स्वामिकान्नादिद्रव्याणां नाग्राह्यत्वम् ॥ तत्र स्वजातीयशवस्पर्शे सज्योतिराशौचम् ॥ हीनवर्णस्पर्शेऽधिकं कल्प्यम् ॥

## अथानुगमने ।

सजातीयस्य विजातीयस्य शवस्यानुगमने स्नात्वाग्निस्पर्शं घृतप्राशनं च कृत्वा पुनः स्नात्वा प्राणायामं कुर्यात् ॥ विप्रस्य शूद्रानुगमने त्रिरात्रं नद्यां स्नानं घृतप्राशनं प्राणायामशतं च नात्र नित्यकर्मलोपः ॥

## अथ निर्हरणे ।

स्नेहेन सजातीयशवनिर्हरणे तदन्नाशने तद्गृहवासे च दशाहः ॥ तद्गृहवासमात्रेन्नाशनमात्रे वा त्रिरात्रम् ॥ अन्नाशनगृहवासयोरभावे एकाहः ॥ ग्रामांतरस्थं शवं निर्हृत्य ग्रामांतरवासे सज्योतिः ॥ मौल्यग्रहणेन सजातीयनिर्हरणे दशाहः ॥ विजातीयनिर्हरणे शवजातीयम् ॥ भृतिग्रहणेन हीनजातीयनिर्हरणे शवजातीयद्विगुणम् ॥ सोदकशवनिर्हरणेपि दशाहः ॥ शवालंकारकरणे पादकृच्छ्रम् ॥ अज्ञानादुपवासः ॥ अशक्तौ स्नानम् ॥ धर्मार्थमनाथद्विजशवनिर्हरणे दाहकरणे चाश्वमेधादिपुण्यं स्नानमात्राच्छुद्धिः ॥ अग्निस्पर्शो घृताशनं चात्रापि ॥ धर्मार्थमपि शूद्रशवनिर्हरणे द्विजस्यैकाहः ॥ धर्मार्थमनाथशवानुगमनादौ न दोषः ॥ ब्रह्मचारिणस्तु पितृमातृमातामहाचार्योपाध्यायभिन्नशवनिर्हरणादौ व्रतलोपः ॥ पूर्वोक्तरीत्याऽऽशौचं च ॥ ततस्तेन कृच्छ्रप्रायश्चित्तं पुनरुपनयनं च कार्यम् ॥ पित्रादेर्निर्हरणेपि ब्रह्मचारिणाशौचिनामन्नं न भक्ष्यम् ॥ तेषां स्पर्शोपि न कार्यः ॥ अत्रापि नित्यकर्मलोपो न ॥ अथ दाहादौ समोत्कृष्टवर्णप्रेतस्य स्नेहादिना दाहोदकदानादि-

सकलौर्ध्वदेहिककरणे तत्तज्जात्याशौचम् ॥ तदंते स्नेहलोभाद्यनुसारेण गुरुलघुप्राजापत्यादीनां त्रयम् ॥ स्नेहादिना सवर्णानां दाहमात्रकरणे तद्गृहवासे त्रिरात्रम् ॥ तदन्नभक्षणे दशरात्रम् ॥ तदुभयाभावे एकाहः ॥ हीनवर्णेनोत्तमवर्णस्य दाहमात्रकरणे शवजात्याऽऽशौचम् ॥ भृतिग्रहणेन सवर्णस्य दाहमात्रकरणेपि दशाहाद्येव ॥ मौल्येनोत्तमवर्णदाहे द्विगुणम् ॥ उत्तमेनाधमवर्णदाहनिर्हरणकरणे तज्जात्याशौचं तदंते क्रमेण द्विगुणं त्रिगुणं चतुर्गुणं च प्रायश्चित्तम् ॥ मौल्येन हीनवर्णदाहादौ तु प्रायश्चित्तमाशौचं चोक्तापेक्षया द्विगुणम् ॥ धर्मार्थसमोत्कृष्टवर्णप्रेतस्य दाहादिसकलौर्ध्वदेहिककरणेपि नाशौचं नित्यं पिंडदानाद्यनंतरं स्नानमात्राच्छुद्धिः ॥ द्विजेन शूद्रस्य धर्मेणापि दाहादि न कार्यम् ॥

## अथ ब्रह्मचारिणः भिन्नस्य ।

अथ ब्रह्मचारिणा पितृमातृमातामहादीनामन्याधिकार्यभावे दाहाद्यंत्यकर्म कार्यम् ॥ तदा कर्मांगं दशाहमस्पृश्यत्वलक्षणमाशौचं च कार्यम्॥ तथापि तेषामाशौचिनामन्नं ब्रह्मचारिणा न भोक्तव्यम् ॥ आशौचिस्पृष्टतया वासश्च न कार्यः ॥ तदुभयकरणे प्रायश्चित्तं पुनरुपनयनं च ॥ ब्रह्मचारिणा पूर्वोक्तपित्रादिभिन्नानां दाहाद्यंत्यकर्मकरणे कृच्छ्रत्रयप्रायश्चित्तं पुनरुपनयनं चाशौचांते कार्यम् ॥ पित्रादेर्दाहमात्रकरणे एकाहमाशौचं कार्यम् ॥ अत्र सर्वत्र ब्रह्मचारिणः संध्याग्निकार्यादिकर्मलोपो न ॥ ब्रह्मचारिभिन्नस्यापि दाहादिनिमित्तकसंसर्गाशौचे ब्रह्मयज्ञादिनित्यकर्मलोपो नेत्युक्तम् ॥ तत्र देवपूजावैश्वदेवादिकमन्येन कारणीयम् ॥ स्वयं कर्तुं योग्यं तु स्वैनैव कार्यम् ॥ ब्रह्मचारिणः पित्राद्यंत्यकर्माकरणे तु पित्रादिमरणेप्याशौचं न ॥ समावर्तनोत्तरं पूर्वमृतानां पित्रादिसपिंडानां त्रिरात्रमाशौचं कार्यम् ॥

## अथ रोदने आशौचादि ।

विप्रादिभिः सवर्णमरणविषयेऽस्थिसंचयनात्पूर्वं रोदने स्नानम् ॥ तदुत्तरमाचमनम् ॥ विप्रस्य शूद्रविषयेऽस्थिसंचयनात्प्राक् त्रिरात्रं तदुत्तरमेकरात्रम् ॥ शूद्रस्य विषये तद्गृहवासादिसंबंधेऽस्थिसंचयात्प्रागेकरात्रं तदूर्ध्वं स्नानम् ॥ सपिंडानां त्वनुगमनरोदनादौ न दोषः ॥ नात्रापि कर्मलोपः ॥ अत्र सर्वत्र यस्य यावानाशौचकालस्तं निर्वाह्य स्नात्वैव विशुध्यति ॥ न तु स्नानं विना तावत्कालमात्रातिक्रमेण शुद्धिः ॥

## अथांत्यकर्मकर्तुः स्त्रीसंगे ।

अंत्यकर्मकर्तुरस्थिसंचयनात्प्राक् स्त्रीसंगे चांद्रायणं प्रायश्चित्तम् ॥ ऊर्ध्वं प्राजापत्यत्रयम् ॥ अन्येषां मृताशौचिनां संचयनात्प्राक् संगमे त्रिरात्रमुपवासः ॥ ऊर्ध्वमेकरात्रम् ॥

## अथाशौचान्नभक्षणे ।

असगोत्रोऽनापदि बुद्धिपूर्वं सकृदप्याशौचिस्वामिकं पक्वमन्नं यस्मिन्दिने भुंक्ते तद्दारभ्य तेन यावत्तेषामाशौचमवशिष्टं तावदाशौचं कार्यम् ॥ आशौचांते च विप्राशौचे सांतपनं प्रायश्चित्तम् ॥ शूद्राशौ चांद्रायणम् ॥ क्षत्रियादेः कलावभावान्न लिख्यते ॥ क्वचिल्लेखस्तु व्युत्पादनमात्रार्थो नेदानीमुपयुज्यते इति प्राय उपेक्ष्यते ॥ मत्याभ्यासे विप्रशूद्राशौचयोः क्रमेण मासं षण्मासं कृच्छ्रादिव्रताचरणम् ॥ अमत्या भोजने यावदन्नपाकमाशौचं क्रमेणैकरात्रं सप्तरात्रं चोपोषणं दशशतं च प्राणायामाः ॥ अमत्याभ्यासे द्विगुणं आपद्यमत्या भोजने तदहराशौचमेकः प्राणायामः ॥ शूद्राशौचेऽष्टाधिकसहस्रगायत्रीजपः ॥ ज्ञानत आपदि त्रिरघमर्षणमष्टोत्तरसहस्रगायत्रीजपः ॥ शूद्राशौचे प्राजापत्यम् ॥ शूद्रस्य द्विजाशौचे स्नानं पंचगव्याशनं च ॥ सर्वमिदं जननाशौचे न्यूनं योज्यम् ॥ एवमाहिताग्न्याशौचेपि न्यूनमिति स्मृत्यर्थसारे ॥ सर्वमिदमाशौचिस्वामिकान्नभोजने ॥ यदा तु तदस्वामिकमाशौचिस्पृष्टमात्रमन्नं भुंक्ते तदा मत्या भोजने कृच्छ्रम् ॥ अमत्यार्द्धमिति स्मृत्यर्थसारे उक्तम् ॥ आशौचिस्पृष्टाशौचिस्वामिकान्नभोजी तु तत्स्वामिकान्नाशननिमित्तं तत्स्पृष्टान्नाशननिमित्तं चेति प्रायश्चित्तद्वयं समुच्चयेन कुर्यात् ॥ आशौचिस्वामिकामान्नप्रतिग्रहे तूक्तप्रायश्चित्तार्धम् ॥ आशौचं तु नास्ति ॥ दातृभोक्तृभ्यामुभाभ्यामज्ञाते जनने मरणे वा न दोषः ॥ अन्यतरेण ज्ञाते दोषः ॥ तत्र दातुर्ज्ञाने भोक्तुरज्ञाने भोक्तुरल्पं प्रायश्चित्तम् ॥ दातुरज्ञानेपि भोक्तुर्ज्ञाने पूर्णमेव ॥ भोजननिमित्तकाशौचेपि कर्मलोपो न ॥

## अथ स्वल्पसंबंधेपि ।

अथ तु कथमपि स्वल्पसंबंधयुक्ते स्नानं वासोयुतं स्यादिति त्रिंशच्छ्लोकी ॥ स्मृत्यर्थसारेप्येवम् ॥ अयमस्यार्थः ॥ स्वल्पेनापि एकाहाद्याशौचप्रयोजकेन संबंधेन युक्ते शालकजामात्रादौ मृते सचैलं स्नानं कार्यम्॥सर्वत्र गुरुणा लघुना वा मृताशौचस्य प्राप्तिकाले समाप्तिकाले च स्नातव्यमिति यावत् ॥ अथवा स्वल्पैर्दशाहभिन्नपक्षिणीत्रिदिनाद्याशौचप्रयोजकैः संबंधैर्युक्ते बंधुत्रयमातुलानुपनीतसपिंडादौ मृते देशांतरे कालांतरे स्नानं भवत्येव ॥ तथा च यस्य सन्निहितकाले आशौचप्राप्तिस्तस्यातिक्रांतकाले स्नानम् ॥ यस्य तु सन्निहितकालेपि स्नानमात्रं तस्य कालांतरे स्नानमपि नेत्यर्थः ॥ यद्वा स्वल्प आशौचप्रयोजकसंबंधभिन्नः संबंधः ॥ यथा शालकसुतत्वमूढकन्यायाः पितृव्यतत्पुत्रत्वादिभगिन्या भ्रातृपुत्रत्वादितद्युक्ते आशौचाभावेपि स्नानमात्रं भवत्येव ॥ यत्किंचित्संबंधे आशौचाभावेपि स्नानमात्रं सन्निधौ सर्वत्र कार्यमित्यर्थः ॥ पक्षत्रयमपीदं शिष्टाचारे दृश्यते इति युक्तं भाति ॥

## अथाशौचापवादः ।

स पंचधा ॥ कर्तृतः १ कर्मतः २ द्रव्यतः ३ मृतदोषतः ४ विधानत इति ५ तत्र कर्तृतो यथा ॥ यतीनां ब्रह्मचारिणां च सपिंडजननमरणयोर्नाशौचम् ॥ मातापितृमरणे तु यतिब्रह्मचारिणोः सचैलं स्नानमात्रं भवत्येव ॥ ब्रह्मचारिणः समावर्तनोत्तरं ब्रह्मचर्यदशायां मृतानां पित्रादिसपिण्डानां त्रिरात्रमाशौचमुदकदानं च कार्यम् ॥ अनुगमननिर्हरणनिमित्तकं त्वाशौचं ब्रह्मचारिणोप्यस्त्येव ॥ पित्राद्यंत्यकर्मकरणे ब्रह्मचारिण आशौचमप्यस्त्येव ॥ आरब्धप्रायश्चित्तानां प्रायश्चित्तानुष्ठानसमये आशौचं न समाप्ते तु प्रायश्चित्ते त्रिरात्रमतिक्रांताशौचम् ॥ कृतकर्मागनांदीश्राद्धानां तत्कर्मसमाप्तिपर्यंतं तत्कर्मोपयोगिकार्ये आर्त्यादिसंकटे आशौचं न ॥ जाताशौचमृताशौचवतोर्मरणसमयप्राप्तौ नाशौचम् ॥ तेन दानादिकं सति वैराग्ये आतुरस्य संन्यासोपि भवतीति सिंध्वादयः ॥ देशविप्लवदुर्भिक्षादिमहापदि सद्यः शौचम् ॥ आपदपगमे आशौचावशेषे अवशिष्टाशौचमस्त्येव ॥

## अथ कर्मतः ।

अन्नसत्रिणामन्नादिदानेषु नाशौचम् ॥ प्रतिगृहीतुस्तु आमान्नग्रहणे दोषो न ॥ पक्वान्नभोजने तु त्रिरात्रं क्षीरपानम् ॥ गृहीतेनंतव्रतादावेकादश्यादौ चारब्धकृच्छ्रादिव्रते च नाशौचम् ॥ तत्र स्नानादिशारीरनियमाः स्वयं कार्याः ॥ अनंतपूजादिकमन्येन कारणीयम् ॥ ब्राह्मणभोजनादिकमाशौचांते ॥ राजादीनां प्रजापालनादौ नाशौचम् ॥ ऋत्विजां मधुपर्कोत्तरं तत्कर्मणि नाशौचम् ॥ तेन येष्वाधानेष्टिपशुबंधादिषु मधुपर्को नोक्तस्तेषु कृतेपि वरणे तांस्त्यक्त्वान्ये ऋत्विजः कार्याः ॥ दीक्षितानां दीक्षणीयोत्तरमवभृथस्नानपर्यंतं यज्ञकर्मणि नाशौचम् ॥ दीक्षितर्त्विग्भ्यां स्नानमात्रं कर्म मध्ये कार्यम् ॥ अवभृथात्पूर्वमेवाशौचाभावः ॥ अवभृथं तु न भवत्येवेति सिंधुः ॥ कर्मांते तु त्रिरात्रं पूर्वन्यायात् ॥ रोगभयराजभयादिनाशार्थे शांतिकर्मणि नाशौचम् ॥ क्षत्पीडितकुटुंबस्य प्रतिग्रहे नाशौचम् ॥ विस्मरणशीलस्याधीतवेदशास्त्राध्ययनेपि नाशौचम् ॥ वैद्यस्य नाडीस्पर्शने नाशौचम् ॥ श्राद्धेतूक्तम् ॥ मूर्तिप्रतिष्ठाचौलोपनयनविवाहाद्युत्सवतडागाद्युत्सर्गकोटिहोमतुलापुरुषदानादिककर्मसु नांदीश्राद्धोत्तरं नाशौचम् ॥ संकल्पिते पुरश्चरणजपेऽविच्छेदेन संकल्पितहरिवंशश्रवणादौ च प्रारंभोत्तरं नाशौचम् ॥ कालादिनियमाभावे तु स्तोत्रहरिवंशादिकमाशौचे हेयमेव ॥ सर्वोप्ययमाशौचापवादोऽनन्यगतिकत्वे आर्तौ च ज्ञेय इति सिंधौ नागोजीये चोक्तम् ॥ तेनानन्यगतिकत्वादिकमालोच्यैवाशौचाभावो योज्यः ॥ अत्र यद्वक्तव्यं तत्पूर्वार्धे तत्रतत्रोक्तमेव ॥ केचित्तु व्रतेष्विव दीक्षितानामृत्विजामारब्धोत्सवादीनां च स्वरूपत आरंभतश्चा-

वश्यकत्वादार्त्याद्यभावेप्याशौचाभाव इत्याहुः ॥ कन्याया ऋतुशांत्यादिसंकटे मुहूर्तांतराभावे कूष्मांडहोमादिना जाताशौचे विवाहारंभोपि कार्य इत्युक्तम् ॥ विवाहादिषु नांदीश्राद्धोत्तरमाशौचपाते पूर्वसंकल्पितान्नमसगोत्रैर्दातव्यं भोक्तव्यं च ॥ दातारं भोक्तारं सिद्धान्नं च सूतकी न स्पृशेत् ॥ विवाहादौ तदन्यत्र वा भुंजानेषु विप्रेषु दातुराशौचपाते पात्रस्थमप्यन्नं त्यक्त्वान्यगेहोदकाचांताः शुध्यंतीत्यादिपूर्वार्धे उक्तम् ॥ एवं सहस्रभोजनादावपि पूर्वसंकल्पितान्नेषु ज्ञेयम् ॥ पार्थिवशिवपूजायां नाशौचम् ॥ आशौचे संध्याश्रौतस्मार्तहोमादिविषये पूर्वार्धे उक्तम् ॥ अग्निसमारोपप्रत्यवरोहावाशौचयोर्न कार्यौ ॥ तेन समारोपोत्तरमाशौचपाते पुनराधानमेव ॥ समारोपप्रत्यवरोहयोरन्यकर्तृकत्वस्याशौचापवादस्य चाभावात् ॥ इदं बह्वृचानां द्वादशाहं होमलोपेन्येषां त्र्यहं होमलोपे एव पुनराधानं ज्ञेयम् ॥ ग्रहणनिमित्तके स्नानश्राद्धदानादौ नाशौचम् ॥ कश्चित्स्नानमात्रं कार्यं न श्राद्धादीत्याह ॥ संक्रांतिस्नानादावपि नाशौचम् ॥ नित्यकृत्येषु स्नानाचमनभोजननियमास्पृश्यस्पर्शनादिनियमेषु नाशौचम् ॥ अन्यद्दैश्वदेवब्रह्मयज्ञदेवपूजादिनित्यं नैमित्तिकं काम्यं चाशौचेषु न कार्यम् ॥ भोजनकाले आशौचापादकजननमरणश्रवणे मुखस्थं ग्रासं त्यक्त्वा स्नायात्॥ मुखस्थग्रासभक्षणे एकोपवासः ॥ सर्वान्नभोजने त्रिरात्रोपवासः ॥ इति कर्मत आशौचसदसद्भावविचारः ॥

## अथ द्रव्यतः ।

पुष्पफलमूललवणमधुमांसशाकतृणकाष्ठोदकक्षीरदधिघृतौषधितिलतद्विकारेक्षुतद्विकाराणां लाजादिभर्जितान्नस्य लड्डुकादीनां चाशौचिस्वामिकानामाशौचिगृहस्थितानां च ग्रहणे दोषो न ॥ आशौचिहस्तात्तु किमप्येतन्न ग्राह्यम् ॥ पण्ये तु वणिजादेराशौचेपि तद्धस्ताल्लवणादेरामान्नस्य च क्रये न दोषः ॥ जलदधिलाजादिकं तु क्रयेणापि तद्धस्तान्न ग्राह्यम् ॥

## अथ मृतदोषतः ।

शास्त्रानुज्ञां विना शस्त्राग्निविषजलपाषाणभृगुपातानशनादिभिर्बुद्धिपूर्वकं स्वेच्छयात्मघातकानां नाशौचम् ॥ तच्चात्मघातनं क्रोधात्परोद्देशेन वास्तु स्वत एवेष्टसाधनताभ्रमेण वा ॥ तथा चौर्यादिदोषे राजहतानां पारदार्ये तत्पत्यादिहतानां विद्युद्धतानां च नाशौचम् ॥ अन्यैर्निषिद्धोपि गवान्नदीतरणवृक्षारोहकूपावरोहादौ प्रवृत्तो मृतस्तस्यापि नाशौचम् ॥ यो गवादिहरणार्थं तद्धननार्थं वा प्रवृत्तो गोसर्पनखिशृंगिदंष्ट्रिगजचोरविप्रांत्यजादिभिर्हतस्तस्य नाशौचम् ॥ महापातकिनां तत्संसर्गिणां च महापापितुल्यानां च पतितानां नपुंसकानां च मरणे नाशौचम् ॥ स्त्रीणां च पत्यादिहंत्रीणां हीनजातिगामिनीनां गर्भघ्नीनां

कुलटानां च पूर्वोक्तात्मघातादिपापयुक्तानां च मृतौ नाशौचम् ॥ तत्रैषां शवानां स्पर्शाश्रुपातवहनदहनांत्यकर्माणि न कुर्यात् ॥ स्पर्शादिकरणे ज्ञानाज्ञानाभ्यासादितारतम्येन कृच्छ्रातिकृच्छ्रसांतपनचांद्रायणादिप्रायश्चित्तानि सिंध्वादिग्रंथांतरतो ज्ञेयानि ॥ तेषां मृतदेहस्य जले प्रक्षेपः ॥ ततः संवत्सरोत्तरं पुत्रादिस्तदीयात्मघातादिपापानुसारेण प्रायश्चित्तं तस्य कृत्वा नारायणबलिं च कृत्वा पर्णशरदाहादिपूर्वकमाशौचमौर्ध्वदेहिकं च कुर्यात् ॥ केचित्प्रेतशरीरं दग्ध्वा दाहनिमित्तं चांद्रायणत्रयं कृत्वाऽस्थीनि संस्थाप्याब्दांते पूर्वोक्तरीत्यौर्ध्वदेहिकमित्याहुः ॥ अथवा लौकिकाग्निना तूष्णीं दग्ध्वा स्वजीवनसंदेहाद्वा भक्त्या वा पुत्रादयः संवत्सरादर्वागपि तत्तदात्मघातादिपापोक्तद्विगुणप्रायश्चित्तपूर्वकं नारायणबलिं कृत्वा पर्णशरदाहमस्थिदाहं वा कृत्वाऽशौचमौर्ध्वदेहिकं च कुर्युः ॥ इदं च प्रायश्चित्तार्हाणामेव॥ प्रायश्चित्तानर्हाणां घटस्फोटेन बहिष्कृतानां च दासीद्वारा पतितोदकविध्यनंतरं सपिंडीकरणवर्जमौर्ध्वदेहिकम् ॥ तेन सांवत्सरिकमप्येकोद्दिष्टविधिनैव ॥ यद्वात्मघातिनां पुत्रादिर्मृतजातीयवधोक्तब्रह्महत्यादिप्रायश्चित्तसहितं चांद्रायणं तप्तकृच्छ्रद्वयं च कृत्वा नारायणबलिपूर्वकं तं दहेत् ॥ तथा चात्मघातिनां गोगजव्याघ्रादिहेतुकदुर्मरणवतां च पतितादीनां च पूर्वोक्तानां सर्वेषां न मरणादिनादारभ्याशौचं किं तु तत्प्रायश्चित्तनारायणबलिपूर्वकसमंत्रकदाहदिनमारभ्यैवाशौचम् ॥ जलाग्न्यादिभिः प्रमादमृतानां तु मरणदिनादारभ्याशौचादिकमस्त्येव ॥ तच्च त्रिरात्रमिति केचित् ॥ दशाहमिति बहवः ॥ किं तु प्रमादमरणस्यापि दुर्मरणत्वात्तन्निमित्तप्रायश्चित्तपूर्वकमेव दाहादि कार्यम् ॥ तदुक्तं स्मृत्यर्थसारे ॥ चांडालगोब्राह्मणचोरपशुदंष्ट्रिसर्पाग्न्युदकादिभिः प्रमादान्मरणे चांद्रायणं तप्तकृच्छ्रद्वयं च तत्प्रायश्चित्तं कृत्वा पंचदश कृच्छ्राणि वा प्रायश्चित्तं कृत्वा विधिवद्दहनाशौचोदकदानादि सर्वं कार्यमेवेति ॥ प्राणांतिकप्रायश्चित्तेन मृतस्य दशाहमाशौचं सर्वाणि प्रेतकर्माणि कर्तव्यानि ॥ प्रायश्चित्तेन तस्य शुध्यत्वात् ॥ एवमारब्धप्रायश्चित्तस्य प्रायश्चित्तमध्ये मरणेपि शुध्यत्वादिकं ज्ञेयम् ॥ आहिताग्नेस्तु पतितादेर्मरणे दर्भादिना चांडालशृंगिचोरादिहेतुके मरणे विशेषः ॥ "प्रेताग्नीन्प्रक्षिपेदप्सु आवसथ्यं चतुष्पथे ॥ पात्राणि तु दहेदग्नौ साग्निके पापकर्मणि॥" ततः प्रायश्चित्तार्हत्वानर्हत्वादिपूर्वोक्तव्यवस्थया निर्मथ्याग्निना दाहाद्यंतकर्मेति ॥ "महापातकसंयुक्तः साग्निको यदि जीवति ॥ पुत्रादिः पालयेदग्नीन्प्रायश्चित्तक्रियावधिः ॥ प्रायश्चित्तं न कुर्याद्यः कुर्वन्वा म्रियते यदि ॥ जलेग्नीन्प्रक्षिपेदग्नौ पात्राणि तु जलेषु वा ॥" माधवीये ॥ आहिताग्नेर्दुर्मरणेष्वात्मघाते च तं लौकिकाग्निना तूष्णीं दग्ध्वा तदस्थीनि क्षीरेण प्रक्षाल्य तत्प्रायश्चित्तं कृत्वा श्रौताग्निभिः समंत्रकं दाहादि कार्यमित्युक्तम् ॥ इदं निरग्नेरपि दुर्मरणे योज्यम् ॥

## अथ सर्पहते विशेषः ।

प्रमादेन वा दर्पादिना वा सर्पतो मृतावाशौचादि न कार्यम् ॥ वक्ष्यमाणनागपूजाव्रतं कृत्वा नारायणबलिसौवर्णनागदानप्रत्यक्षगोदानानि कृत्वा दाहाशौचादिकार्यम् ॥ सर्वत्र दुर्मरणे पतितादिमरणे च तत्तत्प्रायश्चित्तादि कृत्वा दाहाशौचादि कार्यमित्युक्तम् ॥ तत्र प्रायश्चित्तानि प्रसंगादुच्यंते ॥ बुद्धिपूर्वकमात्मघातेन मृतानां त्रिंशत्कृच्छ्राणि प्रायश्चित्तम् ॥ एतच्च जातिवधप्रायश्चित्तेन समुच्चितं कार्यम् ॥ तद्यथा ॥ ब्राह्मणेनात्मघाते कृते द्वादशाब्दब्रह्महत्याप्रायश्चित्तं त्रिंशत्कृच्छ्रमात्मघातप्रायश्चित्तं च तत्पुत्रादिः कुर्यात् ॥ ब्राह्मणस्त्रियात्मघाते कृते ब्राह्मणस्त्रीवधप्रायश्चित्तं त्रिंशत्कृच्छ्राणि च ॥ एवं शूद्राद्यात्मघातेप्यूह्यम् ॥ अशक्तावात्मघाते चांद्रायणद्वयं तप्तकृच्छ्रचतुष्कं च ॥ प्रमादेन जलादिमरणे पंचदश कृच्छ्राणि चांद्रायणपूर्वकं तप्तकृच्छ्रद्वयं वा ॥ पतिते मृते षोडश कृच्छ्राणि ॥ ब्रह्महत्यादिपापिनां प्रायश्चित्तात्पूर्वमरणे तत्तत्पापप्रायश्चित्तं पुत्रेण कार्यम् ॥ प्रायश्चित्तानर्हाणां तु पतितोदकदानविधिरेव न प्रायश्चित्तादीत्युक्तम् ॥ सिंधौ तु प्रायश्चित्तानर्हाणामपि पुत्रादिर्नारायणबलिपूर्वं सर्वमौर्ध्वदेहिकं सपिंडीकरणं दर्शादिश्राद्धं गयादिश्राद्धं च कुर्यादेव ॥ एवं म्लेच्छीकृतस्यापि पतितोदकविधिरपुत्रविषय इत्युक्तम् ॥ इदमेव युक्तम् ॥ यस्तु किंचित्कालं म्लेच्छीकृतः प्रायश्चित्तार्हस्तस्य षोडशकृच्छ्रादिप्रायश्चित्तं पुत्रेण कृत्वा पर्णशरदाहादि कार्यम् ॥ प्रमादमरणभिन्नेषु चौर्यपारदार्यादिहेतुकेषु दुर्मरणेषु चांद्रायणद्वयं तप्तकृच्छ्रं वेत्याकरतो विचार्य योज्यम् ॥

## अथ दुर्मरणेषु दानविधिः ।

किंच व्याघ्रादिहेतुकदुर्मरणेषु शातातपोक्तदानादिविधिरपि कार्यः ॥ तथाहि ॥ व्याघ्रहते विप्रकन्याविवाहनम् ॥ गजहते चतुर्निष्कपरिमितहेमनिर्मितगजदानम् ॥ राजहते सौवर्णपुरुषदानम् ॥ चोरहते प्रत्यक्षधेनुदानम् ॥ वैरिहते वृषभदानम् ॥ वृषभहते यथाशक्ति हेमदानम् ॥ शय्यायां च मृतौ देया शय्या तूलीसमन्विता ॥ निष्कहेमनिर्मितविष्णुप्रतिमाधिष्ठिता च ॥ शौचहीनमरणे द्विनिष्कहैमविष्णुदानम् ॥ संस्कारहीनमरणे विप्रपुत्रोपनयनम् ॥ अश्वहते निष्कत्रयहेमकृताश्वदानम् ॥ शुना हते क्षेत्रपालस्थापनम् ॥ सूकरहते महिषदानम् ॥ कृमिभिर्हते पंचखारीमितगोधूमदानम् ॥ वृक्षहते वस्त्रयुतसौवर्णवृक्षदानम् ॥ शृंगिणा हते वस्त्रयुतवृषभदानम् ॥ शकटहते सोपस्करं किंचिद्द्रव्यदानम् ॥ भृगुपातमृते धान्यपर्वतदानम् ॥ अग्निना मृते उदपानोत्सर्गविधिः ॥ काष्ठहते धर्मार्थसभाकरणम् ॥ शस्त्रहते महिषीदानम् ॥ अश्मनाहते सवत्सपयस्विन्या गोर्दानम् ॥ विषेण हते हेमनिर्मितपृथ्वीदानम् ॥ उद्बंधनेन मृते हेमकपिदानम् ॥ जलमृते द्विनिष्कहेम-

निर्मितवरुणदानम् ॥ विषूचिकामृते स्वाद्धन्नेन शतविप्रभोजनम् ॥ कंठास्थितकवलस्य मरणे घृतधेनुदानम् ॥ कासरोगमृतेऽष्ट कृच्छ्राणि ॥ अतिसारमृते लक्षगायत्रीजपः ॥ शाकिन्यादिग्रहैर्मृते रुद्रैकादशनीजपः ॥ विद्युत्पातमृते विद्यादानम् ॥ अंतरिक्षमृते वेदपारायणम् ॥ पतिते मृते षोडश कृच्छ्राणि ॥ अस्पृश्यस्पर्शयुक्तमरणे सच्छास्त्रपुस्तकदानमित्यादि ॥ अत्र शय्यामरणे शौचहीनसंस्कारहीनमरणे कृमिविषूचिकाकंठकवलकासातिसाररोगग्रहणैर्मरणेंतरिक्षमृतेस्पृश्यस्पर्शमरणेपि दानादिविधिरेव न प्रायश्चित्तं नैव नारायणबलिर्नापि वर्षादिकालप्रतीक्षा ॥ व्याघ्रादिहेतुकं विषजलशस्त्रादिहेतुकं च मरणं प्रमादेन दर्पादिना बुद्ध्या चेत्यनेकधा संभवति तत्रोक्तव्यवस्थया प्रायश्चित्तं नारायणबलिर्दानादिविधिश्चेति त्रयाणां समुच्चयः॥ यदि पुत्रादिः पितुर्जलादिदुर्मरणप्रायश्चित्तं ब्रह्महत्यादि तत्तत्प्रायश्चित्तं वात्मघातप्रायश्चित्तं वा कर्तुं न शक्नोति तदोक्तदानादिविधिं नारायणबलिं च कृत्वाऽत्यशक्तौ नारायणबलिमात्रं कृत्वौर्ध्वदेहिकं कुर्यात् ॥ तावता पुत्रादिसपिंडानां शुद्धिसिद्धेः पित्रादेस्तु पुत्रादिभिस्तत्तत्प्रायश्चित्ताकरणे नरकादिभोगः स्यादेवेति बोध्यम् ॥

## अथ विधिविहितजलादिमरणे ।

तत्र प्रयागे सर्ववर्णानां रोगिणामरोगिणां च भागीरथीप्रवेशादिना मरणे कामितमहाफलम् ॥ शुद्रस्यारोगिणोपि प्रयागभिन्नेपि जलादिमरणमनुज्ञातम् ॥ "व्याधितो भिषजा त्यक्तो विप्रो वृद्धोथ वा युवा ॥ तनुं त्यजेज्जलाग्न्याद्यैः स यथेष्टं फलं लभेत् ॥ दुश्चिकित्सैर्महारोगैः पीडितो जीवनाक्षमः ॥ प्रविशेज्ज्वलनं दीप्तं करोत्यनशनं तथा ॥ अगाधतोयराशिं च भृगोः पतनमेव च ॥ गच्छेन्महापथं वापि तुषारगिरिमादरात् ॥ प्रयागवटशाखाग्रादेहत्यागं करोति च ॥ उत्तमान्प्राप्नुयाल्लोकान्नात्मघाती भवेक्वचित् ॥ नराणामथ नारीणां सर्ववर्णेषु सर्वदा ॥ आशौचं स्याद्यहं तेषां वज्रानलहते तथा ॥ वाराणस्यां म्रियेद्यस्तु प्रत्याख्यातभिषक्क्रियः ॥ काष्ठपाषाणमध्यस्थो जाह्नवीजलमध्यगः ॥ अविमुक्तोन्मुखस्तस्य कर्णमूलगतो हरः ॥ प्रणवं तारकं ब्रूते इत्यादिवचनोच्चयः ॥ पुराणस्थो माधवादिनिबंधेषु त्युदाहृतः ॥" अत्रानुज्ञाते बुद्धिपूर्वकात्मघाते गृहस्थादीनामेवाधिकारः यतेस्तु नाधिकारः ॥ त्र्यहाद्याशौचविधानात ॥ यतेः काम्यकर्मण्यनधिकाराच्चेति निर्णयसिंधुः ॥ इदानींतनशिष्टास्तु रोगादिपीडां सोढुमशक्तौ संन्यासाश्रमं गृहीत्वा तीर्थादिनात्मघातं कुर्वंति ॥ गृहस्थविधुरादयश्च न कुर्वंति ॥ केचित्त्वपरिहार्यरोगादिग्रस्तवृद्धादेर्जलादिना बुद्ध्यात्मघातः कलौ प्रयागभिन्नदेशे न भवति ॥ "भृग्वग्निपतनैश्चैव वृद्धादिमरणं तथा ॥" इति कलिवर्ज्येषु परिगणनादित्याहुः ॥ एतन्मते मरणांतप्रायश्चित्तविधयः काशीखंडादौ विप्रादेर्देहत्यागविधयश्च युगांतर-

पराः ॥ प्रयागमरणं स्त्रीणां सहगमनं च कलियुगेपि सर्वसंमतम् ॥ अत्र सर्वत्र सहगमनभिन्ने विधिवाक्यानुज्ञाते देहत्यागे त्रिरात्रमाशौचमिति बहवः ॥ दशाहमिति केचित् ॥ एवं फलकामनया विहिते काम्यप्रयागे मरणेपि पक्षद्वयं ज्ञेयम् ॥

## अथ पतितोदकदानविधिः ।

अथ यः पतितो घटस्फोटेन बहिष्कृतो यश्च म्लेच्छीकृतो यश्च प्रायश्चित्तानर्हपापी तस्य त्रिविधस्य पितृमातृभिन्नस्य पतितोदकविध्यनंतरं सपिंडीकरणवर्ज्यमंत्यकर्म पितुर्मातुश्च त्रिविधस्यापि नारायणबलिपूर्वकं सपिंडीकरणसहितं सर्वं भवतीत्युक्तम् ॥ तत्र पतितोदकदानविधिर्यथा ॥ सर्वगां दासीमाहूय तस्यै वेतनं दत्त्वा शुद्धपूर्णघटहस्तां तां ब्रूयात् ॥ हे दासि गच्छ मूल्येन तिलान् तोयपूर्णमिमं घटं च शीघ्रमानय ॥ ततो दक्षिणामुखी उपविश्य वामपादेन तं घटं सतिलं क्षिप ॥ घटक्षेपणकाले चामुकसंज्ञकपतितप्रेत पिबपिबेति मुहुरुच्चारयेति ॥ सा दासी तद्वाक्यं श्रुत्वा मूल्यं गृहीत्वा तथा कुर्यात् ॥ एवं कृते पतिततृप्तिर्नान्यथा ॥ एतच्च पतितस्य मृतदिने कार्यम् ॥ इति पतितोदकविधिः ॥ इति मृतदोषत आशौचापवादः सप्रसंगः सविस्तरो निरूपितः ॥

## अथ विधानत आशौचाभावः ।

यतेर्मृतावाशौचं नास्ति ॥ तस्य प्रेतक्रियोदकदानाशौचसपिंडीकरणादेर्निषिद्धत्वात् ॥ सपिंडीस्थान एकादशेहनि पार्वणश्राद्धमात्रं कार्यम् ॥ प्रतिसांवत्सरिकश्राद्धदर्शश्राद्धादिकं तु पार्वणविधिना सपिंडकं भवत्येव ॥ अत्र विस्तरो ग्रंथांतरे वक्ष्यते ॥ एतच्च त्रिदंडिनामेकदंडिनां हंसपरमहंसादीनां सर्वेषामेव ज्ञेयम् ॥ एवं वानप्रस्थमरणेपि नाशौचं कृतजीवच्छ्राद्धे मृते सपिंडैराशौचादि कर्तव्यं न वेति विकल्पः ॥ ब्रह्मचारिमृतौ त्वाशौचमस्त्येव ॥ युद्धमृतेप्याशौचं नेति सर्वग्रंथेषूपलभ्यते नत्वेवं ब्राह्मणेषु शिष्टाचारः ॥ इति पंचधाशौचापवादो निरूपितः ॥

## अथ जीवतोप्याशौचम् ।

यथा पतितस्य घटस्फोटकाले सर्वसपिंडानामेकाहमाशौचम् ॥ "इत्याशौचं सापवादं यथामति निरूपितम् ॥ समर्पितं रुक्मिणीशश्रीमद्विट्ठलपादयोः ॥" इति सापवादाशौचप्रकरणम् ॥

## अथौर्ध्वदेहिकारंभोपयोगिनारायणबल्यादिप्रकार उच्यते ।

तत्र दुर्मरणेष्वात्मघाते जलादिभिः प्रमादमरणे पतितादिमरणे च पूर्वोक्तव्यवस्थयामुकगोत्रस्यामुकशर्मणोमुकदोषनाशार्थमौर्ध्वदेहिके संप्रदानत्वयोग्यता-

सिद्ध्यर्थममुकप्रायश्चित्तममुकदानं वा करिष्ये इत्यादिसंकल्पपूर्वकं तत्तत्प्रायश्चित्तं दानं च कार्यम् ॥ अशक्तौ दानमेव कार्यम् ॥ ततोमुकगोत्राअमुकशर्मणे-मुकदुर्मरणदोषनाशार्थमौर्ध्वदेहिकसंप्रदानत्वयोग्यतासिद्ध्यर्थं नारायणबलिं करिष्ये इति संकल्प्य पूर्वार्धोक्तसंततिफलककाम्यनारायणबलिवत्सर्वं कुर्यात् ॥ एतत्तु वर्षाते करणपक्षे ॥ सद्यःकरणपक्षे तु पूर्वोक्तद्विगुणप्रायश्चित्तं संकल्प्य शुक्लैकादश्यादिकालमनपेक्ष्यैव समनंतरोक्तसंकल्पं कृत्वा विधिना स्थापिते कलशद्वये हेममतिमयोर्विष्णुं वैवस्वतं यमं चावाह्य पुरुषसूक्तेन यमाय सोममिति च क्रमेण षोडशोपचारैः संपूज्य तत्पूर्वभागे रेखायां दक्षिणाग्रकुशानास्तीर्य शुंधंतां विष्णुरूप्यमुकप्रेतेति दशस्थानेष्वपो निनीय मधुघृततिलमिश्रानोदनपिंडान्दशामुकगोत्रामुकशर्मन्प्रेताविष्णुदेवतायं ते पिंड इति दक्षिणसंस्थान् प्राचीनावीतित्वादि पैतृधर्मेण दद्यात् ॥ गंधादिभिरभ्यर्च्य प्रवाहणांतं कृत्वा नद्यां क्षिपेत् ॥ श्वः सद्यो वा पूर्वस्थापितं विष्णुमभ्यर्च्यैकविप्रे विप्रालाभे दर्भवटौ वा पादक्षालनादितृप्तिप्रश्नांतं विष्णुरूपप्रेतावाहनपूर्वकं कृत्वा विप्रसमीपे तूष्णीं रेखाः कृत्वा दर्भास्तरणे आपो निनयनं च कृत्वा दर्भेषु सव्येन विष्णवे ब्रह्मणे शिवाय च सपरिवाराय यमाय चेति चतुर्भ्यः पिंडचतुष्टयं दत्त्वाऽपसव्येन विष्णुरूपिप्रेतामुकगोत्रनामायं ते पिंड इत्येकं पंचमं पिंडं दत्त्वा तथैवाभ्यर्च्य प्रवाहणांते विप्रावांततादिश्राद्धशेषसमापनांते प्रेतबुद्ध्या विप्राय वस्त्राभरणादि दत्त्वा विप्रेण प्रेताय तिलांजलिं दापयेत् ॥ अमुकगोत्रायामुकशर्मणे विष्णुरूपिणे प्रेतायायं तिलतोयांजलिरिति मंत्रेण ॥ विप्रालाभे स्वयं दद्यात् ॥ ततो विप्रान्वाचयेत् ॥ अनेन नारायणबलिकर्मणा भगवान्विष्णुरिममुकं प्रेतं शुद्धमपापमर्ह करोत्विति ॥ काम्यप्रयोगेस्मिन्प्रयोगे च संकल्पे नामगोत्रोच्चारे च विशेषः ॥ स्पष्ट एव ॥ पूर्वत्र काश्यपगोत्रदेवदत्तप्रेतेत्याद्युच्चारः ॥ अत्र तु गोत्रनामज्ञानसत्त्वादुर्मरणेन मृतस्य यन्नामगोत्रं तदेवोच्चारयेदिति संकल्पे विशेषेपि हेतुः स्पष्ट एवेति ॥ इति दुर्मरणे और्ध्वदेहिकाधिकारार्थं नारायणबलिप्रयोगः ॥

## अथ सर्पहते व्रतम् ।

प्रतिमासं शुक्लपंचम्यामुपवासं नक्तं वा कृत्वा पिष्टमयं नागं पंचफणमनंतवासुकिशंखपद्मकंबलककर्कोटकाश्वतरधृतराष्ट्रशंखपालकालियतक्षककपिलेति द्वादशनामभिर्द्वादशमासेषु संपूज्य पायसेन विप्रान्संभोज्य वत्सरांते हेमनागं प्रत्यक्षां गां च दत्त्वा नारायणबलिपूर्वकं दाहाशौचादिकं कार्यम् ॥ अथवा नमोस्तु सर्पेभ्य इति तिस्र आज्याहुतीर्जुहुयात् ॥ "पंचम्यां पन्नगं हैमं स्वर्णेनैकेन कारयेत् ॥ क्षीराज्यपात्रमध्यस्थं पूज्य विप्राय दापयेत् ॥ प्रायश्चित्तमिदं प्रोक्तं नागदष्टस्य शंभुना ॥" इति ॥ ततो नारायणबल्यादि ॥

## अथ पालाशप्रतिकृतिदाहादिविधिः ।

तत्र देशांतरमरणे पराकद्वयमष्टौ कृच्छ्रान्वा कृत्वास्थीनि दहेत् ॥ अस्त्रां चांडालश्वादिस्पर्शे पंचगव्योदकादिभिः प्रक्षाल्य दहेत् ॥ यस्यास्थीनि सर्वथा न लभ्यंते तस्य पर्णशरदाहः ॥ "कुर्यादर्भमयं प्रेतं कुशैस्त्रिशतषष्टिभिः ॥ पालाशीभिः समिद्भिर्वा संख्या चैवं प्रकीर्तिता ॥" तत्र भूमौ कृष्णाजिनमास्तीर्य तत्र शरं दक्षिणायतं निवेश्य तत्र पलाशवृंतानि न्यसेत् ॥ शिरसि चत्वारिंशत् ४० ग्रीवायां दश १० बाह्वोः प्रत्येकं पंचाशदेवं शतं १०० करांगुलीषु दश १० उरसि विंशतिः २० जठरे त्रिंशत् ३० शिश्ने चत्वारि ४ अंडयोस्त्रयं त्रयं ६ ऊर्वोः प्रत्येकं पंचाशदेवं शतं १०० जंघातः पादतलांतं प्रत्येकं पंचदशैव ३० पादांगुलीषु दश १० एवं षष्ट्यधिकशतत्रयमितैर्दर्भैः पालाशसमिद्भिर्वा शरीरं कृत्वा ऊर्णासूत्रेण बद्धा जलमिश्रपिष्टेन लिंपेत् ॥ शक्तौ सत्यां नारिकेरादीन्यपि ॥ तथाहि ॥ शिरसि नारीकेरफलं वर्तुलालाबुं वा ललाटे कदलीपत्रम् ॥ दंते दाडिमबीजानि ॥ कर्णयोः कंकणं ब्रह्मपत्रं वा ॥ चक्षुषोः कपर्दौ २ ॥ नासिकायां तिलपुष्पम् ॥ नाभावज्जम् ॥ स्तनयोर्जंबीरफलद्वयम् ॥ वाते मनःशिलाम् ॥ पित्ते हरितालम् ॥ कफे समुद्रफेनम् ॥ रुधिरे मधु ॥ पुरीषे गोमयम् ॥ मूत्रे गोमूत्रम् ॥ रेतसि पारदम् ॥ वृषणयोर्वृताकद्वयम् ॥ शिश्ने गृंजनम् ॥ केशेषु वनसूकरसटा वटप्ररोहा वा ॥ लोमसूर्णाम् ॥ मांसे माषपिष्टलेपः ॥ पंचगव्यैः पंचामृतैश्च सर्वतः सिंचनम् ॥ पुनर्नोऽअसुं पृथिवी ददातु० ॥ असुनीते इत्यृग्भ्यां प्राणप्रवेशं भावयेत् ॥ यद्वा ॥ यत्तेयमिति सूक्तेन शुक्रमसीति पारदं क्षिप्त्वा ॥ अक्षिभ्यामिति शरीरं स्पृशेत् ॥ शरीरं स्नापयित्वा चंदनमनुलिप्य ॥ वस्त्रोपवीते परिधाप्य ॥ अयं स देवदत्त इत्यभिमृश्य इदं चास्योपासनमिति ध्यात्वा विधिवदाहादि कार्यम् ॥ अग्नाहिताग्नेरस्थिदाहे पर्णशरदाहे वा दशाहमाशौचमनाहिताग्नेरुभयहमित्यादि प्रागुक्तमनुसंधेयम् ॥ द्वादशाब्दादिप्रतीक्षोत्तरं पर्णशरदाहादि क्रियते चेत्तदा त्रिंशत्कृच्छ्राणि चांद्रायणत्रयं वा कृत्वा कार्यम् ॥"

## अथातीतप्रेतसंस्कारकालः ।

"प्रत्यक्षशवसंस्कारे दिनं नैव विशोधयेत् ॥ आशौचमध्ये संस्कारे दिनं शोध्यं तु संभवे ॥" दशाहोत्तरं तु दिनं संशोध्यैव ग्राह्यम् ॥ तत्र वत्सरादूर्ध्वं क्रियमाणप्रेतकर्मण्युत्तरायणमेव श्रेष्ठम् ॥ तत्रापि कृष्णपक्ष एव तत्र नंदात्रयोदशीचतुर्दशीक्षयदिनान्वर्जयेत् ॥ शुक्रशनिवारौ वर्ज्यौ ॥ भौमवारोपि वर्ज्य इत्येके ॥ नक्षत्रेषु भरणीकृत्तिकार्द्राश्लेषामघाज्येष्ठामूलं धनिष्ठोत्तरार्धं शततारकादिचतुष्टयं चेति नक्षत्राणि त्रिपुष्करयोगश्चेत्यतिदुष्टानि सर्वथा त्यजेत् ॥ कृत्तिका पुनर्वसूत्तरा-

फाल्गुनी विशाखोत्तराषाढा पूर्वाभाद्रपदा चेति त्रिपादनक्षत्राणि ॥ द्वितीया सप्तमी द्वादशी च तिथिः ॥ कुजशनिरविवाराश्चेति त्रयाणां योगे त्रिपुष्करः ॥ कैश्चिद्रविस्थाने गुरुवार उक्तः ॥ एतेष्वेव तिथिवारेषु मृगचित्राधनिष्ठायोगे द्विपुष्करः ॥ त्रिपुष्करयोगो वृद्धौ लाभे नष्टे हृते मृतौ च त्रिगुणफलदः द्विपुष्करो द्विगुणफलदः ॥ तेन प्रेतकार्ये द्वावपि त्याज्यौ ॥ द्वयोर्योगे द्विपुष्कर इति केचित् ॥ गुरुशुक्रास्तपौषमासमलमासवैधृतिव्यतीपातपरिघयोगा विष्टिः करणं चतुर्थाष्टमद्वादशचंद्रश्चेत्यपि सर्वथा त्यजेत् ॥ रोहिणी मृगपुनर्वसू पूर्वोत्तराफाल्गुनी चित्रा विशाखाऽनुराधा पूर्वोत्तराषाढा धनिष्ठेति किंचिद् दुष्टानि संभवे त्यजेत् ॥ भौमवारोपि त्याज्य इत्येके कर्तुस्तिसृषु जन्मतारासु प्रत्यरितारायां च पर्णशरादिदाहो नेष्टः ॥ तथा चार्कचंद्रगुरुवारा अश्विनीपुष्यहस्तस्वातीश्रवणभानि च प्रशस्तानि ॥ मध्यमानि सर्वथा त्याज्यानि चोक्तानि ॥ नंदायां शुक्रवारे चतुर्दश्यां त्रिजन्मतारात्रप्रत्यरितारासु चैकोद्दिष्टश्राद्धमतिनिंद्यम् ॥ साक्षादेकादशाहे न कोपि निषेधः ॥ अस्य निषिद्धनक्षत्रादेरपवादः ॥ "युगमन्वादिसंक्रांतिदर्शे च प्रेतकर्मणि ॥ पुनः संस्कारादिकेपि नक्षत्रादि न शोधयेत् ॥ गुरुभार्गवयोर्मौढ्ये पौषमासे मलिम्लुचे ॥ नातीतः पितृमेधः स्याद्गयां गोदावरीं विना ॥" इति पुनः संस्कारकालः ॥ साग्निकस्य पर्णशरदाहे कृते पश्चाद्देहलाभे पर्णशरदाहायार्धदग्धकाष्ठैस्तं दहेत् ॥ तादृशकाष्ठालाभे लौकिकाग्निना दग्ध्वा तदस्थीनि महाजले क्षिपेत् ॥ एवमन्येषां निरग्नीनामपि पर्णशरदाहोत्तरं शरीरलाभेस्थिलाभे वा योज्यम् ॥ "अमृतं मृतमाकर्ण्य कृतं यस्यौर्ध्वदेहिकम् ॥ प्रायश्चित्तमसौ स्मार्तं कृत्वाग्नीनादधीत च ॥" अथ पुनः संस्कारादिप्रकारः पूर्वार्धे उक्तः ॥ आधानांते आयुष्मतीष्टिः ॥ अनाहिताग्नेस्तु चरुः भर्तरि जीवत्येव मरणवार्तां श्रुत्वा यदि स्त्रिया सहगमनं कृतं तदा तत्स्त्रीमरणमवैधव्यमेव ॥ ज्ञातमरणमेव हि सहगमने निमित्तम् ॥ न तु मरणज्ञानमात्रम् ॥ अतस्तस्या भार्याया आत्मघातादिदोषप्रायश्चित्तं तत्पुत्रादिभिः कृत्वा नारायणबलिपूर्वकमौर्ध्वदेहिकं कार्यम् ॥ भर्तुस्तु दाहाद्यौर्ध्वदेहिककरणनिमित्तमुक्तपुनःसंस्कारादि कार्यम् ॥ क्वचित्तु जीवतोप्यंत्यकर्म विहितम् ॥ यथा प्रायश्चित्तानिच्छोः पतितस्य घटस्फोटे ॥

## अथ घटस्फोटविधिः ।

तथाहि महापातकेनोपपातकेन वा पतितो यदि प्रायश्चित्तं न करोति तदा तं गुरुबांधवानां राज्ञश्च समक्षमाहूय तत्पापं प्रकटीकृत्य तं पुनःपुनरुपदिशेत् ॥ प्रायश्चित्तं कुरु स्वाचारं लभस्वेति स यद्येवमपि नांगीकरोति तदा रिक्तादिनिंद्यतिथौ सायाह्ने सपिंडा बांधवाश्च संभूय दासीहस्तेनानीतममेध्यकुत्सितजलादिपूर्णं घटं

सर्वतो दास्याद्यन्वारंभं कुर्वतो दास्या दासस्य वा वामपादेन न्युब्जं छिन्नाग्रदर्भेषु कारयित्वा दासीसहिता वदेयुरमुमनुदकं करोमीति नामग्रहणपूर्वकं प्राचीनावीतिनो मुक्तशिखाश्च संतः ॥ ततोधिकारी कर्ता दाहवर्ज्यं जीवंतमेवोद्दिश्य पिंडोदकदानादिप्रेतकार्याण्येकादशाहांतानि नाम्नैव कुर्यात् ॥ मिताक्षरायां प्रेतकार्योत्तरं घटनिनयनमुक्तम् ॥ एकाहमाशौचं सर्वेषाम् ॥ यस्य घटस्फोटः कृतस्तेन सह संभाषणस्पर्शादिसंसर्गो न केनापि कार्यः ॥ करणे पतिततुल्यता ॥ घटस्फोटप्रयोजनं तु पूर्वार्धान्ते उक्तम् ॥ घटस्फोटनिश्चयोत्तरं घटस्फोटदिनात्प्राक्पतितज्ञातीनां धर्मकार्येष्वनधिकार इति कश्चित् ॥ कृतघटस्फोटस्य पुंसोनुतापे तत्पापप्रायश्चित्तांते संग्रहविधिरुच्यते ॥ तत्रादौ शुद्धिपरीक्षा ॥ कृतप्रायश्चित्तो ज्ञातिसमक्षं गोभ्यस्तृणभारं दद्यात् ॥ गोभिस्तृणे भक्षिते शुद्धिः ॥ भक्षणाभावे पुनः प्रायश्चित्तं चरेत् ॥ "एवं निश्चितसंशुद्धौ समानीय नवं घटम् ॥ हैमं वा मृन्मयं वापि पवित्रजलपूरितम् ॥" ततः सपिंडास्तं घटं संस्पृश्याभिमंत्र्य तज्जलैः पावमानीभिरापोहिष्टेत्यादिभिस्तरत्समंदीभिश्च पापिनमभिषिच्य तेन सह सर्वे स्नात्वा तं जलघटमस्मै दद्युः ॥ स च शांता द्यौः शांता पृथिवी शांतं विश्वमंतरिक्षं यो रोचनस्तमिह गृभ्णामीति यजुर्भिस्तं घटं गृह्णीयात् ॥ ततस्तदुदकं तेनैव साकं सर्वे पिबेयुः ॥ ततः सकूष्मांडमंत्रैराज्यहोमं कृत्वा सुवर्णं गां च दद्यात् ॥ ततस्तस्य जातकर्मादिव्रतबंधांता विवाहांता वा संस्काराः कार्याः ॥ एवं कृते शुद्धेन तेन संस्पर्शसंभोजनादिव्यवहारं कुर्यात् ॥ एवमुपपातके महापातके च कृतघटस्फोटस्य शुद्धिर्ज्ञेया ॥ इति संक्षेपतः कृतघटस्फोटशुद्धिः ॥

## अथांत्यक्रियारंभः ।

"वंदे श्रीमदनंताभिधगुरुचरणौ सतां मताचरणौ ॥ जननीमथान्नपूर्णां संपूर्णां सद्गुणैर्वंद्याम् ॥ १ ॥ श्रीविट्ठलं नमस्कृत्य विघ्नकक्षहुताशनम् ॥ अंत्येष्टिनिर्णयं वक्ष्ये सर्वशाखोपयोगिनम् ॥ २ ॥" तत्रांत्यक्रियाधिकारिणः श्राद्धारंभ एवोक्ताः ॥ सर्वाभावे धर्मपुत्रः कार्यः ॥ तत्र पुत्राद्यधिकारिणा पित्रादिकमासन्नमरणं दृष्ट्वा सार्धाब्दादिप्रायश्चित्तं मोक्षधेन्वादिदानानि च तेन कारणीयानि ॥ स्वयं वा तमुद्दिश्य कर्तव्यानि ॥ तत्र प्रायश्चित्तप्रयोगः प्रायश्चित्तप्रकरणे द्रष्टव्यः ॥ शक्तौ सत्यां प्रायश्चित्तांते दशदानानि कार्याणि ॥

## अथ दशदानमंत्राः ।

तत्र गवामंगेषु तिष्ठंतीति गोदानमंत्राः ॥ "सर्वभूताश्रया भूमिर्वराहेण समुद्धृता ॥ अनंतस्यफलदा अतः शांतिं प्रयच्छ मे" इति भूमेः ॥ "महर्षेर्गोत्रसंभूताः काश्यपस्य तिलाः स्मृताः ॥ तस्मादेषां प्रदानेन मम पापं व्यपोहतु ॥" इति

तिलानाम् ॥ हिरण्यगर्भगर्भस्थमिति हिरण्यस्य ॥ "कामधेनुषु संभूतं सर्वक्रतुषु संस्थितम् ॥ देवानामाज्यमाहारमतः शांतिं प्रयच्छ मे" इत्याज्यस्य ॥ "शरणं सर्वलोकानां लज्जाया रक्षणं परम् ॥ सुवेषधारिवस्त्रत्वमतः०" इति वस्त्रस्य ॥ "सर्वदेवमयं धान्यं सर्वोत्पत्तिकरं महत् ॥ प्राणिनां जीवनोपायमतः० ॥" इति धान्यस्य ॥ "तथा रसानां प्रवरः सदैवेक्षुरसो मतः ॥ मम तस्मात्परां लक्ष्मीं ददस्व गुड सर्वदा ॥" इति गुडस्य ॥ "प्रीतिर्यतः पितॄणां च विष्णुशंकरयोः सदा ॥ शिवनेत्रोद्भवं रौप्यमतः०" इति रजतस्य ॥ "यस्मादन्नरसाः सर्वे नोत्कृष्टा लवणं विना ॥ शंभोः प्रीतिकरं नित्यमतः०" इति लवणस्य ॥ भूम्यादिप्रमाणानि तु जननशांतिप्रकरणे उक्तानि ॥

## अथांतकाले नामोच्चारमहिमा ।

प्रायश्चितादिकर्मसु विष्ण्वादिनामकीर्तनात्सांगता ॥ प्रायश्चित्ताद्यसंभवेपि मरणकाले विष्णुशिवनामकीर्तनमात्रात्सर्वपापक्षयो मुक्तिश्चेति सर्वपुराणादिसिद्धांतः ॥ तथा च श्रीभागवते ॥ "यस्यावतारगुणकर्मविडंबनानि नामानि येऽसुविगमे विवशा गृणंति ॥ ते नैकजन्मशमलं सहसैव हित्वा संयांत्यपावृतमृतं तमजं प्रपद्ये ॥" इत्यादि ॥ "मुमूर्षुं पितरं पुत्रो यदि दानं प्रदापयेत् ॥ तद्विशिष्टं गयाश्राद्धादश्वमेधशतादपि ॥" तानि च तिलपात्रदानऋणधेनुमोक्षधेनुपापधेनुवैतरणीधेनूत्क्रांतिधेनुदानादीनि ॥ "व्यतीपातोथ संक्रांतिस्तथैव ग्रहणं रवेः ॥ पुण्यकालास्तदा सर्वे यदा मृत्युरुपस्थितः ॥ आसन्नमृत्युना देया गौः सवत्सा तु पूर्ववत् ॥ तदभावे तु गौरेव नरकोत्तारणाय वै ॥ शुक्लपक्षे दिवा भूमौ गयांगा चोत्तरायणे ॥ धन्यास्तात मरिष्यंति हृदयस्थे जनार्दने ॥" इत्यादिवचनात् ॥ मुमूर्षोर्दानादौ शक्त्यभावे पुत्रादिर्दद्यात् ॥ तत्र तिलपात्रदानविधिः ॥ यथाशक्ति कांस्यपात्रे ताम्रपात्रे वा तिलान्निक्षिप्य सुवर्णं च प्रक्षिप्य मम जन्मप्रभृतिमरणांतं कृतनानाविधपापप्रणाशार्थं तिलपात्रदानं करिष्ये ॥ विप्रं संपूज्य मम जन्मप्रभृति मरणांतं कृतनानाविधपापनाशार्थमिदं तिलपात्रं ससुवर्णं सदक्षिणममुकशर्मणे तुभ्यं संप्रददे ॥ "तिलाः पुण्याः पवित्राश्च तिलाः सर्वकराः स्मृताः॥शुक्ला वा यदि वा कृष्णा ऋषिगोत्रसमुद्भवाः ॥ यानि कानि च पापानि ब्रह्महत्यासमानि च ॥ तिलपात्रप्रदानेन मम पापं व्यपोहतु॥" न ममेति विप्रहस्ते जलं क्षिपेत् ॥ पुत्रादिस्त्वस्य जन्मप्रभृतीत्यादिसंकल्प्य अस्य पापं व्यपोहत्विति मन्त्रं च वदेत् ॥ "ऐहिकामुष्मिकं यच्च सप्तजन्मार्जितं ऋणम् ॥ तत्सर्वं शुद्धिमायातु गामेकां ददतो मम ॥" इति ऋणधेनुदानमंत्रः ॥ अन्यत्सर्वं सामान्यगोदानवत् ॥ तद्विधिस्तु द्वितीयपरिच्छेदे उक्तः ॥ "मोक्षं देहि हृषीकेश मोक्षं देहि जनार्दन ॥ मोक्षधेनु-

प्रदानेन मुकुंदः प्रीयतां मम ॥" इति मोक्षधेनुमंत्रः ॥ "आजन्मोपार्जितं पापं मनोवाक्कायकर्मभिः ॥ तत्सर्वं नाशमायातु गोप्रदानेन केशव ॥" इति पापधेनुदानमंत्रः ॥

## अथ वैतरणीविधिः ।

अद्येत्याद्यमुकस्य मम यमद्वारस्थितवैतरण्याख्यनद्युत्तारणार्थं गोदानं करिष्ये ॥ विप्रं पादप्रक्षालनवस्त्रगंधमाल्यादिभिरभ्यर्च्य तद्धस्ते शिवा आपः संतु ॥ सौमनस्यमस्तु ॥ अक्षतं चारिष्टं चास्तु ॥ यच्छ्रेयस्तदस्तु ॥ यत्पापं तत्प्रतिहतमस्त्विति कृत्वा ॥ "धेनुके त्वं प्रतीक्षस्व यमद्वारे महापथे ॥ उत्तितीर्षुरहं देवि वैतरण्यै नमोस्तु ते ॥" इति धेनुं प्रार्थ्य "विष्णुरूप द्विजश्रेष्ठ भूदेव द्विजपावन ॥ तर्तुं वैतरणीमेतां कृष्णां गां प्रददाम्यहम् ॥" इति विप्रं प्रार्थ्य ॥ वैतरणीसंतारणार्थमिमां गां कृष्णवस्त्ररक्तमाल्याद्यलंकृतां यथाशक्ति दक्षिणायुतां तुभ्यमहं संप्रददे ॥ "यमद्वारे पथे घोरे घोरा वैतरणी नदी ॥ तां तर्तुकामो यच्छामि कृष्णां वैतरणीं तु गाम्॥" न ममेति विप्रहस्ते जलं क्षिपेत् कृष्णाया अभावेऽन्यवर्णा देया ॥ गोरभावे द्रव्यं देयम् ॥ पुत्रादिर्दाता चेत्प्रथमे मंत्रे उत्तितीर्षुर्यमिति पठेत् ॥ द्वितीये तर्तुं वैतरणीमस्येति ॥ तृतीये तां तर्तुमस्येति ॥

## अथोत्क्रांतिधेनुः ।

अद्येत्याद्यमुकस्य सुखेन प्राणोत्क्रमणप्रतिबंधकसकलपापक्षयद्वारा सुखेन प्राणोत्क्रमणार्थं यथाशक्त्यलंकृतामिमामुत्क्रांतिधेनुं रुद्रदैवत्यामुकशर्मणे तुभ्यं संप्रददे ॥ गवामंगेष्विति मंत्रांते न ममेति वदेत् ॥ धेन्वभावे द्रव्यं देयम् ॥ उक्तप्रायश्चित्तादिदानांतविधिमकृत्वा पित्रादिमरणे पुत्रादिना प्रायश्चित्तं कृत्वा दाहादि कर्तव्यम् ॥ दानान्येकादशाहे कार्याणि ॥ पितुः पापाभावनिश्चये प्रायश्चित्तं नावश्यकम् ॥ केचिदुत्क्रांतिवैतरण्यौ दश दानानि चैव हि मृतेपि कृत्वा तं प्रेतं दहेदित्याहुः ॥ "तुलसीसन्निधौ कुर्याच्छालग्रामशिलां तथा ॥" केचित्तिललोहहेमकार्पासलवणभूमिधेनुसप्तधान्येत्यष्टदानान्याहुः ॥ क्वचिन्मुमूर्षोर्मधुपर्कदानमुक्तम् ॥ *

## अथ क्षौरविचारः ।

पुत्रादिः कर्तात्यकर्माधिकारार्थं कृच्छ्रत्रयादिकं वपनं च कुर्यात् ॥ तत्र मातापित्रोः सापत्नमातुः पितृव्यस्य ज्येष्ठभ्रात्रादेश्चांत्यकर्मकरणे क्षौरमावश्यकम् ॥ पुत्राणां कर्तृभिन्नानामपि क्षौरं नित्यम् ॥ एवं पत्न्या अपि प्रथमे दशमेह्नि वा क्षौरं नित्यम् ॥ तथा दत्तकस्य पूर्वापरयोर्मात्रोः पित्रोर्मृतौ क्षौरम् ॥ "रात्रौ तु दग्ध्वा पिंडांतं कृत्वा वपनवर्जितम् ॥ वपनं नेष्यते रात्रौ श्वस्तनी वपनक्रिया ॥"

पत्नीपुत्रकनिष्ठभ्रात्रादेरंत्यकर्मणि क्षौरं न कार्यम् ॥ अन्यत्र कृताकृतम् ॥ श्मशाने नीयमानशवस्य शूद्रस्पर्शे शूद्रेण वहने वा ॥ "कुंभे सलिलमादाय पंचगव्यं तथैव च ॥ सुमंत्रैराभिमंत्र्यापस्तेन संस्नाप्य दाहयेत् ॥" कृच्छ्रत्रयं च कुर्यात् ॥ सूतिकारजस्वलयोः स्पर्शेप्येवमेव प्रायश्चित्तं तु पंचदश कृच्छ्राः ॥ शूद्रेण द्विजदाहे तु चांद्रायणं पराकप्राजापत्यानि समुच्चयेन पुत्रादिः कृत्वाऽस्थीनि पुनर्दहेत् ॥ अस्थ्यभावे पालाशविधिः ॥ ऊर्ध्वोच्छिष्टाधरोच्छिष्टोभयोच्छिष्टेषु कृच्छ्रत्रयम् ॥ अस्पृश्यस्पर्शने षट् कृच्छ्राः॥ अंतरालमृतौ नव ॥ खट्वामरणे द्वादश ॥ निगडमृतौ पंचदश ॥ रजकादिसप्तविधांत्यजादिस्पृष्टमरणे त्वेकत्रिंशत्कृच्छ्राणि ॥ देशांतरमरणे पराकद्वयमष्टौ कृच्छ्रा वा ॥ "कृच्छ्रत्रयं प्रकुर्वीत आशौचमरणेपि च ॥" अर्धदग्धे शवे चितेरस्पृश्यस्पर्शे कृच्छ्रत्रयम्॥ एवं पुत्रादयः पित्रादेः पापिनः पापानुसारेण प्रायश्चित्तकांडोक्तं प्रायश्चित्तं दुर्मरणात्मघातादिनिमित्ते पूर्वोक्तप्रायश्चित्तं नारायणबल्यादिकं च कृत्वैवांत्यकर्म कुर्युः ॥ एवमुक्तप्रायश्चित्तं विना दाहादि कृतं व्यर्थं भवेत् ॥ उभयोश्च नरकः ॥ पतिपत्न्योरेककाले दहने प्राप्ते भार्यायाः पत्या सह तद्विवचनांतमंत्रोहेन दाहं कृत्वा पिंडादिकं पतिपूर्वकं पृथक्कार्यम् ॥ एवं सपत्नीनामेककाले मृतौ सहैव दाहः पिंडादिकं तु ज्येष्ठक्रमेण पृथगेव ॥ एवं पितापुत्रयोर्भ्रात्रोश्च लौकिकाग्निदाह्ययोर्दाहः सहैव पिंडादि पितृपूर्वं ज्येष्ठपूर्वं च पृथक् ॥ पुंबालानां स्त्रीबालानां च दहने खनने चैवमेवेति नागोजीभट्टीये ॥ रजस्वलागर्भिण्यादिमरणे सहगमने च वक्ष्यते ॥

## अथांतकाले सूक्तश्रवणसंकल्पः ।

अथ गोमयोपलिप्तभूमौ कुशेषूपविष्टो दक्षिणशिराः शयितो वा गोपीचंदनादिमृदा कृततिलकः श्रीविष्णुं स्मरन् पुण्यसूक्तं गीतां सहस्रनामादिस्तोत्राणि पठेच्छृणुयाद्वा ॥ अमृतत्वप्राप्त्यर्थं पुण्यसूक्तस्तोत्रादीनां पाठं श्रवणं वा करिष्ये इति संकल्पः ॥ श्रोतुः संकल्पाशक्तौ श्रावयितास्यामुकशर्मणोमृतत्वप्राप्तयेऽमुकं श्रावयिष्य इति संकल्पयेत् ॥ नानानमितिसूक्तं पुरुषसूक्तं विष्णुसूक्तमुपनिषद्वागा इत्यादिपुण्यसूक्तानि ॥ रामकृष्णादिनामस्मरणे जातमात्रस्याधिकारः ॥

## अथ साग्नेर्विशेषः ।

गृह्याग्निमतो गृह्याग्निना श्रौताग्निमतस्त्रेताग्निभिर्दाहः कार्यः ॥ तत्र गृह्याग्निमतः श्रौताग्निमतश्च कृष्णपक्षे मरणे तदैव सायंकालाहुतीर्दर्शसायंकालपर्यंताः पक्षहोमवत्सकृद्ग्रहणेनैव हुत्वा पुनः संकल्पपूर्वकं प्रातराहुतीश्च प्रतिपत्प्रातर्होमांतास्तद्वदेव हुत्वा दर्शयागं कुर्यात् ॥ यागासंभवे आज्यं संस्कृत्य स्रुचि चतुर्वारं गृहीत्वा पुरोनुवाक्यायाज्याभ्यामेकैकां प्रधानाहुतिं जुहुयात् ॥ स्मार्ते तु

चतुर्गृहीताज्येनाग्नये स्वाहेंद्राग्निभ्यां स्वाहेति नाम्नैव प्रधानाहुतिद्वयम् ॥ शुक्लपक्षे रात्रौ मरणे सायं होमस्य कृतत्वात्प्रातर्होममात्रमाकृष्य तदैव कुर्यात् ॥ नात्र पौर्णमांतानां दर्शांतानां वा होमानामिष्टिप्रधानपूर्णाहुतीनां वा करणम् ॥ शुक्लपक्षे दिवामरणे तु न कस्यापि होमस्याकर्षणम् ॥ एवं कृष्णपक्षमरणेपि दैवात्पूर्णमासेष्ट्यतिक्रमे होमापकर्षप्रधानपूर्णाहुत्यादिकं च कृताकृतमनारब्धत्वादिति भाति ॥ करणपक्षेतिक्रांतपूर्णमासपूर्णाहुतीर्हुत्वा पक्षहोमान्कृत्वादर्शपूर्णाहुतयः कार्याः ॥ "अग्नावरण्योराहूढे प्रमीयेत पतिर्यदि ॥ प्रेतं स्पृष्ट्वा मथित्वाग्निं जप्त्वाचोपावरोहणम् ॥ घृतं च द्वादशोपात्तं तूष्णीं हुत्वा शवक्रिया ॥" विच्छिन्नश्रौताग्नेर्मृतौ तु प्रेताधानं कार्यम् ॥ तद्यथा ॥ प्रेतं स्वाग्न्यालये क्षिप्त्वाऽरणी संनिधाप्य ॥ यस्याग्नयो जुह्वतो मांसकामाः संकल्पयंते यजमानमांसम् ॥ जायंतु ते हविषे सादिताय स्वर्गं लोकमिमं प्रेतं नयंत्विति यजुर्मंत्रेण मथित्वाग्निमायतने प्रणीय द्वादशगृहीताज्येन तूष्णीं हुत्वा तेन दाहादि कार्यम् ॥ "नष्टेष्वग्निष्वथारण्योर्नाशे स्वामी म्रियेत चेत् ॥ आहरेदरणीद्वंद्वं मनोज्योतिर्ऋचा ततः ॥" शेषं प्राग्वत् ॥ स्मार्ताग्निमतः स्मार्ताग्निर्यदि विच्छिन्नस्ततो यतो विच्छेदस्तावत्कालगणनया पूर्वार्धोक्तरीत्या प्रायश्चित्तं तदैव कुर्यात्संकल्पयेद्वा ॥ प्रायश्चित्तांते होमद्रव्यं स्थालीपाकद्रव्यं च तावत्कालगणनया देयम् ॥ ततोरणिपक्षे पूर्ववदरणिमंथनम् ॥ पक्षांतरेमुकशर्मणोग्निविच्छेदनिमित्तकं दाहायाग्निसिद्ध्यर्थं प्रेताधानं करिष्ये इति संकल्प्यायतने संभाराग्निक्षिप्य लौकिकाग्निं प्रतिष्ठाप्याज्यं संस्कृत्यायाश्चेति मंत्रेण यस्याग्नय इति पूर्वोक्तमंत्रेण च हुत्वा व्याहृतिचतुष्टयं जुहुयात् ॥ एवमौपासनः सिद्धो भवति ॥ पत्नीमरणेप्येवमेवमिति भट्टाः ॥ एवं विधुरस्यापि श्रौताग्निगृह्याग्निपरिग्रहसत्त्वे यथायथं तत्तदग्निभ्यां दाहः ॥ विधुरस्याग्निपरिग्रहोत्तरं तद्विच्छेदे पूर्वोक्तरीतिभ्यां तत्तदग्न्योराधानम् ॥ अगृहीतगृह्याग्निकयोः सभार्यविधुरयोर्ब्रह्मचारिसमावृत्तयोश्चानुपनीताविवाहितपुत्रकन्ययोश्च निरग्निकभार्याविधवयोश्च कपालाग्निना लौकिकाग्निना वा दाहः ॥ अग्निवर्णकपाले करीषादिनोत्पादितो भूर्भुवः स्वः स्वाहेत्याज्याहुत्या संस्कृतोग्निः कपालाग्निः ॥ लौकिकाग्निश्चांत्यजाग्निपतिताग्निसूतिकाग्निचिताग्न्यमेध्याग्निभिन्नो ग्राह्यः ॥ "यस्यानयति शूद्रोग्निं तृणकाष्ठहवींषि वा ॥ प्रेतत्वं च सदा तस्य शूद्रः पापेन लिप्यते ॥" आहिताग्निदंपत्योः पूर्वं पतिमरणे पत्युः सर्वाग्निभिर्दाहः ॥ पश्चान्मृतभार्यायास्तु निर्मथ्याग्निना कपालाग्निना वा ॥ पूर्वं भार्यामरणे तु तस्यापि सर्वाग्निभिर्दाहः कार्यः ॥ सर्वपात्राण्यपि तस्यै देयानि ॥ पश्चान्मृतस्य तु पत्युः पुनराधानेन त्रेताग्निसत्त्वे तेन दाहः ॥ आधानाकरणे निर्मथ्येन लौकिकाग्निना वेति केचित् ॥ याज्ञिकाचारोपि

१ सपत्नीकस्यापि दायाद्यपेक्षाश्रयेणागृहीताग्नित्वं ज्ञेयम् ।

प्रायेणैवमेव ॥ अत्र निर्णयसिंधुः ॥ "साग्नेः पत्नीमृतौ द्वौ पक्षौ ॥ पुनर्विवाहेच्छायां पूर्वाग्निभिर्भार्यां दग्ध्वा पुनर्दारक्रियां कुर्यात्पुनराधानमेव चेत्येकः पक्षः ॥ दाहयित्वाग्निहोत्रेण स्त्रियं वृत्तवतीं पतिः "इत्यादिवचनजातानि पुनर्विवाहेच्छुपराण्येव ॥ पुनर्विवाहाशक्तो निर्मथ्याग्निना तां दग्ध्वा पूर्वाग्निष्वेवाग्निहोत्रहोमेष्ट्यादिचातुर्मास्यादिकार्यम् ॥ सोमयागो न कार्यः ॥ पूर्वाग्न्येकदेशेन दहेदिति यज्ञपार्श्वदेवयाज्ञिकादयः ॥ यानि तु तस्मादपत्नीकोप्यग्निहोत्रमाहरेदिति श्रुतिस्मृत्यादिवचनानि तानि पूर्वाग्निष्वेवाग्निहोत्रपराणि नत्वपत्नीकस्याधानार्थानि ॥ अपत्नीकस्याधानं विधायकमूलवचनाभावात् ॥ दारकर्मणि यद्यशक्त आत्मार्थमग्न्याधेयमित्यापस्तंबसूत्रं तु पुनर्विवाहाशक्तौ पूर्वकृतमग्न्याधेयमात्मार्थमेव स्थाप्यं न पत्न्यै दद्यादित्येवं परम् ॥ ब्राह्मणभाष्यापरार्कशार्करामांडारादिमतमप्येवमेव ॥ येत्वपत्नीकस्याधानमाहुस्तदाशयं न विद्म इति ॥ इदं निर्णयसिंधुमतमेव युक्तं भाति ॥ याज्ञिकानामाचारस्त्वंतर्गूढविवाहेच्छामूलको न प्रामाण्यापादकः ॥ पुनर्विवाहाशयासर्वाग्निदाने पश्चाद्विवाहासंभवे सिंधुमते आधानाभावान्निर्मथ्याग्निरेव शरणम् ॥ केषांचिन्मते पुनराधानम् ॥ अत्र निर्मथ्यादिना पूर्वमृतभार्यादाहपक्षे पूर्वाग्निनामुत्सर्गेष्ट्या त्यागं कृत्वा पुनराधानं कृत्वाग्निहोत्रं कार्यमिति केचिदाहुः ॥ एवं स्मार्ताग्निमतः पूर्वं भार्यामरणेपि गृह्याग्न्येकदेशेन तां दहेदवशिष्टाग्नौ नित्यहोमस्थालीपाकाग्रयणानि कार्याणि ॥ अत्र सर्वत्र श्रौते स्मार्ते च कुशपत्नीविधानेनैवाधानादिकर्माधिकारः ॥ अनेकभार्यस्य ज्येष्ठायां जीवत्यां कनिष्ठभार्यामरणे निर्मथ्यादिना तां दहेत् न श्रौतस्मार्ताग्निभिः ॥ केचित्पूर्वं सर्वाग्निभिः कनिष्ठां दग्ध्वा ज्येष्ठया सह पुनराधानं कार्यमित्याहुस्तदग्निद्वयसंसर्गपरं मतांतरपरं वा बोध्यम् ॥ दाहकालेग्निनाशे तु "यजमाने चितारूढे पात्रन्यासे कृते सति ॥ वर्षाद्यभिहते वह्नौ चिताग्निस्थे कथंचन ॥ तदार्धदग्धकाष्ठानि तानि निर्मथ्य तं दहेत् ॥"

## अथ गृहाच्छ्मशाने शवनयनप्रकारः ।

तत्र विप्रं प्रेतं नगरपश्चिमद्वारेण शूद्रं दक्षिणद्वारेण निःसार्य सजातीयाः शवं प्रच्छादितमुखं प्राक्शिरसं दाहदेशं नयेयुः ॥ पूर्वोक्तोग्निः शवाग्रेऽन्येन नेतव्यः॥ प्रेताग्न्योर्मध्येऽन्येन न गंतव्यम् ॥ सर्वे सपिंडादयोधःकृतोपवीता मुक्तकेशा ज्येष्ठपुरःसराः प्रेतमनुगच्छेयुः ॥ प्रेतश्च नग्नो न दग्धव्यः ॥ निःशेषतश्च न दाह्यः शववस्त्रं च श्मशानवासिभ्यो देयम् ॥ प्रेतश्च केशनखादि वापयित्वा संस्नाप्य गंधपुष्पाद्यैरलंकृत्य दग्धव्यः ॥ दिने मृतौ दिवैव दाहो रात्रिमृतस्य रात्रावेव॥ दिवा वा रात्रौ वा स्थितः शवः पर्युषितः ॥ पर्युषितशवं पंचगव्येन स्नापयित्वा

प्राजापत्यत्रयं कृत्वा दहेत् ॥ मुखस्थसप्तच्छिद्राणि हिरण्यशकलैश्छादयेत् ॥ अत्र पात्रन्यासो मंत्रवदाहादिविधिश्च स्वस्वसूत्रानुसारिश्रौतस्मार्त्येष्टिप्रयोगेषु ज्ञेयः॥ ततो दाहांते घटस्फोटादिकं कार्यम् ॥ शिलाविपर्ययेपि घटस्फोटस्य नावृत्तिः ॥ ततश्चितामप्रदक्षिणं सर्वे पर्य्यावृत्य सचैलं स्नात्वाचम्य सगोत्रसपिंडसमानोदकानां मातामहीमातामहयोराचार्यादेश्च दुहितृभगिन्योश्चावश्यं तिलांजलिं दद्युः ॥ तद्यथा वृद्धपूर्वा दक्षिणामुखा अमुकगोत्रनामा प्रेतस्तृप्यत्विति मंत्रेणांजलिना तद्दत्त्वाषाणे सिंचेयुः ॥ अत्र स्नानोदकदानेऽपनः शोशुचदघमिति मंत्रेण ॥ स्नानमेव तेन मन्त्रेणेत्यन्ये ॥ स्त्रीणां तु मंत्रो नास्ति ॥ मातुलपितृष्वसृमातृष्वसृस्वस्रीयश्वशुरमित्रयाजकादीनामुदकदानं कृताकृतम् ॥ करणपक्षेपि नाश्मन्येवेति नियमः ॥ व्रात्यब्रह्मचारिपतितव्रतिक्लीवचोराश्च नोदकं दद्युः ॥ तत्र व्रात्या यथाकालमुपनयनहीनाः ॥ व्रतिनः प्रक्रांतप्रायश्चित्ताः ॥ चोराः सुवर्णतत्समद्रव्यापहारिणः ॥ ब्रह्मचारिभिर्मातापितृपितामहमातामहगुर्वाचार्यादीनामुदकदानं कार्यम् ॥ प्रक्रांतप्रायश्चित्तैस्तु तदंते उदकदानं त्रिरात्राशौचं च कार्यम् ॥ व्रात्यादिभिः प्रेतस्पर्शवहनदाहपिंडादिकमपि न कार्यम् ॥ अन्याभावे ब्रह्मचार्यपि पित्रादेर्दाहमाशौचं कुर्यात्कर्मलोपस्तु नास्तीत्युक्तम् इदं चोदकदानमेकवाससाऽपसव्येनैव ॥ उदकदानोत्तरं पुनः स्नात्वा वस्त्राणि निष्पीड्य कुलवृद्धाः पुत्रादीन्पूर्वेतिहासैः समाश्वास्य विप्रानुमत्या कनिष्ठानुक्रमेण गृहं गत्वा निंबपत्राणि शनैर्भक्षयित्वाचम्याग्न्युदकगोमयादीन्स्पृष्ट्वा द्वाराश्मनि पदं निधाय गृहं प्रविशेयुः ॥ निंबपत्र भक्षणं कृताकृतम् ॥ ततस्तद्दिने उपवसेयुः ॥ उपवासाशक्तावयाचितलब्धेनान्यगृहपक्वेन वा केनैव हविष्यान्नेन वर्तेरन् ॥ तत्राशौचमध्ये माषमांसापूपमधुरलवणदुग्धाभ्यंगतांबूलक्षाराणि वर्ज्यानि ॥ क्षाराणि तु ॥ "तिलमुद्गादते शैव्यस्सये गोधूमकोद्रवौ ॥ धान्याकं देवधान्यं च शमीधान्यं तथैव च ॥ स्विन्नधान्यं तथा पण्यं मूलं क्षारगणः स्मृतः ॥" केचित्सैंधवं भक्ष्यमित्याहुः ॥ आदर्शस्त्रीसंगद्यूतादिहसनरोदनोच्चासनानि नित्यं त्यजेयुः ॥ बालवृद्धातुरं वर्ज्यं तृणकटास्तीर्णभूमौ पृथक् शयीरन्न कंबलाद्यास्तीर्णभूमौ ॥ मार्जनादिरहितमेव स्नानम् ॥ अस्थिसंचयनादूर्ध्वं भार्यापुत्रव्यतिरिक्तानां शय्यासनादिभोगोस्त्येव ॥ स्त्रीसंगस्तु नास्ति ॥ अस्थिसंचयनं तु समंत्राग्निदाहदिनादारभ्य प्रथमदिने द्वितीये तृतीये चतुर्थे सप्तमे नवमे वा गोत्रजैः सह स्वस्वसूत्रोक्तप्रकारेण कार्यम् ॥ तत्र द्विपादत्रिपादनक्षत्राणि कर्तुर्जन्मनक्षत्रं च वर्ज्यम् ॥ संभवेर्कभौमभंदवारा वर्ज्याः ॥ पालाशदाहास्थिदाहयोः सद्यः संचयनम् ॥ अस्थां गंगांभसि तीर्थान्तरप्रक्षेपः ॥ तद्विधिर्वक्ष्यते ॥ अरण्ये वृक्षमूले निखननं वा ॥ "अस्थीन्य-

न्यकुलस्थस्य नीत्वा चांद्रायणं चरेत् ॥''दययान्यस्यापि नयने महापुण्यम् ॥ अस्थ्नां श्वसूकरशूद्रादिस्पर्शे पंचगव्यशालग्रामतुलस्युदकैः प्रोक्षणम् आशौचमध्ये स्वगोत्रजैः सह भोक्तव्यं तच्च दिवैव ॥ भोजनं च मृन्मयेषु पर्णपुटेषु वा कार्यं न तु धातुपात्रेषु ॥ दाहदिनादारभ्य दशपिंडा दशदिनमध्ये दर्भास्तीर्णभूमावमंत्रकं देयाः ॥ क्षत्रियादीनां नव पिंडाः नवदिनांतं दशमपिंडस्त्वाशौचांत्यदिने ॥ प्रथमेहनि यो देशो यश्च कर्ता यच्च तंडुलादिद्रव्यं यच्चोत्तरीयशिलापाकपात्रादि तदेव दशाहांतम् ॥ एतदन्यतमव्यत्यये यतो व्यत्ययस्ततः पुनरावृत्तिः ॥ शिलाविपर्ययेपि घटस्फोटादेर्नावृत्तिरित्युक्तेर्लौकिकशिलाग्रहणम् ॥ तेन पिंडदानतिलांजल्यादिकस्यैवावृत्तिर्न दाहस्य ॥ केचिदाचार्यविपर्ययेप्यावृत्तिमाहुः ॥

## अथारब्धे पिंडादिके विचारः ।

यत्र पुत्रादिमुख्यकर्तुरसन्निधानादमुख्याधिकारिणा पिंडदानक्रियारब्धा तत्र मध्ये पुत्रादिसन्निधानेप्यमुख्यकर्त्रैव दशाहांता क्रिया समापनीया ॥ एकादशाहादिकं तु पुत्रादिमुख्येनैव ॥ समंत्रकदाहमात्रेन्येन कृते तु पिंडदानादिदशाहकृत्यं सन्निकृष्टमुख्येनैव कार्यमिति मिताक्षरादयः ॥ अन्ये तु सगोत्रोसगोत्रो वा यः समंत्रकदाहकर्ता स एव दशाहकृत्यं कुर्यादित्याहुः ॥ पत्न्याः कर्तृत्वे रजोदर्शने जाते सा तदंते कुर्यात् ॥ कर्तुरस्वास्थ्येन्येन सर्वाः क्रियाः पुनः कार्याः ॥ पिंडद्रव्येषु तण्डुला मुख्याः ॥ तदभावे फलमूलशाकतिलमिश्रसक्तवोपि ॥ प्रेतश्राद्धेषु पितृशब्दस्वधाशब्दानुशब्दाः पुष्पधूपदीपदानादौ मंत्राश्च न वाच्याः ॥ त्र्यहाशौचे पर्णशरदाहादौ प्रथमे दिने एकः पिंडः ॥ द्वितीये चत्वारः ॥ तृतीये पंचेति क्रमो बोध्यः ॥ पुत्रेण पर्णशरदाहे कृते तु तस्य दशाहाशौचात्तेन त्र्यहमध्ये पिंडसमाप्तिर्न कार्या ॥ ''शिरस्त्वाद्येन पिंडेन प्रेतस्य क्रियते सदा॥''द्वितीयेन तु कर्णाक्षिनासिकाः ॥ तृतीयेन कंठस्कंधभुजवक्षांसि ॥ चतुर्थेन नाभिलिंगगुदानि ॥ पंचमेन जानुजंघपादम् ॥ षष्ठेन मर्माणि ॥ सप्तमेन नाड्यः ॥ अष्टमेन दंतलोमानि ॥ नवमेन वीर्यम्॥ ''दशमेन तु पूर्णत्वं तृप्तता क्षुद्विपर्ययः ॥ जलं दशाहमाकाशे स्थाप्यं क्षीरं च मृन्मये ॥'' प्रेतात्र स्नाहीत्युदकम् ॥ इदं पिबेति च क्षीरम् ॥ इदं च कृताकृतम् ॥ ''ततः प्रेतोपकृतये दशरात्रमखंडितम् ॥ कुर्यात्प्रदीपं तैलेन वारिपात्रं च मार्तिकम् ॥ भोज्याद्भोजनकाले तु भक्तमुष्टिं च निर्वपेत् ॥ नामगोत्रेण संबुध्य धरिण्यां पितृयज्ञवत् ॥ भूर्लोकात्प्रेतलोकं तु गंतुं श्राद्धं समाचरेत् ॥ तत्पाथेयं हि भवति मृतस्य मनुजस्य च ॥''

## अथ दशाहमध्ये दर्शपाते निर्णयः ।

पिंडदानादौ प्रारब्धे यदि मध्ये दर्शप्राप्तिस्तदा मातापितृव्यतिरिक्तानां सर्वं दशाहकृत्यमाकृष्य दर्श एव समापनीयम् ॥ मातापितृविषये तु त्र्यहमध्ये दर्श-

पाते नापकर्षः ॥ त्रिरात्रात्परं दर्शपाते तु पित्रोरपि सर्वं दर्शे एव समापनीयमिति केचित् ॥ अन्ये तु त्रिरात्रोर्ध्वमपि दर्शपाते औरसपुत्रेण पित्रोस्तंत्रसमाप्तिर्न कार्येत्याहुः ॥ अत्र देशाचाराद्व्यवस्थेति सिंध्वादयः ॥ यदि दैवाद्दर्शात्पूर्वं पिंडदानादि तंत्रं नारब्धं तदा दाहमात्रे समंत्रके जातेपि न दर्शे तंत्रसमाप्तिर्नियम इति भाति ॥ दर्शोत्तरमेव तंत्रारंभसमाप्तिसंभवेन द्विरैन्दवे तु कुर्वाणः पुनः शावं समश्नुत इत्युक्तदोषाप्रसक्तेः ॥ एवं दर्शेपकृष्य तंत्रसमाप्तावप्यग्निपिंडदातुर्दशाहमाशौचमस्त्येव ॥ पुत्रादेः सपिंडस्य तु सुतरां दशाहम् ॥ प्रेतपिंडान्प्रदायास्नात्वा भुक्तावसपिंडस्य त्रिरात्रोपवासः ॥ सपिंडस्योपवास एकः ॥ मत्या द्विगुणम् ॥ प्रेतकृत्यं कुर्वतां संचयनादर्वाक् स्त्रीसंगे कृते चांद्रायणम् ॥ ऊर्ध्वं कृच्छ्रत्रयम् ॥ अन्येषामाशौचिनां संचयनादर्वाक्त्रिरात्रं तदुत्तरमेकोपवासः ॥

## अथ नवश्राद्धम् ।

"प्रथमेह्नि तृतीये च पंचमे सप्तमे तथा ॥ नवमैकादशे चैव तन्नवश्राद्धमुच्यते ॥ नवश्राद्धानि पंचाहुराश्वलायनशाखिनः ॥ आपस्तंबाः षडित्याहुर्विभाषा त्वितरेषु हि ॥" पंचपक्षे एकादशाहे नवश्राद्धं न कार्यम् ॥ एतान्येव विषमश्राद्धानीत्युच्यंते ॥ नवश्राद्धानि दशाहांतर्नवमिश्रं तु वत्सर इत्यन्यत्र ॥ "अकृत्वा तु नवश्राद्धं प्रेतत्वान्नैव मुच्यते ॥ नवश्राद्धं त्रिपक्षं षाण्मासिकं मासिकानि च ॥ न करोति सुतो यस्तु तस्याधः पितरो गताः "॥

## अथ प्रेतश्राद्धधर्माः ।

"अर्घ्यहीनमधूपंचगंधमाल्यविवर्जितम् ॥ नवश्राद्धममंत्रं स्यादवनेजनवर्जितम् ॥ आशिषो द्विगुणा दर्भा जयाशीः स्वस्तिवाचनम् ॥ पितृशब्दः स्वसंबंधः शर्मशब्दस्तथैव च ॥ पात्रालंभोवगाहश्च उल्मुकोल्लेखनादिकम् ॥ तृप्तिप्रश्नश्च विकिरः शेषप्रश्नस्तथैव च ॥ प्रदक्षिणाविसर्गश्च सीमांतगमनं तथा ॥ अष्टादशपदार्थाश्च प्रेतश्राद्धे विवर्जयेत् ॥" तिलोसीतिमंत्रे स्वधानमःपितृशब्दा न वाच्याः ॥ किंतु प्रेतशब्दोहेन तूष्णीं वा तिलावपनम् ॥ तूष्णीमर्घ्यदानम् ॥ अमुष्मै स्वाहेति प्रेतनाम्ना पाणिहोमः॥ बहृवृचानां सर्वैकोद्दिष्टेष्वग्नौकरणमस्त्येव ॥ अन्यशाखिनां तु तन्निषेधः नाम्नैकः पिंडः ॥ निनयनमंत्रे ऊहः ॥ अनुमंत्रणादिकं त्वमंत्रकम् ॥ अभिरम्यतामिति विसर्जनम् ॥ एवं नवश्राद्धवर्ज्यैकोद्दिष्टेषु ॥ नवश्राद्धं त्वमंत्रकं सर्वमिति नारायणवृत्तिः ॥ "उत्तानं स्थापयेत्पात्रमेकोद्दिष्टे सदा बुधः ॥ न्युब्जं तु पार्वणं कुर्यात्तस्योपरि कुशान्न्यसेत् ॥" सपिंडीकरणांतानि प्रेतश्राद्धानि लौकिकामावित्याश्वलायनमतम् ॥ नवश्राद्धानि संभवेऽन्नेन कुर्यादन्यथामान्नेन ॥ विघ्ने तु नवश्राद्धं मासिकं च यद्यदंतरितं भवेत्तत्तदुत्तरश्राद्धेन

सह तंत्रेण कार्यम् ॥ शावे आशौचांतरप्राप्तौ नवश्राद्धानि कुर्यादेव ॥ सहगमने तु नवश्राद्धानि सर्वाणि सपिण्डीकरणं पृथक् ॥ "एक एव वृषोत्सर्गो गौरेका तत्र दीयते ॥" शूद्रस्यामंत्रकं सर्वं द्विजवन्नाम्नैव कार्यमिति स्मृत्यर्थसारः ॥ अत्र वयोधिकमरणे तत्कनिष्ठानां सपिंडानां दशमेहनि मुंडनं केचिदाहुः ॥ मातापित्राचार्येषु मृतेषु नियमेन दशमेहनि मुंडनम् ॥ एवं भर्तरि मृते स्त्रिया अपि मुंडन नियमः ॥ पुत्राणां सर्वेषां दाहकर्तुश्च दाहांगभूतं प्रथमादिने दशमादिने च मुंडनम् ॥ अत्र देशाचाराद्यवस्था ॥ अत्र रात्रिमृतस्य रात्रौ दाहेपि प्रातरेव मुंडनमित्युक्तम् ॥ ततो दशमेहनि पूर्ववस्त्रशुद्धिं गृहशुद्धिं च कृत्वा गौरसर्षपतिलकल्केन सशिरः स्नानं कृत्वा नववस्त्रे परिधाय परिहितवस्त्राणि प्रेतवस्त्राणि चांत्यजेभ्य आश्रितेभ्यश्च दत्त्वा सुवर्णादीनि मंगलवस्तूनि स्पृष्ट्वा गृहं प्रविशेत् ॥

## अथास्थिक्षेपविधिः ।

तत्रादौ संचयनदिनेस्थिस्थापनप्रकारः ॥ "प्रेतस्थाने बलिं दत्त्वा क्षीरेणाभ्युक्ष्य वाग्यतः ॥ प्रेतस्यास्थीनि गृह्णीयात्प्रधानांगोद्भवानि च ॥ पंचगव्येन संस्राप्य क्षौमवस्त्रेण वेष्टय च ॥ प्रक्षिप्य मृन्मये भांडे नवे साच्छादने शुभे ॥ अरण्ये वृक्षमूले वा शुद्धे संस्थापयेदथ ॥ सूक्ष्मान्यस्थीनि तद्भस्म नीत्वा तोये विनिक्षिपेत् ॥ ततः संमार्जनं भूमेः कर्तव्यं गोमयांबुभिः ॥ पूजां च पुष्पधूपाद्यैर्बलिभिः पूर्ववच्चरेत् ॥ तत्स्थानाच्छनकैर्नीत्वा तीर्थे वा जाह्नवीजले ॥ कश्चिच्च प्रक्षिपेत्पुत्रो दौहित्रो वा सहोदरः ॥ मातुः कुलं पितृकुलं वर्जयित्वा नराधमः ॥ अस्थीन्यन्यकुलस्थस्य नीत्वा चांद्रायणं चरेत् ॥ गंगातोयेषु यस्यास्थि क्षिप्यते शुभकर्मणः ॥ न तस्य पुनरावृत्तिर्ब्रह्मलोकात्सनातनात् ॥ अस्तं गते गुरौ शुक्रे तथा मासे मलिम्लुचे ॥ गंगायामस्थिनिक्षेपं न कुर्यादिति गौतमः ॥" दशाहांतरास्थिप्रक्षेपे तु नास्तादिदोषः ॥ "दशाहाभ्यंतरे यस्य गंगातोयेस्थि मज्जति ॥ गंगायां मरणं यादृक्तादृक्फलमवाप्नुयात् ॥

## अथ तीर्थेस्थिक्षेपं कर्तुं तत्पूर्वांगविधिः ।

यत्रास्थीनि निखातानि तां भूमिं सचैलस्नानपूर्वकं पृथग्गोमूत्रादिभिः प्रोक्षयेत् ॥ तत्र गायत्र्या गोमूत्रेण ॥ गंधद्वारामिति गोमयेन ॥ आप्यायस्वेति क्षीरेण ॥ दधिक्राव्ण इति दध्ना ॥ घृतंमिमिक्ष इति घृतेन ॥ उपसर्पेति चतसृणामृचां शंखः पितरस्त्रिष्टुप् ॥ भूप्रार्थनखननमृदुद्धरणास्थिग्रहणेषु क्रमेण विनियोगः ॥ ताभिर्ऋग्भिः क्रमेणास्थिग्रहणांतानि कर्माणि कृत्वा स्वयं जलाशये गृह्योक्तविधिना स्नायात् ॥ ततोस्थिशुद्धिं कुर्यात् ॥ सा यथा ॥ अस्थीनि स्पृष्ट्वैतोन्विंद्रमित्यृचावृत्त्या पंचगव्यैः स्नात्वा स्पृष्ट्वैव दशस्नानानि कुर्यात् ॥ तत्र गायत्र्या-

दिपंचमंत्रैर्गोमूत्रगोमयक्षीरदधिसर्पिःस्नानानि कृत्वा देवस्यत्वेति कुशोदकेन ॥ मानस्तोकेति भस्मना ॥ अश्वक्रांते रथक्रांते इति मृदा ॥ मधुवाता इति मधुना ॥ आपोहिष्ठेति शुद्धोदकेन च स्नायात् ॥ एवं दशस्नानानि कृत्वाऽस्थ्नां कुशैर्मार्जनं कुर्यात् ॥ तत्र मंत्रः ॥ अतोदेवा इत्यृक् ॥ अथ सप्तसूक्तानि ॥ एतोन्विंद्रं० ३ शुचीवो० २ नतमंहोन० ८ इति वा इति० १३ स्वादिष्ठयेति० १० ममाग्नेवर्चो० ९ कद्रुद्रायप्र० ९ ततो यदीयान्यस्थीनि तस्य कृतसपिंडीकरणस्य पार्वणविधिना श्राद्धमस्थिक्षेपांगभूतं हिरण्येन कुर्यात् ॥ सक्तुना च पिंडदानम् ॥ दशाहांतरास्थिक्षेपकरणे एकोद्दिष्टविधिना श्राद्धम् ॥ ततस्तिलतर्पणं कृत्वा पुनः पंचगव्यपंचामृतशुद्धोदकैरस्थीनि प्रक्षाल्य यक्षकर्दमेनालिप्य पुष्पैः प्रपूज्याऽजिनकंबलदर्भभूर्जपत्रशाणपत्रताडपत्राणां क्रमेण सप्तधा संवेष्टय ताम्रसंपुटे स्थापयेत् ॥ तत्र यक्षकर्दमलक्षणम् ॥ द्वादशकर्षं चंदनं कुंकुमं च षट् कर्षाः॥ कर्पूरश्चतुःकर्षा कस्तूरी चैतेषां मेलनाद्यक्षकर्दमः ॥ ततोस्थिषु हेमरौप्यखंडानि मौक्तिकप्रवालनीलमणींश्च प्रक्षिप्य स्वसूत्रोक्तविधिना स्थंडिलाग्निप्रतिष्ठादि कृत्वाऽष्टोत्तरशतं तिलाज्याहुतीर्जुहुयात् ॥ उदीरतांशंखः पितरस्त्रिष्टुप् ॥ अस्थिप्रक्षेपांगतिलाज्यहोमे विनियोगः ॥ उदीरतामिति सूक्तस्य चतुर्दशऋग्भिःप्रत्यृचमाहुतिरित्येवं सूक्तस्य सप्तावृत्तिभिरवशिष्टदशाहुतीः प्रथमऋगावृत्त्येत्येवमष्टोत्तरशतं तिलाऽऽज्याहुतीश्च जुहुयात् ॥ संवेष्टनास्थिसमुच्चययुतं ताम्रसंपुटमादाय तीर्थं गच्छेत् ॥ तत्र नियमाः ॥ मूत्रपुरीषोत्सर्गकाले आचमनकाले च नास्थीनि धारयेत् ॥ शूद्रयवनांत्यजादिकां स्वहीनजातिमस्थिधारणकाले न स्पृशेदिति काशीखंडे ॥ ततस्तीर्थं प्राप्य तीर्थप्राप्तिनिमित्तकं स्नानादि विधायास्थीनि स्नापयित्वामुकगोत्रस्यामुकशर्मणो ब्रह्मलोकादिप्राप्तयेऽमुकतीर्थेस्थिप्रक्षेपमहं करिष्ये इति संकल्प्य पलाशपर्णपुटे पंचगव्येनास्थीन्यासिच्य हिरण्यशकलमाल्यघृततिलमिश्रितास्थीनि मृत्पिंडे निधाय दक्षिणां दिशमेवेक्षमाणो नमोस्तु धर्मायेति वदंस्तीर्थं प्रविश्य नाभिमात्रे जले स्थित्वा स मे प्रीतोस्त्वित्युक्त्वा तीर्थं क्षिपेत् ॥ ततः स्नात्वा जलाद्बहिरागत्य सूर्यं दृष्ट्वा हरिं स्मृत्वा विप्राय यथाशक्ति रजतं दक्षिणां दद्यात् ॥ अमुकस्यास्थिक्षेपः कृतस्तत्सांगतार्थं रजतमिदं तुभ्यं संप्रददे॥ इत्यस्थिप्रक्षेपप्रकारः ॥

## अथैकादशाहकृत्यम् ।

एकादशाहे प्रातरुत्थाय गृहानुलेपनं कृत्वा स्पृष्टसर्ववस्त्रक्षालनपूर्वकं सर्वसपिंडानां सचैलस्नानांते संध्यापंचमहायज्ञादिनित्यकर्माणि शुद्धिः ॥ एकादशाहे संगवकाले स्नानाच्छुद्धिरिति केचित् ॥ एकादशाहे कर्तुः पुत्रादेरपि पंचमहायज्ञाद्यधिकारः ॥ सपिंडानां दर्शवार्षिकादिश्राद्धेष्वप्यधिकारः ॥ नांदीश्राद्धमात्रं चतुःपुरु-

षसपिंडैः सपिंडीकरणात्प्राक् न कार्यम् ॥ ततो दशाहकर्मकारी मुख्यः कर्त्ता मुख्यो वा पुत्रादिः कर्ता वृषोत्सर्गाद्येकादशाहिकं सर्वं कर्म कुर्यात् ॥ "एकादशेह्नि प्रेतस्य यस्य नोत्सृज्यते वृषः ॥ प्रेतत्वं सुस्थिरं तस्य दत्तैः श्राद्धशतैरपि ॥" अत्र स्वयमेव सर्वं कुर्यान्न तु काम्यवृषोत्सर्गवदाचार्यवरणम् ॥ अयं गृहे न कार्यः॥ अयं द्वादशाहेप्युक्तः ॥ क्वचिन्मृताहेप्युक्तः ॥ "विषुवद्वितये चैव मृताहे बांधवस्य च " इति ॥ "वत्सराभ्यंतरे पित्रोर्वृषस्योत्सर्गकर्मणि ॥ वृद्धिश्राद्धं न कुर्वीत तदन्यत्र समारभेत् ॥ वृषलक्षणं तु ॥ "लोहितो यस्तु वर्णेन मुखे पुच्छे च पांडुरः ॥ श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते ॥" अथवा श्वेतवर्णस्य मुखपुच्छादिश्यामत्वे नीलवृषत्वम् ॥ यद्वा सर्वश्यामस्य मुखादिश्वेतत्वे नीलवृषत्वम्॥ केचिद्वृषाभावे मृद्भिः पिष्टैर्वा वृषं कृत्वा होमादिविधिना वृषोत्सर्ग इत्याहुः ॥ यथोक्तालाभे यथालाभो द्विवर्ष एकवर्षो वा वृषो वर्षाधिकाश्चतस्र एका वा वत्सतरी स्यात् ॥ प्रयोगस्तु स्वस्वसूत्रानुसारी ग्राह्यः ॥ "सव्येन पाणिना पुच्छं समादाय वृषस्य तु ॥ दक्षिणेनाप आदाय सतिलाः सकुशास्ततः ॥ " प्रेतगोत्रं समुच्चार्यामुकस्मै वृष एष मया दत्तस्तं तारयित्विति वदन्सहेमजलं भूमावुत्सृजेत् ॥ "विधारयेन्न तं कश्चिन्न च कश्चन वाहयेत् ॥ न दोहयेच्च तां धेनुं न च कश्चन बंधयेत् ॥" पतिपुत्रवत्याः सुवासिन्या न वृषोत्सर्गः ॥ तत्स्थाने एका पयस्विनी गौर्देया ॥ पतिपुत्रयोरन्यतराभावे तु स्त्रीणामपि वृषोत्सर्गः ॥ सहगमने तु स्त्रीणां वृषोत्सर्गस्थाने गौरेव ॥ वृषोत्सर्गसांगतार्थं तिलोदकुंभधेनुवस्त्रहिरण्येति पंचदानानि ॥ आशौचांतरं चेदेकादशाहे प्राप्नोति तदा वृषोत्सर्गादिकमाद्यमासिकं शय्यादिदानानि च कुर्यादेव ॥ "एवं कृते वृषोत्सर्गे फलं वाजिमखोदितम् ॥ यमुद्दिश्योत्सृजेन्नीलं स लभेत परां गतिम् ॥ वृषोत्सर्गः पुनात्येव दशातीतान्दशापरान्" ॥ इति वृषोत्सर्गः ॥

## अथैकादशाहे महैकोद्दिष्टम् ।

इदं च महैकोद्दिष्टं षोडशश्राद्धेभ्यो भिन्नमेव ॥ अतएवेदं करिष्यमाणसर्वैकोद्दिष्टप्रकृतिभूतमित्युच्यते ॥ इदं च पाकेनैव ॥ अत्र सति संभवे विप्रो भोजयितव्यः ॥ असंभवेऽग्नौ होमः ॥ "ब्राह्मणं भोजयेदाद्ये होतव्यमनलेथवा" इत्युक्तेः ॥ "श्मश्रुकर्म तु कर्तव्यं नखच्छेदस्तथैव च ॥ स्नपनाभ्यंजने दद्याद्विप्राय विधिपूर्वकम् ॥" ततः क्षणपाद्यासनार्घ्यगंधपुष्पाच्छादनान्येव दद्यात् ॥ नात्र धूपदीपौ ॥ एकोद्दिष्टं देवहीनमित्युक्तेरेक एव विप्रः ॥ दिवैव च निमंत्रणम् ॥ एकमर्घ्यपात्रम् ॥ स्वधाशब्दनमःशब्दपितृशब्दा न संति ॥ तेन प्रत्तः प्रेत इमाँल्लोकान्प्रीणयाहि न इति मंत्रोहोर्घ्यपात्रे ॥ नाभिश्रवणम् ॥ सर्वं प्राचीना-

वीतिनैव कार्यम् ॥ देवकार्याभावात् अग्नौकरणविकल्पः ॥ तत्र च पाणिहोमेपि न तस्य भक्षणं किंत्वग्नौ प्रक्षेपः ॥ एक एव पिंडः ॥ अनुमंत्रणादि सर्वममंत्रकम् ॥ स्वदितमिति तृप्तिप्रश्नः कात्यायनानाम् ॥ अक्षय्यस्थाने उपतिष्ठतामिति वदेत् ॥ अभिरम्यतामिति विसर्जनम् ॥ अभिरताः स्मेति विप्रप्रतिवचनम् ॥ श्राद्धशेषभोजनं नास्ति ॥ अंते स्नानम् ॥ नवश्राद्धैकोद्दिष्टे तु सर्वममंत्रकमित्युक्तम् ॥ विप्राभावे त्वग्नावेकोद्दिष्टं यथा ॥ अग्नौ पायसं श्रपयित्वाज्यभागान्तेऽग्नेरग्रे श्राद्धप्रयोगं कृत्वाग्नौ प्रेतमावाह्य गंधाद्यैः संपूज्य पृथ्वी ते पात्रमित्यादिनान्नं संकल्प्योदीरतामवर इत्यष्टाभिश्चतुरावृत्ताभिर्ऋग्भिर्द्वात्रिंशदाहुतीर्हुत्वा पिंडदानादिश्राद्धं समापयेदिति ॥ एवमेतदेकोद्दिष्टं स्त्रीणामपि ॥ अथाद्यमासिकम् ॥ तस्य मासादौ मासिकं कार्यमिति वचनान्मृताहो मुख्यः कालः ॥ स चाशौचप्रतिबंधादतिक्रांत इति तदंते एकादशेह्नि तत्कार्यम् ॥ अतएव "ब्राह्मणं भोजयेदाद्ये होतव्यमनलेथवा ॥ पुनश्च भोजयेद्विप्रं द्विरावृत्तिर्भवेदिह" इति प्रथममासिकार्थं द्वितीयावृत्तिरुक्ता ॥ अत्र च द्विरावृत्तिर्भवेदिहेत्युक्तिः षोडशमासिकानां सपिंड्यधिकारार्थमपकृष्य कर्तव्यानां द्वादशाहादौ करणपक्षे योज्या ॥ तेषामेकादशाह एव करणपक्षे तु षोडशमासिकानां षोडशावृत्तयं एकं महैकोद्दिष्टमिति सप्तदशावृत्त्यापत्त्या द्विरावृत्तिर्भवेदिहेत्युक्तेरसंगतेः ॥ तथा च सपिंड्यधिकारार्थापकृष्याणां मासिकानां द्वादशाहे करणे एकादशे महैकोद्दिष्टोत्तरमतिक्रांतमाद्यमासिकं करिष्ये इति संकल्प्याद्यमासिकमात्रमन्नेनामेन वा विप्रे दर्भबटौ वा प्रेतमावाह्य कार्यं न त्वाद्यमासिकस्याग्नौ होमः ॥ पुनश्च भोजयेद्विप्रमिति विशेषवचनात् ॥ इत्थं च महैकोद्दिष्टमेकमाद्यमासिकमेकमित्येकोद्दिष्टस्य द्विरावृत्तिः स्पष्टैव ॥ ये त्वाद्यमासिकातिरेकेण महैकोद्दिष्टस्य द्विरावृत्तिं वदंति ते भ्रांताः ॥ अत्र केचिदाद्याब्दिकस्यापि मृताह एव काल इति तस्याप्यतिक्रांतत्वादेकादशाहे आद्यमासिकमाद्याब्दिकं च तंत्रेण करिष्ये इति ॥ संकल्प्य द्वयमपि तंत्रेण कार्यमित्याहुः ॥ अन्ये तु ॥ "मासादौ मासिकं कार्यमाब्दिकं वत्सरे गते" इति वचनाद्वितीयवर्षारंभे प्रथमाब्दिकमिति नाब्दिकस्यैकादशाहेनुष्ठानमित्याहुः ॥ एवं त्रिपक्षे सपिंडीकरणपक्षे एकादशाहे आद्यमासिकमूनमासे ऊनमासिकं द्वितीयमासारंभे द्वितीयमासिकं पक्षत्रये त्रैपक्षिकं चैकोद्दिष्टविधिना कृत्वावशिष्टद्वादशमासिकान्यपकृष्य तथैव कृत्वा सपिंडीकरणम् ॥ एवं पक्षांतरेषूह्यम् ॥ एकादशाहे तंत्रेण षोडशमासिकापकर्षपक्षे महैकोद्दिष्टोत्तरं देशकालौ संकीर्त्यातिक्रांतमाद्यमासिकं सपिंड्यधिकारार्थमपकृष्योनमासिकादीन्यूनाब्दिकांतानि पंचदशमासिकानि च तंत्रेणैकोद्दिष्टविधिना करिष्ये इति संकल्प्य तंत्रेण षोडशापि कुर्यात ॥ केचिन्मते त्वतिक्रांते आदिमासिकाद्याब्दिके ऊनादिमासिकानि चेत्यादि संकल्पः ॥ मासिकानि तु ॥ आद्यमासिकं १ ऊनमासिकं २ द्वि-

द्वितीयमासिकं ३ त्रैपक्षिकं ४ तृतीयमासिकं ५ चतुर्थमासिकं ६ पंचममासिकं ७ षष्ठं ८ ऊनषाण्मासिकं ९ सप्तममासिकं १० अष्टमं ११ नवमं १२ दशमं १३ एकादशं १४ द्वादशं १५ ऊनाब्दिकं १६ चेति क्रमेण ज्ञेयानि ॥

## अथैकादशाहे रुद्रगणश्राद्धम् ।

तच्चैकादशरुद्रोद्देशेन रुद्ररूपप्रेतोद्देशेन वा रुद्रोद्देशपक्षे सव्येन ॥ तद्रूपप्रेतोद्देशपक्षेऽपसव्येन ॥ वीरभद्रः १ शंभुः २ गिरिशः अजैकपात ४ अहिर्बुध्न्यः ५ पिनाकी ६ अपराजितः ७ भुवनाधीश्वरः ८ कपाली ९ स्थाणुः १० भगः ११ इत्येकादश रुद्राः॥ अत्र शक्तेनैकैकरुद्रनाम्नैको विप्र इत्येकादश विप्रा भोज्या अशक्तेन तु सर्वोद्देशेनैक एव विप्रो भोज्यः ॥ आमान्नान्येकादशैकं वामान्नं देयम् ॥ अत्र श्राद्धे पिंडदानार्घ्याग्नौकरणविकिराणामभावः ॥ एवमेवाष्टवसुश्राद्धम् ॥ एतच्च कृताकृतम् ॥ वसुनामान्यप्यन्यत्र ॥ एतदेकादशाहकृत्यं व्यहाशौचे चतुर्थदिने कर्त्तव्यम् ॥ द्वितीयदिने प्रथमदिने वास्थिसंचयनम् ॥ पंचमदिने सपिंडीकरणम् ॥ अत्रैकादशाहे द्वादशाहे वा पददानानि कार्याणि तेन प्रेतस्य मार्गे सुखगतिः ॥ "आसनोपानहच्छत्रं मुद्रिका च कमंडलुः ॥ यज्ञोपवीताज्यवस्त्रं भोजनं चान्नभाजनम् ॥ दशकं पदमेतत्स्यात्पदान्येवं त्रयोदश ॥ देयानि वा यथाशक्ति तेनासौ प्रीणितो भवेत् ॥ अन्नं चैवोदकुंभं चोपानहौ च कमंडलुः ॥ छत्रं वस्त्रं तथा यष्टिं लोहदंडं च दापयेत् ॥ अग्नीष्ठिकां प्रदीपं च तिलांस्तांबूलमेव च ॥ चंदनं पुष्पमालां चोपदानानि चतुर्दश ॥" वैतरणीधेनूत्क्रांतिधेनुमोक्षधेन्वादिदानानि गोभूम्यादिदशदानानि तिलपात्रदानादीनि मरणकाले न कृतानि चेदेकादशाहादौ पुत्रादिभिः प्रेतोद्देशेन कार्याणि ॥ "अश्वं रथं गजं धेनुं महिषीं शिबिकादिकम् ॥ शालग्रामं पुस्तकं च कस्तूरीकुंकुमादिकम् ॥ दासीं रत्नं भूषणादिशय्यां छत्रं च चामरम् ॥ दद्याद्वित्तानुसारेण प्रेतस्तत्तत्सुखं लभेत ॥"

## अथ शय्यादानम् ।

'एकादशाहे शय्याया दाने एष विधिः स्मृतः ॥ तेनोपभुक्तं यत्किंचिद्वस्त्रवाहनभाजनम् ॥ यद्यदिष्टं च तस्यासीत्तत्सर्वं परिकल्पयेत् ॥ प्रेतं च पुरुषं हैमं तस्यां संस्थापयेत्तदा ॥ पूजयित्वा प्रदातव्या मृतशय्या यथोदिता ॥ तस्माच्छय्यां समासाद्य सारदारुमयीं दृढाम् ॥ दंतपत्रचितां रम्यां हेमपट्टैरलंकृताम् ॥ हंसतूलिप्रतिच्छन्नां शुभगंडोपधानिकाम् ॥ प्रच्छादनपटीयुक्तां गंधधूपादिवासिताम् ॥ उच्छीर्षके घृतभृतं कलशं परिकल्पयेत् ॥ तांबूलकुंकुमक्षोदकर्पूरागरुचंदनम्॥दीपकोपानहच्छत्रचामरासनभाजनम् ॥ पार्श्वेषु स्थापयेद्भक्त्या सप्तधान्यानि चैव हि ॥ शयनस्थस्य भवति यदन्यदुपकारकम् ॥ भृंगारकरकाद्यं तत्पंचवर्णं वितानकम् ॥

संपूज्य द्विजदांपत्यं नानाभरणभूषितम् ॥ उपवेश्य तु शय्यायां मधुपर्कं ततो वदेत् ॥" दानमंत्रस्तु ॥ "यथा न कृष्णशयनं शून्यं सागरजातया ॥ शय्या तस्याप्यशून्यास्तु तथा जन्मनिजन्मनि ॥ तस्मादशून्यं शयनं केशवस्य शिवस्य च ॥ शय्या तस्याप्यशून्यास्तु तथा जन्मनि जन्मनि ॥ दत्त्वैवं तस्य सकलं प्रणिपत्य विसर्जयेत् ॥" पाद्मे तु ॥ "अस्थिलालाटकं गृह्य सूक्ष्मं कृत्वा सपायसम् ॥ भोजयेद्द्विजदांपत्यं विधिरेष सनातनः" इत्युक्तम् ॥ नैतन्महाराष्ट्रदेशादिशिष्टैराद्रियते ॥ यद्देशे तदाचारस्तत्रास्तु ॥ "स्वर्गे पुरंदरपुरे लोकपालालये तथा ॥ सुखं वसत्यसौ जंतुः शय्यादानप्रभावतः ॥ आभूतसंप्लवं यावत्तिष्ठत्यातंकवर्जितः ॥ प्रेतशय्याप्रतिग्राही न भूयः पुरुषो भवेत् ॥ गृहीतायां तु तस्यां वै पुनः संस्कारमर्हति ॥"

## अथोदकुंभः ।

"एकादशाहात्प्रभृति घटस्तोयान्नसंयुतः ॥ दिनेदिने प्रदातव्यो यावत्संवत्सरं सुतैः ॥ यस्य संवत्सरादर्वाक्सपिंडीकरणं भवेत् ॥ मासिकं चोदकुंभं च देयं तस्यापि वत्सरम् ॥ अपि श्राद्धशतैर्दत्तैरुदकुंभं विना नराः ॥ दरिद्रा दुःखिनस्तात भ्रमंति च भवार्णवे ॥ यावदब्दं च यो दद्यादुदकुंभं विमत्सरः ॥ प्रेतायान्नसमायुक्तं सोश्वमेधफलं लभेत् ॥" इदं चोदकुंभश्राद्धं सपिंडीकरणात्प्रागेकोद्दिष्टविधिना ॥ सपिंडयुत्तरं तु पार्वणविधिना ॥ इदं त्रयोदशदिनादारभ्य कर्तव्यमिति भट्टाः ॥ अत्र पिंडदानं कृताकृतम् ॥ देवहीनं चैतत् ॥ "अदैवं पार्वणश्राद्धं सोदकुंभमधर्मकम् ॥ कुर्यात्प्रत्याब्दिकाच्छ्राद्धात्संकल्पविधिनान्वहम् ॥" इति वचनात् ॥ प्रायश्चित्तांगविष्णुश्राद्धवदत्र श्राद्धे सर्वे श्राद्धधर्मा न संति किंतु वाचनिकमात्राः ॥ तेन सांकल्पविधिना संकल्पक्षणपाद्यासनगंधाच्छादनांतपूजनान्नपरिवेषणांते पृथ्वीतेपात्रमित्याद्युक्ता ॥ एष उदकुंभ इदमन्नं दत्तं चेत्यादि त्यागविधिः ॥ अंते तांबूलदक्षिणादि ॥ नात्र ब्रह्मचर्यापुनर्भोजनादिनियमाः ॥ वृद्धिनिमित्तेन मासिकापकर्षे उदकुंभश्राद्धानामप्यपकर्षः ॥ प्रेतश्राद्धत्वात् ॥ प्रत्यहं सोदकुंभान्नप्रदानाशक्तेनाप्येकस्मिन्दिने तावद्भिरामान्नैरुदकुंभैश्च तावदामान्नोदकुंभनिष्क्रयेण वाप कृष्योदकुंभश्राद्धानि कार्याणि ॥ अब्दमध्ये प्रत्यहमुदकुंभश्राद्धं कुर्वतो मध्ये आशौचप्राप्तौ तावच्छ्राद्धानां लोप एव दर्शादिवत् ॥ आशौचोत्तरं प्रतिबंधादकरणे तदुत्तरोदकुंभेन सह तंत्रतयातिक्रांतोदकुंभानां प्रयोगः ॥ अतिक्रांतोदकुंभश्राद्धान्यद्यतनोदकुंभश्राद्धं च तंत्रेण करिष्ये इति संकल्पः ॥ तथा प्रथमाब्दे दीपदानमुक्तम् ॥ "प्रत्यहं दीपको देयो मार्गे तु विषमे नरैः ॥ यावत्संवत्सरं वापि प्रेतस्य सुखलिप्सया ॥ प्राङ्मुखोदङ्मुखं दीपं देवागारे द्विजालये ॥ कुर्याद्याम्यमुखं पित्र्ये अद्भिः संकल्प्य सुस्थिरम्" इति ॥

## अथ षोडशमासिकानि ।

"द्वादशप्रतिमास्यानि ऊनमासं त्रिपक्षकम् ॥ ऊनषाण्मासिकं चोनाब्दिकं चापीति षोडश ॥" अत्र मतांतराणि सिंधौ ॥

## अथैषां कालाः ।

"मासादौ मासिक कार्यमाद्यं त्वेकादशेहनि॥ एकद्वित्रिदिनैरूने त्रिभागेनोन एव वा ॥ ऊनमासिकमूनाब्दमूनषाण्मासिकं चरेत्॥ त्रैपक्षिकं त्रिपक्षे चोनमास्यं द्वादशेह्नि वा ॥" तत्रोनमासिकोनषाण्मासिकोनाब्दिकानामेकदिनेनोनपक्षे पंचम्यां मृतस्य तृतीयायां द्वाभ्यामूनत्वपक्षे द्वितीयायां त्रिभिर्न्यूने प्रतिपदायामनुष्ठानमिति केचित् ॥ माधवस्तूनषाण्मासिकमूनाब्दिकं च मृताहात्पूर्वेद्युः कार्यमित्याह ॥ त्रैपक्षिकं त्रिपक्षेतीते मृताहे कार्यम् ॥ अत्राहिताग्नेर्विशेषः त्रैपक्षिकपर्यंतानि संस्कारतिथौ ततः पराणि प्रत्याब्दिकं च मृततिथौ ॥ तेनाद्यं दाहादेकादशेह्नि त्रिमासादूर्ध्वं संस्कारे त्वेवं भाति ॥ त्रिपक्षपर्यंतानि दाहतिथौ कृत्वा पराण्यतिक्रांतानि मृततिथौ प्राप्तमासिकेन सह कार्याणीति ॥ ऊनश्राद्धेषु वर्ज्यानि त्रिपुष्करेषु नंदासु सिनीवाल्यां भृगोर्दिने ॥ चतुर्दश्यां च नोनानि कृत्तिकासु द्विपुष्करे ॥" त्रिपुष्करद्विपुष्करयोगयोर्लक्षणं प्रागुक्तम् ॥ आद्यमासिकमाद्याब्दिकं चैकादशेह्नीत्येकं मतम् ॥ आद्यमासिकमेवैकादशेह्नि प्रथमाब्दिकं तु द्वितीयवर्षारंभ एवेत्यपरमतमित्युक्तम् ॥ एतानि षोडशश्राद्धानि वर्षांतसपिंडनपक्षे उक्तेषु स्वस्वकालेष्वेकोद्दिष्टविधिना कार्याणि ॥ द्वादशाहादिकालेषु सपिंडनापकर्षपक्षे एकादिने एवापकृष्य युगपदेकोद्दिष्टविधिना कार्याणि ॥ "श्राद्धानि षोडशादत्त्वा न तु कुर्यात्सपिंडनम् ॥" इति षोडशश्राद्धैर्विना सपिंडनेधिकाराभावबोधनात् ॥ एतानि पक्वान्नेनामान्नेन वा कार्याणि ॥ पाकपक्षे युगपत्करणे सर्वेषामेक एव पाको विप्रा अर्घ्याः पिंडाश्च षोडश ॥ एतानि द्वादशाहादौ सपिंडनात्पूर्वं कृतान्यपि पुनः सपिंडयुत्तरं स्वस्वकाले पार्वणविधिना कार्याणि ॥ "यस्य संवत्सरादर्वाक् विहिता तु सपिंडता ॥ विधिवत्तानि कुर्वीत पुनः श्राद्धानि षोडश ॥ अर्वाक्संवत्सराद्यस्य सपिंडीकरणं कृतम् ॥ षोडशानां द्विरावृत्तिं कुर्यादित्याह गौतमः ॥" इत्यादिवचनात् ॥ षोडशानां द्विरावृत्तित्वं चैकादशाहसपिंडनपक्षे ज्ञेयम् ॥ तत्राद्यमासिकस्य कालसत्त्वात् ॥ द्वादशाहे सपिंडनपक्षे तु पंचदशानां द्विरावृत्तिः ॥ त्रिपक्षे सपिंडनपक्षे आद्यमासिकोनमासिकद्वितीयमासिकानां स्वस्वकाले कृतत्वादपकृष्य कृतानामेव पुनरावृत्तिविधानात्तेषां कालाभावाच्च त्रयोदशानामेव पुनरावृत्तिः ॥ एवमन्यपक्षेष्वपि यथासंभवमूह्यम् ॥ ये तु द्वादशाहे सपिंडनं कृत्वा त्रयोदशाहादाद्यमासिकसहितानां षोडशानां पुनरावृत्तिं कुर्वंति ते भ्रांताः ॥

## अथाधिकमासे आवृत्तिविचारः ।

यदा मरणादारभ्य द्वादशमासमध्ये कश्चिदधिकमासः पतेत्तदा तन्मासस्थं मासिकश्राद्धमधिके शुद्धे मासे चेति द्विवारं कार्यमिति सप्तदश श्राद्धानि भवंति ॥ मलमासे मृतस्य तु एकादशाहे आद्यमासिकं कृत्वा द्वितीयमासमृततिथौ तत्पुनः कृत्वा किञ्चिदूने द्वितीयमासे ऊनमासिकं तृतीयमासारम्भे द्वितीयमासिकं सार्धद्विमासान्ते त्रैपक्षिकम् ॥ सपिंडद्युत्तराण्यवशिष्टमासिकानि स्वस्वकाले एव कार्याणि चतुःपुरुषमध्ये सपिंडेषु नांदीश्राद्धमाद्यौ तु तत्प्राप्तिमासे एवैकस्मिन्नेव दिने सर्वाण्यपकृष्य कार्याणि ॥ "प्रेतश्राद्धानि सर्वाणि सपिंडीकरणं तथा ॥ अपकृष्यापि कुर्वीत कर्तुं नांदीमुखं द्विजम् ॥" इत्युक्तेः ॥ तत्रैकः पाकः षोडशश्राद्धपक्षे षोडश ब्राह्मणा अष्टचत्वारिंशत्पिंडाः पुरूरवार्द्रवविश्वेदेवार्थमेको विप्र इति सर्वेषामनुष्ठानम् ॥ एवं पक्षांतरेषु श्राद्धसंख्यानुसारेण विप्राद्यूह्यम् ॥ केचित्पाकभेदमाहुः ॥ उदकुंभश्राद्धानामप्यनुमासिकवत्प्रेतोद्देश्यकश्राद्धत्वात्तेषामप्यपकर्ष इत्युक्तम् ॥ वृद्धिं विनानुमासिकापकर्षे तु दोषमाहोशनाः ॥ "वृद्धिश्राद्धविहीनस्तु प्रेतश्राद्धानि यश्चरेत् ॥ स श्राद्धी नरके घोरे पितृभिः सह मज्जति" इति ॥ चतुःपुरुषसपिंडेष्वाधानादि प्राप्तिनिमित्तोप्यपकर्षः कार्यः ॥ अत्र विशेषः पूर्वार्धे उक्तः ॥ यद्यन्मासिकं सूतकादिनातिक्रांतं भवेत्तत्तदुत्तरमासिकेन सह तंत्रेण कार्यमित्युक्तम् ॥

## अथ सपिंडीकरणविचारः ।

तत्र सपिंडनकालः ॥ "नासपिंड्याग्निमान्पुत्रः पितृयज्ञं समाचरेत् ॥" इति वचनात्पित्रादीनां मात्रादीनां त्रितयमध्येन्यतममरणे साग्निको द्वादशाहे सपिंडनं कृत्वागामिदर्शे पिंडपितृयज्ञादिकं कुर्यात् ॥ अत्र स्मार्ताग्निमानपि साग्निको ग्राह्य इति भाति ॥ तस्यापि पिंडपितृयज्ञावश्यकत्वात् ॥ साग्नेः प्रेतस्य तु त्रिपक्ष एव ॥ "प्रेतश्चेदाहिताग्निः स्यात्कर्तानग्निर्यदा भवेत् ॥ सपिंडीकरणं तस्य कुर्यात्पक्षे तृतीयके" इत्युक्तेः ॥ अत्र साग्निः श्रौताग्निमानेव ॥ द्वयोः साग्नित्वे द्वादशाह एव ॥ "साग्निकस्तु यदा कर्ता प्रेतो वाप्यग्निमान्भवेत् ॥ द्वादशाहे तदा कार्यं सपिंडीकरणं पितुः" इत्युक्तेः ॥ द्वयोरप्यनग्नित्वे त्वनेके कालाः ॥ "सपिंडीकरणं कुर्याद्यजमानस्त्वनग्निमान् ॥ अनाहिताग्नेः प्रेतस्य पूर्णे संवत्सरेथवा ॥ एकादशे मासि षष्ठे त्रिमासे वा त्रिपक्षके ॥ मासांते द्वादशे वाह्नि कुर्याद्वैकादशेहनि ॥ यदहर्वृद्धिरापन्ना तदहर्वेति निश्चितम् ॥" अत्र वृद्धिनिमित्तापकर्षो निरग्नेरेवोक्तस्तथापि साग्नेरपि संभवे योज्यः ॥ अत्र वृद्धिपदं चूडोपनयनविवाहमा-

त्रपरम् ॥ सीमंतादिसंस्कारेषु वृद्धिश्राद्धस्य लोप एव कार्यो न तु तदर्थं सपिंडनापकर्ष इति केचित ॥ अन्ये तु गर्भाधानपुंसवनादिष्वन्नप्राशनांतेषु संस्कारेष्वकरणे दोषोक्तेरावश्यकेषु वृद्धिश्राद्धस्याप्यावश्यकत्वात्सपिंडनापकर्षः कार्य एव ॥ तथा च चतुःपुरुषसपिंडेषु सपिंडीकरणाभावे गर्भाधानादिकमपि न कार्यमित्याहुः ॥ तेन पितामहमरणे पौत्रस्य वृद्धौ प्राप्तायामप्यपकर्षः सपिंडीकरणानुमासिकादीनां सिद्धः ॥ एवमावश्यकवृद्धियुतकर्मप्राप्तौ कनिष्ठः पुत्रो वा भ्राता वा भ्रातृपुत्रो वान्यः सपिंडो वा शिष्यो वा गौणकर्तापि कुलप्राप्तवृद्धिसिद्ध्यर्थं सपिंडनाद्यपकर्षं कुर्यात् ॥ तत्र च कृते मुख्यस्य पुत्रादेर्न पुनःकरणम् ॥ वृद्धिनिमित्तापकर्षे पुनःकरणाभावात् ॥ ये वा भद्रं दूषयंति स्वधाभिरितिदोषश्रुतेः ॥ वृद्धिं विना गौणाधिकारिणा सपिंड्यादिकरणे तु मुख्याधिकारिणा पुत्रादिना पुनरावर्तनीयम् ॥ एकादशाहांतकर्मणस्तु न पनरावृत्तिरित्युक्तम् ॥ तत्रावश्यकपदे नानन्यगतिकं वृद्धिकर्म ग्राह्यम् ॥ तेन सगतिकेष्टापूर्तादौ सगतिकोपनयनविवाहादौ च नापकर्षः ॥ अगतिके च विवाहादावप्यपकर्ष इति व्यवस्था योज्या ॥ "आनंत्यात्कुलधर्माणां पुंसां चैवायुषः क्षयात् ॥ अस्थिरत्वाच्छरीरस्य द्वादशाहः प्रशस्यते ॥" अत्र कुलधर्मपदेन वृद्धिश्राद्धयुतं कर्म ग्राह्यम् ॥ न तु पंचमहायज्ञदेवपूजाश्राद्धादि ॥ अस्य वर्णधर्मत्वेन नित्यत्वात्सपिंडीकरणनिमित्तकप्रतिबंधायोगात् ॥ सपिंडीकरणात्पूर्वं पंचमहायज्ञादिधर्मो न कार्य इति क्वापि स्मृतिवचनेनुपलंभाच्च ॥ एतेन सपिंडीकरणाभावे सपिंडेषु देवपूजाश्राद्धादिधर्मलोपं वदंतो निर्मूलत्वादुपेक्ष्याः ॥ अत्र द्वादशाहपदेनाशौचसमाप्युत्तरदिनं ग्राह्यं तेन त्रिदिनाशौचे पंचमदिने सपिंडीकरणम् ॥ द्वादशाहादिकालेषु प्रमादादननुष्ठितम् ॥ "सपिंडीकरणं कुर्यात्कालेषूत्तरभाविषु ॥" इदमुत्तरकालविधानं साग्निनिरग्निसाधारणम् ॥ "सपिंडीकरणं श्राद्धमुक्तकाले कृतं न चेत् ॥ हस्तार्द्रारोहिणीभे वानुराधायां च तच्चरेत ॥" इदमपि साधारणम् ॥ स्मृत्यर्थसारे वर्षांतसपिंडनपक्षे वर्षात्यदिने पूर्वं संवत्सरविमोक्षश्राद्धं कृत्वा सपिंडनं च कृत्वा परेद्युर्मृताहे वार्षिकं कार्यमित्युक्तम्॥ इति कालविचारः ॥ तच्च सपिंडनं पुत्रे विदेशस्थेपि सति नान्यः कुर्यात् एवं ज्येष्ठपुत्रे विदेशस्थेपि न कनिष्ठः कुर्यात् ॥ षोडशश्राद्धानि तु ज्येष्ठासंनिधाने कनिष्ठेन कार्याणि ॥ पुनर्ज्येष्ठेन न कार्याणि ॥ आहिताग्निः कनिष्ठोपि सपिंडनं कुर्यादेव ॥ वृद्धिनिमित्ते तु कनिष्ठादिभिरपि सपिंडनं कार्यमित्युक्तम् ॥ वृद्धिं विना कनिष्ठपुत्रेण कृतेपि सपिंडने ज्येष्ठपुत्रेण पुनः कार्यम् ॥ आहिताग्निना पितृयज्ञार्थं कृते सपिंडनेपि ज्येष्ठेन पुनः कार्यमिति भाति ॥ तत्र पुनः करणे प्रेतशब्दो न वाच्यः ॥ "देशांतरस्थपुत्राणां श्रुत्वा तु वपनं भवेत् ॥ दशाहं सूतकं चैव तदंते च सपिंडनम् ॥"

## अथ व्युत्क्रममृतौ ।

"मृते पितरि यस्याथ विद्यते च पितामहः ॥ तेन देयास्त्रयः पिंडाः प्रपितामहपूर्वकाः ॥ तेभ्यश्च पैतृकः पिंडो नियोक्तव्यस्तु पूर्ववत् ॥ मातर्यथा मृतायां तु विद्यते च पितामही ॥ प्रपितामहिपूर्वस्तु कार्यस्तत्राप्ययं विधिः ॥" एवं प्रपितामहजीवने तत्पित्रादिभिः कार्यः ॥ यत्तु "व्युत्क्रमात्तु प्रमीतानां नैव कार्या सपिंडता इति तन्मातृपितृभर्तृभिन्नविषयम् ॥ प्रपितामहादिभिः पितुः सपिंडने कृते पश्चात्पितामहमरणेपि पुनः पितामहेन सह पितुः सपिंडनं न कार्यम् ॥ यदा तु पितुः सपिंडनात्प्राक् पितामहो मृतस्तदा पितामहसपिंडनं कृत्वा पितामहादिभिः सह पितृसपिंडनं कार्यम् ॥ यदा च पितुर्मरणोत्तरं पितामहः प्रपितामहो वा मृतस्तयोश्च पुत्रांतरं सपिंडनाधिकारिदेशांतरे तिष्ठति तदा दाहाद्येकादशाहांतमात्रं कर्म कृत्वा सपिंडनहीनाभ्यामपि पितामहप्रपितामहाभ्यां सह पितुः सपिंडनं कुर्यात् ॥ पितामहप्रपितामहयोः पुत्रांतराभावे तु पौत्रः प्रपौत्रो वा तयोः सपिंडनं कृत्वैव पितुः सपिंडनं कुर्यात् ॥ पितामहस्य पुत्रांतराभावे पौत्रेण सपिंडनषोडशानुमासिकांतमेव कर्म कार्यम् ॥ पितामहवार्षिकादिकं तु नावश्यकम् ॥ इच्छया पितामहवार्षिकादिकरणे तु फलातिशयः ॥ पितृदशाहं कुर्वन्याद्दिने पुत्रो मृतस्तदा तत्पुत्रः स्वपितुरौर्ध्वदेहिकं कृत्वा पितामहौर्ध्वदेहिकं पुनः सर्वमावर्तयेत् ॥अतीते दशाहे तु न पुनरावृत्तिः ॥ पुत्रांतराभावे पितामहसपिंडनोत्तरं पितृसपिंडनमित्युक्तम् ॥ अशक्तिवशात्पित्रानुज्ञातेन पौत्रेण पितामहदशाहकर्मण्यारब्धे पश्चात्पितृमृतौ पित्राशौचं वहन्नेव पौत्रः पितामहौर्ध्वदेहिकं कुर्यात ॥ प्रक्रांतत्वात्पितृदशाहादिकर्मापि कुर्यात्प्राप्तत्वात् ॥

## अथ स्त्रीषूच्यते ।

"पितामह्यादिभिः सार्धं मातरं तु सपिंडयेत् ॥" केचित्पितृमरणोत्तरं मातृमरणे पित्रैव सह मातृसपिंडनमाहुः ॥ दौहित्रः सपिंडनकर्ता चेन्मातामहेन सह सपिंडनमित्यपरे ॥ सहगमने तु भर्त्रैव सह सपिंडनम् ॥ येन केनापि सपिंडनेप्यन्वष्टक्यप्रतिवार्षिकादि श्राद्धेषु पितामह्यादिभिः सहैव मातुः पार्वणं कार्यम् ॥ अत्र केचित् स्वपुत्रसपत्नीपुत्रयोः पत्युश्चाभावे स्त्रीणां सपिंडनं नास्तीत्याहुः ॥ अत्रान्वारोहणे भर्त्रा सह पत्नीसंयोजनमिति पक्षे मतद्वयम् ॥ पितृपिंडस्य पितामहादिषु त्रिषु संयोजनं प्रथमं कृत्वा पश्चान्मातृपिंडं पितामहादिषु संयोजयेदित्येकः ॥ प्रथमं मातृपिंडं पित्रैव संयोज्य मातृपिंडेनैकीकृतं पितृपिंडं पितामहादिषु संयोजयेदित्यपरः पक्षः ॥ अत्र द्वितीयपक्ष एव युक्तः ॥केचित्सहगमेन एकदिनमरणे वा स्त्रियाः सपिंडनं नास्ति भर्तुः कृते सपिंडने भार्यायां अपि कृतं

भवतीति मतांतरमाहुः ॥ "सर्वाभावे स्वयं पत्न्यः स्वभर्तृणाममंत्रकम् ॥ सापडीकरणं कुर्युस्ततः पार्वणमेव च ॥" ब्रह्मचारिणामनपत्यानां च व्युत्क्रममृतानां च सपिंडनं न कार्यमिति मतांतरम् ॥ अत्र सर्वत्र सपिंडनाभावपक्षो न शिष्टाचारे दृश्यते ॥ यतीनां सपिंडीकरणं नास्ति किंतु तत्स्थाने एकादशेह्नि पार्वणं कार्यम् ॥ इदं सपिंडीकरणश्राद्धं पार्वणैकोद्दिष्टरूपम् ॥ तेन पितामहादित्रयार्थं त्रयो विप्रा अर्घ्याः पिंडाश्च त्रयः ॥ प्रेतार्थमेको विप्रः पिंडोऽर्घ्यश्च ॥ देवार्थं द्वौ ॥ यद्वा पार्वणे एकः प्रेते एकः ॥ देवार्थमेको विप्रः ॥ अत्र कामकालौ विश्वेदेवौ ॥ प्रेतस्य पित्रादेरर्घ्यपात्रं पितामहाद्यर्घ्यपात्रत्रये संयोज्यम् ॥ एवं प्रेतपिंडोपि पितामहादिपिंडत्रये संयोज्यः ॥ पितृविप्रकरे होमः साग्नेरपि भवेदिह ॥ सपिंडीकरणश्राद्धमन्नेनैव कार्यम् ॥ न त्वामादिना ॥ अनुमासिकान्यप्यन्नेनैव कार्याणि ॥ "प्रेतः सपिंडनादूर्ध्वं पितृलोकं स गच्छति ॥ कुर्यात्तस्य च पाथेयं द्वितीयेह्नि सपिंडनात्" इति वचनान्नवोदशेह्नि पाथेयश्राद्धं कृत्वा पुण्याहवाचनादिकं कृत्वा वष पर्यंतं प्रत्यहमुदकुंभश्राद्धं कुर्यात् ॥ अशक्तौ मासिकश्राद्धेष्वेकोदकुंभो देयः ॥ सपिंडोत्तरानुमासिकानां पार्वणविधिनानुष्ठानम् ॥ वृद्धिप्राप्तौ तेषामप्यपकर्षः ॥ स च चतुःपुरुषसपिंडेष्वेवेत्युक्तम् ॥ एवं वर्षपर्यंतं कृत्वा वर्षात्यदिो संवत्सरविमोक्षश्राद्धं पार्वणविधिना कार्यम् ॥ इदमेवाब्दपूर्तिश्राद्धमित्यप्युच्यते ॥ "वृद्धिश्राद्धे सपिंड्यां च प्रेतश्राद्धानुमासिके ॥ संवत्सरविमोके च न कुर्यात्तिलतर्पणम् ॥" इदमूनाब्दिकांतषोडशश्राद्धेभ्यो भिन्नमेव ॥ अतएवास्य प्रेतश्राद्धत्वाभावाद्वृद्धिप्राप्तावपि नापकर्षः ॥ ततो वर्षात्यदिने शक्त्या भूरिब्राह्मणभोजनं, च कार्यमित्येष्टिपद्धतौ भट्टाः ॥ युक्तं चैतत् ॥ "जीवतो वाक्यकरणात्प्रत्यब्दं भूरिभोजनात् ॥ गयायां पिंडदानाच्च त्रिभिः पुत्रस्य पुत्रता ॥" इति वाक्येन भूरिभोजनपदेन प्रत्याब्दिकश्राद्धातिरिक्तस्यैव बहुविप्रभोजनस्य विहितत्वाच्छ्राद्धे कुर्यान्नविस्तरमिति निषेधाच्छ्राद्धस्य भूरिभोजनपदाभिधेयत्वासंभवात् ॥

## अथ प्रथमाब्दे निषिद्धानि ।

मातापित्रोर्मरणे वर्षपर्यंतं परान्नं गंधमाल्यादिभोगं मैथुनमभ्यंगस्नानं च वर्जयेत् ॥ ऋतौ भार्यामुपेयादेव ॥ आर्त्विज्यं लक्षहोममहादानादि काम्यकर्माणि तीर्थयात्राविवाहादि वृद्धिश्राद्धयुतं कर्ममात्रं शिवपूजां च वर्जयेत् ॥ संध्योपासनदेवपूजापंचमहायज्ञातिरिक्तकर्ममात्रं वर्ज्यम् ॥ "प्रमीतौ पितरौ यस्य देहस्तस्याशुचिर्भवेत् ॥ न दैवं नापि वा पित्र्यं यावत्पूर्णो न वत्सरः ॥" इति वचनादिति केचित् ॥ "महातीर्थस्य गमनमुपवासव्रतानि च ॥ सपिंडीश्राद्धमन्येषां वर्जयेद्वत्सरं बुधः॥अस्यापवादः॥पत्नी पुत्रस्तथा पौत्रो भ्राता तत्तनयः स्नुषा ॥मातापितृव्य-

श्चैतेषां महागुरुनिपातने ॥ कुर्यात्सपिंडनं श्राद्धं नान्येषां तु कदाचन ॥ एकादशाहपर्यंतं प्रेतश्राद्धं चरेत्सदा ॥ पित्रोर्मृतौ च नान्येषां कुर्याच्छ्राद्धं तु पार्वणम् ॥ गयाश्राद्धं मृतानां तु पूर्णे त्वब्दे प्रशस्यते ॥" गारुडे ॥ "तीर्थश्राद्धं गयाश्राद्धं श्राद्धमन्यच्च पैतृकम् ॥ अब्दमध्ये न कुर्वीत महागुरुविपत्तिषु ॥" केचिद्वर्षांतसपिंडनपक्षे एवैते सर्वे निषेधा न तु द्वादशाहसपिंडनपक्ष इत्याहुः ॥ अपरे तु द्वादशाहसपिंडनपक्षेपि सर्व एते निषेधा इत्याहुः ॥ अत्रैवं व्यवस्था ॥ वृद्धिप्राप्तिं विनाऽर्वाक्सपिंडनापकर्षेपि प्रेतस्य पितृत्वप्राप्तिर्वर्षांत एव ॥ "कृते सपिंडीकरणे नरः संवत्सरात्परम् ॥ प्रेतदेहं परित्यज्य भोगदेहं प्रपद्यते" इत्यादिवचनात् ॥ तेन सपिंडीकरणसत्त्वेपि वृद्धिदैवपित्र्येष्वनधिकारः ॥ वृद्धिनिमित्तापकर्षे तु वृद्ध्यादावधिकार इति ॥ अतएव कालतत्त्वनिर्णये संकटादौ मृतपितृकापत्यानां संस्काराभ्युदयिकं मृतमातापितृकेण पुत्रेण स्वापत्यसंस्कारादिकं च प्रथमाब्देपि कार्यमित्युक्तम् ॥ दर्शमहालयादिश्राद्धस्य नित्यतर्पणस्य चाप्येवमेव व्यवस्था ज्ञेया ॥

## अथ विधानानि ।

तत्र पंचकमृतौ ॥ पंचकं नाम धनिष्ठोत्तरार्धमारभ्य रेवत्यंतं सार्धनक्षत्रचतुष्टयम् ॥ तत्र दाहनिषेधाद्भंमयपुत्तलैर्यवपिष्टानुलिप्तैः पंचोर्णासूत्रवेष्टितैः सह शवं दहेत् ॥ तत्र तिथ्यादिसंकीर्त्यामुकस्य धनिष्ठापंचकादिमरणसूचितवंशारिष्टविनाशार्थं पंचकविधिं करिष्य इति संकल्प्योक्तविधाः प्रतिमा नक्षत्रमंत्रैरभिमंत्र्य गंधपुष्पैः संपूज्य दाहसमये प्रेतोपरि न्यसेत् ॥ प्रथमां शिरसि ॥ द्वितीयां नेत्रयोः ॥ तृतीयां वामकुक्षौ ॥ चतुर्थीं नाभौ ॥ पंचमीं पादयोः ॥ तदुपरि नाममंत्रैर्घृताहुतीर्जुहुयात् ॥ तत्र नामानि क्रमेण ॥ प्रेतवाहः प्रेतसखः प्रेतपः प्रेतभूमिपः प्रेतहर्ता चेति ॥ ततः उदकं दत्त्वा यमाय सोमं त्र्यंबकमिति मंत्राभ्यां प्रत्येकं प्रतिमास्वाज्याहुतीर्जुहुयात् ॥ ततः प्रेतमुखे पंचरत्नं दत्त्वा पुत्तलैः सह प्रेतं दहेत् ॥ मृतकांते तिलहेमघृतानि दत्त्वा कांस्यपात्रे तैलं प्रक्षिप्य तत्रात्मप्रतिबिंबं वीक्ष्य विप्राय दद्यात् शांतिं च कुर्यात् ॥ अत्रायं विशेषः ॥ नक्षत्रांतरेमृतस्य पंचके दाहप्राप्तौ पुत्तलविधिरेव न शांतिकम् ॥ पंचकमृतस्याश्विन्यां दाहप्राप्तौ शांतिकमेव न पुत्तलविधिः ॥ शांतिश्च लक्षहोमरुद्रजपान्यतररूपा यथाविभवं कार्या ॥ अथवा कुंभे यमप्रतिमां संपूज्य स्वगृह्योक्तविधिनाग्निप्रतिष्ठापनान्वाधानादि चरुश्रपणांतं कृत्वाज्यभागांते नामभिश्चतुर्दशचर्वाहुतीर्जुहुयात् ॥ यमाय स्वाहा १ धर्मराजाय २ मृत्यवे ३ अंतकाय ४ वैवस्वताय ५ कालाय ६ सर्वभूतक्षयाय ७ औदुंबराय ८ दध्नाय ९ नीलाय १० परमेष्ठिने ११ वृकोदराय १२ चित्राय १३ चित्रगुप्ताय १४ एवं हुत्वा होमशेषं समाप्य ॥ "कृष्णां गां कृष्णवस्त्रां च हेम-

निष्कसमन्विताम् ॥ दद्याद्विप्राय शांताय यमो मे प्रीयतामिति ॥" त्रिपादक्षेप्येतदेव शांतिकम् ॥ "यदा भद्रातिथीनां स्याद्भानुभौमशनैश्चरैः ॥ त्रिपादक्षैश्च संयोगस्तदा योगस्त्रिपुष्करः ॥ द्विपुष्करो द्वयोर्योगेथवायं स्याद्विपादभैः ॥" त्रिपादनक्षत्राणि तु ॥ "पुनर्वसूत्तराषाढाकृत्तिकोत्तरफाल्गुनी ॥ पूर्वाभाद्रा विशाखा च ज्ञेयमेतत्त्रिपादभम् ॥ मृगचित्राधनिष्ठा च ज्ञेयमेतद्विपादभम् ॥" त्रिपुष्करयोगे द्विपुष्करयोगे च मृतौ कृच्छ्रत्रयं प्रायश्चित्तं कृत्वा यवपिष्टमयपुरुषत्रयेण सह प्रेतदाहः ॥ पुरुषत्रयस्य प्रेते न्यास आज्याहुतयश्च पूर्ववत् ॥ कनकहीरकनीलपद्मरागमौक्तिकेतिपंचरत्नस्य मुखे प्रक्षेपोपि ॥ रत्नाभावे कर्षार्धं स्वर्णम् ॥ स्वर्णाभावे घृतम् ॥ एवं पूर्वत्रापि ॥ दहने मरणे त्रिद्विपुष्करे त्रिगुणं फलम् ॥ "द्विगुणं खननेप्येवमेतद्दोषोपशांतये ॥ सुवर्णं दक्षिणां दद्यात्कृष्णवस्त्रमथापि वा ॥ शांतिं कुर्यात्सूतकांते पूर्वोक्तांते न मंगलम् ॥" मृतस्य स्मशाने नयनोत्तरं पुनर्जीवने सति यस्य गृहे स प्रविशति तस्य मरणं तत्र सक्षीरघृताक्तौदुंबरसमिधां सावित्र्यष्टसहस्रेण होमः ॥ अन्ते कपिलादानं तिलपूर्णकांस्यपात्रदानं च ॥ "एकाशीतिपलं कांस्यं तदर्धं वा तदर्धकम् ॥ नवषट्त्रिपलं वापि दद्याद्विप्राय शक्तितः ॥"

## अथ ब्रह्मचारिमृतौ ।

ब्रह्मचारिमृतौ द्वादश षट् त्रीणि वाब्दानि शक्त्या प्रायश्चित्तं कृत्वा देशकालौ स्मृत्वामुकगोत्रनाम्नो ब्रह्मचारिणो मृतस्य व्रतविसर्गं करिष्ये तदंगतया नांदीश्राद्धं करिष्य इत्युक्त्वा हिरण्येन नांदीश्राद्धं कृत्वाग्निप्रतिष्ठापनाद्याधारांते व्रतसृभिर्व्याहृतिभिराज्यं हुत्वाग्नये व्रतपतये स्वाहा ॥ अग्नये व्रतानुष्ठानफलसंपादनाय स्वाहा ॥ विश्वेभ्यो देवेभ्यः स्वाहेति तिस्र आज्याहुतीर्हुत्वा स्विष्टकृदादिहोमशेषं समाप्य पुनर्देशकालौ स्मृत्वामुकस्यौर्ध्वदेहिकाधिकारार्थमर्कविवाहं करिष्ये इत्यादिहिरण्येन नांदीश्राद्धांतेर्कसमीपे नीत्वार्कशाखां वा गृहीत्वार्कब्रह्मचारिणौ हरिद्रयानुलिप्य पीतसूत्रेण संवेष्ट्य वस्त्रयुग्मेनाच्छाद्याग्निप्रतिष्ठाद्याधारांते आज्यहोमः ॥ अग्नये स्वाहा १ बृहस्पतये० २ विवाहविधियोजकाय० ३ ॥ यस्मै त्वा कामकामाय वयं सम्राडयजामहे ॥ तमस्मभ्यं कामं दत्त्वाथेदं त्वं घृतं पिब स्वाहा ॥ कामायेदं० ॥ ततो व्यस्तसमस्तव्याहृतिहोमः ॥ एवमष्टाहुत्यंते स्विष्टकृदादि कृत्वार्कशाखां ब्रह्मचारिशवं च तुषाग्निना विधिवद्दहेत् ॥ स्नातकमरणेप्येवमिति केचित् ॥ एतन्निर्मूलमित्यन्ये ॥ सूतकांते त्रिंशद्ब्रह्मचारिभ्यः कौपीनकृष्णाजिनकर्णभूषणादि पादुकाछत्रगोपीचंदनमाल्यमणिविद्रुममालायज्ञोपवीतादि यथासंभवं दद्यात् ॥

## अथ कुष्ठिमृतौ ।

"मृतस्य कुष्ठिनो देहं तीर्थे वा भुवि वा क्षिपेत् ॥ न दाहं नोदकं पिंडं न च दानक्रियां चरेत् ॥ यदि स्नेहाच्चरेद्दाहं यदि चांद्रायणं चरेत् ॥" तथा च शक्त्यनुसारेण षडब्दादि प्रायश्चित्तं कृत्वा कुष्ठादिमहारोगमृतस्य दाहादिक्रियां कुर्यान्नान्यथेति ॥

## अथ रजस्वलादिमरणे ।

"रजस्वलायाः प्रेतायाः संस्कारादीनि नाचरेत् ॥ ऊर्ध्वं त्रिरात्रात्स्नातां तां शवधर्मेण दाहयेत् ॥" अथवा रजस्वलां सूतिकां च मलं प्रक्षाल्य स्नापयित्वा काष्ठवदमंत्रकं दग्ध्वास्थीनि मंत्राग्निना दहेत् ॥ उभयत्र चांद्रायणत्रयं प्रायश्चित्तमस्त्येव ॥ तदैव मंत्रवद्दाहकरणेच्छायां तु ॥ अद्येत्याद्यमुकगोत्राया रजस्वलावस्थामरणनिमित्तप्रत्यवायपरिहारार्थमौर्ध्वदैहिकयोग्यत्वार्थं च चांद्रायणत्रयप्रायश्चित्तपूर्वकं शूर्पेणाष्टोत्तरशतस्नानानि कारयिष्ये इति संकल्प्य चांद्रायणत्रयं प्रत्याम्नायेन कृत्वा यवपिष्टेन प्रेतमनुलिप्य स्वयं स्नात्वा शूर्पोदकैरष्टोत्तरशतवारं स्नापयेत् ॥ ततो भस्मगोमयमृत्तिकाकुशोदकैः पंचगव्यैः शुद्धोदकैश्च संस्नाप्य ॥ यदंति यच्च दूरक इत्यादि पावमानीभिरापोहिष्ठेति त्र्यृचेन कयान इत्यादिभिश्च संस्नाप्य पूर्ववस्त्रं परित्यज्यान्यवस्त्रेण संवेष्ट्य दहेत् ॥ सूतिकायामप्येवम् ॥ सूतिकाया आद्यत्र्यहमरणे त्र्यब्दं प्रायश्चित्तम् ॥ द्वितीयत्र्यहे द्व्यब्दम् ॥ तृतीयत्र्यहे एकाब्दं दशमदिने तु कृच्छ्रत्रयमिति विशेषः क्वचिदुक्तः ॥ मासपर्यंतमपि कृच्छ्रत्रयमित्यन्ये ॥ मिताक्षरायां तु कुंभे जलमादाय पंचगव्यं क्षिप्त्वा पुण्यमंत्रैरापोहिष्ठा वामदेव्यावारुणादिभिरभिमंत्र्य पूर्वोक्तमंत्रैः संस्नाप्य विधिना सूतिकां दहेदिति विशेष उक्तः ॥ इति रजस्वलासूतिकयोर्विधिः ॥

## अथ गर्भिणीमरणे ।

गर्भिण्या मृतायाः शुद्ध्यर्थं त्रयस्त्रिंशत्कृच्छ्राणि कृत्वा गां भूमिं सुवर्णं च दत्त्वा गर्भं पृथक्कृत्य तां दहेत् ॥ सगर्भदहने तत्तद्वधप्रायश्चित्तम् ॥ सगर्भाया दाहकर्तुरब्दत्रयं प्रायश्चित्तम् ॥

## अथ सहगमनम् ।

"अथान्वारोहणं स्त्रीणामात्मनो भर्तुरेव च ॥ सर्वपापक्षयकरं निरयोत्तारणाय च॥अनेकस्वर्गफलदं मुक्तिदं च तथैव च ॥ जन्मांतरे च सौभाग्यं धनपुत्रादिवृद्धिदम् ॥ तिस्रः कोट्योर्धकोटी च यावंत्यंगरुहाणि वै ॥ तावंत्यब्दसहस्राणि स्वर्गलोके महीयते ॥ मातृकं पैतृकं चैव यत्र कन्या प्रदीयते ॥कुलत्रयं पुनात्येषा भर्तारं

यानुगच्छति॥" इत्यादि महिमविस्तरो मिताक्षरादौ ज्ञेयः अत्र निष्कामत्वे मुक्तिः सकामत्वे स्वर्गादिफलानीति व्यवस्था॥

## अथ प्रयोगः ।

देशकालौ स्मृत्वा मातृपितृश्वशुरादिकुलपूतत्वब्रह्महत्यादिदोषदूषितपतितपूतत्वपत्यवियोगारुंधतीसमाचारत्वसार्धकोटित्रयसहस्रसंवत्सरस्वर्महीयमानत्वादिपुराणोक्तानेकफलप्राप्तये श्रीलक्ष्मीनारायणप्रीतिद्वारा विमुक्तिप्राप्तये वा पतिचितान्वारोहणं करिष्य इति संकल्प्य हरिद्राकुंकुमवस्त्रफलादियुतानि शूर्पाणि सुवासिनीभ्यो दद्यात् ॥ तत्र मंत्रः ॥ "लक्ष्मीनारायणो देवो बलसत्त्वगुणाश्रयः ॥ गाढं सत्त्वं च मे देयाद्वायनैः परितोषितः ॥ सोपस्कराणि शूर्पाणि वायनैः संयुतानि च ॥ लक्ष्मीनारायणप्रीत्यै सत्त्वकामा ददाम्यहम् ॥" अनेन सोपस्करशूर्पदानेन लक्ष्मीनारायणौ प्रीयेताम् ॥ ततोंचले पंचरत्नं नीलांजनं च बद्धा मुखे मौक्तिकं न्यस्याग्निसमीपं गत्वाग्निप्रार्थनं कुर्यात् ॥ "स्वाहासंश्लेषनिर्विण्णसर्वगात्र हुताशन ॥ सत्त्वमार्गप्रदानेन नय मां पत्युरंतिकम् " इति ॥ अथाग्नावाज्येन जुहुयात् ॥ अग्नये तेजोधिपतये स्वाहा १ विष्णवे सत्त्वाधिपतये स्वा० २ कालाय धर्माधिपतये० ३ पृथिव्यै लोकाधिष्ठात्र्यै० ४ अद्भ्यो रसाधिष्ठात्रीभ्यः ५ वायवे बलाधिपतये ६ आकाशाय सर्वाधिपतये ७ कालाय धर्माधिष्ठात्रे ८ अद्भ्यः सर्वसाक्षिणीभ्यः ९ ब्रह्मणे वेदाधिपतये १० रुद्राय श्मशानाधिपतये स्वाहेत्येकादशाहुतीर्हुत्वाग्निं प्रदक्षिणीकृत्य दृषदमुपलां संपूज्य पुष्पांजलिं गृहीत्वाग्निं प्रार्थयेत् ॥ "त्वमग्ने सर्वभूतानामंतश्चरसि साक्षिवत् ॥ त्वमेव सर्वं जानीषे न विदुर्यानि मानुषाः ॥ अनुगच्छामि भर्तारं वैधव्यभयपीडिता ॥ सत्त्वमार्गप्रदानेन नय मां भर्तुरंतिकम् ॥ मंत्रमुच्चार्य शनकैः प्रविशेच्च हुताशनम् ॥" विप्रश्चेमानारीरविधवा इत्यृचम् ॥ "इमाः पतिव्रताः पुण्याः स्त्रियो याताः सुशोभनाः ॥ सह भर्तृशरीरेण संविशंतु विभावसुम् ॥" इति च पठेत् ॥ कातरां तु प्रेतोत्तरतः सुप्तां देवरशिष्यो वोदीर्ष्वेति मंत्राभ्यामुत्थापयेत् ॥ "अनुव्रजति भर्तारं श्मशानं या गृहान्मुदा ॥ पदेपदेऽश्वमेधस्य फलं प्राप्नोति सा ध्रुवम् ॥" यत्तु ॥ "या स्त्री ब्राह्मणजातीया मृतं पतिमनुव्रजेत् ॥ सा स्वर्गमात्मघातेन नात्मानं न पतिं नयेत् ॥" इति ब्राह्मण्या निषेधवचनजातं तत्पृथक्चितिपरम् ॥ भर्तुर्मंत्राग्निदाहोत्तरमनुगमनं पृथक्चितिः ॥ मंत्राग्निदाहात् पूर्वभास्थिभिः पर्णशरेण वा सहगमनमेकचितिरेव ॥ अरुंधत्यादेः पतिस्थानापत्या पतिशरीरतुल्यत्वात् ॥ इयमेकचितिः सर्ववर्णानाम् ॥ पृथक्चितिस्तु क्षत्रियवैश्यशूद्रादेरेव ॥ न तु ब्राह्मणीनाम् ॥ पृथक्चितिविधिस्तु "देशांतरमृते पत्यौ साध्वी तत्पादुकाद्वयम् ॥ निधायोरसि संशुद्धा प्रविशेज्जातवेदसम्" इति ॥ पतितेन प्रायश्चित्तार्थं मृतेन वा भर्त्रा सहान्वारोहणं न भवति ॥

यत्तु "ब्रह्मघ्नो वा कृतघ्नो वा मित्रघ्नो वा भवेत्पतिः॥ पुनात्यविधवा नारी" इत्यादि वाक्यं तज्जन्मांतरीयब्रह्महत्यादिपापशोधनपरम्॥ "दिनैकगम्यदेशस्था साध्वी चेत्कृतनिश्चया॥ न दहेत्स्वामिनं तस्या यावदागमनं भवेत्॥ तृतीयेह्नि उदक्याया मृते भर्तरि वै द्विजाः॥ तस्याः सहगमार्थं तं स्थापयेदेकरात्रकम्॥" रजस्वलायाः प्रथमद्वितीयतृतीयदिने पतिमृतौ लौकिकाग्निभिरमंत्रकं तं दग्ध्वा पंचमेह्नि चास्थिभिः सहान्वरोहणम्॥ यदि रजस्वला देशकालवशादिना तदैवानुगंतुमिच्छति न शुद्धिं प्रतीक्षते तदा सैकद्रोणमितव्रीहीन्मुसलैरवहत्य तदाघातैः सर्वरजोनिवृत्तौ पञ्चमृत्तिकाभिः शौचं कृत्वा दिनक्रमेण त्रिंशद्विंशतिर्दश वा धेनूर्दत्त्वा विप्रवचनाच्छुद्धिं लब्ध्वा सहगमनं कुर्यात्॥ अत्रावहननेन रजोनिवृत्तिरतींद्रियेतीदं युगांतरपरं योज्यमिति भाति॥ जननमृताशौचयोस्तु सहगमनं नेति केचित् कालतत्त्वविवेचने तु पूर्वप्रवृत्ताशौचमध्ये भर्तृमरणे आशौचवतीनामपि भार्याणां सहगमनं भवति सूतिकोदक्ययोस्तु नेत्युक्तम्॥ इदमेव युक्तं भाति॥ इदं च सहगमनं गर्भिणी बालापत्यासूतिकाभिरदष्टरजोभिः पतिताभिर्व्यभिचारिणीभिर्भर्तृदुष्टभावाभिश्च न कार्यम्॥ केचिदत्र पतिव्रतानामेवाधिकारः॥ वर्तते याश्च सततं भर्तॄणां प्रतिकूलतः॥ कामात्क्रोधाद्भयान्मोहहात्सर्वाः पूता भवंति ताः" इत्यादि तु वाक्यमर्थवाद इत्याहुः॥ अत्र पृथक्चित्यारोहणे भर्त्राशौचमध्ये तदूर्ध्वं वा कृते त्रिरात्रमाशौचं पिंडाश्च॥ सहगमने तु "तस्याः पिंडादिकं शौचं पतिपिंडादितः क्रमात्॥ अन्वारोह तु नारीणां पत्युश्चैकोदकक्रिया॥ पिंडदानक्रिया तद्वच्छ्राद्धं प्रत्याब्दिकं तथा॥ अन्वारोहे कृते पत्न्याः पृथक्पिंडास्तिलांजलीन्॥ पृथक्शिलेन कुर्वीत दद्यादेकशिले तथा॥ तत्रावयवपिंडार्थं पाकैक्यं भिन्नपिंडता॥ नवश्राद्धानि भिन्नानि सपिंडीकरणं पृथक्॥ एक एव वृषोत्सर्गो गौरेका तत्र दीयते॥" सपिंडीकरणं तु न कार्यमथवा भर्त्रैव सह कार्यं यद्वा भर्त्रादिभिस्त्रीभिः सह कार्यमित्यादिपक्षा उक्ताः मासिकसांवत्सरिकादौ पाकैककालैक्यादिव्यवस्थापि श्राद्धप्रकरणे उक्ता॥ इति सहगमने निर्णयः॥ "काशीनाथ उपाध्यायः इत्थमंत्यक्रियाविधिम्॥ निर्णीय भगवत्पादे चार्पयत्तद्विशुद्धये॥" इत्यंत्येष्टिनिर्णयः॥

## अथ विधवाधर्माः।

"पत्यौ मृते तु भार्याणां विधाद्वयमुदीरितम्॥ वैधव्यं पालयेत्सम्यक् सहाग्निगमनं तु वा॥ पत्यौ मृते च या योषिद्वैधव्यं पालयेत्सदा॥ सा पुनः प्राप्य भर्तारं स्वर्गलोकं समश्नुते॥ विधवा पालयेच्छीलं शीलभंगात्पतत्यधः॥ तद्वैगुण्यादपि स्वर्गात्पतिः पतति सर्वथा॥ तस्याः पिता च माता च भ्रातृवर्गस्तथैव च॥ विधवाकबरीबंधो भर्तुर्दंधाय जायते॥ शिरसो वपनं तस्मात्कार्यं

विधवया सदा ॥ एकवारं सदा भुक्तिरुपवासव्रतानि च ॥ पर्यंकशयना नारी विधवा पातयेत्पतिम् ॥ नैवांगोद्वर्तनं कार्यं गंधद्रव्यस्य सेवनम् ॥ नाधिरोहेदनड्वाहं प्राणैः कंठगतैरपि ॥ कंचुकं न परीदध्याद्वासो न विकृतं वसेत् ॥ वैशाखे कार्तिके माघे विशेषनियमं चरेत् ॥ तांबूलाभ्यंजने चैव कांस्यपात्रे च भोजनम् ॥ यतिश्च विधवा चैव वर्जयेच्चंदनादिकम् ॥" अपुत्रा विधवा भर्त्रादित्रयमुद्दिश्य प्रत्यहं तिलकुशोदकैस्तर्पणं कुर्यात् ॥ श्राद्धादौ तु प्रागुक्तम् ॥

## अथ संन्यासः ।

तत्र ब्रह्मचर्यं कृत्वा समावर्तनांते कृतदारः पुत्रानुत्पाद्य यज्ञैरिष्ट्वा वानप्रस्थाश्रमं च कृत्वा संन्यसेदित्याश्रमसमुच्चयपक्षः ॥ ब्रह्मचर्यादेव प्रव्रजेद्गृहाद्वा वनाद्वा ॥ अथ पुनरव्रती वा व्रती वा स्नातकोस्नातको वोत्सन्नाग्निरनग्निको वा यदहरेव विरजेत्तदहरेव प्रव्रजेदित्याश्रमविकल्पपक्षः ॥ "प्रव्रजेद्ब्रह्मचर्याद्वा प्रव्रजेच्च गृहादपि ॥ वनाद्वा प्रव्रजेद्विद्वानातुरो वार्थ दुःखितः" इति वाक्ये आतुरो मुमूर्षुः ॥ दुःखितश्चोरव्याघ्रादिभीत इत्यर्थः ॥ आतुराणां च संन्यासे न विधिर्नैव च क्रिया ॥ प्रेषमात्रं समुच्चार्य संन्यासं तत्र कारयेत् ॥ संन्यासे दंडग्रहणादिरूपे विविदिषाख्ये विप्रस्यैवाधिकारः ॥ विद्वत्संन्यासे तु क्षत्रियवैश्ययोरपि ॥ कलियुगे संन्यासनिषेधस्त्रिदंडिसंन्यासपर इति प्राज्ञः ॥ स च संन्यासश्चतुर्धा ॥ कुटीचको बहूदको हंसः परमहंसश्चेति ॥ अत्रोत्तरोत्तरः श्रेष्ठः ॥ बहिः कुट्यां गृहे वा वसन्काषायवासास्त्रिदंडी शिखायज्ञोपवीतवान्बंधुषु गृहेषु वा भुंजान आत्मनिष्ठो भवेत्स कुटीचकः ॥ पुत्रादीन्हित्वा सप्तागाराणि भैक्षं चरन्पूर्वोक्तकाषायवस्त्रादिवेषवान्बहूदकः ॥ हंसस्तु पूर्वोक्तवेषोप्येकदंडः ॥ परमहंसस्तु शिखायज्ञोपवीतहीन एकदंडी स्यात् ॥ काषायवस्त्रत्वं चतुर्णामपि ॥ हंसपरमहंसयोः शिखायज्ञोपवीतसत्त्वासत्त्वाभ्यां भेदः ॥ एकदंडस्तु द्वयोरपि ॥ परमहंसस्य दंडधारणं विविदिषा दशायां नित्यम् ॥ विद्वत्तादशायां तु कृताकृतम् ॥ न दंडं न शिखां नाच्छादनं चरति परमहंसः इति श्रवणात् ॥ वैराग्यं विनाजीवनाद्यर्थं संन्यासे तु नरकाः ॥ "एकदंडं समाश्रित्य जीवंति बहवो नराः ॥ नरके रौरवे घोरे कर्मत्यागात्पतंति ते ॥ काष्ठदंडो धृतो येन सर्वाशी ज्ञानवर्जितः ॥ स याति नरकान्घोरान्" इत्यादिस्मरणात् ॥

## अथ संन्यासग्रहणविधिः ।

तत्रोत्तरायणं प्रशस्तम् ॥ आतुरस्य दक्षिणायनमपि ॥ तत्रादौ गृह्याग्निमंतं तादृशविदुरं प्रति च प्रयोगः ॥ तत्र शांत्यादिलक्षणं गुरुं संशोध्य तन्निकटे त्रिमासं

यतिधर्मान्संवीक्ष्य गायत्रीजपरुद्रजपकूष्मांडहोमादिभिः शुद्धिं लब्ध्वा रिक्तातिथौ देशकालौ स्मृत्वामुकस्य मम करिष्यमाणसंन्यासेधिकारार्थं चतुःकृच्छ्रात्मकं प्रायश्चित्तं प्रतिकृच्छ्रं तत्प्रत्याम्नायैकैकगोनिष्क्रयद्वारा हमाचरिष्ये ॥ कृच्छ्रप्रत्याम्नायगोनिष्क्रयं द्रव्यं विप्रेभ्यो दातुमुत्सृजे इति संकल्पपूर्वकं रजतानिष्क दर्धतदर्धान्यतमं प्रतिधेनुं दद्यात् ॥ एकादश्यां द्वादश्यां वा यथा ब्रह्मरात्रिः था श्राद्धान्यारभेत् ॥ अत्रानाश्रमिणश्चतुःकृच्छ्रमन्यस्य तप्तकृच्छ्रमिति सिंधुः ॥ स्वस्य नवश्राद्धषोडशश्राद्धसपिंडीकरणानि साग्निः पार्वणविधिना निरग्निरेकोद्दिष्टविधिना कुर्यादिति केचित् ॥ नेत्येन्ये ॥ अथाष्टौ श्राद्धानि ॥ तत्रापस्तंबहिरण्यकेशीयादीनामग्नौकरणपिंडादिरहितः सांकल्पिकः प्रयोगः ॥ आश्वलायनादीनां सपिंडकः पार्वणप्रयोगः ॥ तत्रादौ सव्येन सयवजलेन श्राद्धांगतर्पणम् ॥ ब्रह्माणं तर्पयामि ॥ विष्णुं० महेश्वरं० देवर्षीन्० ब्रह्मर्षीन्० क्षत्रर्षीन्० वसून्० रुद्रान्० आदित्यान्० सनकं० सनंदनं० सनातनं० पंचमहाभूतानि० चक्षुरादिकरणानि० भूतग्रामं० पितरं० पितामहं० प्रपितामहं० मातरं० पितामहीं० प्रपितामहीं० आत्मानं० पितरं० पितामहं० इति नद्यादौ कृत्वा गृहमागत्य देशकालौ स्मृत्वा करिष्यमाणसंन्यासांगत्वेनाष्टौ श्राद्धानि पार्वणविधिनान्नेनामेन वा करिष्ये इति संकल्प्य क्षणं दद्यात् ॥ अत्र सर्वं नांदीश्राद्धवत् ॥ तेन नापसव्यं तिस्थाने यवा युग्मा विप्राः ॥ तथा च देवस्थाने विप्रौ द्वौ श्राद्धाष्टके षोडशेत्यत्र विप्राः ॥ तत्र सत्यवसुसंज्ञका विश्वेदेवा नांदीमुखाःस्थाने क्षणः कर्तव्य इत्येकं त्वा द्वितीयं वृणुयात् ॥ एवमग्रेपि ॥ प्रथमे देवश्राद्धे ब्रह्मविष्णुमहेश्वरा नांदीमुख स्थाने क्षणः १ द्वितीये ऋषिश्राद्धे देवर्षिब्रह्मर्षिक्षत्रर्षयो नांदी० २ तृतीये दिव्यश्राद्धे वसुरुद्रादित्या नांदी० ३ चतुर्थे मनुष्यश्राद्धे सनकसनंदनसनातना नांदी० ४ पंचमे भूतश्राद्धे पृथिव्यादिपंचभूतान्येकादश चक्षुरादिकरणादिचतुर्विधभूतग्रामा नां० ५ षष्ठे पितृश्राद्धे पितृपितामहप्रपितामहा नांदी० ६ सप्तमे मातृश्राद्धे मातृपितामहीप्रपितामह्यो नांदी० ७ अष्टमे आत्मश्राद्धे आत्मपितृपितामहा नांदीमु० ८ आत्मांतरात्मा परमात्मेति केचित् ॥ इति द्वौद्वौ विप्रौ वृणुयात् ॥ सर्वत्र नांदीमुखत्वं विशेषणम् ॥ युग्मा विप्राः ॥ सत्यवसू दक्षक्रतू वा देवौ ॥ ततः सर्वेषां पाद्यं दत्त्वा प्राङ्मुखानुदक्संस्थानुपवेश्य प्रार्थयेत् ॥ "संन्यासार्थमहं श्राद्धं कुर्वे ब्रूत द्विजोत्तमाः ॥ अनुज्ञां प्राप्य युष्माकं सिद्धिं प्राप्स्यामि शाश्वतीम् ॥" कुरु इति प्रत्युक्तः ॥ सयवकुशदूर्वादियुग्मेनाब्दानपूर्वकं संबुद्ध्यंते इदमासनमित्यष्टादशस्वासनं दद्यात् ॥ तत आश्वलायनानामर्घ्यपात्रासादनम् ॥ आपस्तंबादीनां सांकल्पिकत्वान्नार्घ्यम् ॥ देवार्थमेकं पार्वणाष्टकार्थमष्टाविति्येवं नव पात्राणि ॥ सर्वत्र पवित्रद्वयांतर्हितेषु शन्नोदेवीरित्यप आसिच्य विश्वेदेवपात्रे यवोसीति यवा अष्टपात्रेषु

तिलोसीति मंत्रस्योहेन यवानोप्य गंधादिपूजनम् ॥ ऊहस्तु ॥ यवोसि सोमदेवत्यो गोसवे देवनिर्मितः ॥ प्रत्नवद्भिः प्रत्तः पुष्ट्या नांदीमुखान्देवान्प्रीणयाहि नः स्वाहा नमः ॥ इति प्रथमपात्रे ॥ द्वितीये नांदीमुखानृषीन्० तृतीये नांदीमुखान् दिव्यान्प्री० चतुर्थे नांदीमुखान्मनुष्यान्प्रीण० पंचमे नांदीमुखानि भूतानि प्री० षष्ठसप्तमाष्टमेषु नांदी० पितॄन्प्रीणयेत्यादि ॥ एकैकं पात्रं द्विधा विभज्य सर्वत्र या दिव्या इति मंत्रेण विश्वेदेवा नांदीमुखा इदं वोर्घ्यमिति वा ब्रह्मविष्णुमहेश्वरा नांदीमुखा इदं वोर्घ्यं स्वाहा नम इत्यादिना यथायथं षोडशविप्रहस्तेषु दद्यात् ॥ या दिव्या इति स्ववदनुमंत्रणम् ॥ पात्रं न्युब्जीकृत्य गंधाद्याच्छादनांतपूजा ॥ तत्र सर्वत्र संबुद्धयंतो नांदीमुखविशेषणयुक्त उच्चारः ॥ भोजनपात्राण्यासाद्य ब्रह्मादिषोडशविप्रकरेष्वन्नये कव्यवाहनाय स्वाहा सोमाय पितृमते स्वाहेति मंत्राभ्यामाहुतिद्वयं दद्यात् ॥ नेदमापस्तंबादीनाम् ॥ उपस्तीर्यान्नं परिविष्यान्नाभावे आमं तन्निष्क्रयं वा प्रोक्ष्य पृथ्वी ते पात्रमित्यादिना यथादैवतमन्नस्यामादेर्वा त्यागः ॥ ये देवा स० ॥ प्रजापते न० ब्रह्मार्पणं ब्रह्म० अनेनाष्टश्राद्धेन नांदीमुखा देवादयः प्रीयंताम् ॥ आपोशनदानांते बलिदानवर्ज्यं भुंजीयुः ॥ तृप्तेषु उपास्मै० अक्षन्नमी० संपन्नमिति पृष्टे रुचिरमिति सर्वे ब्रूयुः ॥ नेदमामान्ने ॥ आचांतेषु यवलाजदधिबदरीयुतान्नेनाष्टचत्वारिंशत्पिंडान्कृत्वा प्रागग्रता उदक्संस्था अष्टौ रेखाः कृत्वाभ्युक्ष्य कुशान्दूर्वा वास्तीर्य पिंडस्थानेषु चतुर्विंशतौ जलं सिंचेत् ॥ तद्यथा ॥ शुंधंतां ब्रह्माणो नांदीमुखाः शुंधंतां विष्णवो नांदीमुखाः ॥ शुंधंतां महेश्वरा नां० ॥ इति प्रथमरेखायाम् ॥ तदुत्तररेखासु शुंधंतां देवर्षयो नां०॥ शुंधंतां ब्रह्मर्षयो नांदी० ॥ इत्याद्यूहो ज्ञेयः ॥ ततो ब्रह्मणे नांदीमुखाय स्वाहेत्येकं पिंडं दत्त्वा द्वितीय एवमेव देयस्तूष्णीं वेति प्रतिदैवतं पिंडद्वयम् ॥ एवमग्रेपि विष्णवे नांदीमुखाय स्वाहेत्यादयः स्वाहांताः पिंडदानमंत्रा ऊह्याः ॥ अत्र पितरो मादयध्वमित्यादि पुनः शुंधंतां तं तंत्रमंजनमभ्यंजनं च कृताकृतम् ॥ पिंडानांधादिना संपूज्य नत्वोपसंपन्नमिति विसृज्य विप्रेभ्यो दक्षिणादि तंत्रम् ॥ नेदं पिंडदानाद्यापस्तंबादीनाम् ॥ कात्यायनानामाश्वलायनवत् ॥ अष्टश्राद्धोत्तरं तद्दिने द्वितीये वा षट् शिखाकेशान्स्थापयित्वा कक्षोपस्थवर्जं केशश्मश्रुनखादि वापयित्वा स्नात्वा कौपीनाच्छादनादि होमद्रव्यं च विनान्यत् धनादि विप्रादिभ्यः पुत्रादिभ्यश्च त्यजेत् ॥ कौपीनादिकं गैरिकं रंजितं कृत्वा वैणवं दंडं सत्वचं शिरोभ्रूललाटान्यतमप्रमाणं समूलमंगुलिस्थूलं विप्रानीतमेकादशनवचतुःसप्तान्यतमपर्वकं पर्वग्रंथियुतं मुद्रायुतं संपाद्य शंखोदकेन प्रणवपुरुषसूक्तकेशवादिनामभिरभिषिच्य स्थापयेत् ॥ ततः कमंडलुकौपीनाच्छादनकंथापादुकाः स्थापयेत् ॥ शिक्यपात्रादिकमपि केचित् ॥ देशकालौ संकीर्त्याशेषदुःखनिवृत्तिनिरतिशयानंदप्राप्तिपरमपुरुषार्थप्रा-

न्नये परंमहंसाख्यसंन्यासग्रहणं करिष्ये ॥ तदंगतया गणपतिपूजनपुण्याहवाचनमातृकापूजननांदीश्राद्धानि करिष्ये ॥ तानि कृत्वा जपेत् ॥ ब्रह्मणे नमः ॥ विष्णवे० रुद्राय० सूर्याय० सोमाय० आत्मने० अंतरात्मने० परमात्मने० अग्निमीळे ऋक् ॥ इषे त्वोर्जे त्वा ॥ अग्न आयाहि ऋक् ॥ शं नो देवी ऋक् ॥ जपित्वा सक्तुपिष्टं मुष्टित्रयं प्रणवेन त्रिः प्राश्य नाभिमालभेत् ॥ आत्मने स्वाहा ॥ अंतरात्मने० परमात्मने० प्रजापतये स्वाहेति मंत्रैः ॥ ततः पयोदधिमिश्रमाज्यं जलमेव वा त्रिवृदसीति द्वितीयं विवृदसीति तृतीयं प्राश्यापः पुनंत्विति जलं प्राश्याचम्योपवासं करिष्ये इति संकल्पयेत् ॥

## अथ सावित्रीप्रवेशः ।

ॐ भूः सावित्रीं प्रविशामि० ॐ तत्सवितुर्वरेण्यं ॐ भुवः सावित्रीं प्र० भर्गोदेवस्य० ॐ स्वः सावित्रीं० धियो यो० ॐ भूर्भुवः स्वः सावित्रीं प्र० तत्सवितु० ऋक् ॥ ततोस्तात्प्राक् गृह्याग्निं समिध्यविच्छिन्नश्चेत्पुनः संधानविधिना निरग्निर्वा विधुरादिर्वा पृषो दिवि विधानेनाग्निं संपादयेत् ॥ पृषो दिवि विधानं च कात्यायनवैश्वदेवप्रसंगे पूर्वार्द्धे उक्तम् ॥

## अथास्तात्पूर्वं ब्रह्मान्वाधानम् ।

संन्यासं कर्तुं ब्रह्मान्वाधानं करिष्ये इति संकल्प्याग्निध्यानाद्याज्यं संस्कृत्य स्रुक्स्रुवौ संमृज्य स्रुचि चतुराज्यं गृहीत्वों स्वाहेति हुत्वा परमात्मानं इदं० ॥ परिषेचनादि० इति ब्रह्मान्वाधानम् ॥ ततः सायं संध्याहोमवैश्वदेवान्कृत्वाग्निसमीपे जागरं कुर्यात प्रातर्नित्यहोमांते वैश्वदेवादिकं कृत्वाग्नेयं वैश्वानरं वा स्थालीपाकं कुर्यात् ॥ तत्र करिष्यमाणसंन्यासपूर्वांगभूतमाग्नेयस्थालीपाकं करिष्य इति संकल्प्य ध्यात्वा चक्षुषी आज्येनेत्यंतेत्र प्रधानमग्निं चरुणा शेषेणेत्यादि ॥ अग्नये त्वा जुष्टं निर्वपामीत्यादिनाग्ना निर्वापादि ॥ नाग्नैव प्रधानहोमः ॥ एवं वैश्वानरपक्षेप्यूह्यम् ॥ ततस्तरत्समंदीति जपित्वा कुशहेमरूप्यजलैः स्नात्वा देशादि स्मृत्वा संन्यासांगभूतं प्राणादिहोमं पुरुषसूक्तहोमं विरजाहोमं च तंत्रेण करिष्ये इति संकल्प्यान्वाधाने आज्येनेत्यंते प्राणादिपंचदेवताः समिच्चर्वाज्यैः पुरुषं पुरुषसूक्तेन प्रत्यृचं दशवारं समिच्चर्वाज्यैः प्राणाद्येकोनविंशतिदेवता विरजामंत्रैः प्रतिद्रव्यमेकैकसंख्यं समिच्चर्वाज्याहुतिभिः प्रजापतिं सकृदाज्येन शेषेणेत्यादिषष्ट्युत्तरशतवारं तूष्णीं निरूप्य तथैव प्रोक्ष्य श्रपयित्वाज्यभागांते प्राणाय स्वाहेत्यादिपंचमंत्रैर्द्रव्यत्रयं सकृत्सकृद्धुत्वा यथादैवं त्यक्त्वा सहस्रशीर्षेति षोडशर्चेन प्रत्यृचं पृथक्पृथक् द्रव्यत्रयं हुत्वा पुरुषायेदं न ममेति सर्वत्र त्यजेत् ॥

## अथ विरजाहोमः ।

प्राणापानव्यानोदानसमाना मे शुध्यंताम् ॥ ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा ॥ प्राणादिभ्य इदं० ॥ वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणरेतोबुद्ध्याकूतिसंकल्पा मे शुध्यंताम् ॥ ज्योति० ॥ वागादिभ्य इदं० ॥ त्वक्चर्ममांसरुधिरमेदोमज्जास्नायवोऽस्थीनि मे शुध्यंताम् ॥ त्वगादिभ्य इदं० ॥ शिरःपाणिपादपार्श्वपृष्ठोरूदरजंघाशिश्नोपस्थपायवो मे शुध्यं० ॥ शिर आदिभ्य० ॥ उत्तिष्ठपुरुष हरित पिंगल लोहिताक्ष देहिदेहि ददापयिता मे शुध्यं० ॥ पुरुषादिभ्य० ॥ पृथिव्यापस्तेजोवायुराकाशो मे शुध्यं० ॥ पृथिव्यादिभ्य० ॥ शब्दस्पर्शरूपरसगंधा मे शुध्यं० ॥ शब्दादिभ्य० ॥ मनोवाक्कायकर्माणि मे शुध्यंतां० ॥ मनआदिकर्मभ्य० ॥ अव्यक्तभावैरहंकारैर्ज्योतिरहं० ॥ अव्यक्तादिभ्य० ॥ आत्मा मे शुध्यंतां० ॥ ज्यो० आत्मने० ॥ अंतरात्मा मे० ॥ अंतरात्मन० ॥ परमात्मा मे० ॥ पर० ॥ क्षुधे स्वाहा ॥ क्षध इदं० ॥ क्षुत्पिपासायै स्वाहा ॥ क्षुत्पिपासाया इदं० ॥ विविध्यायै स्वा० ॥ विविध्याया० ॥ ऋग्विधानाय० ॥ कर्षोत्काय स्वा० ॥ क्षुत्पिपासामलं ज्येष्ठामलक्ष्मीं नाशयाम्यहम् ॥ अभूतिमसमृद्धिं च सर्वां निर्णुदमे पाप्मान ँ स्वाहा ॥ अन्नय इदं० ॥ अन्नमयप्राणमयमनोमयविज्ञानमयानंदमयआत्मा मे शुध्यंतां० ॥ अन्नमयादिभ्य० ॥ एवं समिच्चर्वाज्यैः प्रतिद्रव्यं चत्वारिंशदाहुतीर्हुत्वा ॥ यदिष्टं यच्च पूर्तं यच्चावद्यनापदि ॥ प्रजापतौ तन्मनसि जुहोमि विमुक्तोहं देवकिल्बिषात्स्वाहेत्याज्यं हुत्वा प्रजापतय इदमिति त्यजेत् ॥ ततः पुरुषसूक्तम् ॥ अग्निमीळे इत्यादिचतुर्वेदादींश्च जपित्वा स्विष्टकृदादिहोमशेषं समाप्य ब्रह्मचार्यादिभ्यो गोहिरण्यवस्त्रादि दत्त्वा समार्सिचंतु मरुत इति मंत्रेण गृह्याग्निमुपस्थाय तत्र दारुपात्राणि दहेत्तैजसानि गुरवे दद्यात् ॥. तत आत्मन्यग्निसमारोपम् ॥ अयं ते योनिरित्यृचा या ते अग्ने यज्ञिया तनूस्तये ह्यारोहात्मात्मानमित्यादियजुषा च त्रिरुक्तेनाग्नेर्ज्वालां प्रशान्कुर्यात् ॥ कृष्णाजिनमादाय गृहान्निष्क्रम्य ॥ सर्वे भवंतु वेदाढ्याः सर्वे भवंतु सोमपाः ॥ सर्वे पुत्रमुखं दृष्ट्वा सर्वे भवंतु भिक्षुका इति पुत्रादिभ्य आशिषं दत्त्वा न मे कश्चिन्नाहं कस्यचित्पुत्रादीनुक्त्वा विसृजेत् ॥ जलाशयं गत्वांजलिना जलमादायाशुः शिशान इति सूक्तेनाभिमंत्र्य सर्वाभ्यो देवताभ्यः स्वाहेति त्यजेत् ॥ तिथ्यादि स्मृत्वाऽपरोक्षब्रह्मावाप्तये संन्यासं करोमीति संकल्प्य जलांजलिं गृहीत्वा ॥ ॐ एष ह वा अग्निः सूर्यः प्राणं गच्छ स्वाहा ॥ ॐ स्वां योनिं गच्छ स्वाहा ॥ ॐ आपो वै गच्छ स्वाहेति मंत्रत्रयेण जलेष्वंजलित्रयं दद्यात् ॥ पुत्रेषणा वित्तेषणा लोकेषणा सर्वेषणा मया परित्यक्ता अभयं सर्वभूतेभ्यः स्वाहा ॥ इत्यंजलिं जले क्षिपेत ॥ पुनरे-

वमभयं दत्त्वा वदेत् ॥ "यत्किंचिद्बंधनं कर्म कृतमज्ञानतो मया ॥ प्रमादालस्यदोषोत्थं तत्सर्वं संत्यजाम्यहम् ॥ त्यक्तसर्वो विशुद्धात्मा गतस्नेहशुभाशुभः ॥ एष त्यजाम्यहं सर्वं कामभोगसुखादिकम् ॥ रोषं तोषं विवादं च गंधमाल्यानुलेपनम्॥ भूषणं नर्तनं गेयं दानमादानमेव च ॥ नमस्कारं जपं होमं याश्च नित्यक्रिया मम॥ नित्यं नैमित्तिकं काम्यं वर्णधर्माश्रमाश्च ये ॥ सर्वमेव परित्यज्य ददाम्यभयदक्षिणाम् ॥ पद्भ्यां कराभ्यां विहरन्नाहं वाक्कायमानसैः ॥ करिष्ये प्राणिनां पीडां प्राणिनः संतु निर्भयाः॥" सूर्यादिदेवान्विप्रांश्च साक्षित्वेन ध्यात्वा नाभिमात्रे जले प्राङ्मुखः ॥ सावित्रीप्रवेशं पूर्ववत्कृत्वा तरत्समंदीति सूक्तं पठित्वा पुत्रेषणाया वित्तेषणायाश्च लोकेषणायाश्च व्युत्थितोहं भिक्षाचर्यं चरामीति जले जलं जुहुयात्॥ अथ प्रणवोच्चारः ॥ ॐ भूः संन्यस्तं मया ॥ ॐ भुवः संन्यस्तं मया ॥ ॐ स्वः संन्यस्तं मया ॐ भूर्भुवः स्वः संन्यस्तं भगवते त्रिर्मदमध्योच्चस्वरेणोत्काभयं सर्वभूतेभ्यो मत्तः स्वाहेति जले जलं क्षिपेत् ॥ शिखामुत्पाट्य यज्ञोपवीतमुद्धृत्य करे गृहीत्वा ॥ आपो वै सर्वा देवताः सवाभ्यो देवताभ्यो जुहोमि स्वाहा ॐ भूः स्वाहेति जले जलैः सह हुत्वा प्रार्थयेत् ॥ त्राहि मां सर्वलोकेश वासुदेव सनातन ॥ संन्यस्तं मे जगद्योने पुंडरीकाक्ष मोक्षद ॥ युष्मच्चरणमापन्नं त्राहि मां पुरुषोत्तम ॥ ततो दिगंबरः पंचपदान्युदङ्मुखो गच्छेत् ॥ विविदिषुश्चेत्तस्मै आचार्यो नत्वा कषायकौपीनाच्छादने दत्त्वा दंडं दद्यात् ॥ स च कौपीनं वासश्च परिधाय ॥ ॐ इंद्रस्य वज्रोसि सखे मां गोपायेति दंडं गृह्णीयात् ॥ प्रणवेन गायत्र्या वा कमंडलुम् ॥ इदं विष्णुरित्यासनम् ॥

## अथ वाक्योपदेशः ।

ततः समित्पाणिर्गुरुं नत्वा गरुडासनोपविष्टो गुरुं वदेत् ॥ "त्रायस्व भो जगन्नाथ गुरो संसारवह्निना ॥ दग्धं मां कालदष्टं च त्वामहं शरणागतः ॥" यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै ॥ तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये इति गुरुमुपस्थाय दक्षिणं जान्वाच्य पादावुपसंगृह्याधीहि भगवो ब्रह्मेति वदेत् ॥ गुरुरात्मानं ब्रह्मरूपं ध्यात्वा जलपूर्णं शंखं द्वादशप्रणवैरभिमंत्र्य तेन शिष्यमभिषिच्य शन्नो मित्र इति शांतिं पठित्वा तच्छिरसि हस्तं दत्त्वा पुरुषसूक्तं जपित्वा शिष्यहृदये हस्तं कृत्वा मम व्रते हृदयं ते दधामीत्यादि मंत्रं जप्त्वा दक्षिणकर्णे प्रणवमुपदिश्य तदर्थं च पंचीकरणाद्यवबोध्य ॥ प्रज्ञानं ब्रह्म ॥ अयमात्मा ब्रह्म ॥ तत्त्वमसि ॥ अहं ब्रह्मास्मीति ऋग्वेदादिमहावाक्येष्वन्यतमं शिष्यशाखानुसारेणोपदिश्य तदर्थं बोधयेत् ॥ ततस्तीर्थाश्रमादिसंप्रदायानुसारेण नाम दद्यात् ॥ ततः पर्यंकशौचं कारयित्वा योगपट्टं दद्यात् ॥

## अथ पर्यंकशौचप्रयोगः ।

कस्मिंश्चित्पुण्यदिने कश्चिद्दृढस्थः स्वाग्रे पीठादौ यतिमुपवेश्य गुर्वनुज्ञातो यतये पर्यंकशौचं करिष्ये इति संकल्प्य वामभागे प्राक्संस्थान्पंचमृद्भागान्दक्षिणभागेपि तथैव पंच संस्थाप्योभयत्र शुद्धोदकं च संस्थाप्य वामप्रथममृद्भागेन पंचवारं मृज्जलाभ्यां यतिजानुद्वयं कराभ्यां युगपत्क्षालयेत् ॥ चरमक्षालने मृद्भागसमाप्तिः ॥ एवमग्रेपि ॥ ततो दक्षिणभागस्थप्रथमभागार्धेन स्ववामकरं मृज्जलाभ्यां दशवारं प्रक्षाल्यापरार्धेन तेनैव जलेनोभौ करौ सप्तवारं क्षालयेत् ॥ एवमग्रेपि योज्यम् ॥ संख्यायां विशेषस्तूच्यते ॥ वामद्वितीयभागेन चतुर्वारं जंघाद्वयं युगपत्प्रक्षाल्य दक्षिणद्वितीयभागार्धेन सप्तवारं वामकरमर्धांतरेण चतुर्वारमुभौ च करौ क्षालयेत्॥ वामतृतीयेन यतिगुल्फौ त्रिवारं दक्षिणभागार्धेन वामकरं षड्वारमुभौ चतुर्वारम्॥ वामचतुर्थेन यतिपादपृष्ठौ द्विवारं दक्षिणार्धेन स्ववामकरं चतुर्वारमुभौ द्विवारमवशिष्टार्धेन ॥ वामपंचमेन यतिपादतले सकृद्दक्षिणपंचमार्धेन वामस्य द्विवारमुभयोश्चापरार्धेन सकृत्क्षालनमिति ॥

## अथ योगपट्टः ।

कारितपर्यंकशौचो यतिः कटिशौचं कृत्वा कटिसूत्रकौपीने धृत्वा वस्त्रेणापगुंठ्य गुर्वनुज्ञयोच्चासने उपविश्य सभ्यैः सह वेदांते किंचिदुपन्यसेत् ॥ गुरुर्यतिः शिष्यं यतिं शिरसि शंखेन पुरुषसूक्तेनाभिषिच्य वस्त्रगंधपुष्पधूपदीपनैवेद्यैः संपूज्य वस्त्रमुपरि धृत्वा यतिभिः सह विश्वरूपाध्यायं पश्यामि देवानित्यारभ्य भुंक्ष्व राज्यं समृद्धमित्यंतं पठित्वा पूर्वकल्पितं नाम दद्यात् ॥ ततः शिष्यं वदेत् ॥ इतः परं त्वया संन्यासाधिकारिणे संन्यासो देयो दीक्षायोगपट्टादिकं च कार्यम् ॥ ज्येष्ठयतयो नमस्कार्याः ॥ ततो गुरुः कटिसूत्रं पंचमुद्रालंकृतं पूर्वदंडं च शिष्याय दत्त्वा शिष्यं यथासंप्रदायं नमस्कुर्यात् ॥ अन्ययतयो गृहिणश्च नमस्कुर्युः ॥ शिष्यो नारायणेत्युक्त्वोच्चासनादुत्थाय तत्र गुरुमुपवेश्य यथाविधि नत्वान्ययतीन्नमेत् ॥ इति गृह्याग्निमतो विधुरादेश्च विविदिषा संन्यासप्रयोगः ॥

## अथाग्निहोत्रिणो विशेषः ।

तत्र श्रौताग्नयो विच्छिन्नाश्चेत्पुनराधानम् ॥ पावमानेष्ट्यंतं पूर्णाहुत्यंतं वा कृत्वा प्रायश्चित्तादिसावित्रीप्रवेशांतं पूर्ववत्कुर्यात् ॥

## अथ ब्रह्मान्वाधानम् ।

अग्नित्रयं समिध्यसंस्कृतमाज्यं स्रुचि चतुर्वारं गृहीत्वाऽऽहवनीये पूर्णाहुतिं ॐ स्वाहा परमात्मने इदमिति कुर्यात् ॥ सायंसन्ध्याग्निहोत्रहोमांते उत्तरेण गार्हपत्यं द्वंद्वशः पात्राण्यासाद्याहवनीयदक्षिणतः कौपीनदंडाद्यासादयेत ॥ रात्रिजागरांते

प्रातर्होमादि कृत्वा पौर्णमास्यां ब्रह्मान्वाधानं चेत्पौर्णमासेष्टिं कृत्वा दर्शेष्टिमपि पक्षहोमापकर्षपूर्वकमपकृष्य तदैव कुर्यात् ॥ दर्शे चेद्दर्शेष्टिरेव ॥ अथ पूर्णमास्यां दर्शे वा देशकालौ स्मृत्वा संन्यासपूर्वांगभूतया प्राजापत्येष्ट्या वैश्वानर्येष्ट्या च समानतंत्रया यक्ष्ये इति संकल्प्य समुच्चयेनेष्टिद्वयम् ॥ अत्र वैश्वानरो द्वादशकपालः पुरोडाशः ॥ प्राजापत्यश्चरुर्वैष्णवो नवकपालः पुरोडाशः ॥ अथवा केवलप्राजापत्येष्टिः ॥ अत्र प्रयोगः स्वस्वसूत्रानुसारेणोह्यः ॥ बौधायनसूत्रानुसारेण किंचिदुच्यते ॥ पवनपावनपुण्याहवाचनादिपूर्वांगांते केवलवैश्वानरेष्ट्याः केवलप्राजापत्याया वा संकल्पः ॥ व्रीहिमयः पुरोडाशो द्रव्यं पंच प्रयाजाः ॥ अग्निर्वैश्वानरः प्रजापतिर्वा देवता पंचदश स्रामिधेन्यः ॥ व्रतग्रहणांतेध्वर्युराज्यं संस्कृत्य स्रुचि चर्गृहीतं गृहीत्वा पृथिवी होतेत्यादिचतुर्होतृहोमं कूष्मांडहोमसारस्वतहोमौ च कृत्वा निर्वापादि ॥ वैश्वानरो द्वादशकपालः पुरोडाशः प्राजापत्यश्चरुः ॥ वैश्वानराय प्रतिवेदयाम इति पुरोनुवाक्या ॥ वैश्वानरः पवमानः पवित्रैरिति याज्या ॥ प्राजापत्यायां प्रधानमुपांशुयर्मकं सुभूः स्वयंभूरित्याद्यनुवाक्याः ॥ प्रजापते नत्वदेतामिति याज्या॥अथ स्रुवेणाष्टावुपहोमा उभयत्र ॥ वैश्वानरो न ऊतयआ प्रयातु परावतः ॥ अग्निरुक्थेन वाहसा स्वाहा ॥ वैश्वानरायेदमिति त्यागः सर्वत्र ॥ ऋतावानं वैश्वानरमृतस्य ज्योतिषस्पतिम् ॥ अजस्रं धर्ममीमहे स्वाहा २ वैश्वानरस्यदस ३ पृष्ठो दिवि पृष्ठो अग्निः० ४ जातो यदग्ने० ५ त्वमग्ने शोचिषा० ६ अस्माकमग्ने० ७ वैश्वानरस्य सुमतौ० ८ अथैनमुपतिष्ठेत सहस्रशीर्षेति सूक्तेन ॥ ततः स्विष्टकृदादिशेषं स्रमापयेत् ॥ सर्वो वै रुद्रो विश्वंभूतमिति द्राभ्यामभ्युत्सर्गः ॥ आयुर्दा अग्ने इति मंत्रेण दर्भस्तंबस्थयजमानभागात्किंचिदादाय सहस्रशीर्षेत्यनुवाकेन प्राश्य ओमिति ब्रह्म ओमितीदं सर्वमित्यनुवाकेन हुतशेषमाहवनीये प्रक्षिपेत् ॥ एवं वैश्वानर्याद्यन्यतरामिष्टिं कृत्वोपासनाग्नौ सर्वाधाने दक्षिणाग्नौ प्राणादिहोमादिविरजाहोमांतं कार्यम् ॥ अन्यत्प्राग्वत् ॥ ५ ॥ आहवनीयेऽरणीमुसलोलूखलातिरिक्तदारुपात्राणां दाहः ॥ तत आत्मन्याहवनीयाग्निसमारोपः पूर्ववत् ॥ अरणीद्वयं गार्हपत्ये प्रक्षिप्य तत्समारोपं कृत्वा ॥ दक्षिणाग्नौ मुसलोलूखले हुत्वा दक्षिणाग्नेरपि समारोपः ॥ तत औपासनाग्नेः समारोप इति क्रमः ॥ अत्र विशेषोन्यत्र ज्ञातव्यः ॥ इति साग्निकप्रयोगः ॥ स्नातकं प्रति ब्रह्मान्वाधानविरजाहोमादिरहितो वा प्रयोगोऽन्यभावात् ॥

## अथातुरसंन्यासः ।

आतुरसंन्यासे संकल्पप्रेषोच्चाराभयदानेति त्रयं प्रधानमावश्यकं कार्यम् ॥ अष्टश्राद्धादिदंडग्रहणांतमंगभूतं यथासंभवं कार्यम् ॥ तत्प्रयोगः ॥ मंत्रस्नानं कृत्वा

शुद्धवस्त्रं धृत्वा ज्ञानप्राप्तिद्वारा मोक्षसिद्ध्यर्थमातुरविधिना संन्यासमहं करिष्ये ॥ पंचकेशानवशेष्य वपनं कृत्वा स्नात्वा संध्याद्यौपासनहोमांतं यथासंभवं संपाद्यात्मनि समारोपं कुर्यात् ॥ अग्निहोत्री तु प्राजापत्यादिस्थाने पूर्णाहुतिं कृत्वा श्रौताग्निमात्मनि समारोपयेत् ॥ उच्छिन्नाग्नीनां पुनराधानसंभवे समारोपोन्यथा तु न समारोपः ॥ विधुरादीनामग्न्यभावादेव समारोपो नावश्यकः ॥ ततस्तोयमादायाप्सु जुहोति ॥ एष ह वा अग्नेर्योनिर्यः प्राणः प्राणं गच्छ स्वाहा १ ॥ आपो वै सर्वा देवताः सर्वाभ्यो देवताभ्यो जुहोमि स्वाहा २ ॥ भूः स्वाहेति जले जलैर्हुत्वा हुतशेषं जलमाशुः शिशान इत्यनुवाकेनाभिमंत्र्य पुत्रेषणा वित्तेषणा लोकेषणा मया त्यक्ताः स्वाहेति किंचित्पिबेत् ॥ अभयं सर्वभूतेभ्यो मत्तः स्वाहेति द्वितीयं पिबेत् ॥ संन्यस्तं मयेति निःशेषं तृतीयं पिबेत् ॥ ततः पूर्ववत्सावित्रीप्रवेशः ॥ ततः प्राङ्मुख ऊर्ध्वबाहुः प्रेषोच्चारं पूर्ववत्कुर्यात ॥ अभयं सर्वभूतेभ्यो मत्तः स्वाहेति प्राच्यां जलं क्षिपेत् ॥ शिखामुत्पाट्य यज्ञोपवीतं छित्त्वा भूः स्वाहेत्यप्सु हुत्वा पुत्रगृहे न तिष्ठेत् ॥ अत्यंतमातुरश्चेत्प्रेषमात्रं वा वदेत् जीवति चेत्स्वस्थः सन्महावाक्योपदेशदंडग्रहणादि सर्वं कुर्यात् ॥ एवमातुरविधिना संन्यासे मृतस्य यतिवत्संस्कारः ॥

## अथ मृतयतिसंस्कारः ।

पुत्रः शिष्यो वा स्नात्वा वपनं कृच्छ्रत्रयं चाधिकारार्थं कुर्यात् ॥ पुत्रातिरिक्तस्य वपनं कृताकृतम् ॥ देशकालौ स्मृत्वा ब्रह्मीभूतस्य यतेः शौनकोक्तविधिना संस्कारं करिष्ये ॥ नवं कलशं तीर्थेनापूर्य गंगे च यमुने० नारायणः परं ब्रह्म० यच्च किंचिज्जगत्सर्वं० इति मंत्रैरभिमंत्र्य रुद्रसूक्तविष्णुसूक्तापोहिष्ठादिभिर्यतेः स्नानं विधाय चंदनादिभिः कलेवरं संपूज्य माल्यादिभिरलंकृत्य वाद्यघोषादिभिः शुद्धदेशं नयेत् ॥ जले स्थले वा समाहितं कुर्यात् ॥ स्थलपक्षे गर्तं व्याहृतिप्रोक्षितभुवि दण्डप्रमाणं कृत्वा मध्ये सूक्ष्मगर्तं सार्धहस्तं कृत्वा सप्तव्याहृतिभिः पंचगव्येन त्रिः प्रोक्ष्य जलपक्षे नद्यां पंचगव्यं प्रक्षिप्य कुशानास्तीर्य सावित्र्या देहं प्रोक्ष्य शंखोदकेन पुरुषसूक्तेनाष्टोत्तरशतावृतप्रणवैश्च संस्राप्याष्टाक्षरेण षोडशोपचारैः संपूज्य तुलसीमालाद्यैरलंकृत्य विष्णो हव्यं रक्षस्वेति देहं गर्तं नद्यां वा क्षिपेत् ॥ इदं विष्णुरिति दंडं त्रेधा भग्नं दक्षिणहस्ते स्थापयेत् ॥ हंसः शुचिषदिति परेण नाकं निहितमिति हृदये जपेत् ॥ पुरुषसूक्तं भ्रुवोर्मध्ये जपेत् ॥ ब्रह्मजज्ञानमिति मूर्धनि ॥ मूर्धानं भूर्भुवः स्वश्चेत्युक्त्वा शंखेन भेदयेत् ॥ अथवा भूमिर्भूमिमगान्माता मातरमप्यगात् ॥ भूयास्म पुत्रैः पशुभिर्यो नो द्वेष्टि स भिद्यतामिति मंत्रेण परश्वादिना भेदयेत् ॥ शिरो भेत्तुमशक्तः शिरःस्थापितं गुडपिंडादिकं भिद्यात् ॥ गर्तं पुरुषसूक्तेन लवणेन प्रपूरयेत् ॥ शृगालश्वादिरक्षार्थं सिकतादिभिः प्रपूरयेत् ॥ नद्यादौ चेच्छि-

रोभेदनोत्तरं दर्भैराच्छाद्य व्याहृतिभिरभिमंत्र्य पाषाणं बद्धा ॐ स्व ोति द्वदेन्यसेत् ॥ ततोग्निनाग्निः स० त्वं ह्यग्ने अग्निना० त्वं मर्जयंतसुक्रतुं० यज्ञेन यज्ञं० इत्यृक्चतुष्टयेन चित्तिः स्रुगित्यादिभिर्दशहोत्रादिसंज्ञकयजुर्मंत्रैश्चाभिमंत्रयेत् ॥ अतो देवा इति जपित्वा पापैर्मुक्ता अश्वमेधादिफलभागिनो वयमिति भावयंतोवभृथबुद्ध्या सर्वेनुगामिनः स्नात्वा गंधादि धृत्वा सोत्सवा गृहं गच्छेयुः ॥ अत्र परमहंसस्य स्थले समाधिर्मुख्यः ॥ जल भध्यमः ॥ "कुटीचकं च प्रदहेत्पूरयेच्च बहूदकम् ॥ हंसो जले तु निक्षेप्यः परमहंसं प्रपूरयेत्" इति वचनात् ॥ अत्र परमहंसं प्रक्षीरयेदिति क्वचित्पाठः ॥ एकोद्दिष्टं जलं पिंडमाशौचं प्रेतसत्क्रियाम् ॥ न कुर्याद्वार्षिकादन्यद्ब्रह्मीभूताय भिक्षवे ॥ कुटीचकातिरेकेण न दहेद्यतिनं क्वचित् ॥ ततः कर्ता स्नात्वाचम्य सिद्धिं गतस्य ब्रह्मीभूतभिक्षोस्तृप्त्यर्थं तर्पणं करिष्ये इति संकल्प्य सव्येन देवतीर्थेनैवात्मानमंतरात्मानं परमात्मानमिति चतुश्चतुस्तर्पयित्वा शुक्लपक्षे मृतस्य केशवादिद्वादशनामभिः कृष्णपक्षे मृतस्य संकर्षणादिद्वादशनामभिः केशवं तर्पयामीत्येवं द्वितीयांतैः कुर्यात् ॥ इदं क्षीरेणेति केचित् ॥ ततः सिद्धिं गतस्य भिक्षोस्तृप्त्यर्थं नारायणपूजनं बलिदानं घृतदीपदानं च करिष्ये इति संकल्प्य देवयजनोपरि तीरे वा मृन्मयलिंगं कृत्वा पुरुषसूक्तेनाष्टाक्षरेण च षोडशोपचारपूजां कृत्वा घृतमिश्रपायसबलिं दत्त्वा घृतदीपं च समर्प्य पायसबलिं जले क्षिपेत्॥तत ॐ नमो ब्रह्मणे नम इति शंखेनाष्टार्घ्यान् दत्त्वा गृहं व्रजेदिति प्रथमदिनकृत्यम् ॥ एवं दशदिनांतं प्रत्यहं तर्पणं लिंगपूजनपायसबलिदीपदानानि कुर्यात् ॥ अथैकादशेहनि पार्वणश्राद्धम् ॥ तत्र मध्याह्ने नद्यादौ श्राद्धांगतिलतर्पणं कृत्वा देशकालौ स्मृत्वा प्राचीनावीती अमुकगोत्रस्यामुकशर्मणो ब्रह्मीभूतस्यास्मत्पितुः करिष्यमाणदर्शादिसर्वश्राद्धाधिकारार्थमाद्यपार्वणश्राद्धं करिष्ये इति पुत्रादिः संकल्पयेत् ॥ शिष्यस्तु ब्रह्मीभूतस्य गुरोः प्रत्यब्दादिश्राद्धाधिकारार्थं तत्पितृसंबंधिनामगोत्रोद्देश्यतासिद्ध्यर्थं च पार्वणश्राद्धमिति संकल्पयेत् ॥ अन्यत्समानम् ॥ पुरूरवार्द्रवसंज्ञका विश्वेदेवाः ॥ पितृपितामहप्रपितामहानां नामगोत्रादिसहितानामुच्चारः ॥ सर्वत्र पितुर्ब्रह्मीभूत इति विशेषणमात्रमधिकम् ॥ शेषं प्रत्यब्दश्राद्धवत् ॥ केचिच्छिष्यः कर्ता चेदात्मांतरात्मपरमात्मन उद्दिश्य साधुरुसंज्ञकदेवयुतं सव्येन दैवधर्मकं नांदीश्राद्धवदेकादशाहे पार्वणश्राद्धं कुर्यादित्याहुः ॥ अत्र सर्वत्र विस्तरस्तोरोक्तसंन्यासपद्धतौ द्रष्टव्यः ॥

## अथ द्वादशाहे नारायणबलिः ।

देशादि स्मृत्वा सिद्धिं गतस्य भिक्षोः संभावितसर्वपापक्षयपूर्वकं विष्णुलोकाप्तिद्वारा श्रीनारायणप्रीत्यर्थं नारायणबलिं करिष्ये इति संकल्प्य त्रयोदशयती

न्विप्रान्वा निमंत्र्य शुक्लपक्षे केशवरूपिगुर्वर्थं त्वया क्षणः कर्तव्य इत्येवं दामोदरांतकेशवादिद्वादशनामभिः क्षणा देयः ॥ कृष्णे तु संकर्षणादिद्वादशनामभिस्त्रयोदशं विप्रं विष्ण्वर्थं त्वया क्षणः कर्तव्य इति निमंत्र्य पादान्प्रक्षाल्य प्राङ्मुखानुपवेशयेत् ॥ विप्राग्रे स्थंडिलेग्निप्रतिष्ठापनादि ॥ अन्वाधाने चक्षुष्याज्येनेत्यंतेऽग्निं वायुं सूर्यं प्रजापतिं च व्यस्तसमस्तव्याहृतिभिरेकैकपायसाहुत्या विष्णुमतो देवा इति षड्भिः प्रत्यृचमेकैकपायसाहुत्या नारायणं पुरुषसूक्तेन प्रत्यृचमेकैकपायसाहुत्या शुक्ले केशवादिद्वादश देवताः कृष्णे संकर्षणादिद्वादशदेवताः एकैकपायसाहुत्या शेषेणेत्यादिद्विपंचाशदधिकशतमुष्टीन्निरूप्य बलिपर्याप्ततंडुलानोप्याष्टत्रिंशदाहुतिपर्याप्तं पुरुषाहारमितविष्णुनैवेद्यपर्याप्तं च क्षीरे श्रपयित्वाज्यभागांतेग्निपूर्वतः शालग्रामे विष्णुं पुरुषसूक्तेनाष्टाक्षरेण च षोडशोपचारैः संपूज्य स्रुचा हस्तेन वान्वाधानानुसारेण होमत्यागौ विदध्यात् ॥ एवं शुक्लकृष्णभेदेन केशवादिद्वादशांताः संकर्षणाद्यंता वाष्टत्रिंशदाहुतीर्हुत्वा स्विष्टकृदादिहोमशेषं समाप्य पुनः शालग्रामं संपूज्य विष्णुगायत्र्या विष्णवेर्घ्यं दत्त्वा हुतशेषपायसेन विष्णवे बलिं दत्त्वा निमंत्रितत्रयोदशविप्रान्केशवादिक्रमेण केशवरूपिगुरवे नम इदमासनमित्यादिनासन धूपपुष्पधूपदीपाच्छादनानि दत्त्वा त्रयोदशं विप्रं पुरुषसूक्तेन प्रत्यृचांते विष्णवे नम इत्येवमादिना विष्णुं दीपांतोपचारैः पूजयेत् ॥ चतुरस्रमंडलेषु त्रयोदशभोजनपात्राण्यासाद्योपस्तीर्यान्नं परिविष्य पृथ्वी ते पात्रमित्यादिना केशवादिद्वादशोद्देशेन विष्णूद्देशेन चान्नं त्यक्त्वा अतो देवा० ॐ तद्ब्रह्म ॐ तद्वायुर्ब्रह्मार्पणमित्याद्यापोशनादिप्राणाहुत्यंते नारायणाद्युपनिषद्भागान्पठेत्तृप्तिप्रश्नांते आचांतेषु प्रागग्रान्दर्भानास्तीर्याष्टाक्षरेणाक्षतोदकं दत्त्वा केशवरूपिणे गुरवेऽयं पिंडः स्वाहा न मम इत्येवं द्वादश पिंडान्दद्यात् ॥ कृष्णे तु संकर्षणादिनामभिरिति सर्वत्र पिंडे विष्णुं संपूज्य पुरुषसूक्तेन स्तुत्वा विसर्जयेत् ॥ विप्रेभ्यस्तांबूलदक्षिणादि दत्त्वा त्रयोदशाय विप्राय नाभ्या आसीदित्याद्यृक्त्रयेण फलतांबूलदक्षिणादि दत्त्वा नमस्कृत्य तां शालग्राममूर्तिमाचार्याय दद्यात् ॥ इति नारायणबलिविधिः ॥

## अथ द्वादशाहे त्रयोदशाहे वा यथाचारमाराधनम् ।

तत्र प्रयोगः ॥ देशकालौ स्मृत्वा श्रीनारायणप्रीत्यर्थमाराधनं करिष्ये इति संकल्प्य ॥ गुर्वर्थं क्षणः कर्तव्यः ॥ एवं परमगुर्वर्थं परमेष्ठिगुर्वर्थं परात्परगुर्वर्थं एवं विप्रचतुष्टयं निमंत्र्य शुक्ले केशवादिनामभिः कृष्णे संकर्षणादिनामभिः द्वादशविप्रान्निमंत्रयेत् ॥ एवं षोडशविप्राः यतयो वा ॥ अशक्तो यथाशक्ति विप्रान्निमंत्र्य यथायथं षोडश क्षणा देयाः ॥ षोडशानां पादक्षालनं कृत्वाचम्य पादक्षालनोदकं पात्रांतरे गृहीत्वा गंधपुष्पादिभिः पूजयेत् ॥ विप्रान्प्राङ्मुखानुदङ्मुखान्वोपवेश्य

षोडशोपचारैर्गंधादिपंचोपचारैर्वा संपूज्य ॥ सपरिकरमन्नं परिविष्य गायत्र्या प्रोक्ष्य गुरवे इदमन्नं परिविष्टं परिवेक्ष्यमाणं चातृप्तेः स्वाहा हव्यं न मम ॥ एवं परमगुर्वादिभ्यः पंचदशभ्योन्नत्यागं कृत्वा ब्रह्मार्पणमित्यादिभुक्तेष्वाचांतेषु तांबूलदक्षिणावस्त्रादिभिः पूजयेत् ॥ अत्र केचित्पूर्वस्थापितपादोदकतीर्थपूजां कुर्वंति ॥ तद्यथा तीर्थपात्रं तण्डुलादिकृतमंडले संस्थाप्य पुरुषसूक्तेन तीर्थराजाय नम इति षोडशोपचारैः संपूज्य तत्पात्रं शिरसि धृत्वा बंधुभिः सह विप्रान्प्रदक्षिणीकृत्य गुरुर्ब्रह्मा गुरुर्विष्णुरिति नत्वा प्रथमविप्रहस्तात्तत्तीर्थं पिबेत् ॥ तत्र मंत्रः ॥ "अविद्यामूलशमनं सर्वपापप्रणाशनम् ॥ पिबामि गुरुपत्तीर्थं पुत्रपौत्रप्रवर्धनम्॥" इति ॥ कर्मेश्वरार्पणं कृत्वा सुहृद्युतो भुंजीत ॥ वर्षपर्यंतं प्रतिमासं मृततिथावेवमेवाराधनं कार्यम् ॥ न तु प्रतिमासिकश्राद्धम् ॥ प्रत्यब्दं तु पार्वणश्राद्धं कृत्वाराधनमपि कार्यम् ॥ ततो दर्शमहालयादिश्राद्धान्यपि सर्वसाधारण्येन कार्याणि ॥ न तत्र विशेषः ॥ इत्याराधनविधिः ॥ अत्र नारायणबलिपार्वणश्राद्धयोरेकदिनानुष्ठानपक्षे एकादशे द्वादशे वा दिने पूर्वं नारायणबलिं कृत्वा ततः पार्वणश्राद्धं कार्यम् ॥ दिनद्वये करणपक्षे त्वेकादशे पार्वणं द्वादशे नारायणबलिर्द्वादश' त्रयोदशे वा दिने आराधनम् ॥ ऊनमासिकादिकालेष्वप्याराधनमिति केचित् ॥ प्रतिमासमाराधनमित्यन्ये ॥ पार्वणश्राद्धं त्वेकादशाहप्रत्यब्दयोरेव ॥ तच्च पुत्रादीनामेव नियतं शिष्यादीनां तु नावश्यकम् ॥ अपुत्रयतेस्तु शिष्येणापि प्रत्यब्दं पार्वणश्राद्धं कार्यम् ॥ तदर्थं च नामगोत्रोल्लेखाधिकारार्थमेकादशेपि शिष्येण पार्वणश्राद्धं कार्यम् ॥ नारायणबल्यादेर्द्वादशाहादावसंभवे शुक्लपक्षस्थद्वादशीश्रवणपंचम्यः पूर्णिमामावास्या चेति गौणकालाः ॥ अत्र पूर्वपूर्वः श्रेयान् ॥ भार्याकन्यास्तुषादेः स्त्रिया यतिसंस्कारकर्तृत्वे तु विधवाया वपनपूर्वकं कृच्छ्रत्रयाचरणं सधवायास्तु कृच्छ्राचरणमेव ॥ देशांतरस्थपुत्रः पितुर्यतेः सिद्धिवार्तां श्रुत्वा वपनपूर्वकं स्नात्वा क्षीरतर्पणपूजनादिदशाहांतं कृत्वैकादशाहादौ पार्वणनारायणबल्यादिसर्वमविकृतं कुर्यात् ॥ सन्निहितेन ज्येष्ठेन कृतं चेत्कनिष्ठो न कुर्यात् ॥ शुक्लकृष्णादिभेदेन केशवादिनामानि मृततिथ्यनुरोधेनैव ग्राह्याणि न तु वार्ताश्रवणतिथ्यनुरोधेन ॥ मृततिथ्यज्ञाने तु वार्ताश्रवणानुरोधेनैव ॥ यतिसंस्कारकरणेश्वमेधसहस्रादिफलम् ॥ "असंस्कृतं विशीर्येत यतेर्यत्र कलेवरम् ॥ धर्मलोपो भवेत्तत्र दुर्भिक्षं मरणं तथा ॥ दिवं गते गुरौ शिष्यं उपवासं तदाचरेत् ॥ न स्नानमाचरेद्भिक्षुः पुत्रादिनिधने श्रुते ॥ पितृमातृक्षयं श्रुत्वा स्नानाच्छुद्ध्यति सांवरः ॥"

## अथ प्रसंगाद्यतिधर्माः ।

प्रातरुत्थाय ब्रह्मणस्पत इति जपित्वा दंडादीनि मृदं चादाय मूत्रपुरीषयोर्गृहस्थचतुर्गुणं शौचं कृत्वाचम्य पर्वद्वादशीवर्ज्यं प्रणवेन दंतधावनं कृत्वा मृदा

बहिः कटिं प्रक्षाल्य जलतर्पणवर्ज्यं स्नात्वा पुनर्जघे प्रक्षाल्य वस्त्रादीनि गृहीत्वा प्रणवेन प्राणायाममार्जनादि कृत्वा केशवादिनमोंतनामभिस्तर्पयित्वा भूस्तर्पयामीत्यादिव्यस्तसमस्तव्याहृतिभिर्महर्जनस्तर्पयामीति तर्पयेत् ॥ अत्र विशेषो माधवादौ विश्वेश्वर्यादौ च ज्ञेयः ॥ सूर्योपस्थानादिकं त्रिंकालविष्णुपूजादिकं च सिंधौ ज्ञेयम् ॥ विधूमे सन्नमुसले व्यंगारे भुक्तवज्जने कालेऽपराह्णे भूयिष्ठे नित्यं भिक्षां यति श्चरेत् ॥ अत्र भिक्षाभेदा ग्रंथांतरे ज्ञेयाः ॥ अत्र विविदिषोर्दंडिनो माधुकरी मुख्या ॥ दंडवस्त्रादिपरिग्रहणरहितस्य तु करपात्रं मुख्यम् ॥ अन्ये पक्षा अशक्तविषयाः ॥ तत्र माधुकरीपक्षे दंडादि गृहीत्वा पंचभ्यः सप्तभ्यो वा गृहेभ्यो भिक्षां याचयित्वान्नं प्रोक्ष्य भूः स्वधा नम इत्यादिव्यस्तसमस्तव्याहृतिभिः सूर्यादिदेवेभ्यो भूतेभ्यश्च भूमौ क्षिप्त्वा शेषमन्नं विष्णुनिवेदितं भुंजीत ॥ चंडीविनायकादिनैवेद्यं न भुंजीत ॥ भुक्ताचम्य षोडश प्राणायामान्कुर्यादिति संक्षेपः ॥ "यतिहस्ते जलं दद्याद्भिक्षां दद्यात्पुनर्जलम् ॥ भैक्ष्यं पर्वतमात्रं स्यात्तज्जलं सागरोपमम् ॥ एकरात्रं वसेद्ग्रामे नगरे पंचरात्रकम् ॥ वर्षाभ्योन्यत्र वर्षासु मासांश्च चतुरो वसेत् ॥ अष्टौ मासान्विहारः स्याद्यतीनां संयतात्मनाम् ॥ महाक्षेत्र प्रविष्टानां विहारस्तु न विद्यते ॥ भिक्षाटनं जपस्नानं ध्यानं शौचं सुरार्चनम् ॥ कर्तव्यानि षडेतानि सर्वथा नृपदंडवत् ॥ मंचकं शुक्लवस्त्रं च स्त्रीकथा लौल्यमेव च ॥ दिवास्वापश्च यानं च यतीनां पतनानि षट् ॥ वृथाजल्पं पात्रलोभं संचयं शिष्यसंग्रहम् ॥ हव्यं कव्यं तथान्नं च वर्जयेच्च सदा यतिः ॥ यतिपात्राणि मृद्वेणुदार्वलाबुमयानि च ॥ न तीर्थवासी नित्यं स्यान्नोपवासपरो यतिः ॥ न चाध्ययनशीलः स्यान्न व्याख्यानपरो भवेत् ॥" एतद्वेदार्थभिन्नपरम् ॥ एते संक्षेपतो यतिधर्माः ॥ अन्येपि माधवीयमिताक्षरादौ ज्ञेयाः ॥

## अथ परिच्छेदत्रयविषयाः ।

"प्रथमेत्र परिच्छेदे कालसामान्यनिर्णयः ॥
द्वितीयेथ परिच्छेदे विशेषात्कालनिर्णयः ॥ १ ॥
तृतीयस्य च पूर्वार्द्धे गर्भाधानादिसक्रियाः ॥
आह्निकं च प्रकीर्णार्था आधानाद्याः सविस्तराः ॥ २ ॥
देवप्रतिष्ठा शांत्यादि नित्यं नैमित्तकं तथा ॥
तार्तीयिकोत्तरार्धेस्मिञ्जीवत्पितृकनिर्णयः ॥ ३ ॥
श्राद्धाधिकारकालादेर्निर्णयः श्राद्धपद्धतिः ॥
सूतकादेर्निर्णयश्च निर्णयो दुर्मृतावपि ॥ ४ ॥
अंत्येष्टिसंस्कारविधिः संन्यासः सह विस्तरः ॥

प्रायश्चित्तं व्यवहृतिं सर्वदानविधिं विना ॥ ५ ॥
ग्रन्थोपि धर्मशास्त्रार्थः संक्षेपेणात्र निर्मितः ॥
विबुधानां च बालानां तुष्टये कष्टहानये ॥ ६ ॥
मूलभूतानि पद्यानि विकृतानि क्वचित्क्वचित् ॥
निर्विकाराण्यपि नवान्यप्युक्तान्यत्र कानिचित् ॥ ७ ॥
मीमांसाधर्मशास्त्रज्ञाः सुधियोऽनलसा बुधाः ॥
कृतकार्याः प्राङ्निबन्धैस्तदर्थं नायमुद्यमः ॥ ८ ॥
ये पुनर्मदमतयोऽलसा अज्ञाश्च निर्णयम् ॥
धर्मं वेदितुमिच्छंति रचितस्तदपेक्षया ॥ ९ ॥
निबंधोयं धर्मसिंधुसारनामा सुबोधनः ॥
अमुना प्रीयतां श्रीमद्विट्ठलो भक्तवत्सलः ॥ १० ॥
प्रेम्णा सद्भिर्ग्रथः सेव्यः शब्दार्थतः सदोषोपि ॥
संशोध्य वापि हरिणा सुदामसुनिसतुषपृथुकमुष्टिरिव ॥ ११ ॥
श्रीकाश्युपाध्यायवरो महात्मा बभूव विद्वद्द्विजराजराजः ॥
तस्मादुपाध्यायकुलावतंसो यज्ञेश्वरोऽनंत इमावभूताम् ॥ १२ ॥
यज्ञेश्वरो यज्ञवितानदक्षो दैवज्ञवेदांगसुशास्त्रशिक्षः ॥
भक्तोत्तमोऽनंतगुणैकधामाऽनंताह्वयोऽनंतकलावतारः ॥ १३ ॥
एषोत्यजज्जन्मभुवं स्वकीयां तां कौकणाख्यां सुविरक्तिशाली ॥
श्रीपांडरंगे वसतिं विधाय भीमातटे मुक्तिमगात्सुभक्त्या ॥ १४ ॥
तस्यानंताभिधानस्योपाध्यायस्य सुतः कृती ॥
काशीनाथाभिधो धर्मसिंधुसारं समातनोत् ॥ १५ ॥"

इति श्रीमत्काश्युपाध्यायसूरिसूनुयज्ञेश्वरोपाध्यायानुजानंतोपाध्यायसूरिसूनुकाशीनाथोपाध्यायविरचिते धर्मसिंधुसारे तृतीयपरिच्छेदोत्तरार्धं समाप्तम् ॥

## ॥ श्रीपांडुरंगार्पणमस्तु ॥

समाप्तोऽयं ग्रंथः ।